
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1958 विषय कर्मकांड

नाव. श्रीकात्यायनसूत्र (देवयाज्ञिकव्याख्यासहितम्)

लेखक/लिपीकार श्रीदेव (टीकाकार)

पृष्ठ 355 काळ संवत् 1688 पूर्ण/अपूर्ण

M-1958

M-
1958

॥ देवयाज्ञिकभाष्यस्येदं पुस्तकं प्रथमोऽध्याय ॥ ॥

॥१॥
॥देवया॰॥

॥श्रीगणेशाय नमः॥ ॐ ब्रह्माणमथ विष्णुं च शिवं गणपतिं तथा। अंबिकां शारदां चापि वंदे विघ्नो
पशांतये १ कात्यायनं नमस्कृत्य गुरून् श्रीश्रीपतींस्तथा। पितरौ भाष्यकर्तॄंश्च पितृभूत्यादिसंज्ञ
कान् २ कात्यायनप्रणीतेस्मिन् सूत्रे यज्ञप्रकाशके। प्रजापतिस्तनूजोहं कुर्वे व्याख्यामिमां स्फुटं ३
जयंति ते गुरोर्वंद्याः श्रीपतेः पादपांसवः। येषां प्रसादादज्ञोपि चापलं कर्तुमुद्यतः ४ आलोच्य सूत्रभा
ष्यादि क्रियते संग्रहो यतः। स्वकल्पिततत्वशंकात्र न कार्या विबुधैरतः ५ इह पुण्यो वै पुण्येन कर्मणा भ
वति तमेतं वेदानुवचनेन विविदिषंति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनेति अग्निहोत्रं जुहुयात्स्वर्ग
काम इत्यादिभिर्वाक्यैः कर्मणां स्वर्गापवर्गादिश्रेयःसाधनत्वं प्रतीयते। तानि चाग्निहोत्रादिक
र्माणि वेदवाक्यैकवेद्यानि वेदवाक्यानि चानेकशाखाव्यवस्थितया तत्तत्प्रतिवाक्यं नानाविध
परस्परविरुद्धार्थस्फुरणेन दुर्बोधार्थानि बहुभिरर्थवादवाक्यैर्मिश्रितानि च तथाहि अग्निहो
त्रं जुहुयात्स्वर्गकाम इत्यत्र किं स्वर्गो होमाय उत होमः स्वर्गाय। तथा अग्निहोत्रशब्दो गुणविधा

दि

॥१॥
॥भाष्ये॥
त

नार्थो नामधेयं वेति। तथा स वै संवत्सरं दीक्षाभिरेतीत्यादौ क्वचित् संवत्सरशब्दस्य मुख्यार्थत्वं
सहस्रसंवत्सरादौ तस्यैव गौणत्वं। अर्थवादमिश्रपाठाद्विध्यर्थवादसंदेहोपि भवति। किमयं वि
धिरुतार्थवाद इति। यद्यपि जैमिनिशबरस्वामिकुमारिलप्रभृतिभिर्मीमांसायां तानि वाक्या
नि संदेहनिरासपूर्वकं यथार्थव्याख्यातानि संति अधीतशास्त्राणां च तदर्थावगमोपि सुकर
एव तथापि तेषां नानाशाखाव्यवस्थितत्वेन इदानींतनैः सर्वैः पुरुषैरध्येतुं चाशक्यत्वात्तदधी
नं कर्मणां ज्ञानं दुःशकमिदानींतनानामिति मत्वा परमकारुणिको भगवान् कात्यायनाचार्यो
नानाशाखागतविधिवाक्यसंग्रहरूपं कल्पसूत्रं प्रणीतवान्। तत्र पूर्वमधिकारादिकस्य सर्व
कर्मसाधारणस्य निरूपणानंतरं विशेषस्य दर्शपूर्णमासादेर्निरूपणं युक्तं अन्यथा प्रतिवि
शेषं अधिकारादिनिरूपणे ग्रंथगौरवं स्यात्। तस्मान्माभूदिति कृत्वा प्रथमेध्याये यावत्किंचि
त्सर्वकर्मसाधारणं तदुपदिशति तत्रेतदादिमं सूत्रं। अथातोधिकारः। वक्ष्यत इति सूत्रशेषः त

॥२॥
॥देव या०१

त्रायमथशब्दोमंगलार्थश्चानंतर्यार्थश्च मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथोऽथेति अमरोक्तेः
तत्रमंगलमुच्चारणमात्रेण साधयतिदधीवदर्शनादिति आनंतर्यंतु अभिधावृत्त्यावक्ति तेनान्या
यश्चानेकार्थत्वमितिदोषानवकाशः अपेक्षितंवप्रारिप्सितस्यग्रंथस्याविघ्नेनपरिसमाप्तयेप्र
चयगमनायचमंगलस्यानंतर्यंच न यतः कुतश्चित् अनुपयोगात् किंतुवेदाध्ययनापेक्षया
तस्यात्रापेक्षितत्वात् अतःशब्दोत्रहेत्वर्थस्तस्यैववेदाध्ययनस्यवेदार्थविचारंप्रतिहेतुमाह अ
धिक्रियतइत्यधिकारः स्वाम्यंफलफलभोक्तृतयाकर्मणि ऐश्वर्यमित्यर्थः तेनायमर्थः अथवे
दाध्ययनानंतरं यतोधीतोवेदः अतोहेतोरधिकारोवक्ष्यते अभिधास्यतेविचारपूर्वकंनिरूपयि
ष्यतइत्यर्थः अधिकारग्रहणंसर्वेषांवेदवाक्यप्रतिपाद्यानामर्थानामुपलक्षणार्थं अधिकारादि
कः सर्वोपिवेदवाक्यार्थोभिधास्यतइत्यर्थः प्रतिज्ञासूत्रमिदंप्रतिज्ञायतइदं अधिकारोवक्ष्यत
इतिप्रतिंकरणंचशिष्यबुद्धेरव्याकुलतार्थं अन्यथाहिकिमिदमुच्यतइतिबुद्धेर्व्याकुलताभव

ता

॥२॥
॥भाष्य॥

त्रा

वति केचित्त्वेवंव्याचक्षते अयमध्यायः सूत्रकृतानित्यकाम्यप्रायश्चित्तोपदेशानंतरंउपनि
बद्धः तेनाथशब्दः सर्वकर्मोपनिबंधनानंतर्ये अतःशब्दस्तुहेत्वर्थएव यतोदर्शपूर्णमासादीनि
प्रवर्ग्यांतानिकर्माण्युक्तानि अतस्तेष्वेवकर्मस्वधिकारउच्यते एषुपूर्वोक्तेषुकर्मसु अस्याधि
कारः अस्यस्वामित्वं अस्यकर्मजन्यफलभोक्तृत्वमितिवक्ष्यतइत्यर्थः यतउक्तेष्वेवकर्मसुए
वमपेक्षाजायते एतेष्वग्निहोत्रादिकर्मसुकस्याधिकारइति अतएवंप्रतिज्ञा अथसर्वकर्मो
पबंधनानंतरं यतःकर्माण्युक्तानि अतस्तेष्वधिकारोभिधीयतइति अधिकारोवक्ष्यतइतिप्र
तिज्ञातं कर्मजन्यफलभोक्तृत्वंचाधिकारइत्युक्तं तत्रकर्मणांफलत्वेसिद्धेसतिसिध्यतिना
न्यथा तेनतत्साधनार्थमिदंसूत्रंप्रारभ्यते तत्रैवंसंदेहः किमफलवंतिकर्माणिउतफलवंती
ति अफलवंतीतिब्रूमः कुतः कर्मसमनंतरप्रत्यक्षेणफलस्यानुपलब्धेः ननुमाभूत्प्रत्य
क्षं कर्मणांफलेत्वेप्रमाणं आगमस्तुभविष्यतीति कथ्वासौ आग्निहोत्रंजुहुयात्स्वर्गका

स

व

॥३॥
॥देवया०१

कामः। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादि सत्यं भविष्यति तथाप्यत्रैतद्विचारार्हं अत्राग्नि
होत्रादिषु किं पुरुषस्याधिकारः स्वाम्यं कर्मकर्मजन्यफलभोक्तृत्वमस्ति न वेति तदर्थमिदं विचार्यते
यजेत जुहुयादित्यत्र येयं प्रत्यययोयात्रा भावना तस्यां किं धात्वर्थ एव भाव्यः प्रधानं यागं कुर्यात् हो
मं कुर्यादित्येवं स्वर्गादि तु तत्साधनतया गुणभूतं स्वर्गेण यागं च होमं कुर्यादिति उत काम्यमा
नत्वेनोपात्तः स्वर्गादिरेव भाव्यस्तत्र च साधनं धात्वर्थ इति यागेन होमेन स्वर्गं कुर्यादिति न तोप्ये
तद्विचार्यते योऽत्र क्रियायाः स्वर्गकामादेश्च पुरुषस्य क्रियाकर्तृरूपः संबंधः तत्र किं क्रिया प्रधानभू
ता पुरुषो गुणभूतः अथवा पुरुषः प्रधानभूतः क्रिया गुणभूतेति यदि गुणभूतः पुरुषस्तस्य गुण
भावक्रियाद्वेपादेव सिद्धमनुद्य स्वर्गादिद्रव्यं साधनं विधीयते कामश्रुतिश्च साधनकामनानु
वादः अयमर्थः स्वर्गसाधनत्वेन कामयमानो यजेत स्वर्गेण यागं कुर्यादित्यर्थः अथवा समुद्रम
न साध्यायन् रथंतरं गायेदिति स्वर्गकामनेव गुणभूतकर्तृविशेषणं सती यागांगत्वेन विधीयते

॥३॥
॥भाष्य॥

यदि द्रव्यवाची ततः कर्मप्रधानं द्रव्यं गुणभूतं अथ सुखवाची तदा यागो गुणभूतः स्वर्गप्रधानमिति प
इति द्वेधा पूर्वः पक्षः अथवा प्रधानभूतः पुरुषः ततस्तस्यात्मार्थस्वर्गादिगोचरा प्रवृत्तिः प्रत्ययेन
विधीयते साधनतया वा याग उपदिश्यते स्वर्गकामो यागेन कुर्यादीत्यार्थं प्रवृत्तिमिति स्वर्गका
मस्य चार्थाप्रवृत्तिः स्वर्गविषयैवेति स्वर्गभाव नैवानेन प्रकारेणोपदिष्टा भवति तदयमर्थः यः स्व
र्गं प्राप्तुमिच्छति स यागेन कुर्यादभिलषितं स्वर्गश्च तस्याभिलखित इति स्वर्गभावयेद्यागेनेत्युक्तं
भवति तथा स्वर्गशब्दः स्रक्चंदनवनितादिद्रव्यवाची सुखवाची वेति तत्र पूर्वपक्षः अत्र यजेत जु
हुयादित्यनेनाख्यातेन भावनाभिधीयते तस्यां च धात्वर्थ एव भाव्यः एकपदोपात्तत्वात् स्वर्गस्तु प
दांतरोपात्तत्वाद्वाक्येन भाव्यतयान्वेतव्यः वाक्यं च श्रुतेर्दुर्बलं स्वर्गस्य च भाव्यत्वाभावे सति गुण
त्वमंगीकार्यं स्वर्गशब्दश्चात्र सुखसाधनचंदनादिद्रव्यवाची चंदनं स्वर्गो हि रूपवर्षाः स्त्रियः स्वर्ग
कौशिकाणि सूक्ष्माणि वासांसि स्वर्ग इति लोके व्यवहारदर्शनात् सर्वत्र शब्दार्थे तस्यैव प्रामा
ण्यात् तच्च कामपि तुं योग्यं तेन विना यागानिष्पत्तेः द्रव्यं च भूते सिद्धं कर्म सुभव्यं साध्यं भूतस्य

॥४॥
॥देवया०१

चभव्यार्थतायुक्तादृष्टार्थत्वात् ननु भव्यस्य भूतार्थता दृष्टोपकाराभावात् तस्मादपि यागहोमा
दिर्द्धात्वर्थ एव भाव्यः अथवा स्वर्गादिकामनैव यागांगमित्यस्मिन्नपि पक्षे तथैव न चयोगेन किमपि
फलं साध्यत इत्युक्तं तस्मादफलत्वेव कर्माणि निःफलेषु च तेषु लोभाभावाद्बुद्धिवित्तव्ययायासस
ध्यत्वाच्च न कश्चित्प्रवर्त्तेतेति न कस्यापि कर्मजन्यफलभोक्तृत्वापरपर्यायोधिकारः सिद्ध्यतीति प्रा
प्तेत्राह ॥ फलयुक्तानि कर्माणि ॥ फलं पुरुषाभीष्टं स्वर्गधनपुत्रादिकं कर्माण्यग्निहोत्रादीनि फ
लयुक्तानि फलैः संबद्धानि फलवंति फलस्य साधकानि भवंतीत्यर्थः कथं इत्थं यजेत जुहुयादि
त्यत्र प्रत्ययस्य केवलमाख्यातरूपत्वमेवेति न मंतव्यं किंतु लिङ्प्रत्ययत्वेन विधिरूपत्वमप्यस्ति त
त्राख्यातत्वाकारेण भावनामाचष्टे विधित्वाकारेण पुरुषं प्रवर्त्तयति पुरुषश्च स्वाभिमतं फलमंत
रेण न प्रवर्त्तत इति तदपेक्षितं स्वर्गमेव भाव्यतया विधिरुपादत्ते स्वर्गशब्दश्च सर्वोत्कृष्टसुखरूपं
तथा हि यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं इच्छामात्रोपनीतं तत्सुखं स्वर्गपदास्पदमिति इत्थे

॥४॥
॥भाष्ये॥

तुल्यार्हणिकः तस्मात्स्वर्गस्य भाव्यत्वं विधिश्रुत्या सिद्धं धात्वर्थस्य तु भाव्यत्वमेकेन पदेन प्रतीयमान
मपि न प्रत्ययेनावगम्यते किंतु प्रकृत्या न तथा सति स्वर्गभाव्यत्वं भावनायाः प्रत्यासन्नं एकेनैव विधि
रूपेणाख्यातप्रत्ययेनावगमात् किमयोगादपि स्वर्गस्यैव भाव्यत्वं यागहोमादि तु तत्साधनं तथा हि
किं स्वर्गकामो यागायोपदिश्यते यथा लोहितोष्णीषाः प्रचरंतीति यदि वा यागः स्वर्गकामाय य
था मलिनः स्नायात् बुभुक्षितोश्नीयादिति तत्र यदि स्वर्गकामः कर्मण उपदिश्यते उपदिष्टोपि
न प्रवर्त्तेत को हि परार्थं प्रयासमातिष्ठेत तथा च कर्मचोदनानर्थिकैव भवति अथ यागः स्वर्ग
कामार्थः ततोसौ पुरुषस्योपकरोति न पुरुषः स्वार्थे न करोतीति तथा च कर्मचोदनार्थवती
भवति तस्माद्यागः स्वर्गकामस्योपकारकः स्वर्गकामस्यानेकउपकारः पुत्रपशुग्रामान्नाद्या
दिलाभरूपः स यदि तत्रान्नाद्यादीनामन्यतमं करोतीति ततः स्वर्गशब्दो विवक्षितार्थः पुरुषमा
त्रवचनो भवति तथा चानर्थकमेवं अंतरेणापि हि तद्वचनं पुरुषमात्रमाख्यातादेवगम्यते त

॥८॥
॥देवया०१

स्माद्यागात्स्वर्गो भवतीति निश्चीयते । अतश्च स्वर्गकामो यागेन कुर्यादिति वाक्यार्थः । अत्र स्वर्गप्रा-
र्थ्यमानस्यानुष्ठानमनूद्य यागस्तस्योपायत्वेन विधीयते । अतः स्वर्गादिकं यागादेः फलमिति सि-
द्धं फलवंति कर्माणीति च । अतः कर्मणां फलवत्त्वात्कर्मजन्यफलभोक्तृत्वात्पुरुषस्याधिकारोपि
पुरुषस्याग्निहोत्रादिकर्मसु सिद्ध्यति । अधिकारो वक्ष्यते इति प्रतिज्ञातं स केषामित्यपेक्षायामाह
सर्वेषामविशेषात् ॥ सर्वेषां कर्मानुष्ठानसमर्थानामसमर्थानां चांधमूकपंगुबधिरदेवर्षि-
पितिरश्चां कर्मस्वधिकारो भवति कुतः अविशेषात् फलार्थित्वस्य सर्वेषामविशिष्टत्वात् फलं हि
सर्वैरिष्यत एव न त्वचेतनानां वृक्षादीनां कामनाभावादस्त्वनधिकारः तिरश्चां तु भवति तिर्यंहि

चो
॥८॥
॥भाष्ये॥

तापोपतप्ताश्छायां व्रजंति शीतपीडिताश्चातपं ननु तिर्यंचः प्रत्यासन्नमेव जानंति न तु कालांतर
भाविफलं वैदिकानि च कर्माणि कालांतरफलान्येव अतः कथं तिरश्चां तत्र प्रवृत्तिः उच्यते कालां-
तरेपि फलं कामयमाना दृश्यंते श्वानश्चतुर्दश्यामुपवसंति श्येनाश्चाष्टमीमिति लिंगान्यपि वेदे सं-

ति देवा ह वै सत्रमासत सर्पाः सत्रमासत वनस्पतयः सत्रमासत गावो वा एतत्सत्रमासतेत्यादी-
नि तानि च देवानां सर्पाणां वनस्पतीनां गवां चाधिकारं दर्शयंति नन्वेतेंधादयो यथोक्तं कर्म कर्तुं
न शक्नुवंतीति कथमधिकार एषां उच्यते यजेतेत्यादिप्रधानवाक्येन स्वर्गाधिकारकर्मावगते त-
दनुसारीणि चांगवाक्यानि न तत्संकोचसमर्थानि अतश्चक्षुष्मते प्रत्याज्यावेक्षणविधिः अच-
क्षुषस्तु तद्विध्यभावात्तद्रहितमेव फलसाधनं एवं बधिरस्य वाचनरहितं मूकस्य मंत्रोच्चारणर-
हितं पंगोश्च विष्णुक्रमणरहितमिति सर्वेषामर्थिनामशक्यांगरहितकर्मानुष्ठानात्सिद्धोधिका-
र इति पूर्वः पक्षः सिद्धांतमाह ॥ मनुष्याणां वारंभसामर्थ्यात् ॥ वाशब्दः पक्षव्यावृत्तौ न सर्वेषा-
मधिकारः किंतु मनुष्याणामेव कुतः आरंभसामर्थ्यात् मनुष्या एव हि यथाश्रुतं कर्मारब्धुं क-

म

र्तुं समर्थाः न देवर्षितिर्यगादयः तत्र देवानां देवतांतराभावात् अनधिकारः न ह्यात्मानमुद्दिश्य
त्यागः संभवति किंच देवाश्च प्राप्तस्वर्गादिकामाः न च तेषां किंचिद्देवाप्तव्यमस्ति यदर्थं कर्माणि कु-

गो

वैते ऋषीणां चार्षेयाभावादनधिकारः । न हि भृग्वादयो भृग्वादिसंत्रा भवंति । तत्र रत्नेतु विशेषः

अनादिर्हि कालोस्माकं मीमांसकानां । तेन भृगोरपि पूर्वं पूर्वं भृग्वंतरसंभवात्ततः पूर्वमप्येवमेव

तिसंभवत्येव भृगोर्भार्गवत्वमित्यस्त्येव ऋषिणामप्यधिकारः । तथा येषां शब्द एव देवता तेषामिदम

युक्तं यद्देवानां देवतांतराभावादनधिकार इति । शक्यते हींद्रेणापींद्रशब्दोच्चारणेनह विस्त्यक्तुं । त

स्माद्देवानामप्यधिकार इति । न च तिरश्चां गवादीनामधिकारः । प्रधानमात्रेपि सामर्थ्याभावात् । आस

न्नचेतनत्वाच्च । ते ह्यासन्नमेव चेतयंते न पारलौकिकं फलमीति । ननु श्येनस्य चतुर्दश्यामुपवासदर्श

नात् । श्येनस्य चाष्टम्यामुपवासदर्शनाच्च तेपि पारलौकिकं जानंतीति । नत्कथमवगम्यते एते धर्मा

र्थमुपवसंतीति । ये हि वेदस्मृतिपुराणादिकं पठंति । त एवं जानंति यदनेन कर्मणा इदं फलममुत्र प्राप्य

ते इति न चैते वेदादिकं पठंति । नाप्यन्येभ्य आगमयंति तेन शास्त्रार्थमविद्वांसः फलमामुष्मिकमकाम

यंतः कथं तत्साधनं कर्म कुर्युः । तस्मान्न धर्मार्थमुपवसंतीति । किमर्थं तर्हि तेषामुपवासः । उच्यते रोगा

॥६॥
।।देवेया०१।

६

॥६॥
।।जोषे।।

द्रुचिरेषां । तर्हि नियतकाले कथं रोगः । उच्यते । नियतकाला अपि रोगा भवंति । यथा तृतीयकचातु

र्थिकादिज्वराः अथ नाश्वेनेत । तस्मान्न गवादीनां तिरश्चामधिकारः । यानि पुनर्लिंगानि देवा ह वै

सत्त्रमासतेत्यादीनि अर्थवादास्ते विधिप्ररोचनार्थाः । इत्थं सत्राणि प्रशस्तानि यानि कृतवंत्या अ

पि देवाः आसते आसन्नचेतना तिर्यंचोपि अचेतना वनस्पतयोपि । किंपुनर्मनुष्या यथाश्रुतमनु

ष्ठातुं समर्था इति । तस्माद्यथाश्रुतकरणसामर्थ्यान्मनुष्याणामेवाधिकारो न गवादीनां इति सिद्धं

॥ एवमपि सर्वमनुष्याणामधिकारे प्राप्त आह ॥ अंगहीनाश्रोत्रियषंढशूद्रवर्ज्जं नं सुलपं अंग

हीनाश्रोत्रियषंढशूद्रान्वर्जयित्वा मनुष्याणामधिकारः कर्मसु भवति । मनुष्या अपि ये अंगही

ना अंगेन चक्षुरादिना हीनाः । अंधपंगुमूकबधिरादयः अश्रोत्रियास्त्वनधीतवेदाः षंढा नपुंस

काः शूद्राश्च नैतेषामधिकार इत्यर्थः । आरंभसामर्थ्यादित्यत्राप्यनुवर्त्तते । न चैते अंगहीनादयो यथा

श्रुतं कर्मारब्धं कर्तुं शक्नुवंति । तद्यथा । न ह्यंध आज्यावेक्षणं कर्तुं शक्नोति मूको मंत्रोच्चारणं । पंगु

॥७॥
॥देवया०१

श्चविष्णुक्रमणं। बधिरस्य प्रैषश्रवणं। अनधीतवेदोऽश्रोत्रिय इत्युच्यते। स च किमपि मंत्रसाध्यं क
र्म कर्तुं न शक्नोति। षंढो नपुंसकः। तस्याप्यनधीतवेदत्वाद् षंढत्वाद् अशुचित्वाच्चानाधिकारः। शूद्र
स्य चानधीतवेदत्वादनधिकारः। आज्यावेक्षणादिभिश्च विना कर्मणो वैगुण्यं भवत्येव। ननु क्रम
शक्त्यंगरहितकर्मानुष्ठानादधिकारो भवतीति। अत्रोच्यते। भवेदेवं यदि आज्यमवेक्षेत इत्यादी
न्यंगवाक्यानि स्वातंत्र्येण पुरुषैः संबध्येरन्। प्रधानवाक्यशेषत्वात्तेषां तदंगयुक्तेन प्रधानवाक्येन त
दंगयुक्तः क्रतुः पुरुषैः संबध्यमानोऽसमर्थान्परित्यज्य समर्थान्प्रतिज्ञायते। तेनांधस्य क्रतुरेवावि
हितो न त्वाज्यावेक्षणमेवाविहितमितरस्य विहितमिति मंतव्यं। न च प्रधानवाक्यविरोधः सर्वा
धिकारो निश्चयात् विशेषाभावाद्धि सर्वाधिकारः स्यात् दृष्टिश्च विशेषश्चारंभसामर्थ्यं। अतः समर्था
नामेवाधिकारः। यत्र प्रधानवाक्यविरोधो यावज्जीवं यजेतेत्यादौ। तत्र यथाशक्तिप्रयोगादपि फ
लं भवति। तदविरोधे तु सर्वांगयुक्तकर्मानुष्ठानादेव फलं। ननु आरंभसामर्थ्यादित्यनेनैवांगवा

॥७॥
॥भाष्ये॥

॥

दीनामिवांधादीनामप्यधिकाराभावसिद्धेः किमर्थं पुनरंगहीनादिवर्जनमित्युक्तं। उच्यते। निष्प्रमार्थे। स
तेषामेवानधिकारो न निर्धनस्य तस्य चाधिकारो भवत्येव। न त्वारंभसामर्थ्याभावादनधिकारः। अ
तो निर्धनोऽपि कृत्स्वार्थं धनमर्जनादिना संपाद्यावश्यं यजेतेति। एवमंधादिरपि पश्चाद् औषधिशस्त्रादिनांधत्वा
दिकं स्फोटयितुं शक्नोति। तस्याप्यधिकारो भवत्येव। पूर्वमनंगहीनत्वावस्थायामाहिताग्निश्चेत्पश्चादंगा
दिनांगवैकल्ये जाते काम्येऽधिकारो न भवति। नित्येषु तु यथाशक्ति कुर्वन्नधिक्रियत एव। अंगवैकल्ये स
ति अग्न्याधेयं न भवत्येव। मंडनः। दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहं। अग्निहोत्रं विवाहं च प्रयो
गे प्रथमे स्थितं। न कुर्याज्जनके ज्येष्ठे सोदरे वाथ कुर्वति। ज्येष्ठश्चेद्वा विहीनेन न सत्याधेयं तदनुज्ञया। पि
तुः सत्यप्यनुज्ञातेनादधीत कदाचन। हारीतः। सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परि
विद्यं ते नाधाने न च नेज्यये ति। कात्यायनः। देशांतरस्थक्लीबैकवृषणानसहोदरान्। वेश्यातिस
क्तपतितशूद्रतुल्यातिरोगिणः। जडमूकांधबधिरकुब्जवामनषोडकान्। अतिवृद्धानभार्यांश्च कृषि

॥८॥
॥देवया०१

सक्तानृपस्य च । धनवृद्धिप्रसक्तांश्च कामतो कारिणस्तथा । कुलटोन्मत्तचौरांश्च परिविंदन्न दुष्यति । तथा
नाधिकारविद्यातोस्तिपित्र्योदर्योपि सोदरे । एवं धर्मकबधिरपतितोन्मादद्दूषणे संन्यस्ते छिन्नहस्ता
दौ यदा षंढादिदूषके । जनके सोदरे ज्येष्ठे कुर्यादेव ततः क्रियां ननु द्रव्यवतोऽनंगहीनस्य समर्थस्य सतः
शूद्रस्याधिकारः कथं न भवति । वेदे चैवंविधानि लिंगान्यपि संति यैः शूद्रस्याधिकारो भवतीत्यतो ग
म्यते आधावेति शूद्रस्येति ह विष्णुदाक्षाने । मस्तु शूद्रस्येति सोममपयो व्रतस्थाने । अष्ठीवदघ्नं शूद्रस्ये
ति पितृमेधे । ननु चानधीतवेदत्वात्कथमधिकार इति उच्यते । अनुपनीतस्यापि अनधीतवेदस्यापि प
त्नीवद्भविष्यतीति प्राप्त आह । ब्राह्मणराजन्यवैश्यानां श्रुतेः शूद्रस्य कुतो नाधिकार इत्यत्र हेतुः
ब्राह्मणराजन्यवैश्यानामेवाधानश्रुतेः । यतो ब्राह्मणादीनां त्रयाणामेवाधानं श्रूयते । न शूद्रस्य
तथा हि वसंते ब्राह्मणोग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति श्रुतेः शूद्रस्याग्न्याधानश्रवणा
भावादनग्निः शूद्रः । अतस्तस्याग्निसाध्ये कर्मण्यधिकाराभावः । नन्वन्याहितानेवाग्नीन् क्रीतलब्धा

॥८॥
॥भाष्ये॥

नादाय करिष्यति । मैवं आदधीतेत्यात्मनेपदाद् आधातुरेव फलेन भवितव्यं । कर्मयोग्यता चाग्नीनां त
त्फलं अतोन्येनाहिताः अन्यस्य कर्म न साधयंति तेनान्याहितानामग्नीनामुपादानमयुक्तं । अतः
शूद्रस्याधानाश्रवणात् तदेकोपायसाध्यानामग्नीनामभावादग्निसाध्ये कर्मण्यनधिकारः । अथवा
ब्राह्मणराजन्यवैश्यानामेवोपनयनश्रुतेः शूद्रस्यानधिकारः । तथा हि वसंते ब्राह्मणमुपनयी
त ग्रीष्मे राजन्यं शरदि वैश्यमिति । उपनयनं चाध्ययनार्थं । अतोनुपनीतस्याध्ययनाभावादनधीत
वेदत्वादनधिकारः शूद्रस्य । ननु मा भूदुपनयनं अनुपनीतोपि पठिष्यंति । मैवं शूद्रस्य वेदाक्षरश्रव
णे उच्चारणे धारणे च प्रायश्चित्तस्य दर्शनात् । श्रवणे त्रपुजतुभ्यां श्रोत्रपूरणं । उच्चारणे जिह्वाच्छेदः
धारणे च शरीरभेद इति । तथा यद्युवा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येयमिति शूद्रस
मीपेप्यध्ययनं प्रतिषेधति । ननु तर्हि आधावेति शूद्रस्येत्यादीनां लिंगानां का गतिः उच्यते । रथकार
विषयाणि तानि रथकारस्य हि कर्मस्वधिकारं वक्ष्यति रथकारस्याधान इति स च शूद्रात् संबंधाच्छू

॥१॥
॥देवया०१

ःकथ्यते। तस्य मातामही शूद्रेति। अथ ब्राह्मणो यजेत स्वर्गकामो यजेतेत्येवमादिषु विधिं संदिह्यते किं ब्राह्म
णः स्वर्गकामं च पुरुषमेवाधिकृत्य यजेतेत्येष शब्दः प्रवृत्तः। उतानियमः॥ स्त्रियं पुमांसं वेति। किं तावत्प्रा
प्तं। पुल्लिंगनिर्देशात्पुरुषस्यैवाधिकारः। कुतः। अत्र लिंगस्य प्रकृत्यर्थतया विवक्षितत्वात्। यथा एकं
समाष्टीत्यत्र। अतः पुरुषस्यैवाधिकारो न स्त्रियाः। अद्रव्यत्वाच्च। यतः स्त्रि निर्द्धना। अतः सा द्रव्यत्यागा
त्मकं कर्म कर्तुं कथं शक्नोति। द्रव्याभावात्। द्रव्याभावश्च भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। य
त्ते समधिगच्छंति यस्य ते तस्य तद्धनमिति स्मृतेः। तस्मात्पुरुषस्यैवाधिकार इति प्राप्ते आह। स्त्रीचा
विशेषात्। स्त्री च अग्निहोत्रादिकर्मस्वधिकारिणी भवति। कुतः। अविशेषात्। यतः स्वर्गकामो ब्रा
ह्मण इत्येतत्पुल्लिंगं श्रूयमाणमपि न विशेषकरं। यत इदमुद्दिश्यमानस्य विशेषणं। यः स्वर्गका
मः स यजेतेत्येवं तेन विधिसंस्पर्शाभावादविवक्षितं। अतो न पुरुषस्याधिकारः। किंतु स्त्रिया अ
पि अथवा अविशेषादिति स्वर्गकामत्वाविशेषादित्यर्थः। तदुक्तं जैमिनिना। फलोत्साहाविशे

॥१०॥
॥भोर्य॥

षादिति। ननूक्तं निर्द्धनत्वान्नाधिकार इति। मैवं। धनवती हि सा। तस्या अपि कर्त्तनादिना द्रव्या
र्जनसंभवात्। पितृभ्रातृभर्त्रादिदत्तसंभवाच्च। पत्यार्जितस्योभयसाधारणाच्च। धर्मे चार्थे च का
मे च नातिचरितव्या। पाणिग्रहाद्धि सहत्वं कर्मसु तथा कर्मफलेषु द्रव्यपरिग्रहेषु चेत्यादिस्मर
णात्। ननूक्तं यत्ते समधिगच्छंतीत्यादिकं। तत्रोच्यते। स्मृतिप्रामाण्यान्निर्द्धनया भवितव्यं। श्रु
तिविशेषात्फलार्थिन्या यष्टव्यं। यदि स्मृतिमनुरुध्यमाना परवशा निर्द्धना च स्यात्। यजेतेत्युक्ता
सती न यजेत। तत्र स्मृत्या श्रुतिर्बाध्येत। न चैतद्युक्तं। तस्मात्फलार्थिनी सती स्मृतीमप्रमाणीकृत्य
द्रव्यं परिगृह्णीयात्। यजेत चेति। अतः स्मर्यमाणमपि निर्द्धनत्वमन्याय्यमेव। श्रुतिविरोधात्।
अतो निर्द्धनत्वप्रतिपादकं वचनं अस्वातंत्र्यपरं व्याख्येयं। तस्मात्स्त्रिया अपि फलार्थित्वावि
शेषाद्धनवत्त्वाच्चाधिकारो भवति। दर्शनाच्च। दृश्यते चायमर्थो वेदे। यत्पत्न्यपि कर्मस्वधिक्रिय
त इति। मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीमिति। लोहइति पत्नी च गार्हपत्येतष्टीमि

॥१०॥
॥दैवया०१

तिचअत्रयोक्ताद्दिविधिपरेषुवाक्येषुपत्न्याअपिकर्मस्वधिकारदर्शनात्पत्न्यप्यधिक्रियतइत्यु
क्तं । अथवावेदंपत्न्याअपिधनवत्त्वादर्शनाच्चपत्न्यप्यधिक्रियते । तथाहि । भसदापत्नींसंयाजयंति
भसद्धीयंहिपत्न्योभसदावाएताःपरगृहाणामैश्वर्यमवरुंधतइति । एवंपत्न्याअधिकारेसिद्धे
इदंचिंत्यते । किंपत्नीपृथग्यजते । यजमानश्चपृथक् । उतोभौसंभूययजेयातामिति । किंप्राप्तंपृथ
क्पृथगितिकुतः । यजेतेत्याख्यातप्रत्ययगताया । एकत्वसंख्यायाउद्देश्यगतत्वाभावेनविव
क्षावारयितुमशक्यत्वात् । अतएककर्तृकत्वसिद्धयेयजमानेनपत्न्याचपृथक्पृथक्यागःक
र्तव्यइतिपूर्वपक्षः । सिद्धांतस्तु । नपृथग्यागःकार्यः । कुतः । वैगुण्यप्रसंगात् । दर्शपूर्णमासादावा
ज्यस्यपत्न्यवेक्षणंयजमानावेक्षणंचेत्युभयमाम्नातमस्ति । तत्रपृथक्प्रयोगेक्रियमाणेयज
मानकर्तृकेयागेपत्न्यवेक्षणंलुप्येत । पत्नीकर्तृकेचयाजमानावेक्षणं । तस्माद्वैगुण्यापत्तेःस
हैवदंपतीयजेयातां । ननुपृथगपियजमानःपुमान्द्धर्यादिवत्परिक्रयेणाज्यावेक्षणार्थंप

॥१०॥
॥भाष्ये॥

त्नींसंपादयिष्यतिस्त्रीचयजमानं । मैवं । स्वामिनःपरिक्रयेणासंपत्तेः । नहियाकाचित्स्त्रीपत्नी
शब्दवाच्या । यज्ञस्वामिनीहिसा । पत्युर्नोयज्ञसंयोगइतिपाणिनिस्मरणात् । एवंयजमानशब्दम
पियज्ञस्वामित्वेवस्मरंति । तस्मात्सहैवकर्तृकमुभयोः । नचयजेतेत्येकत्वंविरुद्धं । अग्नीषोमौदे
वतेत्यत्रयथाव्यासक्तयोर्देवतात्वाद्देवतैका । तथादंपत्योरेकमेवकर्तृत्वमित्यंगीकारात् । अनयो
र्हिउद्वाहकालएवद्रव्यसाधारण्यमुक्तं । धर्मेचार्थेचकामेचनातिचरितव्येत्यनेन । अतोयस्त्या
गःसइतरेतरसंसृष्टयोरेवदंपत्योः । नहिसाधारणमेकेनत्यक्तुंशक्यते । भिन्नयोरपिदंपत्योःसं
सृष्टद्रव्ययोःपृथक्स्वतंत्रीकर्तुमप्रभवतोरेकमेवस्वातंत्र्यलक्षणंकर्तृत्वं । नतुसत्रिवत्कर्तृभेद
इतियुक्तमेकवचनं । सत्रिणांहिपृथग्द्रव्यतयापृथगेवकर्तृशक्तिर्वाचनिकानेककर्तृत्वसिध्यर्थं
तुकद्रव्रणातुसाहित्यंइहतुसहैवकर्तृत्वमितिविशेषः । ननुसाधारणमपिधनंविभज्यपृथग्या
गःसंभवति । मैवं । यतस्तयोर्विभागःप्रतिषिद्धोनभर्त्रासहविभजेदिति । तस्मान्नविभज्ययागःअ

॥११॥
॥दे नया०१

तोऽद्रव्यसाधारण्याद्विभागप्रतिषेधाद्धर्मे चार्थे च कामे च नातिचरितव्येति वचनात्पृथक्प्रयोगे प्रा
गुक्तवैगुण्यापत्तेश्च स्वामिभ्यां समुच्चिताभ्यामेव विहितस्याज्यस्य कर्मांगत्वाच्च न पृथक्कर्तृत्वं किं तु स
हैव । एवं च यजमानविद्वत्त्वे यैव पत्न्या अपि कार्यसिद्धेर्नाविद्वत्तया तस्या अधिकारभंगः । अत एव सू
त्रकारोऽनुचरिर्वा फलत्वाधिकारादितरासामिति पत्न्या अपि फलं दर्शयति । श्रुतिरपि दिविज्योति
रजरमारभेतामिति । तथा च स्मृतिः । नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं । शुश्रूषयति भ
र्तारं तेन स्वर्गे महीयते इति । एवं दंपत्योः सहाधिकारे तुल्यफले च सिद्धे इदं चिंत्यते । किं सर्वं याज
मानं पत्न्या अपि कर्तव्यं । उत यावदुक्तमाशीर्ब्रह्मचर्यादिकमिति । किं प्राप्तं । तस्या अपि यजमानत्वेन
तुल्यत्वात्सर्वं याजमानं तयापि कर्तव्यमित्येवं प्राप्ते ब्रूमः । अत्र जैमिनिसूत्रं । तस्या यावदुक्तमा
शीर्ब्रह्मचर्यमतुल्यत्वादिति । तस्या यावदुक्तं स्यात् । कुतः । अतुल्यत्वात् । यजमानस्तु पुमान् वि
द्वांश्च । पत्नी च स्त्री चाविद्या च । अतः कृत्वर्थेषु यानि यजमानग्रहणानि तत्र यथा यजमानो वेदं बध्ना

॥११॥
॥भाट्टे॥

ति पात्राण्यासादयति शुक्रमन्वारभते इत्यादीनि तत्र यजमानस्योपादेयत्वादेकवचनं विव
क्षितं । अतस्तत्र न पत्न्याः कर्तृत्वं । एवमेव पत्न्याऽप्यमवेक्ष्यते अदस्मै न रा इत्येनमवेक्षते पत्नी इत्या
दौ पत्न्या एव कर्तृत्वं न यजमानस्य । उक्तादेव हेतोः । यानि च क्रत्वर्थानि समंत्रकाणि तेष्वविद्य
त्वात्पत्नी न स्यात् । स्त्रीणामध्ययनप्रतिषेधात्सा मंत्रोच्चारणं कर्तुं न शक्नोति । न चान्यथानुप
पत्त्या तस्या अप्यध्यानं कल्पयितुं शक्यते संपन्नविद्ये न पुंसा तेषामनुष्ठानसिद्धेः । यद्धि क्रत्वर्थं
तदेकेन केनचित्कर्तव्यं । अतोऽनुपपत्तेः क्षीणत्वात्प्रतिषिद्धस्य पत्न्या अध्ययनस्य पुनः प्रसवे न किंचि
त्प्रमाणमस्ति । तस्मात्तदपि पत्न्या न कर्तव्यं । या आशिषो यच्च ब्रह्मचर्यं तत्पुरुषं प्रतिगुणभूतं न
तत्रान्यतरेण कृते सिध्यति अन्यतरस्य संस्कारो हीयेत । न च तत्र यजमानस्योपादेयत्वेन श्र
वणं । तस्मात्त्लिंगमप्यविवक्षितं । अत आशीर्ब्रह्मचर्यमुभयोः । आशीःशब्देनात्र संस्कारात्मकं प
ते व्रत्याशनाधःशयनपावनाखंजनाभ्यंजनादयः । ते ह्युभयोर्भवंति । संस्कारेष्वपि पत्न्या च

॥१२॥
॥देवया०१

पनं न भवति। कुतः। वपनविधौ केशश्मश्रु वपत इति समाहारद्वंद्वोयं। तत्र केशश्मश्रुणोरितरेतरस्य
योगे सति शास्त्रोक्तं वपनं न संपद्यते। न च पत्न्यास्तयोः साहित्यमस्ति श्मश्रुभावात्। अतस्तस्या न व
पनमसादिति तं त्ररत्ने। ब्रह्मचर्यग्रहणं कामानां लक्षणार्थं। ब्रह्मचर्यस्याशीर्ग्रहणेनैव लब्धत्वा
च्च। अतः सर्वं समंत्रकममंत्रकं च यजमानं यजमानेनैव कर्तव्यं। आहृत्यविहितं त्वाज्यावेक्षणा
दि कामा अपि पत्न्या भवंति तदभावे धिकारानुपपत्ते। ये पुमंत्रकाः क्रत्वर्थास्तेषु पि यजमान एव कर्ता
विद्वत्वात्स्वे तत्र त्वा^ दि पत्न्या कर्तव्यं नान्यत्। तदेवमंगहीनादिवर्जितानां ब्राह्मणक्षत्रियवैश्यानां
पत्न्या सहितानामग्निहोत्रादिकर्मस्व धिकार उक्तः। अथ रथकारस्याधिकारमाह। रथकारस्याधा
ने अग्न्याधेयकर्मणि अधिकारो भवति। वर्षासु रथकार आदधीतेति श्रुतेः। अत्रेदं संदिह्यते किं
त्रैवर्णिकानामन्यतमो रथकरणयोगाद्रथकारः आहोस्विन्नियतं किंचिज्जात्यंतरमिति। किं तावत्
प्राप्त त्रैवर्णिकानामन्यतम एवेति। कुतः। सोपि हि रथं करोतीति योगाद्रथकार इत्युच्यते। तस्य च

त्रैवर्णिकत्वादाधानं प्राप्तमेव। ऋतुमात्रं विधेयं। तथा सत्येकार्थविधानाद्वाक्यभेदो न भवति। ला
घवं च। जात्यंतरपक्षे तु तस्याधानं विधातव्यमृतुसंबंधश्च। तथा सति वर्षास्वादधीत रथकार
आदधीतेत्येवं वाक्यभेदः स्यात्। अपि च शूद्रस्त्वसमर्थत्वात्प्र। षिद्धः। तस्मात्त्रैवर्णिकानामन्
यतम एवेति पूर्वपक्षः। सिद्धांतमाह। नियतं च। चो वार्थे वा शब्दश्च पूर्वपक्षनिरासार्थः। न त्रैवर्णि
को रथकारः। तस्य शिल्पोपजीवनस्य प्रतिषिद्धत्वात्। किंतु नियतं जात्यंतरमेव। तत्र केचिदेवमा
हुः। वैश्यायां क्षत्रियादुत्पन्नो माहिष्य। शूद्रायां वैश्यादुत्पन्ना करणी। तस्यां करणा श्यादुत्प
न्नो रथकार इति। तदुक्तं स्मृतौ माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात्। शूद्रायां करण
वैश्यादिति। याज्ञवल्क्योपि। वैश्याशूद्रोस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ। वैश्यात्तु करणः श्
द्रा विनास्वेष विधिः स्मृतः। विन्नासु विधिना परिणीतासु। तथा माहिष्येण करण्यां तु रथकारः प्रजा
यत इति। अतो रथकारशब्द एवंविधसंकरजातौ रूढः। रूढिश्च योगाद्बलीयसीति न्यायात्। रथक

॥१२॥

॥१२॥
॥देवया०१

रोतीति योगं वाधित्वा जात्यंतरमेव रथकारशब्देनोच्यते। नस्येदमाधानं कालविशिष्टं विधीयते विशि
ष्टविधानाच्चवाक्यभेदोपि न भवति अपरे त्वाहुः। रथकारशब्देनात्र सौधनानां ग्रहणं। ऋभूणां त्वेत्या
धानमंत्रवर्णात्। सौधन्वना ऋभवः सौधन्वना ऋभव इति समानाधिकरण्यनिर्देशात्। तथा चा
ह मनुः। व्रात्यात्तु जायते वैश्यात् सुधन्वाचार्य एव च। भारुषश्च विजन्माच मैत्रसात्वत एव चेति। अतो
मन्वुक्तोयं सुधन्वा व्रात्यवैश्यपुत्रः तत्पुत्राणां सौधन्वनानामृभूणामेवात्राधिकारः। मैत्रस्तु याज्ञवल्
क्ये नोक्तो न तस्याधिकारः सत्यपि रथकारशब्दवाच्यत्वे मंत्रवर्णच्छागन्यायेन सौधन्वनानामेवाधि
कार इति। तथा च जैमिनिः। सौधन्वनास्तु हीनत्वान्मंत्रवर्णात् प्रतीयेरन्निति। सौधन्वना नाम जातिः
हीनास्तु किंचित्त्रैवर्णिकेभ्यो जात्यंतरं। न च ते शूद्रा न वैश्या न क्षत्रिया न ब्राह्मणा इति तेषामिदमा
धानं। कथं प्रसिद्धं मंत्रवर्णाच्च। मंत्रवर्णो हि भवति। सौधन्वना ऋभव इति। ऋभूणां त्वेति च रथकारस्या
धानमंत्रः। तस्मात्सौधन्वना ऋभवश्च रथकाराः। अपि च तं नेमिमृभवो यथेति च। येनेमिं नमंति ते ऋभ

२

॥१२॥
॥जोष्ये।

व इत्युच्यंते। रथकाराश्च नेमिं नमंति। तस्मादत्रैवर्णिकानामशूद्राणामेतदाधानमिति शबरस्वामिः।
ननु विद्याभावेन सौधन्वनानामसमर्थतया नधिकारात्त्रैवर्णिक एवावयववृत्त्या रथकारशब्दे
न किमिति न गृह्यते सोपि हि रथकारो भवति। तस्य चाधानं प्राप्तमेवानूद्यऋतुमात्रविधानाल्लाघ
वं भवति। जात्यंतरे तु विशिष्टविधानाद्गौरवं स्यादित्याशंकायामनंतमाह॥ नाभावादिति वात्स्यः॥
वात्स्यऋषिरित्याह। न तत्रैवर्णिको रथकारः कुतः॥ अभावात्। त्रैवर्णिकस्य रथकारस्याभावात्॥
कथमभावः॥ योगिकोयं शब्दो रथं करोतीति रथकार इति तेन यावत्कालं रथकरणसंबंधस्तावत्का
लं रथकार इत्युच्यते न सर्वदा। अतस्त्रैवर्णिकस्य रथकारस्याभावात् विद्यारहितस्यापि ऋभुसौध
न्वनसात्वतापरपर्यायस्य जात्यंतरस्य रूढ्यवगतस्य वचनादाधानेधिकारो भवति॥ अत्र पार्थसा
रथिमिश्रा आहुः॥ रथकारस्यैव ऋभुसौधन्वनसात्वताद्यपरनामधेयस्याधानांतरं वर्षासु विधी
यते वचनात्। न हि वचनस्य किंचिद्दुःशकमस्ति तेन तावद्रूढिबलेन योगं वाधित्वा सौधन्वनानामाधा

२

॥१४॥
॥देवया०१

नेविहितेतद्बलेनैवयथाकथंचिन्मात्रोपयिकंविद्यार्जनमपिविनोपनयनमाक्षिप्यते। स्वाध्यायवीदि
ताध्ययनांगत्वादुपनयनस्यरथकारस्यतद्भावादाधानविधिनैवविद्यार्जनमाक्षिप्यतेनचास्याधानसं
भवेपिक्रत्वधिकारःसंभवतिविद्याभावात् आधानविधिस्तुतावन्मात्रोपक्षीणत्वान्नक्रतुष्वधिकारंक
ल्पयितुमर्हति। तेनप्रधानकर्मैवतस्याधानंविश्वजिदादिवत्कल्प्यफलं। नचास्याहवनीयाद्युत्पादककर्मत्र
र्थत्वेनाग्निसंस्कारत्वाभावात्॥ किमितिपुनःसंस्कारार्थत्वंनसंभवति। क्रत्वधिकाराभावेनाग्नीनामनुपयो
गित्वेनसंस्काराऽनर्हत्वात्। तस्मादाधानंप्रधानकर्मरथकारस्यविधीयतइति। रथकारस्याधानइत्येवमा
दीनांसूत्राणामपराव्याख्या॥ ॥रथकारस्याधानेऽधिकारोभवतितत्रश्रुतत्वादित्युक्तं। रथकारशब्दस्तुजा
त्यंतरएवरूढः। अतोयोगिकाशंकैवनास्तिअतःप्रकारांतरेणव्याख्यानंक्रियते। रथकारस्यकिमाधानमा
त्रेऽधिकारइतिप्राप्तेआह॥ ॥नियतंच॥ ॥तस्यरथकारस्यनियतंनित्यंकर्माग्निहोत्रदर्शपूर्णमासादिकंभव
ति। चकारात्काम्यंनैमित्तिकंच। कुतः। आधानश्रवणात्। आधानंहितस्यश्रुतं। तच्चगार्हपत्याद्यग्नीनांउत्पा

॥१४॥
॥भाष्ये॥

दकं। अग्नयश्चकर्मार्थमेवोत्पाद्यंते। स्वतोऽपुरुषार्थत्वात्। अतःकर्मार्थाग्न्युत्पादकाधानविधानादेवैवमव
सीयतेपदस्यसर्वकर्मस्वधिकारोभवतीति। एवंप्राप्तेआह। नाभावादितिवात्स्यः। रथकारस्यसर्वकर्मस्वधिका
रोभवतीतियदुक्तं। तन्न। कुतः। अभावात्। रथकारस्योपरितनकर्मसुलिंगाभावादितिवात्स्यआचार्यआह
। यतोरथकारस्यकर्मसुलिंगानिनसंति। त्रैवर्णिकानांतुआधानंश्रुतं। कर्मसुलिंगानिचसंति। एहीतिब्रा
ह्मणस्य। आगह्याद्रवेतिवैश्यस्यचराजन्यबंधोश्चेति। तथापयोव्रतंब्राह्मणस्ययवागूराजन्यस्यामिक्षावैश्य
स्येति। एवमिदंरथकारस्येत्येवंकुत्रापिकर्मणिलिंगंनास्ति। तेनास्योत्तरकर्मस्वनधिकारोवचनाच्चाधान
मात्रंभवतीतिगम्यते। एवंप्राप्तेइदमेवसूत्रंपुनःपठित्वापरिहारत्वेनव्याख्यायते। लिंगाभावादनधिका
रोरथकारस्यकर्मस्वितियदुक्तंतन्न। कुतः। अभावात्। लिंगाभावस्यैवाभावात्। लिंगसद्भावादित्यर्थः। कानि
पुनस्तानिलिंगानियैरथकारस्यापिकर्मस्वधीकारोवसीयते। उच्यते। आधावेतिशूद्रस्यअष्ठीवद्दघ्नंशूद्र
स्यमस्तुशूद्रस्येति। शूद्रासंबंधाद्रथकारोत्रशूद्रशब्देनाभिधीयतेतस्यहिमातामहीशूद्रेति। चतुर्थव

॥५८॥
॥देवया०॥

णोस्य मुख्य शूद्रस्य तु प्रतिषेध उक्तः। शूद्रवर्ज्जमिति। तेनैतानि गौणशूद्रविषयाणीति। रथकारस्याधान
मात्रेधिकारपक्षे एतानि लिंगानि निर्विषयाण्येव स्युः। तस्माद्रथकारस्योत्तरकर्मस्वधिकार इति सिद्धं
तथा चोक्तं याज्ञवल्क्यस्मृतिविवृतौ मिताक्षरायां विज्ञानेश्वरेण। क्षत्रियेण वैश्यायामुत्पादितो माहि
ष्यः। वैश्याच्छूद्रायामुत्पादिता करणी। तस्यां माहिष्येणोत्पादितो रथकारो नाम जात्या भवति। तस्य चो
पनयनादि सर्वं कार्यं वचनात्। यथाह शंखः। क्षत्रियवैश्यानुलोमानंतरोत्पन्नो रथकारस्तस्याध्य
यनेज्यादानोपनयनसंस्कारक्रियाश्च प्रतिषिद्धाः रथसूत्रं वास्तुविद्याध्ययनवृत्तिता चेति। रथसूत्रं रथ
विद्येति मञ्जर्यां व्याख्यातं। तत्र तु संस्कारक्रियाश्चाप्रतिषिद्धा रथसूत्रे इत्येवं पाठः। अतो याज्ञवल्क्योक्त
एव रथकारोत्र ग्रहीतुं न्याय्यः। तस्य च शंखोक्तयज्ञादिकर्मस्वधिकारः। तथा सति आधाने त्रिशूद्रस्ये-
त्यादीनि वेदवाक्यानि सार्थकानि भवंति। मनूक्ते ब्राह्मवैश्यजातसुधन्वनपुत्रसुधनुपर्याये रथकारे
गृह्यमाणे तेषां वैयर्थ्यमेव स्यात्। न च तदिष्यते। तस्माद्याज्ञवल्क्योक्तमेवाश्रितं। श्रुतिसंमतत्वादिति।

॥५८॥
॥भाट्टे॥

॥ ॥निषादस्थपतिर्गावेधुकेधिकृतः। निषादस्थपतिर्गावेधुके चरावधिकृतोधिकारी भवति। ए
वं हि श्रूयते। यस्य रुद्रः प्रजाः शमयेत्तद्वास्तुमध्ये रौद्रं गावेधुकं चरुं निर्वपेदिति एतामिष्टिं प्रकृत्य श्रू
तं। एतया निषादस्थपतिं याजयेदिति। निषादस्थपतिर्यजेतेत्यर्थः। तत्रायं संदेहः। किमयं षष्ठीसमास
ः निषादानां स्थपतिर्निषादस्थपतिरिति। निषादश्चासौ स्थपतिश्च निषादस्थपतिरिति कर्मधारयो वा
। तत्र यदि षष्ठीसमासस्तदा यो द्विजातिरेव विद्वान् निषादानामधिपत्यं करोति। तस्यात्राधिकारः। यदि
च कर्मधारयस्तदा निषाद एव यः स्थपतिस्तस्यात्राधिकार इति। तत्र त्रैवर्णिकस्यैव समर्थत्वाद्विद्वत्वा
दग्निमत्वाच्चात्राधिकारो युज्यते। अन्यजातीयस्य निषादस्याविद्यत्वेनानग्निमत्वेन चासमर्थत्वात्
। तस्मात् षष्ठीसमास एवायमिति पूर्वपक्षः। सिद्धांतस्तु कर्मधारयोयं निषादश्चासौ स्थपतिश्चेति
। कुतः। षष्ठीसमासपक्षे निषादपदे लक्षणा प्रसक्ता। न ह्यत्र षष्ठी श्रूयते यतः संबंधः प्रतीयेत। अ
तो निषादपदेनैव षष्ठ्यर्थो लक्षणीयः। इतरस्मिंस्तु पक्षे द्वयोरपि पदयोर्मुख्यार्थतैव। न लक्षणा। त

॥१९॥
॥देवयो०१

स्मान्निषादएवस्थपतिरत्राधिकारी। अतिबलादविद्वानन्निमानपीति सिद्धं अपि चात्र निषादस्य
दक्षिणा श्रूयते। कूटं दक्षिणा काणो वा गर्दभ इति कूटं हि निषादानामेवोपकारकं नार्याणां इति॥ ॥ वा
वकीर्णिनो गर्दभेज्या। यो ब्रह्मचारी स्त्रियं गच्छति सोवकीर्णी। तस्यावकीर्णिनः स्खलित ब्रह्मच
र्यस्य गर्दभेज्या गर्दभेनेज्या गर्दभेज्या या गो गर्दभेज्या प्रायश्चित्तार्था॥ ॥ ॥ भवति वा शब्दो
विकल्पार्थः। तेन गृह्योक्तमपि प्रायश्चित्तांतरं। आज्याहुतिद्वयरूपं विकल्पेन भवति। अथापरमाज्या
हुती जुहोति कामावकीर्णोस्मी त्यादिकं। शाखांतरे उभयस्याविकल्पेन श्रुतत्वात्। अत्रैतद्विचार्यते
किं स्थपतीष्टिरवकीर्णिपशुश्चैतदुभयमाधानसंस्कृतेष्वाहवनीयादिषु भवति उत लौकिक इति त
त्र प्राप्त इति तत्राहवनीयादिप्राप्तेराहवनीयादीनां चाधाननिष्पाद्यत्वात्स्थपतेरवकीर्णिनश्चाधान
विध्यभावेपि इष्टिपश्वोः आधानं प्रयोजकं। अत एतदर्थमेवाधानेनाहवनीयादीनुत्पाद्य तेष्वेतदु
भयं कर्तव्यं इति प्राप्ते आह॥ ॥ लौकिके॥ ॥ एतौ स्थपतीष्ट्यवकीर्णिपशू लौकिकेग्नौ भवतः। कुतः

॥१९॥
॥भाष्य॥

न हीमा विधिपश्वाधानं प्रयोजयतः। आभ्यां हि तदेव गृह्यते यद्दर्शपूर्णमासांगं भवति। न चाधा
नं दर्शपूर्णमासांगं। स्वकाले हि पुरुषसंस्कारकत्वेन तद्विहितमिति। अतो लौकिकाग्नावेवैताव
नुष्ठेयौ। लौकिकमेव गार्हपत्यस्थाने स्थापयित्वा तत आहवनीयादिस्थानेषु विहृत्य स्थपती
ष्ट्यवकीर्णिपशू दर्शपूर्णमासपशुवत्कर्तव्यौ। अत्र विशेषविधानार्थमाह॥ ॥ भूमौ पशुपुरोडा
शश्रपणं। अत्रावकीर्णिनो गर्दभपशुयागे पशुपुरोडाशस्य श्रपणं भूमावेव कर्तव्यं न तु कपाले
षु॥ ॥ अप्स्ववदानहोमः। अवदानानां हृदयजिह्वाक्रोडादीनां होमो प्सु उदकेषु भवति नाग्नौ। वच
नात्। अवदानग्रहणात्। अन्यदाघाराज्यभागहोमादिकमग्नावेव कार्यं॥ ॥ शिश्नात्प्राशित्रावदा
नं॥ ॥ गर्दभस्य शिश्नात्प्राशित्रावदानं कार्यं वचनात्। नं जोहवेभ्यो हृदयादिभ्यः उक्तोधिकारः
अथाग्निप्रस्तावादाहवनीयाद्यग्निषु किं किं कर्म कर्तव्यमित्यपेक्षायामाह॥ वैतानिकेषु सर्वं स
र्वार्थत्वात्॥ वैतानिका वितानार्हा विहारयोग्या गार्हपत्यादयः। तेषु वैतानिकेष्वग्निषु सर्वं कर्म

॥१८॥
॥देवया०॥

श्रौतं स्मार्त्तं च कर्त्तव्यं। श्रौतं च हविः श्रपणहोमादिकं। स्मार्त्तं च पक्षादिनित्यपाकप्रकाशादिकं।
कुतः। सर्वार्थत्वात्। यतो गार्हपत्यादयो वैतानिकाः सर्वार्थाः। कुतः। यद्यपि द्रव्यमुत्पत्तिकाले केन वि
दर्थेनासंयुक्तमुत्पद्यते तस्य सर्वार्थतावसीयते। कुतः। सामर्थ्यात्। समर्था हि गार्हपत्यादयः स
र्वकर्म साधयितुं। आधानेनोत्पादितानामग्नीनां प्रयोजनापेक्षायां सामर्थ्येन सर्वाग्निकार्यार्थि
ता विज्ञायते। तस्माच्छ्रौतं स्मार्त्तं च यद्गृह्यसूत्रोक्तं स्मृत्युक्तं च पाकादिकं तत्सर्वं गार्हपत्यादिषु वै
तानिकेषु भवतीति॥ ॥दर्शनाच्च॥ ॥दृश्यते चायमर्थो यत् स्मार्त्तमपि होमपाकादिकं वैतानिकेषु
क्रियत इति। दक्षिणाग्निं प्रकृत्य श्रूयते मांसं तत्र न पचेयुरिति। अत एव प्रतिषेधात् प्राप्तिरनुमीयते।
प्रतिषेधस्य प्राप्तिपूर्वकत्वात्। न च श्रौतो मांसपाको दक्षिणाग्नौ विहितोऽस्ति। यस्यैष प्रतिषेधः
स्यात्। यतः शामित्रेग्नौ विहितः। अस्ति त्वविहिताप्रतिषिद्धः स्मार्त्तो मांसपाकः। तस्यायं प्रतिषेधो वि
ज्ञायते। स्मृतावपि दर्शश्राद्धं प्रकृत्याग्नौकरणार्थमग्निमाह मार्कण्डेयः। आहिताग्निस्तु जुहुयाद्दक्षि

॥१९॥
॥भाष्ये॥

णाग्नौ समाहितः। अनाहिताग्निश्चौपासनेऽग्न्यभावे तथा प्लुवेति। शंखलिखितौ। धूपगंध
माल्यैरलंकृतान् ब्राह्मणान् सघृतमन्नमनुज्ञाप्य दर्भैर्दक्षिणाग्निं परिस्तीर्य जुहुयादग्नये कव्यवा
हनायेत्यादि॥ ॥वायुपुराणेपि॥ ॥आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नत इति। अतोस्माद्दर्श
नात्स्मार्त्तमपि वैतानिकेषु कर्त्तव्यमिति पूर्वः पक्षः। सिद्धांतमाह॥ ॥नौपासनश्चैतः॥ ॥यदुक्तं वै
तानिकेष्वेवाग्निषु श्रौतं स्मार्त्तं च कर्त्तव्यमिति। तन्न। कुतः। औपासनश्रुतेः। यतः आहिताग्नेरप्यौ
पासनः श्रूयते। पितृमेधे अद्धारेणौपासनं निरस्यतीति यदि स्मार्त्तमपि वैतानिकेष्वेव क्रियेत।
तदा आहिताग्नेः पितृमेधे औपासनदर्शनं न स्यात्। अस्ति च। तस्मात्स्मार्त्तान्यौपासने कर्त्तव्या
नीति। तथा च स्मृतिः। कर्म स्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृते वापि श्रौतं वैता
निकाग्निष्विति। तस्मिन्गृह्याणीत्यापस्तंबस्मरणाच्च। गृह्याय हितं गृह्यं। [illegible]शवृक्ष्य दंपत्यावर्त्तेते
तस्मिन्नित्यावसथ्ये। अतश्च यत्किंचिद्दंपत्योर्हितं कर्म शांतिपौष्टिकव्रतागहोमादिकं स्मार्त्तं तत्स

॥१९८॥
ग॰दे॰बया॰०१

र्वमावसथ्येग्नौ भवतीति । तथा चाष्टकादिहोमानामात्मार्थपत्न्यर्थान्त्रक्रमश्रौपासनेन चापरार्थान
करणं गृह्यसूत्रदेशेग्नौ स च तांते लौकिको भवेत् । अत एवाह कात्यायनः । न स्वेग्नावन्यहोमः स्यात्य
क्त्वैकां समिदाहुतिं स्वगर्भसंस्क्रियार्थश्च यावन्नासौ प्रजायते । अग्निस्तु नामधेयादौ होमे सर्व
त्र लौकिकः । न हि पित्रा समानीतः पुत्रस्य भवति क्वचित् । अतश्च सीमंतोन्नयनमपि स्मार्त्ताविव
कार्यं । अपि च । आधानेनोत्पादितानां गार्हपत्यादीनामग्नीनां प्रयोजनापेक्षायां सत्यां गार्हपत्ये
हवींषि श्रपयत्याहवनीये जुहोति दक्षिणाग्नावन्वाहार्यं पचतीति प्रत्यक्षवचनैर्निर्दिष्टैरेव प्रयो
जनैर्निराकांक्षाणां नासमर्थ्यमात्रेण लिंगादन्यत्र विनियोगः कल्पयितुं शक्यते । ननु मा भूत्साम
र्थ्यमात्रेण विनियोगः । वाक्येनैव स्मार्त्तेष्वपि पार्वणस्थालीपाकादिहोमेषु भवतीति चेन्न । न च स्मा
र्त्तहोमास्तेषु विधातुं शक्याः । ते हि महेवाधारेणावस्थ्ये नोत्पाद्यंते यथा पक्षहोमादयः । अत्राह जै
मिनिः । सति वौपासनस्य दर्शनादिति सति च विहारे अपासनोग्निर्दृश्यते । यः कामयेत राष्ट्रमस्यै

॥१९॥
॥सोष्य॥

स

प्रजायेत स्यादिति तस्यौपासने प्रतिहितमभ्याज्जुहुयादिति राजसूये प्रदत्ते कर्मणि तद्वचनं । तस्मिं
श्च काले विहारोप्यस्ति । यदि चाविहार एव स्मार्त्तान्यपि कर्माणि स्युः तदा कार्यभावादौपासनदर्श
नं नास्ति । अस्ति च । तस्मात्स्मार्त्तानि अपासने एव कार्याणि । यद्येवं तर्हि मांसपाकप्रतिषेधस्या
कागतिरित्यत आह ॥ अधीश्रयणीयमांसप्रतिषेधः ॥ य एष उक्तो मांसपाकप्रतिषेधो मांसं
तत्र न पचेयुरिति स श्रवणीयेहनि ज्ञेयः । नवगृहे यदा वासः क्रियते तदा तस्मिन्नेवाहनि तत्र दक्षिणाग्न्या
हरणं कार्यं नाहवनीयवत्प्रतिहोमामिति विकल्पं वक्ष्यति । नवावासिते वेति । श्रूयते च । नवावसिते
वै न मांसमाहरेयुरिति । तदा च तस्मिन्नवगृहाहते दक्षिणाग्नौ विशेषेण भोजनार्हस्यानियतद्रव्यस्य
पाको विहितोस्ति । तस्मिन्न पचेयुस्तद्ब्राह्मणा अश्नीयुरिति । तत्र कदाचिन्मांससंपत्तौ तस्यापि पाक
स्तत्र प्राप्नोति तस्यैष प्रतिषेधो मांसं तत्र न पचेयुरिति । तथा चाह सूत्रकारः । तस्मिन्न पचेयुरमांᳫ
समिति । पक्षांतरमपि दुग्ध्यास्यिश्रयणरूपं एतस्य विद्यते । यद्युतन्नविंदेद्वत्स्य चेदपि गोरेव दुग्धम

॥१५९॥
॥देवया०१

धिश्रयितवै ब्रूयादिति तेन अधिश्रयणसंबंधि अहः अधिश्रयणीयं तस्मिन्नधिश्रयणीये इति अने
नवग्रहसंबंधिदक्षिणाग्न्याहरणादि न लक्ष्यते अतः श्रौतान्येवैतानि केषु गार्हपत्यादिषु कर्तव्यानि स्मा
र्त्तानि त्वावसथ्याग्नावेवेति सिद्धं यत्तु स्मृतौ दक्षिणाग्नावग्नौकरणहोम उक्तः स सर्वाधानपक्षे अर्द्धाधान
पक्षे त्वावसथ्याग्नावेवेति तत्रैव निर्णीतमस्ति कर्मणां फलवत्त्वोक्तिपूर्वकं तेष्वधिकारो निरूपितः अधुना
तस्यैव सांगस्य फलवतः कर्मणो निरूपणायाह ॥ १ ॥ यज्ञं व्याख्यास्यामः ॥ यज्ञो यागो यजनमिष्टिरि
तिपर्यायाः यज्ञं यागं व्याख्यास्यामः यागस्वरूपं कथयिष्यामः तमेवाह ॥ २ ॥ द्रव्यं देवता त्यागः ॥ द्रव्यदे
वतात्यागो यज्ञः द्रव्यं पुरोडाशचरुसांनाय्यपशुसोमादिकं देवता अग्निसोमेंद्रविष्ण्वादिशब्दमयी तद्धि
तचतुर्थीमंत्रवर्णान्यतमैर्बोध्या तत्राग्न्यादिकं देवतामुद्दिश्य यो द्रव्यस्य पुरोडाशादेस्त्यागः उत्सर्गः स य
ज्ञः स याग इत्यर्थः तथा चोक्तं तद्धितेन चतुर्थ्या वा मंत्रवर्णेन वेष्यते देवतासंगतिस्तत्र दुर्बलं तु परं
परमिति तत्र तद्धितेन देवतासंगतिर्यथाग्नेयोष्टाकपालः अग्नीषोमीय उपांशुयाजोग्नीयः पुरोडाश ऐं

१९
॥कोष्ठे॥

द्रं दध्यैंद्रं पयोग्नीषोमीयं पशुमालभेत्यादौ चतुर्थ्या देवतासंगतिः यथाग्नये अनीकवतेष्टाकपालं अथ मरु
द्भ्यः सांतपनेत्य अथ मरुद्भ्यो गृहमेधिन्य इत्यादौ मंत्रवर्णेन देवतासंगतिर्यथा उत्तराघारे यथा च प्रया
जेषु क्वचित्प्राकरणिके देवतासंबंधोपि भवति तद्धितादीनामभावे यथोलूखले मुसल इत्यत्र कर्काचा
र्यः अत एवोच्यते यास्केन तद्येनादिष्टदेवता मंत्रास्तेषु देवतोपपरीक्षा यद्देवतः स यज्ञो वा यज्ञांगं वा तद्दे
वता भवंतीत्यादि तेनैतत्सिद्धं देवतोद्देशेन द्रव्यत्यागो यागः स एव प्रक्षेपाधिको होम इति अथांगत्व
वेदकं प्रमाणद्वयमाह ॥ ३ ॥ तदंगमितरत्समभिव्याहारप्रकरणाभ्यां ॥ सर्वत्र निरूपितात्प्रधानभूता
द्यज्ञाद्देवतोद्देशेन द्रव्यत्यागात्मकादितरदन्यदुद्धरणाग्न्यन्वाधानब्रह्मवरणव्रतग्रहणादिकं तत्सर्वं
तदंगं तस्य पूर्वसूत्रोक्तस्य देवतोद्देशेन द्रव्यत्यागात्मकस्यार्थात्प्रधानभूतस्य यागस्यांगमुपकारकं भ
वति धर्मः शेषोंगं गुण इत्येकार्थाः कुतः कारणादंगं भवतीत्यपेक्षायामाह समभिव्याहारप्रकरणा
भ्यां सशब्दयोग्यतासंनिधिवाचकः अभीत्याकांक्षार्थः तेनायमर्थः समितियोग्यतासंनिधिमतां आ

॥२०॥
॥देवया०१

भीत्याकांक्षावतां पदानां व्याहार उच्चारणं समभिव्याहारो वाक्यं तस्माद्वाक्यात् प्रकरणाच्चेत्यर्थः तत्र
वाक्यस्य तावदुदाहरणं पौर्णमासेनेष्ट्वेंद्राय विमृधे तु निर्वपतीति प्रकरणपाठादैमृधस्योभयांगत्वे
प्राप्ते वाक्यात्पौर्णमासांगता भवति अत्र च शेषशेषिणोः साध्यसाधनभावो न श्रूयते पदद्वयसमभिव्याहारा
देवयोरेवत्वमालोच्य शेषशेषीत्वं कल्प्यते यथा स्वर्गकामो यजेतेति तत्र वाक्येन विनियोग इति नह्यत्र स्वर्गस्य
साध्यत्वं यागस्य वा साधनत्वं केनचिदुपात्तं अतः पदद्वयसमभिव्याहारादेव कल्प्यते प्रकरणं चोभयाकांक्षा त
थाहि दर्शपूर्णमासाभ्यां स्वर्गं साधयेत्कथमित्येतस्यामाकांक्षायां अविच्छिन्नायां चाश्रुतप्रयोजनाग्न्यन्वा
धानादीनि ब्राह्मणतर्पणं तानि कर्माणि पठ्यंते दर्शपूर्णमासयोश्चोपकारकापेक्षा अग्न्यन्वाधादीनां चास्मा
भिः किं कर्तव्यमिति कार्यापेक्षा न च दर्शपूर्णमासयोरुपकारकं किंचित् दृश्यते न च अग्न्यन्वाधानादीना
मपि कार्यं किंचिद्दृश्यते अवश्यं चोभयेनापि कुतश्चिद्भवितव्यं यदि तु केनचित्प्रमाणेन न ज्ञायते तदा
नास्तीति बुद्धिर्भवति अस्ति च प्रमाणं न ह्यत्यंतसंनिकर्ष एव संबंधकारणं यदा संनिकृष्टं न लभ्यते तत

॥२०॥
॥१नोष्ये॥

दा विप्रकृष्टे वेदस्य शक्तिः संचरति तदिहोपकारकल्पनाप्रमाणं संनिकृष्टं श्रुतिलिंगवाक्यलक्षणम
लब्ध्वा विप्रकृष्टमभ्यनुज्ञातमित्युभयाकांक्षावशेनैवं विज्ञायते यद्दर्शपूर्णमासावुपकारमाकांक्षतः स
न्नमेभिरग्न्यन्वाधानादिभिः क्रियते यच्चाग्न्यन्वाधानादयः कर्तव्यमपेक्षंते तद्दर्शपूर्णमासोपकार इति न
ह्युभयोरप्यन्यत्संनिकृष्टतरमस्ति यच्चान्यत्फलादि कल्प्येत तस्यान्येन सह संबंधेन निराकांक्षीभूतस्य
भूतस्य नेह संबंधाकांक्षा विद्यते तेनाग्न्यन्वाधानादीनां न विश्वजिदादिवत्फलकल्पनं नापि दर्शपूर्ण
मासफलानुषंगः उभयाकांक्षालक्षणसंबंधाभावे ह्यन्यतराकांक्षालक्षणः संबंधो गृह्यते न संभवे
त्तस्मान्नष्टाश्वदग्धरथवदेव परस्परनियमः सिद्धः किंच अग्न्यन्वाधानादेः फलांतरकल्पने कृतोःफल
मित्युपकारकाकांक्षा अनिवृत्तैव स्यात् अस्ति वा सा वाकांक्षा यागेन स्वर्गं कुर्यादित्येवं करणत्वेन विधा
नात् तदुक्तं नहि तत्करणं लोके वेदे वा किंचिदीदृशं इतिकर्तव्यतासाध्यं यस्य नानुग्रहेर्थिता इति उभयो
राकांक्षावत्वे सति तत्संबंधप्रतिपादकं वाक्यं कल्प्यते अग्न्यन्वाधा रूपकृतेन यागेन स्वर्गं कु

॥२१॥
॥दे वया०१

यदि त्येवं । ततो वाक्याल्लिंगं अग्न्यन्वाधानादिगतसामर्थ्यं कल्प्यते । लिंगाच्च विनियोक्त्री श्रुतिः कल्प्य
ते एभिः प्राधानस्योपकारः कार्य इति । ननु सूत्रकारेण गत्वे प्रमाणद्वयमेव कथमुक्तं जैमिनिना श्रु
तिलिंगवाक्यप्रकरणस्थानसमाख्यासंज्ञानि षट् प्रमाणान्युक्तानि संति । नैष दोषः । प्रमाणचतुष्टय
स्योदाहरणस्याग्रे वक्ष्यमाणत्वात् । तत्र स्वार्थाभिधाने निरपेक्षं वचनं श्रुतिः । सा त्रिविधा विधात्री
अभिधात्री । विनियोक्त्री च । तत्र विधात्री लिङ्घात्मिका । अभिधात्री व्रीह्यादिश्रुतिः । विनियोक्त्री त्रि
धा । एकाभिधानं । एकपदं । विभक्तिरिति । यस्य हि शब्दस्य श्रवणादेव संबंधः प्रतीयते सा विनियोगश्रु
तिः । तद्यात्रानेकार्थाभिधानमेकेन शब्देन युगपद्भवति विभक्त्यैव लिंगसंख्याकारकाणां । तत्रैतेषा ॥२१॥
मन्वितानामेवाभिधानं । तदेकाभिधानं । यथा पशुनेति पशुः करणं प्रतीयते तथैकं करणं पुमांश्चेत्य
पि । अतः संख्यादेरेकशब्दोपादानलक्षणया श्रुत्या कारकसंबंधः । प्रातिपदिकार्थस्य तु पदश्रुत्या । यजे
तेत्यत्र यागस्य प्रकृत्यर्थस्यैकपदेनोपात्ततया स्वर्गादिकं प्रति करणत्वं । विभक्तिस्तु संबंधमेव सा

ध्यत्वं साधनत्वं वा प्रतिपादयंती विनियोगकरणं । तत्र द्वितीया साध्यत्वं प्रतिपादयति तृतीयादयस्तु
साधनत्वं । तत्र व्रीहीनवहंतीति द्वितीयासाध्यत्वेन व्रीहीनभिदधानावघातस्य तेषु विनियोगका
रणं भवति । सर्ववस्तुगतं सामर्थ्यं लिंगं । तद्यथा स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यति
कायेनावद्यतीति अवदानसाधनत्वेन सामान्येन श्रुतानां लिंगेन वस्तुसामर्थ्यात्मकेन विशेष
विनियोगो भवति ॥ तदुक्तं ॥ सामर्थ्यात्स्वधितिर्मांसे द्रव्येषु स्याच्च स्रुवस्तथा । हस्तेनाष्टपुरो
डाशमवदातुं प्रकल्प्यत इति । मंत्राणां च लिंगेन पदार्थस्मारकत्वे विनियोगः । वाक्यं तु पदसंघात
त्मकं प्रागुक्तं । प्रकरणं चोभयाकांक्षारूपं प्रागुक्तमेव । स्थानं क्रमः । स च द्विविधः । पाठसादेश्यमनु
ष्ठानसादेश्यं । पाठसादेश्यमपि द्विविधं यथासंख्याम्नानं संनिधावाम्नानं च । तत्राग्नीषोमीयानु
ष्ठानदेशे पशुधर्माणामाम्नानादग्नीषोमीयार्थत्वमनुष्ठानसादेश्यरूपेण स्थानप्रमाणेन भव
ति । यत्र च ब्राह्मणे क्रमेणाश्वगर्द्धभाजानामभिमंत्रणानि विहितानि संहितायां च तस्मिन्नेव क्र

॥२२॥
॥देवया०१

मेभिमंत्रणमंत्राः पठिताः प्रवृत्तमित्यादयः। तत्र यथासंख्याम्नानेन संबंधो भवति। एवमेव शाखांतरे ब्रा
ह्मणे आध्वर्यव कांडे दर्शपूर्णमासयोस्त्रय आग्नेयादयो यागाः क्रमेण पठिताः याजमानकांडे चत्रीण्य
नुमंत्रणानि पठितानि॥ तद्यथा॥ अग्नेरहं देवयजनयान्नादो भूयासं। अदब्धिर्नामास्यादब्धोहं भ्रातृ
व्यं दधेयं। अग्नीषोमौ वृत्रहत्वणावग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमिति। दब्धिर्घातकं मायु
धं यावति प्रदेशे ब्राह्मणे प्रधानं पठ्यते तावत्यैव मंत्रेष्वमंत्रः। तयोश्चागाग्न्यपेक्षावेलायां यथासंख्
यायेन समानदेशत्वाद्बुद्धौ संनिधानं भवति प्रथमस्य हि प्रधानस्य मंत्रमाकांक्षन्नेव शेषमंत्रस
माम्नायमादितआरभ्यालोचयति ततश्च प्रथमो मंत्रः। प्रथमं हृदयमागच्छति न चास्यातिक्रमे हे
तुरस्तीति स एव गृह्यते। तथा मंत्रस्य शेषिणमपेक्षमाणस्य तथैव प्रक्रिययाद्येन शेषिणा सह संब
न्धो भवति ततश्च तन्निराकांक्षता। द्वितीयादीनामप्येवमेव द्वितीयादिभिरेव योगः। तत्राग्नेयाद्यनु
मंत्रणानामाग्नेयादिलिंगत्वात्तेनापि व्यवस्था सिध्यतीत्युपांशुयाजक्रमाधीतमद

॥२२॥
॥भाष्ये॥

ब्धिर्नामास्यदब्धोहं भ्रातृव्यं दधेयमिति मंत्र उदाहरणं। ननु चास्य प्रकरणात्सर्वार्थत्वं विज्ञायते
तत्क्रमात्तु बलीयस्तत्कथमस्योपांशुयाजांगत्वमिति। उच्यते। येन्ये शेषिण आग्नेयादयस्ते विस्प
ष्टलिंगैः क्रमप्रकरणाभ्यां मंत्रांतरैरवरुद्धत्वान्नैवमपेक्षंते। न च विकल्पोस्य स्पष्टलिंगत्वेन वैषम्या
द्दृष्टार्थानां समुच्चय इति चेत्। न प्रष्ठतयागप्रत्यवेक्षणेन दृष्टार्थत्वात्। सत्यपि चादृष्टार्थत्वे निरपेक्षा
णां गत्यंतरे सति समुच्चयानाश्रयणादाग्नेयादिभिः कृतार्थरूपा निवृत्ताः सत्यां गत्या पुनस्तेष्वेव भवेत्।
अस्ति चास्य गतिरुपांशुयाज इति। किंच। न वा विज्ञातलिंगानां प्रक्रिया विनियोजिका। असीत्यस्य च
सामर्थ्यं संनिधावुपसंहृते। अदब्धिर्नामासीत्यस्य स्पष्टलिंगो यं न चेद्दृशं सतं प्रकरणं विनियोक्तुं क्ष
मं अयमसि शब्दो युष्मदर्थविषयत्वात्संनिहितमभिमुखं चाभिधत्ते नान्यदुपांशुयाजश्च संनिहितो
भिमुखश्चेत्यभिधानसामर्थ्यं क्रमादुपांशुयाजविषयं विज्ञायते। ततश्च लिंगेन प्रकरणं बाध्यत
एवेत्यदोषः। अतकर्कोक्तं यत्किंचित्। पिष्टभृत्युक्तमेव साधीयः। संनिधावाम्नानेनापि विनियोगो

॥२३॥
॥दनया०१

भवति। विकृतौ यदपूर्वमंगं पठ्यते तदपि मया किं कर्त्तव्यमित्येवं साकांक्षं भवति। प्रधानस्य तु प्राकृतैरंगैर्नि
राकांक्षस्य तदपेक्षाय यद्यपि नास्ति तथापि तस्यापूर्वांगस्यानर्थक्यपरिहारायतत्प्रति प्रधानस्यापेक्षां प
रिकल्प्य तस्य संबंधः क्रियते। यथा देवसुहविरादीनां उपहोमादीनां च। समाख्या यौगिकी संज्ञा। हौत्र
माध्वर्यवमौद्गात्रमित्यादिका वैदिकी। प्रोक्षणीरित्यादिका लौकिकी च। तत्राध्वर्युरिति मात्र एवमपे
क्षते मया किं कर्त्तव्यमिति तदपेक्षमाणस्य यदि न कुतश्चिद्विशेषोवगम्यते ततो यत्किंचिदिति भ
विष्यतीति। तथाध्वर्यवसंज्ञितं कर्म कोमे कर्त्ता भविष्यतीत्येवमेव विशेषमपेक्षते। तत्र शब्दार्थ
ज्ञस्यादित एवैषोपेक्षा प्रत्येकं भवति यदस्याध्वर्योः कर्म तदाध्वर्यवशब्दवाच्यं भवति। तथाध्वर्यव

॥२३॥
॥न्याये॥

स्य यः कर्त्ता तस्याध्वर्युमामेति। एवं सर्वसमाख्यासु वाच्यं। सूत्रकारेण चैतानि प्रमाणानि स्वस्व
विषये उक्तानि। तथाहि। काष्टं हिरण्यं वाभिजुहुयात्। श्रुतेरित्यत्र श्रुतिः। काष्ठहिरण्ययोर्विनियो
जकत्वेनोक्ता। तेषामारंभेर्थतो व्यवस्यात् तद्वचनत्वादिति मंत्रलिंगाद्वेति च लिंगमुक्तं। वत्सजातं

विकृतं सूतकार्यं वा पशुब्रह्मचर्यसान्नाय्यकामा यथासंख्यमिति यथासंख्यरूपं स्थानं। प्रयाजे
षु संनिधेर्देशमेवासंनिधेरिति संनिधिपाठलक्षणेन। शेषमितरे यथाख्यमुत्तरतो त्रयति समा
ख्यानादिति समाख्या एतेषां श्रुत्यादीनां परस्परविरोधे उत्तरोत्तरस्य दुर्बलत्वं तदुक्तं। जैमिनिना
श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति। तत्र श्रुति
लिंगयोर्विरोधस्तु न पठ्यमेत्यशालाद्वार्योपस्थानं निवेशन इति। अत्र श्रुतिः। प्रत्येत्याग्निमुपतिष्ठ
ते यद्वेवोपतिष्ठते मंवैलोको गार्हपत्य इति। निवेशन इति। शाखांतरे चैंद्र्या गार्हपत्यमुपतिष्ठन
इति। अत्रैंद्रो न तस्यावितिमंत्रगतेन लिंगेनेंद्रस्योपस्थानं प्राप्नोति। अग्निमिति द्वितीया विभक्ति
श्रुत्या तु गार्हपत्यस्य। तत्र श्रुतिः। साक्षाद्द्वितीयोक्ता। लिंगं तु श्रुतिमनुमाय तद्द्वारा विनियोज
कमिति विप्रकर्षात् दुर्बलं। तेन श्रुत्यैव गार्हपत्यस्योपस्थाने विनियोगः। गार्हपत्य इति गार्हप
त्यचितिरूपोग्निः। कुतः। प्रत्येत्याग्निमुपतिष्ठत इति प्रकृत्य एतद्वा एव दयथा यथं करोति यदस्मो सामि

॥२४॥
॥देवया०१

चितेऽएतां दिशमेति तस्मा एवं तेनेति श्रुते हिंसायज्ञं यं वैलोके गार्हपत्य इति च वाक्यशेषात्। एवं लिंगवा
क्ययोर्विरोधे लिंगं बलवत्। वाक्यप्रकरणविरोधे वाक्यं। प्रकरणस्थानयोर्विरोधे च प्रकरणं स्थानसमा
ख्ययोर्विरोधे च स्थानमिति। तदंगमितरदित्यत्रेतरदित्यनेन पूर्वसूत्रप्रतिपादितदेवतोद्देशपूर्वकद्रव्यत्या
गात्मकयज्ञादन्यल्लभ्यते तेन देवतोद्देशपूर्वकद्रव्यत्यागात्मकानां प्रयाजादियागानां पूर्वाघारादिहोमानां
त
च तेनांगत्वं तत्सिद्धमितीत्यत आह। यत्रैपश्चाफलयुक्तास्तदंग फलेन युक्ताः फलयुक्ताः फलवंतः न फ
लयुक्ताः अफलयुक्ताः अफलयुक्ता यजतयः। प्रयाजादियागाः चकारात् पूर्वाघारादिजुहोतयश्च तदंगं
तस्य फलवतो यागस्य प्रधानस्यांगमुपकारका भवंति। कुतः पूर्वसूत्रोक्तात्प्रकरणादेव। ननु दर्शपूर्णमा
॥२४॥
॥भाष्य॥
साभ्यां स्वर्गकामो यजेतेत्यनेन यागमात्रस्य फलसंबंध उक्तः कुतोऽफलयुक्ता यजय इति। अत्रोच्यते ना
त्र यागमात्रस्य फलसंबंध उच्यते। किं तर्हि ये यागा दर्शपूर्णमाससंज्ञास्तेषामेव के च दर्शपूर्णमाससंज्ञा
ये दर्शपूर्णमाससंयोगे नोत्पन्नाः। तद्यथा। आग्नेयोऽष्टाकपालः पौर्णमास्याममावास्यायां चाच्युतो भ

मा
वतीत्याग्नेयस्य दर्शपूर्णमाससंयोगेनोत्पत्तिः। तथा तावब्रूतामग्नीषोमावाज्यस्यैव नाउपांशु पौर्णमास्यां य
जतीति उपांशुयाजस्य पौर्णमाससंयोगेनोत्पत्तिः। ताभ्यामेतमग्नीषोमीयं पौर्णमासे प्रायच्छदित्यग्नीषोमी
यस्य च तथा। ऐंद्रं दध्यमावास्यायामैंद्रं पयोमावास्यायामित्यनयोर्दर्शसंयोगेनोत्पत्तिः। अमावास्यां प्रकृत्य
तस्मादैंद्राग्नो द्वादशकपालः पुरोडाशो भवतीत्यैंद्राग्नस्य च। एते चाग्नेयादयो यागा दर्शपूर्णमाससंबंधाद्द
र्शपूर्णपूर्णमासपदेन लक्ष्यंते तेषामेव च फलसंबंधोनेन दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्ये
नाक्रियते। अत एत एव फलवंतः प्रधानभूताश्च इतरे प्रयाजादयो निःफलाः अतः फलवतां प्रधानभूतानां या
गानामंगं भवंति उपकारका भवंति प्रकरणात्। तदुक्तं फलवत्संनिधावफलं तदंगमिति तदंगमित्यनुवर्तमा
नेपि पुनस्तदंगग्रहणं प्रयाजादीनां केवलादृष्टार्थत्वज्ञापनार्थं इतराण्यंगानि कानिचिद्दृष्टार्थानि कानिचिदु
भयार्थानि प्रयाजादीनि त्वदृष्टार्थान्येवेति। तदुक्तं दृष्टादृष्टोभयार्थत्वात्त्रिधांगानि प्रचक्षते दृष्टार्थानि चतुर्द्धा
स्युर्जातिद्रव्यगुणक्रियाः। अदृष्टार्थं द्विधा कर्मद्व्यार्थमपि तन्मतं दृष्टार्थेष्वपि सर्वेषु नियमादृष्टमिष्यते इति त्रि
धागजातं दृष्टार्थमदृष्टार्थमुभयार्थमिति दृष्टार्थमपि जातिद्रव्यगुणक्रियात्मकं तत्र जातिगुणौ पशुना यजे

॥२४॥
॥देवयां०९

तारुण्याक्रीणातीति क्रियासाधनत्वेन विनियुक्तो तत्साधनद्रव्यादेश्छेदेन दृष्टेनैवोपकारेण तस्याः शेषभा
वमनुभवतः द्रव्यस्य तु साक्षादेव क्रियानिर्वृत्तिर्दृष्टमेव प्रयोजनं क्रियापि चावघातादिर्दृष्टार्थैव यासंनिप
त्योपकारकमाचक्षते अदृष्टार्थत्वं तु क्रियाया एव सा च द्वेधा संनिपत्योपकारकरूपा प्रोक्षणादिः आरा
दुपकारकरूपा प्रयाजादिः संनिपत्योपकारकाणि च दृष्टार्थानि कर्माणि स्वकारकाणां कर्मादीनामुत्पत्तिं
प्राप्तिं विकारं वा कुर्वन्ति तत्साध्यस्य प्रधानस्योपकुर्वन्ति यथा संपवनं पिंडस्योत्पत्तिं दोहनं पयसः प्राप्तिं अव
घातो व्रीहीणां विकारं अदृष्टार्थं तु संनिपातिसंस्कारः स्वकारकस्य कुर्वत्प्रधानोपकारि भवति तदेवमुत्पत्त्या
दिसाध्यभेदात्संपाति च तुर्विधं भवति तच्च कर्मादीनामन्यतरे कारके यथा यथमुत्पत्त्यादि करोति कर्मण्येव घा
तः कर्तरि व्रतं करणे प्रयाजशेषाभिधारणं संप्रदाने पशुपुरोडाशयागः अपादाने अग्नेस्तृणान्यपचिरोतीति अ
धिकरणे दध्यानयनं आरादुपकारकं तु न कारकद्वारं अपूर्वद्वारं तु प्रधानस्योपकरोतीति दृष्टादृष्टार्थं च
किंचित्कर्म यथा पशुपुरोडाशयागः सहित्यागांशेनादृष्टमुद्देशेन दृष्टं देवतास्मरणं करोतीति उभयार्थः

॥२५॥
॥ शेष॥

एवमेव स्विष्टकृद्यागादयोप्युभयार्थाः तत्रापि त्यागांशेनादृष्टमुत्पद्यते प्रधानयागोपयुक्तहविरुत्तराद्धादि च प्र
तिपाद्यते यजतयश्चापफलयुक्ताइत्यत्र यजतिजुहोतयः प्रस्तुताः अतस्तयोर्विवेकं पृच्छति यजतिजुहोतीनां
को विशेषः यजतीनां जुहोतीनां होमानां च परस्परं को विशेषः को भेद इति प्रश्नः तत्र यजतीनां विशेषमाह तिष्ठ
द्धोमा वषट्कारप्रदाना याज्यापुरोनुवाक्यावन्तो यजतयः उच्यंते इति शेषः तिष्ठता होमा येषु ते तिष्ठद्धोमाः वषट्का
रेण प्रदानं येषु ते वषट्कारप्रदानाः तथा याज्यावंतः पुरोनुवाक्यावंतश्च ये ते यजतय उच्यंते अथ जुहोतीनां वि
शेषमाह उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः उपविष्टेन कर्त्रा होमो येषु ते उपविष्टहोमाः स्वाहा
कारेण प्रदानं येषु ते स्वाहाकारप्रदानाः ये उपविष्टहोमाः स्वाहाकारप्रदानाश्च ते जुहोतय इत्युच्यंते पूर्वमग्न्य
न्वाधानादीनां प्रजायादीनां चांगत्वं सप्रमाणकमुक्तं तानि चांगानि ऋत्विजः कुर्वंतीति वक्ष्यति शेषाणि तरे यथा
स्थ्यमिति कर्माणि पुरुषाणामिति च तत्रेदं चिंत्यते दर्शपूर्णमासज्योतिष्टोमादिषु किं त्रयोपि वर्णाः ब्राह्मण
क्षत्रियवैश्या ऋत्विजो भवंति उत ब्राह्मण एवेति किं तावत्प्राप्तं त्रयोपि वर्णा ऋत्विजो भवेयुः कुतः प्रभृत्वा
त् सर्वेप्यध्ययनवंतो विद्वांसश्च अतः सर्वेपि कर्तुं शक्नुवंति याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव वृत्त्युपा
या इति तु नियमः पुरुषार्थतया स्मर्यते न क्रत्वर्थतया तेन क्षत्रियवैश्या वार्त्विज्यं कुर्वंतो नियमातिक्रमात्

॥२६॥
॥दिवयाभ॥

कामेस्वधर्मात्प्रच्यावेयातांनकृतोःकाचिद्गुणहानितस्मात्त्रयोपिवर्णाऋत्विजोभवंतीतिपूर्वःपक्षःसि
द्धांतमाह॥ ॥ब्राह्मणाऋत्विजोभक्षप्रतिषेधादितरयोः॥ब्राह्मणाएवर्त्विजोभवेयुःनक्षत्रियवैश्याःकु
तःइतरयोःक्षत्रियवैश्ययोर्भक्षप्रतिषेधात॥अग्निहोत्रशेषांप्रकृत्यश्रूयते॥तेहोचुःकोनइदंहोष्य
तीतिप्रकृत्यतस्मात्तद्यएवकश्चपिबेत्त्द्विनाब्राह्मणःपिबेदग्नौह्यधिश्रयंतितस्मान्नाब्राह्मणःपिबेत
इति॥ किंपुनरग्निहोत्रोच्छिष्टं॥यतस्कंचिपरिशिनष्टितदग्निहोत्रोच्छिष्टमिति॥ननुस्थाल्यामपियदव
शिष्टंतदप्यग्निहोत्रोच्छिष्टमेवस्यान्नेत्याह॥अथयत्स्थाल्यामिति॥यतस्थाल्यांपरिशिष्टंतद्यथापरीणह
अनसोनिर्वपेत॥तद्यथाकुटुंबार्थंसर्वसाधारणंतादृशंतद्यतस्थाल्यां॥परितोनद्धंपरिश्रितंधान्यप्र
र्णंशकटस्योपरिस्थानंपरीणत॥यथाततोहविषोनिर्वापेपितद्धान्यंनशेषःकिंतर्हिपुनरपियागां
तरयोग्यमेव एवमेवतद्यत्स्थाल्यापयइत्यर्थः॥तस्माद्यःकश्चिदेककर्मसंबंधोपिपिबेत॥तथापित्वग्रा
वधिश्रितत्वादब्राह्मणेनपिबेत॥ब्राह्मणसंबंधोपिपिबेदिति॥तथाशाखांतरेतयोःसान्नाय्यभक्षप्र
तिषेधःश्रूयते॥नराजन्योनवैश्यावासान्नाय्यंपिबेदसोममपीथोह्येषइति॥तथा॥दर्शपूर्णमासयोःशाखां
तरेचतुर्द्धाकरणेब्राह्मणाएवनिर्दिश्यंतेब्राह्मणानामेवेदंहविःसौम्यानांसोमपानांनेहाब्राह्मणस्या

॥२६॥
॥भाष्ये॥

स्तीति॥शेषभक्षार्थंहिचतुर्द्धाकरणं॥शेषभक्षश्चऋत्विजांयदिचराजन्यवैश्ययोरथार्त्विज्यंस्यात
नब्राह्मणानामेवेदंहविःस्यात॥राजन्यवैश्ययोरपिपक्षेस्यात॥नत्वेदमवधारणमसंगतंभवेत॥
॥दर्शनाच्च॥ ॥श्रुतावप्ययमर्थोदृश्यतेयत॥ब्राह्मणाएवर्त्विजोभवंति नक्षत्रियवैश्याइति॥तथा
हिद्वयावैदेवादेवाइत्युपक्रम्यतेषांद्वेधाविभक्तएवयज्ञआहुत्यएवदेवानांदक्षिणामनुष्यदेवा
नांब्राह्मणानांशुश्रुवुषामनूचानानामाहुतिभिरेवदेवान्प्रीणातिदक्षिणाभिर्मनुष्यदेवान्ब्राह्म
णांशुश्रुवुषोनूचानानिति॥तस्मादृत्विग्भ्यएवदक्षिणादद्यान्नानृत्विग्भ्यइति॥ऋत्विग्भ्योयद्दीयतेपरि
क्रयार्थंतद्दक्षिणाशब्दाभिधेयं दक्षिणाभिर्ब्राह्मणान्प्रीणातीत्यनेनदक्षिणानांब्राह्मणसंबंधएव
दृश्यते॥अतोपिब्राह्मणाएवर्त्विजः॥किंचदर्शपूर्णमासीकांवान्वाहार्यंदक्षिणायांब्राह्मणाएवदृश्यं
ते॥तएतेवैदेवाप्रहुतादोयत॥ब्राह्मणायदन्वाहार्यमाहरतितानेवतत्प्रीणातीति॥दक्षिणाचर्त्विग्भ्यो
दीयते॥तस्माद्ब्राह्मणाएवऋत्विजोनक्षत्रियवैश्याइतिसिद्धांतः॥ब्राह्मणाएवर्त्विजइतिनियमःक्र
त्वर्थः॥यतोऽब्राह्मणस्यार्त्विज्यक्रतुवैगुण्यमेवदृश्यते रामायणे॥क्षत्रियोयाजकोयस्यचंडालस्य

॥२८॥
॥देवाय०१

विशेषतः कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः इति तथा राज्ञा याजकया जस्य विनश्यति यथा हविरि
त्यब्राह्मणार्त्विज्ये हविर्विनाशः स्मृतः तथा प्रतिग्रहोधिको विप्रे याजनाध्यापनेन तथेति स्मृतेश्च अ
त एवाग्न्यधिश्रितस्य भक्षणप्रतिषेधात् क्षत्रियवैश्ययोरिष्टौ यजमानभागस्यापि होम एव विहि
तो न भक्षणमिति इदानीमिदं विचार्यते चित्रया यजेत पशुकामः द्वादशाहमृद्धिकाम उपेयुः स्व
र्गकामस्य न्नं पेय इत्येवमादीनां फलयुक्तानां कर्मणामारंभे किं कर्तुर्याथाकाम्यमुतावश्यं तेषां
करणमिति तत्र विधिबलादवश्यकरणे प्राप्ते आह फलयुक्तानामारंभे याथाकामी फ
लार्थित्वात् फलयुक्तानां फलसंबद्धानां काम्यानां कर्मणां द्वादशाहादीनां आरंभे कर्मणां
कर्तुर्याथाकाम्यं भवेत् इच्छया प्रवृत्तिः स्यादित्यर्थः कुतः फलार्थित्वात् फलमर्थ्यते याच्
यत इति फलार्थी यतः तस्य फलार्थिनः फलप्राप्त्यर्थं करोति नान्यः काममनेति कस्य यथाका
मं यथाकाममित्यस्य भावो याथाकामी याथाकाम्यमित्यर्थः ब्राह्मणादित्वात् यथाकामशब्दस्य
गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ्प्रत्ययः यथा स्वभावात् त्तलं तं स्त्रियां वर्त्तते एवं ष्य

॥२१॥
॥भोष्ये॥

ञंतमपि क्वचित्स्त्रियां वर्त्तते यथा औचिती वैदग्धी यथाकामीति पदद्वन्नो तेन क्वचित् तदंतं स्त्रियां नपुं
सके च वर्त्तते यदा स्त्रियां तदा ष्यञ्जषित्वात् षिद्गौरादिभ्यश्चेति ङीप् यस्येति चेत्यकारलोपः हल
स्तद्धितस्येति यकारलोपः यथा औचिती चिती तथैव याथाकाम्यं याथाकामीति समानार्थरूपद्वयं
तस्मात् फलयुक्तानां काम्यकर्मणामारंभे कर्तुर्याथाकाम्यमिति सिद्धांतः एवं सर्वकर्मसु इच्छयानु
ष्ठाने प्राप्ते आह ननियमनिमित्ताग्निहोत्रदर्शपूर्णमासदाक्षायणाग्रयणपशुषु प्रवृत्ते नियमः
मः सत्यवदेदित्यादिकः निमित्तं कर्मविनाशादि अग्निहोत्रं सायंप्रातर्होमः दर्शपूर्णमासौ प्रसिद्धौ
तौ इष्टी दाक्षायणेपि दर्शपूर्णमासविशेष एव आग्रयणं नवयज्ञः पशुर्निरूढः एषु नियमादिषु
नियमादिषु पश्वंतेषु उक्तेषु कर्तुर्न याथाकामी न याथाकाम्यं कुतः प्रवृत्तेः शास्त्रं ह्येतेषु नि
यमेषु पुरुषं प्रवर्त्तयति अत एतेषां नियोगतोनुष्ठानं कर्त्तव्यं नेच्छया नियमेषु तावत् सत्यवादी सा
दधः शायी स्यादित्येवमादि शास्त्रं नियमेन प्रवर्त्तयति कथं यदि नियमेषु याथाकाम्यं स्यात् तर्हि
नियमशास्त्रमनर्थकं स्यात् शास्त्रं विनापि याथाकाम्यस्य सिद्धत्वात् सर्वोपि यदेच्छति तदा सत्यं व

॥२८॥
॥ देवया० १

इति अधः शेते च । न च वेदे मात्रामात्रस्याप्यानर्थक्यमिष्यते । अतः शास्त्रस्यार्थवत्त्वाय नियमेषु नि
याथाकाम्यं । निमित्ते सति यन्नैमित्तिकं विधीयते तत्रापि न याथाकाम्यं । तद्यथा सायं प्रातर्दोहात्ताभ्यां वै
पंचशरावमोदनं निर्वपेत् । गृहदाहेग्नये क्षामवते पुरोडाशं इत्यादि यद्यत्र याथाकाम्यं स्यात् । तर्हि सायंप्रात
र्दोहाभ्यां गृहदाहे इत्यादि निमित्तश्रवणमनर्थकमेव स्यात् । निमित्तश्रवणं विनापि विश्वजिदादिवत् । ऐच्छिका
नुष्ठानस्य सिद्धत्वात् । अतो त्रापि न याथाकाम्यं । अग्निहोत्रेपि न याथाकाम्यं । कुतः । यावज्जीवमग्निहोत्रं जुहुयादि
ति श्रुतेः । नन्वग्निहोत्रस्य फलसाधनत्वं श्रूयते अग्निहोत्रं जुहुयात्स्वर्गकाम इति । ततश्च फलयुक्तत्वाद्याथा
काम्यं स्यात् । अत्र कस्मिंश्चन ब्राह्मणे काम्यं प्रयोगं विधाय यावज्जीवमग्निहोत्रं जुहुयादिति पठ्यते । तत्रायं
संदेहः । किं यावज्जीवप्रयोगात्काम्यः प्रयोगो भिन्नः । उत स एवायं काम्यप्रयोगः । स एक एव यावज्जीवकाल
परिमित इति । तत्र यदि यावज्जीवकालः कर्मधर्मत्वेन विधीयते ततः सायं जुहोति प्रातर्जुहोतीति वाक्यव
शेन तत्कालसमापनमग्निहोत्रं न शक्नोति तावंतं कालं पूरयितुमित्यर्थात् ज्योतिष्टोमवदभ्यस्तरूपमेक
मेव प्रयोगं प्रतिपत्स्यते । यदि पुनर्जीवनं निमित्तत्वेनो दिश्य कर्म विधीयते । ततो यावत्कर्तृभाविनि नियते नि

॥२८॥
॥ जोषि

मित्ते विना कामसंबंधेन चोद्यमानमकरणे दोषप्रसक्तेरवश्यं पुरुषेण जीवता स्वार्थसिद्ध्यर्थमनर्थपरिहाराय
कर्तव्यमिति कर्तृधर्मो नियमो नेन वचनेन चोदितो भवति तदा च सायंप्रातःकालयोर्जीवनस्य च सिंहानां निमि
त्तत्वात् प्रतिदिवसं निमित्ते पर्यवसितं कर्म निमित्तावृत्तिवशात् पुनः पुनः क्रियत इति प्रयोगान्यत्वमिति । तत्र किं ता
वत्प्राप्तं । एकः प्रयोगो भ्यस्तरूपः कर्मधर्मो यावज्जीवता । यावज्जीवशब्दो मरणावधिककालपरः तत्कालसंबंध
श्च प्रकृतेः काम्याग्निहोत्रे पूर्वमप्राप्तत्वात् विधीयते । तथा सत्यस्य वा काम्यानित्यप्रयोगविधायकत्वाभावे
न वाक्यांतरविहितः काम्यप्रयोग एक एवाग्निहोत्रस्य पर्यवस्यति । स च काम्यप्रयोगो भ्यसितव्यः । सकृदनुष्ठा
नस्याग्निहोत्रं जुहुयात्स्वर्गकाम इत्यनेनैव सिद्धेर्यावज्जीवमिति कालविधिवैयर्थ्यप्रसंगात् । तस्मादयं का
म्यस्य कर्मणो भ्यासासिद्धये कालरूपधर्मविधिः यावज्जीवकालमभ्यस्येदिति । तथा सति कर्मांगविधौ कथंभा
वसंबंधात्प्रकरणानुग्रहो भवति पुरुषार्थविधौ तु तदसंबंधात्प्रकरणबाधः स्यात् । कथं । तद्धि कथंभावात्मकं
कर्मधर्मपेक्षमाणं पुरुषधर्मे विधीयमाने तत्तं न बाधितमेव भवति एवं चैकप्रयोगे सति दीर्घसत्रसंस्तवउप
पन्नो भविष्यति । इतरथा पुनः प्रतिदिवससमाप्तेन किंचित्सत्रसारूप्यं भवेत् । तस्मात्कर्मधर्मो भ्यास इति

॥२९॥
॥देवया०१

पूर्वःपक्षः॥ सिद्धांतस्तु॥ यावज्जीवशब्देन कालस्य वाचकः॥ किंतु रुक्तस्य जीवनस्य न च जीवनं क
र्मधर्मत्वेन विधातुं शक्यते तस्य कर्मधर्मत्वात्॥ तच्च ककर्तृधर्मं निमित्तकत्वाग्निहोत्रप्रयोगो विधी
यते॥ इह हि यावत्कर्तृभावि जीवनं श्रुत्यैव प्रतिपादितं॥ जुहोतीत्येतदपि स्वार्थविधायकमेव॥ भवत्यहेतु
जीवनेन कालो लक्ष्यते॥ जुहोतिनाभ्यासः॥ न च प्रकरणविशेषणश्रुतेर्लाक्षणिकोऽर्थो वर्णयितुं युक्त
ः॥ तस्माल्लक्षणे जीवने प्राणधारणक्रियारूपे निमित्ते पुरुषस्य प्रत्यवायपरिहारायाग्निहोत्रप्रयोगो वि
धीयते न चात्र कर्मभेदः तद्धेतूनां शब्दांतरादीनामभावात्॥ न चाभ्यासः अविशेषपुनःश्रुतेरभावात्॥
अतः प्रयोगभेद एवायं पर्यवस्यति॥ जीवनस्य चात्र निमित्तत्वात्सति च निमित्ते नैमित्तिकस्य त्यागायोगा
न्नित्यत्वमप्यर्थसिद्धं॥ न च जीवनेनेतरतर्येण प्रयोगप्रवृत्तिः॥ सायंप्रातःकालविशिष्टस्यैव जीवनस्य नि
मित्तत्वात् न कालांतरीयस्य॥ तस्मात्काम्यस्वर्गार्थप्रयोगाद्भ्यं नित्यः प्रयोगो भिन्न इति सिद्धांतः॥ तत
श्चाग्निहोत्रेऽपि न यथाकाम्यमिति सिद्धं॥ अयं तु विशेषः॥ काम्ये प्रयोगे कृते नित्यः कृत एव भवति॥ सो
प्यग्निहोत्रप्रयोग एव॥ तथा चोक्तं तंत्ररत्ने॥ अग्निहोत्रं जुहोतीत्येव समुत्पन्नस्य कर्मणा विपरिवर्त्तमा

२९
॥श्रीराघो॥

नस्य निमित्ते फलेव विधानात्तावत्कर्मांतरमिदं॥ नापि प्रयोगभेदः॥ अंतर्गतत्वात्काम्ये नित्यप्रयोग
स्य काम्यनित्ययोस्तंत्रेणानुष्ठानं॥ कृतिकृत एव त्वस्ति भेदः॥ पृथक्पृथग्निमित्तफलेव कर्मश्रूयते
॥ अतस्तदुपाधिक एव भेदो न वास्तवः॥ तस्मान्नित्यकाम्ययोस्तंत्रेणानुष्ठानं सिध्यतीति॥ दर्शपूर्णमास
योरपि न यथाकाम्यं कुतः यावज्जीवं दर्शपूर्णमासाभ्यां यजेद् इति श्रवणात्॥ अत्राप्यग्निहोत्रव
न्नित्यकाम्यप्रयोगभेदो ज्ञातव्यः॥ न हि देवात्रापि वाक्यद्वयश्रवणात्॥ दर्शपूर्णमासाभ्यां स्वर्गकामो
यजेत यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति॥ अत्रापि यावज्जीवकालं स्वर्गार्थं दर्शपूर्णमासाभ्या
सः कार्य इति कर्मधर्मविधिः पूर्वपक्षे॥ सिद्धांते तु पौर्णमास्यमावास्याविशिष्टे जीवने कर्तृधर्मे
प्राणधारणक्रियारूपे निमित्ते दर्शपूर्णमासयागविधिरिति॥ तस्माद्दर्शपूर्णमासयोर्न यथाकाम्यं
दाक्षायणयज्ञेऽपि न यथाकाम्यं॥ तस्य गुणमात्रविकृतत्वाद्दर्शपूर्णमासरूपत्वात्॥ न तु तन्निहि पृथग्यागस्य
ग्रहणं न कार्यं दर्शपूर्णमासग्रहणेनैव सिद्धत्वात्॥ अत्रोच्यते॥ प्रजापशुअन्नयशस्कामस्येत्येवमा
दिफलसंबंधदर्शनात्काम्यत्वाशंकावुदासार्थं पृथग्दाक्षायणमित्यदोषः॥ प्रजादिकं फलं च गुण

॥३०॥
॥देवया०१॥

तन्न तु दाक्षायणादिति वक्ष्यामः ॥ अतो दाक्षायणेऽपि न याथाकाम्यं ॥ आग्रयणेऽपि न याथाकाम्यं ॥ अनयोर्वा अयं द्यावा
पृथिव्योर्रसोऽस्य रसस्याकृत्वा देवेभ्यो नेममश्नामेति तस्माद्वा आग्रयणेष्ट्या यजत इति श्रवणात् ॥ अत्र द्यावा
पृथिव्योर्रसोऽस्य रसस्यान्नस्य देवेभ्यो होमानन्तरमशनं विधीयते अशनं च नित्यमवश्यं कार्यं अन्यथा जीवनासं
भवात् ॥ न चाकृत्वैतत्कर्तुं शक्यं कृत्वापि ममश्नामेतुल्यत्वात् ॥ तस्माद्दर्शनवदाग्रयणस्यापि नित्यता ॥ तेन न
याथाकाम्यं ॥ किंच ॥ अकृताग्रयणस्य नवान्नभोजने प्रायश्चित्तं विहितमस्ति ॥ अनिष्ट्वाग्रयणेन नवस्याश्नी
याद्वैश्वानरं निर्वपेदिति ॥ ॥ तथा चाह आपस्तंबः ॥ एतामेव निर्वपेद्योऽकृत्वाग्रयणेन नवस्याश्नीयादानीतो
वा एष देवानां यस्याहिताग्निरदंत्यस्य देवा अन्नं यदकृत्वाग्रयणेन नवस्याश्नीयाद्देवेभ्यो भागं प्रतिकॢप्तमद्या
दार्त्तिमार्छेदिति ॥ तस्मादाग्रयणेऽपि न याथाकाम्यं ॥ निरूढपशावपि न याथाकाम्यं ॥ यतस्तं प्रकृत्यैवं श्रूय
ते ॥ तं वै संवत्सरो नानीजानमतीयादिति षट्सु षट्सु पशुबंधयाजीति च ॥ तस्मात्पशावपि न याथाकाम्यं ॥ अत
एवाह वसिष्ठः ॥ अवश्यं ब्राह्मणोऽग्नीनादधीत दर्शपूर्णमासाग्रयणेष्टिचातुर्मास्यपशुसोमैश्च यजेतेति ॥ हा
रीतोऽपि ॥ पाकयज्ञान्यजेन्नित्यं हविर्यज्ञांश्च नित्यशः ॥ सोमांश्च विधिपूर्वेण य इच्छेद्धर्ममव्ययं ॥ ते च गौतमेन

॥३०॥

वा

दर्शिताः ॥ अष्टका पार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकसंस्थाः ॥ अग्न्याधेयमग्निहो
त्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः ॥ अग्नि
ष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था इति ॥ पार्वणं पर्व
णि क्रियमाणं स्थालीपाकलक्षणं श्राद्धं मासि श्राद्धं मनुः ॥ अग्निहोत्रं च जुहुयादाद्यंते द्युनिशोः
सदा दर्शेन चैव मासांते पूर्णमासेन चैव हि ॥ सस्यांते नवसस्येष्ट्या तथा त्वंते द्विजोऽध्वरैः पशुना त्व
यनस्यांते सोमांते सौमिकैर्मखैः ॥ आद्यंते द्युनिशोः सायंप्रातरित्यर्थः ॥ अध्वरैश्चातुर्मास्यैरिति ॥ ॥
सोमैर्वैके ॥ सोमयागेऽग्निष्टोमाख्येन याथाकाम्यं कुतः ॥ वसंते वसंते ज्योतिषा यजेतेति श्रु
तेः ॥ नन्वग्निहोत्रदर्शपूर्णमासयोश्च यावज्जीवग्रहणात्कर्तृधर्मनिमित्तत्वं भवतु सोमादिषु कथं ॥ उच्य
ते ॥ अत्रापि वीप्सासंयुक्तं कालशास्त्रमेव निमित्तं वसंते वसंते ज्योतिषा यजेतेत्यादिकं ॥ न तावदेतत्का
म्यस्यापदिश्यते ॥ तस्य हि यथेष्टमनुष्ठानस्योक्तत्वात् ॥ नैव वक्तुं युक्तं ॥ अथापि नित्यस्य सकृत्प्रयोगः
स्यान्न तदा वीप्सा व्यर्था स्यात् ॥ न च वसंतेयत्तावधारणे प्रमाणमस्ति ॥ तस्माद्यावज्जीवं ये वसंतास्तेष्वि

॥२१॥
॥देवया०१

तिविज्ञायते सप्तम्यपि च भिन्ने जुहोतीति वन्निमित्तार्थैव अत एवंजातीयके सर्वत्र कर्मधर्मनिमि
त्तत्वावधारणं कालशास्त्रमेवं प्रत्येतव्यं ॥ एवं सर्वत्र चातुर्मास्यादौ ज्ञेयं ननु ज्योतिष्टोमेन स्वर्गका
मो यजेतेति काम्यत्वमथ स्पष्टमूयते सत्यं वसंते वसंते ज्योतिषेत्यनेन नित्यत्वमपि स्तुयत एव
अतः प्रयोगभेद एवायमत्रापि अग्निहोत्रादिवत् ॥ एकः स्वर्गकामप्रयोगः ॥ अपरस्तु नित्य इति ॥
अत एव गवामयने कारणांतरेण सोमानंतरायः श्रुतावुच्यते ॥ कथमेषां सोमानंतरितो भव
तिस्संवत्सरैरिति ब्रूयात् इति ॥ यदि सोमस्यावश्यकर्तव्यता न स्यात्तर्हि कारणांतरेणानंतरायव
चनं न स्यात् ॥ अस्ति च तस्मात्सोमेपि नयाथाकाम्यं ॥ एके ग्रहणं तु शूद्रार्थमतान्तरस्यात्राभावा
त् ॥ अत्राहवसिष्ठः ॥ अनग्न्याधेयायनानाहितानिः स्यात् ॥ अलंच सोमायनासोमयाजीति ॥
अलंसमर्थः ॥ सामर्थ्यं च याज्ञवल्क्येनोक्तं ॥ त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः ॥ मनुः
यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये ॥ अधिकं वापि विद्येत स सोमं पातुमर्हति ॥ एवं काम्यसोम
यागविषयं ऋतुश्रुतेर्नित्यस्यावश्यकर्तव्यतादकरणे प्रत्यवायश्रवणात्प्रायश्चित्तविधानाच्च ॥ शं

॥२१॥

खोपि ॥ त्रैवार्षिकाधिकान्नस्तु पिबेत्सोमममं ततः ॥ इष्टिं वैश्वानरीं कुर्यान्तथैवाल्पधनो द्विजः ॥ याज्ञ० ॥ प्राक्
सोमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेत् ॥ मनुः ॥ पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेंद्रियः ॥ न त्वल्प
दक्षिणैर्यज्ञैर्यजेतेह कथंचन ॥ इंद्रियाणि यशः स्वर्गमायुः कीर्त्तिं प्रजाः पशून् ॥ हंत्यल्पदक्षिणो यज्ञस्तस्मा
न्नाल्पधनो यजेत् ॥ मत्स्यः ॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तथार्त्विजः ॥ याज्ञं तु दक्षिणाहीनो नास्ति यज्ञस
मो रिपुरिति ॥ अन्नपरिमाणमपि शंखोक्तं ॥ सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ ॥ चातुर्मास्येषु सर्वे
षु शतं पर्वणि पर्वणि ॥ यत्तु श्रुतौ दातव्यैव यज्ञे दक्षिणा भवत्यल्पिकापीति ॥ तन्नित्याभिप्रायं ॥ अत एव बौधाय
नः ॥ यस्य नित्यानि लुप्तानि तथैवागस्त्यकानि च ॥ विपथस्थो हि न स्वर्गं न गच्छत्यपि तितो हि सः ॥ तस्मात्कैदं फले
र्मूलैर्मधुना पयसापि वा ॥ नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेदिति ॥ तेनाल्पधनस्यापि आधाने सो
मे चाधिकारः ॥ तथा च प्रजापतिः ॥ सर्वसंस्थाधिकारस्याद्वाहिताग्निर्धने सति ॥ आदध्यान्निर्धनोप्यग्निं न तु पा
पभयाद्द्विज ॥ न पापभयादाहिताग्निः संस्थाधिकारी ॥ किं तु धने सत्येव ॥ तासां काम्यत्वात् ॥ कूर्मपुराणे ना
स्तिकादथ बालस्याद्योग्निं नाधातुमिच्छति ॥ यजेत वा न यज्ञेन स याति नरकान्बहून् ॥ तस्मात्सर्वप्रयत्नेन

॥३२॥
॥देवया०१

ब्राह्मणे हि विशेषतः ॥ आधायाग्निं विशुद्धात्मा यजेत परमेश्वरं ॥ इति तथा च स्मृतौ ॥ पशुसोमादीनामशक्याक-
रणासंभवे प्रत्याम्नाय उपदिश्यते ॥ नक्षत्राणां पशुसोमानां निष्कृत्यर्थं संभवे ॥ इष्टिं वैश्वानरीं नित्यं निर्वपेद-
ब्दपर्यये ॥ क्रमानामारब्धानां पशुसोमानामनुष्ठानासंभवे तन्निष्कृत्यर्थं तत्प्रत्याम्नायत्वेनाब्दपर्यये वर्ष-
स्यांते वैश्वानरीमिष्टिं नित्यमवश्यं निर्वपेदित्यन्वयः ॥ तथा याज्ञवल्क्योऽपि ॥ ॥ प्रतिसंवत्सरं सोमः पशुः प्र-
त्ययनं तथा ॥ कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥ एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः इति ॥ स्व-
स्वकाले तत्प्रत्याम्नायरूपां वैश्वानरीमिष्टिं कुर्यात् इत्यर्थः ॥ ॥ चातुर्मास्ये चतुर्मुखश्रुतेः ॥ ॥ चातुर्मा-
स्येषु च न याथाकामी ॥ कुतः ॥ ऋतुमुखश्रुतेः ॥ ऋतुमुखे चातुर्मास्यैर्यजेतेति विधिश्रवणात् ॥ ऋतुमुखं प्रथ-
मं दिनं प्रतिपन्न त्वेत्यर्थः ॥ अत एव वैश्वदेववरुणप्रघासादीनि चातुर्मास्यपर्वाणि प्रतिपद्येव क्रियंते न पौर्णमास्या-
मित्यवसीयते यतः प्रतिपद्येव चतुर्मुखं न पौर्णमासीति ॥ तथा च श्रूयते ॥ एषा ह संवत्सरस्य प्रथमा रात्रिर्यत्फाल्गुनी
पौर्णमासीयोत्तरेति ॥ नित्यत्वे कारणांतरमाह ॥ नियतसहपाठात् ॥ ॥ नियतैर्नित्यैरग्निहोत्रादिकर्मभिः सहपा-
ठादपि चातुर्मास्यान्यपि तद्वदवश्यं कर्तव्यानीत्यवसीयते ॥ तेषु न याथाकाम्यमिति प्रतीयते ॥ तथा हि ॥ न एता

॥३२॥
॥...॥

न्यग्न्याधेयत्वं स्तोनिरग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुबंधश्च सौम्यमध्वरमिति नित्यैः सहपाठेन
तत्सदृशत्वमवगम्यते इत्यभिप्रायः ॥ ॥ दर्शनाच्च ॥ ॥ गवामयने उपयांतरेण श्रुतौ चातुर्मास्यानामंतरायद-
र्शनाच्च चातुर्मास्येषु न याथाकाम्यमित्यवगम्यते ॥ तथा हि ॥ कथमेषां चातुर्मास्यान्यनंतरितानि भवंतीति
पयस्येयेति ब्रूयादिति ॥ यद्यवश्यमनुष्ठेयं तस्येवत्रोपशंकया कारणांतरेणानुग्रह उपपद्यते ॥ नेच्छयानुष्ठे-
यस्य ॥ अपरे तु दर्शनाच्चेत्यमुहेतुमग्निहोत्रादिषु सर्वेष्वपि योजयंति ॥ यतः सर्वत्र श्रूयते ॥ कथमेषामग्निहोत्रम-
नंतरितं भवतीति व्रतेनेति ब्रूयादिति कथमेषां पौर्णमासं हविरित्यादि कथमेषां सोमोऽनंतरितो भव-
तीत्यंत ॥ यतः सर्वत्र कारणांतरेणानुग्रहो दृश्यते ॥ एवं सिद्धांतमुक्त्वा तत्र पूर्वपक्षमाह ॥ ॥ नोत्सर्गयोगात्
॥ ॥ चातुर्मास्येषु न याथाकामीति यदुक्तं तन्न ॥ किंतु तत्रापि याथाकाम्यमेव ॥ न नित्यत्वं ॥ कुतः ॥ उत्सर्गयोगा-
त् ॥ यतश्चातुर्मास्यानामुत्सर्गयोगोऽस्ति ॥ उत्सर्गेण योगः संबंधः योगः इति उत्सर्गं यजमानस्येति ॥ यदि
हि च चातुर्मास्यानि नियतानि भवेयुस्तदा उत्सर्गयोगो न स्यात् ॥ अस्ति च ॥ अतो तत्रापि याथाकाम्यमेव
न नित्यत्वं इत्येवं पूर्वपक्षिते उक्तमेव सिद्धांतं द्रढयति ॥ स्यात्त्रिरुक्तशब्दत्वात् ॥ ॥ चातुर्मास्यानां नित्यत्वे

॥२३॥
गदेवया० १

ष्वुत्सर्गयोगः स्यात् भवेत् । किंवत् । त्रिंशद्वत् । यथा दर्शपूर्णमासयोस्त्रिंशद्वर्षानंतरमुत्सर्गः कृतोस्ति । नित्यत्वं
च तयोरसंदिग्धं विद्यत एव । तथा हि । यद्दर्शपूर्णमासाभ्यां यजत इति प्रकृत्यैतदुच्यते । तस्मादु त्रिंशतमेव वर्षा
णि यजेतेति । एवमत्रापि वचनादुत्सर्गयोगोपि वैकल्पिको भविष्यति । नित्यत्वं च । तस्माच्चातुर्मास्यानामपि नि
त्यत्वमत एवपि न याथाकाम्यमिति सिद्धं । अथवा एवं योजना । उत्सर्गयोगोपि चातुर्मास्यानां नित्यत्वस्यानानि
त्यत्वं स्यात् । त्रिंशद्वत् । यथा दर्शपूर्णमासयोस्त्रिंशद्वर्षानंतरमुत्सर्गयोगे सत्यपि नित्यत्वमविप्रतिपन्नं
विद्यते । एवमिहापीति । अपि च । यद्यावश्यं कर्त्तव्यं तन्नित्यमित्युच्यते । अथेदं विचार्यते । द्विप्रकारं कर्म । नित्यं
काम्यं च । तत्र नित्यं प्रकृत्येदं विचार्यते । किं सर्वांगोपेतं कर्त्तव्यं । उत यावंत्यंगानि कर्त्तुं शक्नोति तावद्भिरंगैरुपे
तमिति । किं तावत्प्राप्तं । सर्वांगोपेतमेव कर्त्तव्यमिति कुतः । भावनांशस्य कथंभागस्य सर्वैरंगैः परिपूरणे
न सर्वांगोपेतस्यैव प्रधानस्य फलवत्त्वात् । अन्यथा अंगाम्नानस्य वैयर्थ्यापत्तेः तस्मात्सर्वांगोपेतमेव क
र्त्तव्यमित्येवं प्राप्ते आह । विगुणे फलनिवृत्तिरंगप्रधानभेदात् । नित्ये कर्मणि अग्निहोत्रदर्शपूर्णमासादिके
विगुणेपि अंगहीनेपि कृते फलनिवृत्तिः प्रत्यवायपरिहाररूपस्य फलस्य निष्पत्तिर्भवत्येव । कुतः । अंगप्र

सत्य

॥३३॥
॥साध्ये॥

धानभेदात् । न तेंगानि प्रधानानि च भिन्नानि । नित्येषु चेति कर्त्तव्यतैव नास्ति । कुत इति कर्त्तव्यतानां
स्ति अपूर्वाभावात् । कालांतरभाविफलसिध्यर्थं ह्यपूर्वं कल्प्यं । तच्चासति फले कल्पयितुं न शक्यते ।
तस्मान्नित्येषु यागस्यैव भाव्यत्वेन फलस्य । तस्मात्पौर्णमास्याममावास्यायां वाग्निमुद्दिश्य पुरोडाश
स्य कर्त्तव्य इत्येतावदुपदिश्यते । तेन दृष्टार्थानि यान्यंगानि संनिपत्योपकारकाणि यैर्विना प्रधानन्भूतया
गनिष्पत्तिर्न भवति । अन्यथानुपपत्त्या तावद्भिरुपेतं प्रधानं कर्त्तव्यं । नांगानि । अंगाम्नानं तु काम्यप्रयोगा
र्थं । अतोग्निकालपुरोडाशमात्रमादरणीयं । अन्यदंगजातं अदृष्टार्थं नादरणीयमिति । कथं तर्हि दृष्टेनिः
फले पुरुषस्य प्रवृत्तिरिति चेत् । उच्यते । प्रत्यवायानुत्पत्त्यर्था प्रवृत्तिः न तु फलार्था । विहिताकरणाद्धि प्रत्य
वायः स्मर्यते । अकुर्वन्विहितं कर्म प्रायश्चित्तीयते नर इति । अतो नित्यकर्मणो निःफलत्वादपूर्वाभावा
दितिकर्त्तव्यता नास्तीति हीनांगस्यैव प्रयोग इति केचित्सिद्धांतमाहुः । तदेतन्नोपपद्यते । कथं । भाव
नातो हि तिस्र आकांक्षा जायंते किं केन कथमिति । तत्र कथमितीतिकर्त्तव्यताकांक्षा नित्येष्वप्यस्ति । तस्मा
दत्राप्यस्तीतिकर्त्तव्यता । सत्यं । अस्त्येवेहाप्याकांक्षात्रयं । तथापि किमाकांक्षायाः समानपारोपात्तेन

॥२८॥
॥दैवप्या०२

यागेनैव प्रकरणात्तन्निर्दिष्टैस्तैस्तु प्रयोगिन्येवेति कर्त्तव्यता कथमाकांक्षायां गृह्यते न त्वपष्टोयोगिप्रयाजाद्यंग
म् दृष्टस्य साध्यस्याभावादितिचेत् ॥ न यागस्य स्वतोपुरुषार्थत्वेन प्रवृत्त्यन्यथानुपपत्त्या समानपदोपा
त्ते यागमुत्सृज्य सर्वेषामपि मतस्य प्रत्यवायपरिहारस्येदृश्यमानतया कल्पनात् ॥ ननु च तत्सर्वेषामभिम
तः स्वर्गादिकमिति न कल्प्यते ॥ तस्य शरीरारंभहेतुतया मोक्षविरोधित्वेन मुमुक्षुणामनभिप्रेतत्वात् ॥ प्र
त्यवायपरिहारस्तु तैरपीष्यत एव ॥ कथं ॥ तस्मिन्याये एव जन्मोपार्जिते भवांतरोपार्जिते वा स्थिते सति
तदुपभोगहेतुभूतशरीरारंभावश्यंभावेन मोक्षाभावात् ॥ अमोक्षार्थिनाप्यवश्यं पापक्षय एषितव्य एव
समीहितफलाय ॥ इतरथा अप्रक्षीणे पापे फलाप्राप्तेः ॥ तस्मान्नित्यानि कर्माणि पापक्षयस्योपायत्वेन
चोद्यमानानीति कर्त्तव्यतामपेक्षंत एव ॥ धर्मशास्त्रेषु च यथैवाकरणे प्रत्यवायः स्मृतस्तथैव करणा
दपि पापक्षयः स्मर्यते ॥ पूर्वसंध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहतीत्यादिभिः ॥ नित्यनैमित्तिकैरेव कुर्वाणो
दुरितक्षयमिति च ॥ तस्मान्नित्येष्वपि अस्त्येव प्रत्यवायपरिहाररूपं फलं ॥ तस्मान्नित्यान्यपि कर्माणि स
र्वाभिमतस्य पापक्षयस्योपायत्वेन चोद्यमानानीति कर्त्तव्यतामपेक्षंत एव ॥ ततश्च सर्वांगोपेतानाम

॥३४॥
॥भाष्ये॥

नुष्ठानं कश्चिदपि सर्वदा कर्त्तुं न शक्नोति ॥ जीवनादिनिमित्ते च तानि विधीयंते ॥ निमित्तस्य चैतद्रूपं यत्तस्मि
न्सति नैमित्तिकमवश्यं कर्त्तव्यं ॥ तेन यावज्जीवं कर्त्तव्यं सर्वांगोपेतं च कर्त्तव्यं इति दुःशकमेव ॥ तेन यथाशक्नु
यादित्युपबध्यते ॥ तत्रावश्यमन्यतरस्मिन्हातव्ये निमित्ते सति नैमित्तिकस्य कर्त्तव्यत्वं प्रधानवाक्ये श्रू
यते ॥ न ह्येकस्यचिदंगस्यानुरोधेन सति निमित्ते नैमित्तिकं न क्रियते ॥ ततः प्रधानवाक्यविरोधः स्यात् ॥
प्रधानमात्रं कृत्वा निमित्ते विधीयते अंगानि तु तदर्थतया प्रकरणेन गृह्यंते अतस्तानि प्रधानवाक्यगता
वश्यकत्वानुरोधेन यथाशक्त्युपसंहर्त्तव्यानि ॥ इतरथा प्रधानस्यावश्यकर्त्तव्यत्वश्रुतिर्हीयेत ॥ तस्मात्प्रधा
नाविरोधेनांगानि यथाशक्त्युपसंहर्त्तव्यानि ॥ न त्वेवं हीनांगादपि प्रधानात्फलसिद्धेरभ्युपगमात्स
मर्थोप्यंगानि परित्यक्ष्यतीति ॥ मैवं ॥ शक्तस्य काम्ये तांगे त्यज्यमाने वैगुण्यं स्यादेव ॥ अंगोपदेशानिमित्तं
चालोच्योभयानुरोधेन यावंत्यंगानि कर्त्तुं शक्नोति तावद्भिरुपेतं प्रधानमनेनः कृपयतीति शास्त्रार्थो
वधार्यते ॥ तावतैव शास्त्रवत्फलनिष्पत्तिरिति साधूक्तं विगुणे फलनिर्वृत्तिरंगप्रधानभेदादिति ॥ ए
वं च प्रयोगविध्यनुष्ठाप्येष्वंगेषूच्यते ॥ यदि कुर्यादित्युच्यते ततयथाशक्त्युपबध्यते यानि तु स्वभाव

॥३५॥
॥देवया०१

सिद्धानि विध्यंतरसिद्धानि वोपजीव्यंते यथा लोके धनार्जनादि वेदेपि कालो विद्याग्नयश्च तेषां स्वरू
पेणे वाधिकारी विशेषणत्वममावास्यासंबंधी द्रव्यवान्विद्यावानग्निमानिति ॥ एतदुक्तं भवति ॥ अंगं
हि विधिवाचादुपदीयेत निमित्तानुरोधाद्वा त्यज्यते ॥ उभयानुग्रहार्थं वाशक्तं प्रत्युपादीयते ॥ अशक्तं
प्रति त्यज्यत इति नान्या गतिरस्ति ॥ तत्रोभयानुग्रहो युक्तो यदि संभवति ॥ संभवश्चोपादेयेष्वंगेषु यथा
शक्ति व्रीहीत्संपादयेत ॥ यथाशक्त्यवहन्यादिति ॥ आहवनीयादिस्वरूपं तु नानेन विधिनोपादीयते ॥ त
स्मादग्निमान्विद्यावानद्रव्यवान् जीवंश्च यजेतेत्येवमाश्रीयते ॥ अतो विद्याग्निकालाद्यपरित्यागे
नान्येषामंगानां यथाशक्त्यानुष्ठानेसिद्धं ॥ तथा चोक्तं तंत्ररत्ने ॥ यानि प्रयोगविधिना कर्तुरुपादेयत्वे
नांगानि चोद्यंते तेषामेव शक्तिपरिमितत्वे यावतिशक्नुयात्तावेति कुर्यादिति ॥ यानि तु विध्यंतरप्रयुक्ता
नि स्वरूपत एवाधिकारिविशेषणं ॥ यथाग्न्यादीनि ॥ तेषामुपादानस्य प्रयोगविधिनानुपादानात्र यावं
छक्ती तुपबंधः संभवति ॥ किंतु तदपेक्षो विधिस्तद्वंत एवाधिकारी इति तेन सपत्नीकस्य त्रयार्षेयस्य व्या
ख्यातोपात्तसंख्याविशिष्टस्याग्निमतो विद्यावंतः प्रदोषादिकालसंयोगिनोधिकारो नान्यस्येति ॥ एवं

॥३५॥
॥जोष्य॥

वा प्रतिसमाधेयांगवैकल्ये प्रमादेमानधिक्रियेतेव ॥ आधानं तु न कुर्यात्तस्यानैमित्तिकत्वादिति ॥ प्रा
यश्चित्तविधानाच्च ॥ प्रायश्चित्तविधानादप्येवं ज्ञायते तद्धि गुणेपि फलनिर्वृत्तिर्भवतीति ॥ यदि च वि
गुणात्फलं न स्यात्तर्हि प्रायश्चित्तं न विदधीत ॥ न हि निःफलस्यांगैः कृत्यमस्ति अस्ति च विधानं ॥ त
स्माद्विगुणादपि फलं भवतीति येषां मते नित्येषु फलाभावेनापूर्वाभावात्तदर्थेतिकर्तव्यता नास्ति
तेषां प्रायश्चित्तविधानमत्यंतानुपपन्नं सतिकर्तव्यताके तु निमित्तभेदेन जाते वैगुण्ये तस्य परिहार
यापरं होमाख्यमंगं भिन्ने जुहोतीत्यादिकमुत्पन्नं सत्क्रियत एव ॥ पक्षांतरे त्वसत्यामितिकर्तव्यता
यां भेदेन जातेपि नास्ति वैगुण्यं ॥ गुणहानिर्हि वैगुण्यं असति गुणे कस्य हानिः स्यात् ॥ ततश्चास्म
त्पक्षे एव प्रायश्चित्तविधानमुपपन्नमिति ॥ तथा च वृद्धः ॥ नित्यकर्मणि यथाकथंचित् कृतांगप
रित्यागेनापि यथाशक्त्यंगोपेतमनुष्ठानं नित्यत्वेन श्रुतो दृष्टः ॥ तथा हि यत्प्रयोगानस्यात्केन जुहुयादिति
व्रीहीयवाभ्यामित्यादिना वाहृत तर्हि किंचनासीदथो तद्रूपेणैव सत्यं श्रद्धायामित्यतेनं ग्रथेन
तथा च दर्शयादृक्तादृग्होतव्यमिति शाखांतराच्च ॥ तस्माद्विगुणेपि नित्ये प्रत्यवायपरिहाररूपं फलं

शा

॥ ३८ ॥
॥ देवया॰ ९

भवत्येव । अत एवोक्तं कर्कचार्यैः उपात्तदुरितक्षयो वा उत्पत्स्यमानदुरितप्रतिबंधो वा भवत्येवेति । अथ काम्यक-
र्मणि चिंत्यते । काम्येपि विगुणे फलाभिनिष्पत्तिर्भवत्येव यतस्तत्राण्यंगानि प्रधानानि च भिन्नानि । अश्वमेधेव
काम्येपि विगुणे फलाभिनिष्पत्तिर्भवत्येव । यतस्तत्राप्यंगानि प्रधानानि च भिन्नानि । अश्वमेधे च काम्ये प्राय-
श्चित्तविधानमप्यस्ति अश्वं प्रकृत्य । अथातः प्रायश्चित्तानां यद्यश्वो वडवां ७ स्कंधे ह्यायव्यपपोनु निर्वपेद्य-
दि स्नामो विंदेदित्यादि । तथा पंचशारदीयेपि उत्सृष्टान्यृषभन्यकृत्यां तां ह्यो प्रायश्चित्तविधानं दृश्यते । अपो-
नप्त्रियो सुमृत इत्यादिकं । यदि च विगुणादपि काम्यात्फलं न स्यात् प्रायश्चित्तविधानं व्यर्थमेव स्यात् । तथा
च दृष्टं । विगुणमपि काम्यं फलोत्पादकं वेदे दृष्टं । कारीरीमिष्टिं प्रकृत्य श्रूयते । यदि वर्षेत्तावत्येव जुहुयादि-
ति । अत्र समाप्तायामेव कारीर्यां तत्फलं वृष्टिरूपं वेदे दृष्टं । अतो विगुणेपि काम्ये फलं सिध्यतीति पूर्वपक्षि-
ते सिद्धांतमाह । न श्रुतिलक्षणत्वात् । यदुक्तं विगुणेपि काम्ये फलं सिध्यतीति तन्न । कुतः श्रुतिलक्षण-
त्वात्काम्यस्य । यतः काम्यं सगुणमेव सर्वांगोपेतमेव श्रुत्यादिलक्षितं फलसाधनत्वेन विहितं । तत्रांगलोपे
काम्यमानफलानुत्पत्तेः । न च प्रधानस्य त्यागे यथा फलं नास्ति एवमंगत्यागेपि । फलसाधनत्वं हि शास्त्रैकसमधि-

॥ ३८ ॥
॥ या ॥

गम्यं । न तावदंगं प्रधानं वा यावच्छब्दोपात्तं तस्य लोपे साधनत्वं नास्ति । अतो यदा सर्वांगोपेतं कर्तुं शक्नो-
ति तदैव तत्र प्रवर्त्तते । ननु यथाशक्ति । न हि तत्रांगत्यागे प्रमाणमस्ति । प्रधानवाक्यस्य त्यागेप्यविरोधा-
त् । न हि तस्यावश्यकर्तव्यत्वं केनचिदुक्तं यतश्च औदासीन्यं न लभ्येत । काम्यश्रुतिस्तु समर्थमपि वर्त्तमानाश्रु-
त्यर्थं तानजहातीति नांगत्यागे प्रभवति । निमित्तश्रुतिस्तु निमित्ते सत्य क्रियमाणे नैमित्तिके पीड्यतेति
वैषम्यं । अतो निमित्ते सति नित्यस्यावश्यकर्तव्यत्वबलात्सर्वदा सर्वांगोपेतस्य केनापि कर्तुमशक्यत्वा-
द्यथाशक्नुयात्तथा कुर्यादित्येतं कल्प्यते । काम्ये त्ववश्यकर्तव्यत्वाभावदेवं कल्पयितुं न शक्यते । अतः
काम्यं विगुणं फलं न साधयत्येवेति सिद्धं । ननु यद्येवं तर्हि काम्ये अश्वमेध पंचशारदीयादौ किमर्थं प्रा-
यश्चित्तविधानमित्याशंकायामाह । प्रायश्चित्तं तत्काले । आरब्धं हि काम्यं अयथाकरणादिना वि-
गुणमपि असमापने शिष्टविगर्हणरूपाच्छिष्टाचारात्स्मृतिसंनद्धश्रुतिं कल्पयित्वा अवश्यं समा-
पनीयमेव । विगुणं च यद्यपि श्रुतं फलं न भवति । तथापि तादृशात्प्रत्यवायपरिहारो भवत्येव । अत एव
तत्काले तस्य काम्यस्य कर्मणो विनाशकाले यत्प्रायश्चित्तं तत्तस्य विनष्टस्य कर्मणः प्रत्यवायपरिहार-

॥२७॥
॥देवया०१॥

जननेउपकारकत्वात्स्वार्थकमेवभवति ॥ ननुभवतुप्रायश्चित्तविधानमर्थवत् ॥ विगुणायांअपिअसमाप्ता
यांकारीर्यांवृष्टिरूपफलदर्शनस्यकागतिरित्याकांक्षायामाह दृष्टेतत्परिमाणं ॥ ॥ कृतायांकार्यामिष्टौवर्षणे
दृष्टेसतितत्परिमाणमेवकर्मकर्त्तव्यं ॥ यत्परिमाणमदृष्टवर्षणेक्रियते ॥ ननुवृष्टेर्दृष्टायांकिमपूर्णंकृता
र्द्ध्वापरित्याज्यमिति ॥ नचवर्षणंतस्याइष्टेःफलंकिंतुकालस्वभावात्प्रतिबंधकापगमाच्च ॥ काम्यस्यक
र्मणोवीतायांफलेच्छायां अवाप्तेवाफलेअवश्यसमापनीयत्वंचजैमिनिनोक्तं षष्ठस्यद्वितीयेचरणे ॥ प्र
क्रमात्तुनियम्येतारंभस्यक्रियानिमित्तत्वादिति ॥ अथवाएवंव्याख्या ॥ वर्षणेदृष्टेसतितत्परिमाणमेवक
र्मकर्त्तव्यं ॥ यावत्परिमाणेकृतेवृष्टिर्दृष्टातत्परिमाणमेवकार्यंनसमापनीयमित्यर्थः ॥ यदिवर्षेत्ताव
त्येवजुहुयादितिवचनात् ॥ तथाचोक्तंकर्काचार्यैः ॥ तत्रतावत्प्रमाणताकर्मणउच्यतेइति ॥ वाक्यप्र
करणाभ्यामंगविनियोगउक्तः ॥ अधुनालिंगेनमंत्राणांविनियोगंवक्तुकामोध्येतृप्रसिद्धास्तान्मं
त्रानाह ॥ २ ॥ ऋचोयजूंषिसामानिनिगदामंत्राः ॥ ऋगादयोनिगदांताश्चत्वारोमंत्राः ॥ तत्रार्थवशे
नवृत्तवशेनायत्रपादव्यवस्थासाऋक् ॥ तत्रसमिधाग्निंदुवस्यतेत्यादौयत्रप्रत्यक्षेणसमाप्तोर्थोद

॥२७॥
॥जो०॥

श्यते ॥ तत्रार्थवशेनपादव्यवस्था ॥ यत्रचक्रियापदानुपादानात्तुसमिद्धायशोचिषेतेत्वासमिद्धंरंगिरइत्या
दौअपर्यवसितोर्थस्तत्रवृत्तवशेनपादव्यवस्थाभवति ॥ अतश्चयत्रनियताक्षराणिनियताश्चपादाःनियतानि
वावसानऋक्त्वुच्यते ॥ अनियताक्षरपादावसानंयजुः ॥ यद्यपिप्रगीतंमंत्रवाक्यंसामेत्यभियुक्तप्रयोगः ॥ त
थापितत्रविशेषणंगीतिः ॥ विशेष्याणिऋगक्षराणि ॥ नागृहीतविशेषणाविशेष्येबुद्धिरितिनिप्रथमप्रतीय
मानत्वात्गीतिरेवसामेत्युच्यते ॥ तथाचकवतीषुरथंतरंगायति ॥ यद्योन्यादुत्तरस्यांयोगायतिऋच्यधू
र्षसामगायतिप्रजापतेर्हृदयमन्नृचंगायतीत्याद्युपपन्नंभवति ॥ अतऋगक्षरातिरिक्तेयंगीतिःशब्दवाच्य
तस्मात्सामशब्देनोच्यते ॥ ननुयदीरथंतरादिशब्दागीतेरेववाचकास्तदारथंतरेणस्तुवीतेतिकथंस्तुतिसा
धनत्वं ॥ गुणगुणिसंबंधकीर्त्तनंहिस्तुतिः ॥ साचगीतिरूपेणसाम्नानसंभवतिउच्यते ॥ गीतेःस्वयं
तिवाचकत्वाभावादक्षरप्रकटनद्वारास्तुतिसाधनत्वंभवतीतिनोक्तदोषः ॥ निगदाःप्रैषाःपरसंबो
धनार्थाःप्रोक्षणीरासादयाग्नीदग्नीन्विहरेत्येवमादयः ॥ ननुनिगदाअपियजूंष्येव ॥ ततःकिमर्थं
पृथगुक्ताःउच्यंते ॥ ॥ उपांशुयजुषाउच्चैर्निगदेनेतिधर्मभेदेनयजुष्ट्वेनंभावशंकयापृथग्वचनं ॥ वस्तु

॥१८॥
॥देवया०१

तस्तु निगदानां यजुष्ट्वमेव ॥ परसंबोधनार्थत्वात् तु नैर्निगदेनेति धर्मभेदः ॥ न च धर्मभेदाद्भेदः ॥ ऋक्सामयो
रपि छंदोगपांसुप्रयोगविधानात् ॥ अतस्त्रैविध्यमेव मंत्राणां ॥ तथा चोक्तं ॥ अहिर्बुध्न्यमंत्रं मे गोपायमृषयस्
त्रैविद्या विदुः ॥ ऋचः सामानि यजूंषीति ॥ त्रीन्वेदान्विंदतीति त्रिविदः ॥ त्रिविदां संबंधिनो ध्येतारस्त्रैविद्याः ॥ ते
च मंत्रभागमृषादिरूपेण त्रिविधमाहुस्तं गोपायेति योजना ॥ ऋग्यजुः सामात्मको मंत्रभेदोभिहितः तदवां
तरभेदाकांक्षायामृचां साम्नां चाध्येतृप्रसिद्ध्यैव भेदसिद्धेर्लक्षणं न क्रियते ॥ यजुषां तु प्रश्लिष्टपठितत्वा
ल्लक्षणं विना भेदो न ज्ञायत इत्यत आह ॥ तेषां वाक्यं निराकांक्षं ॥ तेषामिति तच्छब्देन यजुषां निर्देशः
ऋचां साम्नां च भेदलक्षणापेक्षाभावात् ॥ ननु यजुषामपि भिन्नप्रतीकविनियोगाद्भेदः सेत्स्यतीति स
त्यं ॥ न तावत्सर्वेषां ब्राह्मणेन विनियोगोस्ति ॥ न च परादिना पूर्वांत इत्येतल्लक्षणं वेदवचनं ॥ न्याये तु स्व
त्वकृतेदमुक्तमिति अतो लक्षणमुच्यते तेषां यजुषां प्रश्लिष्टपठितानां मध्ये यावत्पदजातं निराकांक्षं पूर्वा
परपठितपदांतराकांक्षारहितं तावत्पदसमूहात्मकमेकं वाक्यं ईदृशं एकं यजुः ॥ अर्थादितोन्यद्वाक्यांतरं
यजुरंतरं चेत्युक्तं भवति सर्वमंत्राणामनेन यजेतानेन यजेतेति प्रथमं प्रकरणाम्नानुमितवाक्यविनि

॥३८॥

य

योगो भवति ततः साकांक्षाद्यागसंबंधात्संभवात् तदुपकारिप्रकाशनेनेतिरिष्टं भवतीत्येवं कल्प्यते ॥ तेन यावता
पदसमूहेन यागसाधनं स्मा[illegible]र्यते ॥ तावद्यजुर्वाक्यं ॥ वचनार्हहिवाक्यं ॥ कार्यसमर्थं च तदर्हं भवति न न्यू
नमधिकं वा ॥ तच्चैकार्थं साकांक्षावयवं च ॥ तद्यथा ॥ देवस्य त्वा सवितुः प्रसव इति अत्र हि सर्वाणि पदानि यहरण
प्रकाशनार्थानि अत एकार्थानि साकांक्षाणि च ॥ तस्मादेषा[illegible]मेकयजुष्ट्वं ॥ एवं सर्वत्र पुरस्तात्परस्ताच्चैका
र्थपदपरिग्रहेणासमस्तमर्थपदविमोकेन भिन्नानि यजूंषि कल्प्यते ॥ एकप्रयोजनं साकांक्षं पदजातं एकं यजु
रित्युक्तं ॥ अनेन लक्षणेन यत्र समवेतार्थप्रकाशकं गृह्णामीत्यादिकं पदमस्ति ॥ तत्रैतत्तु गमं परिमाणं ॥ अथ
यत्र समवेतार्थपदाभावाल्लैंगिकविनियोगाभावे वाचनिक एव विनियोगः ॥ परस्परनिराकांक्षं च स्वरूपतो व
गम्यते ॥ इषे त्वोर्जे त्वेति ॥ यथा वायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामिति ॥ तत्र कियदेकं यजुरिति
चिंत्यते ॥ किं प्राकृदृष्टार्थमंत्रावधेरेकमंत्रत्वं उत यावदेव मिथः सवर्ड् इषे त्वेति ॥ तावदेकं यजुरन्यत्तु
यजुरंतरमिति ॥ तदर्थं च किं सर्वमेकार्थमुत भिन्नार्थमिति विचारः ॥ तत्र तावदनुष्ठेयार्थप्रकाशनादेषो
मदृष्टार्थत्वं ॥ अदृष्टं चात्र कल्प्यमानं एकमेव कल्प्यं तावताप्युपपत्तेः ॥ वक्ष्यदृष्टकल्पनायाः प्रामाणिके

॥३१॥
॥देवया०१

त्वाच्च ॥ अतः सर्वेषामेकार्थत्वात् ॥ प्रत्येकं साधनशक्त्यभावात् संहत्यकारित्वाद्विभज्यमानानां साकां
क्षत्वमस्तीत्येकवाक्यता ॥ कथं पुनरेकत्वपक्षे प्रतीकभेदेन विनियोगः ॥ इषे त्वेति शाखां छिनत्ति
ऊर्जे त्वेति अनुमार्ष्टीति ॥ कथं च क्रमेणैवोच्यतीति बहुत्वनिर्देशः ॥ उच्यते ॥ आदिमध्यावसान
ग्रहणे नैकोपि मंत्रस्तत्र तत्र विनियुज्यमानो न पीड्यते ॥ यावद्धि नियोगं सकल आवर्त्यते खंड
स्याप्रयोजनत्वात् ॥ कल्प्यतां कल्प्यतामिति च पुनः पुनः प्रयोगादेकवाक्यत्वेपि बहुवचनाविरोधः ॥ त
स्मादेतेषामेकार्थत्वमेकमंत्रत्वं चेति प्राप्त आह मिथः संबद्धं ॥ यावदेव मिथः संबद्धं परस्परं संब
द्धं अन्वययुक्तमिषे त्वेत्येतावत् ॥ तावदेकं यजुः एकं वाक्यं ॥ ततोन्यद्वाक्यांतरं यजुरंतरमिति ॥ यद्य
प्येषां समवेतार्थप्रकाशकपदार्थत्वादेकार्थत्वं ॥ तथापि न तस्यादृष्टस्यैकत्वं ॥ यतो विनियोग
प्रयोजनेन रूपादुत्तरकाले ॥ नहि विनियोगप्रयोजनोत्तरकालरूपनिरूपणं युक्तं ॥ अज्ञाततद्रू
पस्य विनियोगाशक्तेः ॥ अविनियुक्तस्य च प्रयोजनकल्पनानुपपत्तेः ॥ रूपं तु निरपेक्षं पाठादेवावधा
र्यते ॥ तत्कालावधृतभेदानुवर्तित्वं च प्रयोजनविनियोगयोः ॥ प्रमाणवशाच्च बहून्यप्यदृष्टानिक

॥३१॥
॥श्री॥

ल्प्यंते ॥ यदुक्तं प्रमाणवत्त्वदृष्टानि कल्प्यानि सुबहून्यपीति ॥ न च रूपोपलब्धिवेलायां परस्परसाकांक्षा
त्वमेकप्रयोजनत्वं चोपलभ्यते ॥ न तस्यां निर्विरोधभेदनिर्धारिते पश्चादेकत्वापादनकारणं किमपि न
संभवति ॥ न च प्रागनुपलब्धं साकांक्षत्वं पश्चात्कल्पयितुं शक्यते ॥ न चैतेषामदृष्टार्थत्वं च ॥ ब्राह्म
णोपदिष्टदृष्टार्थसाधनत्वात् ॥ तथा च इषे त्वेति मंत्रः शाखाछेदने करणत्वेन ब्राह्मणे उपदिष्ट
क्रियानिष्पादने च करणं न च मंत्राणां क्रियानिष्पादकत्वं तत्प्रकाशनादन्यत्किमपि संभवति ॥ तेन
विधिबलादेषां प्रकाशनार्थत्वं ॥ ततश्च तद्बलेनैवैषां यावता विना विहितप्रकाशने सामर्थ्यं नास्ति
तावत्साम्नातमपि अध्याहर्तव्यं छिनद्मीत्यादि ॥ यद्वा यदेव रथघोषेण माहेंद्रस्य स्तोत्रमुपाकु
र्णतीति वचनाद्वाचकस्यापि विनियोगानुसंधाने स्तोत्राभिमुख्याचिह्नत्वं भवति ॥ एवमिषे त्वे
त्यादीनां छेदनादिस्मरणहेतुत्वं ॥ उभयमपि चैतत्प्रमाणवदिति सूत्रकारः ॥ केचित्तु कथंचिदा
श्रितं ॥ सर्वथात्रैकमध्यवसातव्यं ॥ विकल्पवाक्यप्रयोगासंभवाद्वाचकप्रयोगानुपपत्तेश्चाध्या
हारः ॥ यथाम्नातविनियोगानुसारात्तादृशे नैव स्मर्तुं संस्काराधने यतितव्यं ॥ तत्रानुष्ठात्रमिप्रा

॥४०॥
॥देवया॰॥

याधीनोन्यतरपरिग्रह इति तंत्रदीकायां ॥ तत्रैकेनछेदनं प्रकाश्यते अन्येनानुमार्जनमिति ॥ दृष्टप्र
योजनभेदादपि सिद्धो वाक्यभेदः ॥ तथा आयुर्यज्ञेन कल्पतामित्यादीनामपि स्वरूपतो निराकांक्षत्वा
त् क्लृप्तीर्वाचयतीति क्लृप्तेर्बहुवचनचोदितत्वात्तत्तत्संपत्यर्थमायुरादिविशिष्टक्लृप्तिभेदप्रकाश
नपरत्वादर्थभेदेन मंत्रभेदः ॥ तदेवं साकांक्षस्य यजुषो विहितार्थप्रकाशकत्वनिर्वाहयोग्यपदा
ध्याहारे उक्तेपि यत्र संनिहितवाक्ये मंत्रशेषो दृश्यते ॥ साकांक्षे च मंत्रे तादृश एवापेक्ष्यते ॥ ॥
तथा ॥ ॥ अस्मादन्नादस्यै प्रतिष्ठाया इत्यादौ तत्र किं लौकिकः शेषोध्याहार्यः ॥ उत यः पूर्वमंत्रा
न्ते पठितः निर्भक्तो योस्मान्द्वेष्टीत्यादिः स एवानुषंजनीय इति किं प्राप्तं लौकिकोनुषंजनी
य इति ॥ लौकिको हि शब्दः सर्वार्थो यथेष्टं सर्वत्र विनियुज्यमानो न विरुध्यते ॥ वैदिकस्तु पदार्थ
माम्नातस्तेनैव विद्धो नान्यत्र नेतुं शक्यते ॥ तस्माल्लौकिक इति प्राप्ते उच्यते ॥ वेदे नैवापेक्षितरूपेणा
कांक्षाशेषे समर्पिते निःप्रमाणकलौकिकशेषकल्पनं न युज्यते तस्माद्वैदिक एव निर्भक्त इत्यादिः शे
षोस्मादन्नादित्यत्रानुषंजनीयः ॥ अस्यै प्रतिष्ठाया इत्यत्र च ॥ नन्वध्याहारानुषंगस्तु वैदिक इति

॥४०॥
॥भाष्ये॥

प्रयोजनं एतच्चिंतायाः ॥ अध्याहारविनाशेस्मार्तं प्रायश्चित्तं ॥ अनुषंगविनाशे तु श्रौतमिति ॥ एवमूहप्रव
रनाम्नां लौकिकत्वेन मंत्रत्वं ॥ सं ते प्राणो वातेन गच्छतामित्यत्र गच्छतामित्येतत्पदमेकवचनांतत्वात्समंगानि
यजत्रैरित्यत्रान्वेतुमयोग्यत्वान्नानुषज्यते ॥ तद्योग्यवाक्यनबुद्धिसंनिध्यभावात्संयज्ञपतिराशिषेत्यत्रापि ना
नुषज्यते ॥ तेनानयोर्गच्छतां गच्छतामित्यध्याहारो यथाक्रमं कार्यो मंत्राध्याहारपक्षो श्रवणे सोकार्यायते प्र
दश्यते ॥ तत्र दर्शपूर्णमासयोरिषे त्वेत्यत्र छिनद्मीत्यध्याहारः ॥ ऊर्जे त्वेत्यत्र संनमयामीति ॥ इमाव ध्याहा
सत्र तैवोक्तो कर्मणे वामित्यत्रादद इति ॥ उरु वाताय भवेति प्रेक्षे इति केचित् ॥ भूताय त्वा नारातय इति परिशि
षयामीति ॥ प्राणाय त्वेत्यादिषु त्रीषु पिनष्मीति ॥ चक्षुषे त्वेत्यत्र ईक्षे इति ॥ इषे त्वेत्यत्राधिश्रयामीति ॥ वसुभ्य
स्त्वेत्यादिषु नज्मीति ॥ संगच्छतां यज्ञपतिराशिषेति च ॥ वरुणप्रयासेषु अनुत्वा देववीतये हरामीति ॥ भू
तेभ्यस्त्वा उद्गच्छामीति च ॥ पशौ विक्षवे त्वा उपस्पृशामि दिवे त्वेत्यादिषु प्रोक्षामीति ॥ सुपिप्पल्याभ्यस्त्वौ
षधीभ्यः प्रतिमुंचामीति ॥ यूपाय ह्रियमाणाय यूपाय परिवीयमाणायेति च ॥ अग्निमंथने अग्नये जा
तायेति अग्नये प्रक्रियमाणायेति ॥ पशुसमंजने संगच्छतामंगानि यजत्रैः संगच्छतां यज्ञपतिराशीषेति ॥

रा

॥४७॥
॥देवया०१

शेषनिषेके शमहोभ्यो निषिंचामीति ॥ सोमे ॥ स्वाहायज्ञंमनस इत्यत्र आरभ इत्यनुषंगः ॥ स्वाहोरोरितिस्वाहाद्या
वापृथिवीभ्यामित्यनयोर्यज्ञमारभ इति ॥ स्वाहावातादित्यस्यां यज्ञमिति ॥ त्वेरायः संतुमेरायः संत्विति ॥ प्रजाभ्यस्त्वा
हावध्नामीति ॥ हविर्द्धानेस्थूणानिखनने ॥ विष्णवेत्वा उपनिहन्मीति ॥ नेत्रोसहास्तु तन्मेक्षितिच ॥ सुत्यायां ॥ सो
ममानंद्दायत्वेतिपंचसुमिमे इति ॥ देवेभ्यस्त्वा मरीचिपेभ्य उपमाज्मीति ॥ ग्रहसादनमंत्रेषु सर्वेषु साकांक्षे
षु गृह्णामीति ॥ उपाश्वतयामाग्रयणोक्थ्यध्रुववर्जं ॥ शुक्रामंथीसादने सादयामीत्यस्याभावः ॥ महावीरसंभर
णेपि ॥ पिंडादेः आदाने मखायत्वामखस्यत्वाशीर्ष्णे आददे इति परिगृह्णामीति वा ॥ संभाराभिमर्शने ॥ मखा
यत्वा मखस्यत्वाशीर्ष्णे अभिमृशामि ॥ निधानेनिदधामीति ॥ संसर्गेसंसृजामीति ॥ ऊर्जत्वेत्यादिषु उद्धरामी
ति ॥ आज्ययोः वसेके अवसिंचामि ॥ यमायत्वेत्यादिषु प्रोक्षामीति ॥ मधुमधुमधु आघ्नोमि उपवाजयामि
इति वा ॥ वयने ॥ प्राणभृत्सु छंदस्याविराजामुपधानमंत्रेषु मया उपधीयतइत्यध्याहारः ॥ प्राणभृत्सु पंचस्व
पि कंडिकासु दशमेदशमे मंत्रे अध्याहाराभावः ॥ गृह्णामीत्यनेन निराकांक्षत्वात् ॥ आस्तुस्विरदितिकंडिका
पठितेषु धर्त्रीयतुष्टोम इत्यतेषु च मया उपधीयत इति ॥ बालखिल्यासु च आयुषेत्वेत्यादिषु त्वांतेषु अष्टासु

॥५१॥
॥न्तोद्ये॥

मंत्रेषु उपदधामीति ॥ यंत्री राडित्यत्रासीति ॥ मूर्द्धासिराडित्यत्रासीतिदर्शनात् ॥ अस्याप्यनेन समानार्थ
त्वात् ॥ पशुशिरसिनासिकयोः चक्षुषोश्च हिरण्यशकलप्रासने प्रास्यामीत्यध्याहारः चतुर्षु मंत्रेषु ऋचे
त्वाप्रास्यामीत्यादि ॥ अग्निर्ज्योतिषेत्यस्यां तेअस्त्विति ॥ पुरुषशिरसउद्ग्रहणे सहस्राय त्वा उद्गृह्णामीति
हिरण्यशकलप्रोक्षणे ॥ पंचमेमंत्रे सहस्राय त्वा प्रोक्षामीति ॥ अश्मंस्तेक्षुदस्तुमपितऊर्गृच्छतु ॥ इति ॥ वाजपे
ये ॥ ऐंद्रेषु ग्रहणे नाध्याहारः ॥ अन्येषु सर्वेष्वपि ग्रहणे सादने च गृह्णामि सादयामीति च ॥ ऐंद्रेष्वपि सादन
मंत्रेषु भवत्येवासमदेशस्तु सोमगृहेषु सादने एव षतयोनिः सादयामि इत्यध्याहारः ॥ न गृहणे ॥ एवं सौत्रा
मण्यां च ग्रहणे सादने च ॥ आग्नालंभनमंत्रेषु वक्ष्यते ॥ पित्रे मधे अग्ने भ्राजसा सूर्यस्य वर्चसेत्यनयोः ॥ पुना
तु पदस्य अनुषंगः ॥ तदेवंमंत्रस्वरूपेतद्भेदेचोक्ते तेषां प्रकरणप्रमाणेन सामान्येन विनियोगे सिद्धे अधु
ना लिंगप्रमाणेन विशेषविनियोगमाह ॥ तेषामारंभेर्थतो व्यवस्थातद्वचनत्वात् ॥ तेषां मंत्राणामारं
भे प्रयोगे अर्थतः विहितार्थाभिधानरूपेण सामर्थ्येन लिंगेन अनेन मंत्रेणायंपदार्थकर्त्तव्यः ॥ अनेनाय
मित्येवंरूपा व्यवस्था भवति ॥ योमंत्रो यत्पदार्थाभिधानसमर्थः सतत्र विनियोज्यते इत्यर्थः ॥ कुतः ॥ तद्वच

गृहेषु

॥४२॥
॥देवया० १॥

नत्वात्तमेवार्थं वक्तीति तद्वचनः॥ तस्य भावस्तत्त्वं तस्मात्॥ यतस्तमेवार्थं वक्तुं शक्नोति नार्थांतरं॥ यथा
उरु प्रथा उरु प्रथस्वेति अग्रुप्रथनमेवाभिधातुं समर्थः अतस्तत्रैव विनियुज्यते॥ ननु सूत्रकारः प्रतिप
दार्थं मंत्रविनियोगं वक्ष्यत्येव किमर्थमिदमुक्तं॥ अनुक्तसंग्रहार्थं॥ यथा प्रवत्स्यन्सर्वानर्थेति प्रतिमं
त्रमित्यादौ॥ ॥मंत्रांतैः कर्मादिः सान्निपात्योभिधानात्॥ कर्मसु ये मंत्राः पठ्यंते॥ तेषां मंत्राणामंतैः स
ह कर्मादिः क्रियमाणस्य कर्मणः आदिः सांनिपात्यः संयोजनीयः॥ कुतः॥ अभिधानात्॥ यतो मंत्रः पठित ए
व सन्न कर्माभिदधातीव क्ति॥ नान्यथा॥ ततो मंत्रेण स्मारितं सन्न कर्मानुष्ठीयते सकलस्य मंत्रस्य विनियुक्त-
त्वात्सकलेन संपादितं स्मरणं कर्मांगं॥ अतः सकलमंत्रसमाप्तौ तज्जनितं स्मरणं यावदेव नापभ्रष्टं तावदेव
प्रयोगः कर्तव्यः तेन मंत्रांतस्य कर्मादेश्च संनिपातः॥ ॥अनियमं वात्स्यः॥ ॥वात्स्य आचार्यो मंत्रप्रयोगस्य
कालानियमं ब्रवीति पूर्वं क्रियमाणे वा कृते वा कर्मणि मंत्रः पठितव्य इति॥ मंत्रस्य कर्माभिधायकत्वमेवम
पि भवत्येव॥ अथ सिद्धांतमाह॥ ॥आदित्वाचार्यः॥ ॥तु शब्दो वात्स्यमतनिरासार्थः॥ आचार्याः सर्वे
पि मुनयः कर्मण आदिमेव मंत्रांतैः सह योजयंति॥ नानियमः॥ यतो मंत्रेण स्मृतं कर्म कर्तव्यं॥ ॥तदुक्तं

॥४२॥

अनुष्ठाने पदार्थानामवश्यंभाविनी स्मृतिः॥ अनन्यसाधनानन्यकार्यैर्मंत्रैः प्रसाध्यते॥ न तावदनुष्ठानवेला
यामस्मृतः कश्चिदपि पदार्थः॥ शक्यः कर्तुमित्यवश्यंभाविन्याः स्मृत्या योग्यसाधनमात्रापेक्षणे द्युत्किंचि
द्ब्राह्मणपदार्थानुसाधनं वा पूर्वापदार्थप्रत्यवेक्षणं वा स्मृत्युपायो वा आत्मीयग्रहणं कवाक्यानि वोपदृष्टा वा
साधानं गृहीतुमारभ्यते॥ तत्रानन्यप्रयोजनान्प्रकरणे पठ्यमानान्सामान्यतः कर्तुमाकांक्ष्यते तादृग्रूपाण्येव
इति विदित्वा लिंगप्रकरणानुमितया श्रुत्या विनियोगे सत्यभिधानार्थताविज्ञायते॥ ततश्चोपायांतराण्यप्रमाणीकृत्वा
न्निवर्तंते॥ नियमादृष्टसिद्धिश्च॥ मंत्रैरेव स्मृतं कर्म कृत्वाभ्युदयकारि भवतीत्यवधार्यते॥ यत्र च मंत्राभावस्तत्र
विधिवाक्येनैव॥ तदसंभवे उपायांतरेणापि पदार्थस्मृतिः कार्या॥ ॥तत्रायुक्ताः॥ ॥ते मंत्राः सूत्रमध्ये आयु
क्ता आदिमात्रेणोक्ताः संतः प्रयोगकाले सकलाः प्रयोज्याः॥ ननु सूत्रमध्ये यावानवयव उपात्तस्तावन्मा
त्रा इति॥ ॥परादिनापूर्वांतः॥ ॥परस्य मंत्रस्य सूत्रोपात्तेनादिनानिर्दिष्टेन पूर्वस्य मंत्रस्यांतो ज्ञेयः॥ नन्वे
तत्र वक्तव्यं वाक्यलक्षणेनैव मंत्रांतस्य सुगमत्वात्॥ सत्यं क्वचिद्वाक्यसमूहस्यैकमंत्रत्वसिध्यर्थं पुनरु
च्यत इति दोषः॥ तद्यथा विश्वेषां देवानां भागधेयीस्थेति समाप्ते पिवाकी अश्र्याउपसृष्टेर्याइत्यादिप्रयु

त्र

॥५४॥ ॥देवया०१

ज्यते ॥ यथा चाष्टगृहीतं जुहोति संततमुद्गृह्णन्नुंजान इत्यत्राष्टनामेकमंत्रत्वं ॥ तथा देवस्य त्वेत्यभिमादायेत्यत्र त्र
याणां मंत्रत्वं ॥ चित्यंगछंतिपंच दिश इत्यादौ च ॥ ॥ उपांशु प्रयोगः श्रुतेः ॥ ॥ तेषां यजुषां यजुर्वेदमंत्राणां कर्म
सु उपांशु प्रयोगो भवति ॥ कुतः श्रुतेः ॥ उच्चैर्ऋचा क्रियते उच्चैः साम्नोपांशु यजुषेति शाखांतरे श्रवणात् ॥ स्वशा
खायामपि स उपांशु यजुर्भिश्चरतीत्यादि श्रुतेश्च ॥ अत्रैतेभ्यस्त्रयो वेदा अजायंतेति वेदान्प्रकृत्य ॥ मध्ये उच्चैर्ऋ
चा क्रियत इत्यादीनि वाक्यानि पठितानि पुनरपि वेदे नैवोपसंरोऽस्ति ॥ तेनात्र ऋगादयः शब्दा वेदोपलक्षकाः ते
न वह्यकृग्वेदेन विहितं साम्ना सामवेदेन विहितं चोच्चैः ॥ यजुषे ति यजुर्वेदविहितं चोपांशु इत्यादि ॥ अस्य सूत्र
स्येष्टिपशुसोमव्यतिरिक्तं कर्माग्निहोत्रादिकं विषयः ॥ एतेषु विशेषस्य [illegible] णत्वात् ॥ ॥ न संप्रैषाः ॥ संप्रै
षा निगदाः प्रोक्षणीरासादयाग्नीदग्नीन्विहर यजमानवाचं यच्छेत्येवमादयः ॥ याजुर्वेदिका अपि संप्रैषा उपां
शु न प्रयोज्याः ॥ अन्यबोधनार्था हि ते ॥ न चोपांशूच्चरितैरेभिरन्यस्य बोधनं संभवति ॥ तस्मात्ते उच्चैरेव प्रयोज्याः
शाखांतरे दर्शपूर्णमासयोः श्रूयते ॥ बर्हिर्लुनातीति ॥ तत्रेदं चिंत्यते ॥ किं बर्हिःशब्दः संस्कारनिमित्त उत जाति
निमित्त इति ॥ तत्र बर्हिःशब्दस्य शास्त्रे सर्वत्र संस्कृतेष्वेव दर्शनेषु प्रयोगाद्यूपाहवनीयादिवत्संस्कारवा
ची बर्हिःशब्द इति प्राप्तेऽत्राह ॥ ॥ कौशं बर्हिः ॥ ॥ बर्हिः कौशं ॥ कुशा दर्भाः ॥ तस्येदं कौशं ॥ कुशमात्रमेव

बर्हिःशब्देनोच्यते न संस्काराः ॥ कुतः ॥ अन्वयव्यतिरेकाभ्यां जातिवाचित्वाद्बर्हिःशब्दस्य ॥ यत्र यत्र
बर्हिःशब्दप्रयोगस्तत्र तत्र जातिरित्यन्वयाव्याप्ते लौकिके वेदे च नास्ति व्यभिचारः ॥ संस्काराव्याप्तेस्तु लौ
किकप्रयोगे व्यभिचारो दृश्यते ॥ क्वचिद्देशविशेषे लौकिकव्यवहारे जातिमात्रमुपजीव्य विना संस्का
रं बर्हिःशब्दः प्रयुज्यते ॥ बर्हिरादाय गावो गता इति ॥ तस्माज्जातिवाची बर्हिःशब्दः ॥ असंस्कृतं कुश
मात्रं बर्हिःशब्देनोच्यत इत्यर्थः ॥ प्रयोजनं ॥ बर्हींषि प्राच्युदं विप्रास्यतीत्यादौ संस्कारा न कर्तव्याः ॥ स्मृ
तौ ॥ कुशाभावे तु काशाः स्युः काशाः कुशसमाः स्मृताः ॥ काशाभावे गृहीतव्या अन्ये दर्भा यथोचिताः ॥ द
र्भाभावे स्वर्णरूप्यताम्रैः कर्मक्रियाः सदा ॥ कुशकाशशरा दूर्वा यवगोधूमबल्वजाः ॥ सुवर्णं राजतं
ताम्रं दश दर्भाः प्रकीर्तिताः ॥ स्नाने होमे तथा दाने स्वाध्याये पितृतर्पणे ॥ सपवित्रो सदर्भो वा करो
कुर्वीत नान्यथा ॥ सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रथितं नवा ॥ सपवित्रः सदर्भो वा कर्मांगाचमनं चरेत्
नोच्छिष्टता सदर्भं च सउत्को च्छिष्टं तु वर्जयेदिति ॥ ॥ अर्थात्परिमाणं ॥ ॥ अग्न्यागारादोवसोर्द्वाराद्धो
मे स्रुचः स्रुवस्य च ॥ अर्थात्परिमाणं भवति ॥ यावता परिमाणेनार्थप्रयोजनं सिध्यति तावत्परिमाणं भ

॥४४॥
॥दर्वया०१

वतीत्यर्थः॥ परिमाणं तस्यानुक्तत्वात्॥ प्रयोगाद्बर्हिरेवस्रुचोष्टिवद्दाजस्रमइत्यवेक्ष्याहेत्येतत्पर्यं
तं पठता कस्मिंश्चित्पात्रे संततं घृतं स्रुक्प्रणालिकया निनीयते स्याज्यस्य तो लघुपायेन परिमाणं नि
श्चित्य तावदाज्यं यत्परिमाणायां स्रुचि मातितावत्प्रमाणां तां स्रुचं कुर्यात्॥ तस्माज्यस्य पंचमभागसं
ग्राहक स्रुचः कार्याः॥ एवं यद्दाषडत्प्रत्याम्नाये पावकेष्टि वैश्वानरेष्ट्यादिकं क्रियते तदापि वेदेः पश्चा
द्भागोर्था तावत्परिमाणो विपुलः कार्यो यावति अवरोक्तसुत्तर७हविषीति न्यायेन सर्वेषामुदकसंस्प
मासादनं संभवति॥ तदनुसारेण प्राचीप्रमाणं पुरस्तात्तिर्यक्प्रमाणं च पादोनं कल्प्यं तदुक्तं शतपथे॥
यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यादिति॥ स्रुत्रे चोक्तम परिमितां चेति॥ परिमितशब्दोत्र प्रमाण
नियमपर इति वक्ष्यामः॥ एवं बर्हिर्दर्विद्रव्यपरिमाणमनुक्तो सर्वत्रोह्यं॥ ॥ अयुग्धातूनि यूनानि इ
ध्मबंधनबर्हिर्बंधनार्थानि यूनानि संनहनानि रज्जवो युग्धातूनि भवंति॥ धातवस्तृणमुष्टिप्रक्षे
पाः अयुजो विषमा एकत्रिपंच स प्तनवादि विषमसंख्याधातवो येषां तान्ययुग्धातूनि॥ ॥ तथा
चापस्तंबः॥ ॥ त्रिधातु पंचधातु वा शु करोतीति शुल्बं रज्जुमित्यर्थः॥ तथा समूलानाममूलानां वा

आरभ्य

॥४४॥
॥भाष्ये॥

दर्भाणां पूर्ववत् शुल्बं कृत्वोदगग्रं निधायेतीध्मप्रस्तावे मानवे च॥ शुल्बं प्रतिदधात्ययुग्धानुप्रदक्षि
णमिति॥ तैत्तिरिसूत्रे॥ अथ त्रिरन्वाहितं शुल्बं कृत्वेति॥ अथ बर्हिषो बंधनप्रकारमाह॥ प्रागग्रेयू
न उदगग्रं बर्हिरोचिनोति॥ प्रागग्रे यूने प्रागग्रसंनहने बंधनार्थायां रज्ज्वां उदगग्रं बर्हिराचिनोति॥ बं
धनार्थं स्थापयति॥ अथेध्मबंधनस्य प्रकारमाह॥ ॥ उदगग्रे प्रागग्रमिध्मं॥ ॥ आचिनोतीत्यनुव
र्तते॥ उदगग्रे यूने सन्नहने प्रागग्रमिध्ममाचिनोति बंधनार्थं निदधाति॥ ॥ प्रत्यग्ग्रंथीनवगू
हति॥ ॥ इध्मबर्हिर्बंधनार्थानां यूनानां ग्रंथीन्प्रत्यगवगूहति यूनेन गाढं बध्वा यूलस्याग्रमू
लसंकल्प्य प्रदक्षिणमावेष्ट्येध्मबर्हिषा पश्चाद्भागो मूलभाग उच्यते॥ दिग्वाचिनो बर्हिषु
दगग्रनिहितत्वे असंभवात्॥ काठके॥ ग्रंथिं कृत्वा पुरस्तात्प्रत्यंचमपकर्षतीति मानवे॥ शुल्बस्या
तासमायस्य पूर्वान्ते ग्रंथिमिति प्रदक्षिणमावेष्टयति संततमास्यादिति प्र पश्चात्प्राचमपकर्षती-
ति॥ तैत्तिरीये पि॥ पश्चात्प्राचमुपगूहतीति॥ आपस्तंबः॥ पुरस्तात्प्रत्यंचं ग्रंथिमुपगूहति पश्चा
द्वा प्राचमिति॥ ॥ अष्टादशेध्मपरिधिरेतेषां॥ ॥ परिधिनो वृक्षाः पालाश वैकंकतादयः परि

॥४७॥
॥देवया०१

धिष्ट्ह्वाः ॥ तेषां परीधिष्ट्ह्वानां संबंधिनमष्टादशसंख्याकाष्टकमिध्मं कुर्यात ॥ मानवे ॥ सम्मूलदर्भैः पाला
शंखादिरं रोहीतकं वाष्टादशदा विध्मं संनह्यति त्रींश्च परिधीन्योयज्ञियवृक्षस्तस्येति ॥ काठके ॥ अष्टा
दशदारुं शुष्कं समानवृक्षस्य संनह्यति विंशतिमिष्टो पशुबंधे वेति ॥ अत एव सामिधेनीविवृद्धौ काष्टवृद्धिर्भ
वति ह्रासे च ह्रासो न भवतिपीत्यादो ॥ तथा चाहापस्तंबः ॥ सामिधेनीविवृद्धौ काष्ठानि विवर्द्धन्ते प्रतिह्रस
मानासु प्रकृतिवदिति ॥ उपसत्सु तु मात्रावदिध्माबर्हिरिति वचनाद्ध्रासः ॥ इध्मप्रमाणं चारत्निरितिय
ज्ञपार्श्वे निगमे च ॥ प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितमिति कात्यायनः ॥ तथा ॥ समित्यवित्रं वेदं च
त्र्यंप्रादेशसंमितं ॥ इध्मस्तु द्विगुणः कार्यः परिधिस्त्रिगुणः स्मृतः ॥ स्मार्त्तप्रादेश इध्मो वा द्विगुणः प
रिधिस्त तइति ॥ ॥ एकविंशतिर्वा ॥ ॥ अथ वा एकविंशतिमेकविंशतिसंज्ञकाष्टकमिध्मं कुर्यात ॥
॥ तथा चापस्तंबः ॥ ॥ अथवा एकविंशतिमेकविंशतिदारुमिध्मं करोतीति ॥ ॥ ततः परिधी
नेके ॥ एके आचार्यास्तत एकविंशतिसंख्यकाष्टका[illegible]रि[illegible]ध्मात्त्रीणि काष्टान्यरत्निमात्राण्येवोपा
दयपरीधीन्परिदधति ॥ तदेकइध्मस्यैवेतान्परिधीन्परिदधतीतिश्रुतेः ॥ अथ वैकमेवेदं सूत्रं ॥ एक

॥४५॥
॥भाष्ये॥

विंशतिर्वा ततः परिधीनेकइति ॥ ॥ एके आचार्या विकल्पेन एकविंशतिसंख्यकाष्टकमिध्मं
कुर्वंति तत इति तस्मादेवैकविंशतिकाष्टके इध्मान्परिधीन्परिदधति च ॥ एतदेवयुक्ततरं ॥ आपस्तंबसूत्रेए
कविंशतिकाष्टकानां विभागदर्शनात ॥ तथा चाहापस्तंबः ॥ ॥ खादिरं पालाशं चैकविंशतिदारुमिध्मं क
रोति ॥ त्रयः परिधयः पलाशकार्ष्मर्यखादिरोदुंबरबिल्वरोहितकविकंकतानां ये वा यज्ञिया वृक्षास्त्रयो द्व
श्रुष्कावासत्वचाः स्थविष्ठो मध्यमोऽणीयान्द्राघीयान्दक्षिणार्द्धो सिष्ठउत्तरार्द्धो द्वेआधारसमिधा
व नूयाजसमिदेकविंशीति समूलानाममूलानां वा दर्भाणां पूर्ववच्छुल्वं कृत्वोदगग्रं निधायेति ॥ अत एवं
विधमेकोयमतंपदेविंशतिकाष्ठइध्मः ॥ तस्मिन्यद्धेचेध्मादेव त्रीणि काष्टान्यादाय परिधिपरिधानमिति ॥ बंध
नानंतरमिध्माबर्हिषो भूमौ निधानं न कार्यं ॥ ॥ आपस्तंबः ॥ ॥ अनधो निदध्यातीत्युक्तत्वात ॥ तदेकइध्म
स्यैवैतान्परिधीन्परिदधतीत्यत्र हरिस्वामिनः ॥ तद्युतथा न कुर्याद्नवरुद्धा हतस्यै ते भवंतीति बाह्वृमं
त्रैः परिधिभिरादृश्य भवितव्यं ॥ इध्मस्तु शुष्कइंधनत्वादेव ॥ द्विप्रादेशश्च तेन तेइध्मैकदेशभूताः परिधित्वाय
समर्थाः स्युः तदिदमाह अन्याधानायहीतिशुष्कोऽसावाधेयः यावत्सरमात्रआहवनीयखरे संभवती

॥४६॥
॥देव या ०१

त्यभिप्रायः॥ यस्तु परिधिबुद्ध्या आहरति सोवश्यं वेष्टनीयादग्निखरादतिरिक्तमेवाहरति॥ अग्निवेष्ट
नं वदाहन्मपान्नशुष्कमितितएवत्तूक्ताइति॥ ॥अपरिमितं प्रणयनीयं त्रिवृज्जनं॥ ॥प्रणयनस्यायंप्र
णयनीयः॥ तं प्रणयनीयं अग्निप्रणयनार्थमिध्ममपरिमितं अपरिमितकाष्ठकं त्रिवृणं तिसृभिःसन्नह
नरज्जुभिर्बद्धं कुर्वीत॥ त्रीणि वृनानि बंधनानि यस्य त्रिवृनः तं त्रिवृन मिति॥ अपरमिति तत्वं च प्रागुक्ते
ध्मकाष्ठसंख्यापेक्षयातिशयेनाधिकसंख्यदृष्टकत्वं॥ तेन चतुर्विंशति सामिधेनीको यइष्टका पशुस्त
त्रसप्तविंशतिकाष्ठानि भवंति॥ तत्रश्च प्रणयनीये ततोप्यधिकानि अष्टाविंशतिप्रभृतिनी इष्टकासंख्या
निकाष्ठानि भवंति॥ निरुप्याज्यं वेदोसीति यजमानो वेदं करोति॥ यजमान आज्यं निरुप्य प्रथमं वक्ष्य
माणप्रकारेणाज्यनिर्वापमाज्यस्थाल्यां कृत्वा वेदोसीत्यनेन मंत्रेण॥ वेदं करोति॥ अस्य मंत्रस्यानेकयज
मानेके ऊहो भवति॥ तेनावाभ्यां वेदो भूया इति द्वियजमानके॥ तेनास्मभ्यं वेदो भूया इति बहुयजमान
के॥ देवपितृभ्यो वेदो भवेति पित्र्यायां कीदृशं तमित्यपेक्षायामाह॥ कुशमुष्टिं सव्यावृत्तं वत्सज्ञातुं
त्रिवृ पशुब्रह्मवर्चसान्नाद्यकामा यजमाना यथासंख्यं तं पशुब्रह्मवर्चसान्नाद्यकामा यथासंख्यं य

॥४६॥
॥भाष्ये॥

थोपदेशक्रमेण एवमाकारं वेदं कुर्युः॥ तत्र पशुकामः कुशमुष्टिं सव्यावृत्तं प्रदक्षिणावृत्तं वत्सज्ञा
तुं वेदं करोति॥ अस्य निर्माणप्रकारः कठमैत्रसूत्रादिषु लोके नीयः॥ ब्रह्मवर्चसकामः कुशमुष्टिं
त्रिवृतं करोति॥ अन्नाद्यकामो वृतकार्यमिति यथासंख्यशब्दार्थः॥ वत्सज्ञानुरिति वत्सज्ञानुसदृ
शः॥ त्रिवृत्त्रिगुणः॥ मौंजं त्रिवृदं जंघ्य सुंडरज्जवस्त्रिवृतो मृद्ग्र्याः॥ त्रिवृतं परिव्ययतीत्यादौ तद्वे
वदर्शनात॥ मेखलायां वेणिं त्रिवृतमिति पृथग्निर्देशात्रिवृत्छेन वण्याकार जायते॥ किंचिदुत्क्रातत्वेना
प्यभिप्रायेणेति त एवं विदुः॥ वृतोधान्यावापपात्रे वृणावत्र्यादिनिर्मितंतत् वृत्रीयतइति वृतकार्यमृ
ताकारइत्यर्थः॥ तथा च मनुः॥ वेदं करोति वत्सज्ञुं प्रसंव्यमावेष्ट्य तत्ले दक्षिणेत्र त्वरत्नेलेषु शुल्वं प्र
तिनिधाय त्रिशवेष्ट्य संनह्यतु तत्र स्तुत्तरं प्रादेशमात्रे शुल्कात्परिवास्योत्करे लानि गमयतिं तूलानि
निदध्यावेदं कृत्वा वेदिं करोतीति॥ तैत्तिरीये॥ वेदं करोति वत्सजानुं पशुकामस्य वृतकार्यमन्नाद्यका
मस्य त्रिवृतं तेजस्कामस्योर्ध्वाग्रं स्वर्गकामस्येति॥ बौधायने॥ वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्ट्योप
नुज्याग्रात्रि अष्टुल्वं कृत्वा त्रिः परिन्नत्यगुणे शुल्वं तमव कृष्यायस्य शुल्व प्रादेशत्वाग्राणी धमे

ति

र

॥४७॥
॥देवया०॥

निधायोत्करे मूलानि ततो वेदिकरणमिति ॥ आपस्तंब ॥ दर्भाणां वेदं करोति वत्सज्ञुं पशुकामस्य मूतकार्यमन्नाद्यकामस्य त्रिवृद्भिः संब्रह्मवर्चसकामस्य पशुल्वात्प्रादेशेप रिवास्य वेदं परिवासना निदधाति ॥ त्रिवृदेकशिराः त्रीणि शिरांसी निके चित् ॥ कामाभावप्येता आहुः पः अकामस्यान्यस्या विधानात् ॥ परिवासनानि सर्वाण्येव वेदाग्राणीति धूर्तस्वामिना व्याख्यातं ॥ अत एव सूत्रकृता वेदवंधनं परिभाषायां सूत्रितां वेदाकाराणां सर्वसाधारणत्वज्ञापनाय ॥ अन्यथा ते गोदोहनादिवद्गुणफलसंबंधात्प्रकृतावेव निविशेयुर्न विकृताविति तस्मादर्शपूर्णमासप्रकरणान्निःकृत्य प्यात्र सर्वत्र साधारणपरिभाषोपबंधनमध्ये सूत्रितं वेदस्य प्रमाणं परिशिष्टे उक्तं ॥ वेदं समित्य वित्रं च त्र्यं प्रादेशसंमिति ॥ आ प्रयादिति कर्मसु तन्त्र ॥ कर्मसु पश्वादिषु यत्र आ आमुष्यादित्येवमाङ् प्रयोगः क्रियते सूत्रमध्ये तद्यथा ॥ आप्रयाजेभ्य आ इडाया आ वैश्वदेवादिति तत्र तच्छाण्यर्थे ॥ तदपि कर्म कर्तव्यत्वेन ज्ञेयं यदाङ्गसंबद्धं प्रयाजेडादिकं ॥ सर्वत्राङ् अभिविध्यर्थो ज्ञेयो न समर्यादार्थः ॥ यदाङ्ग संयुक्तं तदपि कर्तव्यमध्ये ज्ञेयं न त्ववधिकर्मनेत्यर्थः ॥ अंतवचने च ॥ शंयंतं भवतीत्येवमादावं

॥४७॥
॥आश्वे॥

तवचने चकारात तद्येति ॥ पूर्वसूत्रात् अनुकृष्यते ॥ तदप्यंतसंयुक्तं शंयिडादिकं कर्तव्यमध्ये ज्ञेयं न त्वंतशब्दः समीपार्थे परिकल्प्यते तत्समीपे ततो वा कुस्यात तव्यमिति ॥ प्रतिकर्मोद्धरणमप्रसंगे ॥ प्रतिकर्म कर्म कर्म प्रतिसर्वेषु कर्मसु पृथक्पृथक् आहवनीयदक्षिणाग्न्योर्गार्हपत्यादुद्धरणं कर्तव्यं ॥ न त्वाधानकाल एव उद्धृतो गार्हपत्यवत्सर्वकर्मसाधारणो भवतः ॥ परं अप्रसंगे सति ॥ अन्यार्थमनुष्ठितस्यान्येनोपजीवनं प्रसंगः न प्रसंगः अप्रसंगस्तस्मिन्निति ॥ तेन यदि दर्शपूर्णमासपश्वाद्यर्थमुद्धृतो ॥ अनपवृक्तौ लभ्यते नित्यकर्मकाले ॥ तदा तत्कर्मार्थं पुनः पृथगुद्धरणं न क्रियते ॥ तयोरेव तदपि नियतकालानं कर्म क्रियते ॥ यथा ॥ अग्निहोत्रमागतोपस्थानादिकं च ॥ पुनराधानानंतरं धारणे कृते विकृते पिपशुचातुर्मास्यादिकं च ॥ अपवृक्तकर्मा लौकिकोर्थसंयोगात् ॥ अपवृक्तं समाप्तं कर्म यस्मिन्सोपवृक्तकर्मा आहवनीयो लौकिको भवति वैदिकमाहवनीयत्वं संस्काररूपं ततोपगच्छतीत्यर्थः ॥ कुतः ॥ अर्थसंयोगात् ॥ यदर्थमुद्धृतस्तस्य तेनार्थेन प्रयोजनेन संयोगात् ॥ तेन यत्कर्मार्थमुद्धृतस्तत्समाप्यनंतरं लौकिको ज्ञेयः ॥ अत ऊर्ध्वमाहव

॥४८॥
॥देरया०१

नीयशाखे न विहितं कार्यं तत्र न कर्तव्यमित्यर्थः ॥ अतश्चापौर्णमास्यादौ यदि षड्याइष्टयः पृथक्कर्त्रं
त्रैः क्रियंते तदा प्रतीष्टि पृथक्पृथगेवोद्धरणं कार्यं न सकृदुद्धृत एव सर्वासामनुष्ठानमिति ॥ प्रकर
णे त्वनिरनारभ्यवादस्त्वाश्रयित्वात्सर्वगुणः ॥ न विद्यते कस्यचित्कर्मणः प्रकरण उत्पत्तिर्यस्य असौ
अप्रकरणोत्पत्तिः ॥ किंचित्कर्मारभ्योपक्रम्योद्यते उच्यते ॥ इत्यारभ्यवादः न आरभ्यवादो नारभ्यवादः
यस्य पर्णमयी जुहूर्भवति खादिरः स्रुवो भवत्यादियो विधिः कस्यचित्कर्मणः प्रकरणे पठितो न भवति
वाक्यांतरेण च कर्मविशेषे विनियुक्तो न भवति अमुष्मिन्कर्मणि खादिरः स्रुवो भवतीत्येवंविधः यस्य प्र
करणे न वाक्येन चांगत्वं न संभवति स एवंविधः पर्णमयीत्वखादिरत्वादिविधिः सर्वगुणो भवति प्रकृते विं
प्रकृते वासाधारण एवोपदिष्टो भवति ॥ कुतः ॥ आश्रयित्वात् आश्रयोऽस्यास्तीत्याश्रयी तस्य भावस्तत्त्वं त
स्मात् ॥ जुहूस्रुवे चाश्रितत्वात् पर्णमयीत्वखादिरत्वादेः यतोऽव्यभिचरितक्रतुसंबंधवतीं जुहूमाश्रि
त्य तद्धेतुः पर्णपक्षो वाक्येन विधीयते ॥ यां जुहूः सा पर्णमयीति ॥ एवं अव्यभिचरितक्रतुसंबंधवंतं स्रुवमा
श्रित्य तत्प्रकृतिभूतः खदिरपक्षो वाक्येन विधीयते ॥ यः स्रुवः स खादिर इति ॥ वाक्यं च प्रकृतिविकृत्यास्तु

॥४८॥
॥१राध्य॥

ल्यमेव वर्तते ॥ उभयत्राश्रयभूतयोः स्रुवजुह्वोः सत्वात् ॥ अतः खादिरस्य पर्णमयीत्वस्य चाश्रयित्वात् स्रुवजु
ह्वाश्रितत्वात् स्रुवजुह्वोश्च प्रकृतिविद्यमानत्वात् ॥ एवंविधानारभ्यवादः सर्वगुणः प्रकृतिविकृत्योरुभयो
रप्यंगमिति प्राप्ते सिद्धांतमाह ॥ प्रकरणे वाविशेषात् ॥ वकारोऽवधारणे ॥ निपातानामनेकार्थत्वात्
प्रक्रियतेऽस्मिन्धर्मा इति प्रकरणं प्रकृतिः ॥ अप्रकरणोत्पत्तिरनारभ्यवादरूपो विधिः प्रकरणे वप्रकृतावेव
निविशते ॥ नोभयत्र प्रकृतौ विकृतौ चेति ॥ कुतः ॥ अविशेषात् ॥ यतश्चोदकः प्रकृतिवत्सर्वमंगजातं प्रकरणपठि
तमनारभ्यवादप्रापितं चाविशेषेण विकृतौ प्रापयति ॥ तथा हि ॥ किमयं विधिर्विकृतौ चोदकात्पूर्वं निविशते प
श्चाद्वा नाद्यः ॥ आश्रयभूतयोः स्रुवजुह्वोश्चोदकमंतरेण संभवात् ॥ अतोऽनेन विनाश्रयभूतस्रुवजुहूत्वा
भार्थं विकृतौ चोदकप्रवृत्तिः प्रतीक्षणीया ॥ पश्चादयं विधिर्निविशत इति द्वितीयपक्षे पर्णत्वखादिरत्वं जु
ह्वास्रुवे एव सहैव चोदकेनातिदिश्यते ॥ तत्र चोदकेन प्रापिते सति यद्यनारभ्यविधिः पुनः प्रापयेत् द्विरुक्तिता
त दोषः स्यात् अतश्चोदकेन प्रापितत्वात्पुनर्विधेर्वैयर्थ्यादनारभ्यविधेः प्रकृतावेव निवेश इति सिद्धांतः ॥ न
नु विकृतावनारभ्यविधिनैव पर्णमयीत्वखादिरत्वे न प्रापिते पश्चाच्चोदकस्तद्भिन्नमंगानि प्रापयिष्यति ॥ एवं

॥५९॥
॥देरया॥

द्विरुक्तिता दोषो न भविष्यतीति मैवं । यतो वैकृतस्य प्रधानस्यानारभ्यविधिप्रत्यपेक्षा नास्ति चोदनासारूप्याभा
वात् ॥ निराश्रयस्य पर्णत्वादेर्विधातुमशक्यत्वाच्च ॥ अतो वैकृतप्रधानं धर्मापेक्षं सच्चोदनासारूप्यात् प्राकृता
नेव धर्माननुप्रथमं गृह्णातीति तद्धेतुभूतं पर्णत्वादिकं चेति सिद्धं ॥ दर्शनाच्च ॥ विकृतौ प्रयाजादीनां प्राकृ
तानां धर्माणां दर्शनादप्येवं ज्ञायते यदनारभ्यवादा विकृतौ चोदकात्पूर्वं न निविशंत इति । यदि पूर्वं निवि
शेयुस्तदा वैकृतं प्रधानमनारभ्यविधिनैव पूरितसन्निराकांक्षत्वात्प्राकृतान्यंगानि न गृह्णीयात् । न दा च
विकृतौ प्रयाजादीनां प्राकृतानां दर्शनेन स्यात् ॥ अस्ति च तथा हि अश्वमेधे अथ सावित्रीमिष्टिं निर्वपतीति

विधि

प्रकृत्य न स्वप्रयाजेषु तायमानेष्विति अत्र गाथायागान्परे वाक्ये प्राकृतान्प्रयाजाननुदर्शयति ॥ पित्र्यायां स न त एव
प्राकृत्रे च यजुर्हरतीत्यत्र स यज्ञोपवीती भूत्वाज्यानि गृह्णातीति यज्ञोपवीतित्वविधिपरे वाक्ये बहून्प्राकृता

॥५९॥
॥भाष्य॥

न्पदार्थाननुदर्शयति । ते च प्राकृतधर्मसापेक्षत्वे एव प्रयुज्यंते नान्यथा ॥ तस्मादनारभ्यवादाः प्रकृतावेव विनिशंत
इति सिद्धं ॥ उदाहरणांतरं चे [illegible] अनारभ्याधीताः प्रतिपत्त्यर्थाः संति । ते यदि सर्वार्थाः तर्हि विकृतावपि ते भवं
ति । यदि प्रकृतावेवानारभ्यविधेर्निवेशः तदा तेषां प्रतिपत्त्यर्थानां विकृतावप्रयोगः ॥ पुरुषार्थत्वेन विकृ

तो प्राप्त्यभावादिति ॥ वैकंकतानि पात्राणि ॥ यज्ञपात्राणि सर्वाणि वैकंकतानि विकंकतवृक्षकाष्ठघटि
तानि भवंति तत्र विकंकतः समभवत् तस्मादेष यज्ञियो यज्ञपात्रीयो वृक्ष इति श्रवणात् । सामान्यसूत्रमेतत् । अ
स्यापवादमाह खादिरः स्रुवः । स्रुवः खादिरः स्यात् ॥ स्फ्यश्च ॥ चकारात्स्फ्योऽप्यपि खादिरः स्यात् । खा
दिरः स्फ्य इति श्रुतेः ॥ पालाशी जुहूः ॥ हूयते अनयेति जुहूः स्रुक् सा च पालाशी पलाशवृक्षकाष्ठ
निर्मिता भवति । यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति श्रुतेः ॥ आश्वत्थ्युपभृत् ॥ उपभृत्सं
ज्ञिका स्रुक् आश्वत्थी अश्वत्थकाष्ठघटिता भवति ॥ ध्रुवा तु वैकंकती भवति । वैकंकतानि पात्राणीत्यनेनैव । अ
पवादाभावात् ॥ होमसाधनत्वाच्च तया हि समिष्टयजुर्हूयते । तिष्ठन्स्रुवया समिष्टयजुर्जुहोतीति शाखां
तरश्रुतेः ॥ अत एव मैत्रकठापस्तंबसूत्रे ध्रुवा वैकंकती भवतीति पठ्यते । तेषां हि वैकंकतानि पात्राणीति सामान्य
वचनं नास्ति ॥ वारणान्यहोमसंयुक्तानि ॥ होमेन संयुक्तानि यैर्होमः क्रियते तानि होमसंयुक्तानि
न होमसंयुक्तान्यहोमसंयुक्तानि यैर्होमो न क्रियते तानि वारणानि भवंतीत्यर्थः ॥ परिशेषाद्यानि होमसंयु
क्तानि होमसाधनानि यैर्होमः क्रियते तानि वैकंकतानि ॥ तत्र वारणान्युदाह्रियंते । उलूखलमुसलकूर्चे

॥५०॥
॥देवया०॥

डापात्री पिष्टपात्री पुरोडाशपात्री शम्या शृतावदानान्युपवेषांतर्द्धानकटप्राशित्रहरणषडवत्त्र
ब्रह्मयजमानासनहोतृषदनादीनि तत्रोलूखलमुशलयोर्विशेषः॥ मूले लूखलं वार्क्षं स्वाय
तसुदृढं तथा इच्छाप्रमाणे भवतः शूर्पं वैणवमेव चेति॥ तथा॥ खादिरं मुसलं कार्यं पालाशस्या
दुलूखलः॥ यद्वा भो वारणे कार्यं तदभावेन्यवृक्षजाविति॥ कूर्चो बाहुमात्रः पीठाकारः॥ इडापा
त्री अरत्नीमात्री मध्यसंगृहीता॥ तथैव द्वितीया हविर्द्धारणपात्री अतिविपुला॥ पिष्टपात्रीति सेवा
न्यते॥ पुरोडाशमात्री प्रादेशमात्री समचतुरस्रा अर्थात्षडंगुलपरिमितपरिमंडलखातवती लौ
काह्लेषस्य प्रतिपत्तिरिति कठसूत्रात्॥ शम्या प्रादेशमात्री॥ प्रादेशमात्रं तीक्ष्णांगुष्ठपर्वमात्रपृथु
मुखश्शृतावदानं॥ अभ्रिररत्निमात्रस्तीक्ष्णमुखः॥ उपवेशो रत्निमात्रः॥ प्रादेशमात्रो वा हस्ताकृतिः
अंतर्द्धानकटस्त्वर्द्धचंद्राकारो द्वादशांगुलः समाचारात्॥ प्राशित्रहरणस्य त्वाकारं वक्ष्यति॥ ष
डवत्त्रं च उभयत्रखातवत्॥ आसनानि चारत्निमात्राणि प्रादेशमात्राणि वा प्रादेशमात्रपृथूनि॥ स
र्वेषु पात्रेषु मूलानि ज्ञापकानि वृंतानि कार्याणि॥ एतान्यहोमसंयुक्तत्वाद्धारणानि॥ अथ वैकंकता-

स

॥५०॥
॥भाष्ये॥

न्युच्यंते॥ यथा॥ प्रकृतौ वैकंकती ध्रुवा॥ अग्निहोत्रहोमार्थे स्रुक् अग्निहोत्रहवणीसंज्ञा॥ अग्निहो
त्रहोमार्थः स्रुवश्च सोमयागे ग्रहचमसद्रोणकलशादीनि च॥ तत्रापि हविर्द्धानाधिषवणफलक प
रिप्लवसंरण्यादीन्यहोमसंयुक्तानि वारणान्येव॥ षोडशीपात्रं खादिरं॥ अश्वदाभ्यग्रहणपात्रमौ
दुंबरं वचनात्॥ वाजपेये सप्तदश सोमग्रहा सप्तदश सुराग्रहाश्च तेषां पात्राणि वारणान्यहोमसं
युक्तत्वात्॥ सप्तदश सुराग्रहणं पात्राणि मृन्मयान्यपि शाखांतरसूत्रेषूक्तानि संति॥ एवमादि
सर्वमूहनीयं॥ परिभाषाया साधारणत्वाद्वा वसथ्यपात्राण्यहोमसंयुक्तानि वारणान्येव॥ प्र
णीप्रोक्षणपात्रं दर्वी कंकतादीनि यज्ञपार्श्वे॥ चमसानां तु वक्ष्यामि दंडाः स्युश्चतुरंगुलाः॥ त्र्यंगुल
षु भवेत्स्कंधो विस्तारश्चतुरंगुलः॥ विकंकतमयाः श्लक्ष्णास्त्वग्बिलाश्च समाः स्मृताः॥ अन्येभ्यो
वापि कार्यास्तेषां दंडेषु लक्षणं॥ ॥ होतुर्मंडल एव स्याद्ब्रह्मणश्चतुरस्रकः॥ उद्गातुश्च त्रिः
स्याद्यजमानः पृथक् स्मृतः॥ प्रशास्तुरवतष्ट — दुतष्टो ब्रह्मणशंसिनः॥ पोतुरग्रे विशाखी स्यान्ने
ष्टुः स्याद्दिग्गृहीतकः॥ अच्छावाकस्य रास्नावः आग्नीध्रस्य मयूषकः॥ इत्येते चमसाः प्रोक्ताः ऋत्वि-

॥५१॥
॥देरया०१

जांयज्ञकर्मणि पालाशा द्वादश द्वान्यवृक्षा द्वादश सा स्मृता इति स्मृत्यर्थसारे समित्पवित्रं वेदं च मुस
लोलूखलं ग्रहान्नाभ्युखासं सुपरवान् शम्यास्फ्कुपुष्कराणि च शासस्वरूविषाणानि चरूणां मेच
क्षणानि च कुर्यात्प्रादेशमात्राणि महावीरास्त्रयस्तथा द्रोणकलशाधिषवणफलके स्रुकुंद्वडपरिधिश्च ला
नि स्फ्य शूर्पोपवेषध्मा वपि प्रणयनी यावपाश्रयण्यो कुर्याद्रत्निमात्राणीति निगमे नियग्रोधाश्चमसाश्चतु
रस्राः प्रस्थोदकग्राहिणस्त्वग्बिला दंडलक्षणाः परिमंडलश्चतुरस्रस्त्र्यस्त्रि पृथावत शोत्त अष्टविशाखविग्र
हिताराख्रावमपृखक्रियाहोतृब्रह्मस्वामिसा मगहोतृप्रशास्त्रब्राह्मणाच्छंसिपोत्रनेष्टृच्छावाकाग्नीध्राणां
द्रोणकलशः पलशतग्राही परिपृषाक्षतिः स्थाल्यद्वेशतिकैकधनास्त्रिंशनिकाग्रहाः पंच पलिकाः पुष्करा
ग्रावाणो हस्तपर्णमात्रा जानुमात्रमुखलं पालाशं पंचविंशतिपलमिडापात्रं मुसलं खादिरं त्र्यरत्निदृषद्र
त्निप्रपाणा शूर्पं शम्या दर्वी श्लशंकवोधिषवणमासिशाखेधाप्रवृष्टिः सावभिरधराराणिः परस्तुश्चेति
पवित्रं समित उत्तराराणिर्वेदो मेक्षणं पेतुदारवाः शरावं प्राशित्रहरणं शतावदानं स्वरूपवेषसमिधश्चेति
प्रादेशमात्राणि स्नातप्रणयनं च मसौ प्राश्यिकौ वितस्तिप्रमाणं पदप्रमाणमिति मंडनः रोहीतकान्यग्रो

॥मुद्र॥

॥५१॥
॥प्रोक्षा॥

धोत्याश्वत्थाकंठश्रुते कुर्वीत च मसांस्तेषामभावे न्युदुसोद्भवान् आश्वत्थं वारणं नोवेदिडापा
त्रमिहान्यजं अग्निहोत्रहवण्यत्र ग्राह्यावैकंकती शुभा पालाशी तु कुठस्रुत्प द्वयाभावे न्यदृक्ष
जेति आपस्तंबः खादिरः स्रुवः पर्णमयी जुहूराश्वत्थ्युपभृद्वैकंकती षां बृह्ममणामेकस्यस्फ्चः
कारयेद्वाहुमात्र्यारत्नीमात्र्यो वाग्रास्वास्त्यक्तो बिलाहंस मुख्यः स्फ्यशम्या प्राशित्रहरणमिति खा
दिराणि वारणान्यहामार्थानि भवंतीति मानवे खादिरस्रुवं पालाशी जुहूराश्वत्थ्युपभृद्वैकंकती
ध्रुवा मूलतो रत्निमात्रदंडाः पाणितलमात्रपुष्कराः स्रुचो विलाङ्गुलखातास्त्र्यंगुलोच्छ्रायाः
प्रादेशमात्राणि प्रस्रवणीति काठके अरत्निमात्री स्त्र गग्निहोत्रहवणी पालाशी सामान्यात या नि
र्वपणमि तरासां बाहुमात्राः स्फ्गंडाप्र हस्तमात्राणि प्रस्रवणान्यर्थपरिमाणानि पात्राणि पालाशी
जुहूराश्वत्थ्युपभृद्वैकंकती ध्रुवा शमी भूर्जमय्यो वात्वक्तो विलाहं समुख्या भवंतीति श्रुतिन्यग्रोधा
श्चमसा रौहितका वा सर्वाणि पर्णमया निस्प्यास्फ्वशम्या खादिरं प्राशित्रहणं च यज्ञाय ज्ञियानां पा
त्रीडाचमसं लोकाच्छेषस्य प्रतिपत्तिरिति बाहुमात्रस्रुचः पाणिमात्रपुष्करास्त्वग्विलाहं समुख

ती ध्रुवै २

ष्क
॥५२॥
॥देवया०१

प्रसेकाम्मूलदंडा भवंति ॥ बाहुप्रमाणमासां ता बाहुमात्र्यः बाहुप्रमाणाः स्रुचो भवंति तथा पा
णिः प्रमाणमस्य तत्पाणिमात्रं ॥ पाणिमात्रं पुष्करं मुखं यासां ताः पाणिमात्रपुष्कराः स्रुचो भवंति ॥ तथा
त्वग्बिलाश्च चित्वक्प्रदेशे बिलं मुखं यासां तास्त्वग्बिलाः ॥ तथा हंसमुखप्रसेकाः प्रसिच्यते द्रव्य
तेनेनेति प्रसेकः प्रणालिका हंसमुखसदृशः प्रसेकः प्रणालिका यासां ता हंसमुखप्रसेकाः ॥ सा च प्रणा
लिका च एकैव भवति ॥ एकयापि शास्त्रार्थस्य कृतत्वात् कार्यसिद्धेश्च ॥ न तु द्वे ति स्रावा ॥ कुत्राप्यनुक्तत्वा
त् ॥ तथा मूलदंडाः मूले दंडो यासां ता मूलदंडाः ॥ अर्थाद्ग्रे पुष्करं सिद्ध्यति ॥ एवंविधाः स्रुचो भवंति ॥ शाखांत
रीयो विशेषात् पूर्वसूत्रे उक्तेः ॥ अरत्निमात्रः स्रुवोंगुष्ठपर्ववृत्तपुष्करः ॥ अरत्निप्रमाणमस्यासावरत्नि
मात्रः स्रुवो रत्निप्रमाणो भवति पुनः कीदृशः अंगुष्ठपर्ववृत्तपुष्करः अंगुष्ठपर्वणो वृत्तं मंगुष्ठपर्ववृ
त्तं पुष्करं मुखं यस्यासौ वंगुष्ठपर्ववृत्तपुष्करः पर्वशब्दः संधिवाची संधिग्रंथिः ॥ तदुक्तं ॥ अंगुष्ठांगु
लिमानं तु यत्र यत्रोपदिश्यते ॥ तत्र तत्र बृहत्पर्वग्रंथिभिर्मिनुयात् सदेति ॥ अतोंगुष्ठस्य बृहत्पर्वग्रंथि
प्रमाणं चतुरस्रं कृत्वा तदेव मंडलं च चतुरस्रं चिकीर्षन्नितुपायेन वृत्तं विधाय तत्प्रमाणं स्रुवस्य पुष्क

॥५३॥
॥कात्यै॥

रं नासिकावत् खातं च स्यात् ॥ तदुक्तं कात्यायनेन ॥ स्रुवाग्रे घ्राणवत् खातमिति ॥ तथा पुष्करार्द्धं भवेत्
खातं इति च ॥ स्फ्योसिकृतिः ॥ असिः खड्गं असेरिवाकृतिर्यस्य असावस्याकृतिः खड्गसदृशः स्फ्यो
वज्रो भवतीत्यर्थः ॥ आदर्शाकृति प्राशित्रहरणं ॥ प्राशित्रहरणमिति ब्रह्मणो भागावदानं तत् क्रियते
येन तत्प्राशित्रहरणं आदर्शो दर्पणं आदर्शस्येवाकृतिराकारो यस्य तदादर्शाकृति ॥ आदर्शसदृशं वर्तुलं
तत्रावदानविधानाच्च खातवत् प्राशित्रहरणं भवति ॥ चमसाकृतिर्वा ॥ चमसस्येवाकृतिराकारो
यस्य तच्चमसाकृति वा विकल्पे अथवा चमससदृशं चतुरस्रं प्राशित्रहरणं भवति ॥ चात्वालोत्करावंतरेण
संचरः ॥ संचरंत्यनेनेति संचरो गमनागमनमार्गः चात्वालश्च उत्करश्च चात्वालोत्करौ तयोरंतरेण तयोरंतरा
लेन सर्वेषां विहितकार्यार्थं संचरो गमनागमनमार्गो भवति अयं च सौत्रवेदिषु वरुणप्रघासमहाहविःपशुसो
मेषु ज्ञेयः चात्वालस्य एष्वेव सत्त्वात् अतः सौत्रवेदिषु सर्वैरनेनैव मार्गेण गमनागमने कार्ये ॥ प्रणीतोत्करा
विष्टिषु ॥ अंतरेण संचर इत्यनुवर्त्तते ॥ इष्टिषु दर्शपूर्णमासादिषु प्रणीतोत्करावंतरेण प्रणीतोत्करयो
रंतरालेन सर्वेषां विहितकार्यार्थं संचरो भवति गमनागमनमार्गो भवति अंतरेणेत्ययं निपातोंतरालशब्द

१५३॥
॥देवया०१

र्थे तद्योगेचात्वालोत्करौप्रणीतोत्करावितिचद्वितीया ॥ अन्तरांतरेणयुक्तइतिसूत्रेण ॥ अथेदंचिंत्यते ॥ व्रीहिभिर्य
जेतयवैर्यजेतेत्यादिभिर्वाक्यैः श्रुतायेव्रीहियवादयः ॥ यदिदैवान्मानुषाद्वाकारणात्तैर्यागार्थंनलभ्यतेतदाकिं
द्रव्यांतरेणप्रतिनिधिभूतेनतत्कर्मारंभणीयमुतनेति ॥ तत्रयागस्यप्रधानत्वाद्द्रव्यस्यगुणभूतत्वाद्द्रव्यांत
रेणकर्मारंभेप्राप्तेआह ॥ ३ ॥ चोदिताभावेनारंभस्तत्सिद्धित्वात्तस्य ॥ चोदितस्यविहितस्यश्रुत
स्यव्रीहियवादेर्मुख्यद्रव्यस्याभावेअलाभेअप्राप्तौसत्यांकाम्यस्यकर्मणोनारंभोऽप्रयोगएवभवति
॥ कुतः ॥ तत्सिद्धित्वात् ॥ तेनैवसिद्धिर्यस्यतत्तत्सिद्धिः तस्यभावस्तत्सिद्धित्वं तस्मात् ॥ तस्यका
म्यस्यकर्मणस्तत्सिद्धित्वात् यतःकाम्यंकर्मतत्सिद्धि तेनश्रुतेनैवचोदितेनैवद्रव्येणसिद्ध्यतिनान्ये
न यतस्तदेवसाधनत्वेनश्रुतंनद्रव्यांतरं ॥ अतोयदिद्रव्यांतरेणतत्कर्मारभ्यते ॥ तदाकर्मणोयागरूपस्य
तदेकसाधनत्वात् द्रव्यान्यत्वेसतियथाश्रुतद्रव्यहान्याकर्मणोविगुणत्वमेवस्यात् नचविगुणात्का
म्यात्किंचित्फलंभवतिविनष्टशक्तित्वाद्दग्धबीजवत् ॥ नहिकाम्यस्यावश्यकर्त्तव्यत्वंकेनचित्प्रमाणेन
सिद्धं ॥ यद्बलेनयथाशक्तिप्रयोगंदृष्ट्वातत्रद्रव्यांतरेणारभ्येत ॥ तस्माच्चोदितद्रव्यस्याभावेकाम्यस्या

१५३॥
॥भाष्य॥

नारंभएवभवति ॥ अग्रिमेणसूत्रेणनित्यकर्मणिविशेषस्यवक्ष्यमाणत्वादिदंकाम्यविषयं ॥ अ
थयथाहितद्रव्याभावेकाम्यस्यानारंभउक्तः ॥ तथानित्येपिविहितद्रव्याभावेद्रव्यांतरेणनारं
भेप्राप्तेआह ॥ नियतेसामान्यतःप्रतिनिधिःस्यात् ॥ यथाशक्तिप्रयोगस्यस्थापितत्वात् ॥ नियते
नित्येकर्मणिदर्शपूर्णमासादौश्रुतद्रव्याभावेसामान्यतोमुख्यद्रव्यसादृश्यात् ॥ प्रतिनिधि
र्भवतिश्रुतद्रव्यसदृशेनद्रव्यांतरेणापिनित्यंकर्मारंभणीयं यावज्जीवचोदनयादिअनारब्ध
मपिनित्यमवश्यकर्त्तव्यमितिनियमश्चोद्यतएव ॥ तत्रयागप्रधानचोदनानियमेनयत्किंचिद्द्र
व्यमाकांक्षतिसाचव्रीहिभिर्यजेतेतिश्रुतैर्व्रीहियवैर्विद्यमानैरेकवाक्यतांप्रतिपद्यमानार्थप्राप्ता
निद्रव्यांतराणिबाधते ॥ श्रुतद्रव्याभावेतयाद्रव्यांतराणामर्थप्राप्तिःकेनवार्यते तस्माद्द्रव्यांतरंप्रतिनि
धेयं ॥ यदिह्याग्नेयचोदनानस्वयंद्रव्यंप्रयुंजीतव्रीहिवाक्यमेवतुतस्यप्रयोजकंस्यात्ततस्तदभावे
नद्रव्यांतरमुपादीयेतानचैतदस्ति ॥ प्रधानचोदनयैवप्रयुज्यमानेषुद्रव्येषुनियममात्रंव्रीहिवा
क्येनक्रियतेऽतस्तदभावेपिप्रधानमेवावश्यकत्वाद्द्रव्यांतरमुपादापयतीति ॥ नद्रव्यांतरेकर्मभे

॥५४॥
॥देवया०१

दोभविष्यति ॥ उच्यते ॥ नहि द्रव्यकर्मणोरभेदः ॥ नचद्रव्यात्मकं कर्मयेन तद्भेदाभेदः जातेरिव व्यक्तिभेदेन
व द्रव्यांतरेपि तावेव दर्शपूर्णमासाविन्यस्य प्रत्यक्षावगतस्य बाधोस्ति ॥ कुतः शब्दांतरादीनां भेदकारण
नामभावात् ॥ नहि नीवारैरपि क्रियमाणयोर्दर्शपूर्णमासाभिधेयता नजहीतः ॥ तथा सति सामान्या
तंतुल्यत्वान्नीवारैरपि क्रियमाणयोरस्त्येव तदभिधेयता स्वरूपाभेदात् ॥ यथा आश्रयभेदेपि गोत्वा
दिसामान्यस्याभेदात्तन्निमित्तं गवादिनामधेयं सर्वत्र वर्तते ॥ तद्द्रव्यभेदेपि कर्मभेदाभावात्तन्नामतान
निवर्तते ॥ तन्नामकाच्च फलमतो द्रव्यांतरेप्यस्त्येव फलमिति ॥ तथा यद्यपि देशादिभेदेपि भिन्ना एव कर्मव्य
क्तयः सामान्यमेव तु दर्शपूर्णमासाभिधेयं फलवत् ॥ तथापि देशादिभेदवत् व्रीहियवभेदवच्च नीवा
रेष्वपि तत्सामान्यव्यक्तिरेका ॥ अतः सिद्धं द्रव्यभेदेपि कर्मैकत्वं ॥ एवं द्रव्यभेदेपि कर्मैकत्वे सिद्धे इदं सं
दिह्यते ॥ श्रुतद्रव्याभावे किं यत्किंचिद्धि सदृशमपि प्रतिनिधित्वेन ग्राह्यं उत श्रुतसदृशमेवेति तत्राद्या
कपालचोदनायेन केनचिन्निर्वर्त्यते ॥ तत् किं सदृशोपादानेन ॥ नच व्रीहिसदृशत्वाद्व्रीहीफलं नी
वाराः साधयंतीति वाच्यं ॥ यदि तथा स्यात्तदा व्रीहिभिर्विकल्पेरन्नेकार्थत्वात् यववत् ॥ नचैतदिष्टं तेन

॥५४॥
॥न्यायो॥

सगुणासंभवे विगुणेष्याग्नेयचोदनार्थः कर्तव्य इति कृत्वा द्रव्यांतरोपादाने ॥ तत्र च सदृशासदृश
योर्नास्ति विशेषः तस्मान सदृशोपादानमित्येवं प्राप्ते ब्रूमः ॥ फलार्थिना यथा श्रुतं व्रीह्या
दिद्रव्यकं कर्म प्रक्रांतं तादृशस्यैव फलसाधनत्वेनावगमात् तस्य व्रीह्याद्यभावेंगहान्या फलाभा
वात्तदंतस्यात्सर्गप्राप्ते शिष्टाचारानुमितात्प्रारब्धेनयजेतैवेत्येवंभूताद्वचनात्समाप्तिर्विधीय
ते ॥ सा च समाप्तिर्यादृशः क्रतुः प्रक्रांतस्तादृशस्यैव विधीयते ॥ नान्यादृशस्य ॥ तत्र च प्रक्रांते क्रतौ व्री
ह्याद्याकृतिर्विधीयते यागसाधनं स्वाश्रयभूतं द्रव्यं परिच्छेदत्यंगतां प्रतिपद्यते ॥ तथैव व्रीहिग
ताये विशेषाः दीर्घशूकत्वादयस्तान्परिछिनत्ति तेपि च क्रियायाः साधनमेव ॥ नह्यन्याप्रियमाणे
ष्ववयवेष्ववयवी व्याप्रुतः संभवति ॥ व्रीहिश्यामादिषु चैवंक्षणादिविधानादवयवानामेवांगत्वेना
वयविनोविनष्टत्वात् ॥ जात्या च स्वाश्रयवत्तदवयवानामप्युपलक्षणसंभवाद्व्यक्तिस्तदवयवाश्चस
र्व एव क्रियांगतया विधीयंते ॥ तत्र यद्यपि नीवाराकृतिव्यक्तिश्च व्रीहिर्जातेर्व्यक्तेश्चान्यातथाप्यन्यैव
हवाधर्मी व्रिहिसमानास्तेषु विद्यंते ॥ श्रुतेकदेशसंपत्तये अवश्यमुपादेया ॥ नहि संभवि नस्यागो

युज्यते येतुअसाभानीवारगतास्तेनांतरीयत्वाकूपादीयंतोलभ्यंतेज्ञातिमात्रमवयवांतरंच परित्यक्तंभवति॥ असदृशापादानेपुनः समस्तपरित्यागस्यात॥ अतोव्रीहिशास्त्रमपियथासंभवस्तुपपादयेत्तुसदृशोपादाने॥ एवंचसुसदृशलाभेमंदसदृशंनोपादेयंसुदृशेवह्नवयवानुग्रहात्॥ त [illegible] ऽनेनकार्यैस्रूपैस्तथापर्णैःक्षीरैःपुष्पैःफलैरपि॥ गंधैरसैः सदृग्राह्यंपूर्वलाभेपरंपरमस्मात्साधूक्तंसामान्यतःप्रतिनिधिःस्यादिति॥ तदुक्तं॥ यथोक्तवस्त्वसंपत्तौग्राह्यंतदनुकारियत॥ यवानामिवगोधूमाव्रीहिणामिवशालयइति॥ अतएवंसिद्धं॥ नित्यकर्मण्यारब्धेअनारब्धेचप्रतिनिधिर्भवति॥ अवश्यकर्तव्यतयाययाशक्तिप्रयोगस्यस्थापितत्वात॥ काम्येपुनरवश्यकर्तव्यत्वाभावादनारब्धेमुख्यालाभेआरंभोनभवतीतिप्रागुक्तं॥ अथकाम्येप्रारब्धेसतिपश्चातकृतद्रव्यस्यनाशदोषापहारालाभादौज्ञातेतस्यविगुणस्यफलसाधनत्वाभावस्यप्रागुक्तत्वात्प्रयोजनाभावेनकाम्यंनसमापनीयमीतिप्राप्तेआह॥ आरंभान्नियमः॥ काम्येप्यारंभादूर्ध्वंसमाप्तेर्नियमोवश्यंभावः आरंभादितिहेतौपंचमी॥ तेनारंभएवसमा

प्तेकारणं॥ यतआरब्धंअतोवश्यंसमापनीयमेव॥ समाप्तिश्चमुख्याभावेप्रतिनिध्युपादानंविनानभवति अतःकाम्येपिआरब्धस्यसमापनार्थंप्रतिनिधिर्भवत्येव॥ नित्येप्यवश्यकर्तव्यतैवप्रतिनिध्युपादानेकारणं॥ साचारब्धेकाम्येप्यविशिष्टा॥ आरंभस्तुकाम्यस्यविहितद्रव्याभावेद्रव्यांतरेणभवत्येव॥ अनारब्धस्यावश्यकर्तव्यत्वाभावात॥ दोषश्चासमाप्तौस्यात्सामान्यात॥ ॥ किंच॥ प्रारब्धस्यकाम्यस्यासमापनेदोषःस्यात॥ कुतः॥ सामान्यात॥ आरब्धस्यकामस्यावश्यकर्तव्यतयानित्येनसमानत्वात॥ ॥ यथा॥ नित्यकर्मणामकरणेयथाशिष्टविगर्हणं॥ ॥ एवमारब्धानांकाम्यानामसमापनेपीति॥ अतःशिष्टविगर्हणरूपाच्छिष्टाचारात्स्मृतिंस्मृतेश्चश्रुतिंकल्पयित्वाप्रक्रांतंशास्त्रियंकर्मावश्यंसमापनीयं॥ अपिचप्रक्रांतस्यासमाप्तौनिदाप्रायश्चित्तैतैत्तिरीयेश्रूयते॥ देवताभ्योवाएषआवृश्च्यतेयोयक्ष्यइतिउक्त्वानयजतेत्रेधातवीयेनयजेततेनदेवताभ्यआवृश्च्यतेइति॥ तस्मादप्यारब्धमवश्यंसमापनीयं॥ तदुक्तंजैमिनिना॥ ॥ प्रक्रमात्तुनियम्येतारंभस्यक्रियानिमित्तत्वादिति॥ दर्शनाच्च॥ ॥ कृतेमुख्यद्रव्यस्याभावेद्रव्यांतरेणपरिसमाप्तिदर्शनाच्चैवमवसीयतेयन्मुख्य

॥५६॥
॥दर्पया०१

द्रव्यस्याभावे द्रव्यांतरं प्रतिनिधेयमिति तद्यथा॥ यदि सोमं न विंदेत्पूतीकानभिषुणुयादिति॥ अत्र सोमे
पहृते सोमाभावे सति तत्स्थाने पूतीकानामभिषवं विदधानात्पूतीकैर्यागः समापनीय इत्यमुमर्थं दर्शयति
एवं दर्शने उक्ते दर्शनस्य स्वरूपकथनपूर्वकमस्य दर्शनत्वमाहोपति॥ अन्यार्थदर्शमंन पुनर्ग्रहणात॥ अन्या
र्थं सत् दर्शनं भवति॥ तद्धि दर्शनं कथ्यते यदन्यविधिपरं सत् प्रसंगादन्यमर्थं ज्ञापयति॥ यथा तस्य प्रयाजेषु
तायमानेषु ब्राह्मणो वीणागाथी दक्षिणत इत्यादिगाथा गायति त्यते वाक्यं गाथागानविधिपरं सदस्यामिष्टौ
प्रयाजान्सिद्धान्दर्शयति॥ यदि सोमं न विंदेतितीदं तु तादृशं दर्शनं न भवति॥ ॥कुतः॥ ॥पुनर्ग्रहणात॥ सो
माभावे सति पुन द्रव्यांतरस्य पूतीकस्य ग्रहणस्याप्राप्तस्य ग्रहणात॥ विधानात्॥ तथा हि यदि सोमं न विंद
त्पूतीकानभिषुणुयादिति किमयं सोमाभावे द्रव्यांतरविधिः सोमाभावे पूतीकैर्यागं साधयेदिति सोम
जातिवत्पूतीकजातिर्यागसाधनपरिच्छेदनत्वेन विधीयते॥ उत प्रतिनिधिनियमः॥ सोमाभावे सुसदृ
शेष्वीषत्सुदृशेष्वपि प्राप्तेषु पूतीका नियम्यते॥ यदा चैवं तदा द्रव्यांतरेणापरिसमाप्ते दर्शनं भवति॥ अ
धुनात्वेन दाह्निपति॥ अत्र सोमेन यजेतेति सोम इत्यविशिष्टः॥ अतः सोमानुरक्तस्यैव करणत्वात्तदसंभ

॥५६॥
॥भाष्य॥

वे करणत्वमेव हीयते इति न प्रतिनिध्यपेक्षा॥ कुतस्तन्नियमार्थता विधेः॥ दर्शपूर्णमासयोस्तु व्रीहिणा मनु
त्यविशिष्टत्वाद्व्रीह्याद्यैः कर्मस्वरूपस्य भेदो न भवति॥ तेन न तत्र प्रतिनिधिर्युज्यते॥ किंच नियमार्था विधिरि
त्येतदप्ययुक्तं॥ न हि सोमस्य सुसदृशो द्रव्यांतरे सति ईषत्सदृशः पूतीकः पक्षेपि प्राप्तः सुसदृशो हि बहवः
कृतद्रव्यावयवाः संगृह्यंते अल्पास्त्वीषत्सदृशे यो न च भूतनुग्रहे संभवत्यल्पानुग्रहो युक्तः॥ तस्मा
दत्यंतप्राप्त्यभावे विधीयमानाः पूतिका न नियमार्था भवंतीति तस्मात्सोमाभावे अप्राप्तानां पूतिका
नां यागसाधनविधिरिति साधूक्तं पुनर्ग्रहणादिति॥ अथ सिद्धांतमाह॥ ॥अन्यार्थं पुनर्ग्रहणं॥ ॥
पूतीकानभिषुणुयादित्येतत्पुनर्ग्रहमेवान्यार्थं॥ पूतिकरूपप्रतिनिधिनियमार्थमित्यर्थः॥ न तु अ
प्राप्तानां पूतीकानां विधानार्थं॥ विचारस्येतत्प्रयोजनं॥ प्रतिनिधिनियमपक्षे पूतीकविनाशे सोमस
दृशस्योपादानं॥ द्रव्यांतरविधाने तु पूतीकसदृशस्योपादेयमिति॥ कथमन्यार्थमिति चेदुच्यते॥ प्रक्रां
तं कर्म तावदवश्यं समापनीयमेव अतो द्रव्यांतरोपादानं प्राप्नोत्येव॥ ननूक्तं सोमस्यात्यविशिष्टत्वा
न्न प्रतिनिध्यपेक्षेति॥ तत्रोच्यते॥ यजेतेत्येतत्त्यदयत्किंचिद्द्रव्यमपेक्ष्यमाणं सोमेनेनिराकांक्षीक्रियते

वि

यथाग्नेयोष्टाकपालइतिवाक्यवाक्यांतरेण व्रीहिभिर्यजेतेत्यनेन ॥ पदांतरवाक्यांतरप्राप्तयोर्नैव क
श्चिद्विशेषोस्ति ॥ अपेक्षायास्तुल्यत्वात ॥ अतस्तद्वत्प्रतिनिध्यपेक्षाभवत्येव ॥ यच्चोक्तं सत्यपि निधौ पूती
कानामीषत्सदृशत्वात्प्राप्तिर्नास्तीति अभावं धिरेवायमिति तत्रोच्यते ॥ यत्कदाचिदपि न प्राप्नोतीति तद्विधी
यते ॥ पूतीकास्तु कदाचित्प्राप्नुवंति यदा मुख्यस्याभावात्प्रतिनिधातव्यं किंचिदिति निरूप्यते तस्यां वेलायां
सर्वेषामेव सुसदृशानामीषत्सदृशानां चास्ति प्राप्तिरनियमेन ॥ तत्र यावदेव न्यायेन सुसदृशं नियन्तुमुप
क्रम्यते तावदेवेषत्सदृशः पूतीको बलीयसा वचनेन नियम्यते ॥ तस्मादिदं पूतीकानभिषुणुयादित्येवं त
त्तु न ग्रहणं मन्यार्थं सत्यपेक्षाप्राप्तानां पूतीकानां नियमार्थं सत प्रक्रांतस्य कर्मणो मुख्यद्रव्यालाभे द्रव्यां
तरेण परिसमाप्तेर्दर्शनं भवत्येवेति सिद्धं ॥ अतः साधूक्तमन्यार्थं पुनर्ग्रहणमिति ॥ अन्यार्थत्वाद्दर्शनं भ
वतीत्यभिप्रायः ॥ अथेदं विचार्यते ॥ सोमपयो व्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येत्यस्मिन्व्र
ते किं प्रतिनिधिर्भवत्युत न भवतीति ॥ तत्र पूर्वपक्षमाह ॥ ॥ व्रते प्रसंगो न नियमशब्दात ॥ ॥ व्रते पयोव्रतादौ
प्रतिनिधेः प्रसंगो न भवति प्रतिनिधिर्न भवतीत्यर्थः ॥ कुतः ॥ नियमशब्दात ॥ नियमप्रतिपादकशब्दान्नियम

शब्दः एवकारः ॥ सोत्र श्रूयते व्रतं ह्येवास्यातोशनं भवतीति ॥ एवकारेण प्रतिनिधिरेव निवार्यते ॥ अन्यस्य
निवारणीयस्याभावात ॥ एवं पूर्वपक्षितेइदमेव सूत्रं सिद्धांतपरतयापि व्याख्यायते ॥ व्रतेपि प्रतिनिधेः प्रसं
गो भवतीति प्रतिनिधिर्भवत्येव ॥ कुतः ॥ न नियमशब्दात ॥ यतो नायं नियमः शब्दः न ह्ययं नियमं प्रतिपादयितुं
शक्नः ॥ यतोयमिष्टाशनस्तुत्यर्थः ॥ पुरा केशश्मश्रोर्वपनाद्यत्कामयते तदश्नीयादितीष्टाशनं हि प्रकृत्येत
च्छ्रूयते व्रतं ह्येवास्यातोशनं भवतीति अतस्तत्संस्तव एवायं अतो न स्वार्थे प्रमाणमिति न प्रतिनिधि
निवारणाय भवति ॥ तस्माद्व्रतेपि निधिर्भवत्येव ॥ ॥ अथैवं सूत्रयोजना ॥ ॥ नियमशब्दाद्व्रते प्रतिनिधे
र प्रसंग इति यदुक्तं तन्नेति ॥ एवं अप्रसंग इत्यकारप्रश्लेषः कार्यः ॥ अथेदं चिंत्यते ॥ विहितद्रव्यस्याभावे द्रव्यां
तरे प्रतिनिधित्वेनोपात्ते छागाभावे मेषरूपे अनुवाचनप्रैषादौ किमूहं कृत्वा प्रतिनिहितद्रव्यस्य प्रयोगः
कार्यः ॥ अग्नीषोमाभ्यां मेषस्य वपाया इत्येवं ॥ उत विहितद्रव्यस्यैव अग्नीषोमाभ्यां छागस्येत्येवमेवेति ॥ तत्र मं
त्रेण द्रव्यमभिधेयं न चानूहितः प्रतिनिहितं द्रव्यं शक्नोत्यभिधातुं तस्मादूहित्वा प्रतिनिहितद्रव्यवाचिशब्दस्य
प्रयोगे प्राप्तेत्राह ॥ ॥ शब्दे विप्रतिपत्तिः ॥ ॥ प्रतिनिधावुपात्तेपि विहितद्रव्यवाचिनि शब्दे अविप्रतिपत्तिरवि

शब्द

॥५८॥
॥देवया०

परिणामोऽनूह्यो भवति ॥ अग्नीषोमाभ्यां छागस्य वपाया इत्यनूहितमेवं मेषेपि प्रयोज्यं ॥ न तु मेषस्येत्येवं
विपरिणतरूपमित्यर्थः ॥ कुतः प्रतिनिधिः श्रुतद्रव्यबुध्या गृह्यते ॥ न तु द्रव्यांतरबुध्या ॥ अतश्छाग एवायमिति
बुध्या गृहीतत्वात्तच्छब्देनैवाभिधानं यद्यत्र मेषश्छागवत्साधनं भवेत्तत्र तस्तत्प्रकाशकं मेषपदं प्रक्षिप्येत ॥ न
त्वेवं किं तर्हि मेषगताय छागशास्त्र एवात्र साधनं ॥ ते च छागगता इव मेषगता अपि छागशब्देनैव प्रकाशयि
तुं शक्यंत इत्यनूहेनैव प्रयोगः ॥ यत्र तु द्रव्यांतरं वचनेन विधीयते ॥ यथा सारस्वतं मेषमिति ॥ ऐंद्र ऋषभः सार
स्वती मेषीमिति ॥ तत्र द्रव्यांतरबुद्धिर्भवति ॥ तत्र ऊहोपि भवति ॥ न चात्रैवंविधं किमपि वचनमस्ति ॥ तस्माद्दृ
ह्णूनामवयवानां सामान्यात् श्रुतद्रव्यमेवेदमिति बुद्ध्या मेषद्रव्यस्य छागादि प्रतिनिधित्वेनोपादानं ॥ तेन
श्रुतद्रव्यशब्देनैवाभिधानं युक्तमिति साधूक्तं शब्दविप्रतिपत्तिः ॥ यत्र तु वचनेन द्रव्यांतरं विधीयते ॥ तत्र ऊहो
भवतीत्युक्तं ॥ तेन सोमाभावे पूतीकानभिषुणुयादिति पूतीकानां वाचनिकत्वादूहो भविष्यतीत्याशंक्या
ह ॥ सोमेन जात्यभावात् ॥ सोमे नेति द्वितीये कवचनं ॥ सोमाभावे पूतीकेषूपात्तेषु सोमेनेति विशेषशब्देनैव पूती
कानामभिधानं कर्तव्यं ॥ अंशुरंशुष्टे देव सोमाप्यायतामित्येवं ॥ न तु पूतीकशब्देन ॥ अथवा सोमेड इति सप्तम्ये

॥५८॥
॥भाष्ये॥

कवचनं ॥ नेति निषेधः ॥ सोमप्रतिनिधित्वेनोपात्तेषु अंशुरंशुष्टे न हृतपूतीकादिषु सोमे सोमशब्देनोहो न भ
वति ॥ कुतः ॥ जात्यभावात् ॥ जात्यंतरबुद्ध्यभावात् ॥ न ह्यत्र वचनेन द्रव्यांतरं विधीयते किं तर्हि सोमाभावे याग
स्यावश्यकर्तव्यत्वादनेकेषु सुसदृशेष्वीषत्सुदृशेषु च प्राप्तेषु पूतीकादेर्नियमः क्रियते ॥ तेनेंद्रो मेषइति
वद्द्रव्यांतरविधानाभावादत्रापूहो न भवतीति ॥ ॥ अथेदं विचार्यते ॥ ॥ वरुणप्रघासेषु पशोश्च
श्रूयते पृषदाज्यं गृह्णीतीति तेनानुयाजेषु चरतीति च ॥ प्रकृतौ चाज्यपदसंयुक्ता नियमाः संति देवानाज्य
पानावह स्वाहा देवानाज्यपान् ॥ देवानामाज्यपानां प्रिया धामानि ॥ देवा आज्यपा आज्यमजुषंतेति च ॥ आ
ज्यपशब्देनात्र प्रयाजानुयाजदेवता उच्यंते ॥ प्रयाजानुयाजा वै देवा आज्यपा इति विशेषणात् ॥ अत्र च पृषदा
ज्येनानुयाजा इज्यंते तद्विषयः संशयः ॥ आज्यपशब्दस्याज्यदधिपानित्येवमूहः ॥ अथवा दधिपानिति ॥ उत
पृषदाज्यपानिति ॥ आहोस्विदविकारेणैवाज्यपानिति प्रयोग इति ॥ यद्युभयं हविस्ततः प्रथमः पक्षः ॥ यदि
दध्येव ततो द्वितीयः ॥ यदि पृषदाज्यं नाम कंचिद्द्रव्यांतरं हविस्ततस्तृतीयः ॥ अथ त्वाज्यमेव हविः ॥ तस्य तु पृ
षत्वं चित्रतासंस्कारमात्रं तज्ज्ञानार्थं च दधि ततः सिद्धांतः ॥ तत्राय पृषदाज्यं गृह्णातिद्वयं वा इदं स

वाक्य

॥५९॥
॥देवया० २

र्पिश्चैव दधि चेति तुल्यवत्संकीर्त्तनादुभयं हविः ॥ उभयमप्यनुष्ठानांगत्वेन स्मर्त्तव्यं ॥ तस्मादुभयोः प्रकाश
नं अथवा शाखांतरे द्विरुपस्तरणाति द्विरवद्यति सकृदभिधारयतीत्युपस्तरणाभिघारणवादाद्दध्यभिसं
स्कारार्थमाज्यं दध्येव हविस्तनो दधिपा नित्येवं वक्तव्यं ॥ नैतदुभयं गृह्णे हि दध्याज्यपोस्तुल्यत्वेऽप्यो
वा प्राधान्यं गम्यते यया गत्वाज्यमेव पृषन्त्या गुणकंकरणत्वेन श्रुत्या विधीयते ॥ नोभयं ॥ नापि दधि ॥ य
च्चयागद्रव्यं तदर्थो ग्रहणसंस्कारः तस्माद्ग्रहणे प्याज्यमेव प्रधानं ॥ तस्य तु पृषन्त्वासंपादर्थं दधि गृह्य
ते ॥ न स्वार्थेनानुपयोगित्वात् ॥ तथाविधे तु दधितुल्यनिर्देश उपस्तरणादिवादेन च प्राधान्यनिर्देशो
र्थवादमात्रं तस्मादविकारः अन्यस्त्वाह दध्नाज्येन च द्रव्यांतरं निष्पद्यते ॥ तस्य वाचकः पृषदा
ज्यशब्दः तच्चेह हविः पृषदाज्येनानुयाजान्यजतीति तस्मात्पृषदाज्यपा नित्येवं वक्तव्यमिति प्राप्ते
आह ॥ आज्ये चादर्शनात् ॥ ॥ अविप्रतिपत्तिरित्यनुवर्त्तते ॥ पृषदाज्येनानुयाजान्यजतीति वा
चनिके पृषदाज्ये सत्यपि आवाहनादिनिगमेषु आज्यशब्दे अविप्रतिपत्तिरविकारः देवानाज्य
पा नित्येवं वक्तव्यमित्यर्थः ॥ कुतः अदर्शनात् ॥ आज्यव्यतिरिक्तस्य द्रव्यांतरस्यादर्शनात् ॥ तथा हि

॥५९॥
॥भा० देव॥

स्याद्विकारो यदि पृषदाज्यशब्दः समुदायशक्त्या द्रव्यांतरमभिधत्ते ॥ न त्वेवमस्ति ॥ पृषच्छब्दो लोके वि
त्रवचनः ॥ पृषद्रजुः पृषन्मणिरिति ॥ तेन पृषदाज्येनेति चित्रेणाज्येनेत्यर्थः ॥ तेन प्राकृतस्यैवाज्यस्य चित्र
तागुणमात्रविधानं ॥ गुणं च संपादयितुं दधि गृह्यते प्राधान्यनिर्देशोत्रवादमात्रं ॥ हविरेव च प्रकृतानुप
लक्षितं नहविर्गुणः ॥ तस्मादविकारेणाज्यपानित्येवं वक्तव्यमिति सिद्धांतः ॥ किंच ॥ ॥ पशौ मंत्रवर्णात्
॥ ॥ प्रशावेवोत्तमप्रयाजप्रैषे पठ्यते स्वाहा देवा आज्यपा इति वनस्पतिप्रैषेपि ॥ देवानामाज्यपानां प्रियाधा
मानिति ॥ स्विष्टकृत्प्रैषेपि अयाट् देवानामाज्यपानामिति ॥ तत्र नियमतः पृषदाज्येनैवानूयाजा इज्यंते अ
त एव पशुसंबंधिनो मंत्रवर्णाद्देवानामाज्यपानित्यादावूहो न भवतीति गम्यते ॥ ॥ किंच ॥ ॥ श्रुतेश्च
॥ ॥ एकवचनश्रुतेरप्येत्रैकस्यैव प्राधान्यं गम्यते नोभयोः अथ पृषदाज्यं गृह्णातीति ॥ यदि चात्र द
ध्नोपि प्राधान्यं स्यात्तदा द्विवचनं श्रूयेत ॥ न च श्रूयते ॥ अत एकवचनश्रुतेरप्ययमेवार्थोवसीयते यदेक
स्यैवात्र प्राधान्यमिति तत्त्वाज्यस्यैवेति प्रागेव साधितं ॥ अथेदं विचार्यते ॥ व्रीहिभिर्यजेत यवैर्यजेतेति वि
कल्पेन विहितेषूभयेषु मध्ये एकेन व्रीहिद्रव्येण प्रारब्धे कर्मणि तस्य नाशदोषापहारादिके जाते पश्चाद्यदि

व्रीहयो न प्राप्यंते तदा किं वैकल्पिकद्रव्यांतरं यवरूपमुपादेयं ॥ उत व्रीहिसदृशमिति ॥ तत्र मुख्यद्रव्ये सति प्रतिनि
धेरुपादानस्यायुक्तत्वाद्यवानामुपादाने प्राप्ते सिद्धांतमाह ॥ विकल्पे प्रवृत्ते कर्मांतरत्वात् ॥ विकल्पे सति
यत्प्रवृत्तं येन कर्मारब्धं तदेव तस्मिन्प्रयोगे अंगं इतरा द्वैकल्पिकवांतरमनंगं तेन व्रीहिभिः प्रयोगे उपक्रांते तेषा
मपहारादौ अलाभे व्रीहिसदृशा नीवारादिकमुपादेयं न तु वैकल्पिका यवाः कुतः कर्मांतरत्वात् यथार
भं हि समापनीयं ॥ तत्र यदि व्रीहिभिः प्रारब्धं तदा तस्मिन्प्रयोगे व्रीहय एवांगं ॥ तेषु च विनष्टेषु साम्यात् तद्ध
र्म्येव यदि नीवारा गृह्यंते ॥ तदा तदेवेदं कर्मेति प्रतीतिर्भवति तेन व्रीहिसदृशमेवोपादेयं ॥ यवेषु पुनर्द्रव्यांत
रबुध्योपादीयमानेषु व्रीहिभ्योऽन्यदेवेतद्द्रव्यमिति कर्मांतरबुद्धिरुदेति सादृश्याभावात् ॥ तथा सति यथार
भं समापनं च कृतं न भवति ॥ एवं संनिधिद्रव्येण यागोपक्रमे तेन पुनर्मुख्यद्रव्येण यागावृत्तिः ॥ अथ यत्रार्थद्रव्य
योर्विरोधस्तत्र कथं ॥ तद्यथा मुख्यं द्रव्यं गृहीतं न स्यात् ॥ खादिरादिकं नियोजनादिकार्यासमर्थं विद्य
ते प्रतिनिधिद्रव्यं च कार्यसमर्थं ॥ तत्र यदि मुख्यद्रव्यं गृह्यते ॥ तदा तेन कार्यं नियुक्तं यस्य नपक्रमणरूपं न
सिध्यति यदि च कार्यसमर्थं ॥ तत्र युसिद्धिसमर्थं प्रतिनिधिं गृह्यते ॥ तदा मुख्यद्रव्यं गृहीतं न स्यात् ॥ तत्रे
वं वैकल्पिकेषु यावदेकमनुपक्रांतं तावत्सर्वेषां प्राप्तिः ॥ तेषां मध्ये तु एकेन प्रयोगे प्रारब्धे तस्मिन्प्रयोगे तदेव श्रुतद्रव्यं ॥ द्रव्यांतरं त्वश्रुतसममेव

वं संदेहः ॥ किं कार्यसाधारणसमर्थमपि मुख्यं ग्राह्यं ॥ उत मुख्यमनादृत्य कार्यसमर्थप्रतिनिधिद्रव्यमिति ॥ त
त्र मुख्यामुख्यामुख्ययोर्मुख्ये संप्रत्ययः इति न्यायेन मुख्यस्यैव परिग्रहे प्राप्ते सिद्धांतसूत्रं ॥ अर्थद्रव्यविरोधे
र्थसामान्यं तत्परत्वात् ॥ अर्थः प्रयोजनं कार्यमिति यावत् ॥ द्रव्यं मुख्यद्रव्यं ॥ अर्थद्रव्यविरोधे कार्यमुख्यद्रव्य
योर्विरोधे सति अर्थसामान्येऽर्थेन प्रयोजनेन कार्येण सामान्यसंयुक्तं कार्यसिद्धिसमर्थं यत् तदश्रुतमपि
प्रतिनिधिद्रव्यं उपादेयं कुतः तत्परत्वात् ॥ द्रव्यस्यार्थपरत्वात् ॥ कार्यारंभसमापनस्योचितत्वात् ॥ द्रव्यांतरेणो
पात्तेन तथा न स्यादिति अतो व्रीह्याग्रयणानंतरं प्राग्यवाग्रयणाद्धोत्त्याय वैश्वदेवे यागे कृते तेषामश्रुतसमत्वात्तु न
व्रीहिभिरेव यागोऽनुष्ठेयः ॥ अथैतद्विचार्यते ॥ व्रीह्यभावे प्रतिनिधित्वे न निवारः प्रयोगे प्रारब्धे नीवाराणामपहा
रादिना भावे सति किं प्रतिनिधिभूतनिवारसदृशमुपादेयं ॥ उत मुख्यद्रव्यं व्रीहिरूपं न तत्सदृशं वेति ॥ तत्र यथै
व वैकल्पिकेष्वेकस्मिन्प्रवृत्ते तस्यैव तत्प्रयोगांगत्वात्तदपचारे च तत्सदृशमेवोपादेयं वैकल्पिकांतरं मुख्य
मपि तत्प्रयोगानंगत्वान्नोपादीयते ॥ तथैव प्रतिनिधौ प्रक्रांते तस्यैव तस्मिन्प्रयोगे गत्वात्तदपचारे तत्सदृशमे
वोपादेयं न तु मुख्यं तत्सदृशं वा तस्य तत्प्रयोगानंगत्वादिति प्राप्ते सिद्धांतमाह ॥ प्रतिनिधौ तत्कालात्

॥६२॥
॥देवेयो०१

प्रतिनिधिद्रव्येनीवारादौविनष्टेनप्रतिनिधिभूतनिवारादिसाम्येनप्रतिनिध्युपादानं॥ किंतुमुख्यद्रव्यमेवव्रीहिरू
पमुपादेयंसंभवेतदसंभवेतुमुख्यसादृश्येननीवारादिप्रतिनिधिरूपादेयः॥ नतुप्रतिनिहितनीवारसादृश्येननी
वारादिःप्रतिनिधिरुपादेयः॥ नतुप्रतिनिहितनीवारसादृश्येन॥ कुतः तत्कालात्॥ सःकालोयस्यासौतत्कालः
भावप्रधानोनिर्देशः॥ प्रतिनिधेस्तत्कालत्वादित्यर्थः॥ यतःप्रतिनिधेःसएवकालोयोमुख्यद्रव्यस्याभावः॥ ते
नप्रतिनिधौनीवारेविनष्टेमुख्यस्यलाभेमुख्यमेवग्राह्यं॥ तदलाभेनिवारादिकंव्रीहिसदृशमेवेतिनतुक
दाचिन्नीवारसदृशमित्यर्थः॥ नहिनिवाराणामंगत्वमस्तिश्रुतिलिंगादिप्रमाणाभावात्॥ श्रुतद्रव्यसाधा
रणास्तुयेवयवानीवारगतादीर्घशूकसतुषत्वादयस्तदुपादित्सयाप्रवर्तमानोनांतरीयकतयानीवारानु
पादत्तेतस्मान्नीवारस्यानंगत्वाद्व्रीह्यवयवानामेवांगत्वात्तत्सिद्ध्यर्थंसंभवेव्रीह्योःसंभवेचतत्सदृशमु
पादेयंननीवारसदृशमितिसिद्धांतः॥ वैकल्पिकांतरंतुपूर्वाधिकरणेनिराकृतमितितदुपादानस्यात्रशं
केवनास्ति॥ ननुयदिप्रमाणाभावान्नीवारादीनामनंगत्वंश्रुतिलक्षणस्यतुपूतीकादेरंगत्वात्तस्यप्रक्रांत
स्यापचारेतत्सदृशमेवोपादेयंनसोमसदृशंइतिचेत्॥ ननुश्रुतिरप्यत्रप्रतिनिधिनियमार्थैव॥ सत्यं॥ तथा

॥६२॥
॥भोखे॥

प्यस्त्यत्रकाचिदाशंकासोमावयवानामन्यत्रापिसद्भावेसतिपूतीकनियमादेवंविज्ञापयतेनूनंपू
तीकांशोप्यस्यांवेलायांक्रियांगमितिइतरथासोमावयवस्यांगत्वेतस्यान्यत्रापिसंभवान्नपूती
काएवोपादीयेरन्॥ तत्रनियमविधिरूपश्येत॥ तस्मात्पूतीकस्याप्यंगत्वात्तदपचारेतत्सदृशमु
पादेयंनसोमसदृशमिति॥ सिद्धांतस्तु॥ सत्यं॥ नसोमावयवमात्रमंगंकिंतुपूतीकावयवसहिताः
सोमावयवाः॥ नतुतावतापूतीकावयवाःक्रियांगंभवति॥ प्रतिनिधिनियमव्याघातप्रसंगात्॥ किं
तुसोमावयवाएवक्रियांग॥ पूतीकावयवसाहित्यंतुतेषामेवांगमेवावरुणग्रहस्येवपयःसंसर्गः
ततःपूतीकोपचारेद्वयसंपादनार्थमुभयसदृशमुपादेयं॥ नकेवलंपूतीकसदृशं॥ नापिकेवलंसोमस
दृशंउभयसदृशालाभेतुसोमावयवानांप्राधान्यतःस्थित्तस्यासोमसदृशमेवोपादेयंनपूतीकासदृश
मिति॥ अतश्चमुख्यद्रव्यस्यात्यंतलाभएवप्रतिनिधेःसाधनत्वं॥ तेनमुख्यद्रव्येसतिभ्रांत्याप्रति
निधिद्रव्येणकृतेपुनर्मुख्यद्रव्येणयागावृत्तिः॥ अथयत्रार्थद्रव्ययोर्विरोधस्तत्रकथं॥ तद्यथा॥ मुख्य
द्रव्यखादिरंनियोजनादिकार्यासमर्थंविद्यते॥ प्रतिनिधिद्रव्यंचकार्यसमर्थं॥ तत्रयदिमुख्यंद्रव्यंग

ह्यते॥ तदा तेन कार्यं नियुक्तपश्वनपक्रमणरूपं न सिध्यति॥ यदि च कार्यसमर्थं प्रतिनिधिद्रव्यं गृह्यते॥ त
दा मुख्याद्द्रव्यं गृहीतं न स्यात्॥ ॥तत्रैवं संदेहः॥ ॥किं कार्यसाधनासमर्थमपि मुख्यं ग्राह्यं उत मुख्यम
नादृत्य कार्यसमर्थं प्रतिनिधिद्रव्यमिति॥ तत्र मुख्यामुख्ययोर्मुख्ये संप्रत्यय इति न्यायेन मुख्यस्यै
व परिग्रहे प्राप्ते सिद्धांतसूत्रं॥ ॥अर्थद्रव्यविरोधेऽर्थसामान्यं तत्परत्वात्॥ ॥अर्थः प्रयोजनं कार्यमिति
यावत्॥ द्रव्यं मुख्यद्रव्यं॥ अर्थद्रव्यविरोधे कार्यमुख्यद्रव्ययोर्विरोधे सति अर्थसामान्यं अर्थेन प्रयोज
नेन कार्येण सामान्यं संयुक्तं कार्यसिद्धिसमर्थं यत् तद्दशक्तमपि प्रतिनिधिद्रव्यं उपादेयं॥ कुतः तत्प
रत्वात्॥ द्रव्यस्यार्थपरत्वात्॥ कार्यार्थत्वात्॥ कार्यार्थं हि द्रव्यं न तु स्वरूपार्थं॥ येन च कार्यं न सिध्य
ति तत्सक्षतमपि सदशक्तसममेव अतो द्रव्यस्य प्रयोजनार्थत्वात् द्विरोधे तु शक्तमथ नादृत्य प्रयोज
नक्षममेवाशक्तमपि प्रतिनिधिद्रव्यमेवोपादेयं॥ न तु मुख्यं कार्यासमर्थमिति सिद्धांतः॥ ॥तदुक्तं जै
मिनिना॥ ॥अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तिर्द्रव्याणामर्थशेषत्वादिति॥ यदा पुनरल्पशक्य
परिमाणाय शेषकार्यभ्यश्चापर्याप्तपुरोडाशजातिमात्राभिव्यक्तिसमर्था व्रीहयोऽल्पेऽपि लभ्यंते तत

व्रीहिद्रव्यस्य संभवे पुरोडाशमहत्त्वार्थं न नीवारपरिग्रह इति॥ एवं सान्नाय्येऽपि प्रधानयागसाधनसम
र्थस्तु वत्सत्रयपरिमाणमपि यावत् दुग्धं लभ्यते कथंचित्॥ तावत्स्वरूपसान्नाय्यलाभ इति च रूपभव
तः॥ ह्यवदानमात्रसमर्थमुख्यद्रव्याभावे त्वर्थद्रव्यविरोधेऽर्थसामान्यमिति न्यायेन प्रतिनिध्युपादान
मवसेयं॥ अथ यत्र गुणद्रव्ययोर्विरोधस्तत्र कथं॥ तद्यथा नैर्ऋतः परिहृत्य कृष्णव्रीहीणां नखनिर्भिन्ना
नामिति॥ तत्र ये व्रीहयः संति मुख्यास्ते अकृष्णाः॥ ये च नीवारास्ते च कृष्णाः॥ तत्र किं मुख्यद्रव्यमना
दृत्य गुणानुरोधेन नीवारोपादानं॥ उत कृष्णगुणमनादृत्य मुख्यद्रव्यं व्रीहय इति॥ तत्र व्रीहीणा
मुपादाने कृष्णगुणहानिः स्यात्॥ नीवाराणामुपादाने च तस्यानुग्रहः॥ व्रीहिशास्त्रमपि किंचिन्न्यू
नं संपादितं भवति अतः कृष्णानां नीवाराणामुपादाने प्राप्ते आह॥ ॥गुणद्रव्ययोर्द्रव्यं प्रधानयोगात्॥
॥गुणद्रव्ययोर्विरोधे कृष्णत्वादिगुणमुख्यद्रव्ययोर्विरोधे सति गुणमनादृत्य द्रव्यं मुख्यमेवोपादेयं
न गुणानुरोधेन प्रतिनिधिद्रव्यं॥ कुतः॥ प्रधानयोगात् द्रव्यस्य॥ यतो द्रव्यं प्रधानेन युज्यते॥ यतस्तत्त्य
ज्यमानं यागं साधयति अतो यागसाधनं द्रव्यं संनिकृष्टं गुणो विप्रकृष्टः॥ अतो गुणमनादृत्य मुख्यद्रव्य

दानैरेवपुरोडाशं कर्त्तव्यउतनीवारैरिति संशयः ॥ तत्र यद्यपि यागोद्देशेन व्रीहयो विधीयंते तथाप्युत्पत्तिशि
ष्टपुरोडाशविधानान्नतेषां साक्षाद्यागसाधनता किंतु पुरोडाशप्रकृतितया ततश्च व्रीहीणामपि पुरोडाशांग
त्वात् स्विष्टकृदिडाप्राशित्रचतुर्धाकरणषडवत्तद्रव्यजमानभागभक्षणरूपाणां शेषकार्याणामश्रुतशब्दैरिमा
णस्य च सर्वेषां पुरोडाशांगत्वान्नांगप्रधानकृतो विशेषः ॥ तेनाश्रुतशब्दपरिमाणस्य भूयसां शेषकार्याणां
चानुग्रहाय व्रीहिशास्त्रमेकं बाधितव्यं ॥ किंच प्रतिनिध्युपादाने व्रीहिशास्त्रस्य नात्यंतबाधोपि व्रीहिउपा
दाने हि शेषकार्याणामत्यंतलोपः स्यात् ॥ प्रधानांगभूतपुरोडाशजात्यभिव्यक्तिमात्रसमर्थेषु सत्स्वपि व्रीहि
षु शेषकार्य [illegible] नीवारा एवोपादेया इति पूर्वपक्षः ॥ सिद्धांतस्तु ॥ श्रुत्या तावदंगांगत्वमेव व्रीहीणा
मवगम्यते वस्तुतोपि तथा ॥ यद्यपि पुरोडाशप्रकृतित्वं व्रीहीणामवगम्यते ॥ तथापि तदवयवा एव पुरोडा
शमापन्ना यागद्रव्यं भवंति ॥ तेन च नीवारैरुपादीयमानेषु विगुणा भवंति ॥ ततश्च प्रधानमेव विगुणं स्या
त् ॥ तच्चानुपपन्नं ॥ तस्मात्प्रधानांगभूतपुरोडाशजात्यभिव्यक्तिसमर्थेषु व्रीहिषु सत्सु शेषकार्याण्यनादृत्य व्री
हिभिरेव पुरोडाशः कार्यो न शेषकार्यानुरोधेन नीवारोपादानमिति सिद्धं ॥ तदुक्तं मंडनेन ॥ द्रव्यवन्मात्रपर्याप्ति

प

मेवोपादेयमित्येवं प्राप्ते आह ॥ नसमत्वात् ॥ द्रव्यमेव प्रधानयोगीति यदुक्तं तन्न ॥ कुतः सम
त्वात् ॥ उभयोः सदृशत्वात् ॥ द्रव्यमपि प्रधानयोगि श्रुतत्वाद्गुणोपीत्येवं प्राप्ते उक्तमेव सि
द्धांतं दर्शयति ॥ गुणानुग्रहात् ॥ गुणेनानुगृहीतं विशेषितं द्रव्यमेव प्रधानयोगि ॥ गुणस्तु
तत्र विशेषणमात्रं विशेष्यं तु द्रव्यमेव ॥ अतो विशेषणविशेष्ययोर्विशेष्ये संप्रत्यय इति न्यायाद्द्रव्य
मेव गुणानुगृहीतं प्रधानयोगीति नैतदुभयं समं ॥ अत एवाग्निहोत्रे पुंवत्साया अग्निहोत्र्याः प्रय
सोऽभावे पुंवत्सत्वलक्षणं गुणं हित्वा स्त्रीवत्साया अप्यग्निहोत्र्याः पयसा होतव्यं ॥ एवं पाला
शानां परिधीनामभावे आर्द्रत्वरूपं गुणं त्यक्त्वा शुष्का अपि पालाशा ग्राह्याः ॥ बाहुमा
त्राणामसंभवे अबाहुमात्रा अपि ॥ एवं सर्वत्र ग्राह्यं ॥ यदा पुनः खदिरस्तनुत्वात् तक्षणादि संस्का
राणामयोग्यः ॥ नियोजनमात्रयोग्यः ॥ कदरश्च महान् संस्कारयोग्यस्तदा कस्योपादानमिति संदेहः
तत्र संस्कारक्षमकदरोपादाने खदिरविधेर्वैकल्यमात्रत्वे नात्यंतपीडाभावात् ॥ अक्षमखदिरोपा
दाने तु संस्कारविधीनामत्यंतपीडाप्रसंगात् प्रतिनिधिरेवोपादेयः ॥ मैवं ॥ न हि गुणानुरोधेन प्रधान

से

॥६४॥
॥देवया॰१

मुपरोद्धव्यं भवति ॥ तेन भवतु संस्काराणामत्यंतपीडा ॥ ननु प्रधानं तदनुरोधेन कथंचिदपि पीडयि
तव्यं ॥ तस्मात्तत्क्षणाद्यसंस्कृत एव खदिरे पशुं नियुंजीत ॥ ॥ तदुक्तं जैमिनिना ॥ द्रव्यसंस्का
रविरोधे द्रव्यं तदर्थत्वादिति ॥ यदा पुनर्मुख्यमलभ्यमत्वा प्रतिनिधिमुपादातुं प्रस्थितेनां तदा मु
ख्यं लब्धं तदा प्रतिनिधिः संकल्पितत्वात् ॥ मिथ्यासंकल्पदोषपरिहाराय मुख्यमनादृत्य प्रति
निधिरेवोपादेय इति प्राप्तेऽभिधीयते ॥ यथाशक्ति शास्त्रार्थं संपादयामीत्येवं शास्त्रार्थविषय एव
संकल्पः कर्तव्यो न तु प्रतिनिधिस्वरूपं संकल्पितव्यं ॥ न च मुख्ये विद्यमाने प्रतिनिधिः शास्त्रार्थो भव
ति समग्रानुष्ठानमशक्तानामसंत्यादि हि विकलांगानुष्ठानमपि शास्त्रीयं भवति ॥ न सत्यामिति ॥ तस्मा
न्मुख्यप्राप्तौ मुख्यमेवोपादेयं ॥ ॥ तदुक्तं जैमिनिना ॥ ॥ मुख्याधिगमे मुख्यमागमो हि तदभावा
दिति ॥ यदा पुनर्मुख्यं खदिरमलब्ध्वा प्रतिनिधिं कदरमुपादाय तत्क्षणादिषु कतिचित्संस्कारेषु कृ
तेषु वा कश्चिन्नियोजनात्प्राक् खदिरं लभते तदा किमुपात्तेन प्रतिनिधिना कार्यं कुर्यात् ॥ उत तत्यागेन मु
ख्यमेवोपादाय संस्कारांश्च पुनः कृत्वा तत्रैव पशुं नियुंजीतेति संशयः ॥ तत्रोपात्ते प्रतिनिधौ निवृ

॥६४॥
॥भाष्य॥

त्तव्यापारे शास्त्रं नान्यदुपादापयतीति तस्मान्न मुख्योपादानमिति प्राप्ते ब्रूमः ॥ नोपादानपरं शास्त्रं ये
न तस्मिन्कृते निवृत्तव्यापारं स्यात् ॥ प्रधानानुष्ठानार्थं शास्त्रं ॥ तच्च प्रधाने सति मुख्ये प्रतिनिधिना
क्रियमाणे विगुणं स्यात् ॥ अतः संस्कृतमपि कदरं हित्वा खदिरं संस्कृत्य तस्मिन्पशुर्नियोक्तव्यः
ये च कदरे कृताः संस्कारास्तेषां खदिरे आवृत्तिः स्यात् ॥ प्रधानवशेन गुणावृत्तेर्न्याय्यत्वात् ॥ एवं
पशुव्रीह्यादिष्वपि द्रष्टव्यं ॥ तत्रापि शक्त्यागान्मुख्यद्रव्यलाभे संस्कृतमपि पुरोडाशादिकं प्रतिनिधिद्र
व्यनिष्पादितं त्यक्त्वा मुख्यद्रव्येण पुरोडाशांतरं संस्कृत्य तेन यागः साधनीय इति ॥ तदुक्तं ॥ प्रवृत्तेऽपीति
चेदिति ॥ अथ यदा प्रतिनिधिना नियोजने कृते यदा मुख्यमुपलब्धं तदा कृतमपि नियोजनं साद्गुण्या
य पुनः खदिरे कर्तव्यमिति मन्वानं स्यात्तरं कृते नियोजने लब्धोऽपि खदिरोऽनर्थक एव नियोजना
र्थं हि तदुपादानं ॥ तच्च कृतं न गुणानुरोधादावर्तयितव्यं ॥ अतो नादर्तव्यः खदिरः ॥ ॥ तदुक्तं नानर्थ
कत्वादिति ॥ अथावास्तु तद्वयमिदं समकाधिकरणं ॥ प्रवृत्तेऽपि कृतेऽपि प्रधाने मुख्योपादानं स्यादिति
चेन्नानर्थकत्वात् इति ॥ ॥ अथेदं विचार्यते ॥ ॥ यान्येकप्रधानसंबंधीन्यंगकर्माणि किं तेषा

॥६५॥
॥देरया०१॥

न

नुष्ठाने कश्चित्क्रमनियमो नास्ति उत नास्तीति ॥ तत्र सूत्रेणैव पूर्वपक्षमाह ४ ॥ कर्मणामानुपूर्व्यं न
युगपद्भावात् ॥ आनुपूर्व्यं पौर्वापर्यं क्रम इत्यनर्थांतरं कर्मणामिति अन्वाधानादीनादीना
मंगकर्मणामनुष्ठाने आनुपूर्व्यं न भवति क्रमो न भवति कुतः युगपद्भावात् यतस्तान्यंगानि यदा प्रधा
नेनापेक्ष्यंते ॥ यदा युगपद्भावेनैव योगपद्येनैव सह एव संबंधं प्राप्नुवंति न क्रमेण ॥ ततस्तेषां नियतेन
क्रमेणानुष्ठानं ॥ अर्थनिर्वृत्तेश्च ॥ येन केन चित्क्रमेणांगानुष्ठाने क्रियमाणे अर्थनिर्वृत्तिरंगकलाप
निष्पत्तिः सुखेनैव भवति नियतक्रमेण क्रियमाणे तु नियतक्रमस्यानागतस्य वस्तुतः प्रतीक्षणेन विलंबा
त् बहुना कालेन स्यात् ॥ तथा सति प्रयोगप्राशुभावो न स्यात् ॥ अथ प्रत्यासत्त्या कालास्त्यंगानां विहितः ॥६५॥
अंगानां नियतक्रमेणानुष्ठाने च सोपि अतिक्रांतिः स्यात् इति ॥ तस्मादंगानुष्ठाने क्रमनियमो ने ॥भाष्य॥
ति पूर्वः पक्षः सिद्धांतमाह ॥ स्याद्वानुपूर्व्यनियमः श्रुत्यर्थक्रमेभ्यः ॥ वाशब्दः पूर्वपक्षनिरासार्थः
अन्वाधानादीनामंगकर्मणामानुपूर्व्यनियमः स्यात् अनुष्ठाने क्रमनियमो भवेत् ॥ नानियमः
केभ्यः प्रमाणेभ्यः श्रुतेः अर्थात् ॥ क्रमाच्च श्रुतेस्तावत् यथा द्वादशाहे तेषां गृहपतिः प्रथमो दी

क्षते अथ ब्रह्माणं दीक्षयति ॥ अथोद्गातारमथहो[illegible]पित्यादि ॥ नात्र ब्रह्मादीनां दीक्षा विधीयते ॥ यजमा
नत्वादेव तस्याः प्राप्तेः क्रमस्य त्वन्यतः प्राप्त्यभावात्त[illegible] विधीयते ॥ तथा तस्माद्दशमो गृहो गृह्यते इती
य एवं वषट्क्रियत इति अयमपि श्रुतिक्रम एव ॥ अर्थाक्षेप क्रमो वगम्यते ॥ तद्यथा पेषणसंपवनयोरवघातपे
षणयोश्च अग्निहोत्रं जुहोति यवागूं पचतीति क्रमेण श्रुते पि ॥ अर्थात्पूर्वं पाकस्ततो होम इति ॥ होमद्रव्या
ह्य यवागूः तदुत्पत्त्यर्थः श्रुत्यालिंगेन च पाकः ॥ स च पश्चात्क्रियमाणे नर्थकः स्यात् ॥ होमोप्यसति द्रव्ये न नि
वर्त्तेत ततः पश्चाद्धोमः कार्यः ॥ क्रमं पाठः क्रमः ॥ स च द्विविधः श्रुतिपाठक्रमो मंत्रपाठक्रमश्च ॥ उभयविधो
पि क्रमनियमे कारणं भवति उभय पाठो मंत्रपाठो नियतेन हि क्रमेण पदार्थविधिर्वर्त्तते ॥ तत्रैवमवगम्यते
येन क्रमेण पदार्थविधिपाठो मंत्रपाठश्च तेनैव क्रमेण अनुष्ठानमिति ॥ क्रमांतरेणानुष्ठाने त्ववगत
स्य क्रमस्य त्यागः ॥ अनवगतस्य क्रमस्योपादानमित्यसंगतं स्यात् ॥ तस्मात्पाठक्रमादपि क्रमनियम
मोंगकर्मणां भवतीति ॥ प्राकृतं च विकृतौ ॥ अतोपि कारणात्पाठक्रमेणांगकर्मणामनुष्ठानं भव
ति यतो विकृतौ प्राकृतमेव पदार्थानां क्रमं श्रुतिरनुवदति ॥ यथा महापितृयज्ञे सतत एव प्राकृतस्तत्र

॥ ६६ ॥
॥ दे.य.या. १

वि

यजुर्हरतीत्यादिनासयज्ञोपवीतीभूत्वाज्यानिगृह्णातीत्येवमंतेन॥ अत्राज्यग्रहणे यज्ञोपवीतित्वंविधिपरेवा
क्येप्रकृतंक्रमंदर्शयति॥ यदिपाठक्रमेणानुष्ठानंनस्यात्॥ तदातेनैवक्रमेणानुवादोनस्यात्॥ ॥ अपरेत्वन्य
थाव्याचक्षते॥ ॥प्राकृतंचविकृतौ॥ ॥विकृतौप्राकृतवैकृतयोःकर्मणोःसंनिपातेप्राकृतंपूर्वंकर्तव्यंपश्चा
द्वैकृतमिति॥ ॥तद्यथा॥ ॥प्रकृतौप्रास्यत्रणंचक्षुष्पाइत्यात्मानमालभतइतिप्रस्तरणेवप्रहरणेनतस्मा
त्मालंभउक्तः॥ तत्रपूर्वंप्राकृतंआत्मालंभोदकस्पर्शरूपंकृत्वापश्चाद्वाजिनयागःकर्तव्यः॥ तथाप्रकृतौह
विरादनोत्तरकालेहविरालंभात्मालंभोदकालंभाविहिताः॥ विकृतौचास्माद्यहवीष्यग्निंमंथतीत्यग्नि
मथनंहविरासादनोत्तरकालंविहितं॥ तत्रपूर्वंप्राकृताहविरालंभात्मालंभोदकालंभाःपश्चाद्वैकृतमग्नि
मथनं॥ एवमप्यासाद्यस्रुचोपशुपशृशुपराजानंप्रपादयतीत्येतदप्युदाहार्यं॥ अत्रापिपूर्वंप्राकृताहविरालं
भात्मालंभोदकालंभाःपश्चाद्वैकृतंसोमप्रमादनादि॥ तथापित्र्ययज्ञेपरिषेकात्प्रागिडाभक्षणमार्ज
नपवित्रप्रतिपत्तिदक्षिणादानान्यतएवसिद्धानि॥ स्तुत्यायांचसवनीयपुरोडाशानांनिर्वपणादूर्ध्वंभा
विनःप्रागलंकरणाद्येपदार्थास्तेषांप्राकृप्रचरणीहोमादतएवानुष्ठानंसिद्धं॥ अतएवपशौप्राकृतंपूर्वमि

॥ ६६ ॥
॥ भाष्य

त्यस्यबाधनाययत्नंकरोति॥ उत्तराघारमाघार्य[illegible]समनक्तीति॥ अत्रपूर्वमित्यनेनकृतध्रुवास
[illegible]मंजनात्पूर्वंपशुसमंजन[illegible]ति॥ तस्मात्समीचीनमेतद्व्याख्यानं॥ अथक्रम
प्रमाणानांविरोधेबलाबलंनिर्णीयते॥ अत्रपाठक्रमार्थक्रमयोर्विरोधोभवति॥ तद्यथासवैपर्णशा
खयायावत्सानपाकरोतितामाच्छिनत्तीतिपाठक्रमः॥ अर्थस्तुअनेनक्रमेणनसिध्यतिनह्यच्छि
न्नयावृक्षस्थयाशाखयावत्सापाकरणंकर्तुंनशक्यते॥ वत्सापाकरणायैवचच्छेदनमिति॥ त
त्रकिंपाठक्रमात्क्रमाध्यवसानमुतार्थक्रमादितिसंशयेसत्याह॥ ॥विरोधेर्थस्तत्परत्वात्॥ ॥पा
ठक्रमार्थक्रमयोर्विरोधेअर्थक्रमएवबलीयान्नपाठक्रमः॥ कुतः॥ तत्परत्वात्॥ पाठस्यार्थपरत्वा
त्॥ अर्थार्थत्वात्॥ कार्यसिध्यर्थत्वादित्यर्थः॥ तेनपूर्वंछेदनंपश्चाच्छिन्नयाशाखयावत्सापाकरणंकरण
मिति॥ अथयत्रश्रुतेः॥ श्रुतिपाठक्रमयोर्विरोधोभवतितद्यथासंस्थितेयज्ञेब्राह्मणांतर्पयितवैब्रू
यादितिश्रुतेः॥ कर्मणिसमाप्तेप्रैषंविदधातिपाठक्रमात्तुस्विष्टकृतःपश्चात्प्राशित्रावदानाच्चपूर्वमि
ति॥ तत्रकेनक्रमेणानुष्ठानमितिसंशयेसत्याह॥ ॥श्रुतिःक्रमादानुमानिकत्वात्॥ ॥क्रमादितिश्रु
तिपाठक्रमाच्छ्रुतिर्बलीयसीतिनश्रुतिप्रतीतक्रमेणैवसंस्थितेकर्मणिप्रैषोच्चारणं॥ नपाठक्रमे

॥६७॥
॥देवेया०१

ण ॥ कुतः ॥ आनुमानिकत्वात्पाठक्रमस्य अर्थात् श्रुतेः प्रत्यक्षत्वादिति ज्ञेयं प्रत्यक्षा हि श्रु
तिः संस्थिते युञ्ज इति पाठक्रमस्त्वनुमानं अतोनेन क्रमेण पदार्था अनुष्ठेया यतोनेनैव क्रमे
ण पाठ इति दुर्बलं च प्रत्यक्षादनुमानं अतः श्रुतिक्रमेणानुष्ठानमिति सिद्धं एवं तस्मादेषदक्ष
मो ग्रहो गृह्यते तृतीय एव वषट्क्रियत इति एतदप्यत्रोदाहरणं अयं किं श्रुतिमंत्रपाठे तृतीयस्थाने
गृह्यते उत श्रुतिबलाद्दशम इति तत्र श्रुतिबलात्तु दशमत्वमिति सिध्यति अथ यत्र चोदनापाठक्रम
स्य मंत्रपाठक्रमस्य च परस्परं विरोधो भवति यथाधिश्रयणे सोसावाज्यमधिश्रयति घृतं त्वधिश्रयणं
विधाय तदनंतरमेव तत्पुनरुद्वासयति ऊर्जे त्वेति चोदनापाठक्रमः मंत्रपाठे आज्याधिश्रयण
मंत्रानंतरं धर्मोसि विश्वायुरित्यादि यत्नीसंहनमंत्रांतमंत्रगणं पठित्वा आज्योद्वासनमंत्र ऊ
र्जे त्वेति पठितः पूर्वाधिकरणे हि क्रमात् श्रुतेः प्रत्यक्षत्वाद्बलीयस्त्वमुक्तं अत्रोभयोः प्रत्यक्षत्वा
त् किं चोदनापाठक्रमेणाज्योद्वासनं कर्तव्यमुत मंत्रपाठक्रमेणेति संशये सत्याह ॥ मंत्रचोद
नयोर्मंत्रबलं प्रयोगित्वात् ॥ मंत्रचोदनयोरिति मंत्रपाठचोदनापाठयोर्विरोधे मंत्रबलं मं

॥६७॥
॥शोध्य॥

त्रपाठ एव बलवानित्यर्थः ॥ कुतः ॥ प्रयोगित्वात् मंत्राणां मंत्रा हि कर्मकाले प्रयुज्यंते पठ्य
ते न च चोदनावाक्यानि अतो मंत्रपाठः पदार्थानां संनिकृष्टः चोदनापाठस्तु विप्रकृष्टः तथा हि
समिधो यजतीत्यनेन पदार्थो विहितः सोनुष्ठानवेलायां येन वाक्येन विहितस्तद्वाक्यं स्मा
रयति तेन वाक्येन स्मृतेनानुष्ठानवेलाया स्वपदार्थः स्मारितः सन्ननुष्ठीयत इतीतरेतरा
श्रयं स्यात् अर्थेन वाक्येन स्मार्यते वाक्येन चार्थ इति नैष दोषः सामान्यविशेषभेदात् सामा
न्येन हि दार्शिकं कर्मंगं कर्तव्यमित्यवगम्यते विशेषस्मरणार्थं विधायकं वाक्यमालोचयति तेन
चालोचितेन पश्चात्तदर्थविशेषः स्मारितोनुष्ठीयतेऽनुष्ठितश्चासौ कृतिरित्येव द्वितीयपदार्थं न
स्मारयति अर्थानां ग्रंथानपेक्षेण रूपेण पौर्वापर्यस्यानवक्लृप्तत्वात् किं तर्ह्यनुष्ठानोत्तर
कालं यासौ कृतस्तमालोचयति समिद्यागोयं कृतमिति स चालोच्यमानो येन समिधो य
जतीत्यनेन ब्राह्मणवाक्येन विहितस्तत्स्मारयति तच्च स्मृतं स्वानंतरं तनूनपातं यजतीत्ये
तत्स्मारयति कुतः पाठात् ततः परं हि तत्पठितमिति तद्ब्राह्मणे पुनः पदार्थं विदधाति विधि

॥६८॥
॥देवेया०१

एवं तस्य कार्यं न स्मृतिः अनुष्ठानवेलायां तद्देवब्राह्मणं विधिव्यापारं कृत्वा चिरनिवृत्तव्यापारं प्र
योगकालाद्बहिर्भूतं स्मारकमपेक्षितं ॥ अयं मंत्रपाठो ब्राह्मणपाठे विप्रकर्षः ॥ मंत्रः पुनरंतः क्रतुप्रयु
ज्यमानः परिसमाप्यमान उत्तरमंत्रं पर्युपस्थापयति स चोत्तरो मंत्रः पर्युपस्थाप्य उत्तरं पदार्थं पर्यु
पस्थापयन्नेव पर्युपतिष्ठते ॥ तस्मात्तत्रालोचनांतरापेक्षाभावात्रास्ति विप्रकर्षः ॥ एतदुक्तं भवति ॥ स्मा
रकक्रम एतावदनुष्ठानक्रमः ॥ न च मंत्रे अनन्यार्थे सति ब्राह्मणस्य स्मारकत्वं अप्रयुज्यमानतया साम
र्थ्याभावात् ॥ नहि निर्वपामीति वन्निर्वपेदिति पदमुच्चारितमनुष्ठानोपयिकमनुष्ठेयं प्रकाशनं करो
ति किंतु संबंधिमात्रतया प्रयोगबहिर्भूतं मदनेन वाक्येनेदं विहितं अत एतत्करोमीत्येवमालो
चनेनेन स्मारकं भवति मंत्रस्तु प्रयुज्यमान एवाभिधानत एव स्मारक इति संनिकृष्टः विप्रकृष्टा
च्च संनिकृष्टं बलवदित्येवं प्राप्त आह ॥ न समत्वात् ॥ मंत्रपाठ एव बलवानिति यदुक्तं तन्न
॥ कुतः ॥ समत्वान्मंत्रपाठचोदनापाठयोः कथमुभयोः समतोच्यते ॥ मंत्रः कर्मणि क्रि
यमाणस्य कर्मणः स्मरणार्थं प्रयुज्यते ॥ चोदनानु कर्मणो विधायिका प्रमाणयुक्तानि तेषां वि
न

॥६८॥
॥भाष्ये॥

रोधे दुर्बलाबलं चोक्तं ॥ अथेदं चिंत्यते ॥ यत्र बहूनि प्रधानानि सह क्रियंते ॥ यथा दर्शपूर्णमासयोरा
ग्नेयोपांशुयाजाग्नीषोमीयैंद्राग्नादीनि ॥ यथा चातुर्मास्यपर्वसु वाजपेयेतिरात्रपशुवशाषष्ठिसप्तदश
सु प्राजापत्येषु च ॥ तत्रारादुपकारकाण्यंगानि सर्वेषां तंत्रेण क्रियंते इति वक्ष्यकर्मणां युगपज्ञाव
स्तंत्रमित्यत्र ॥ तेन न तेषु क्रमचिंता सन्निपत्योपकारकाणि तु द्रव्यसंस्काररूपाणि प्रतिप्रधानं भेदेन क
र्तव्यानि ॥ तत्र चिंत्यते तानि किं एकैकस्य सर्वाणि कृत्वाऽपरस्य कर्तव्यानि ॥ किं वा समान एकैकः पदा
र्थः सर्वेषां कर्तव्य इति ॥ तत्रैकैकं प्रधानं अव्यवहितानि स्वांगान्यपेक्षते ॥ तत्रांगानां प्रधानकालत्वस्य न्या
य्यत्वादेकैकस्मिन् गुणकांडमपवृंज्यान् ॥ इतरथा हि पदार्थानुसमये सति स्वप्रधानाद्विप्रकृष्येरन्
यद्येकस्यासादनं कृत्वा परस्य तदेव क्रियेत तदा पूर्वस्यासादनस्यो व्यवायः स्यात् ॥ सहवचनं त्वारा
दुपकारकसाहित्यमात्रेणाप्युपपद्यते ॥ तस्मात्कांडानुसमय एवेति प्राप्ते आह ॥ तुल्यसमवायेसा
मान्यपूर्वमानुपूर्व्ययोगात् ॥ तुल्यसमवाये तुल्यानां प्रधानानां सहप्रयोगे द्रव्यसंस्काररूपाणि सं
नियत्योपकारकाण्यंगानि सामान्यपूर्वकर्तव्यानि ॥ पूर्वः पूर्वः पदार्थः सर्वेषां समानः सदृशः कर्तव्यः

॥६१॥
॥देवया०१

तद्यथा बहुषु हविष्षु प्रथमं सर्वेषां विभस्मीकरणं ततः सर्वेषां पात्रीस्थापनं । ततः सर्वेषां तत्रस्थाभि-
धारः । ततः सर्वेषां पात्रीषूपस्तारः । ततः सर्वेषां उद्वासनं । ततः सर्वेषां प्राणदानं । ततः सर्वेषां कपाला-
ञ्जनं । ततः सर्वेषां कपालोद्वासनं । ततः सर्वेषां वेद्यामासादनं । ततः सर्वेषामालंभः । इत्येवं पदार्थानुस-
मयः कर्त्तव्यः । यद्येकैकस्मिन्नु एकांडमपकृष्येत तथा सति क्रमेण प्रयोगात्प्रयोगवाक्यावगतस्य सा-
हित्यस्य बाधः स्यात् । न हि वचनेनाविशेषतः साहित्यमवगम्यमानं काल्पनिकेन प्राणसन्निमात्रे-
ण रादुपकारकविषयमात्रकल्पयितुं शक्यते तस्मात्पदार्थानुसमयः ॥ कुतः आनुपूर्व्ययोगात्प-
नुक्रमेण दार्थानां तन्मंत्राणां च । एवं क्रियमाणे पदार्था आनुपूर्व्येण प्रयुज्यंते तन्मंत्राश्च । अन्यथोत्तरपदार्थ
कांडमनंतरं पूर्वेषु क्रियमाणेषु आनुपूर्व्ययोगो न स्यात् । पौर्णमास्यां पौर्णमास्या यजेतेत्यनेन
वाक्येन पौर्णमासीशब्दबोध्यानां तत्संबद्धानां त्रयाणां यागानां सांगानामेककालप्रयोगोवगम्य-
ते । अतो यस्मिन्नेव क्षणे एकस्याधिश्रयणं कर्त्तव्यमापतति तस्मिन्नेवापरस्याधिश्रयणं कर्त्तव्यं सद
शक्यतया केवलं न क्रियेत । द्वितीये तु क्षणे न कश्चिद्धेतुर्येन पुरोडाशांतरं नाधिश्रीयेत । अतः प्रथमप

॥६१॥
॥देवया॥

दार्थं सर्वेषां कृत्वा ततो द्वितीयादिः पदार्थः सर्वेषां कर्त्तव्यः । एवं बहुषु प्रधानेषु सर्वत्र पदार्थानुसम-
य एवान्यापेक्षानकांडानुसमय इति स्थितं । यत्र तु प्रधानविरोधो भवति पदार्थानुसमये क्रियमाणे
तत्र कांडानुसमय एवेति । वाचनिकेन साहित्येन पदार्थानुसमयः प्राप्तोपि प्रधानविरोधात्त्यक्तव्य
: पुरोडाशांगं ह्यधिश्रयणादयः । तदंगत्वं क्रमः पदार्थानुसमयरूपः । तदाश्रयणे च सुतप्तकपालसं-
योगात् पुरोडाशशोषप्रसंगः न चांगानुरोधेन प्रधानबाधो युक्तः । तेनातिबहुषु हविःष्वेकैकस्य पुरो-
न डाशस्याधिश्रयणं प्रथममग्निरभिमर्शनं चेत्यंतं कांडानुसमयः कार्यः । यत्र तु नास्ति प्रधानबाधः द्वि-
त्रिचतुरादिहविःषु तत्र भवतु पदार्थानुसमयः दाहसंभवशंकायां तु उद्वासनमपि व्युत्क्रमेण कार्यं । य-
दुक्तं पूर्वस्य पदार्थे कृते तस्मिन्नेव द्वितीयस्य क्रियमाणे पूर्वस्य व्यवधानमिति तत्सहत्वविधिबलात्प-
रिह्रीयते । एवं च सति वाजपेये आग्नेयेंद्राग्नसारस्वतीवशापृश्निसप्तदशप्राजापत्यपशुद्वाविंशतिसंख्ये-
षु पशुष्वेकैकविंशत्या पदार्थैः समानासमानजातीयैर्व्यवधानमिष्यते । नन्वधिकैः । अन्ये त्वसमा-
नजातीयैरेवाव्यवधानेनैव मुख्यक्रमप्रावृत्तिकक्रमावुक्तौ भवतः ॥ तथाहि । यत्र बहूनि प्रधानानि भवंति

॥७०॥
॥देवया०१

तत्रयोर्मुख्यानांप्रधानानांक्रमस्तेनैवक्रमेणतदंगानांक्रमोभवति॥ यथापौर्णमासेष्ट्यांप्रथममाग्ने
ययागः॥ ततोग्नीषोमियागः॥ अतआग्नेयस्यप्रथमंग्रहणं॥ ततोग्नीषोमीयस्य॥ एवंप्रोक्षणादावपि
अयंमुख्यक्रमः॥ अनेनक्रमेणयद्यंगान्यनुष्ठीयंतेतदंगानांनियताप्रधानप्रत्यासत्तिरनुगृहीताभव
ति॥ एवंच्चांगप्रधानयोर्यावदनुज्ञातमेवव्यवधानंभवति॥ इतरथापश्चाद्भाविनःप्रधानस्यप्रथममंगे
क्रियमाणेप्रधानेनात्यंतंव्यवहितंस्यात्॥ अथप्रवृत्तिक्रमउच्यते॥ यत्रबहूनिहवींषिभवंतिसमान
देवतानियथावाजपेयेपशवः॥ तत्रचोपाकरणप्रोक्षणादयःसंनिपातिनःप्रतिपश्वावर्त्तनीयाः॥ तेषां
चावृत्तिरेकस्यपशोःकार्त्स्न्येनकृत्वापरस्यापितथैवक्रियतइत्येव॥ किंतर्हिसर्वेषामुपाकरणंयतः
कुतश्चित्पशोरारभ्यकृत्वाततःसर्वेषांनियोजनमित्युक्ते॥ तत्रप्रथमेपदार्थेउपाकरणेअनियमएव
वयतःकुतश्चित्पशोरारकर्त्तव्यः॥॥ द्वितीयश्चपदार्थोनियोजनरूपःकिंप्रथमोयतआरब्धःतत्रैवारंभ
णीय॥ उततत्राप्यनियमएवेतितत्रक्रमनियमकारणानांश्रुत्यर्थपाठानामभावादनियमेप्राप्तेउच्यते
प्रवृत्त्यैवनियमः॥ प्रथमःपदार्थोयेनक्रमेणकृतःसएवक्रमउत्तरेष्वपिनियोजनादिषुनियम्यते॥ कुतःप

॥७०॥
॥भाष्य॥

दार्थैःसहप्रधानंकर्त्तव्यमितिवचनात्सर्वपदार्थैःप्रधानकालान्तरविप्रकृष्टव्याः॥ कथंपदार्थैःसह
प्रधानस्यवचनंपावतादर्शपूर्णमासाभ्यांयजेतप्राजापत्येश्चरंतीत्यादिषुप्रधानमात्रंश्रूयते
॥उच्यते॥ समीहितंद्यागेनेत्यमितिहियजेतेत्यस्यार्थः॥ तत्रपस्यामेववेलायांस्वर्गभवनेकर्तृत्वं
प्रतिपद्यते तस्मिन्नृहूणकरणेतिकर्त्तव्यतेअपिन्याप्रियेते॥ अयमर्थः॥ नात्रप्रधानंकर्त्तव्यंश्रूयतेकिं
तुप्रधानेनस्वर्गकार्यइतिकरणविभक्तिनिर्देशात्यागेनेष्टंकार्यमस्मिन्कालेकुर्यादितितेनस्वकार्ये
सतिकर्त्तव्यताकेनकर्त्तुंशक्यते॥ नान्यथा॥ तस्मात्त्रितयस्यफलकरणेतिकर्त्तव्यत्वस्ययुगपद्यज्ञेतेस
नेनकर्त्तव्यताच्यते॥ ततान्यथाकरणेतिकर्त्तव्यतात्वमेवनस्यात्॥ नहिपश्चाद्भाविकरणंभवतितथाभ
विष्यतिभावेभूतेचकरणेअसावेवदोषः॥ नहिविनष्टंकरणंभवतीतितथाकरणेतिकर्त्तव्यतयोरपि
मिथोविप्रकर्षेअयमेवदोषः॥ नहिविनष्टमनागतंवानुग्राहकंभवति॥ तेनशब्दवस्तुभ्यामेककालतेषां
त्रयाणां ततः॥ प्रधानेसतिकर्त्तव्यताकेएकस्मिन्नृहूणेसहकर्त्तव्येप्राप्तेसत्यकःकर्त्ताबहूनिप्रधा
नानिइतिकर्त्तव्यतांवाअसमर्थः॥ कर्त्तुंयोगपद्येनेत्यवश्यंभाविकीयानपिविप्रकर्षः॥ ईदृश्येनापि

॥७१॥
॥देयया०१

विप्रकर्षेणसहैवपदार्थाः कृताभवंतिप्रयोगवचनोहियावतःपदार्थाननुष्ठापयतितावद्भिरवर्जे
नियतयायावात्कालोव्याप्यतेतावानेकःकालः॥तावतिचकालेसर्वेषांकालोविधीयते॥नत्वेकस्मि
न्क्षणेऽशक्यार्थविधिप्रसंगात्तेनप्रत्यासत्तिरेतेषांसाहित्यंनेकक्षणवर्त्तित्वं॥यद्येवंप्रयोगव
चनेनैवक्रमस्यसिद्धत्वाच्छ्रुत्याभिःकिंक्रियते॥अनियतक्रमेणानुष्ठानंप्राप्नोतीतिक्रमनिय
मेतेषांव्यापारः॥यस्मात्प्रयोगविधिर्नैकक्षणवर्त्तित्वंविधत्तेकिंतुप्रत्यासत्तिमात्रंतस्मात्प्रधानं
चिकीर्षितंअनागतंकृतंवातेषांप्रधानार्थानांमनुष्ठापकंकरिष्यमानेनाकृतेनवाप्रधानेनप्रत्या
सत्तिमात्रमंगानांनतत्साहित्यंनैकक्षणवर्त्तित्वंतत्राग्यन्वाधानादीनांकरिष्यमाणंप्रधानंनिमित्तं
स्विष्टकृदादीनांतुकृतं॥तेनैवमवश्यंभाविनिविप्रकर्षकेचित्पदार्थाःक्षणस्यहिताःप्रधानेनापे
क्षितेकेचिद्वाभ्यांक्षणाभ्यांव्यवहिताःकेचिद्बहुभिरिति॥एवंवाजपेयपशुष्वपिअग्न्यन्वाधानादि
प्रागुपाकरणात्साधारणंसर्वपशूनांसकृत्कृतंउपाकरणादयोपिसंनिपत्योपकारकास्तत्रै
णविभवादावर्त्तयितव्याअपिसाहित्येनैवपशुभिरनुभवितव्याः॥यदेकस्योपकरणं॥तदेवतेषा

मपि॥कुतः॥सहचोदितत्वात्पशूनांसांगानां॥तत्रैवंसहानुभवितव्येसतियस्यपशोःप्रथममुपाकर
णंक्रियतेतस्यप्राकृतेनपाठेनपद्यपिद्वितीयःपदार्थोनियोजनरूपउपस्थाप्यतेतथापिसहव
चनादेवएकविंशतिक्षणव्यवहितंद्वितीयंपदार्थमाकांक्षतिद्वितीयस्तुपशुःविंशत्योपाकरण
क्षणैर्व्यवहितमेकेनप्रथमस्यपशोर्नियोजनक्षणेनचव्यवहितंस्वीयंद्वितीयंपदार्थमाकांक्षति॥ए
वंतृतीयादयोपिपशवःसजातीयविजातीयव्यवहितानात्मीयान्पदार्थानपेक्षंते॥अंत्यस्तुविजा
तीयैःपूर्वोपाकृतानांएकविंशतेःपशूनांनियोजनक्षणैर्व्यवहितमेवद्वितीयंपदार्थमपेक्षते॥त
देवंसंनिपत्योपकारकानालोच्यईदृशीएकविंशतिक्षणव्यवधानापेक्षाप्रधानानांभवति॥ततश्च
यावद्भिर्नोव्यवहितःशक्यःपदार्थःकर्त्तुंतावद्भिर्व्यवधानमगत्यावश्यंकर्त्तव्यंअतोभ्यधिकैस्तु
नव्यवधातव्यं॥यद्येकंपदार्थमेकस्यकृत्वाद्वितीयोपिपदार्थस्तस्यैवक्रियेततततःसहवचनंनोपपद्य
तेएवंसर्वत्रतृतीयादिष्वपिपदार्थेषुयोज्यं॥प्रथमपदार्थक्रमएवद्वितीयादिष्वपिसमाश्रयितव्यः॥इत
रथाकेषांचनबहून्यप्यधिकैरपिक्षणैर्व्यवहितानिस्युः॥नचतद्युक्तं॥नन्वेवंकेषांचिदल्पैर्व्यवधा

॥७१॥
भक्षादे॥

॥७२॥ ॥देवया०१

नंगुणोभविष्यतीतिवाच्यं॥ यथाधिकैर्व्यवधानेऽकृतस्यकरणं॥ एवंन्यूनैरपिव्यवधानेऽकृतकरणमेव
तस्माद्द्वाविंशतेःपशूनांसाहित्यसंपत्त्येयप्रयोगविधिनायःक्रमःपदार्थानांमिथएकविंशतिक्रमेणव्य
वधानात्मकोपेक्षितसन्यूनैरधिकैश्चव्यवधानेबाध्यते॥ अतःसर्वेषांतुल्यप्रत्यासत्तिसिद्ध्येप्रथमपदा
र्थक्रमएवद्वितीयादिष्वाश्रयणीयइतिसिद्धं॥ अत्रांगानांमिथःप्रत्यासत्तिनियमकारणंमुख्यक्रमे
णअंगानांप्रधानप्रत्यासत्तिरितिविशेषः॥ मुख्यक्रमप्रवृत्तिक्रमयोर्विरोधेचमुख्यक्रमोबलीयान्
तद्यथा दर्शपूर्णमासयोःसान्नाय्यधर्माःशाखाछेदनाद्याःपूर्वंप्रवर्त्तंते॥ पश्चादाग्नेयधर्माः॥ प्रधानंत्वा
ग्नेयस्यप्रथमं॥ पश्चात्सान्नाय्यस्य॥ ततःस्विष्टकृदवदानंप्रयाजशेषाभिघारणंप्राणदानंवेद्यामासाद
नादिकंचकिंप्रवृत्तिक्रमात्सान्नाय्यस्यपूर्वंभवतिउतमुख्यक्रमादाग्नेयस्येति॥ संदेहादनियमेप्राप्तेमुख्य
क्रमोबलीयानितिमुख्यते [illegible] अस्मिन्नाश्रीयमाणेअल्पीयांसःप्रथमपदार्थाःप्रधानाद्वि
प्रकृष्यंते अन्येसर्वेसंनिकृष्टाभवंतिप्रवृत्तिक्रमेतुबहूनांविप्रकर्षः॥ पूर्वंतुमुख्यप्रवृत्तिभ्यांबलीयसा
पाठक्रमेणमुख्यक्रमोबाध्यते॥ प्राणदानादिषुतुपाठक्रमाभावात्प्रवृत्तिक्रमेमुख्यक्रमेणबाध्यते॥

॥७२॥ ॥भाष्ये॥

प्राणदानादिषुतुपाठक्रमाभावात्प्रवृत्तिक्रमोमुख्यक्रमेणबाध्यते॥ ॥अथस्थानप्रमाणमुच्यते
॥ ॥साद्यस्क्रेसहपशूनालभतइतिश्रूयते॥ साहित्यंचसवनीयस्यस्थाने॥ तत्रकिंउपाकरणादौअनियमः
अथवाग्नीषोमीयस्यप्रथममुपाकरणं॥ अथवासवनीयस्येति॥ तत्रनियमकारणाभावादनियमेप्राप्तेप्रकृ
तिवदग्नीषोमीयस्यप्राथम्येप्राप्तेउच्यते सवनीयस्यैवप्रथममुपाकरणं॥ अग्नीषोमप्रणयनानंतरंह्यग्नी
षोमीयस्यस्थानं॥ सतेनोपस्थितोपिसहालंभवचनेनतस्मात्स्थानाच्चालितत्वादननुष्ठितोत्रतुनतस्यकिं
चिदुपस्थापकमस्ति॥ सवनीयस्तुस्वस्थानादस्खलितःसन्नाश्विनग्रहणादुपस्थिततत्वात्तदनंतरमुपा
क्रियते॥ ततःसादित्यवचनादितरयोराकरणंअतःसवनीयस्यैवप्राथम्यं॥ इतरयोस्तुकथंक्रमः॥ अनियम
एवतयोरुपस्थानेविशेषाभावात्॥ अथवाप्रकृतिदृष्टंपौर्वापर्यमसतिबाधेनुग्राह्यं तद्यमित्यग्नीषोमी
यमुपाकृत्यानूबंध्योपाकरणमिति॥ तदेवंश्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिसंज्ञानिषट्प्रमाणानिक्र
मनियमकारिणिउक्तानितेषांपरस्परविरोधेचपूर्वंपूर्वंबलवदुत्तरमुत्तरंतुदुर्बलमिति॥ तदुक्तं॥ श्रुत्य
र्थपाठस्थानमुख्यासत्तिप्रवृत्तिभिः॥ एकास्मात्ग्रहीतानांनियतःक्रमणोविरोधेपरदौर्बल्यमेतेषा
क्रम

मपिपूर्ववदिति ॥ अथेदं विचार्यते ॥ दर्शपूर्णमासयोराग्नेयाग्नीषोमीयनिर्वापयोः पदार्थानुसमये स्थिते किमेकै
कमुष्टिनानुसमयः उत चतुर्मुष्टिभिरिति ॥ तत्र यद्येकैको मुष्टिः पृथक्पृथक्पदार्थः ततएकैकेनानुसमयः ॥ अथ
चतुर्मुष्टिनिर्वाप एकः पदार्थस्ततश्चतुर्भिर्मुष्टिभिरिति ॥ एवं कपालोपधाने किमेकेन कपालेनानुसमयः
॥ उताष्टाभिरेकादशभिश्चेति ॥ तथा द्विरवद्यति द्विर्द्विर्हविरवमनक्ति त्रिरुत्तरमिति ॥ वपने च दक्षिणोत्तरगोदा
ने पावने च त्रिः पावयतीति ॥ किं प्राप्तं एकैकमुष्टिनेति ॥ कुतः ॥ एकैकमुष्टिनिर्वापो ह्येकः पदार्थः न चतुर्मु
ष्टिनिर्वापः ॥ कथं ॥ एकस्मिन्मुष्टौ निरुप्ते प्रयत्नः ॥ पर्यवसितो भवतीति न शक्यं वदितुं किंचिन्न निरुप्तमिति
॥ न च निरुप्ते चत्वारः संभवति मुष्टिसमानाधिकरणो हि चतुःशब्दः ॥ तस्मान्मुष्टिनानुसमयः कार्यः ॥

एवं कपालान्युपदधातीति ॥ निर्वापो न कृतः स्यात् ॥ न च मुष्टिमात्रेण निरुप्तेन न प्रयोजनं ॥ नह्येकस्मि
न्ननिरुप्ते ॥ तत्राप्येकैककपालेनानुसमयः कार्यः ॥ एकैकेनावदानेन सान्नाय्यसवनीयादौ ॥ अद्व्यंज
ने एकैकवारांजनेन ॥ वपने नैकपालजमानके एकैकगोदानसंस्करणेन ॥ पावने वा नैकयजमानक एव
एकैकवारपावनेनेति ॥ तदुक्तं जैमिनिना ॥ मुष्टिकपालावदानाभ्यंजनवपनपावनेषु चैकैकेनेति ॥ एवं

प्राप्त आह ॥ नैककर्मणि संबंधात् ॥ एककर्मणि एकस्मिन्निर्वापकपालोपधानादिरूपे कर्मणि प
दार्थे तदवयवेन एकैकमुष्टिना एकैककपालोपधानरूपेणानुसमयो न भवति ॥ किंतु चतुर्मु
ष्टिभिः अष्टभिरेकादशभिश्च कपालैः ॥ नह्येकैको मुष्टिः पृथक्पदार्थः ॥ किं तर्हि चतुर्मुष्टिनिर्वाप एकः
पदार्थः ॥ कुतः ॥ संबंधात् ॥ चतुःशब्दस्य मुष्टीनां च निर्वापसंबंधात् ॥ एवं च सह कर्मणानेकगुण
विधानं न्याय्यं इतरथा चतुःसंख्यायामुष्टिसंबंधे मुष्टीनां च निर्वापसंबंधे सति वैरूप्यलक्षणो
वाक्यभेदः प्रसज्येत ॥ अनिर्वापांगं च संख्या स्यात् ॥ वैरूप्यं चैवं ॥ चतुरो मुष्टीन्निर्वपतीत्यत्र नि
र्वापं प्रति मुष्टीनामुपादेयत्वविधेयत्वं अंगत्वं चेति त्रिकं संख्यां प्रति च तेषां उद्देश्यत्वं अनुवा
द्यत्वं प्रधानत्वं चेति ॥ एतत्परस्परविरुद्धत्रिकद्वयं मुष्टीनामापद्यते ॥ तस्मात्संख्याया मुष्टीना
चोभयोर्निर्वपतिनैव संबंधः ॥ ये चत्वारस्ते मुष्टयः ॥ ये मुष्टयस्ते चत्वार इति परस्परव्यवच्छेद्य
व्यवच्छेदकभावोऽरुणैकहायनीन्यायेन द्रव्यस्य गुणावच्छेदकत्वेन गुणस्य च द्रव्यावच्छेदक
त्वेनार्थाद्भवति ॥ न तु वाक्यात्तेन वाक्यभेदो न भवति ॥ तस्माच्चतुर्मुष्टिनिर्वाप एकः पदार्थः अंगप

॥७४॥
॥दर्भया०९

र्यायो हि पदार्थशब्दस्तेन ययोः प्रधानयोः सहानुष्ठानं तयोर्यदंगं तदेकस्य कृत्वा परस्य कर्त्तव्यं ॥ चतुरो मुष्टीन्निर्वपतीति शास्त्राच्चतुर्मुष्टिर्निर्वापो यागं स च पदार्थः ॥ तदवयवश्चैको मुष्टिः न दार्थः न चावयवेनानुसमयः किंतु पदार्थेन एवं कपालोपधानादिष्वपि अष्टाकपालमेकादशकपालं नि

मु१

र्वपतीति निर्देशात्तावता [illegible] धानमेकैकः पदार्थः ॥ द्विरवद्यतीति त्रिरभ्यक्तो दक्षिणेन त्वरगो दानवपनेत्रिः पावयतीति च ॥ एवं च संख्यादीनां क्रियांगत्वं च भवति तस्मात्समुदायेनानुसमय इति सिद्धं एवं सर्वत्र पदा र्थानुसमये प्राप्ते क्वचिदपवादं कांडानुसमयमाह ॥ ॥ ग्रहणसादनावदानप्रदानेषु तु वचनात् ॥ सोमे ग्रहाणां गृहणे एकैकस्य ग्रहस्य ग्रहणं सादनं तं कर्त्तव्यं ॥ अनेकहविष्के चावदानप्रदानां तं कर्त्तव्यं ॥ वचनात् ॥ वचनं च ऐन्द्रवायवादीनां सादनांते पठित्वा अतो गृह्णाति वायं वां मित्रावरुणेति अयं मथिनं गृ ह्णातीत्यादिकं ॥ वृष्ट्यर्थं सिद्धा दशाहे ग्रहग्रहे तं गृहीत्वा न सादयतीत्ययं साधनप्रतिषेधश्चान्यत्र ग्र हणानंतरं तत्कालमेव सादनं बोधयति ॥ वरुणप्रघासादिषु चानेकहविष्केष्ववदानस्य प्रदानां तता सर्वेषु प्रधानयागेषु पृथक् पृथक् श्रूयते ॥ तु शब्दो विशेषार्थः ॥ एवं सर्वत्रावदानप्रदानेनैव प्राप्ते आह ॥

॥७५॥
॥काष्ठ्य॥

न द्रव्यभेदे गुणयोगादिति वात्स्यः ॥ ॥ वात्स्य ऋषिरित्याह ॥ द्रव्याणां पुरोडाशचरुसान्नाय्यप श्वादीनां भेदे पृथग्भावे नानात्वे वहुत्वे सत्यपि देवता च तत्समाना भवति यामुद्दिश्य तानि त्यज्यंते तर्हि अवदानं प्रदानं तं न भवति ॥ किंतु सर्वाणि क्रमेणावदाय सहैव तेषां प्रदानं कार्यमित्य र्थः ॥ कुतः ॥ गुणयोगात् ॥ द्रव्याणां यागं प्रति गुणत्वेन संयोगात् ॥ अंगत्वेन संबंधात् ॥ प्रधानं हि यागः द्रव्याणि चांगभूतानि ॥ तत्र यागश्चेन्न्यायेन सहैव सिद्ध्यति तदायद्यवदानं प्रदानांतं क्रि येत तर्हि गुणानुरोधेन प्रधानावृत्तिः कृता भवति न चासा विष्यते ॥ तस्मात्तत्रावदानं प्रधानां तं न कर्त्त व्यं किंतु सर्वाण्यवदाय सह प्रदेयानि ॥ नद्यथा ॥ दर्शेष्टौ दधिपयसोर्यागे ॥ सर्वस्विष्टकृद्यागे चानेकहविष्के सप्त दशसु प्राजापत्येषु च ॥ ॥ अथेदं विचार्यते ॥ ॥ किं दर्शपूर्णमासचातुर्मास्यपश्वादिके प्रारब्धे अपरिसमाप्ते च सति नि पतस्य नियतकालस्याग्निहोत्रपिंडपितृयज्ञादेः काले आगते सति किं तन्मध्य एव तत्कर्म कर्त्तव्यमिति ॥ यद्यपि वात्र प्रयोगयोः प्रारब्धकर्माग्निहोत्रयोर्न मिथः क्रमोंऽग ॥ तथापि सायंकाले द्वयोः संनिपतितयोरवश्यंभा विनि क्रमे प्रारब्धं समाप्य अग्निहोत्रे हूयमाने तस्य स्वकालातिपत्तिप्रसंगे सति किं युक्तमिति चिंत्यते ॥ तत्रे

भिन्न

॥७५॥
॥देवया० १

ष्टिं पश्चादिकं च स्वकालादूर्ध्वं पन्नमेव ॥ तस्योभयथापि न कश्चिद्विशेषः ॥ अग्निहोत्रस्य तु तस्मिन् काले क्रियमा
णस्य उद्धरणस्य लोपस्यात् उत्कर्षे तु काललोपः तत्र कस्यानुग्रहः कस्य लोप इति चिंत्यते ॥ तत्रोद्धरणानुग्रहे सां
गस्य योगावधारणे त्वंकालप्राप्तेः कालस्य जघन्यत्वेन बाधः प्राप्नोति ॥ किंच पूर्वस्य व्यवधानं च स्यान्मध्ये क्रि
यमाणे ॥ तस्मात्कालबाध इति प्राप्ते आह ॥ प्रवृत्ते नियतं दोषविशेषात् ॥ प्रवृत्ते प्रारब्धे इति पश्चादि
के कर्मणि नियतस्य काले आगते नियते नियतकालीनमग्निहोत्रपितृयज्ञादिकं तन्मध्य एव कुर्तव्यं ॥ काल
स्यानुपादेयत्वेन निमित्तत्वात्तस्मिन् प्राप्तमग्निहोत्रं उद्धरणमनादृत्यापि कर्त्तव्यं ॥ कुतः ॥ दोषविशेषात् ॥ यतो
नित्याकरणे दोषो भवति ॥ ननु पूर्वस्य कर्मणो व्यवाधानेपि दोषोस्त्येव ॥ सत्यं ॥ अक्रियमाणे तु विशेषेण य
तो नित्यकर्मणः प्रधानरूपस्याक्रियेति ॥ क्रियमाणे पुनरंगभूतानां पदार्थानां व्यवधानमात्रं न नु कस्यच
न लोपः अत एवोक्तं दोषविशेषादिति ॥ अपि वा संबंधेन व्यवधानेपि दोषः ॥ तस्मान्नियकालीनं कर्म मध्ये
पि कर्त्तव्यं ॥ अथेदं विचार्यते ॥ ज्योतिष्टोमे षोडशीनं प्रकृत्याम्नायते तं परांच मुक्थेभ्यो विगृह्णाती
ति ॥ तथेदमपरं श्रूयते ॥ तवे पुरास्तमयादुपाकरोत्यस्तमिते तु शा७ सतिशाखांतरे च समयाध्युषिते षोड-

॥७५॥
॥भ्या॥

शिनः स्तोत्रमुपाकरोतीति ॥ एवं सति यदि दैवादुक्थानामुत्कर्षः स्यात् ॥ तदा किं षोडशिनोत्कृष्यते ॥ उक्थेभ्यः
पूर्वमपि प्रागस्तमयात्षोडशिन उपाकरणं कर्त्तव्यं ॥ अथवोक्थोत्कर्षे सति षोडश्यप्युत्कृष्यते उक्थविग्र
हेभ्यः पर एव भवतीति ॥ तत्र पूर्वाधिकरणोक्तन्यायेन नियकालत्वादनुत्कर्षो युज्यते ॥ तथा सति स्तोत्रस्य
कालो नुगृहीतो भवति ॥ यदि हि षोडशिग्रहयागाभ्यास उत्कृष्येत ॥ ततः प्रधानकालत्वादंगानां गृहे ग्र
हीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति वचनात्तदंगभूतं स्तोत्रमप्युत्कृष्येत ॥ तत्र पुरास्तमयादिति वि
हितः कालो बाध्येत ॥ नन्वनुत्कर्षपक्षेप्युपरिभावो बाध्येत ॥ बाध्यतां ॥ क्रममात्रहितत्कालस्तु बलीयानि
त्युक्तं तस्मादनुत्कर्ष इति प्राप्ते आह ॥ षोडशिनित्वानुपूर्व्यं भूयस्त्वात् ॥ तु शब्दः पूर्वाधिकरणसिद्धांता
च्छेदः षोडशिनि तु अनुत्कर्षो न भवति ॥ किंतूत्कर्ष एव ॥ कुतः ॥ आनुपूर्व्यभूयस्त्वात् ॥ आनुपूर्व्यं क्रमस्य
भूयस्त्वात् महत्त्वाद्बलवत्त्वादित्यर्थः ॥ कथं ॥ तं परांच मुक्थेभ्य इति वचनात् षोडशियागाभ्यासस्यो
क्थेभ्य उपरिभावो गं सोनुत्कृष्यमाणे प्रधानांगसह्यो बाध्येत ॥ न च तदुक्तं ॥ अतोंगभूतस्तोत्रांगस्येव काल
स्य बाध इत्युत्कर्ष एव षोडशिन इति सिद्धं ॥ निःसंदिग्धं च स्तोत्रस्य संनिहितग्रहयागांगत्वं ॥ तथा चो

॥७६॥
॥देवयो०१

क्रं पंचमस्य प्रथमपादांत्याधिकरणे तत्र रत्ने ॥ न ग्रहणक्रमानुग्रहार्थं उत्कर्षो विधीयते किंतर्हि याग
क्रमानुग्रहार्थं ॥ तस्य च स्तोत्रं प्रति प्राधान्यमविवादं अतस्तस्य यागाभ्यासस्य कालेनांगस्य स्तोत्रस्य
कालो बाध्यत इति युक्त एवोत्कर्ष इति ॥ किंच ॥ अनुत्कर्षे षोडशिनो वैगुण्यं उद्ग्रहणं च ॥ उत्कर्ष
त्वे कस्य षोडशिन इति ॥ अतोपि उत्कर्ष एव ॥ इदानीमिदं चिंत्यते ॥ अथैवं स्वाध्यायविहिते पाठक्रमार्थ
वत्वाद्यागेषु समिदादिषु क्रमनियमः ॥ तथा क्रत्वंतरेष्वपि ॥ तद्वाक्यानामपि हि विवक्षितक्रममेवाध्य
यनं स्वाध्यायविधीनाविधीयते ॥ तस्य च प्रयोजनांतरं नास्त्यतः क्रमानुष्ठानात् ॥ तस्मात्क्रमत्वं त
राणामपीष्टिपशुसर्वसोमयागादीनां पाठक्रमेणानुष्ठानमिति पूर्वपक्षः ॥ सिद्धांतमाह ॥ अनि
यमः फलसंयुक्तेषु ॥ फलसंयुक्तेषु प्रधानकर्मसु इष्टिपशुसोमयागाद्यात्मकेष्वनुष्ठाने अनियमः
क्रमनियमो न भवतीत्यर्थः ॥ तत्र काम्येषु तावत् न क्रमनियमः ॥ अनियमेन हि कामा उत्पद्यंते तेषां
च नास्ति क्रमः ॥ न हि ते वाक्यक्रमेण नियंतुं शक्यंते ॥ वस्तुस्वभावस्य निरंकुशत्वात् ॥ अतो नियत क्र
माः कामाः कर्मणां नियमं प्रतिपादयंतीति तद्बलेन पाठक्रमस्य बाधः ॥ अपि च ॥ क्रतूनामनंगत्वाद

॥७६॥
॥भाष्यं॥

कप्रयोगवचनाभावाच्च नास्ति क्रमः ॥ यदि च क्रतवः परस्परस्यांगं भवेयुः यदि वा सर्व एते न्यस्य
कस्यचित्समिदादिवदंगं स्युः ॥ यदि वा सत्यंगत्वे आग्नेयादिवदेकप्रयोगवचनपरिगृहीताः स्यु
स्ततः सर्वेषां सहानुष्ठाने बाधयन् प्रयोगविधिः क्रमनियममन्यतोपेक्षमाणः पाठनियामकत्वे
न गृह्णीयात् ॥ न त्वेतदस्ति ॥ न च पाठः स्वयमेव क्रमविधायकः अविधायकत्वात् ॥ स्वाध्यायविधिर
पि यत्येन शक्यते कर्तुं तत्रैव नियुक्ते ॥ पाठक्रमश्च प्रयोगवचनाकांक्षितक्रमनियममात्रं श
क्नोति कर्तुं न क्रमं विधातुं तस्मादिन्न प्रयोगवचनपरिगृहीतानां न पाठतः क्रमनियम इति सि
द्धं ॥ तर्हि पाठक्रमः किमर्थ इत्यत आह ॥ क्रमो विध्यर्थः कर्मण्येवसंभवात् ॥ क्रमो विध्यर्थः विद्या
नार्थो जपपारायणाध्यापनादिष्वेन नैव क्रमेण पठनार्थः ॥ नानुष्ठानार्थः कुतः सर्वस्वारात्परे कर्मण्य
संभवात् ॥ पाठक्रमेणानुष्ठानासंभवात् ॥ यतः सर्वस्वारो मरणकामस्य विहितः ॥ यदि पाठक्रमेणा
नुष्ठीयेत तर्हि सर्वस्वारेण मरणेसति कथं ततऊर्ध्वं कर्मणि कर्तुं शक्यंते ॥ तस्मात्क्रत्वनुष्ठाने क्र
मनियमो न भवतीति सिद्धं ॥ इदानीमिदं विचार्यते ॥ किमवत्तस्याहुतस्य द्रव्यदानमात्रस्य नाशे ह

सिद्धे

विरंतरमुत्पाद्यं उत तस्मादेव हविःशेषात्पुनरवदेयमिति ॥ तत्र सूत्रेणैव प्रथमं सिद्धांतमाह ॥ अवत्तनाशे
न्यद्गुणानुग्रहात् ॥ ॥ अवत्तस्य पुरोडाशश्च र्वादेः सकाशात्पृथक्कृतस्यावदानद्वयमात्रस्य नाशे अन्यद्धविरु
त्पादनीयं यागार्थं कुतः गुणानुग्रहात् ॥ एवं कृते मध्यपूर्वार्द्धहविरवदानरूपेण गुणेनांगेन साधनभूतेन या
गोनुगृहीतो भवति यदि पूर्वहविःशेषादेव पुनरवदाय यागः क्रियते तदा तस्य पूर्वार्द्धविकलत्वाद्विगुण
एव यागो भवेत् ॥ कथं द्व्यवदानस्यैव यागार्थत्वपक्षे तस्य विनष्टत्वादवशिष्टस्यायागार्थत्वात् ॥ समस्तस्य
पुरोडाशस्य यागार्थत्वेपि द्व्यवदाननाशेन तस्य विकलत्वात् ॥ न चासौ यागो विगुण इष्यते ॥ तस्माद्धविरंतर
मेवोत्पाद्यं उद्धृतद्व्यवदाननाशे इति प्राप्तेत्राह ॥ ॥ न पूर्वशेषात् ॥ ॥ यदुक्तमवत्तनाशेन्यदुत्पादनीयमि
ति तन्न ॥ किं तु पूर्वशेषात् पूर्वस्यैवावशिष्टस्य हविषः शेषात्पुनरवदेयं ॥ कुतः ॥ विनिष्टेपि द्व्यवदाने पुनर्मध्यपू
र्वार्द्धसंभवात्तावन्मात्रस्य च शास्त्रार्थत्वात् ॥ पुरोडाशस्यापि मध्यपूर्वार्द्धावयवौ तदुपादानकं तदवयवभूत
मवदानद्वयं यागसाधनं नष्टे च मध्यपूर्वार्द्धावयविनि पूर्वसकलरूपे पुरोडाशे यो मध्यावयवः पूर्वार्द्धाव
यवो वास्यावदानापादानभूतः ॥ स एवावदानापेक्षया अवयवी ॥ तस्मिन्नवदानोद्धरणेन विनष्टेपि मध्यांतरस्य पू

र्वार्द्धांतरस्य चावदानद्वयोपलक्षणत्वेन विद्यमानत्वात्तत एव पुनरवदेयं ॥ ननु कृत्स्नस्य मध्यपूर्वार्द्धेवदेयेन विक
लस्येति चेत् ॥ तन्न ॥ कृत्स्नाशास्त्रार्थत्वात् ॥ मध्यादवद्यतीत्येतावदेव श्रूयते ॥ ननु सकलस्यासकलस्य मध्यादिति
तस्मात्पूर्वशेषादेवावदेयं ॥ अचोदितत्वाच्च ॥ किंच ॥ अवत्तद्व्यवदानमात्रनाशे अन्यद्धविरुत्पादनीय
मित्येवमचोदितत्वात्कुत्राप्यविहितत्वात् पूर्वशेषादेवावदेयं ॥ स्विष्टकृद्वदानुपूर्व्ययोगात् ॥ अपि च
शेषादवदीयमाने तद्धविः स्विष्टकृद्भवति ॥ स्विष्टकृदस्यास्तीति स्विष्टकृद्वत् ॥ अन्यस्मिन् हविष्युत्पादि
ते तु इदं पूर्वहविः स्विष्टकृद्वन्न भवति तदा ततः स्विष्टकृदर्थमथवदानं गृह्यते ॥ किं तु नूतनोत्पादितादेव ॥ कु
तः ॥ आनुपूर्व्ययोगात् ॥ यतः स्विष्टकृदवदानस्यानुपूर्वयोगः क्रमयोगोस्ति ॥ प्रधानावदानानंतरं हि ततः स्वि
ष्टकृदर्थमवदानं भवति ॥ यदि च प्रधानावदानमेव पूर्वस्मान्न गृह्यते स्विष्टकृदर्थमपि ततो न गृह्यते ॥ ततः पू
र्वस्य हविष उत्पत्तिर्व्यर्थैव स्यात् ॥ शेषात्तु प्रधानार्थे वदीयमाने स्विष्टकृदर्थमपि ततोवदीयत एवेति पूर्वहविः
स्विष्टकृद्भवतीति पूर्वपक्षे गुणः ॥ अथोक्तमेव सिद्धांतं द्रढयति ॥ ॥ गुणहानौ तु शेषभावात् ॥ तुशब्दः पक्ष
व्यावृत्तौ ॥ गुणहानाविति गुणस्य यागं प्रति गुणभूतस्य यागसाधनभूतस्य द्व्यवदानस्य हानिर्गुणहानि

हविषो मध्यपूर्वभागस्य यागं प्रति गुणभूतस्य हानौ सत्यां नाशे सति न पूर्वशेषाद् अवदेयं ॥ कुतः शेषाभावात् ॥ शेषत्वा
देव ॥ तस्यावशिष्टस्य शेषकार्यार्थत्वादित्यर्थः ॥ कृत्स्नस्य हि पुरोडाशस्य यो मध्यदेशस्तदुपादानको यस्तस्योपरि
तनोंगुष्ठपर्वमात्रो ऽवयवः सो ऽवदातव्यः ॥ अन्यस्त्ववदेयस्यापादानभूतः ॥ न त्वसाववदातव्यः ॥ स त्विडादिशेषकार्या
र्थो न प्रधानकार्यार्थः ॥ अतो नासौ हविः ॥ यत्तु हविस्तद्धि नष्टं ॥ तद्विनाशे च हविरंतरमेवोत्पाद्यं ॥ यदा च द्व्यवदानस्ये
वयागार्थता ॥ ततस्तद्विनाशे शेषस्य कार्यार्थत्वाभावात् तद्द्व्यांतरं यागार्थमुत्पाद्यं ॥ यदापि समस्तपुरोडाशस्य
ध्यो यागस्तदापि द्व्यवदाननाशे तस्य विकलत्वात् अविकलं हविरंतरमुत्पाद्यं ॥ तस्मात् साधूक्तम् अवत्तनाशे ऽन्यदि
ति ॥ ॥ तदुक्तं ॥ ॥ संस्काराणां पुरोडाशे द्व्यवदानं प्रयोजकं ॥ तद्विनाशाच्च नष्टास्ते नावदेयमस्मात् ततः ॥ गृहीतो म
ध्यपूर्वार्धौ तौ च नष्टावुभावपि ॥ अतः शेषस्य शेषत्वात् प्रधानत्वं न युज्यत इति ॥ ॥ अथेदं चिंत्यते ॥ ॥ इंद्राग्नि

सोमादिदेवतानामाहवनीयादीनामग्नीनां मंत्राणाम् इषेत्वेत्यादीनां क्रियाणाम् अदृष्टार्थानां प्रयाजप्रोक्षणा
दीनाम् अस्मरणादीनाम् अपचारे किं देवतांतरमग्न्यंतरं शब्दांतरं क्रियांतरं च प्रतिनिधेयमुत नेति ॥ पूर्वेण न्या
येन प्रतिनिधौ प्राप्ते आह ॥ ॥ न देवताग्निशब्दक्रियाः परार्थत्वात् ॥ ॥ देवता अग्न्यादिका ॥ अग्नय आहवनीया

दयः ॥ शब्दो मंत्रः ॥ क्रिया प्रोक्षणप्रयाजादिका अदृष्टार्थाः ॥ दृष्टार्थे तु त्वग्वदघातादिषु स्यैव प्रतिनिधिः न ख
निर्लुंछनादिभिरपि तत्कार्यसिद्धेः ॥ तदेतेषां देवतादीनामस्मरणादिनापचारे प्रतिनिधिर्न भवति ॥ कुतः ॥ प
रार्थत्वात् ॥ अदृष्टार्थत्वादित्यर्थः ॥ प्रतिनियतानि ह्येषामदृष्टानि ॥ तथा हि ॥ यत्र प्रतिनिधियमानं मुख्यस्य का
र्यं साधयति तत्र प्रतिनिधिः ॥ न त्विह तथा संभवति ॥ देवता तावद्विधिलक्षणा ॥ न त्वन्या आहवनीयमाना देवता
भवति न चादेवतायै संकल्प्यमानो यागो भवति अतो ऽन्यदेवता कार्यमन्यतः संभवति ॥ अतो ऽग्न्यादिके विधिश
ब्दे विस्मृते तदर्थवाचकं शब्दांतरमर्थांतरवाचकं वा न प्रतिनिधातव्यं ॥ एवं च गत्यभावाद्यागस्यापि लोपः ॥
न हि त्यागमात्रं यागः ॥ किं तु देवतोद्देशेन त्यागः ॥ तेनासत्यां देवतायां प्रधानस्यैव यज्यस्यार्थस्य लोपः ॥ किं
च सदृशं प्रतिनिधातव्यं ॥ देवतायाश्च भावश्च शब्दनाशे शब्दद्वारेण च देवतात्वं ॥ अतो मुख्यदेवताशब्दस्म
त्वान्तरकालं तत्सदृशशब्दस्यापादाने ॥ न ह्यस्मृते मुख्ये तत्सदृशो बुद्धावारोपयितुं शक्यः ॥ न च स्मृत
स्य मुख्यस्य परित्यागो युक्तः ॥ तस्माद्देवताया न प्रतिनिधिरिति ॥ तथाग्निरप्याहवनीयादिरदृष्टार्थो विना
प्याधारेण प्रक्षेपसंभवात् ॥ न चाहवनीये प्रक्षेपे कृते पददृष्टं तदन्येन सिध्यतीति प्रमाणमस्ति ॥ तस्माद

॥७२॥
॥देवया०९

ग्नीनां न प्रतिनिधिः ॥ नीवारादीनां तु पुरोडाशनिष्पत्तिः ॥ प्रत्यक्षत एव दृश्यते मंत्रस्तु यद्यपि पदार्थप्रकाशना
र्थत्वाद्दृष्टार्थः ॥ तथापि तस्य ध्यानादिनापि सिद्धेर्न मंत्रे मंत्रांतरं प्रतिनिधेयं ॥ अत्र अर्थ न स्मृतेन प्रयोजनम
स्ति ॥ न मुख्येन मंत्रेण नापि तत्सदृशेन शब्दांतरेण ॥ अवश्यं हि मंत्रार्थप्रतिपादकं शब्दांतरं प्रतिनिदधता
येन केन चिदुपायेनार्थः प्रथमं स्मर्तव्यः ॥ तदभावे तत्प्रतिपादकशब्दांतरोपादानासंभवात् ॥ ततश्च सिद्धे
स्मरणे न प्रतिनिधिना कार्यं ॥ स्मरणार्थमेव हि प्रतिनिधीयते ॥ न च शब्देन स्मरणं कर्तव्यमिति वचनम
स्ति ॥ किं तर्हि मंत्रविशेषाम्नानसामर्थ्याद् उपदृष्टाद्युपायनिवृत्तिः ॥ असति च मंत्रे उपद्रष्टादिके न बार्यते ॥ अ
तो नास्ति शब्दांतरं प्रतिनिधिः ॥ यत्तु मंत्रनियमकृतं यददृष्टं न तदन्येन सिध्यतीति तत्प्रतिनिधिमाहुः ॥ तेषां वो
पचारोपित तत्कृतनियमादृष्टस्यान्यथा सिद्धेर्व्यांतरप्रतिनिधिर्न सिद्ध्येत् ॥ क्रियायाश्च अपि प्रतिनिधि
र्न भवति ॥ यत्प्रयाजादिभिरदृष्टं क्रियते तदन्या क्रिया करिष्यतीति नास्ति प्रमाणं ॥ हंत्यादीनां तु दृष्टा
र्थत्वात् ॥ द्रव्यवदस्त्येव प्रतिनिधिः ॥ क्रियाग्रहणं त्वदृष्टार्थक्रियाभिप्रायमिति ॥ ॥ काम्यं देवता ॥ ॥ या
ग्निशब्दक्रियाः प्रतिनिधित्वे सकामं स्वेच्छया देवतामपि प्रतिनिदध्यात् ॥ अकामानुमतो काममित्य

॥७९॥
॥काण्वी॥

मरः ॥ अग्निशब्दक्रियाणामप्रतिनिधेयत्वस्य दृढीकरणार्थं सूत्रं ॥ यतो देवतायाः प्रतिनिधिः सर्व
थान संभवति ॥ न हि ऐंद्रे हविष्यग्निर्देवता भवति ॥ न हि सा त्याका चिद्देवतास्ति वैदिके कर्मणि ॥ या यत्र
विधीयते सा तत्र देवता ॥ तेनान्यत्रान्या देवतैव न भवति ॥ अविहितत्वात् ॥ ॥ प्रतिषिद्धं प्रत्यवायात् ॥ ॥
नेत्यनुवर्तते ॥ यतद्रव्यं कोद्रवमाषवरटादि प्रतिषिद्धं न तत्प्रतिनिधेयं ॥ कुतः प्रत्यवायात् ॥ यतः प्रति
षेधातिक्रमे प्रत्यवायो भवति ॥ तथा हि ॥ अयज्ञिया वै कोद्रवा अयज्ञिया वै वरटकाः ॥ अयज्ञिया वै मा
षा इति प्रतिषिद्ध यज्ञसाधनभावा माषादयः ॥ सोऽकचरौ मुद्गानामभावे स्यादश्यान्माषाः प्राप्नुव
ति श्यामाकच्चरौ च कोद्रववरटकादय इति ॥ अत्र माषाद्या प्रतिनिधित्वेन ग्राह्या न वेति संदेहः ॥
तत्र यज्ञांगत्वं माषादीनां प्रतिषिध्यते प्रतिनिधित्वे तु न माषस्य यज्ञांगत्वं ॥ किं तु तत्कृतस्य मुद्गाद्य
शस्य ॥ अतः प्रतिनिधेया माषादय इति चेत् ॥ मैवं ॥ अयज्ञिया इत्यनेन यज्ञार्हतामात्रं प्रतिषिध्य
ते ॥ प्रतिनिधित्वे चावर्जनीयं साधनत्वं ॥ अतो न माषादीनां प्रतिनिधित्वं ॥ तदुक्तं ॥ व्रीहिर्यवो वा श्या
मको नीवारो वा हविर्भवेत् ॥ वेणुयवा मसूरं वा शाकं मूलं जलं फलं ॥ सत्यं वा हविरेतेषु यथासंभ

॥८०॥
॥देवया०॥

वमाचरेत् ॥ प्रतिनिध्यंतरवत्सत्यं विज्ञेयं हविरत्यये ॥ प्रधानदेवतोद्देशात्संत्यजेत्सत्यमात्मनः ॥ अतो
न्यदपि वा ग्राह्यं सदृशं धान्यमात्रकं ॥ न ग्राह्यं सर्वथा माषवरकोदारकोद्रवं ॥ यद्वा व्रीहियवाभावे तुष
तंडुलयोगिनीः ॥ ओषधीः प्रतिगृह्णीयादणुकोद्रववर्जिताः ॥ ग्राम्याणां भावयेन्न्यूनमारण्यानामर
एयज्ञं ॥ यवाभावे तु गोधूमास्ततो वेणुयवा इति ॥ ॥ अथेदं विचार्यते ॥ ॥ प्रोषिते कार्यांतरव्यापृते
मृते वा यजमाने तत्स्थाने ॥ किं याजमानपदार्थकरणाय पुरुषांतरं प्रतिनिधेयमुत नेति ॥ तत्र व्री
ह्यपचारवत्प्रतिनिधौ प्राप्तेत्र आह ॥ ॥ स्वामीफलयोगात् ॥ ॥ नेत्यनुवर्त्तते स्वामी यजमानो न प्र
तिनिधेयः मृतेनावाके: पुरुषांतरं प्रतिनिदध्यात् ॥ कोवाध्वर्यादीनत्रवर्त्तयेत् ॥ स्वयं प्रवर्त्तमानेषु
च तेषु न मृतस्याकर्तुः फलं सिध्यति ॥ यदि तु प्रतिनिहितादक्षिणादानं द्रव्यत्यागं करोति तदा तस्य सम्य
क्फलसंबंधान्मुख्य एव स्वामी स्यान्न प्रतिनिधिः पत्नी त्वस्वतंत्रा अनग्निश्च मृते पत्यौ पुरुषांतरं
प्रतिनिधाय प्रयोक्ष्यतीत्यनाशंकनीयमेव प्रोषिते अन्यत्र व्यापृते वा यजमाने यतावत्क्रत्वर्था आ
ज्यावेक्षणादयः ॥ तेषु यथासमाख्यमध्वर्याद्य एव कर्त्तारो विद्यंत इति न प्रतिनिधिना कार्यं ॥ पुरु

॥८०॥
॥भाट्टं॥

षसंस्काराणां च ऋत्विग्वरणादीनां क्रत्वर्थत्वात् ॥ विनापि यजमानेन नास्ति वैगुण्यं ॥ पत्न्या अपि तदनुष्ठान
संभवान्नयानि च ब्रह्मचर्यादीनि फलं प्रतियोग्यतायाः कारणानि तानि बहिरवस्थितेनापि यजमानेन नक्रि
यमाणानि क्रतोरुपकारण्येव ॥ तस्माद्द्रव्यबंधाज्यावेक्षणादावध्वर्यादेर्विद्यमानत्वादितरत्र ब्रह्मचर्या
दावसंभवात्प्रतिनिधेरनुपपन्नो यजमानप्रतिनिधिः ॥ कुतः ॥ फलयोगात् ॥ न हि पुरुषांतरेण क्रि
यमाणानि ब्रह्मचर्यादीनि यजमानस्य फलयोग्यतां संपादयंतीत्यसंभवः प्रतिनिधेः ॥ तस्मान्न प्रवा
सादिनापचरिते स्वामिनि तत्स्थाने स्वाम्यंतरं प्रतिनिधेयमिति ॥ अनुपत्न्यां मृतायां किमस्ति प्रति
निधिरुत नेति नायमस्याधिकरणस्य विषयः तत्रापि हि यदा तावज्ज्यायो ये पूर्वमारिणे दत्वाग्नीनं
त्यकर्मणीत्ययं पक्षः समाश्रियते तदाग्न्यभावादेवानधिकारः सिद्धः यदा तु नाग्न्यपत्नीदत्वस्तदापा
वारप्रामाण्यान्नापत्नीकस्य दर्शपूर्णमासाद्यनुष्ठानं अग्निहोत्रमात्रं तु वचनादनुष्ठीयते ॥ तदाप्यप
त्नीकोप्यग्निमाहरेदिति वचनान्नास्ति पत्न्याः प्रतिनिधिरिति तत्त्वरत्ने ॥ ॥ गुणेषु प्रतिनिधिः परार्थ
त्वात् ॥ ॥ गुणेषु क्रत्वर्थेषु गुणपदार्थेषु पात्रासादनाग्न्यन्वाधानवेदबंधनादिषु स्वामिनोपि

॥८१॥
॥देवया०१

विधि

प्रतिनिधिर्भवति ॥ यथा समाख्यामध्वर्यारेव तत्तत्करोतीत्यर्थः ॥ कुतः परार्थत्वात् ॥ पात्रासादनादीनां क्रत्वर्थ्यो
त्वात् ॥ क्रत्वर्थानी ह्येवमादीनि ॥ न चाप्यनादिवद्यजमानसंस्कारार्थानि ॥ अतः पदार्थादिवमादिषु क्रत्वर्थेषु स्वा
मिनोपि प्रतिनिधिर्भवति वा ॥ अथेदं विचार्यते ॥ सप्तदशावराश्चतुर्विंशतिपरमाः सत्रमासीरन्निति ॥ तत्र सप्तद
शप्रभृतिषु सत्रगणया गाद्यर्थं प्रवृत्तेषु यदा कश्चिन्म्रियते न दा तस्यानेनान्यः प्रतिनिधेयः उत नेति ॥ तत्र पूर्वाधि
करणन्यायेन स्वामिनः प्रतिनिधिर्न भवतीति प्राप्तोस्माह ॥ सत्रेषु तु स्यात् ॥ तु शब्दः पूर्वाधिकर
णसिद्धान्तं हि भाद्व्य माह ॥ सत्रेषु स्वाम्यपि प्रतिनिधीयेत ॥ यजमानस्यापि प्रतिनिधिर्भवति ॥ कुतः श्रुतेः
॥ अथ परिसंदिहिता ता नोप्रमीयेत तत्तस्य यो नेदिष्ठी स्यात्तमुपदीक्षन् न सह यजेरन्निति इत्यवणात् ॥ काम्यम
पि प्रारब्धं तदवश्यं समापनीयमित्युक्तं ॥ आवश्यकत्वाच्च ॥ यथाशक्ति प्रयोक्तव्यं ॥ अतो यद्यपि यजमाना
स्ते ऋत्विज इति यजमानशब्दस्य स्वामित्व तक र्तृत्व वचनत्वात् ॥ एकशब्दोप्यतयोश्च स्वामीकर्तृत्वयो रार्त्वि
ज्योद्देशे न संभवात् स्वामिभिरेवार्त्विज्यं कर्तव्यं ॥ स्वामिगती हि सप्तदशादि संख्या तत्राऽगं तया विना चैव गुणः
तस्तत्संपादनाय पुरुषांतरं प्रतिनिधेयं ॥ ननु स्वामी सप्तमी सप्तदशादिसंख्या ॥ न चानितः स्वामी ॥ कथं यो

॥८१॥
॥भाष्य॥

ह्यारभ्य सकलकर्तुः फलं भवति सच स्वतीत्युच्यते ॥ अयं पुनर्मध्ये प्रविष्ट एकदेककर्ता न फलं प्राप्तुमर्हति
न चासौ विधिवशात् प्रवृत्तो येन विधिशास्त्रप्रामाण्यात् फलं लभेत ॥ न हि यः प्रतिनिधीयते तस्य कर्तव्यतया कर्म
विहितं यदस्मिन्फलेन प्रयुज्यते ॥ इतरैरपि हि स्वामिभिः प्रारब्धमवश्यं समापनीयमित्याचारानुमितविधिरे
नासो सोमादिभिः संख्यासंपत्त्यर्थमृत्विक्कथानीयश्चानीतस्तस्मान्नास्य स्वामित्वं ॥ तेनाशक्यैवं सप्तदशसं
ख्योपपादयितुमिति ॥ उच्यते ॥ स्वामितातस्यानीनभविष्यति ॥ न हि सा शक्या कर्तुं ॥ इदं तु वक्तुं शक्यं ॥ ये ऋत्विजा
पदार्थास्त इह सप्तदशावरैः कर्तव्याः इति एतावच्चोपपादितं भवति ॥ अयं चायं यदप्यानीयमानः स्वामीगतां संख्यां न
पूरयति ॥ तथापि तु यो म्रियते तस्य यः पदार्थः कर्तव्यस्तस्मिन्नूकर्तृत्वं शक्नोति प्रतिपत्तुं ॥ न स्वामीगसाप्तदश्यं न भ
वति त्येव तासंभव दयि कर्तृभ्यां साप्तदश्यं हा तव्यं भवति ॥ अतः स्वामित्वमात्रं त्यक्त्वा कर्तृ शेसाप्तदश्यं संपाद
यितु सत्रैमृतस्य दिहितस्य स्थाने पुरुषांतरं प्रतिनिधेयं ॥ मृतस्य च फलं श्रूयते ॥ योदीक्षितानां प्रमीयेता
पि तस्य फलामिति ॥ तदुक्तमिति ना ॥ तस्मिन्न फलदर्शनादिति न तस्मिन्मृते ॥ अपि तस्य फलमिति मृतस्य फलं
दर्शयन् प्रतिनिहते नास्ति फलमिति दर्शयति ॥ न चेदं फलपरं ॥ किं तर्हि फलास्वरूपो यमर्थवादः पर्णमय्यधि

स्वामिगतो

॥८२॥
॥देवया०१

करणन्यायात्॥ अथमाभूदिदंमृतस्यफलपरं॥ सत्रमासीरन्निति तु विधितःप्रवृत्तस्यापिमितिफलंनभवतीति
चेत्॥ नसत्यपिफलेमृतस्यसमाप्त्यभावात्॥ अपिशब्दस्यायमर्थः॥ ऋद्धिकामाःसत्रमासीरन्निति तु विधिप्रति
मितंफलं॥ तत्रावदेकस्मिन्मृतेसर्वेषांविपन्नमेव॥ स्वामिसंख्याहान्याविगुणान्काम्याफलात्यते॥ प्रारब्धंसमाप
येदितितुविध्यंतरप्रमितफलेच्छयावशिष्टाःसत्रिणःप्रवर्त्तते॥ नचमृतस्यतत्रप्रसंगोस्तीति॥ अथसत्रविधि
तःप्रतीतमेवफलंविगुणादपिनिःपद्यतेतथापिनमृतस्यफलप्राप्तिःसकलानुष्ठानं॥ नहिप्रारंभमात्रात्फलंभ
वति॥ तदुरस्यचप्रतिनिहितस्यनकेवलंसकलानुष्ठानात्॥ कर्मकरत्वादपिविधिवशेनपरप्रेरितस्यऋ
त्विग्वर्तमानत्वादपिनास्तिफलसंबंधःइतितंत्ररत्ने॥ अन्येतुवाचनात् मृतस्यफलमेतदित्याहुः॥ नहिन्यायो
वचनंबाधितुमीष्टे॥ नास्तिवचनस्यकिंचिद्दुःकरमिति॥ अथेदंचिंत्यते॥ सत्रेयोयंप्रतिनिहितस्तस्यफलयोग्य
ताहेतवोवपमाभ्यंजनाञ्जनादयोयजमानधर्मानभवंति॥ उतभवंति॥ तत्रस्वामिधर्माणांफलप्रतिग्रहणयो
ग्यत्वापादकत्वात्॥ प्रतिनिधेश्चफलप्रतिग्रहाभावात्स्वामिधर्मानभवंतीतिप्राप्तेब्रूमः॥ सतद्धर्माकर्मयो
गात्॥ ससत्रेप्रतिनिहितोनेदिष्ठीतीद्धर्मास्स्वामीधर्माभवति॥ स्वामिनोधर्माःसंस्कारावपनादयःस्त

॥८२॥
॥स्वाध्यं॥

स्यभवंतीत्यर्थः॥ कुतः॥ कर्मयोगात्॥ स्वामिकर्मणाहित्यागादिनासंयुज्येत॥ ततस्तत्संस्कारासंस्कृ
तोनैवतत्कर्मानुष्ठानक्षमःयथाद्यपस्यफलाभावात्फलनेसंस्कारानप्राप्नुवंति॥ तथाप्यस्मिन्न
संस्कृतेसत्यन्येषांपश्चाप्तदशत्वंनतत्संस्कृतेसत्यनेषांयत्साप्तदश्यंततंसंस्कृतेषुसप्तदशस्तुस्थितं
भवति॥ ततःसप्तदशावराःसत्रमासीरन्नित्येतच्छास्त्रमनुगृहीतंभवति॥ अन्यथासंस्कृताःषोडशी
तिशास्त्रंबाध्येतयदिबहूनांयजमानानामन्यभादवराअल्पसंख्यायजमानाःस्युस्तदपिसप्तदशा
पेक्षिताः॥ नतुततोप्यल्पसंख्याइत्यर्थः॥ अतइतरेषांफलप्राप्तेर्यथोपक्रांतेकर्मानुष्ठानसाधात्सप्तदशकर्त
कस्यब्रह्मचर्यादेःस्वकार्यसाधनत्वात्तत्सिद्ध्यर्थंप्रतिनिहितोपिब्रह्मचर्यवपनादिस्वामिधर्मान्कु
र्यात्॥ इतरथाकर्तृसंख्यालोपादितरेषांब्रह्मचर्यादेःस्वकार्यंनसिद्ध्येत॥ तस्मात्स्वामिधर्मानेदिष्ठी
इतिसिद्धं॥ ॥ अथेदंविचार्यते॥ ॥ सत्रेषुकेत्रयाणांवर्णानामधिकारः॥ उतब्राह्मणानामेवेति॥ तदर्थं
चकिंयेयजमानास्तेऋत्विजइत्यनेनआर्त्विज्ययजमानानसंस्कारत्वेनविधीयते॥ उतयज
मानाआर्त्विज्यांगत्वेन॥ तत्रऋद्धिकायामादिवाकेषुविशेषाश्रवणात्त्रिषुवर्णेषुप्राप्तेषुयच्छब्देनतानु

॥८३॥
॥देवया०१

दिश्यते तेषां संस्कारार्थमार्त्विज्यमुच्यते ॥ ये यजमानास्त ऋत्विज इति ॥ अत्र यजमानर्त्विक्शब्दयोः पृ
थगर्थत्वे न सिद्धयोः सामानाधिकरण्यमुपपद्यते एकेन लक्षणार्थे न भवति तत्त्वं ॥ तत्र मुख्यत्वे यजमान
शब्दः स्थितिवृत्तः ॥ जघन्यत्वादृत्विक्शब्दो लक्षणार्थः ॥ ये हि परार्थभृता यजन्त्यध्वर्य्वादयस्ते ह्याचक्षते यद
मस्मिन् वाक्ये ॥ तस्य च स्वामिवचनेन यजमानपदेन मुख्यसामानाधिकरण्यासंभवात् कार्यलक्षणा भ
वति ॥ ये परिक्रीतकर्तृत्वेन प्रकृतितः प्राप्ताः पदार्थास्तेषु यजमानपदेन मुख्यसामानाधिक ॥ न चैवमृत्वि
क्कर्तृकर्तृ शंकनीयं ॥ यजमानमेव कर्तृणं मुख्यार्त्विक्योपपत्तेः ॥ न हि वरणभरणजन्यमदृष्टमार्त्विज्ये ॥ आ
नमनार्थत्वाद्वरणभरणयोः ॥ अदृष्टार्थत्वे तु सनृतुयाज्यावरणवत् ॥ सत्रेऽपि वरणभरणे कर्तव्ये स्या
तां ॥ तस्मान्न वरणभरणनिमित्तमार्त्विज्यं ॥ किंतु ऋतुयजमानं निमित्तं ॥ अत्र सत्रेऽपि संनृत्विजस्तद्विशेषा
श्चाध्वर्य्वादयः सत्यं वसितु यजमाना एव ॥ नान्ये ॥ वचनेन हि परकर्तृकत्वेन प्राप्ताना पदार्थानां यजमानक
र्तृकत्वमनेन विधीयते ॥ प्रधानं ह्युद्देश्यं भवति यच्छब्दोक्तं श्च यजमाना उद्देश्या इति तेषामेव प्राधा
न्यं ॥ तेन यथा ब्राह्मणानां यजमानानामेव संतो वचनात् प्रमाणपादार्त्विज्यं एवमितरयोरपि वर्णयोः प्रधान

॥८३॥
॥भाष्य॥

भूतैरेव यजमानैः क्रियमाणमार्त्विज्यं न गुणभूतात्कर्तृनपेक्षते ॥ गुणकर्तृपरिच्छेदेन ब्राह्मण्यमार्त्वि
ज्यांगं ॥ तदभावे तदरि द्वारा भावान्न सत्रे प्राप्नोति ॥ तस्मात्त्रयाणामधिकार इति पूर्वपक्षः ॥ सिद्धांतमाह
॥ ॥ सत्राणि ब्राह्मणानामृत्विक्त्वात् ॥ सत्राणि द्वादशाहादीनि ब्राह्मणानामेव भवंति न क्षत्रियवै
श्ययोः ॥ कुतः ॥ ऋत्विक्त्वात् ॥ ये यजमानास्त ऋत्विज इति श्रवणात् ॥ यद्यप्यत्र सर्ववर्णोद्दिष्टप्र
तिनिर्दिष्ट प्रतिनिर्दिष्टा प्रतिनिर्दिष्टाः विशेषाः श्रवणात् ॥ तथाप्यत्रार्त्विज्यं यजमानानां संस्कार
त्वेन विधीयते ॥ तथा सत्यार्त्विज्यस्याप्राकृतत्वकार्यप्रसंगात् ॥ तेन यच्छब्दयोगेऽप्यत्र न यजमाना
उद्दिश्यंते ॥ किंतु ऋत्विक्पदेन तत्कर्तृकान्ययदार्थान्तु द्दिश्य यजमानाः कर्तृत्वेन विधीयंते ॥ प्रत्याम्ना
नाच्च ऋत्विजो निवर्तंते आर्त्विज्यं ह्यत्र प्रधानं ॥ तस्य चात्रेत्रह्णो धर्मो अंगत्वेन प्रकृतितः प्राप्तोऽत्रान्य
कर्तृकतायास्तु न किंचिद्बाधकमस्ति ॥ ऋद्धिकामादिशब्दानां ब्राह्मणानामेव सत्राणि भवंतीत्यत्र प्रकृ
तितः प्राप्तं ब्राह्मणकर्तृकत्वं ॥ वाचनिकं च यजमानकर्तृकत्वमुभयं संपादयितुं ब्राह्मणानामेव स
त्राणि भवंतीति सिद्धं ॥ ॥ अथेदमपरं चिंत्यते ॥ ॥ प्रयाजेषु पुरुषभेदेनानुष्ठाने विशेषोस्ति ॥ राज

॥८५॥
॥देवया०१

न्यवसिष्ठादीनां नाराशंसो वा नाराशंसप्रयाजस्तनूनपादन्येषां ॥ तत्र वसिष्ठात्रिवध्र्यश्वशुनककण्वकश्य
पसंकृतिगोत्रोत्पन्नास्तत्प्रवरं तो वा नाराशंसप्रयाजवंतः ॥ इतरे च तनूनपात्प्रयाजवंतः ॥ त एव ते भि
न्नकल्पा अपि मिलित्वा सत्रादेशावराः संहत्य सत्रेऽधिकारिणो भवंति उत समानकल्पा एवेति ॥ तदर्थ
मिदं विचार्यते ॥ किं वसिष्ठादयो नराशंसांगत्वेन कर्त्तारो विधीयते उत वसिष्ठादीन् दिश्य नाराशं
स्यादिशाद्यर्थं न विधीयते इति ॥ षष्ठी च संबंधवाचिनी ॥ सत्रेषु च सत्रिणां प्रत्येकमिव कर्तृत्वमिति
स्थितिं ॥ अतस्तत्र वसिष्ठा वसिष्ठैः क्रियमाणे नराशं तत्र वसिष्ठाद्यर्थत्वेन विधाने फलाकल्प
वात्प्रकरणबाधाश्च वसिष्ठादय एव नाराशंस्याद्यंगत्वेन विधीयंते ॥ शंसो वसिष्ठेनापि नाव
क्रियत एवेत्य किंकुगुणस्तथा तनूनपादिष्वपि ॥ अत्र तोयं केचित्कल्पमाश्रित्य भिन्नकल्पमाश्रित्य भि
न्नकल्पा अप्यधिक्रियेरन्नित्येवं प्राप्ते आह ॥ एकैककल्पानामवैगुण्यात् ॥ एकः समानस्तुल्यः कल्पः पक्षो
येषां ते एककल्पाः तेषामेव सत्राणि भवंति ॥ न भिन्नकल्पानां ॥ कुतः ॥ अवैगुण्यात् ॥ यदि सर्वेऽपि नराशंसवं
तः अथवा सर्वेऽपि तनूनपात्प्रयाजवंतः ॥ तदेवावैगुण्यं भवति ॥ अवैगुण्याच्च फलसिद्धिर्भवति ॥ इतरथा

॥८४॥
॥भाष्य॥

भिन्नकल्पेषु भिन्नकल्पेषु सह निविष्टेष्वन्यतरप्रयाजाश्रयणे सत्यन्येषां वैगुण्यात्फलेन सिद्ध्येत् ॥ न च वचनब
लेन बाधः ॥ वचनस्य समानकल्पेषु चरितार्थत्वेन बाधकत्वासंघाभावात् ॥ अत्र वसिष्ठादीन्स्वामित्वेनोदितादृ
र्थेन राशंसादि विधीयते ॥ तादर्थ्ये च वक्तृत्वोपकारद्वारेणोपपन्नमिति न भिन्नफलकल्पनापत्तिः ॥ वसिष्ठा
नामिति ॥ षष्ठीस्वामित्वेन अतो येषां स्वं नराशंसः ॥ तेषामेव कर्मसिद्धिं करोतीति नेतरेषां ॥ अतरेषां ॥ अत
एककल्पानामेव सहाधिकारो न भिन्नकल्पानामिति सिद्धं ॥ अत्र सत्रव्यतिरिक्तान्यप्यनेककर्तृकाणि पा
णिद्वियज्ञगणपतियज्ञादीत्युदाहरणं भवंत्येव ॥ तुल्यन्यायत्वात् ॥ प्रदर्शनार्थं तु सत्रग्रहणमनुवृत्तिः
प्रदर्शिता ॥ अत्र विशेषः ॥ वासिष्ठो ब्रह्मेति वचनात् ॥ ब्राह्मत्वं वसिष्ठेन कर्त्तव्यं ॥ वैश्वामित्रो होतेति वचना
त् ॥ होत्रं तु वैश्वामित्रेण ॥ तयोश्च भिन्नकल्पत्वान्न सहाधिकारसंभवं ॥ तस्माद्दूरेण त्यभावाद्वासिष्ठब्रा
ह्मणमाश्रित्य होत्रस्य [illegible] कर्त्ता बाधित्वा वासिष्ठेन तत्समानकल्पेन वा कल्पेन वा केनचित्क
र्त्तव्यं वैश्वामित्रं वा होत्रमंगीकृत्य ब्रह्मत्वमंगीकृत्यापि वासिष्ठकर्तृत्वबाधेन वैश्वामित्रेण तत्समानकल्पे
न वा केनचित्कर्त्तव्यं अथवा ब्राह्मणमात्रस्याधिकार इति ॥ तत्राविशेषात्सर्वेषामधिकारः स्यात् ॥ अ

॥८५॥
॥देवया०१

थवावसिष्ठो ब्रह्मेति प्रकृतौ वचनात् ब्रह्मत्वस्य वैगुण्यावयाश्यंवासिष्ठेन भवितव्यं ॥ अतस्तत्समानकल्पानामधि
कारः ॥ सिद्धांतस्तु ॥ यएवकश्चित्स्तोमभागानधीते स वासिष्ठ इति वचनात्स्तोमभागाध्यायनवतो वासिष्ठस्यापि ब्र
ह्मत्वस्यानुज्ञानादवासिष्ठेनापि क्रियमाणं ब्रह्मत्वं विगुणं न भवति ॥ वैश्वामित्रो होतेति वचनात्तु हेतृत्वे वैश्वामित्रे
ण विना विगुणं स्यात् ॥ तस्माद्वैश्वामित्रतत्समानकल्पानामेव सत्रेधिकारो नान्येषामिति सिद्धं ॥ अनेनैव न्या
येन तुल्यप्रमाणानामेव सत्त्राणि प्राप्नुवंति न भिन्नप्रमाणानां दीर्घह्रस्वानां ॥ कुतः ॥ एवं हि श्रूयते ॥ यजमानेन सं
मितौदुंबरी कार्येति यजमाने नोर्द्ध्वबाहुप्रदोर्ष्णतेन सममुच्छ्रितेन वा द्विपुरुषां रज्जुमिति अत्र येन यजमाने
न संमितौदुंबरी न क्रियते ॥ अग्निहोत्रे साधनार्था रज्जुर्वा यो न संमिता नि क्रियतेत स्य वैगुण्यं भवतीत्येव
माशंक्याह ॥ ॥ न परार्थत्वात् ॥ ॥ तुल्यप्रमाणानामिव सत्त्रेधिकारो भविष्यतीति यदाशंकितं ॥ तन्न ॥ कुतः
॥ परार्थत्वात् ॥ परार्था ह्यत्र यजमानाः ॥ अहं बकुर्यादिमामानार्थ गुणभूताः ॥ अतो येन केन चिद्यजमानेन संमि
तासती यजमानप्रमाणानियमस्य कस्य निद्यजमानस्यारत्न्यादिना कार्याणि ॥ न त्वेवमग्निनामपि परार्थत्वा
द्यकस्यचिदग्निषु साधितं कर्म सर्वेषां फलसाधकं भविष्यतीत्यनाहिताग्नीनामप्यधिकारः ॥ सत्रेषु भवतीति

॥८५॥
॥भाष्यं॥

प्राप्ते उच्यते ॥ दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यस्याः प्रकृतितः प्राप्तेर्य एतेनानिष्ट्वेति वचनाद्दकृतदर्श
पूर्णमासस्य ज्योतिष्टोमानां अनाहिताग्नीनां नास्ति सत्रेष्वधिकारः ॥ तथा अग्नयोप्याधानगतादात्मनेपदाधा
तृणां न कार्यसिद्धौ पर्याप्नुवंतीत्यनाहिताग्नीनामधिकारः ॥ आदधीतेत्यात्मनेपदाद्धि आधातुरेवाधानफ
लेन भवितव्यं ॥ कर्मयोग्यता चाग्नीनां तत्फलं अतोन्यानाहिताग्न्यस्य कर्म न साधयंति ॥ यजमानेन संमि
तौदुंबरी कार्येति शास्त्रार्थो येन चिदपि प्रयोगगतेन यजमानेन संपाद्यत इति वैषम्यं ॥ ननु तर्हि जुह्वादिपात्रे
षु कथं ॥ तात्रिकिं यकेस्यचिद्यजमानस्य संबंधीनि सत्रेषु वादेयानि ॥ अथवा साधारणानन्यान्येवेति ॥ त
त्राग्निवदात्मनेपदे कृतविशेषाविरोधाभावात्प्रमाणवद्यस्याकस्यापि पात्राण्युपादेयानीति प्राप्ते उच्यते ॥ स
त्यमेयं विरोधो नास्ति ॥ तथापि अनाहिताग्निभिर्दहेतियज्ञपात्रैश्चेति तथा दक्षिणाहस्ते जुहूं सादयतीत्या
दिवचनैः पात्राणां दाहे करणभावः ॥ साधनप्रतिपत्तिश्च विधीयते ॥ तत्र यदि कस्यचिद्विद्यमानस्य पात्रैः सत्रगास्य
तदा मरणस्यानियतकालत्वात्कदाचित्प्रयोगमध्ये एवं तस्य यजमानस्य मरणं स्यात् ॥ ततः स्तस्य संस्कारः
पात्राणां च प्रतिपत्तिर्हीयेत ॥ यदि तु नैर्दह्येत प्रक्रांतप्रयोगो विगुणः स्यात् ॥ तस्मात्साधारणानि पात्राण्येषु

॥८९॥
॥देवयो०१

त्यायसत्रंकार्यं॥ इदानीमिदंचिंत्यते॥ आर्त्विज्यविरोधेनक्षत्रियवैश्ययोःसत्रेअनधिकारउक्तः सत्राणिब्रा
ह्मणानामृत्विक्कृतेरिति॥ नहिआर्त्विज्येतयोरधिकारोमास्तु॥ गार्हपतेधिकारोभवति॥ तत्रार्त्विज्यंवि
रोधाभावादित्याशंक्याह॥ वैश्यराजन्ययोर्गार्हपत्ये॥ नेत्यनुवर्त्तते॥ वैश्यराजन्ययोर्गार्हपतेपिगृहप
तित्वेअधिकारोनभवति॥ कुतः॥ तयोर्ब्रह्मसामपक्षभेदेनभिन्नकल्पत्वात्॥ ततूनपानसासंयाजिवत्॥
यथाहि॥ बार्हद्गिरंब्राह्मणस्यब्रह्मसामकुर्यात्॥ पार्थुरश्मंराजन्यस्यरायोवाजीयंवैश्यस्येति॥ तेनपा
र्थुरश्मरायोवाजीयेच्चाक्रियमाणेब्राह्मणानांवैगुण्यंभवति॥ बार्हद्गिरेनुक्रियमाणेक्षत्रियवैश्ययो
ः॥ तस्माद्वैश्यक्षत्रिययोर्गृहपतित्वेनाधिकारः॥ इतरेश्रूयते॥ पंचपंचाशतस्त्रिवृतःसंवत्सराःपंच
पंचाशतःपंचदशाःपंचपंचाशतःसप्तदशाःपंचाशतएकविंशतिविश्वसृजांसहस्रसंवत्सरमिति

॥८९॥
॥भाष्यं

अत्रायंसंदेहः॥ किमयंसहस्रसंवत्सरशब्दोमुख्यउतगौणः॥ यदामुनिपरिख्यस्तदापिकिंमनुष्यव्यतिरि
क्तानांस्वतःसहस्रायुषांगंधर्वादीनामधिकारः॥ उतमनुष्याणामेवरसायननित्रविदादिसंपादितस
हस्रायुषां॥ अथवातुल्यः॥ अथवासामुत्थानं॥ अथविश्वसृजानामयनंकुर्वतांसहस्रायुष्टं॥ अ

थवाद्वितीयशतानांयजमानानामधिकारः॥ यदपिगौणत्वंतदापिकिंमासेषुसंवत्सरशब्दउतरा
द्वादशरात्रितदिवसेष्विपक्षाः॥ तत्रप्रथमंपक्षंतावदाह॥ सहस्रसंवत्सरममनुष्याणामसंभवात्॥
सहस्रसंवत्सरसत्रंअमनुष्याणांमनुष्यव्यतिरिक्तानांस्वभावतःसहस्रायुषांगंधर्वादीनांभव
ति॥ कुतः॥ असंभवात्॥ मनुष्याणांसहस्रायुष्ट्वास्यासंभवात्॥ नहिसहस्रायुषोमनुष्याःसंति
तस्मादतिबलामनुष्याणांगंधर्वादीनामधिकारः॥ स्याद्देहानित्यत्वात्॥ अमनुष्याणामधि
कारस्यप्राप्तत्वाद्ब्राह्मणोग्नीनादधीतेत्यादिविधानान्मनुष्याणामेवाहवनीयाद्यग्नयःसंति
नान्येषामिति॥ नकथमपिगंधर्वादीनामधिकारःसंभवति॥ अतोमनुष्याणामेवसहस्रसंवत्सरंसत्रं
स्यात्॥ कालेन्वनयथादितविधिमुपसंहर्तुंतेषामेवशक्तत्वात्॥ ननुमनुष्याणांसहस्रसंवत्सरप
रिमाणमायुःकथंसंभवति॥ उच्यते॥ आयुरपितावत्परिमाणंमनुष्याणांस्यात्॥ कुतः॥ देहानि
त्यत्वात्॥ अनियतकालत्वात्॥ नहिनियतकालंमनुष्यदेहावस्थानं॥ कश्चिच्छतंवर्षाणिजी
वजीवति॥ कश्चिदर्धं॥ कश्चिदधिकमिति॥ अपरिमितायुषोमनुष्याइति॥ तस्मान्मनुष्याणामे

॥८७॥
॥देवया०१

वारिकारः॥ ननु मनुष्यदेहस्यानित्यत्वेपि सहस्रायुष्ट्वं तेषां कथं संभवतीत्याशंक्याह॥ ॥तस्य च का
र्यत्वात्॥ तस्य च पुंषाः कार्यत्वात् रसायनमित्रविंदादिना कर्तुं शक्यत्वात्॥ श्रूयते हि मित्रविंदया
आयुःकामो यजेतेति॥ अतो रसायनैर्मित्रविंदादिभिरायुःप्रापकैः कर्मभिश्च मनुष्या अपि दी
र्घमायुः प्राप्नुवंतीत्याशंक्याह॥ ॥तासंभावात्॥ ॥रसायनैरपि एतावत्परिमाणमायु
र्न संभवति मित्रविंदादिकर्मभिरपि॥ न ह्येतावतो वदायुषो रसायनादीनां च संबंधो दृष्टपूर्वः॥ नहि
रसायनानामेतत्सामर्थ्यं दृष्टं यत्॥ तैः सहस्राणि मनुष्या जीवेयुः॥ एतानि ह्यग्रे वर्द्धनानि वलीप
लीतनाशनानि स्वरवर्णप्रसाधकानि मेधाजननानि च॥ नैतावत्परिमाणस्यायुषो दानं दृश्य
ते॥ न च मनुष्याणामेतावदायुः कल्पयितुं शक्यते॥ शतायुर्वै पुरुष इत्यर्थवादात्॥ ननु शतास्यायुषि
अस्येति विग्रहः करिष्यते॥ मैवं॥ न हि द्विवचनबहुवचनांताभ्यां समास इष्यते॥ प्रमाणाभावात्॥
अविधानात् सामर्थ्याच्च॥ न त्वेवमेकत्वेपि प्रमाणाभावात् तेन कथं विग्रह उच्यते॥ एकत्वं जात्यपेक्षं प्रा
तिपदिकाभिहिता जातिरेकेति॥ यद्वा जातिराश्रयमंतरेणानुपपद्यमाना एकं तावदाश्रयमाक्षिप

॥८७॥
॥भाष्यं॥

तीत्येकत्वसिद्धिः॥ तस्मान्मनुष्याणां रसायनैर्मित्रविंदादिभिश्च सहस्रसंवत्सरायुष्ट्वस्यक
रणसंभवात् कथं मनुष्याणा॥ मधिकार इत्याशंक्याह॥ ॥शास्त्रसंभवादिति भारद्वाजः॥ भारद्वाजो
मुनिरित्याह एवं ब्रवीति॥ मनुष्याणामपि सहस्रायुष्ट्वं संभवति॥ कुतः॥ शास्त्रसंभवात्॥ शास्त्रा
त्संभवः शास्त्रसंभवात्॥ तस्मात् मित्रविंदायाः आयुःकामो यजेतेति हि शास्त्रं मित्रविंदया आ
युर्भावयेदिति बोधयति॥ न च तत्रायुषः परिमाणं श्रूयते॥ तेन केनचित्कर्माभ्यासेन सहस्रायुषोपि
भविष्यतीति॥ रसायनान्यप्यल्पस्यास्थिरभावस्य कारकाणि दृश्यंते॥ एवमन्यस्यापि नानावीर्यवत्त्व
मातिनायमेकांतः॥ तस्मान्मनुष्याणामपि रसायनैर्मित्रविंदादिशास्त्रात्सहस्रसंवत्सरविधाय
कशास्त्राच्च सहस्रायुष्ट्वस्य संभवो भविष्यतीति प्राप्ते आह॥ नादर्शनात्॥ ॥शास्त्रसंभवादिति य

मा०ए

दुक्तं तन्न॥ न हि मित्रविंदाया सहस्रसंवत्सरपरिमाणमायुर्भवतीति श्रूयते॥ तथाभ्यासेन तावत्कर्तुं श
क्यते॥ नापि रसायनैः॥ कुतः॥ अदर्शनात्॥ तावदायुष्काणां मनुष्याणामदर्शनात्॥ यद्येभिरुपाये
रेतावदायुर्भवेत्॥ तर्हि आयुषः सर्वैरपीष्यमाणत्वात् संपादितं दा पुरुषा मनुष्यादशेपरन्॥ न च

॥८८॥
॥देवया०१

दृश्यन्ते ॥ अत एवमवगम्यते ॥ एभिरप्युपायैरेतावदायुर्भवतीति ॥ न ह्येतावदायुः कस्यचिदपि संभवति ॥ त
त्र सर्वस्य तावदारोग्यपुष्ट्यादिजनकत्वमेव ॥ न त्वायुर्हेतुत्वं ॥ आयुष्प्रापकेष्व मित्रविंदादिभिरप्यमृत्यु
निरास एव क्रियते ॥ न विधातृसृष्टादधिकमायुः ॥ तथा च मित्रविंदाप्रकृत्यवाक्यशेषः ॥ किं तेस्मिंस्त्वं राष्ट्र
मस्य भवत्यपपुनर्मृत्युं जयति सर्वमायुरेतीति ॥ न चापमृत्युर्नास्तीति वाच्यं ॥ आथर्वणे हि पठ्यते एकशत
मपमृत्यूनामिति ॥ तेनैको महामृत्युस्तु दुर्लंघनं केनाप्युपायेन शक्यते ॥ तथा मर्त्याः पितरः पुरा ह्यायु
षो म्रियते यस्तद्यधत्ते इति परमायुषः पूर्वमपमृत्यूनामरणं दर्शयति ॥ तथा मनुरप्यमुमर्थं ब्रवीति ॥ अ
नभ्यासेन वेदानामाचारस्य च लंघनात् ॥ आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसतीति ॥ अतो मनुष्या
णामप्यसहस्रसंवत्सरायुष्ट्वस्यासंभवादेकस्मिन्संभवादेकस्मिन्कुले समुत्पन्नानां पितृपौत्रप्रपौत्रतत्पु
त्रादीनां बहूनां साधारणस्य सहस्रायुष्ट्वस्य संभवान्नकुलाधिकार इति ॥ तृतीयः पक्षोऽस्त्वित्याह ॥ कु
लसत्रमिति कार्ष्णाजिनिः ॥ कार्ष्णाजिनिस्तु मुनिरित्याह एवं कथयति यत् कुलसत्रमेतत्सहस्रसंव-
त्सरं भवति ॥ कुलस्य पितृपौत्रप्रपौत्रतत्पुत्रादीनां रूपस्य वंशस्य तद्भवतीति न त्वेकस्य चिरसंभवात् ॥ म

॥८८॥
॥भाष्य

नुष्याधिकारं चैतत् ॥ प्रारब्धं चावश्यं समापनीयं ॥ न चैकः शक्नोति समापयितुमिति यथा शक्यते तथा
समाप्यमिति गम्यते बहवस्तु शक्नुवंति ते न तत्कुलीनाः क्रमेण केचिदारब्धं केचिन्मध्येनुष्ठितं के
चित्समापयिष्यंतीत्येव कुलसत्रं कार्ष्णाजिनिर्मन्यते स्म ॥ नैतद्युक्तं ॥ यतः शास्त्रफलं प्रयोक्तरीति न्या
यात्समग्रानुष्ठानात्तु एतमेव फलं भवति नैकदेशानुष्ठानात्तु एणं ॥ न चापि तावत्स्वेकोपि कृत्स्नं करोति ॥ तस्मा-
न्नास्त्येव कस्यापि फलमिति ॥ अतो न कुलसत्रमेवमतः ॥ तर्हि सास्युत्थानमस्त्विति चतुर्थः पक्षोऽस्त्वि
त्याह ॥ सास्युत्थानमिति लौगाक्षिः ॥ सास्मि शब्दो ईशब्दस्यार्थे ॥ अई समाप्ते सत्रे उत्थानं परित्यागः सा
स्युत्थानं ॥ सास्मित्वा ईं जुगुप्सित इत्यमरः ॥ असमाप्तमेवेदं सत्रं त्याज्यमित्यर्थः ॥ लौगाक्षिर्मुनिरेवं म
न्यते स्म कार्ष्णाजिन्यभिमतात्कुलसत्रपक्षात्सास्युत्थानं च रमिति ॥ तन्मते हि बहूनां वृथा प्रयासेभिस्म
र्णीतेस्मणेमेवेति ॥ अस्य पक्षस्य तदपेक्ष्यो लघुतावत् तु तस्त्वायमपि पक्षोनुपपन्न एव ॥ असमाप्तात्क
र्मणः फलानुत्पत्तेः ॥ तर्हि सत्रविधायवचनबलाद्देवसत्त्रिणां दीर्घायुर्भविष्यतीति पंचमः पक्षोस्तु ॥ मैवं
न ह्यस्य वचनस्यासौ अर्थः संभवति तद्वाचकपदाभावात् ॥ न च कल्पयितुं शक्यते ॥ संभावितापुरुषाणामपि स

॥८९॥
॥देवया०७
त्व

शंतेरेषु प्रवृत्तानां देवानां म्रियमाणानां तत्सत्रविधिबलादायुर्वृद्ध्यदर्शनात् ॥ तर्हि पंचपंचाशतइत्यस्य पुरुषप
रमंगीकृत्य सार्द्धद्विशतानां पुरुषाणामधिकारेभिहिते संवत्सरचतुष्टसहस्त्रं हं वत्सरे त्वं संपद्यते ॥ यत एको
पि त्रिवृत्स्तोमकयागयुक्तः संवत्सरः पंचपंचाशतं तत्संख्याय जमानैः प्रत्येवं कृतभूतैः संबध्यमानस्तत्संख्योभ
वति ॥ तथा पंचदशाद्वयोपीति ॥ तेन चतुःसंवत्सरमिदं सत्रवर्द्धतियैर्यजमानः प्रत्येवं कुर्वत्सहस्त्रासंवत्सरं भव
तीतीः षष्ठोस्तु ॥ सोप्यनुपपन्नः ॥ चतुर्विंशतिपरमाः सत्रमासीरन्निति वचनादधिकानां तत्राधिकाशभावात्
तस्मात्संख्याशब्दयोर्मध्ये अन्यतरस्य गौणत्वमाश्रित्य मनुष्याधिकार आश्रयणीयः ॥ स तत्रापि संख्याशब्दस्य
मुख्यत्वादेकार्थसाधनत्वेनार्थनिश्चयासामर्थ्यात् गौणं भवति ॥ तर्हि यो मासः स संवत्सरशब्दस्य मासपरत्वे स
तिसहस्त्रमासं सएव निश्चयसामर्थ्याच्च न स्वार्थत्यागतसंवत्सरपदं तु जघन्यत्वात् सावनसौरचांद्रनक्षत्राद्यने
कार्थ तत्सत्रमित्येषसप्तमः पक्षोस्तु ॥ सोपि नोपपद्यते यतः अष्टमे वर्षेऽपनीतो द्वादशवर्षाणि वेदानधीत्य वे
दवस्को विवाहं कृत्वा जातः पुत्राग्नीनादधीत तस्मादाधानादूर्ध्वं ज्योतिष्टोमानुष्ठानोत्तरकालमस्यायुषि न सं
भवति सहस्त्रमासाः ॥ तर्हि संवत्सरप्रतिमा वै द्वादशरात्रय इति प्रयोगाद्धोमं पक्षं सिद्धांतमाह ॥ ॥ आक्रांवाश

॥८५॥
॥भाष्यं॥

कत्वात् ॥ वाशब्दोवधारणे अक्काभेवैतत्सहस्त्रं प्रत्येवक्य ॥ नववर्षाणां नवमासानां नापि द्वादशरात्रीणा
मिति ॥ कुतः ॥ अशक्यत्वात् ॥ नह्यन्यथैतत्सत्रं मनुष्यैः कर्तुं शक्यते ॥ अथवाशक्यत्वात् ॥ अह्नां संवत्सरशब्दे
न प्रतिपादनेमनुष्यैरपि कर्तुं शक्यत्वात् ॥ मुख्यार्थस्मिंश्चगौरीणी वृत्तिराश्रयीत एव ॥ अन्यानर्थक्यापत्तेः न चा
त्र मुख्येर्थः संभवतीप्रागुक्तं ॥ अतोवश्यंभाविनि गौणपरत्वे दिवसपरत्वं युक्तं वृक्षादिशब्दानुगुणात् ॥ तत्त्रि
वृत्पंचदशः सप्तदशइत्येते शब्दाः स्तोमवाचकाः स तः स्तोमयुक्त एकैकस्मिन्नहनि यागरूपलक्षणया वर्त
ते सत्रे तु तथाविधप्रयोगबाहुल्यात् ॥ न त्वहः संघेक्वचिदपि त्रिवृदादिशब्दाः युक्ताः ॥ तेश्च शब्दैः समानाधिक
रणात्संवत्सरशब्दः स्वावयवभूतेऽहनि लक्षणया वर्तते ॥ त्रिवृतः संवत्सर इत्युक्ते त्रिवृत्स्तोमकयागयुक्ता
न्यहान्यमकयागयुक्तन्यहानीत्युक्तं भवति ॥ ननु संवत्सरं शब्दस्याह्निवृत्तौ किं प्रमाणमित्यत राहुक्ते त्रिवृ
त्स्तोमकयागयुक्तागन्यहानीत्युक्तं भवती ॥ ननु संबंधवत्सरशब्दस्याह्निवृत्तौ किं प्रमाणमित्यत आह ॥ ॥ श्रु
तिसामर्थ्यात् ॥ अन्यपि संवत्सरशब्दस्यार्थवादोदितं प्रवृत्तिनिमित्तमस्त्येव ॥ श्रूयते हि आदित्यस्तोत्राह ॥ ॥
श्रूयते तत्सामर्थ्यात् ॥ ॥ अन्यपि संवत्सरशब्दस्यार्थवादोदितं प्रवृत्तिनिमित्तमस्त्येव ॥ श्रूयते हि आदित्यस्तु

॥९०॥
॥देवया०॥
ती

मेवतद्देवसेयं॥ किंच॥ प्रकृत्यनुग्रहाच्च॥ प्रकृतेर्गवायनद्वादशाहदेवेवमनुग्रहः॥ कृतो भवति॥ प्रकृतौ हि स्त्रयहान्येव
संख्येयानि॥ इहापि यद्यहान्येव तथा भवेति तर्हि प्रकृतिरनुग्रहीता भवति नान्यथा॥ तस्माहत्सहस्रादिनात्मका
मेतद्विश्वसृजामयनसंज्ञकं सत्रं मनुष्याणामेव भवतीति सिद्धं॥ अथेदं विचार्यते॥ एकप्रयोगवचनेनचोदितानां
एकफलानां संहत्यकारिणां सहशांगभागानुष्ठानां किं तत्र तत्रेणैव भवति उत पृथक्पृथगिति॥ तत्र तदर्थं प्रथमं
संहत्यकारित्वं प्रतिपाद्यते॥ यदि ह्याग्नेयादयः षडपि परस्परानपेक्षस्वर्गं साधययुः ततस्तेषां कामिनः कर्तृ
त्वेन युगपदुपस्थानाभावात् पृथक्पृथगेव स्वांगयुक्ताः कर्तव्या इति तन्त्रत्वं न सिध्येत॥ तस्मात्संहत्यकारित्वं
प्रतिपाद्यते॥ तत्र दर्शपूर्णमासादिशब्देनैकप्रधानसंनिपाते संदेहो भवति॥ किमाग्नेयादयः पृथक्पृथक् स्वर्गं
साधयन्ति उत संहत्येति॥ तत्राग्नेयादिशब्देनैकप्रधानसन्निपाते संदेहो भवति भिन्नचोदनाभिः॥ पृथग्भूतानामुत्पन्ना
ति पृथगेव फलमाकांक्षन्ति॥ ततस्तत्रतत्सन्निधौ स्वर्गादिफलं श्रूयते माणं भेदेनकांक्षितत्वाच्छेदेनैव तत्सावबध्यते
मप्येतेषामेव फलं॥ कुतः॥ यातो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेनवा तस्मात्प्रतिप्रधानं फलभेदप्रा
प्तेरुच्यते॥ पृथग्भूतानामाकोनसर्वाण्येकेन दर्शपूर्णमाससंशब्देनोपादायतेषां फलसंबंधः॥ अतः समुदिते

॥९०॥
॥कार्यं॥

भ्यः फलं गम्यते॥ न भेदेन॥ यथा ग्रामेण कूपः खनेयो ग्रामेण तडागः॥ वेयइति ग्रामशब्देन समुदायवचनेन सं
सृज्य विधीयमानः कूपः समुदितैः पुरुषैरेकः खन्यते न प्रतिपुरुषं कूपभेदः एवमिहापि॥ नात्र यागमुद्दिश्य
फलं विधीयते स्वर्गेण यागं कुर्यादित्येवं किं तर्हि फलमुद्दिश्य यागो विधीयते स्वर्गं यागेन कुर्यादिति॥ तस्मात्फ
लोद्देशेन विधीयमानानां विवक्षितं साहित्यमिति सिद्धं संहत्यकारित्वं॥ एवं सिद्धे संहत्यकारित्वे प्रस्तुते विचा
रः किमेषां पृथक्पृथगंगानुष्ठानमुत तन्त्रेणेति॥ तत्र प्रतिप्रधानं पृथक्पृथगनुष्ठानं प्राप्नोति॥ प्रधानानि बहू
नि॥ अंगवन्ति च प्रत्येकं संपाद्यानि॥ न च पृथक्पृथक् अंगानुष्ठानं विना प्रत्येकमंगवत्त्वं संपद्यते॥ यतः षडप्याग्नेया
दिभावनाः साध्यसाधनांशयुक्ता उत्पत्तिप्रयोगवाक्याभ्यामगतापरस्परानपेक्षा एवकथमिच्छन्ति भा
वं भेदनैरपेक्षते॥ तद्वशाच्च संनिधिसमाम्नातान्यंगानि प्रत्येकमेव तासु विनियुज्यन्ते विनियोगानुसारेण
चानुष्ठानं॥ तस्मादेकैकं स्वांगयुक्तं कर्तव्यमित्येकं सांगं कृत्वा परमपि तथैव कर्तव्यं॥ तस्मात्प्रतिप्रधानं पृथगेवां
गानुष्ठानं कार्यमिति प्राप्ते आह॥ ॥ हा॥ कर्मणां युगपद्भावस्तन्त्रं॥ यत्र प्रधानकर्मणां युगपद्भावः सह
प्रयोगः तत्रांगानुपकारिणामंगानां तन्त्रेण सकृदनुष्ठानं भवति॥ न प्रतिप्रधानं पृथक्पृथक्॥ यदि सकृत्कृतं तेन

॥९१॥
॥देवया०१

प्प

हूनामुपकरोति॥ तंत्रंत्रमित्युच्यते॥ यथा बहूनां मध्ये कृतः प्रदीपः॥ कुतस्तंत्रमिहत्वाकांक्षायां त्रीन्हेतूनाह॥
शक्यपुरुषार्थकृतत्वैकार्थसमवायश्चेति॥ प्रधानकर्मणां सहस्त्रां प्रयोगे सति यदंगानां सकृदनुष्ठा
नमुक्तं॥ तत्कुतः॥ शक्यत्वात्॥ सकृदनुष्ठिते राराढुपकारकैरंगैर्बहूनामपि प्रधानानामुपकारस्युपका
रस्यकर्तुं शक्यत्वात्॥ शक्नुवंति ह्याराढुपकारकाणि बहूनामुपकर्तुं स्वग्रहमाणविशेषात्॥ प्रदीप
वत्॥ यथा एक एव प्रदीपो बहूनां मध्ये कृतः सन्सर्वेषामुपकरोति॥ एवमोतान्यापीति॥ यद्यप्यंगानां
प्रत्येकमेव विनियोगस्तथापि विधानानवदनुष्ठानं सकृदेवोपकारकं भवति यथैव हि षड्सु भावनभेदे
नैवकथंभावमपेक्षमाणास्वपि सकृदाम्नाताएवांगविषयः षण्णामपि प्रत्येकमंगानि सत्यपि च कस्यचित्प्र
धानांत्यत्रिविधि सन्निधौ प्रकरणवशेन सन्निधिर्बाध्यते॥ तएवं संहतानां फलसाधनत्वात् देशकाल
कर्त्राद्युयुगपत्सर्वेष्वनुष्ठाने रक्षेषु सकृतमेवांगं सर्वं चिकीर्षया कृतत्वात्समतमपि केन च तत्सन्निधिबाधप्र
करणवशेन सर्वार्थं भवति॥ किंच पौर्णमास्यां पौर्णमास्यां यजेतेति त्रयाणां युगपदनुष्ठानं॥ तथा॥ पुरुषा
र्थकृतत्वाच्च यतः सकृदनुष्ठितैरप्यंगैः पुरुषार्थः कृत एव भवति॥ पुरुषार्थः पुरुषस्याभीष्टफलं॥ तद्धि

त्वा

॥९१॥
॥भाष्यं॥

आग्नेयादिभिरंगोपकृतैः क्रियायते॥ आराढुपकारकाणि चांगान्यनेकघटादिप्रकाशकप्रदीपवत्सर्वेषां॥ सहै
वोपकुर्वंति सकृतैरपि पुरुषार्थाः कृत एव भवती॥ तथा॥ एकार्थसमवायश्चेतेष्वांगानां न तंत्रं भवती॥ एको
र्थो यस्य सा वैकार्थ एककालो यः प्रधानानां समवायः॥ तत्र एकार्थसमवाय एकफले प्रधानसमूहे अं
गानां तंत्रश्चेतेः॥ अंगानां सकृदनुष्ठानं श्रूयते यतः॥ तथाहि॥ ताएकविंशतिराहुतयो द्वावाघारौ
पंच प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्धृशाग्नीषोमीयउपांशुयाजोग्नीषः पुरोडाशोग्निः
स्विष्टकृदिडा त्रयोनुयाजाः सूक्तवाकश्चसंयोर्वाकस्त्रायदेवाद पत्नीसंयाजेषु संप्रगृह्णातिस
मिष्टयजुश्चेति तत्राग्नेयोपांशुयाजाग्नीषोमीयलक्षणैकफले प्रधानसमवाये आहुतीनामेकविं
शतिसंख्या श्रूयते॥ सा चांगानां सकृत्करणपक्ष एवोपपद्यते॥ न प्रतिप्रधानं पृथगनुष्ठानपक्षे॥ तस्मा
त्प्रधानानां सह प्रयोगे सदा कृदेवाराढुपकारकाणां क्रिया॥ संनिपत्योपकारकाणां प्रति प्रधानं आवृत्ति
रिति तु प्रागुक्तमेव॥ अथ प्रधानानां सहाप्रयोगे कारणमाह॥ ॥ फलकर्मकालद्रव्यदेवतापुण
सामान्ये॥ ॥ यत्रैकेन वाक्येन बहूनि प्रधानकर्माणि एकफलसाधनत्वेन विधीयंते तत्र लेषामित

रंतरस्यापेक्षासाधनत्वेन विधानात्सहप्रयोगः॥ तद्यथा मित्रविंद॥ श्रीराष्ट्रमित्रायुःकामस्येति वैश्वदेवे
न प्रजाकामं याजयेदिति॥ अत्र मित्रविंदाशब्देन समुदायवचनेन दशानां हविषां संप्रयोगः॥ वैश्वदेवशब्देन
च समुदायवचनेनाष्टानां हविषां सूत्रार्थसु॥ सामान्यशब्दः प्रत्येकं संबध्यते॥ फलसामान्ये देवशसामान्ये
कालसामान्ये द्रव्यसामान्येण योः सामान्ये इति॥ एकवाक्येन कं फलसाधनत्वेन विधाने पि फलादिसामा
न्ये सत्येव प्रधानानां सहप्रयोगः इति॥ फलं स्वर्गादिः कर्मपं च प्रयाजा तान्यनुयाजा इत्यादि॥ शः॥ समं प्राचीनप्र
वणादिः॥ कालः पूर्वाह्णमध्याह्नापराह्णादिः द्रव्यं दक्षिणाद्रव्यं॥ अनेकेषु प्रधानकर्मसु तद्भेदस्याव
श्यंभावात्॥ देवता प्रजापतींद्रादिः तत्तद्गुणउपात्केत्यादिः न स्मित्सति प्रदानमपि सहैव भवति॥ न पृ
थक्॥ ॥ तद्भेदे भेदः॥ ॥ तेषां फलादीनां दस्तद्भेदः॥ तद्भेदे तेषां फलादीनां सहप्रयोगकारणानां
भेदे सति प्रधानप्रयोगभेदो भवति॥ तत्र प्रयोगवचनभेदान्मित्रविंदाप्रतिकामाग्नेययोर्यनं सहस्त्रप्र
योगः॥ फलभेदात्तु श्रीकामराष्ट्रकाममित्रकामायुःकामापित्रविंनां पृथक्प्रयोगः॥ कर्मभेदेपि प्रयो
गभेदो भवति॥ तद्यथा कस्यचित्प्रयाजता कस्यचिन्नव प्रयाजता॥ यथा क्रैडिनीयां महाहविषः॥ त

त्र सहत्वेइतरेतरस्य गुणत्वं भवति॥ देशभेदापि तत्र भेदो भवति॥ यथा वरुणस्य प्रयासे षुमारुत्याः॥ क्रै
डिनी महाहविषोश्च॥ क्रैडिन्याः समो देशः॥ महाहविषस्य प्राचीनप्रवणः॥ कालभेदे पि सहप्रयोगो न
भवति॥ यथा दर्शस्य पौर्णमासस्य च॥ पौर्णमास्यां पौर्णमास्यां यजेतामावास्यामावास्यायां यजेतेति
वचनेन कालभेदेन तयोर्विधानात्॥ यथा वा अनीकवती सांतपनीययोः पूर्वाह्णमध्याह्नरूपकालभे
दात्तत्र भेदः॥ दक्षिणाद्रव्ये के सति सहप्रयोगो राजा सूयत्रयाणां त्रिषंयुक्तानां॥ येषां मते च त्रिषंयुक्तानां
त्रयाणामप्येकस्मिन्नेवाहन्यनुष्ठानं॥ तेषां दक्षिणाद्रव्यभेदेन त्रयाणां त्रयाणां पृथगनुष्ठानं॥ न स्वे
षां सहस्त्रप्रयोगः दक्षिणाभेदश्च त्रयाणां वामनां त्रयाणां श्यामा त्रयाणां बभुरिति॥ तत्र दक्षिणाभेदा
दानाति भेदः॥ तद्भेदात्तेन तस्य स्वरूपस्य भेदः॥ वामनानते हि पूर्वं कर्म कर्तव्यं॥ श्यामानते उत्तरं॥ तं त्वे त्वे
त्स्भामानताउभयं कुर्युः॥ तत्र दक्षिणाव्यवस्थागम्यमानां वामध्ये ते॥ तस्मात्प्रति दक्षिणं तत्र भेदः॥ अत्र
त्र एकवाक्ये नैकफलार्थमेव विधान देशकालकर्मैक्ये सत्यपि दक्षिणाभेदात्तत्र भेदः॥ देवतायाः॥ देवता
गुणस्य च सामान्ये सति उच्चारणमपि तस्याः देवतायाः आवाहनत्यागादौ तंत्रेण भवति॥ यथा सप्तदश सूत्राप्रजा

प्रा

॥९३॥
॥देवयाज्ञ॰१

पत्येस्रुवाजुपेये प्रजापतेर्देवतायाः समानत्वात्तद्गुणस्योपांशुत्वस्य समानदनुवाचनादौ तंत्रेणोच्चारणं मंत्र भवति
यागोपि वर्गतंत्रेणैवं भवति ॥ तथा च प्राजापत्यात्प्रकृत्य श्रूयते एकानुवाक्या भवत्येका याज्यैकदेवत्या हि प्राजापत्या
यत्तु पांशुत्वाच्छागानां हविषोनुब्रूहीति तत्र त्रानुवाक्याद्येकत्वे एकदेवत्यत्वं हेतुत्कं भवति एकदेवताकानां सि
द्धं तंत्रोच्चारणं दर्शयति ॥ दर्शपूर्णमासयोरेव द्रव्यभेदे पि दध्नः पयसश्च देवताया इंद्रस्य तद्गुणस्य चाग्नावत्तस्य च समा
नत्वात्तंत्रेणैव याग उच्चारणं न भवति ॥ यथा प्रकृतावेवोपांशुयाजाग्नीषोमयोः पुरोडाशोग्नीषोमयोश्च ॥ इह देवता
तद्गुणयोः सामान्ये यागस्य तंत्रेणानुष्ठानमुच्यते ॥ अत्र सिद्धमेव देवतागुणसामान्ये तंत्रेण यागानुष्ठानमुपजी
व्य द्रव्यभेदे यागस्य भेदेनानुष्ठानं पूर्वं निषिद्धं न द्रव्यभेदे गुणयोगादिति वा तस्य इति न पुनरुक्तिदोषः ॥ देशैकत्वका
लैकत्वे च प्रधानानां सहत्वप्रयोग उक्तः ॥ अथ देवदेशकालैकत्वं चिंत्यते ॥ दर्शपूर्णमासयोराग्नेयादीनि प्रधानानि
तत्र देशकालौ श्रूयते ॥ समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेतामावास्यायामावास्यया यजेतेति ॥ तथा चातु
र्मास्येषु प्राचीनप्रवणे वैश्वदेवेन यजेत वसंते वैश्वदेवेन यजेतेति ॥ किमेतौ दर्शपूर्णकालौ ॥ तत्र मुतभेदेनेति यस्मिन्नेव
वसमे यस्यामेव च पौर्णमास्यामाग्नेयस्तस्मिन्नेव समे तस्यामेव पौर्णमास्यामग्नीषोमीय इति उत समानतरे पौर्णमा-

९३
॥शोध्यं॥

स्यां तेरे इति ॥ तत्र पूर्वपक्षमाह ॥ ॥ देशकालोविरोधे ॥ ॥ एतौ देशकालावंगत्वाद्द्रव्यदेवतद्युत्पत्तिविधिशेषौ प्र
तिप्रति प्राधान्यं भिद्येते ॥ अतस्तत्र स्यागानां सह दनुष्ठानस्य विरोधे वर्त्तेते विरोधकावित्यर्थः ॥ त्रयाणां मंशानां
भावतन ये व संबंधो न परस्पर ॥ अतो देशादितिधीषां वाक्यस्यैव च न मिथः संबंधः किंतु फलवाक्यं देशादिवाक्यानि
च सर्वाणि भावनोत्पत्तिवाक्ये न संबध्यते ॥ उत्पत्तिवाक्येषु चाग्नेयादयोन्योन्यनिरपेक्षा एव गता इत्ति तथा भूतैः
संबध्यमानो देशकालावपि निरपेक्षमाणमेव भवतः ॥ तस्माद्यथा यद्भ्याप शुनेत्यस्मिन्वाक्ये तेत्राभिहितार पी
ष्टिभिः प्रत्येकमेव कृत्स्नः संबध्यत इति नैकस्यामेव पौर्णमास्यां सर्वाः क्रियंते ॥ न थान्वाग्नेयादिभिः प्रत्येकमेव का
लादीनां संबंधादेवस्या एव पौर्णमास्यमाग्नेयं कृत्वा परस्यामग्नीषोमीयमित्येवं षट्स्वपर्वसु षडंगाः कर्त्तव्या
ः ॥ न चैवं फलवाक्यावागतस्साहित्यबाधः ॥ तत्र ह्येतावदवगतं ॥ एकमेव फलं सर्वैः साध्यते ॥ न प्रत्येकफलस्य
पृथङ्निष्पत्तिरिति न कालभेदाद्बाधः ॥ यथा पौर्णमासी त्रिके अमावास्या त्रिके च द्वयोः पर्वणोर्निःकृष्य
याणेपि न फलं प्रति साहित्यं बाध्यते ॥ तथा षण्णामपि निःकर्षे दृष्टव्यं यदा चैव समुत्पत्तिवाक्यशेषत्वं कालादीनां
दोषवाक्ये प्रधानमात्राणां निरंगाणां विधानात्तन्मात्राणामेवानुदेशकालौ नांगानां प्रधानदेशकालत्वं

तानि तु कामकालांतरादिष्वपि कर्त्तव्यानीति प्राप्ते सिद्धांतमाह ॥ ॥ न कृत्स्नोपदेशात् ॥ ॥ यदुक्तं देशकालवदु
त्पत्तिविधिविशेषात्वाद्द्रव्यदेवतत्प्रतिप्रधानं भिद्यते इति यच्चोक्तं प्रधानमात्राणं निरंगाणां विधानं
देशात् ॥ कृत्स्नानां प्रधानानां संगानां तस्मिन् देशे तस्मिन् काले चोपदेशात् प्रयोगवि
धिना विधानात् ॥ तथा हि ॥ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येकेन शब्देनाग्नेयादीनां पृथगुत्पन्नानामपि
परस्परसाहितात् विधानात्तावपि प्रयोगे शेषा वेच नोत्पत्तिभावनेयेवांगानां संबंधो न परस्परं ॥ तथापि नोत्प
त्तिवेलायां मंगसंबंधः सा हि प्रथमं भाव्यमेव रुते ॥ तद्धाभस्य फलवाक्ये ॥ तेन फलवाक्याव रूढानामुत्पत्ति
वाक्यानां मां बंधः ॥ फलवाक्ये च फलं प्रति विहितसाहित्यानां विनियोगात् फलार्थिनां युगपत्सर्वेष्वकर्त्तव्यता
वगति यस्यां हि द्वावाग्नेयः कर्त्तव्यतायोपतिष्ठते तस्यामेवाग्नीषोमीयादयोपि प्रयोगविध्येकवाक्यत्वात् तेन
सर्वेष्वकर्त्तव्यतयोरुपस्थितेषु किंचिद्विकीर्षितेषु च पौर्णमासीकालो विहित इति इयेकेव पौर्णमास्युपात्ता ॥ सैवा
गृह्यमाण विशेषत्वात् सर्वेषां भवती तथा देशोपि ॥ तस्मात्तत्र देशकालौ सौर्यादीनां पृथगेव कर्त्तव्यतावगमो ॥ मा
नाविधिधेयत्वात् ॥ तेवतैरन्योन्यानपेक्षैरेवयइष्येत्येवमादि ॥ नाकालः संबंध्यते इति नास्तितंत्रत्वं ॥ यदाये

वं प्रयोगवाक्यशेषत्वे कालादीनां तदंगानामपि तत्कालत्वे सिद्ध्यति ॥ तथा हि साध्यसाधनांशयुक्तावगता भा
वना कथमिति त्यं भावमपेक्षते ॥ भावनागतस्वारूपविशेषइच्छभावः ॥ प्रतितरूपाच्च भावनाकालादीनापेक्षते
ते न प्रकारपेक्षायां भावनायां तत्प्रकारत्वेन प्रयाजादिष्ववगतेषु सामस्त्यरूपेण भावनाख्येव्यपारे प्रयोगाप
रपर्यायेवगते न तच्छेन कालादसो विधीयेत इत्यंगानामपि तत्र एव देशादयो भवति ॥ द्रव्यदेवं पुनर्न समस्त प्रयो
गसंबंधित्वेन विधियते अनपेक्षितत्वाच्च ॥ नह्यन्वाधानबर्हिस्तरणाद्यनुरक्तस्य प्रयोगस्य द्रव्यदेवता
पेक्षा नापि तन्नित्यन्नो द्रव्यदेवतं सरमर्थं किंतु फलभावनावयवयागरूपनिष्पादने न द्रव्यदेवतामपेक्षित
त्वाद्योग्यत्वाच्च संबध्यते ॥ तस्मान्न प्रधानसंबंधि द्रव्यदेवतमपेक्षितत्वाद्योग्यत्वाच्च संबध्यते ॥ तस्मान्न प्र
धानसंबंधिद्रव्यदेवतमंगानां भवति ॥ कालादयस्त्वाग्नेयादिकरणकयाय फलसाधनयासमग्ररूपया संबं
ध्यमानास्तदंगमंगानामपि भवंति विशेषः अतः सचूकं कृत्स्नोपदेशात् इति ॥ एवं वैश्वदेवादिष्वपि प्रधानानां
मंगानां च देशे काले च कृत्स्नोपदेशो ज्ञेयः ॥ केचिद्देवं व्याचक्षते ॥ ॥ देशकालौ विरोधे ॥ ॥ कर्मादीनां सहत्वेका
रणानां परस्परं विरोधे सति देशकालौ बलवतो ॥ नान्यानि ॥ कुतः ॥ सह प्रयोगस्य शब्दादवगतत्वात् ॥ कर्मसा

॥ ९५॥
॥ देवया० १

मान्यादेरशाब्दत्वादिति । तथा हि कचातुर्मास्येषु पर्वणां कर्मभेदे दक्षिणाद्रव्यभेदे ऽपि देशकालैक्यादेव सहप्रयोगः
यथा च फलभेदेन कर्मभेदे ऽपि समानतंत्रे आग्रयणेषु नासीरीयो ऽपि सौर्यस्य दक्षिणाभेदे ऽपि देशकालैक्यादेव स
हप्रयोगः तस्माद्विरोधे देशकालावेव बलवंतौ । तौ च समानौ । तर्हि कर्मादिष्वसमानेष्वपि तंत्रैक्यं भवत्येवेति ।
अस्मिन्व्याख्याने न कृत्स्नोपदेशादित्येतत्सूत्रं पूर्ववदुत्तरसूत्रं पूर्वपक्षमुत्थाप्य पूर्ववदेव व्याख्येयं अथेदं चिं
त्यते । प्रकृतौ ज्योतिष्टोमे सोमक्रयोत्तरकालं आतिथ्यं ततोपसदः ते च सुब्रह्मण्याह्वानं श्रूयते । तत्र चैवं
निगदो ऽस्ति । इत्यहे सुत्यामागच्छ मघवन्निति ब्रूयादिति । इतिकरणेन वसंख्योच्यते । त्र्यहे सुत्यामाग
च्छ द्व्यहे सुत्यामागच्छेतेत्येव ब्रूयादित्यर्थः । तदिदमप्रधानकालत्वाद्द्वादशाहे तंत्रं भवति । अप्रधानकाल ऽस्य
कृदसन्निपातादिति वक्ष्यमाणन्यायात् । न हीदं प्रधानकालं उपसत्कालेषु सकृदनुष्ठितमेव सर्वेषामुप
करोतीति तंत्रमेव भवति सुत्याकालीनं तु प्रधानलक्षणत्वात् प्रतिसुत्यमावर्त्तते । तत्रोपसदातिथ्याक्रयका
लीनं तंत्रेण क्रियमाणेषु ब्रह्मण्याह्वानेषु संदेहः किं सर्वेषामह्नां पृथक्पृथगुपलक्षणं । द्वादशाहे त्रयोदशा
हे इत्येवं उत तंत्रेण द्वादशाह इत्येव । तत्र पूर्वपक्षमाह ॥ अहर्गणेषु ब्रह्मण्यायाः सर्वोपलक्षणं प्रकृतिवत् ॥

॥ ८५॥
॥ भाष्यं ॥

॥ ॥ अहर्गणे द्वादशाहादौ उसत्कालीनायाः सुब्रह्मण्याया निगदे सर्वासां सौत्यानामह्नामुपलक्षणं क
र्त्तव्यं प्रकृतिवत् । यथा प्रकृतौ त्र्यहे सुत्यामित्युक्तं । इह तूपसदह्नां सदह्नां द्वादशसंख्याया विकृतत्वाद्द्वादशा
ह इति वक्तव्यं । तत्र प्रकृतावेकं सौत्यमहरुपलक्षितं । इह तु । त्वं त्र्यहेतीति सुत्यं प्रत्यागच्छेति । इह तु द्वादश
सौत्यान्यहानि । तेन हापि प्रकृतिवदेव तानि सर्वाण्युपलक्षणीयानि । न चाहःशब्देनाग्रह्यमाणविशे
षत्वात्सर्वोपलक्षणं सिद्ध्यतीति वाच्यं । संख्याशब्देन शेषग्रहणात् द्वादशाहे आगच्छेत्युक्ते प्रथमस्यैव
सौत्यस्याह्न उपलक्षणं न द्वितीयादेः । तस्माद्द्वितीये सौत्यस्यात्र त्रयोदशाह इत्येवं प्रयोज्यं । तृतीयस्यार्थे च तुर्द
शाह इत्येवं द्वादशार्थे त्रयोविंशाहे । सुत्यामिति एवं सर्वेषां सौत्यानामुपलक्षणे प्राप्ते सिद्धांतमाह ॥ तं
त्रकालकर्मप्रत्यहमविधानात् ॥ तंत्रेत्यर्थे कालसंयुक्तं कालकर्म । तद्द्वादशाहे सुत्यामागच्छेत्येवं तंत्रे
ण सकृत्सुत्याशब्दोच्चारणेनैव कर्त्तव्यं । ननु प्रतिसुत्यं त्रयोदशाहा इत्यादिना पृथक् सुत्याशब्दोच्चारणेन
। कुतः प्रत्यहमविधानात् । न ह्येवं विधानमस्ति यत्प्रत्यहं प्रसुत्यमुच्चारणं कार्यमिति । ननु प्रकृतिवद्धि कृति
कर्त्तव्येति चोदकेन विधानं भविष्यति । प्रकृतावेकं सौत्यमहस्तस्योपलक्षणं कृतं त्र्यहे तु सुत्यामागच्छेति । अ

कर्म

॥९६॥
॥देवया०१

तः प्रकृतिवद्देवविकृतासर्वास्याहान्नुपलक्षणीयानीति ॥ अत्रोच्यते ॥ न हि प्रकृतौ सुत्योपलक्षणं किंचित्कीर्त्यि-
तं ॥ तर्हि तयोपलक्षिया किंचिद्दृष्टं प्रयोजनमस्ति ॥ अतो दृष्टमेव कल्प्यं ॥ अत्र तु सुत्यामागच्छ मघवन्निछित्येवं
सुत्यासंबंधी देवतेंद्रस्य रणरूपस्थां संस्कारमात्रं विवक्षिते ॥ संस्थाशब्दो हृशबृश्वार्थसिद्धत्वादविवक्षित
निर्देशमात्रं विवक्षितेनिर्देशमात्रं ॥ तत्र स्मरणमुपसत्काले कानामान्नाःसुब्रह्मणद्वारेण तेनाहर्गणेये
नकेनविदाज्ञाकृतं स्मरणमितिनाहंतरप्रकाशनेनार्थः ॥ तत्रात्मेवाज्ञाविशेषितमह्नां गणेन मकर्मकाः
लत्वाद्वाग्रह्यमाणविशेषं सर्वेषामुपकारोतितस्माद्दाघे क्रयणीयेहविद्वादशाहेनिद्वादशाहे सुत्यामाग
छेतिकर्त्तव्यं द्वितीयेतुएकादशाइति तृतीये तु दशाहइत्येवं सर्वेषु ॥ मघवन्नेहेंद्रद्वादशाहेति ते सति ॥९६॥ ॥भाष्यं॥
सुत्यां प्रति भावतां गतत्वमिति ॥ एवमेतद्विंद्रस्य सुत्यां प्रत्यामंत्रणं नुचास्मिन्नपि प्रहेऽदृष्टमेव प्रयोजनं
दृष्टस्याभावात् ॥ यतइंद्रस्य सुत्या प्रत्यामंत्रणं नुचास्मिन्नपि प्रहेऽदृष्टमेव प्रयो[illegible] मीमांसकैरंगी
कारात ॥ इंद्रशब्दस्यैवात्रे देवतास्यं नचशब्दस्यामंत्रणश्रवणमागमं नवाधये ॥ सत्यं ॥ अनेन प्रकारेणयाग
एवस्तुयते ॥ येनतत्साधनान्यचेतनान्यपिचेतनवत्संस्कृतसते ॥ यथाश्रोतारोग्रावाणःइतिहग्रावाणः

श्टएवंति ॥ तथा सुत्यर्थमेवव च्यते ॥ यथा ॥ तथाश्टणे तु देवस्सविताहवंमइतिवा ॥ एवमनागछंत्वं पीदस्याग
छेतीव ॥ अश्टएव न्नपि सताश्टणे तीतिवे ति ॥ ननुयागस्तुत्या किं प्रयोजनं ॥ उच्यते ॥ दृष्टमेव यजमानस्यो
त्साहोत्पादनं सुत्योपलक्षणेपुनर्दृष्टस्यलेशोपिनास्तीतिदेवतास्मरणपक्षाएवश्रेयान् ॥ अथेदं वि
चार्यते ॥ ब्रह्मन्वर्हिरुद्देति मैत्रावरुणदंडेनशमंत्रं त्रिःपर्यूषति ॥ स्फ्येनपदं त्रिःपरिलिखति ॥ अस्मेरमस्वे
ति त्रिरग्निंसमीक्षीति तत्र क्रियावृत्तौ मंत्रस्याप्यावृत्तिप्राप्तोसिद्धांतमाह ॥ ॥ एकद्रव्येकर्मावृत्तौ सकृन्मंत्र
वचनंकृतत्वात् ॥ एकस्मिन्द्रव्ये शूपावसाप्स्दाग्न्यादिके कर्मावृत्तौ क्रियावृत्तौ अभ्यासेन सकृदेकवार
मेवामंत्रवचनं मंत्रपठनं कार्यं नप्रतिक्रियं ॥ कुतः ॥ कृतत्वात् ॥ मंत्रनयणत्कर्त्तव्यपदार्थस्मारणं तस्य कृ
तत्वात् ॥ अपि च वस्तुतस्त्वक्रिभेदएवनास्ति ॥ किंतर्हिसाभ्याडंयमेकैक्रिया ॥ तस्याआदौ च मंत्रवचनमु
क्तं ॥ तेन सर्वावृत्तीनामादावेव कर्त्तव्यं ॥ अथेदं चिंत्यते दर्शपूर्णमासयोःश्रूयते चतुरो मुष्टीन्निर्वपतीति
अयुह्रो मुष्टीतुनाति ॥ त्रिधातुपंदधातु वावेदिंस्तृणातिचतुर्जुहोतीति च ॥ तत्र मंत्रः ॥ देवस्यत्वेति ॥ ब
र्हिर्देवसदनंदामीति ॥ ऊर्णम्रदसंत्वास्तृणामीति ॥ धामनासीति च ॥ ते किंसकृत्प्रयोक्तव्याः ॥ उत निर्वप

॥९७॥
॥देवया०॥

णे लवने च प्रतिमुष्टिस्तरणे प्रतिधातु ॥ आज्यग्रहणे प्रतिस्रुवं भेदेनेति संशये ससंख्यानामेककर्मत्वा
त्पूर्वाधिकरणन्यायेन तदारंभे मंत्राणां सकृत्प्रयोगे प्राप्ते सिद्धांतमाह ॥ न ग्रहणलवनास्तरणा
ज्यग्रहणेषु तु ॥ ॥ तुशब्दोवधारणे हविर्ग्रहणे ॥ बर्हिषो लवने बर्हिस्तरणे आज्यग्रहणे च नैव स
तंत्रत्ववचनं ॥ किंतु हविर्ग्रहणे बर्हिषो लवने प्रतिमुष्टि मंत्रप्रयोगः पृथक्कार्यः ॥ बर्हिषः स्तरणे च प्र

त्वं

तिधातु ॥ आज्यग्रहणे च प्रति ॥ यत्कारणं मंत्रकृतं नास्ति ग्रहणादिषु ॥ ग्रहणे तावदन्य एव व्रीहयः प्र
तिमुष्टि निरूप्यंते ॥ लवने एव चान्य दर्भा ॥ प्रतिमुष्टि लूयंते ॥ बर्हिस्तरणे च प्रतिधातु आन्य देव
स्तीर्यंते ॥ आज्यग्रहणे च प्रतिस्रुवमन्यदेवाज्यं गृह्यत इति तेन यत्रैव मंत्रे प्रयुक्ते स्तस्यैव तत्कृत
संस्कारलाभो जातः ॥ ततः सर्वेषां तत्संस्कारलाभाय मुष्ट्यादिषु भेदेनैव मंत्रप्रयोगो न सकृत् तदितिकः
पदार्थो निर्वापादिः ॥ तथापि प्रत्यभ्यासं संस्कारभेदोभिद्यते ॥ मंत्रवतानिर्वापेन द्रव्यं संस्क्रियतेव्यं ॥ अतो य
स्मिन्नेकमुष्टौ मंत्रो नोच्यते ॥ तस्यैव मंत्रकृतेन संस्कारेण हानं स्यात् ॥ कार्ययुक्तो हि संस्कारो न निजि
या स्वरूपकः कार्यं वा च मुष्टि भिन्नं तस्मात्प्रतिमुष्टि मंत्रावृत्तिरिति ॥ एवं लवनस्तरणाज्यग्रहणेष्वपि

॥९७॥
॥भाष्यं॥

प्र

ज्ञेयं ॥ ॥ वचनाद्दाज्ये ॥ ॥ आज्ये इत्याज्यग्रहणे द्वितीयादिग्रहणेषु चतुर्थी दिग्रहणेषु वा चन्मं
त्रनिवचनान्मंत्रनिवृत्तिर्भवति ॥ स एतेन यजुषा सकृज्जुह्वां गृह्णाति त्रिस्तूष्णीमिति नैव यजुषा सकृदु
पभृति गृह्णाति समस्तकृत्वस्तूष्णीमिति तेनैव यजुषा सकृद्ध्रुवायां गृह्णाति त्रिस्तूष्णीमित्येकं पक्षमभिधा

य

य पक्षांतरमपाह तदाहुः तत्त्रिस्त्रिरेव यजुषा गृह्णीयात्त्रिवृद्धि यज्ञः पुनरपि प्रथमं पक्षमुपसंहर
ति तदु [illegible] चत्रिगृहीतं संपद्यत इति ॥ ॥ मुष्ट्यावोत्तमे ॥ ॥ हविर्ग्रहणे उत्तरे चतु
र्थ्यां मुष्टौ च राद्धवचनादेव मंत्रनिवृत्तिः ॥ श्रूयते हि शाखांतरे चतुर्थं तूष्णीमिति ॥ ज्योतिष्टोमे स्वप्ना
र्थ मंत्रः ॥ अग्ने त्वं सुजागृहीति ॥ तथा नदीतरणे ॥ उदकं चेत्तरेत्तदभिमंत्रयेतोद तीर्बलं धत्ते
ति ॥ तथातिवर्षणे [illegible] यमेवोदंती इति मंत्रो [illegible] तुक्तत्वात् ॥ [illegible] दर्शने सूर्यापिस्था न मंत्रः ॥ अ
वद्धमन इति ॥ तथा दीक्षितस्य वनीवाहने प्रयाणमंत्रः ॥ प्रदेवे ज्योतिष्मानिति ॥ तत्र संशयः ॥ यदी
क्षितः प्रबुद्धः पुनः स्वपिति अनेकशो वनसं वा नदीतरमभिसंततमभिषप्यते ॥ युगपर्याच्चानेका
मेध्यानि पश्यति ॥ पुनः पुनर्विश्रम्य प्रयाति च ॥ तदा किमे मंत्राणामावृत्तिः उत सकृत्प्रयोग इति ॥ त

॥२८॥
॥देवया०१

त्रनिद्रामध्ये प्रबोधे रत्यंर्ग्येवधीयते च बहुस्त्रोतो युक्तादीयेः॥ दृष्टिष्ठ्वविच्छेदेः॥ अमेध्यानि चैदेशेः
प्रयाणे णविश्रामैः॥ तदा एतेतरायेविनिमित्तेषु भिद्यमानेष्व विशेषग्रहणात् नैमित्तिका मंत्रा आ
वर्तनीया इति प्राप्ते सिद्धांतमाह॥ ॥स्वप्ननदीतरणाववर्षणाववर्षणामेध्यदर्शनप्रयाणेषु तु स
कृत्कालद्रव्यैकार्थत्वात्॥ ॥अत्र त्रयो हेतवः कालैकत्वात्॥ ॥द्रव्यैकत्वात्॥ ॥अर्थैकत्वादिति
॥ ॥तत्र यथासंभवं विभागः॥ ॥तत्र पुनः स्वप्ने एकार्थत्वात्॥ ॥सर्वरात्रिगतां कृत्स्नां निद्रामुद्दि
श्य मंत्राभिधानादेकमेव निमित्तं अतः सकृदेव मंत्रप्रयोगः॥ केचिद्विह्निता मनोज्ञं स्वप्नमदृष्ट्वा
जपेदित्युदाहरंति॥ तत्र युगपदनेकस्वप्नदर्शने कालैकत्वात् सकृन्मंत्रवचनमितिव्यवहृते
च॥ तथानंदाद्दृष्टिं च सामेवाभिसंधानयमंत्रं प्रयुंक्ते॥ न चावांतरनिद्रानाप्येकां वर्षधारां तस्मात्स
कृत्प्रयोग तत्र नदीशं तरेणेस्रोतसां भेदेपि नदीद्रव्यस्यैकत्वात् सकृन्मंत्रः॥ अववर्षवर्षणे कालै
कत्वात्॥ अमेध्यदर्शनेपि कालैकत्वादेव प्रयाने ग्रामेणेमसामिहितप्राप्ते रेकं प्रयाणमिति तद
र्थस्य मंत्रस्य सकृदेव प्रयोगः एकार्थत्वात्॥ ॥अथ त्र कालभेदे न पुनस्तदेव निमित्तमापतति॥

॥२८॥
॥ज्योष्यां॥

तत्रापि निसकृन्मंत्रवचनमुतभेदेनेति॥ अभिनिनमेव तदिति कृत्वा सकृत्कृत्वा मंत्रवचने प्राप्ते अ
ह॥ ॥न निमित्तभेदात्॥ ॥कार्यसिद्धिः॥ भिद्यते ह्यत्र निमित्तं तत्तद्भेदाच्च नैमित्तिकस्यावृत्तिर्भवत्येव
॥ ॥अप्रधानकालं सकृत्सन्निपातात्॥ वसंते ब्राह्मणोग्नीनादधीत तेनेनारभ्याधीत मध्यानेऽग्नि
होत्रादीनामंगमिति हृत्वाचिंत्यते॥ किमंगेसदाधानं प्रतिकर्मभेतेन कर्तव्यं॥ न च वहिकालत्वेनागृ
ह्यमाणा विशेषता यद्यस्यानंतरं क्रियते तत्तदर्थमित्यानंतर्येण विशेषग्रहणात्॥ तस्मात्प्रतिकर्मभे
देनाधानप्राप्ता विमुच्यते॥ अतः प्रधानकालं गआधानं दृश्यते तत्सदैव कर्तव्यं॥ न भेदेन कर्मणः कर्म
णआरो॥ कुतः॥ असंनिपातात्॥ न चैतत्कस्यचित्कर्मणः प्रक्रमे कर्ममध्ये वा संनिपतितं येन विशेष
ग्रहणस्यात्॥ किंतु यदेव किंचिदग्निकार्यं निमित्तवशात्कामवशाद्वा यथाकामं प्राप्तं तदर्थमाध्य
स्य ग्रा निति॥ न तु किंचिदेव कर्मविशेषमभिसंधायाधानं॥ एवमनभिसंहितकर्मविशेषणस्सर्वो
देशेनाधाने कृते यद्यपि कारणवशात्किंचित्कर्म प्रथममापतति तथापि तेनानादर्थ्यमेव भवति
प्रथमावस्थायामेव सर्वार्थत्वावधारणात्॥ तस्मादप्रधानकालीनत्वात्सकृदेव कार्यं॥ ॥यूपः

के

॥२१॥
॥देवया०१

॥ ॥अप्रधानकाले सकृदित्यनुवर्त्तते॥ ज्योतिष्टोमे अग्निमेषूपउपदिष्टः॥ सवनीयानुबंध्ययोस्त्वति
दिष्टः॥ स किं त्रयाणामपि पशूनां तत्र तंत्रं॥ उत प्रतिपशुभेदेन यूपउत्पादनीय इति॥ तत्र मुख्यात्वदत
दिष्टः॥ स किं त्रयाणामपि पशूनां तंत्र॥ उत प्रतिपशुभेदेन प्र
ग्नीदिष्टः॥ सवनीयानुबंधस्यायोस्त्वतिदिष्टः॥ स किं त्रयाणामपि पशूनां तंत्र॥ उत प्रतिपशुभेदेन प्र
पउत्पादनीय इति॥ तत्र मुख्यात्वादग्नीषोमीयार्थस्यैव यूपस्यापकर्षादीहास्तु यूपं छिनत्तीति॥ तेन र
योः॥ अतस्तयोः स्वतस्तयोः स्वकालभेदेनोत्पादनीयो यूप इति प्राप्ते सिद्धांत उच्यते॥ यूपोप्यग्नाध्ये
यवदप्रधानकालत्वात्त्रयाणां पशूनां साधारणः सकृत देवोत्पाद्यो न प्रतिपशुभेदेन न हि स्तु
रुयत्वमात्रेण श्रूयते॥ संकोचोत्रतोत्र विशेषोत्सर्वयूपापकर्षस्तत्प्रधानकानत्वादग्रह्यमाण
विशेषो ग्रह्यमाणविशेषो यूपस्त्रयाणां एकएव साधारणो भवति॥ अग्नीषोमीयकाले क्रियमाणा अ
पि प्रोक्षणादयः संस्कारा यूपद्वारत्वात्तस्य च साधारणत्वात्तेपि तंत्रेणैव भवति न प्रतिसंदेह अंज
नकाले॥ ॥स्वरुश्च सकृत्स्यावचनात्॥ ॥यूपस्य स्वरुं करोतीति स्वरुः किमेक यूपानां पशूनां तंत्र उ
त प्रतिपशुभिद्यत इति संदेह अंजनकाले अस्योपादानात्तदपवर्गे अपवर्गादंजनांतरेन्यशकलोपा

॥२२॥
॥भाष्यं॥

दानं॥ यः प्रथमः शकाशलः स स्वरुरिति एकस्मिन्नप्रहरणे यः प्रथम इति शास्त्रार्थः॥ तेनैकस्मिन्नपि यू
पे प्रहरणानां बहुत्वात्स भवंति बहवः प्रथमशकलाः॥ तेन भेदप्राप्तौ सिद्धांत उच्यते॥ स्वरूपि त्रया
णां पशूनां अग्नीषोमीय सवनीयानुबंध्यानां साधारण एव न प्रतिपशुभिद्यते॥ कुतः॥ सकृत्स्या
वचनात्॥ सकृत्स्यावचनेन हि भवति स्वरुहोमेन यूपः संतिष्ठत इति॥ यदि च प्रथममेव हूयेत यूप
णाप एव साधनं भवेत्॥ ॥तन्निर्वृत्तेश्च॥ ॥तस्मादेव यूपात्स्वरो निवर्तत्रेश्च निष्पतेश्च॥ तस्य य
प्रथमः शकलापरापतेत्सः स्वरुः कार्य इति॥ अतोपि साधारण एव॥ तत्र प्रहरणस्यानुपात्तछकलश
ब्दोपातानां सर्वेषां शकलानां यः प्रथमः स उपादेतयः॥ तेनैकस्मिन्यूप एक एव प्रथमशकल इति
सोपि एकयूपानां सर्वेषां पशूनां यूपवत्साधारण एव स्यात्॥ अपि च छेदनकाल एव व्यामोह नि
वृत्यर्थं तन्नाशापहारपरिहारीय चावश्यमुपादाय रक्षितव्याः॥ शकल इत्यपृह्यमाणविशेषत्वा
दपि साधारण एव॥ ॥अथ दर्शपूर्णमासादिषु फलदक्षिणावत्सु कर्मसु चिंत्यते॥ किं यजमानेनैव
सर्वं कर्तव्यं॥ उत द्रव्योत्सर्गदक्षिणादानादिके यजमानेन नियमोऽन्यत्रापि नियमो यजमानेनैव कर्तव्यं

॥१००॥
॥देवया०९

५

उतद्रव्योत्सर्गदक्षिणादानादिके यजमानानां नियमोऽन्यत्रापि नियमो यजमानो वामानो वान्यो वा ॥ अथवोत्स
र्ग एव यजमानो न्यत्रान्य एवेति किं प्राप्तं ॥ सर्वं यजमानेनैव कर्तव्यमिति ॥ कुतः ॥ प्रयोगवचनस्थद्यात्मनेपदसांगा
यांभावनायां फलार्थित्वं कर्तृत्वेन विनियुक्तेऽस यत्रैवं कर्ता सर्वं यजमानेनैव कर्तव्यमिति ॥ कुतः ॥ प्रयोगवचनस्थ
द्यात्मनेपदसांगायां फलार्थित्वं कर्तृत्वेन विनियुक्तेऽस यत्रैव कर्ता न स्यात्तत्र तत्तमोवोपकारं न प्राप्नुयात् ॥ त
स्मात्साङ्गं स्वयं कुर्यादिति होत्रादिसमाख्या च तस्यैव तत्र तु कुर्वाणस्यैकस्य वाक [illegible] दा फलस्य चोत्पद्यमानस्या
त्वादपित्वेन प्रयोक्ता यजमान एवोच्यते इत्यनेन न्यायेन भविष्यंतीति ॥ तस्मात्सर्वं यजमानेनैव कर्तव्यं इति
प्राप्ते आह ॥ कर्मणि पुरुषाणां ॥ दर्शपूर्णमासादिकर्मणि पुरुषाणां होत्रध्वर्यूणां कर्तृत्वं भवति न स्वयं यज
मानस्य ॥ कुतः परिक्रयाम्नानात् श्रूयते हि परिक्रयः दर्शपूर्णमासयोर्द्वेषादक्षिणा यदन्वाहार्य इति ज्योति
ष्टोमे वत ७ शते नैव दृश्यतीति ॥ स्वभावतश्च परिक्रमः परत्र क्रियते नात्मनि ॥ विरोधात् ॥ न ह्यात्मैवात्मानं परि
क्रीणीते ॥ तत्र यदि स्वयमेव यजमानः कुर्यात्ततः परिक्रयासंभवेन परिक्रयो न क्रियते तत्रास्य नित्यवदाम्ना
नं विरुध्येत ॥ यद्यार्थिनः संकर्तृत्वं तत्प्रयोजकत्वेनापि संभवति ॥ तत्रासति परंपराप्रमाणे साक्षादेव कर्तृत्व

॥१००॥
॥भाष्यं॥

स्यात् ॥ अस्ति तु प्रमाणं परिक्रयवचनं ॥ तद्धि कर्तृतरसज्ञावएव दृष्टार्थं भवति नान्यथा ॥ तस्मात्प्रयोजकत्वे
कर्तृत्वसंनवेसति परिक्रयस्य नित्यवदाम्नातस्य पाक्षिकत्वायोगात्तं नित्यमुपसंहर्तुमन्येषां पुरुषाणा
मेव कर्मणि कर्तृत्वं सिद्धं ॥ एवं सर्वत्रापि पुरुषाणामेव कर्तृत्वे प्राप्ते आह ॥ ॥ प्रधानं त्वंस्वामी फलयोगात् ॥
॥ यत्प्रधानं द्रव्योत्सर्गरूपं हविस्त्यागं दक्षिणादानात्मकं तत्स्वामी यजमानः करोति ॥ अन्यानि चांगा
नि पुरुषाः कुर्वंति ॥ कुत एतत् ॥ फलयोगात् ॥ प्रधानानुष्ठायिनो फलयोगो भवति ॥ प्रधानफलस्य यजमानो
भुक्तेनां फलेन तस्य कृत्वर्थत्वात् ॥ तेन धनमात्रवाचिनो धातोः परेण प्रधात्ययेन तन्मात्रस्यैव फलार्थिक
र्तृकत्वं नियजस्यते ॥ शेषस्य निर्द्देष्टि मात्र प्रतीयते ॥ न कर्तृविशेषः ॥ ननु च प्रधानसमकर्तृकत्वादंगानाम
पि स एव कर्तास्तित्युतिन च तत्र प्रयोजकत्वेनापि कर्तृत्वानुग्रहात् ॥ द्रव्योत्सर्गे हि क्रियमाणे न किं चिद्य
जमानेन स्यादिति तं करोति ॥ न ह्यात्मनेपदेन फलार्थिकर्तृकत्वं गम्यते ॥ किं तर्हि भावनोद्दिष्ट कर्तृत्वस्य सतः फ
लसंबंधित्वं ॥ अतश्च फलेन कर्तुरन्यत्र तन गंतव्यं ॥ ननु फलार्थिनो न्येन व्यापारकरणं विरुध्यते ॥ ताव
ता च सिद्धो गेष्व नियम इति ॥ अतोंगेष्वन्यकर्तृत्वं प्रधानमात्रे च स्वामीकर्तृत्वमिति ॥ अन्येष्वपि कर्म कुर्वत्सु य

॥१०१॥
॥देवया०१

जमानेनयत्नेनकृताकृतप्रत्यवेक्षणं कर्त्तव्यमेव ॥ अन्यथा ह्यृत्विजः कर्मकरत्वात्प्रसावधानयायथाश्रुतंनकु
र्वंतिवैगुण्येपितेषांस्वार्थविनाशाभावात् ॥ तदुक्तं भट्टाचार्यैः ॥ येयेवाध्वर्युणा पदार्थाः कर्त्तव्यास्तेष्वेव यजमानेना
प्रमादार्थं प्रत्यवेक्षितव्या इति किमेतावदेव स्वामीकरोतीत्याह ॥ ॥ पुरुषप्रयोगिमंत्रसंस्कारयोस्त्यागेसामर्थ्या
त् ॥ ॥ पुरुषयोगियोमंत्र ॥ तनूपा अग्नेसि तन्वं मे पाहीत्यादिकः प्रत्यगाशीर्युक्तः संस्कारश्च पावनमुंडनाधःशय
नपयोतयोः पुरुषयोगियोमंत्रसंस्कारयोतयोः पुरुषयोर्मंत्रसंस्कारयोस्त्यागेलक्षणयात्यागकर्त्तरियजमा
नेधिकारः ॥ इहाकारणभूताः प्रत्यगाशीषोमंत्राउदाहरणं ॥ तेचसमाख्ययात्वध्वर्योः प्राप्नुवंति ॥ तत्रोच्यते ॥
कर्मफलंमंत्रशास्यनार्त्विक्कालं ॥ अक्रत्वर्थत्वप्रसंगात् ॥ यजमानाद्धि फलंदक्षिणाल्लाभात्मकं प्रार्थनीयंनाग्नेः

ग॥

कर्मफलंचयजमानगामितच्चात्मप्रत्यात्मनिषयत्वेनप्रार्थनीनर्थमाग्नेः ॥ कर्मफलंचयजमानगामितच्चात्मप्रत्या
त्मविषयत्वेनप्रार्थ्यतइतिलिंगात्समाख्यांवाधित्वायजमानएवप्रयुजीत ॥ यतः सएवाशीःप्रार्थनंकर्त्तुंसमर्थोना
न्यः ॥ संस्काराश्चकेवलप्रधानार्थाभोक्तृत्वांशपातिनश्च ॥ नत्वंगप्रधानार्थाःकर्तृत्वांशपातिनोवा ॥ तेतुतादृशंसंस्का
रंयजमानोकुर्वंति ॥ येनयजमानेनप्रधानंस्वफलंजनयितुंसमर्थंभवति ॥ तेनक्षेत्रसंस्काराणांयथावाजावपना

॥१०१॥
॥ज्ञ थ॥

र्थत्वं ॥ एवप्रधानार्थत्वंसंस्काराणां ॥ नांगार्थत्वं ॥ प्रधानफलंहियजमानोभुंक्तेनांगफलंतस्यक्रत्वर्थत्वात् ॥ अतोभोक्तृ
त्वांशंस्थाःयंतोयस्यैवफलंभुंक्तेतस्यैवोपकारकाइतिप्रधानार्थता ॥ प्रयोजनमग्नीषोमीयविकारेवनाभ्यांजनादि
यजमानसंस्काराणामवृत्तिः ॥ ब्रह्मचर्यव्रत्याशयनरूपस्ययसोपिदुःखात्मकत्वात्दुःखफलंकार्यविरोधिन
मधर्मरूपतिंतुयोग्यतास्तीतिक्रतुप्रतिबंधकपापक्षयेनैवास्यक्रत्वर्थलिंगप्रकरणाभ्यामवगम्यते ॥ यजमा
नेवफलेनोत्पन्नेव्यंअतोस्यापिफलीसंस्कारत्वाद्याजमानत्वं ॥ ॥ वचनाम्यदन्यत् ॥ ॥ वचनाच्चान्यदुक्तव्यति
रिक्तमपिकर्मयजमानस्यभवतिप्रधानयोगिमंत्रसंस्कारेभ्योनान्यदपीत्यर्थः ॥ तद्यथायजमानोवेदंकरोति
यजमानस्त्राज्यमवेक्षतेयजमानउखांकरोतीइतित्यादि ॥ वचनादादृत्विजामपिसंस्काराभवंतिहिरण्यमा
लिनोवाजपेयेनचरंतीतीलोहितोष्णीषाः प्रचरंतीति ॥ शेषमितरेयथाख्यं ॥ ॥ यावद्यजमानस्यकर्त्तव्यमुक्तंप्र
धानेस्वामीत्यादिनावचनादन्यदित्यंतेन ॥ ततःशेषंत्ववशिष्टंकर्मइतरेस्वामीदयोयथाख्यंकुर्वंति ॥ आख्यात्व
नतिक्रम्यथावत्याआख्याः तावतीतामनतिक्रम्येत्यथाख्यं ॥ तद्यथाहोताहोत्रं ॥ उद्गाताउद्गात्रं ॥ अध्वर्युराध्वर्यवं
ब्रह्माब्रह्मत्वमितिसमाख्ययेतेषांविनियोगः ॥ तच्चप्राक्प्रपंचितं ॥ कर्मणिपुरुषाणामित्यनेनान्येषांपुरु

षाणां कर्तृसिद्धेपि कतिनेत्यइतिसंशयेसति विशेषाभावादनियमः प्राप्नोति सर्वथापरिक्रयसिद्धेः॥ अथवा
त्मनेपदाद्यजमानस्यैव सर्वत्र कर्तृकत्वे प्राप्ते परिक्रयवशादन्योपादानं सचैकेनापि सिद्ध्यतीत्यत एवान्यः स्या
त्। अर्धर्यादितिज्ञास्तु कर्मनिमित्ताः एकस्यापि पाचकलावकवद्विषयंतीति अत्र नेन सूत्रेण यथाख्यं यावत्संक
र्तृभेदे उच्यते॥ कर्मनिमित्ताएताःसंज्ञास्तदास्तु॥ यदि प्रवृत्तिसमये तदुत्तरकालेवा एताः श्रूयेरन्॥ वरणं त्वप्रवृ
त्तोभ्यर्थनं॥ तत्रैताः श्रूयन्ते ब्राह्मणं वृणीते उद्गातारं वृणीते अध्वर्युं वृणीते एवमुन्नेतारं वृणीते इत्यतः॥ नच
तदा कर्मनिमित्तत्वं संभवतीति॥ वरणनिमित्तत्वे॥ भिन्नानिच वरणानि नचैकेनिन्बहूनि वरणानि युज्यंते द
ष्टार्थत्वान्नहित्वान्नहितस्यवरणं दृष्टार्थं॥ तेन वरणानां तस्मिन्न संज्ञानां चासंकीर्णविषयत्वाद्यावद्वरणं याव
त्संज्ञं च कर्तृभेदः कर्माङ्ग॥ अतो यस्मिन्कर्मणि यावत्यः संज्ञाः॥ तावत्संख्यैः कर्तृभिस्तत्कर्म कर्तव्यं॥ अत
श्चतुर्दर्शपूर्णमासे षड्भिः पशुबंधः पंचभिश्चातुर्मास्यानि षोडशभिर्ज्योतिष्टोम इति यथास्वामित्यनेन सिद्ध्यति॥ तेन
षु नद्भक्ता॥ ननु किमिदं वरणं॥ उक्तं अप्रवृत्तस्य प्रार्थनमिति तत्र होम हार्त्विजां होतृकरणं च मंत्रेण मत्रुनि मेहोतात्वं
मानुषइत्यादिनाभौलौकिकावाचा अध्वर्युर्मेभवानस्त्वित्यादिकथा॥ किमेतावता होत्रादित्वं भवति॥ को दोषः॥ ननद्यताः

संज्ञाप्राग्दृश्यंते॥ वरणोत्तरकालंच यएवं वृत्तः स्वयं चैव समानतिमनसासंकल्पयति तत्र होत्रादिसंज्ञाः प्रसिद्ध
वद्देयाज्ञिकं प्रयोगे वव्यवह्रियमाणा दृष्टाः॥ तस्माद्यएवं वृत्तः स एव च संकल्पयति स एव होत्रादिसमाख्यां ल
भते॥ सर्वेषु च दक्षस्वार्थत्वाद्वारणस्यार्थलोपान्निवृत्तिः॥ तदलाभे वाध्वर्युर्गृहपतिदीक्षयित्वत्यादिव्यवहार
दर्शनात्संकल्पादेव होत्रादित्वसिद्धिः॥ प्रकृतावपि संकल्पो निमित्तं भवयो हि क्रियमाणोनेष्यतिनस होता
तेत्युच्यते॥ तस्मात्प्रकृतौ वरणविधानात् मिश्रः संकल्पो निमित्तं॥ सत्रेषु तु संकल्पमात्रप्रयोगदर्शनात्॥ न
चैवं त्रैरूप्यादशोभनं मंतव्यं॥ प्रमाणबलादिदृदृशस्यैव शोभनत्वात्॥ नहि सत्रे होत्रादिशब्दानां गौणत्वां किं
चित्प्रमाणमस्ति॥ अथाप्युच्यते तमेव रूपेण कार्यं ततः संकल्प एव निमित्तं॥ य एव क्रतुप्रक्रमे तदौपयिकं होत्रा
दिभावमात्मनः संकल्पयति स एव होत्रादिशब्दैरुच्यते तथा चोक्तं॥ सत्रेतु स्वयं कर्तृकत्वाद्वरणभरणयोरग्र
हणाद्विनैव ताभ्यामवैगुण्यमिति योग्यता मात्रेणाध्वर्युत्वादिसिद्धिरिति॥ ॥उपवीतिना॥ ॥सर्वे ऋत्विग्यज
माना उपवीतिनः सव्यस्कंधस्थितयज्ञोपवीतधारिणः कर्म कुर्वंतीत्यतिशेषः॥ ऊर्ध्वं तेदक्षिणेपाणावुपावी
त्युच्यते बुधैरिति स्मरणात्॥ तस्मात्सूत्रांतरे॥ यज्ञोपवीतीदेवकर्म प्राङ्मुखयज्ञोनुसंतिष्ठाताइतितथा

॥१०३॥
॥दे वयो॰१

हास्योदगोवकर्मानुसंतिष्ठत इति ॥ प्राच्युदंचि चैककर्माणि संतिष्ठेरन्निति श्रुतेः ॥ पात्राणां पात्रं निनय
ति तथा हुदङ्भुवतीत्यादेः प्राङ्मुखैरुदङ्मुखैर्वा कर्तृभिः कर्माणि कार्याणीति गम्यते ॥ आहुतिसाम
नेषु प्रदक्षिणं अथावर्त्तते सूर्यस्यावृतमन्वावर्त्त इति अथ स्तीर्णां वेदिमुपावर्त्तते ग्रहणप्रति॰मासादनं द
क्षिणतस्त्वारभ्योदक्संस्थं पश्चादारभ्य प्राक्संस्थं वा कार्यं परिस्तरणपर्युक्षणादिकमप्युत्तरतः समाप
नीयं त्रिरुल्लेखनाद्यपि प्राक्संस्थमुदक्संस्थं पश्चादारभ्य प्राक्संस्थं वा एवं सर्वत्रोहनीयं दक्षिणस्त्वे
वोदङ्ङोहेत्तथाद्दृष्टमवतितं दक्षिणतः परीत्य पू॰ गरहोमेषु वर्त्तस्वीमित्येवमादौ यत्रावृत्तिः आवर्त्तनं
भ्रमणं श्रूयते तत्रावृत्तौ प्रदक्षिणमावर्त्तनं कर्त्तव्यं यानि च परिस्तरणपर्युक्षणवित्यपरिषेकपदपरि
लेखपिंडपरिलेखनादीनि समंततः सर्वतः सर्वेषु पूर्वदक्षिणपश्चिमोत्तरपार्श्वेषु विधीयंते तानि सामं
तशब्देनात्रोच्यंते तेषु सामंतेषु च प्रदक्षिणं तत्परिस्तरणादिकं भवति पूर्वतस्त्वारभ्योदक्संस्थं तद्वा एत
देव पुरश्चरणं य एष तपति स एतस्यैवावृता चरेद्गृह्ये हि त्वेतस्यैवावृतमन्वावर्त्ततेति तथा अथावर्त्त
ते सूर्यस्यावृतमन्वावर्त्त इति तदेतां गतिमतां प्रतिष्ठां गत्वे तस्यैवावृतमन्वावर्त्त इत्येवमादौ सर्वत्र सूर्या

॥१०३॥
॥भाष्यं॥

वर्त्तनवत्प्रदक्षिणवर्त्तनश्रवणात् ॥ अथ दक्षिणान्वावृतमन्वावर्त्त इति च ॥ विपर्ययस्तु पित्र्येषु तु स च दक्षिणा
च ॥ तु शब्दो भेदे पूर्वप्रतिपादिताङ्गे दमाह ॥ पित्र्येषु पित्र्यदैवत्येषु पितृयज्ञादिकर्मसु विपर्ययस्य पूर्वोक्तविपर्य
सेन सर्वं भवति ॥ यज्ञोपवीतिना कर्म कुर्युरित्युक्तं ॥ पित्र्ये तु प्राचीनावीतिनः कृतापसव्याः संतः कुर्वंतिः दक्षि
णस्कंधधृतयज्ञोपवीतिना ॥ इत्यर्थः ॥ तथा चोक्तं प्राचीनावीति ॥ पित्र्याणीति ॥ यच्च परिस्तरणावर्त्तनादि
प्रदक्षिणमुक्तं तत्पित्र्ये अप्रदक्षिणं भवति ॥ यच्च देवेभ्य स्वरूपं क्रियते परिसमूहनोपलेपनोल्लेखनोद्धरणा
भ्युक्षणैस्त्रिरुक्तं तदत्र सकृदेकवारं भवति ॥ यच्च देवे दिग्द्वयमुक्तं प्राच्युदग्वेति तत्रापि विपर्यासेन दक्षिणा प्रतीची वे
तिद्वयं प्राप्नोति तत्राह दक्षिणा चेति ॥ पित्र्ये कर्मणि दिगेकैव दक्षिणेति ॥ तेन सर्वं पिंडदानादावनेजन्नान्नरेखाकर
णपात्रासादनादिकं दक्षिणसंस्थं दक्षिणाभिमुखेन च कर्त्तव्यं ॥ एषा वेदिकृपित्र्याणमितियाद दक्षिणा दिक्कृसा
पित्र्याणामिति श्रुतेः ॥ प्रधानद्रव्यव्यापत्तौ सांगावृत्तिस्तदादेशात् ॥ प्रधानयागः तत्साधनभूतं द्रव्यं पुरो
डाशं चरुधानापयो दधि पश्चादि तस्य व्यापत्तौ विनाशे सांगावृत्तिः ॥ सांगस्य सन्निपत्योपकारकांगैः सहित
स्यावृत्तिः पुनःकरणं भवति ॥ कुतः तदादेशात् ॥ तस्य द्रव्यस्य संस्करणार्थमेव निष्पादनार्थमेव तेषामंगा

देवया०
१०४

नामादेशात्॥ उपदेशात्पुरोडाशादिलिंगव्यत्यार्थमेव व्रीहिनिर्वपणप्रोक्षणावघातपेषणसंयवनश्रवणादीन्यादि
ष्टानि विहितानि॥ यदुक्तमापस्तंबेन॥ यद्यप्यन्न देवतं हविर्व्यापद्येतान्यद्धविः संस्कृत्यप्रयच्छेद्देवता या इति॥ इ
दश्रूयते॥ व्रीहिभिर्यजेतेति॥ तत्र सर्वांगोपसंहारिप्रयोगवचनानुग्रहायाष्टदोषदुष्टविकल्पपरिहाराय
चैताभ्यां व्रीहियवाभ्यां समुच्चयेन यागः कर्तव्यः॥ स भवति चेत्सोमयागस्येव प्रधानमस्यापि यागस्या
भ्यासमाश्रित्य समुच्चयः मिश्रैर्वा क्रियेतेति॥ उत विकल्पो व्रीहिभिर्वा यवैर्वेति॥ तत्र पूर्वपक्षमाह॥७॥
गुणानामेककार्यत्वात्सर्वारंभश्चोदितत्वात्॥ एककार्याः॥ प्रयोजनं कार्यं येषां त एककार्याः॥ एक पुरोडाशः नि
ष्पत्त्यर्था व्रीहियवादयस्तेषामेककार्याणां गुणानां पुरोडाशाद्यर्थानां व्रीहियवानां सर्वारंभः कर्तव्यः॥ सर्वैर्व्री
हियवादिभिस्तत्कार्यं पुरोडाशादिकं निष्पाद्य यागः साधनीय इति॥ कुत एतत्॥ चोदितत्वात्॥ यजते
त्येवमुभयोर्यागसाधनत्वेन विहितत्वात्॥ यागसाधनत्वं च यागसाधनभूतपुरोडाशप्रकृतिद्रव्यत्वे
न॥ श्रुतं उभयो यागसाधनत्वेन चोदितत्वात् चैयोगो न क्रियते॥ तेषां विधानं व्यर्थमेव स्यात्॥ तस्माद्व्रीहिभिर्य
वैश्च पुरोडाशो निष्पादनीय इत्येवं प्राप्ते ब्रूमहे॥ न कृतत्वात्॥ यदुक्तं सर्वारंभः सर्वैस्तत्कर्मानुष्ठेयमिति तत्र॥ कृ

भाष्य
१०४

तः कृतत्वात्॥ एकेनैव पुरोडाशरूपस्य कार्यस्य कृतत्वात्॥ द्वितीयोपादानं व्यर्थमेव स्यात्॥ सर्वारंभो हि मि
श्राभ्यामिश्राभ्यां वा यागावृत्त्या न तावन्मिश्राभ्यां॥ मिश्रणे हि द्रव्यांतरापत्त्या कस्यापि साधनत्वाभावात्॥ न
च यागावृत्तिर्यागस्य कृतत्वात्॥ अनारभ्यत्वात्॥ अन्यार्थस्यानारभ्यत्वात्॥ नैवारंभणीयोयमर्थः॥ यद्गुणभू
तस्य द्रव्यस्यानुरोधेन प्रधानभूतस्य यागस्यावृत्तिः॥ तस्माद्विकल्प एव न समुच्चयः॥ दर्शनाच्च॥ व्रीहियव
योर्विकल्पो भवतीत्ययमर्थः॥ श्रुतौ दृश्यते च॥ हरिरुरूपं प्रकृत्य श्रूयते॥ वर्षवृद्धा उ ह्येवा ते यदि व्रीहयो य
दि यदि यवा इति॥ ज्योतिष्टोमे हि द्रव्यदेवतासंयोगनामदृष्टनाम पर्यायविधानात्प्रकरणे न युगपद्ग्रह-
णं त्वसैव संपादनाय युक्तं यदभ्यस्यते॥ व्रीहियवौ॥ तु द्वाभ्यां वा काम्यमन्योन्यानिरपेक्षौ यागद्रव्य पुरोडाशप्र
कृतितया विधीयमानौ तद्द्वारेण प्रयोगवचनो गृह्णन्पर्याये एव गृह्णाति न युगपत्॥ येन बलात्प्रधाना-
भ्यासः स्यात्॥ ज्योतिष्टोमवत्॥ मिश्रत्वमपि निरपेक्षविधानादप्युक्तमेव॥ समुच्चित्य यजनतापि वा कद्वय
मपि बाधितं स्यात्॥ द्वाभ्यामपि वाक्याभ्यां द्वयोरपि निरपेक्षयोः प्रकृतित्वेन विधानात्तद्द्वन्द्वे न द्रव्यांतरनिवृ
त्तिप्रतीतेः॥ तस्माद्विकल्पः॥ ततो व्रीहिप्रयोगे तैरेव कार्यसिद्धेर्न यवानामुपादानं॥ यथा यागुके रंगोः कार्यसि

२ ना

देवया०
१०५

ढुंपोरोडाशिकानां ॥ अत्यानर्थकमितिचेत् ॥ ननु व्रीहियवयोर्विकल्पे सत्यन्यतरस्मिन्नितरानर्थकं भविष्यति
ति चेत्कथयसि तत्रोत्तरमाह ॥ कालांतरेर्थवत्त्वं स्यात् ॥ कालांतरे द्वितीयायामपि श्रुतेरर्थवत्त्वं सार्थव
त्वं भवति अतो व्यवस्थितविकल्पोयं तथा च शाखांतरे श्रूयते व्रीहिभिरिष्ट्वा व्रीहिभिर्यजेतायवैर्वा य
वैरिष्ट्वा यवैर्यजेत व्रीहिभ्यो दर्शपूर्णमासाविति अतो व्रीह्याग्रयणानंतरं प्राग्यवाग्रयणाद्व्रीहिभिर्दर
शपूर्णमासयागः यवाग्रयणानंतरं च प्राग्व्रीह्याग्रयणाद्यवैरिति अत्र दर्शपूर्णमासावित्येन न दर्शपूर्ण
मासयोरेवायं द्रव्यनियम उक्तः तेनान्यासु विकृतिषु नायं द्रव्यनियम इति धूर्तस्वामिनः आधारो प्रकृत्य
श्रूयते ऋजुमाघारयति संततमाघारयति प्रांचमाघारयति दीर्घमाघारयतीति एतेषामपि ऋजुत्वा
दिधर्माणामेकार्थत्वाद्व्रीहियववद्विकल्पप्राप्ते आह ॥ धर्ममात्रेषु समुच्चयोऽविरोधे ॥ ये गुणा धर्ममा
त्रात्मा दृष्टार्थास्तेषु समुच्चयो भवति न विकल्पः यतस्ते ऽविरोधे वर्तंते कथं न हि ऋजुः प्रांचं संततं दीर्घं वा
विरुणद्धि न च संततः ऋज्वादीन् अदृष्टान्यपि तेषामिन्नान्येव तस्मात्परस्पराविरोधित्वात् ऋज्वादीनां स
मुच्चयः यदुक्तमेककार्यत्वान्न समुच्चय इति अत्रोच्यते सत्यं परयेककार्यं आवांतरकार्याणि तु भिन्नानि

भाष्य
१०५

यदृजुना क्रियते न तत्संततेन यत्संततेन न तदृजुना यद्दीर्घेण न तत्प्राचा यत्प्राचा न तद्दीर्घेणेति
अथेदं विचार्यते अग्निप्रणयनाग्निमंथनादिषु क्रियमाणेष्वनुवादिनो होतुर्मंत्राः संति प्रदेनं देव्याधि
यात्रभित्वा देव सवितरित्यादयः तथा अग्न्याधाने मंत्राः भूर्भुवः स्वरिति आदित्यानां त्वेत्यादयः वि
तेषां विकल्पः उत समुच्चय इति मंत्राणां स्मारकत्वेन दृष्टार्थत्वात् करणवदेकार्थत्वाद्व्रीहियववद्विक
ल्पे प्राप्ते आह ॥ होत्राधानयोः समुच्चयोऽविरोध इत्यनुवर्तते होतुरिमे होत्राः होत्रमंत्राणां आधानमं
त्राणां च समुच्चयो भवति न विकल्पः अविरोधादेव होत्राधानशब्देनात्र तत्संबद्धा मंत्रा लक्ष्यंते करणमं
त्रा हि कर्मानुष्ठानकरणभूतास्मृतिं पूर्वलक्षणवत्तिं न कुर्वंति नचैकेन सिद्धावितरेणकार्यमस्तीति
युक्तस्तत्र विकल्पः क्रियमाणानुवादितस्त्वध्वर्युणा क्रियमाणस्य कर्मणः स्मृत्यविच्छेदार्थाः अविच्छेदश्च
तादृपेक्षित इति सर्वेषां समुच्चयः समुच्चयश्च दृश्यते श्रुतौ त्रिः प्रथमामन्वाह त्रिरुत्तमामिति आग्नेयी
रन्वाह एकादशान्वाह नवान्वाह दशान्वाहेत्यादि अनेकसन्निपाते वैतद्भवति प्रथमा उत्तमेति च सं
ख्योपबंधश्च तस्मात्समुच्चयः आधानमंत्राणां च वचनात्समुच्चयः त्रिभिरहृतिर्गार्हपत्यमुपदध

तिपंचभिराहवनीयमिति। एवं सर्वत्र होममंत्राणां समुच्चये प्राप्ते आह। ॥याज्यानुवाक्यास्तु विरोधात्॥ ॥अ-
स्मिन्नेव प्रकरणे क्वचिद्यागे याज्यानुवाक्या एकदेवत्याः पठिताः संति तासु न समुच्चयः किंतु विकल्प एव कु-
तः विरोधात् यतः पुरोनुवाक्याया देवतास्मरणार्था याज्या च हविःप्रदानार्था इष्टयतिवा अनुवाक्यया प्रयच्छति याज्य-
येति न तत्र दृष्टार्थत्वाद्विकल्पः ॥दर्शनाच्च॥ ॥श्रुतावप्येवं दृश्यते एकदेवत्ये एकैव याज्यापुरोनुवाक्या भव-
ति न समुच्चयः यतो वाजपेये प्राजापत्यान्पशूनालभ्य इत्यत्र श्रूयते एकानुवाक्या भवत्येका याज्यैकदेवत्या हीति देव-
तैकत्वं हेतुं ब्रुवन् एकदेवत्ये याज्यापुरोनुवाक्ययोरेकत्वं दर्शयतीति तथा महापितृयज्ञे पुरोनुवाक्याप्रस्तावे
श्रूयते सिद्धपुरोनुवाक्ये अन्वाहैकया वै देवान्प्रच्याचयंति द्वाभ्यां पितॄनिति अत्र पुरोनुवाक्याद्वित्वविधिप-
रे वाक्ये अन्यत्र तस्या एकत्वं सिद्धं दर्शयति तस्मान्न याज्यानुवाक्यासु समुच्चयः किंतु विकल्प एव ॥

॥प्रायश्चित्तेषु दोषनाशात्पृथक्प्रसंगात्॥ क्रियायामभिहितानि प्रायश्चित्तानि यथा यद्युक्तो यस्य   निर्मथ्याः
स्वाहेति गार्हपत्ये जुहुयात् आर्त्तिमियाद्विनाशमियादित्यर्थः विहितस्याक्रियाप्रतिषिद्धकरणं दोषविनाशः
यो मावास्यां पौर्णमासीं वातिपातयेदग्नये पथिकृते अष्टाकपालं पुरोडाशं निर्वपेत् तथा यो मावास्यां पौर्ण-

१०६

मासीं वातिपादयेद्वैश्वानरं द्वादशकपालं निर्वपेदित्यादीनि तत्समाधित्सायां विहितानि तत्समाधा-
नार्थानि भवंति समाधानं चाऽदृष्टं एकेन कृतमिति न शक्यं वक्तुं तेन प्रयाजादिवद्देषां समुच्चये प्राप्ते उच्यते
प्रायश्चित्तेषु न समुच्चयः कुतः दोषनाशात् यतस्तानि दोषनाशार्थं विधीयंते कथं पुनरेतदवगम्यते दोषना-
शार्थान्येतानीति वाक्यादेवमध्यार्त्तिमियादित्कुर्यादिति कर्मस्वपथ्योकरणादिना दोषविनाशे सति तानि
विधीयंते यदि तेषु कृतेष्वेमितद्विनष्टमेव कौर्थस्तेन कृतेऽतो दोषनिर्घातिरेव तेषां प्रयोजनं तत्रैकेनानि-
र्मृते दोषे प्रयोजनमस्ति प्रयाजादिषु तु युक्तः समुच्चयः भिन्नकार्यत्वात् नहि सन्निध्याय क्रियते तत्तन्नेन
पातेति प्रमाणमस्ति ननु सर्वेकिरणानुग्रहार्थाः सत्यं सर्वेषां युगपदेकेन प्रमाणेन साधनमवगम्यते न प्र-
यियिष्ण प्रधानविधिना हि तेषां विधानं तत्र द्वारैक्यावगमात् युगपदेव सर्वैः संबध्यंते तदुद्देशेन वसर्वज-
न्यावांतरकार्यैः करणानुग्रहः सिध्यतीति कल्प्यते प्रायश्चित्तानि तु वैगुण्यमेकं निमित्तीकृत्य वाक्येन
निरपेक्षेण विधीयमानानि प्रत्येकमेव तत्समाधानार्थानि विज्ञायंते तत्र यान्येकस्मिन्वैगुण्ये वि   यंते
पथिकृद्वैश्वानरादीनि तेषां विकल्पः समुच्चय वितां यामदृष्टार्थत्वामु तत्समुच्चयप्राप्ताप्येकैकेन वाक्येन
वैगुण्यसमाधानाय निरपेक्षविधानाद्द्वारैक्याद्व्रीहियववद्विकल्प एव न समुच्चयः तदुक्तं जैमिनिना प्राय-
श्चित्तेषु चैकार्थनिष्पन्नेनाभिसंयोगस्तस्मात्तस्य निर्घातः इति अस्यार्थः प्रायश्चित्तेषु विकल्पः स्यात्

॥१०७॥

कुतः एकार्थ्यात्तु कथमेकार्थ्यमिति एकेनैव निष्पन्नेन दोषेण केवलस्य तस्याभिसंयोगोपपद्यते यज्ञस्यार्ति
मियादिभूः स्वाहेति गार्हपत्ये जुहुयादिति तस्मात्तत्र चैकस्य दोषस्यैकेन निवृत्तिः एकेन चेन्निवृत्तो दोषस्तर्हि द्वि
यादीनि प्रयोगान्तरार्थानि भवन्ति एवं समानेऽपि दृष्टव्यं तत्र द्वितीयं सूत्रं समुच्चयस्तु दोषार्थेषु यानि तु दोष
निर्घातार्थानि तेषु समुच्चयः कानि पुनस्तानि यानि निर्दिष्टस्य क्रियायाः प्रतिषिद्धस्यैव नैव विधीयन्ते यथा
ऊतिमग्निहोत्रं सूर्योऽभ्युदियात् तत्रैव दृष्टं निर्वपेत् सोऽयमेककपालं यथास्याहुतमग्निहोत्रं सूर्येऽभ्युदियादग्नि
समाधाय वा निर्वपेत्वा यतीस वा हमुपोसीयातामिति तत्र दोषो न दृश्यते दोषस्याभावान्निर्घातार्थता नास्ति के
वलमभ्युदये निमित्ते कर्म विधीयते तं निमित्तं कुकर्मणः प्रकरणे उत्पन्नत्वात् कर्माङ्गं विज्ञायते तत्र यावन्ति
चोद्यन्ते तानि सर्वाणि प्रयोगवचनेन संगृह्यन्ते अतस्तेषां समुच्चयः तदेवं जैमिनेः सिद्धान्तः प्रमादापतितस्य
विगुणस्य समाधानार्थानां विकल्पः निमित्ते सति कर्माङ्गानां समुच्चय इति कात्यायनस्तु प्रायश्चित्तेषु दोषना
शात् प्रायश्चित्तेषु विकल्पो भवति कुतः दोषदर्शनात् दोषनिर्घातार्थत्वात् प्रायश्चित्तस्य न त्वेकेन दोषनि
र्घाते तेनास्ति द्वितीयस्य कार्यमिति एवं प्राप्ते आह नाऽतः प्रायश्चित्ते दोषनाशः क्रियते इत्येवं विधाश्रुति नास्ति
किं च प्रत्यक्षाच्चानकेवलमेवं विपश्यत्यभावः प्रत्यक्षादप्येवं गम्यते यत्प्रायश्चित्ते दोषनाशो भवतीति
कथं भिन्ने जुहोतीति भेदने स्कन्दने न संजाते होमरूपप्रायश्चित्तविधीयते न वा होमेन लेलितम् भिन्नस्कन्नं संजायते ॥१०८॥

किंतु तैष्वेवावतिष्ठते तस्मात्प्रायश्चित्तं मद्दृष्टार्थमेव न दोषनिर्घातार्थं तस्मात्समुच्चयः स्याद्वा दर्शनात् अ
थ वा कश्चित् प्रायश्चित्तैर्दोषविनाशः स्यात् कुतः अतो दर्शनात् महाव्याहृतिहोमेषु दोषनिर्घातो दृश्यते तद्यदृ
ग्धृक्तो भूरिति च तु गृहीत्वाज्यं गृहीत्वा गार्हपत्ये जुहुयादित्यादि महतस्तत्र पापापर्वणापर्वसंदध्यादिव प्र
हैवसंदधाति यत्तामिर्निर्वज्यतीति विनष्टस्य कर्मणः संधानं भैषज्यं च दर्शयति तथा यच्छिद्ध्येत वाक्य
शेषश्रूयते अग्निर्देवानां पथिकृत् स्वेन भागधेयेनोपासीरन्नेव पथानमपिनयति स एव तमालंभय
तीति तस्मात्प्रायश्चित्तैर्दोषनिर्घातः स्यादिति प्राप्ते आह नान्यार्थत्वात् न तस्माद्दर्शनादेवं कल्प्यं यत्प्रायश्चि
त्तैर्दोषविनाशः अस्तीति कुतः दर्शनस्यान्यार्थत्वात् कोऽन्योऽर्थ इति चेदुच्यते महाव्याहृतिस्तुत्यर्थं चैतदर्शनं
इह तु प्राशस्त्यो होमो येन विच्छिन्नस्य संधानं क्रियते तस्माद्दृष्टार्थं चैतदेव प्रायश्चित्तानां न ततः समुच्चय एव
ति अपर व्याख्या स्याद्वा दर्शनात् प्रायश्चित्तानि द्विविधानीति कानि विद्धि गुणस्य प्रमादापतितस्य समा
धानार्थानि कानि विन्निमित्ते कर्माङ्गानि तत्र यानि वैगुण्यसमाधानार्थानि तेषु दोषनिर्घातः स्यात् प्रमा
दादापतितस्य वैगुण्यस्य समाधानं भवेत् कुतः दर्शनात् यथा पर्वणि स्यादिति तदुदाहृतं पूर्वं व्याख्याने एकेन च विरा ख्या
हदेहे दोषे न द्वितीयस्य प्रयोजनं नित्ये कमेव किंचिद्विकल्पेन कर्तव्यमिति सिद्धान्तः एवमेव सर्वेषु प्राप्ते आह
नान्यार्थत्वात् प्रायश्चित्तानि न दोषनिर्घातार्थानि । किंतु भेदनादिनिमित्ते सति कर्माङ्गानि तेषु न दोष इति
निर्घातार्थता कुतः अन्यार्थता कुतः अन्यार्थत्वात् तत्र हि न प्रायश्चित्तस्य विनष्टसमाधानं कार्यं किंच न

नएवाथोदिष्टं नचहोमादिनाङ्गित्वं स्कन्नत्वं वा अभिन्नमस्कन्नं नच कर्तुं शक्यते अतएवंविधेनिमित्तेयानिविधीयं
तेतान्यदृष्टान्येव तस्मात्तेषु समुच्चय इति एवं च जैमिनिसिद्धांतेनाविरोधिव्याख्यातं भवति अतोयुक्तमेवे
ति अथेदं चिंत्यते ये मंत्रा मंत्रसाम्नाये स्वरांतरेण समाम्नाताः ब्राह्मणे तु स्वरांतरेणोपात्तास्ते किं स्वयमेव
पठितेन स्वरेण उत ब्राह्मणस्वरेण उत एकश्रुत्या तानेति तत्र प्रथमं पक्षं तावदाह। मंत्रे स्वरक्रियाय
म्नातमविरोधात् कर्मसु प्रयुज्यते यो मंत्रः तस्मिन्स्वरक्रिया यथाम्नातं भवति येन स्वरेण संहितायामा
म्नायते तेनैव स्वरेणेत्यर्थः कुतः अविरोधात् यतो विरोधपदुपदिष्टो नास्ति अनेन स्वरेण कर्मणि मंत्रः
प्रयुज्यत इति तेन यथाम्नातस्वर एव भवति इति प्राप्ते द्वितीयपक्षमाह भाषिकस्वरो वोपपन्नमंत्रोपदे
शात् वाशब्दः पूर्वपक्षनिरासार्थः भाषिकस्वरो ब्राह्मणः स्वरः अथवा कर्मणि प्रयुज्यमानानां मंत्राणां भा
षिकस्वरो भवेत् न संहितः स्वरः ब्राह्मणस्वरेण मंत्राः प्रयुज्यंत इत्यर्थः कुतः उपपन्नमंत्रोपदेशात् संहिता
स्वरेणोपपन्नस्य प्रयुक्तस्यैव मंत्रस्य ब्राह्मणे स्वरांतरेणोपदेशात् तस्मात्कर्मणि प्रयोगे मंत्राणां भाषिक
स्वरो भवतीति प्राप्ते सिद्धांतमाह तानो वा नित्यत्वात् वाशब्दः पक्षव्यावृत्तौ तान एव मंत्राणां स्वरो भवति
न भाषिकस्वरः तान एकश्रुतिरित्यर्थः तेनोदात्तादिस्वररहितेन एवैकश्रुत्या मंत्राणां प्रयोगः कार्यः कुतः
नित्यत्वात् नित्यो हि नानावर्णस्वररूपमात्रोच्चारणो विनाभूतत्वात् स्वरांतरं वा नियतं उभयथा मंत्रेषु
स्वरसंबंधदर्शनात् न लायते संहितास्वरेण वा ब्राह्मणस्वरेणेति तस्मात्तान एव स्वरो मंत्राणामिति उक्तंपि

स यत्साधकं करोति न तदसर्वेदस्य यथ यदसाधकं साधनशोभनं कर्मद्रव्यत्यागादिकं करोति तदंतर्वेदि करोति अथ य
दसाधकं अशोभनं मधो वा पुरीषमुत्सर्गादि तद्बहिर्वेदि करोति। अध्वर्युः कर्मसु वेदयोगात् यजुर्वेदरक्षविहि
तेषु कर्मसु ईर्ततरस्यावचने अध्वर्युः कर्ता स्यात् कुतः वेदयोगात् वैनयोगो वेदयोगस्तस्मात् अवेदेन सं
बंधात् अध्वर्युणा हि वेदो युज्यते समाख्यायते अध्वर्युवेद इति यद्येतद्विहितेषु कर्मस्वध्वर्युः कर्ता भवति तदेवेद
मुपपद्यते॥ नान्यथावचनविरोधाभ्यामन्यः वचनाद्विरोधाद्वाध्वर्योरन्योपि यजुर्वेदविहितस्य कर्मणः क
र्त्ता भवति वाचनांतावत् मंथिनं प्रतिप्रस्थातेति। तदेकोपदुपलेसमाहंती तित्र्यंधिश्रयत्यसावाज्यमिति
अग्नीदं इमेकादशकपालं निर्वपति नेष्टातोत इत्येनां वाचयति तस्योन्नेता श्रावयति यजमानो वसोर्द्धारां जु
होति ब्रह्मा प्रायश्चित्तानि जुहुयादन्यादिष्टानीति विरोधाच्चापि षणापधानयोर्युगपद्विरोधात् यथा कपालो
पधाने अग्नीत् तथा धर्मरोहिणयोर्निर्वपणायासादनं तं प्रतिप्रस्थाता तु वसाहोमं धक्ष्ववेग्रस्य होता च समसेवन
यनं चान्वयने सीरयोजने चाहविष्पात्रस्वाम्यत्विज्ञो पूर्वं पूर्वं मंत्तरांहविर्वीहियवाज्यादि पात्राणि स्फ्यादी
दीति स्वामी कर्मफलभोक्ता यजमानः पत्नी च ऋत्विजो ब्रह्माद्याः एतेषां एकत्र समावेशे सति पूर्वं पूर्वं
यस्मिन्सूत्रे प्रथममुपदिष्टं तत्रं अग्निसंनिकृष्टं भवति अर्थात्पश्चात्पश्चादुपदिष्टं तदपेक्षा बहिर्भवति पात्रेह

॥१११॥

॥१११॥

अत एव चोदनायाः प्रवृत्तिः॥ पूर्वं॥ यतः पदार्थे॥ ॥विहिते सति पश्चात्तत्स्मारणार्थो मंत्रः
प्रयुज्यते॥ अतः क्रममेवैतदिति प्राप्ते सिद्धांतमाह॥ गुणानां तु परार्थत्वात्॥
तु शब्दः पूर्वपक्षनिरासार्थः॥ नैतदुभयं समं॥ किंतु मंत्रपाठ एव बलवान्॥ कुतः मंत्रेषु
नो गुणा परार्थत्वात्॥ गुणानां बाहुल्यात्॥ यतो चोदनापाठापेक्षया मंत्रेषु बहवो गुणा विधीयंते॥
॥तद्यथा॥ कर्मकाले उच्चारणं पदार्थस्मारकत्वं च यतो मंत्रा अर्थवादादिकृतव्यवधानरहिताः
क्रमेण पठ्यंते॥ तेनोत्तरमुत्तरं पदार्थं कुर्वंति स्मारयितुं शक्नुवंति। नैवं चोदनापाठः॥ विधे
यास्तावत्कवाक्यसंदर्भव्यवहिते तेन मंत्रवत्स्मारयितुमशक्यत्वात्॥ न च कर्मकाले तस्योच्चा
रणं विहितं मंत्रवत्॥ श्रुतिरपि मंत्राणां गुणभूयस्त्वमाह॥ तस्मादेतदृषिणाभ्यनूक्तमित्यादिना।
यो हि स्वप्रतिपादितस्यार्थस्य प्रामाण्यार्थं अन्येषामपि प्रदर्शयति। स आत्मापेक्षया उत्कृष्टस्यै
व दर्शयति॥ न निकृष्टस्य। तेन गुणभूयस्त्वं मंत्रेषु। अतो मंत्रपाठ एव बलवानिति सिद्धं।
पदार्थानां क्रमनियमे श्रुत्यादीनि त्रीणि॥ ॥बोधपत्रे अष्टषष्ठिअंतिपंक्तौ ५८

ना

विरादीनां द्रुतस्ततोनयने ऋत्विग्यजमानांवेतस्ततोगमने कर्मार्थमुपवेशनेच सर्वस्यत्रायमंतर्बर्हिर्मार्गोवो
ज्ञेयः॥ ऋत्विजांचयथापूर्वं॥ ऋत्विजामपिब्रह्मादीनामुत्तरेत्रेतानामध्ये एकत्रसमावेशेसतियथापूर्वमि
तियोयःपूर्वःसस्तोतरः अग्निसमीपः योयउत्तरःससबहिर्भवति॥ पूर्वपूर्वापेक्षया॥ सर्वेषांइतस्ततोगमनागमे ग
नेऽवस्थानेच अयमंतर्बहिर्भावनियमः॥ चकाराद्धविषामपियथापूर्वं॥ तदर्थपात्राणामपि॥ स्रुत्स्वगणस्य त्र
मं ज्ञादेस्स्वामिनामप्येवमेवयथापूर्वंतर्बहिर्भावस्यादेव॥ तद्यथातामंतरेण यूपंपचाग्निंचहरतीतिप्रत्या
हृत्यवासोमाहवनीययोरव्यवायादित्यादि॥ अंतर्बहिर्भावस्यात्राग्न्यवधिकः॥ तेनवपाश्रपण्येरव्यव
हिता॥ यूपस्तुपात्रत्वाद्धपापेक्षयाबहिः प्रतिप्रस्थातातुऋत्विक्त्वाद्यूपादपिबहिर्भवति॥ गार्हपत्येसंस्का
राः॥ अधिश्रयणपर्यग्निकरणपात्रप्रतपनादयः संस्कारावचनाभावेगार्हपत्येग्नौभवंति॥ तद्यथा॥ अग्नि
ग्निहोत्रहवण्याःप्रतपनंस्रुक्स्रुवादीनां॥ ऋणप्रघासेकरंभपात्रयवानांदक्षिणाग्नौश्रपणेपिपर्यग्निक
रणंगार्हपत्यदेवपितृयज्ञेचधानानां॥ पर्णकषायेदकस्यतुदक्षिणाग्नावेवपाकः॥ इष्टकार्थत्वात्॥ तत्या
कस्यदक्षिणाग्निनाविधानात्॥ श्रपणेवाहवनीये॥ हविषांश्रपणमाहवनीयेवास्यात्तद्गार्ह

॥११२॥

प

मा

पत्येवाउभयथाश्रुतत्वात् ॥ तदाकुराहवनीयेहवी७श्रययेयुरितिउनोगार्हपत्येएवश्रपयंतीति
च ॥ आदित्तिविकल्पोयं नेछाविकल्पः ॥ तछापिएइतितछापितस्यनियतत्वेनातुवादात् ॥ ॥ तदुक्तं
रूपंकालोनुनिर्वाप्यश्रपणंदेवतास्तथा ॥ आदौयेविधृताःपश्चात्तइमेसर्वदास्मृताइति ॥ रूपंकर्म
स्वरूपं ॥ दाक्षायणदर्शपूर्णमासादिकं ॥ कालउदितानुदि ॥ अनुनिर्वाप्योवैमृधादित्यो ॥ श्रपणंहविः
श्रपणंगार्हपत्येवाहवनीयेवेति ॥ देवताऐंद्रंभवतिमाहेंद्रंवेति ॥ एतेषांविकल्पानांध्येयः प्रथमंस्वीकृ
तःसएवयावज्जीवंकर्तव्यः नपश्चात्तरं ॥ एवमेतेपंचेवादिकल्पाः ॥ अन्येसर्वेपीछाविकल्पाः ॥ ॥ घृ
तमाज्यं ॥ ॥ आज्येनयूपमनक्ति ॥ आज्यमासिच्योद्गात्रेसोमंप्रयच्छतीत्यादौ किमाशृतनिर्वापादि
संस्कारनिमित्तउतजातिनिमित्तइति ॥ असंस्कृतमेवघृतंगृह्णीयात् ॥ जातिनिमित्तोयमाज्य
शब्दोनमस्कारनिमित्तइत्यर्थः ॥ यतोऽसंस्कृतेपिजातिमात्रेप्रयोगोलोकेवेदेचदृश्यते ॥ ऋग्य
माज्यहीणमायंतेष्मस्युपसवनेवर्त्तते ॥ जातिंविनालोकेवेदेचप्रयोगोनास्ति ॥ विनासंस्कारंसंस्का
रलोकेप्रयोगोस्ति ॥ अतोजातिनिमित्तएवेति ॥ प्रयोजनंआज्येनयूप मनक्ति आंमासिच्योद्गात्रे
ज्य

॥११२॥

ग्राहं

सोमंप्रयोसीतिमस्वइतिवाएतासौमेकेंनामयद्वामिति ॥ अतएवोक्तंमंडनमिश्रैः ॥ घृतार्थे
गोघृतंतदभावेतुमाहिषं ॥ अजंवादंतेभावेतुसाक्षात्तैलंगृहीष्यते ॥ तैलाभावेगृहीतव्यंतैलज
र्त्तिलसंभवं ॥ तदभावेतसीम्रहंकौसुंभसर्षपोद्भवं ॥ वृक्षस्नेहाथवाग्राह्यपूर्वालाभेपरःपरः ॥ तद
भावेयवव्रीश्यामाकान्यतरोद्भवं ॥ पीष्टमालोड्य तोयेनघृतार्थयोजयेत्सुधीः ॥ वृक्षतैलेषुन्ना
गानिवेरंडोत्यजेत् ॥ यद्वा ॥ गव्यघृताभावेक्वागमाहिष्यादेक्रमात् ॥ तदलाभेगवादीनांक्रमात्क्षी
रंविधीयेत ॥ तदलाभेदधिग्राह्याममभावेतैलमिष्यते ॥ यत्रादौमशानाद्यर्थेनलभ्यतकथचन ॥
तत्रक्षीराद्यनादृत्यसाक्षात्तैलंगृहीष्यते यत्रमुख्यंदधिक्षीरंतत्रापितदलाभगाः ॥ अजादेःक्षीर
दध्यादितदलाभेतुगोघृतं ॥ मुख्यासन्नोप्यवाग्राह्यः कार्यकारणसंततौ ॥ अतएवघृताभावेपूर्वंद
धिततःपयइति ॥ तथा ॥ तेषांकेषांविदन्येषाहविषामप्यसंभवे ॥ सर्वत्राज्यमुपादेयंभरद्वाजमुनेर्मतो
दिति ॥ ॥ तस्यहोमोनादेशे ॥ अनादेशइतिजुहोतीत्युक्तेइत्यातरस्यानादेशेश्रनुक्तोतस्याजुहो
मःकर्तव्यः ॥ तद्यथासव्येनावृत्यदक्षिणगोजुहोत्यग्नयइतिसरस्वत्याइतिचेततिनमःकृताये

॥११३॥

तिजुहोतीतिच॥स्वाहादेवेभ्यइतिजुहोतिदेवेभ्यःस्वाहोतिजुहोतिस्त्रंतंनइतिजुहोत्यस्मिन्नि
त्यादौसर्वत्राज्यस्यहोमकार्यः॥अत्रतस्येत्यवयवलक्षणाषष्ठी॥ ॥चात्वालात्पुरीषंधिष्ण्यनिव
नादौयत्रपुरीषेणप्रयोजनंतत्रतत्पुरीषंचात्वालाद्ग्राह्यं॥ ॥आहवनीययजतयोध्रुवायाः॥आह
वनीयेयजतोयोयास्तृणान्नभिधारयन्नध्यस्यजपनेध्रुवायांगृह्णातीतिआज्यप्रयागार्थत्वेनध्रौ
वस्यश्रवणात॥अतएवतेरुपस्थाराभिघारार्थमथाज्यंसर्वत्रध्रुवायाएवग्राह्यं॥तेनककौंतेः॥स्था
लाएवोपस्तारोभवतिघारकरणंमदंतत्रवचनाभावात॥सत्रकरोपिइडाप्राशित्राघारांश्चैकइत्य
नेनेतिडाप्राशित्रगौणेयजशब्दर्शनात्तदुपस्तरणाभिघारयोर्ध्रौवंविकल्पेनोपदिशन्मुख्याय
ज्ञेषूपस्तरणाभिघारणेध्रौवादेवसिद्धेइर्ज्ञापयति॥तस्माद्ध्रुवायाएवसर्वोयज्ञैःप्रभवतिश्रु
तितेषु॥आहवनीययजतयइत्यत्राहवनीयग्रहणंगार्हपत्ययजतिव्युदासार्थं॥तेनपत्नीसं
योजेषुस्थाल्याएवाज्यंग्राह्यंनध्रुवायाइतिइडाप्राशित्रावघाराश्चैके॥एकेशाखिनडायांप्रा
शित्रेचयदाज्यंउपस्ताराभिघारौचपूर्वौत्तरौतदर्थंचाज्यंध्रुवायाएवगृह्णाति॥तत्रापियज्ञशब्दश्रवणात

॥११३॥

इडायांतावत॥पाकयज्ञियेयेववाएवदिडायाचारिष्वुरिति॥प्राशित्रेच॥तद्यथैवयज्ञमाज्ञदानमेवमेत
दिति॥आघारयोश्चाशिरोहवैयज्ञस्यतयोरन्यतरआरयोर्मूलमन्यतरइति॥अपरत्वत्रयज्ञशब्दयोगस्य
श्रुतिपरत्वात॥स्थाल्याएवेतिकेचित॥ ॥प्रां वाघारौ॥ ॥पूर्वाघारउत्तराघारश्चेतौद्वावप्यारोप्राचौप्रक्रमे
स्थाहोतव्यौ॥ऋजु॥संततोदीर्घश्च ऋजुमाधारयतिदीर्घमाघारयतिप्रांचमाघारयतीतिश्रुतेः॥प्राचामि
तिसर्वेषांधर्माणामुपलक्षणार्थं॥ ॥विदिशावेके॥ ॥एकेशाखिनस्त्राघारौविदिशोर्जुह्वति॥आहवनीयस्यो
त्तरस्याणेरारभ्यदक्षिणंसर्वंतंपूर्वाघारं॥दक्षिणश्रोणेरासम्योत्तरांसपर्यंतमुत्तराधारमिति॥ ॥अथाचस
त्रांतरं॥ ॥उत्तरपश्चार्द्धादग्नेरारभ्याविच्छिन्नंदक्षिणतोजुहोति तथादक्षिणपश्चार्द्धादारभ्याविच्छिन्नमुत्त
रतोजुहोतीति॥ ॥आहवनीयेहोमाःश्रुतिसमाख्याभ्यां॥ ॥वचनाभावेसर्वेहोमाआहवनीयेक
र्त्तव्याः॥कुतः॥श्रुतेः॥यदाहवनीयजुहोतिहोममात्राधिकरणत्वेनाहवनीयस्यश्रवणात॥समाख्याना
च्च॥आसमतात्आएत्यवास्मिन्हूयतइत्याहवनीयइत्यर्थसंज्ञाविज्ञानादित्यर्थः॥तद्यथायूपाहु
तिंजुहोतिषडृताराजुहोतीत्यादौ॥वचनेनान्यत्रापिभवतियथादक्षिणाग्नौजुहोतीआग्नीध्रीयेजुह

॥११४॥

तीति ॥ जुह्वावचने ॥ होमासाधनतरस्यावचने जुह्वा होमः कार्यः ॥ तद्यथा सव्येनावृत्य दक्षिणाग्नौ जुहोति नमः
कृताये तिकर्मापवर्गे जुहोतीत्यादौ ॥ कुतः ॥ समाख्यानाद्देवकूयतेऽनयेति जूहूरिति ॥ एवं तत्र दर्शपूर्ण
मासतद्विकारादौ जुहूरस्ति तत्रैव जुह्वा होतव्यं नान्यत्रेति कर्कः ॥ परिभाषाया मुपदेशात्सर्वत्रेतियाज्ञिका
हरिस्वामिनश्च ॥ ॥ सकृद्गृहीतार्थावाप्तेः ॥ ॥ सकृद्गृहीतेत्यविभक्तिकोयं निर्देशः ॥ अवचन इत्यनुवर्त्तते ॥ अ
वचने सर्वत्र सकृद्गृहीतमाज्यं जुहूयात् ॥ कुतः ॥ अर्थावाप्तेः ॥ अर्थस्य होमलक्षणस्य कार्यस्यावाप्तेः प्राप्ते सिद्धे
॥ सकृद्गृहीतेनाप्याज्येन होमः ॥ सिद्धत्येव ॥ तद्यथा ॥ दक्षिणाग्नौ जुहोत्यग्नइति सरस्वत्या इति चेति नमः कृताये
ति जुहोति इत्यादौ ॥ वचने न त्वन्यथापि भवति ॥ यथा यूपाकृचतुर्गृहीतं ७ स्रुवेणवेति षट्कृत्वा तारं पंचगृहीतमित्या
दि ॥ ॥ अवषट्कारातिरेकाच्च ॥ ॥ अवषट्काराकृतो द्वितीयस्यावदानस्यैवातिरेकादतिरेकप्रत्ययास्सकृद्गृहीतमे
व होतव्यमिति ॥ कथं ॥ तद्धि चतुरवत्तं भवति देवाअनुवाक्याथ याज्यावषट्कारोथ सा देवता चतुर्थाय स्यै देवतायै ह
विर्भवतीति प्रकृत्याहातिरिक्तं ७ ह तद्यदवदानापत्यं चममिति स्रुवन्नवषट्कारास्वाकृतिषु पुरोनुवाक्याद्यभावादुक्त
मध्ये एकस्या देवताया एव सद्भावात् द्वितीयमेवावदानं अतिरिक्तं ज्ञापयति ॥ तथाग्निहोत्रे यच्चतुरुन्नेषोद्धिहो

॥११४॥

षारथके तेद्वे आहुती इति द्वयोरतिरेकं दर्शयति ॥ ॥ प ॥ ॥ आहिन्यवान्वाह विधिः ॥ ॥ हविषि विहिते सति त्री
हियवान्वाप्रतीयात् ॥ ॥ तस्य द्विरवद्यति ॥ ॥ तस्य हविष ॥ पुरोडाशचरुधानासान्नाय्यादिरूपस्य द्विरव
ति ॥ या गार्थं द्विरवखंडयति ॥ तस्येत्यवयवषष्ठीयं ॥ ॥ त्रिर्जमदग्निनां ॥ ॥ जमदग्नीः प्रवरो येषां ते जसजमद
ग्नय इत्युच्यते ॥ तेषां जमदग्निनार्थं द्विरवखंडयति ॥ तस्येत्य तथाचोपस्तारामिराभ्यां पंचावत्तं संपद्यते ॥ किंब
हुना यत्र यत्रान्येषां चतुरवत्तं ॥ आज्यभागपत्नीसंयाजप्रधानयागादौ तत्र सर्वत्र जमदग्नीनां पंचावत्तमेवा
कर्त्तव्यं ॥ पंचावत्तं जमदग्नीनामिति शाखान्तरात् ॥ अग्निहोत्रहोयहविषो द्विर्द्विरवदेवं ॥ अन्येभ्यस्तु सकृत्सकृत ॥ क
व्यवाहनयागे तु द्विरुपस्तरणं कार्यं ॥ हविर्भ्यो वा द्विर्द्विरवदेवं ॥ यच्च वदानेभ्यो पित्रिरवदेयमिति ॥ विशेषस्तु परि
शात्तत्र तत्रवक्ष्यते ॥ अत्र त्रिर्जमदग्नीनामिति जमदग्निग्रहणमुपलक्षणार्थं ॥ अन्येषामपि पंचावत्तं स्मर्यते
॥ ॥ तथाहि ॥ ॥ जामदग्न्यावत्सविदावार्ष्टिषेणास्तथैव च ॥ पंचावत्तेनए तेन्ये सर्वे चतुरवत्तिन इति ॥ ॥ प
श्चात्तृतीयं ॥ ॥ तत्र तृतीयमवदानं हविषः पश्चाद्भागादवदेयं ॥ प्रथमद्वितीये तु मध्यात्पूर्वार्द्धादिति ॥ ॥ सर्वेषां
वोभयममविधानात् ॥ वाविकल्पे सर्वेषामिति जमदग्नीनां तद्व्यतिरिक्तानां चोभयं चतुरवत्तं वा भवति ॥ कु

तः अविधानात् ॥ जमदग्नीनामेव पंचावत्तं भवतीति नियमस्याविधानात् ॥ अविशेषेण हि श्रूयते तद्वै चतुरवत्तं भवतीति ॥ उतो पंचावत्तमेव भवतीति ॥ शाखांतरे तु पंचावत्तं जमदग्नीनामिति ॥ तेन जमदग्नीनां पंचावत्तमेव नियतं ॥ इतरेषां च तु चतुरवत्तं पंचावत्तं वेति ॥ ॥ मध्यात्पूर्वार्द्धाच्चासंभिंदन्नंगुष्ठपर्वमात्रमात्रमवदानं ॥ हविषो मध्याद्वा हविषः पूर्वार्द्धाद्वा अंगुष्ठपर्वमात्रं ॥ अंगुष्ठपर्वप्रमाणं तिरश्चीनमवदानमवद्यति किं कुर्वन् अवदानयोः परस्परं संभेदं संगतिं मर्यादाभंगमकुर्वन्नित्यर्थः ॥ अवदानयोः संभेदकृते मर्यादाभंगः ॥ तद्भंगे च मध्यपूर्वार्द्धसंमोहो मा भूदिति यत्नः कार्यः ॥ ॥ मात्रावद्दधिपयसोः ॥ ॥ दधिपयसोरपि अवदानमात्रावदवदेयं ॥ अंगुष्ठपर्वमात्रमेवेत्यर्थः ॥ तयोर्हि द्रवत्वात्स्रुवेणावदानं सामर्थ्यात् ॥ स्रुवपुष्करस्यैतावन्मात्रपरिमाणत्वात् ॥ ॥ आद्यंतयोराज्यं ॥ ॥ हविरवदानस्याद्यंतयोरित्यादौ अंते चाज्यमवदेयं ॥ तस्य आज्यस्योपस्तीर्य हि हविःपरिष्टादाज्यस्याभिघारयति सेयमाज्येन मिश्राकृतिर्हूयत इति श्रुतेः ॥ तच्च ध्रुवाया एवावदेयं उपस्तरणाभिघारयन्नाज्यस्य यजमानः ॥ ध्रुवायां गृह्णातीति वचनात् ॥ ॥ एकप्रत्यवायः स्विष्टकृतः ॥ एकप्रत्यवायं प्रधानापेक्षयेनावदानेनो नं हीनः स्विष्टकृतः स्विष्टकृत्तेषा

गस्यावदानं भवति ॥ यस्य प्रधानयागे द्विरवदानं तस्यैकं स्विष्टकृद्यागे ॥ यत्रिस्त्रस्य द्वे इति ॥ ॥ द्विश्चाभिघारणं स्विष्टकृति अवदानानंतरमुपरिष्टाद्द्विरभिघारणं भवति वरुणप्रघासादौ न तथानुवादात् ॥ स सर्वेषामेव हविषामध्वर्युः सकृत्सकृदवद्यत्यथैतस्या एव पश्चार्धात्प्रति प्रस्थाता सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयति गृहमेधीयेपि अथास्यः सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयति वा ॥ ॥ अवदाय प्रत्यभिघारणं प्राक् स्विष्टकृतः ॥ ॥ अवदाय प्रनार्थं हविषोवदानं गृहीत्वा हविषो यावद्भिः प्रदेशेभ्यो वदानग्रहणं कृतं भवति ॥ तत्र प्रत्यभिघारणं प्राक् स्विष्टकृतः ॥ ॥ अवदाय प्राक् स्विष्टकृदर्थवदानान्नंतरं तज्जुहविषः प्रत्यभिघारणं न भवति ॥ तस्माद्यस्य कस्य च हविषोवद्यति पुनरेव तदभिघारयति स्विष्टकृत एव तत्सुनराप्यायय त्यया तया तमकरोत्यर्थ यदा स्विष्टकृतेवद्यति न ततः पुनरभिघारयति नो हि ततः कांचन हविषो आवाकृतिर्होष्यन्भवतीति श्रुतत्वात् ॥ तथा वरुणप्रघासेषु वारुण्या द्व्यवदानानंतरं श्रूयते प्रत्यनक्त्यवदाने अतिक्रामतीति तेन प्रत्यनक्त्यवदानमतिक्रामतीति ॥ पित्र्यायं च तत्र न्यक्तावदानानि नातिक्रामतीति ॥ तत्र स्विष्टकृदवदानांतरं न प्रत्यनक्त्यवदाना

॥११६॥

नि नातिक्रामतीति श्रवणात्त्र्यवदानमभिघारणं कार्यं ॥ ॥ सर्वहुतमेककपालः ॥ ॥ एकस्मिन्कपाले
संस्कृत एककपालो द्यावापृथिवीयकाय वैश्वकर्मणसौ कर्यादिकः स सर्वहुतः कर्त्तव्यः ॥ अथैत
ं सर्वमेव जुहोति न स्विष्टकृते वद्यतीति द्यावापृथिवीयस्य सर्वहुतत्वश्रवणात तत्प्रकृतित्वाद्वैककपा
लानां ॥ तत्र चतुरवत्तत्वसंपत्तये उपरिष्टाद्विरभिघारणं कर्त्तव्यं ॥ पंचावत्तिनां तु द्विरुपस्तारणं द्विरभि
घारणं च ॥ ॥ अनुवाचनः प्रैषो यथा देवताममुष्मा अनुब्रूहीति ॥ ॥ अनुवाचनार्थं प्रैषोनुवाचनप्रै
षः पुरोनुवाक्यार्थः ॥ प्रैषः स यथा या देवता यस्मिन्प्रयोगे भवति तद्वाचिपदं अमुष्मा इति चतुर्थ्यंतं प्रयु
ज्यानुब्रूहीति एवं प्रैषः कर्त्तव्यः ॥ अग्नयेनुब्रूहि सोमायानुब्रूहि सोमायानुब्रूहि इत्येवं ॥ ॥ आश्राव्य
प्रैषे च ॥ ॥ आश्राव्येत्याश्रावणानंतरं यत्र मैत्रावरुणस्य प्रैषः क्रियते ॥ तत्रापि देवतापदं चकारादमुष्मै
इत्येवं चतुर्थ्यंतमेव प्रयोज्यं ॥ अग्नये प्रेष्य सोमाय प्रेष्येत्येवं ॥ ॥ अमुं यजेति ॥ ॥ यत्राश्रावणानंतरं मै
त्रावरुणस्य प्रैषो न भवति तत्रामुं यजेत्येवं द्वितीयांतं देवतापदं प्रयोज्यं ॥ ॥ तद्यथा ॥ ॥ अग्निं यज सो
मं यजेति ॥ ॥ प्रैषानुवाचनं षष्ठीवपायै धानासोमेभ्य इति परिहाप्य ॥ प्रैषसंबंधमनुवाचनं प्रैषानु

११६

वाचनं ॥ यत्र पुरोनुवाक्यानंतरं मैत्रावरुणस्य प्रैषो भवति ॥ तत्र पुरोनुवाक्या प्रैषे द्रव्यवाचिनि श
ब्दे षष्ठीविभक्तिर्भवति ॥ देवतावाचिनि तु चतुर्थ्येकैव ॥ तद्यथा ॥ अग्नीषोमाभ्यां छागस्य हविषोनुब्रू
हीति ॥ किं सर्वत्राप्येवं ॥ नेत्याह ॥ वपायै धानासोमेभ्य इति परिहाप्य इमौ प्रैषौ वर्जयित्वा ॥ अत्रानुवा
चनाद्द्रव्यवाचिनि शब्दे चतुर्थी ग्राह्यजतेति प्रशास्त्रादीनि ॥ प्रशास्तर्यज ब्रह्मन्यजेति तत्र देवताविभ
क्तिरपनोदे अपराऽनये वर्त्तते ॥ देवताविभक्तिस्तस्मात्प्रैषादपनीयते न प्रयुज्यत इत्यर्थः ॥ अथवा यत्र मंत्रमध्ये असा
वित्येवं सर्वनामपदं पठितं भवतीति यथा सम्राडयमसाविति बृहस्पतेस्त्वा साम्राज्येनाभिषिंचाम्यसावि
ति इममनुष्य पुत्रममुष्यै पुत्रमित्यादि च ॥ तत्सर्वनामपदमपनोदे अपनये वर्त्तते ॥ तस्यापनोदमपनयं नि
ष्काशनं कृत्वा तस्य स्थाने यद्विवक्षितं तस्य नाम्नः प्रक्षेपः कार्यं ॥ तद्यथा ॥ सम्राडयं यज्ञदत्तरामीन्द्रि ॥ इ
ममनुष्य पुत्रमित्यत्र रामं दशरथस्य पुत्रं कौशल्यायाः पुत्रमित्येवं प्रयोज्यं ॥ ॥ स वषट्कारः सुदक्षिणतउ
दङ् प्राङ् वषट्कृते ॥ ॥ वषट्कारेण सह वर्त्तत इति सवषट्काराः ॥ ताः स्वाकुर्वंतिषु दक्षिणतो वे
दे दक्षिणभागो उदक्प्राक् इत्यशानादिगभिमुखो वा स्थितो वषट्कृते होता होत्रा वौषाहित्युक्ते स ति जुहु

आहवनीयमध्ये हविः प्रक्षिपति॥ ननु वषट्कारात्पुरा॥ ॥सहवा॥ ॥अथवा वषट्कारेण सहैव जुहोति यु
गपदित्यर्थः॥ तस्मादु सह हवैव वषट्कारेण जुहुयाद्वषट्कृते चेति उभयथा श्रवणात्तु वषट्कारात्पूर्वं होमे निद्दा
त्र श्रूयते॥ देवपात्रं वा एष यद्वषट्कारस्तद्यथा पात्रं उद्धृत्य प्रयच्छेदेवं तदथ यत्पुरा वषट्कारात् जुहुयाद्यथाधोभू
मौ निदिग्ध्यं तदमु यास्यादेवं तदिति॥ ॥तथा॥ ॥तद्यथा यो नो रेतः सिंचेदेवं तदथ यत्पुरा वषट्कारात् जुहुयाद्यथा
यो नौ रेतः सिंक्तं तदिति॥ ॥अमुयेति वृथेत्यर्थः॥ ॥तस्माद्वषट्कारेण सह हवा हेमो वषट्कारानंतरं वेति सिद्धं
॥यत्र वरुणप्रघासेष्वग्नेर्मेधीयस्तु क्रामं थिप्रचारादौ पुनर्वचनं वषट्कृते जुतो वषट्कृते जुहोतीति॥ तत्र त
स्यैव नियमो न सह ते॥ ॥उभयत आज्यं हविषः॥ ॥होमकाले हविष उभयत आज्यं होतव्यं॥ पूर्वम
ल्पमाज्यं जुहुत्वा ततो हविर्हूयते पुनश्चोपर्याज्यमित्यर्थः॥ सहवा॥ अथवाज्यं हविश्चोभयं सहैव यु
गपदेव हूयते॥ नोभयत आज्यमिति॥ प्रदग्धाहुतिर्हवा अन्योध्वर्युरिति प्रकृत्य अथ हैनी एष संतर्प
यति यो यमाज्यं कृत्वावदानानि जुहोत्यथ पुनरंततं आज्यनाभिजुहोत्येष हैनाः संतर्पयतीति नित
थानदुहोवाच याज्ञवल्क्यो यद्वा उपस्तीर्यावदायाभिघारयति तदेवैनाः संतर्पयतीति च श्रवणात्

अथेदं विचार्यते॥ अग्नये नुब्रूहि प्रोक्षणीरासादय अग्नीदग्नीन्विहर बर्हिः स्तृणीहीत्येवमादयः श्रूयं ते
ते किं कर्मचोदका विधय उत मंत्रा इति॥ प्रेषाणां प्रस्तुतत्वात्तद्विषयमेव चिंत्यते तत्र प्रेषा मंत्रत्वं प्रागुक्तमेव
ऋचो यजूंषि सामानि निगदा मंत्रा इति सत्यमुक्तं॥ तथापि निगदानां इतरे मंत्रेभ्यः किंचिद्वैलक्ष
ण्यमस्ति तेन तदेवाक्षिप्य स्थिरी क्रियते॥ किं वैलक्षण्यमिति चेत्तदभिधीयते॥ ॥ए॥ ॥वर्त्तमानाप
देशाच्चोदनाशब्दाच्चोत्पत्यर्थाभावात्तिवचनान्निर्देशात्कर्मचोदकः॥ अग्नीदग्नीनित्यादिः कर्मचोदकः क
र्मविधायकः विधिवाक्यमित्यर्थः॥ ननु मंत्रः॥ कुतः वर्त्तमानापदेशात्॥ एवमादयो वर्त्तमानमनुष्ठेय
त्वेन यत उपदिशंति अग्निविहरणं कर्त्तव्यं स्तरणं वकर्तव्यमित्येवमुपदिश्यते॥ किंच चोदनाशब्दात्तत्र
पि वृण्णुप्रेषेषु चोदनाशब्दो विधिशब्दोस्ति॥ विधौ हि लोट् स्मर्यते॥ लोड्डेति॥ लोण्मध्यमपुरुषवचना
नि चैतानि विहर स्तृणीहि आसादयेत्यादीनि॥ तस्मादपि कर्मचोदका येत॥ अत्यर्थाभावात्॥ अपि च
विधिभक्तिश्रवणेपि यदि विधित्वं नाश्रीयते तर्हि अत्यर्थाभावः श्रुतार्थहानिः स्यात्॥ तवैवेति वचना
त्॥ अपि च इदमपरं मंत्रतो वैलक्षण्यं॥ यत प्रेषास्तवैव वचनाः पठ्यंते॥ ब्राह्मणं तर्पयितवै अश्वमातवेप्रा

हर्त्तवै इत्यादयः ॥ मंत्राश्च उतिवचनाः कर्मणे वां वेषाय वामिति उरु वाताये ति इषे त्वे ति ऊर्जे त्वेत्यादयः ॥ अ-
तोप्यमंत्रत्वं निर्देशात् ॥ अणिरमंत्रास्तु वेदे निर्दिष्टस्य च परिगणितास्य च ॥ अहिर्बुध्न्य मंत्रं गोपाय यमृषय-
स्त्रैविदा विदुः ॥ ऋचो यजूंषि सामानीति ॥ न च निगदास्तत्र निर्दिष्टाः ॥ तस्मादमंत्रत्वं ॥ अथवा निर्देशात् ॥ वि-
धिविभक्तियोगाच्छक्नुवत्येते कर्म निर्दिष्टं विधानं तु तस्मादेवंजातीयकः कर्मचोदक इति पूर्वः ॥ स्यादमंत्रत्वे
॥ अथवा निर्देश्यहः ॥ सिद्धांतमाह ॥ ॥ मंत्रो वा समभिव्याहारात् ॥ ॥ अग्नीदग्नीन्विहरेत्येवमादिको मंत्र एवं
च प्रत्येतव्यो न कर्मचोदकः ॥ वाशब्दः पूर्वपक्षनिरासे ॥ कुतः समभिव्याहारात् ॥ य एभिरर्थोभिधीयते त-
स्य वाक्यांतरेण समभिव्याहारात् विधानादित्यर्थः ॥ विहरत्वग्नीदग्नीन् स्तृणाति बर्हिरित्यादिना ॥ यद्येते
कर्मचोदका भवेयुस्तदा वाक्यांतरेस्तेषामर्थो विधीयते च ॥ तस्मान्मंत्रा एवैते न कर्मचोदका इति ॥ न चावि-
हितस्य पुनर्विधानं युज्यते ॥ अभिधानं तु संभवति ॥ तस्मान्मंत्रा एव ॥ अथवा अयमर्थः सामभिव्याहारात्
प्रयाणकाले येषां समभिव्याहार उच्चारणं विधीयते ॥ अथाह प्रोक्षणीरासादयेति अथ स्तुतस्य तां वा-
चं वदत्यग्नीदग्नीन्विहरेत्यादि ॥ यद्येते विधयस्स्युस्तर्ह्येषामुच्चारणमेषां न विदधीत ॥ विधयस्त्वेव ॥ तस्मान्मंत्रा

रु

इति ॥ वर्त्तमानापदेशकत्वं च मंत्रत्वेपि न विरुध्यते ॥ न चायं विधेर्लोडाद्यन्यदुक्तं चोदनाशब्दाद्वा तु त्यर्थाभावादिति तन्मंत्र-
त्वेपि न विध्यते ॥ किं तु प्राप्तकाले अग्नीधं प्रत्यध्वर्युर्ब्रूते हे अग्नीत् त्वमग्नीन्विहर तव अग्निविहरणस्य प्राप्तः काल इ-
ति ॥ तवैवेतिवनत्वं चानेकांतिकं ॥ मंत्रा अपि तवैव नासंति ॥ कन्याइव वहतुमेतवाउ इति मंत्राश्चानितिवचनाः सञ्जु-
होत्येषस्य वाजीत्यादयः ॥ अतस्तेष्वेलक्षणं नास्तीति यजुषा निर्देशान्निगदा अपि निर्दिष्टा वा पते न निगदानां पृथ-
ग् निर्देशादमंत्रत्वमित्येतदपि निरस्तं ॥ तस्मादेवंजातीयका मंत्रा एवेति सिद्धं ॥ ॥ अर्थप्रसंख्यया द्रव्योपकल्पनं ना अ-
र्थप्रयोजनं कार्यमित्यर्थः ॥ प्रकर्षेण संख्यानेन प्रसंख्या ॥ अर्थस्य प्रसंख्या ॥ अर्थप्रसंख्या ॥ तया अर्थप्रसंख्य-
या प्रयोजनपरिगणनया द्रव्योपकल्पनं द्रव्याणां शूर्पाग्निहोत्रहवण्यादीनामुपसमीपे कल्पनं स्थापनं क-
र्त्तव्यं ॥ करिष्यमाणे कर्मणि उपयोक्ष्यमाणानि सर्वाणि हृदि विमृश्य आनयित्वा कर्मारंभात्प्रागेवानीय समीपे-
स्थापनीयानि अन्यथा कालविलंबेन प्रधानकालविलंबेनेति ॥ ॥ चर्माण्युत्तरलोमानि कृष्णाजिनाधिषवणशा-
र्दूलचर्मादीनि उत्तरलोमानि प्राग्ग्रीवाणि च स्तरणीयानि ॥ पित्र्ययज्ञे पित्र्याणि प्राग्ग्रीवाणि चर्माणि येषां तान्युत्तरलोमा-
नि ॥ प्राचीग्रीवा येषां तानि प्रयांचो दग्रीवाणि दिग्विपर्यासः ॥ उत्तराणि उपरिष्टाद् एवंत्रीणि लोमानि येषां तान्युत्तर

न्य

लोमानि । प्राचीनग्रीवाणि येषां तानि प्राग्ग्रीवाणि । तदुत्तरतः पुच्छस्योत्तरलोम प्राचीनग्रीवमुपस्तृणातीत्येवं तत्र श्रु-
तत्वात् ॥ अत्रोत्तममुत्तरं ऽह विधि । हविषि प्रयद्धवरोक्षपश्चादुक्तं तद्देशतः कालतश्चोत्तरं प्रत्येतव्यं । यत्पूर्वं प्रति-
ष्ठितं तस्य दर्वेग्रहणं दक्षिणतः श्रयणमासादनं च । यच्च पश्चात्प्रतिष्ठितं तस्य पश्चाद्ग्रहणं । उत्तरतः श्रयणमासाद-
नं चेति विकृतौ तथैवानुवादात् । तथा च महापितृयज्ञे । स तत्र जुहूमासादयन्नथ पूर्वामुपभृतमथ ध्रुवाम-
थ पुरोडाशमथ धाना अथ मन्थमिति । अथ दिग्विपर्ययेण प्राच्यो वोत्तरा । तेनैवमनूद्यते । एकद्रव्ये साज्ये वेदेनोप-
ग्रहणं । साज्ये आज्यसंयुक्ते एकस्मिन् स्रुक्स्के वाज्यस्थाल्यादिके द्रव्ये दक्षिणहस्तेन गृहीते सति तस्य वेदेन वे-
देनोपग्रहणं कर्तव्यं । दक्षिणहस्तस्थस्य साज्यकद्रव्यस्य हस्तकंपनादिनाज्यस्कंदनवारणार्थं सव्यहस्तगृहीतवे-
देनाधारकरणमुपग्रहणमुच्यते । तथा दशापवित्रेण ग्रहणमुपगृह्येति । यथा च घर्मे ऽप यमन्योपगृह्णातीति
॥ एकद्रव्य इत्युपदेशाज्जुहूपभृतोर्द्वयोर्ग्रहणे द्वयोरपि हस्तयोस्तत्र व्याप्तत्वेन स्थिरत्वात्कंपनस्कंपनस्कंदन-
शंकाभावान्न सव्येन वेदोपग्रहः । अत एकद्रव्य इत्यनेनानेकद्रव्ये वेदोपग्रहणं वार्यते ॥ ॥ स्फ्येनान्यत्र । आज्याद-
न्यत्रान्येनोदकपुरोडाशादिद्रव्येण द्रव्यवत्येकद्रव्ये प्रोक्षणी प्रणीताश्च मस पुरोडाशपात्र्यादौ दक्षिणहस्तस्थस्य

न सव्येन उपग्रहणं कर्तव्यं । स्कंदनवारणार्थमाधारः कर्तव्यः । अत्र केचिदेवं व्याचक्षते । एकद्रव्ये साज्य इत्येवं विधि-
विषयादन्यत्र सर्वत्र स्फ्येनोपग्रहणं कर्तव्यः । परिस्तरणपर्युक्षणे पस्थानजपव्रतग्रहणादौ कर्ममात्रेय त्राज्य-
संबंधो नास्ति ॥ ॥ कुशैरसदसु । असत्सु स्फ्यावेदद्वितीयद्रव्यलक्षणेषु उपग्रहणेषु कुशैर्दयग्रहणं । सर्वत्र कर्तव्यं । त-
दुक्तं । सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रक इति । तद्यथा ग्रहहोमादौ स्फ्यस्य वचनेनाग्नीध्रहस्तस्थत्वाद्धर्योः
कुशैरुपग्रहणं । वेदस्यासन्नावस्तुकरणत्वात् प्राग्वा चिमोकाट्टुईचा अन्यत्र व्यापाराद्वास्य रस्यान्यत्र व्यापारादेव द्वि-
तीयद्रव्यं तु वाचनिकं क्वचिद्भवति । केचित्तु स्फ्यस्यापि जुह्वाद्वदर्शपूर्णमासत द्विकारेष्वेव विनियोगमिच्छंति त-
त्रैव स्फ्यस्य दृष्टत्वात् । नान्यकर्मणि होत्रादिष्विति । अपरे त्वेवं व्याचक्षते । असत्सु द्रव्येषु कुशैरुपग्रहणमिति ॥ ॥ पा-
णिभ्यां जुहूं परिगृह्योपभृत्यानपादानकाले सं ऽसादयन् ॥ स्रुचोरादानकाले पाणिभ्यां द्वाभ्यां हस्ताभ्यां जुहूं
परिगृह्य प्रमार्गेण नीयोपभृति उपभृत उपर्याघानं निधानं स्थापनं करोति । किं कुर्वन् । असंसादयन् । असंसासि-
जयन् । परस्परं संघट्टनेन शब्दमकारयन्नित्यर्थः । अथातः स्रुचोरादानस्येति । प्रकृत्य इत्थमेव कुर्याद्दुभाभ्यामे-
व पाणिभ्यां जुहूं परिगृह्योपभृत्यधिनिदध्यादिति तथा ते ऽसंशिंजयन्नाददीतेति च श्रवणात् ॥ ॥ वाच्य

॥१२०॥

फलेषु स्वर्गः सामर्थ्यात् ॥ वाच्यं वक्तव्यं फलं येषु तानि वाच्यफलानि अनुक्तफलानि विश्वजिता यजेताभिजि
ता यजेतेत्यादीनि तेषु चिंत्यते ॥ किमेषु फलमस्ति उत नास्ति यदा चास्ति तदापि किंचिदुत स्वर्ग इति संदेहे फला
श्रवणान्नास्ति फलमिति प्राप्त इदमुच्यते ॥ वाच्यफलेषु अश्रुतफलेषु विश्वजिदादिषु स्वर्गफलत्वेन कल्प
नीयः ॥ कुतः सामर्थ्यात् ॥ एवमेतानि वाक्यानि समर्थानि संगतानि संगतानि भवंति ॥ इतरथा साकांक्षत्वा
द्व्यर्थान्येव स्युः ॥ न च वेदे मात्रामात्रस्य वैयर्थ्यमिष्यते ॥ यच्च साकांक्षं वाक्यं भवति तत्पदांतरमध्याहृत्या
नुषज्य निराकांक्षीकरणीयं ॥ ततश्च तत्सार्थकं भवति ॥ नैतेषु वाक्येषु स्वर्गपदानुषंगः कार्यः ॥ विश्वजिता यजे
त स्वर्गकाम इति ॥ ननु पुत्रकामादिष्वपदानाषंगः किमिति न क्रियते ॥ उच्यते ॥ यद्धि सर्वैरभिलष्यते ॥ तस्यैवानुषं
गो युज्यते ॥ स्वर्गश्च सर्वैरप्यभिलष्यते ॥ अतस्तदेवानुषज्यते नान्यादिपदानि ॥ एककर्मणि गुणविशेषे फ
लविशेषः ॥ एकस्मिन्कर्मणि गुणविशेषे वैकल्पिके अङ्गाधिक्ये कृते सति फलविशेषो भवति ॥ तद्यथा अ
ग्न्याधेयं पूर्णाहुत्यंतमिष्ट्यंतं च ॥ तत्र पूर्णाहुत्यंतपक्षादिष्ट्यंतपक्षे फलभूयस्त्वं ॥ इष्ट्यंतपक्षेपि षड्दक्षि
णपक्षे फलभूयस्त्वं तस्मादपि चतुर्विंशतिदक्षिणपक्षे फलाधिक्यमिति ॥ एवं सर्वत्राधिक्ये फला-

निपुत्रकामा

॥१२०॥

धिक्यं द्रष्टव्यं ॥ अन्यथा अधिकगुणाम्नातस्यैव वैफल्यप्रसंगात् ॥ असति च विशेषे को नामाधिके क्लेशावहे अंगस
ध्ये प्रवर्तेत ॥ तस्मादंगभूयस्त्वात् फलभूयस्त्वं भवत्येव ॥ ॥ दानवाचनान्वारंभणवरणव्रतप्र
माणेषु यजमानं प्रतीयात् ॥ एतेषु दानादिषु प्रमाणं तेषु यजमानं कर्तारं प्रतीयात् ॥ दाने तावत् ॥
अन्वारंभेणवहार्यं ददाति न तस्मादग्नीधे प्रथमाय दक्षिणां ददातीत्यादौ ॥ आवो देवा इति वा यय तिरेव
ति यजमान इति वाचयतीत्यादौ सर्वत्र यजमानं वाचयानीति ज्ञेयं ॥ अश्विना गृह्णात्यन्वारभ्य वा पुरीषं
निवपति स्फ्येनान्वारभ्येत्यादावन्वारंभणे यजमानेन्वारभ्य वा पुरीषं निवपेदिति ज्ञेयं ॥ वरवरणं वरवर
णं वरणशब्देनार्त्विग्वरणं ॥ तदपि यजमानः करोति ॥ व्रतशब्देन शास्त्रितो नियम उच्यते ॥ सत्यवदनाधः
शयनपयोव्रतादिकः ॥ तस्यापि यजमान एव कर्ता ॥ प्रमाणं चाग्निवेदिशालासदोहविर्धानाग्नी
त्रप्रभृतीनां ॥ तदपि यजमानसंबंधिनारत्न्यादिना कर्तव्यं ॥ ॥ स्वाते लूनछिन्नावहतपिष्टदुग्धदग्धे
षु यजुः क्रीयासंभवात् ॥ स्वाते यूपावटोपरवादौ ॥ लूने बर्हिषि छिन्ने यूपशाखादिके ॥ अवहतेषु व्रीहिषु ॥
पिष्टेषु तंडुलाधानादिषु ॥ दुग्धे पयसि दग्धेषु महावीरेष्टकोखादिषु ॥ एतेषु स्वातादिषु लोकसिद्धे श्रुणा

॥१२१॥

पा वा या

दीयमानेषु यजुः क्रिया न भवति ॥ कुतः द्वाराभावात् ॥ क्रियाद्वारको [ऽ]खा दिमंत्र इति ॥ एतच्चासंभवविषय इष्टव्यमिति कर्काचार्यः ॥ नारायणभाष्ये एतेषु यजुःक्रिया कर्तव्या ॥ कुतः असंभावात् ॥ यद्यदेवान्मानुषाद्वा प्रतिबलादेतेषां यथाश्रुतकरणं न संभवति तदा सगुणासंभवेतिन्यानि यथाशक्तिगुणोपेतानामप्यवश्यकर्तव्यात्वादेनानि लोकसिद्धान्यपकृदेयानि ॥ तदेतेषु यजुःक्रिया कर्तव्या ॥ यजुर्युक्ता क्रिया यजुःक्रिया ॥ तावान्मात्रस्य लोकसिद्धत्वाभावात् ॥ याज्ञिकास्तु एवमाहुः ॥ एतेषु लोकसिद्धेषु गृहीतेष्वपि यजुःक्रियायुर्युक्ता किंकर्ममध्ये असंभवात् ॥ यदा च पशौ यूपाहरणार्थं सन्निकृष्टेऽलाभात् ॥ देशांतरे विप्रकृष्टे गम्यते तदा प्रधानकालविरोधो भवति ॥ यदा एकदीक्षापक्षे स्तदामाह ॥ वीरस्वादिकमेकेनाप्का निष्पादयितुं न शक्यते ॥ एवमाद्यसंभवउदाहरणीयाः ॥ तदुक्तं मंडनमिश्रैः ॥ छिन्ने नूनं च पिष्टे च साम्नाय्यं मृन्मयं तथा ॥ लोकसिद्धं गृहीतं चेन्मंत्राजाध्याः कथाशयात् ॥ तथा ॥ छिन्नादि लोकसिद्धं चेदाक्षिये तत्र तु प्र[ता]तन्नं मंत्र जपं प्राह भारद्वाजः कृताकृतं ॥ तथा छिन्ने चावहते पिष्टे दग्धे च लूने मृन्मये ॥ खाते च लौकिके प्राप्ते जपो नास्येष वाजिनश्रिति ॥ रौद्रं राक्षसमासुरमाभिचरणीकं मंत्रमुक्त्वा पित्र्यमात्मानं चालभ्योपस्पृ

ये

॥१२१॥

१०

शेद्यः ॥ रौद्रो रुद्रदेवताकः ॥ अव रुद्र रौद्रा वित्यादिका ॥ राक्षसो रक्षोदेवताकः ॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः ॥ ... र क्षसां राक्षसमित्यादिकः ॥ असुरो ऽसुरो देवताकः ॥ अपहता असुरा रक्षांसि वेदिषद इत्यादिकः ॥ अभिचारप्रयोजनमस्य मंत्रस्यासावाभिचरणिकः ॥ प्रयोजनमित्यर्थे ठकः ॥ तमतो मा मा मोकु ॥ द्विषतो वधोऽसीत्यादिशत्रुनामादेशसंयुक्तः ॥ अभिचारार्थमेव प्रयुज्यमानत्वाभिचरणीकः इत्युच्यते ॥ ननु यथाम्नाते ॥ कत्वर्थे चुध्या प्रयुज्यमानः ॥ तेनाभिचरणबुध्याभावे मंत्रस्याभिचरणप्रयोजनाभावान्नाभिचरणिकत्वं ॥ अतस्तदुच्चारणे उदकोपस्पर्शाभावः ॥ रौद्रादिकं मंत्रमुक्त्वा पठित्वा ते पित्र्यं पितृदेवत्यं च मंत्रेषु धंतां पित्र्य इत्यादिकमुक्त्वा च काराद्रौद्राद्यदेवत्यमंमंत्रकं कर्म च कृत्वा आत्मानं चालभ्याप उदकानि उपस्पृशेदालभेतात्कृवित्वा त्रस्यितान्नपो हस्तेन स्पृशतीत्यर्थः ॥ केचित्तु श्रुतिरपि अपामुपस्पर्शनं दर्शयति ॥ स यत्प्राशित्रमवद्यति यदेवात्राविद्धं यज्ञस्य यदुद्रीयं तदेवैतन्निर्मिमिते थाउपस्पृशति शांतिरापस्तदद्भिः शमयतीति ॥ तथा त्र्यंबकानंतरं ॥ पुनरेत्यापउपस्पृशयंति रुद्रियले व वा एतदचारिषुः शांतिरापस्तदद्भिः शांत्या शमयंत इति ॥ द्विरभ्यासोऽध्यायपरिसमाप्तिः सूचनार्थः ॥ ॥ १० ॥

॥१२२॥

॥इति श्रीकात्यायनसूत्रे व्याख्याने अग्निचित्संम्राट्स्थपति महायाज्ञिक श्री श्री प्रजापति सुनु मग्निचित सम्राट्स्थपति महायाज्ञिक श्री श्री देवकृते प्रथमोऽध्यायस्समाप्तः॥ ॥श्रीरस्तु॥ ॥श्री शुभं भवतु॥ कल्याणं॥

॥श्री तत्सत्सूत्रस्य भाष्यं देवयाज्ञिसंज्ञिकं द्वितीयोऽध्यायः॥ ॥

॥१२१॥
॥दे०या० २

॥ श्रीगणाधिपतये नमः ॥ उक्ताः परिभाषाः ॥ इदानीं श्रुतिक्रमं मंत्रक्रमं चानुसरन्नाचार्यः
प्रथमं पौर्णमासेष्टिमुपदिदिक्षुस्तस्या उपक्रमकालमाह ॥ पूर्वां पौर्णमासीमुत्तरां वोपव
सेदिति ॥ द्वे पौर्णमास्यौ पूर्वा उत्तरा च तत्र पंचदशी पूर्वा प्रतिपदुत्तरा कुतः एषा ह संवत्सर
स्य प्रथमा रात्रिर्यत्फाल्गुनी पौर्णमासी योत्तरैषोत्तमा या पूर्वेति श्रवणात् ॥ तत्र पंचदशी मुख्या
प्रतीपद्गौणी ॥ कुतः ॥ अनेकशक्तिविकल्पनादिदोषप्रसंगादुभयोर्मुख्यार्थत्वानुपपत्तेः ॥ उप
वसेदित्यनेनात्रानशनं नशनं न विधीयते ॥ कुतः ॥ अपराह्णे व्रतोपायनीयमश्नीतेत्यने
न विरोधात् ॥ किं तर्हि चांद्रायणं उपवसतीत्यादानियतद्रव्यकालपरिमाणवद्दशनसत्य
वदनक्रोधलोभादिवर्जनादियमनियमकारिणु उपवसतीत्यस्य प्रयोगस्य दृष्टत्वादत्रा
पि पूर्वापरविरोधपरिहाराय स एवार्थो विवक्षीयते ॥ ततश्चायमर्थः ॥ पूर्वां पौर्णमासीं पंचदशीं
तिथिमुपवसेत् ॥ उत्तरां वा प्रतिपदं ॥ पूर्वस्यां उत्तरस्यां वा पौर्णमास्यां शास्त्रिताशनमांसमैथु

॥१॥
॥भाष्य॥

१५

नवर्ज्जनादियमनियमकारी भवेत् ॥ यागोपक्रमं कुर्यादिति तात्पर्यार्थः ॥ सर्वेषां प्रत्येवोपवसेत्
सर्वा उत्तरामेवोपवसेदित्युभयथा श्रुतत्वात् ॥ पूर्वां पौर्णमासीमित्यत्रोपान्वध्याङ्वस इत्यने
नोपपूर्वस्य वसतेराधारस्य कर्मसंज्ञत्वात् कर्मणि द्वितीयेति द्वितीया ॥ अत एवायमभोजनार्
थस्योपवसेः प्रयोगो न भवति तदाधारस्य कर्मसंज्ञानिषेधात् ॥ तथा च वार्त्तिकं ॥ अभुक्त्यर्थस्य
प्रतिषेध इति ॥ तत्रोत्तरोपवासपक्षे च सद्य एव यागं वक्ष्यति सद्यो वा प्रातरिति ॥ शांखायनः उपो
ष्य पौर्णमासेन हविषा यजेत तथामावस्येन द्वे पौर्णमास्यावमावास्ये वया पर्यस्तमयं पूर्ण
इ दियाद्यां वास्तमितेन पौर्णमास्या श्वो न दृश्येतियद्दह श्च न दस्येत ते अमावास्ये तत्रे ज्यायां
याथाकामीति ॥ अथ वा मा इति चंद्रमा उच्यते ॥ पूर्णो माः पूर्णमास इयं पौर्णमासी पूर्णचं
द्रेत्यर्थः ॥ तिथिवृद्धौ सति पूर्वोत्तरा वा या पौर्णमासी पूर्णचंद्रा तामुपवसेत् ॥ तस्यां यागोप
क्रमं कुर्यात् ॥ न त्वपूर्णचंद्रायामिति ॥ तथा च काठके ॥ पूर्णपौर्णमासीमुपवसेत् ॥ अदर्शने

॥२॥
॥देवया॰२

मावास्यायामिति मानवे च पूर्णे चंद्रमस्युपवसेत्पौर्णमासीमदर्शने ऽमावास्यां पूर्वे चेति त
न्निर्णयः एवं यज्ञकालतिथिद्वैधे पक्षलोपादि विधत्ते पर्वतत्रोत्तरे कार्यं हीने पूर्वमुपक्रमेदिति
षट्कलः षट्घटिकापरिमाणः तथा पर्वणो यश्चतुर्थांशो आद्याः प्रतिपदस्त्रयः यागकालः स वि
ज्ञेयः प्रातर्युक्तो मनीषिभिरिति तथा नयष्टव्यं तुरीयेंशे यागेः प्रतिपदः क्वचित् रक्षांसि द्वि
लुंपंति श्रुतीरेवासनातनीति तथा प्रतिपद्यप्रविष्टायां यदि त्विष्टिः समाप्यते पुनः प्रणीय
कृत्वेष्टिः कर्तव्या साग्निभिर्द्विजैरिति तिथेः परस्याघटिकाश्च्या स्युन्यूनास्तथैवाभ्यधिका
स्तासां वृद्धिर्वियोऽपं च तथा प्रयोऽपह्रासे चवृद्धौ प्रथमे दिने तदिति पर्वसंधिज्ञानोपायः तथा
संधिर्यद्यपराह्णे स्याद्यागं प्रातः परेहनि कुर्वाणः प्रतिपद्भागे चतुर्थेपि न दुष्यतीति एतत्पूर्णमा
सीविषयमेव अमावास्यायां तु त्रिमुहूर्तां द्वितीया चेत्प्रतिपद्यापराह्णिकी अन्वाधानं चतुर्द
श्यां परतः सोमदर्शनात् अपराह्णोत्र पंचधा विभक्तस्याह्नश्चतुर्थो भागः तत्रापराह्णेन वास

॥२॥
॥प्रायो॰॥

प्रकृतिर्या लघु॥ आवर्त्तते ग्रा यदि पर्वसंधिः कृतास्तु तस्मिन्प्रकृतिं विकृत्याः॥ तदैव यागः परतो यदि स्यात्तस्मिन्विकृत्याः प्रकृतेश्च पत्र॥ आग्रयणविशेषः॥५
अथो परत्वों हे पर्वपक्षे ये दर्शेष्ट्याः परमुक्तमाग्रयणं कृप्राक्पौर्णमासाश्च तदिति॥ एतत्सर्वसंघः कालः पौर्णमासीपक्षएवेति कालनिर्णयः॥५

कला अपराह्णव्यापिनी आपराह्णिकीत्याहुः केचित् पंचधा विभक्तस्य चतुर्थपंचमभागव्या
पिनीत्यर्थः अपरे तु अंतिमपंचमभागमात्रव्यापिन्येवापराह्णिकीत्याहुः तथा चाह पर्वणोंशे
तृतीयेपि कर्तव्येष्टिर्द्विजातिभिः तथा पर्वणोंसे द्वितीयेपि कर्त्तव्येष्टिर्द्विजातिभिः अनयोरु
त्तरार्द्धं द्वितीयासहितं यस्मात्तदृष्टयत्यास्वनायन इति अतो यागदिने चंद्रदर्शनं प्रयत्नतो
वर्ज्यं कालउक्तो विधिमुपदिशति अग्न्यन्वाधानमध्वर्युर्यजमानो वा अध्वर्युर्यजमानो वा
ग्न्यन्वाधानं करोति अग्न्यन्वाधानमिति वक्ष्यमाणस्य कर्मणः संज्ञा अग्न्यन्वाधानमत्रोपा
यनेत्यादौ संव्यवहारार्था वाशब्दो विकल्पार्थः नन्वध्वर्युः कर्मसु वेदयोगादिति परिभाषित
त्वादध्वर्युः प्राप्त एव किमर्थमध्वर्युग्रहणं अतो यजमानो वेत्येतावदेव वक्तव्यं सत्यं एताव
त्युच्यमाने होतृवेदविहितमग्न्यन्वाधानं समाख्यया होतुः प्राप्नोति तस्याप्यध्वर्युकर्तृक
तासिद्ध्यर्थमध्वर्युग्रहणमित्यदोषः तदेवाग्न्यन्वाधानमाह ममाग्ने वर्चो हवेष्वस्त्वेवयंत्वे
वि

धानास्तन्वंपुषेमेमह्यन्नमंतांप्रदिशश्चतस्त्रस्त्वयाध्यक्षेणपृतनाजयेमेत्याहवनीयेसमिदमादधाति। प्रतिकर्मोद्धरणमप्रसंगात्विशिष्टितत्वात्पौर्णमासेष्ट्यर्थंगार्हपत्यात्तज्ञांतमाहवनीयमुद्धृत्यदक्षिणाग्निंचाहृत्यतस्मिन्नुद्धृतेआहवनीयेअध्वर्युर्वायजमानोवाममाग्नेवर्चइत्यादिनामंत्रेणसमिधमादधाति। अग्नेरुपरिप्रागग्रांस्थापयतीउद्धरणंत्वपूर्वस्वरूपंचसंस्कारान्कृत्वाअध्वर्युणकर्तव्यं॥ समाख्यानात्। समिदाधानमात्रेवचनाद्यजमानस्योपदेशात्। गार्हपत्यादिंकुतः। तस्मादेतंगार्हपत्यात्प्रांचमुद्धरंतीतिगार्हपत्याद्धिसत्राहृतोभवतीत्यादिश्रवणात्। गार्हपत्यादाहवनीयंज्वलंतंप्रणयतीतिमानवे। असौसमित्प्रादेशमात्री। समित्यवित्रंवेदंचमुशलोलूखलग्रहाः। नाभ्युखासंघ्युपरवाशम्यास्त्रुक्कुपराणिच। शास स्वरूविषाणानिचरुणांमेक्षणानिच। कुर्यात्प्रादेशमात्राणिमहावीरास्त्रयस्तथेतिपरिशिष्टकारवचनात्। शमीच्चपालाशाद्यन्यतमयज्ञियवृक्षजा। पालाश्यःसमिधःकार्यखिवादिर्यस्तदलाभतः। शमीरोहितकाश्वत्थास्तदभावेर्कवेतसौ। तथा। पालाशखदिराश्वत्थशम्युदुंबरजास्त्रपि। अपामार्गार्कदूर्वाचकुशाश्चेत्यपरेविदुः। इति। सत्वचःसमिधःकार्याःऋज्वाश्लक्ष्णाःसमास्तथा। शस्तादशांगुलास्तासुद्वादशांगुलकास्तथा। आर्द्रपक्वाःसमच्छेदास्तर्जन्यंगुलवर्तुलाः। अपाटितास्त्रविशाखाःकृमिदोषविवर्जिताः। दग्धाःकृशास्तथास्थूलाःकृस्वादीर्घास्तुवर्जयेत्। ममाग्नइत्यस्ययजमानकर्तृकाग्न्यन्वाधानपक्षेनेकयजमानकेद्वियज्ञेसत्राहीनगणयज्ञादावूहः। आवयोरग्नेवर्चआवाभ्यांनमंतामितिद्वियजमानके। अस्माकमग्नेवर्चोस्मिभ्यंनमंतामितिबहुयजमानके। तत्रान्वाधानंमुख्यएवेतरान्चारम्भःकरोति। अध्वर्युकर्तृपक्षेत्वनूहएव। मंत्रादौचसर्वत्रोंकारःप्रयोज्यः। तदुक्तंब्रह्मारंभेविरामेचयागहोमार्चनादिषु। तथाचशाट्यायनः। दानयज्ञतपःस्वाध्यायजपध्यानसंध्योपासनप्राणायामहोमदेवपित्र्यमंत्रोच्चारणब्रह्मारंभादीनिप्रणवमुच्चार्यप्रवर्तयेदिति। दाल्भ्यपरिशिष्टेच। ब्रह्मयज्ञोजपोहोमोदेवर्षिपितृकर्मच। अनोंकृत्यकृतंसर्वंनभवेत्सिद्धिकारकमिति। तूष्णींद्वितीयां। द्वितीयांसमिधंतूष्णींमंत्रवर्जमाहवनीयेभ्यादधाति। द्वितीया

Left margin, upper folio: ३ ॥३॥ ॥देवया०२

Right margin, upper folio: ति ॥३॥ ॥भाष्य॥

Left margin, lower folio: न्य

Right margin, lower folio: अ

॥४॥
॥देवया॰२

गृहणात् मंत्रोपि प्राप्नोतीति तन्निवृत्त्यर्थं तूष्णीमित्युक्तं ॥ एवमितरयोरग्न्योः ॥ इतरयोर्गार्हपत्यदक्षिणा
ग्निसंज्ञकयोरग्न्योरेवमनेनैव प्रकारेणाग्न्यन्वाधानं करोति ॥ तेन ममाग्ने इति मंत्रेण प्रथमां समिध
मादधाति ॥ तूष्णीं द्वितीयां ॥ अत्रापि प्रथमं गार्हपत्ये ततो दक्षिणाग्नाविति ॥ कुतोयं क्रम इति चेत्त
दुच्यते ॥ अग्न्यन्वाधानं तावद्देवतापरिग्रहणार्थं ताश्च देवताः प्रथमं पत्नीसंयाजेषु गार्हपत्ये इज्यं
ते ततो दक्षिणाग्नाविति ॥ तेन मुख्यक्रमानुग्रहार्थमयं क्रमोवसीयते ॥ अथाग्न्यन्वाधाने पक्षांतरमाह
॥ महाव्याहृतिभिर्वा प्राक्संस्थं ॥ भूर्भुवस्स्वरित्येतासां महाव्याहृतय इति संज्ञा ॥ तदाह कात्याय
नः भूर्भुवः स्वस्तिस्त्रो महाव्याहृतयोग्निवायुसूर्यदेवताक्रमेणेति ॥ वाशब्दो विकल्पार्थः ॥ अथवा महा
व्याहृतिभिर्भूर्भुवस्स्वरित्येताभिः प्राक्संस्थं गार्हपत्यदक्षिणाग्न्याहवनीयेष्वग्न्यन्वाधानं करोति
तत्र प्रथमं गार्हपत्ये भूरिति मंत्रेण प्रथमां समिधं ॥ तूष्णीं द्वितीयां ॥ ततो भुवइत्यनेन मंत्रेण दक्षि
णाग्नौ प्रथमां ॥ तूष्णीं द्वितीयामिति प्राक्संस्थमित्यस्यार्थः ॥ तूष्णीममंत्रमेव वा यथोक्तं प्रत्यग्निसमिद्
तूष्णीं द्वितीयां ॥ ततः स्वरित्यनेन मंत्रेणाहवनीयं प्रथमां ॥ १ अथाग्न्यन्वाधानस्य तृतीयं पक्षमाह ॥ ॥ तूष्णीं वा यथापूर्वं ॥ वा पश्चात्पूर्वं वा शब्दो विकल्पार्थः ॥ २

॥४॥
॥[illegible]॥

याधानात्मकमग्न्यन्वाधानं यथापूर्वं करोति ॥ यथापूर्वमिति योयः पूर्वमुत्पन्नोग्निस्तस्मिन्नग्नौ पूर्वं ॥ तेन प्र
थमं गार्हपत्ये ततआहवनीये ततो दक्षिणाग्नाविति ॥ अस्मिन्पक्षे युगपदेव सामिद्ध्याधाने भेदकारणाभा
वात् ॥ तदेतान्त्रिविकल्पमथाग्न्यन्वाधानं दृष्टार्थं अग्न्यन्वाधानस्य ह्यर्थो दृश्यत एवाग्नीधनं तद्द्वारेणं च
उभयं चैतदिष्यत एव समाप्तिपर्यंतं अग्निकार्यस्य सत्त्वात् ॥ केचिदग्न्यन्वाधानं देवतापरिग्रहार्थमाहुः ॥
कुतः श्रुतेः ॥ तथाहि ॥ ममाग्ने वर्च इति पूर्वेद्युरग्निं गृह्णातीति देवता एतत्पूर्वेद्युर्गृहीत्वाश्वोभूते यजत इति ॥ ने
वमित्यपरे न ह्यग्निधारणे दृष्टप्रयोजने सत्यदृष्टदेवतापरिग्रहार्थत्वमर्थवादमात्रोपयुक्ताद्वाक्यशेषात्कल्प ५
यितुं शक्यं ॥ तस्माद्धारणार्थमेवेति ॥ एवं सत्यपि एतत्पक्षद्वयमपि शिष्टैरंगीकृतमस्ति ॥ अत्राह आपस्तंबः ॥ अ
थातो दर्शपूर्णमासौ व्याख्यास्यामः ॥ प्रातरग्निहोत्रं हुत्वान्यमाहवनीयं प्रणीयाग्नीनन्वादधाति न ग
तश्रीयोन्यमग्निं प्रणयंति देवा गातुविद इति जपित्वा ममाग्ने इत्याहवनीयमुपसमिंधउत्तरं गार्हपत्यमु
५ त्तरयान्वाहार्यपचनमिति व्याहृतिभिरन्वाधानमेके समामनंतीति ॥ तथा ॥ समूहंत्यग्न्यगारमनुलिंपत्या

॥५॥
॥देवया॥२

यतान्यत्वं कुर्वीत इति ॥ अहनि मांसमैथुने वर्जयेत् ॥ ॥ अस्मिन्प्रकृत्येवृत्येऽहनि मांसमैथुने वर्ज्ज
येत् ॥ मांसं नाश्नीयात् ॥ मैथुनं स्त्रीभोगं च परित्यजेत् ननु चाहं सदा मैथुनं ॥ प्रतिषिद्धमेव ॥ पर्वणि तु
रात्रावपि ॥ तत्किमर्थं पुनः प्रतिषिध्यते ॥ सत्यं स तु स्मार्त्तः प्रतिषेधः पुरुषार्थः ॥ इह तु दर्शपूर्णमा
सप्रकरणे विधानात् ॥ कर्मधर्मार्थमिति ॥ अनयोः को विशेष इति चेत् ॥ प्रायश्चित्तांतरे । इति ब्रूमः ॥
पुरुषार्थापचारे स्मार्त्तमेव प्रायश्चित्तं ॥ कर्मधर्मे पुनः कर्मवैगुण्यनिमित्तं भुवः स्वाहेत्यादिकं श्रौ
तं प्रायश्चित्तं भवति ॥ ॥ केशश्मश्रु वपते वाशिखं ॥ ॥ अग्न्यन्वाधानानंतरं यजमानः ॥ केशश्मश्रु वपते वेति ॥
वापयते वेत्यर्थः ॥ अंतर्भूतण्यर्थोयं ॥ वाशब्दो विकल्पार्थः ॥ वपते न वपते वेति ॥ यदा च वपते तदा अशिखं शी
खायाः वपनं न कारयतीत्यर्थः ॥ केशाः शिरसिजाताः ॥ श्मश्रुशब्देन मुखजा निलोमान्युच्यंते ॥ केचिद्वा
शब्दं मशिखमित्यनेन सह योजयंति ॥ अशिखं वा सशिखं वेति ॥ तन्मते केशश्मश्रुवपनं नित्य
मेव सूत्रकारप्रस्थापयमर्थो विसीयते ॥ येनाधाने पौर्णमासवदुद्यनमित्युक्तत्वात् ॥ उत्तरत्र सं

ति ॥

॥५॥
॥याष्या॥

प

ना

वि२

म

भारसो वपनं चातुर्मास्येष्वेवमादिना वपनस्य विकल्पमाह ॥ यदि पौर्णमासे वपनं विकल्पेन स्यात्
तदा पौर्णमासवदित्यनेनैवाधानेपि कल्पस्य सिद्धत्वात् पुनर्विकल्पो नास्तीति ॥ मानवे विशेषः ॥ केश
श्मश्रु यजमानो वापयते दक्षिणोपक्रमान्केशान्सव्योपक्रमान्नखान् ॥ नैवं वक्तव्यः स्यात् ॥ उक्तश्चात्र
तएवं ज्ञायते पौर्णमासे वपनस्य विकल्पो नैध्यात्मकनिष्टिकातः कारयते न कक्षोपस्थौ नखां
श्च कारयितेति ॥ ॥ अपराह्णे व्रतोपायनीयमश्नीतः सर्पिषा संहितौ ॥ अह्नोऽपरो भागोऽपराह्णः
अपराह्णे पत्नीयजमानौ सर्पिषा युक्तं घृतोपसिक्तं व्रतोपायनीयमन्नं संहितौ तावन्तः स्यो यथा
भवतस्तथा अश्नीतः भुंजीत इत्यर्थः ॥ व्रतोपायनीयमिति व्रतं भोजनं येनान्नेनोपायते क्रियते अ
माषा मांसाऽलवणादीनां तद्व्रतोपायनीयं अन्नं तदश्नीतः ॥ तदाह शांखायनः ॥ पत्नीयजमानौ व्रत
मश्नीयातां प्राग्वत्सापाकरणाद्यदन्यन्मांसलवणमिथुनमाषेभ्यो येन चरुर्णेयक्ष्यमाणः स्या
दिति ॥ सकृत्पर्वणि सर्पिष्मद्धविष्यं लघु भोजनं न सायं नोपवासः स्यात्तैलामिषविवर्जितं इति

म

पे

॥६॥
॥देवयो०२

पुलस्त्यः। आपस्तंबः। अतप्तिश्चान्नस्य यद्येनयोः प्रियं स्यात्तदेवैतस्मिन्नहनि भुंजीयातामधश्च श
यीयातामिति। भरद्वाजः वर्जयेत्पर्वकाले तु स्त्रीं तैलामिषकृष्णजं। कलहं क्रीतविक्रीतं प्रहासं बकुलाष
णं। तोयंत्रिकं वृथाशय्यां यत्नमाणो विवर्जयेत्। जाबालिः। कथारकान् कुलत्थांश्च चणकान्कोद्र
वांस्तथा। अनृतं बकुवादं च क्रयविक्रयमेव च। दंतशौचं च पूर्वेद्युर्यागस्यैतानि वर्जयेत्। मसूरान्ल
वणान्नं क्षारान्नं चणकान्कोरदूषकान्। माषान्मधु परान्नं च वर्जयेत्पर्वणि द्विजः। बौधायनः। सर्वमेवै
तदहः कोशीधान्यं विवर्जयेदन्यत्र तिलेभ्य इति। कात्यायनोपि। लवणं मधु मांसं च क्षारान्श्चा येन हू
यते उपवासे न भुंजीत नो रात्रौ न किंचनेति। तथा शाकं मांसं मसूरं चणकं कोरदूषकान्। माषान्म
धु परान्नं च वर्जयेदौपवस्तके। तथा आमासु शिलापिष्टपरान्नानि संत्यजेदिति। तथा। तिलमुद्गाद
ते शैव्यं सस्यं गोधूमकोद्रवौ। चीणकं देवधान्यं च सर्वं शाकं तथैव च। सर्जिक्षारं यवक्षारं टंकण
क्षारमेव च। अतस्थो वर्जयेन्नित्यं सामुद्रं लवणं तथेति। अत्र सामुद्रलवणं तथेति विशेषोपादानात्

च

३६

नव

सैंधवमानसादेरनिषेधः प्रतीयते तस्य हविष्यत्वात्। तथाचोक्तं। मुन्यन्नानि पयः सोमो मांसं
यच्चानुपस्कृतं। अक्षारलवणं चैव प्रकृत्या हविरुच्यते। अक्षारलवणं च सैंधवमिति सर्वनिबंधका
रैर्व्याख्यातमस्ति। तथा ब्रह्मपुराणे। सैंधवं लवणं यच्च यच्च मानससंभवं। पवित्रे परमे ह्येते प्रत्य
क्षमपि सर्वदा इति। सर्पिषेत्यनेन नियमः क्रियते सर्पिर्युक्तमेवमश्नीयादिति। अतोर्थात्तैलादि नि
वारितं इति मानवे। पाणी प्रक्षाल्योपवसथ्यमशनमश्नीतोन्यन्माषेभ्यो मांसाच्च सर्पिषा त्वौर्णमास्यां
मुक्त्वा न सुहितौ स्यातामिति। आपस्तंबसूत्रे च। पुरा बर्हिषः आहर्तोर्जाया पत्नी मश्नीतः पुरा वत्सानामपा
कर्तोरमावास्यायां पौर्णमास्यामपवस्यतो नाति सुहितौ भवतो माषमांसे समाज्येनाश्नीयातां तद
भावे दध्ना पयसा वेति। अतः पौर्णमास्यां व्रतएवासुहितावित्ययं नियमः। न दर्शे कुतः। प्रकरणविशे
षेपि वाक्यस्य बलीयस्त्वात्। तथा च श्रूयते। सर्वे पौर्णमासेनोपवत्स्यन्न सत्रा सुहित इव स्यादिति
अतः पितृभूत्याचार्यैरप्येवमेव व्याख्यातं। अयं च रागप्राप्त एव नित्यशने सर्पिरादिनियमः

॥७॥
॥देवया ०२

घा

ण

मुपैस्यग्नेव्रतपतइदमहमितिवा॥ ॥अत्राग्न्याधानानंतरं यजमानोऽपराग्नी गार्हपत्यदक्षिणाग्नी अ ४
क्रत्वर्थो विधीयते॥ अशनं पुरुषार्थमेव॥ तेनासामर्थ्यादिना यद्यशनं कर्तुं न शक्यते तदा नियमानुग्र
हार्थमशनं न कर्तव्यं॥ न हि नियमार्था क्रियाप्रवृत्तिः॥ नियमस्य क्रियांगत्वादिति॥ अस्तु मेवार्थमाह धूर्तस्वा
मीभाष्ये॥ अशनं हि तत्प्रतीयते तादर्थ्यं तस्यास्मिन्काले नियमः सत्यामिच्छायां हविश्च॥ अतो नावर्त्तत इष्टिव
त्कृत्वेइति॥ ॥अंतरेणापराग्नी गत्वा परेणाहवनीयं प्राङ्तिष्ठन्नग्निमीक्षमाणोऽप उपस्पृश्य व्रतं तरेण तयोरंतराल
मार्गेण गत्वा आहवनीयमपरेणाहवनीयादपरस्मिन्प्रदेशे अदूरे प्राङ् तिष्ठन् पूर्वाभिमुखस्तिष्ठन्नग्निमाह
वनीयमवेक्षमाणो विलोकयन्नप उपस्पृश्यापःस्पृष्ट्वाऽग्ने व्रतपते व्रतमिति मंत्रेण वा व्रतमुपैति शास्त्र
विहितसत्यवादिनियममंगीकरोति॥ व्रतशब्देन कर्मांगभूता शास्त्रतो नियमा उच्यंते॥ कर्मांगभूतायं निय
मा व्रतं तदुपगमार्थो अग्ने व्रतपत इत्ययं मंत्र इति तंत्ररत्ने उक्तं व्रतमुपैष्यन्नंतरेणाहवनीयं च गार्हपत्यं च प्रा
ङ्तिष्ठन्नप उपस्पृशति॥ सोऽग्निमेवाभीक्षमाणो व्रतमुपैत्यग्ने व्रतपते व्रतं चरिष्यामीति इदमहमनृतात्सत्यमु
पैमीति च श्रुतत्वात्॥ आपस्तंबः बर्हिषी आहृते षु पौर्णमासे व्रतमुपैति वत्सेष्वपाकृतेष्वमावास्यायां प्रणीता
॥इदमहमनृतादिसनेन मंत्रेण वा ६

प

म

॥७॥
॥भाष्ये॥

वा हविषु १

सु प्रणीयमानास्वा सन्नेषु व्रतमुपैत्युभयत्र साधारणमशनमग्न्यन्वाधानं व्रतोपायनमित्येके व्रतो
पायनमशनमग्न्याधानमित्येके ऽग्न्यन्वाधानं व्रतोपायनमशनमित्येके पयस्वतीरोषधय इत्यपआचाम
त्युपस्पृशति वापरेणाहवनीयं दक्षिणातिक्रामत्येष एवातऊर्ध्वं यजमानस्य संचरो भवतीति॥ अत्र प्राङ्
तिनवाच्यं॥ आहवनीयमपरेण तिष्ठतोऽग्नीक्षणविधानसामर्थ्यादेव पूर्वाभिमुखतायाः प्राप्तत्वात्॥ सत्य
प्रोषितस्यापि यजमानस्य व्रतोपायने प्राङ्मुखत्वविधानार्थं प्राङ् इत्युक्तं॥ अत एव व्रतादन्यद्यजमानं
त्यागादिकमग्निदिङ्मुखेनैव कर्तव्यं प्रवसतेतिगम्यते॥ तथा चोक्तं॥ सर्वदा यजमानो वात्यजेत्तद्दिङ्मुख
ःश्रुचिरिति॥ आपस्तंबोपि प्रसवन्काले विहाराभिमुखो याजमानं जपति॥ प्रांचो विष्णुक्रमान्क्रामति प्राङ्मु
ख इत्यगोमतीं जपतीति॥ वरुणप्रघासे चाग्निप्रणयनानंतरं यदा व्रतोपायनं क्रियते तदा उत्तरवेदिका हवनी
यस्य पश्चाद्दूरे तिष्ठंस्तमेवेक्षते तत्रैव प्रधानहविषां भूयस्त्वात्॥ न तु दक्षिणमग्निं॥ अत्रोपस्पर्शशब्दे
न केचिदाचमनमाहुः॥ उपस्पर्शस्त्वाचमनमित्यभिधानात्तेन पूतिरंतरत इत्यर्थवादाच्च॥ उदकस्पर्श

॥८॥
॥देवया० २

मात्रमित्यपरे तेन श्रुतिरित्याद्यर्थवादस्त्वैदीक्षाकालीनस्नानेपावनवद्व्याख्येयः॥ तत्राथस्यैवार्थवादस्याश्रवणात्
॥ ॥सत्यवाद्यतः॥ अतः परं यजमानः सत्यवादी स्यात्॥ सत्यं यथार्थवचनं॥ स वै सत्यमेव वदेदिति श्रुतेः॥ सत्यं यथार्थ
वचनं॥ एवशब्दः प्रतिपन्नस्यानृतानृतनिवृत्त्यर्थः॥ ननु पुरुषस्योपनयनप्रभृत्यामरणात्स्मृतितएव सत्यवदनं प्रा
प्तमेव॥ तथा अग्न्याधानोत्तरकालं द्वितीयं सत्यवदनं यावज्जीवं विहितमस्ति॥ तस्याबाए तस्याग्न्याधेयस्य
सत्यमेवोपचारः सत्यं वदतीति॥ तथा च वक्ष्यति सूत्रकारः॥ अनृतातिथ्यपनोदपूर्तिदाद्वाधानवीसपक्वना
मुद्कानि वर्जयेदिति॥ तत्किमर्थं पुनः सत्यवदनं विधीयत उच्यते॥ कांश्या माहैकर्मांगमुत्तरे सत्यवदनं॥ व्रतो
पायनादुत्तरे काले यत्सत्यवदनं तत्कर्मांगं यच्चोपनयोत्तरकालीनं अग्न्याधेयोत्तरकालीनं तत्पुरुषधर्म
ः यदीदमपि पुरुषधर्मत्वेनोपदिश्येत॥ ततउपदिष्टस्योपदेशोऽनर्थकः स्यात्॥ कर्मांगत्वेन चेदं मन्त्रप्राप्तं पुनरुपदि
श्यते॥ कः पुनर्विशेषः क्रत्वर्थपुरुषार्थयोः॥ उच्यते॥ पुरुषधर्मसत्यवदने सति तदपचारे प्रयाजाद्यपचार इव क्र
तोर्वैगुण्यं भवति॥ अनपचारे च न सगुणत्वं [illegible] प्रायश्चित्तं गतश्च विशेषः॥ कर्मांगत्वे

॥८०॥दे
॥भाष्ये॥

२ क्रतोः किमपि वैगुण्यं न भवति॥ वैपरीत्ये च न सगुणत्वं॥ क्रतुधर्मे पुनः सत्यवदने सति तदपचारे २

कर्मांगापचारनिमित्तं श्रौतं प्रायश्चित्तं भवति॥ पुरुषार्थस्मार्तसत्यवदनापचारे स्मार्तमेवेति॥ नन्वग्न्याधानो
त्तरकालीनं यत्सत्यवदनं तदपचारे श्रौतमपि प्रायश्चित्तं भवत्येवानन्तरदर्थं पुनरेतत्सूत्रं कर्तव्यं॥ सत्यं॥ कर्मणतो
यत्र्यार्ग्वैदिकयाजुर्वैदिकत्वादिविशेषः॥ तद्विनाशनिमित्तं विशिष्टं प्रायश्चित्तं यथा स्यादित्येवमर्थं पुनः कर्मांग
त्वेनोपदेशः॥ तथा चार्ग्वैदिके सामिधेन्यनुवचनादौ कर्मणि क्रियमाणे यदि सत्यवदनापचारः स्यात्तदा होतव्यं
भूः स्वाहेति प्रायश्चित्तं भवति॥ याजुर्वैदीकप्रणीताप्रणयनपरिस्तरणादौ क्रियमाणे सत्यवदनापचारे तु भु
वः स्वाहेति॥ सामवेदविहिते ब्रह्मत्वादिकर्मणि क्रियमाणे सत्यवदनापचारे तु स्वः स्वाहेति॥ पुरुषधर्मे पुनः
स्वकर्ममध्ये तदपचारनिमित्तं प्रायश्चित्तं नैव प्राप्नोति क्रतुवैगुण्याभावात्॥ व्यवधानाच्च॥ ॥ ॥ ऊक्षारण्यौषधी
नामश्नीयाद्वा॥ अहर्भोजनेनियमविशेष उक्तः॥ इदानीमवसरप्राप्ते सायाशने विशेष उच्यते॥ ऊक्षं भवं द्रव्यं॥
सायं वृक्षारण्यौषधीनां व्रीह्याणमाम्रादीनां आरण्यौषधीनां श्यामाककंग्वादिप्रभृतीनां संबंधि किंचिदश्नी
याद्वा यजमानः॥ न वाश्नीयादिति विकल्पः॥ अथातोशनाशनस्यैवेति प्रकृत्य स वा आरण्यमेवाश्नीयाद्यांर
वा

॥ ९॥
॥देवया॰ २

एषा ओषधयो यद्व्रीहयस्यमिति श्रुतत्वात् ॥ अथातोऽशनानशनस्यैवेति अत्र च तत्सूत्रैः कंडिकाभिर्गृ
हीतं तत्र तस्य यजमानस्य सायाशने आरण्यं नियम्यत इति हरिस्वामिनः ॥ अत्रारण्याशनं विहितं ॥
अष्टाध्यायां तु यद्यारण्या ओषधीरश्नाति बर्हिषो मेधमश्नाति यद्दिवा न स्यत्यमश्नाति धास्य मे
धमश्नाति तिर्यद्वारण्या दिनिं दित्वा स्वयं हैवैते रात्रीमग्निहोत्रं जुहुयात्स यद् हुत्वा प्राश्नाति तेना
पि द्विदेवत्यो भवतीति श्रुतत्वात् ॥ अतो विकल्पः सूत्रितः ॥ आपस्तंबः ॥ आरण्यं सायमशेश्नात्यमा
मा षममांसमपि वा कामं मार्गादा मधु तत्र प्रशान्ति काद्यो न वा किंचिन्न तस्य सायमश्नीयात् ॥ यं न
प्रातर्यक्ष्यमाणः स्यात् सारण्या यो पवत्स्यन्न पोश्नाति नृ वेति ॥ वत्सायमश्नीयात् मारण्यं वायस्य च
श्वो यक्ष्यमाणस्यान्न तस्य सायमश्नीयादिति मानवे ॥ यद्यपि स्व श्रुत्या पस्तंबमानवसूत्रेषु ॥ ९॥
सायाशन एव प्रातर्होष्यमाणस्य द्रव्यस्य प्रतिषेधः प्रतीयते तथापि शांखायनसूत्रे मध्याश ॥सोष्ये॥
नेऽपि निषेधा दृश्यते ॥ तेनो भयत्र प्रतिषेधः ॥ तच्च सूत्रं प्रागुदाहृतं ॥ ॥ आहवनीयगृहशाय्य

धः ॥ रात्रौ सपत्नीको यजमानो अधोभूमौ आहवनीयगृहशायी स्यात् ॥ आहवनीयागारे अ
धोभूमौ शयीतेत्यर्थः ॥ अध इति नित्य खट्वाद्युपेक्षयानीयत्वा उ मावित्यर्थः ॥ यावद्व्रातर्यानिं तृ एव
खट्वादिस्खरस्थाय्यपेक्षया नीचं भवति तावन्नविरुध्यते ॥ तादृशेनापि लोके श्रेयमामुपचारदर्शना
त् ॥ आत्मापेक्षया प्रशस्यतरं श्रेयान् ॥ आपस्तंबः ॥ अमावास्यायां जागर्तापि वा सुप्यादुपरि त्वेंनश च
प यीतापि वौरि शयीत ब्रह्मचारित्वे वस्यादुभयत्र जागरणमेके समामनंति ॥ आहवनीयागारे गार्ह
पत्यागारे वा शेत इति ॥ मानवे च ॥ अथ व्रतचर्याहवनीयागारे धःशायीत गार्हपत्यागारे पत्नीति ॥ गा
वा र्हपत्यस्य वा ॥ अथैं पत्नीयजमानौ गार्हपत्यस्य गृहे आगारे शयीयातां ॥ स आहवनीयागारे वैतां
रात्रिं शयीत गार्हपत्यागारे वा देवान्चाए षउपावर्त्तते यो अत्र तमुपैतिस याने वो पावर्त्ततेते षा
मेवैतन्मध्ये शेते धः शयीत ॥ धस्तादिवहि श्रेयस उपचार इति श्रवणात् ॥ एतच्चाधः शय्यांतं
व्रतं यजमानस्य स्यात् ॥ तपस्त्वात् ॥ तथा चाह जैमिनिः ॥ तपश्च फलसिद्धत्वादिति वाक्यशेषाच्च ॥

॥१०॥
॥देवया०१

सद्यो धःशय्यां तं व्रतमुपैति तस्य श्रूयते ॥ देवान्वा एष उपावर्त्तते यो व्रतमुपैतीति ॥ व्रतोपायनं च यजमानस्य
श्रूयते ॥ तदेनमेतद्भूतमुपयंतं विदुः प्रातर्नो यक्ष्यत इति आत्मनेपदप्रयोगात्तु स्वामिनमुपयंतं दर्शयति ॥ एव
मेव चोपेतव्रतमधिकृत्यातः परमशननियम इति यजमानः ॥ अत एवोपेतव्रताधिकारादनुपेतव्रतस्य
सद्यो व्रतमुपैष्यतो नारण्याशनशय्यानियमो भवतः ॥ मांसवर्जनं तु तस्यापि शाखांतरीयं भव
ति ॥ उपेतव्रतसंयोगाभावात् ॥ अत एवाह निर्मांसमैथुने वर्जयेदित्याह ॥ उपेते चानुपेते च व्रते
तस्मिन्नहनीत्यभिप्राय इति हरिस्वामिनः ॥ ॥ सद्यो वा ॥ ॥ अथवा सद्य एव समानेऽहन्येव सर्वं
भवति ॥ पौर्णमासे यद्द्व्यहकर्तव्यमुक्तं तदेकस्मिन्नेवाहन्यन्वाधानादिकर्मापवर्गांतं भवतीं समाने
ऽहनीत्यर्थे सद्य इति शब्दः सद्यःपरुदित्यादिना निपातितः ॥ ननु यदा समानेऽह्नि सर्वं क्रियते तदा किं
अन्वाधानादिने सर्वं क्रियते उत यागदिने अन्वाधानादि सर्वमिति संशये त्वाह ॥ ॥ प्रातः ॥ ॥
प्रातर्यागदिन एव प्रतिपद्दिन एव सर्वं अन्वाधानादिकर्मापवर्गांतं कर्तव्यं ॥ न पूर्वेद्युरन्व

॥१०॥ सद्यर्थः ॥
॥ सोऽप्ये ॥
स

न्वाधानदिने ॥ कुतः ॥ प्रतिपदः प्रधानकालत्वात् ॥ अंगानां प्रधानकालस्य न्याय्यत्वात् ॥ तत्र च व्रतो
पायनीयाशनारण्याशनान्यतरागारशयनानि न भवंति उक्तकालाभावात् ॥ रागप्राप्तेष्वेव तेषु
द्व्यादिनियममात्रविधानाच्च ॥ न हि रागस्तदानीमशनादीनि प्राप्नुवंति ॥ अन्ये तूपनादि सर्वं भवत्येव
व्यवस्थितविकल्पोऽयमिति केचित् ॥ तथा च कात्यायनः ॥ संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः ॥
सा पौर्णमासी विज्ञेया सद्यस्कालातिथौ विधिरिति ॥ तथा पूर्णिमाप्रतिपत्संधिर्यदि संगवमंतरा ॥ आ
वर्तनं च स्यात्तर्हि सद्यस्कालविधिर्भवेदिति ॥ एतदपि वैकल्पिकं सद्यस्तदा वा क्रियते समस्तमिति
वचनात् ॥ अथ वैकमेवेदं सूत्रं ॥ सद्यो वा प्रातरिति यदा प्रातः उत्तरोपवासपक्षस्तदा सद्यः समा
नेऽहन्येव सर्वं कर्तव्यं ॥ न तु प्रतिपद्युपक्रम्य द्वितीयायां यागः कुतः ॥ पौर्णमास्यां पौर्णमास्या यजेतेति व
चनात् ॥ प्रतिपद्योगोऽपि पौर्णमास्येव ॥ अवश्यं ह्यपकर्ष उत्कर्षो वा कर्तव्य इत्युक्तं यदंगानां प्रधानं प्रत्यु
त्कर्ष इति ॥ ॥ अग्निहोत्रं हुत्वान्वाधानं वृणीत ब्रह्मिष्ठं ॥ ॥ अत्रापि प्रातरित्यनुवर्तते ॥ प्रातरग्निहोत्रं हु

॥११॥ ॥देवया०२

लाभूपते भुव नपत इत्येवमादिनामंत्रेण यजमानो ब्रह्मिष्ठं पुरुषं ब्रह्माणं वृणीते यो वेदत्रयविहितं
कर्म सम्यग्जानाति सो ऽत्र ब्रह्मिष्ठशब्देनोच्यते ॥ तादृशस्यैव वेदत्रयविहितकर्मणां कृताकृतप्र
त्यवेक्षणे ऽधिकारात् ॥ अग्निहोत्रं हुत्वेत्येतदमावास्यार्थमुच्यते ॥ अत्र प्रयोजनाभावात् ॥ तत्र ह्युक्तं
उदिते पौर्णमासस्य तंत्रं प्रक्रमियादनुदित आमावास्यस्येति ॥ अतो मावस्येष्टौ अग्निहोत्रानंत
र्यविधानार्थमग्निहोत्रं हुत्वेत्युक्तं ॥ अत एव प्रातरित्येतदपि दृष्टमेव मा भूत्सायमग्निहोत्रानं
तरमेव वरणमिति ॥ वरणप्राचाराद्देवं कर्तव्यं ॥ वितानस्यान्तरतः प्राङ्मुखोपविष्टं ब्राह्मणमु
दङ्मुखोपविष्टो यजमानः ॥ स्फ्यं सव्येन गृहीत्वा दक्षिणेन यवसहितेन ब्रह्मणो दक्षिणं जान्वा
लभ्य वृणीते ॥ अमुकसगोत्र अमुकशर्मन्पौर्णमासेष्ट्या [illegible] वयं यक्ष्यामहे तत्र भूते भुवनप
त इत्यादिनामंत्रेण वृणीमह इति वरणमंत्रे बहुवचनश्रवणात् ॥ तेन सामाधिकरण्यार्थं वयं य
क्ष्यामह इति सर्वत्र वरणवाक्यप्रयोगो युक्तः ॥ न त्वहं यक्ष्य आवां यक्ष्यावह इति ॥ अविरुद्धं च ब

॥११॥ ॥श्रोष्ये॥

प्प

हुवचनांतः ॥ तथा च स्मर्यते ॥ अस्मदो द्वयोश्चेति ॥ अस्मद एकस्मिन्नर्थे द्वयोश्चार्थयोर्बहुवचनं स्या
दित्यर्थः ॥ एतच्च यजमानः करोति ॥ दानवाचनेत्यादिना परिभाषितत्वात् ॥ एतच्च वरणमप्रवृत्तस्य
ब्रह्मणः कर्मणि प्रवर्त्तनार्थं ॥ तेनाग्न्याधेये ब्रह्मणः पूर्वमेव वृतत्वात् ॥ पवमानेष्ट्यादिषु ब्र
ह्मवरणाभावः सोमयागे च दीक्षणीयाप्रायणीयादिषु ॥ पुनराधेये वाग्नेये पंचकपाले ॥ वृ
तो जपत्यहं भूपतिरित्यादि मनुष्याणामित्यंतं स्तंत्र ॥ सवृतो ब्रह्मा अहं भूपतिरित्यादिकं मंत्रं
जपति ॥ वृतग्रहणं च वरणजपयोः सन्नियोगसिध्यर्थं यदा वृतस्तदा जपतीति तेन वरणाभावे प
वमानेष्ट्यादौ दीक्षणीयादौ च जपस्याप्यभावः सिध्यति ॥ ॥ वाचस्पते यज्ञं गोपायेत्याह ॥ ॥ त
तो ब्रह्मा तत्रोपविष्ट एव वाचस्पते यज्ञं गोपायेतीमं मंत्रं आह ब्रवीति ॥ केचिद्यजमानमेतद्व
दंतीति ॥ तन्न ॥ कुतः ॥ काण्वानां ह्येवं पठ्यते देव सवितरित्युक्त्वा वाचस्पते यज्ञं गोपायेत्याहेति
अतो ब्रह्मैवाहेति ॥ जपशेषत्वाज्जपेन सत्यस्य प्रवृत्तिः ॥ जपशेषता चास्मा देवकाद्वीयात् ॥ इ

॥१२॥
॥देवया॰२

तियाज्ञिकाः ॥ सूत्रकारस्याप्ययमेवाभिप्रायो येन वक्ष्यत्येतद्ब्रह्मत्वमिष्टिपश्वोरिति एवं च सति य
द्यत्र यजमानः कर्त्राभिमतो भविष्यत्तदा तद्ब्रह्मणमकरिष्यत्तन्न चक्रे तु ॥ तस्माद्ब्रह्मण एवात्र क
र्तृत्वमिति ॥ ॥ अपरेण वाहवनीयं दक्षिणातिक्रामति ॥ दक्षिणतो ब्रह्मयजमानयोरासने इति
परिभाषितत्वात् ॥ ब्रह्मासनं दक्षिणतोऽस्ति ॥ उत्तरत उपचारो यज्ञ इति परिभाषणाद्ब्रह्मवरणमु
त्तरतः ॥ अत उपवेशनायावश्यं दक्षिणतो ब्रह्मणा गन्तव्यं ॥ तत्र मार्गविकल्पमाह ॥ आहवनीयमपरेण
वा दक्षिणेति दक्षिणा दाक्षिण्यात्प्रत्ययान्तमव्ययं सप्तम्यन्तं स्यात् ॥ दक्षिणस्यां दिशि पतति क्रामति वा
आहवनीयं पूर्वेणेति वचनाद्गार्हपत्याहवनीययोरन्तरागमने प्रदोषः ॥ ॥ अहे दैधिषव्यो

॥१२॥
॥भाष्ये॥

त

दतस्तीर्थान्यस्य सदने सीदयोऽस्मत्पाकतर इति ब्रह्मसदनमीक्षते ॥ अहे दैधिषव्य इत्यनेन मं
त्रेण ब्रह्मा ब्रह्मसदनं ब्रह्मण उपवेशनार्थं वरणादिष्टं दक्षिणेतत्कुशास्तृतं प्रागग्रमानं समीक्ष
ते विलोकयति ॥ ॥ ब्रह्मसदनात्तृणं निरस्यति निरस्तपाप्मा सहतेन यं द्विष्म इति ॥ ईक्षणानं

तरं ब्रह्मा निरस्तः पाप्मेत्यादिना मंत्रेण ब्रह्मसदनादेकं तृणं निरस्यति नैरृत्यां दिशि प्रक्षिपति ॥ शांखा
यनेदर्शनात् ॥ समानं होत्रा तृणनिरसनमिति होतुश्च पठितं होतृषदनात्कुषं तृणमुभयतः प्रच्छिद्य
दक्षिणापरमवान्तरदेशे निरस्येति ॥ काठकेप्येवमेवास्ति ॥ तस्मात्तृणमादायोभयतः ॥ प्रच्छिद्य दक्षिणा प्र
त्यक्तृणं निरस्यतीति ॥ मानवे च ॥ आसनात्तृणमुभयतः प्रच्छिद्य निरस्तः परावसुः सह पाप्मनेति द
क्षिणाप्रत्यक्कव्येन निरस्यतीति ॥ अत एव तृणनिरसनोपदेशादासनानि कुशास्तीर्णानि कार्याणी
ति गम्यते ॥ नह्यन्यथा ततस्तृणनिरसनं संभवति ॥ अतोऽत्र षडासनानि ब्रह्मवरणात्प्रागेवोपकल्पनी

स

प

यानि ॥ अर्थप्रसंख्यायाऽऽत्रयोऽकल्पनमित्युक्तेः ॥ द्वे आसने विहारस्योत्तरतो ब्रह्मयजमानयोर्वरणार्थे
द्वे च दक्षिणतस्तयोरुपवेशनार्थे द्वे चाध्वर्योरुपवेशनार्थे ॥ एकं गार्हपत्यस्योत्तरतः ॥ द्वितीयं त्वा

त

हवनीयसमीपे वेदरुत्तरे इति ॥ इदमहं बृहस्पतेः सदसि सीदामि प्रसूतो देवेन सवित्रा तद्गम्ये प्र
ब्रवीमि तद्वायवे तत्पृथिव्या इति ॥१॥ ब्रह्मसदनमाहवनीयमभिमुख उपविशति ॥ इदमहमित्यनेन

॥१३॥
॥देवया०२

मंत्रेणब्रह्माब्रह्मसदनेआहवनीयमभिमुखआहवनीयंसंमुखउपविशति। प्रस्तुतेएवब्र
ह्मसदनेपुनर्ग्रहणंनियमार्थं। ब्रह्मसदनेएवयदाउपविशतितदाआहवनियाभिमुखोनरथ
चक्रादे। छंदोगस्त्वेत्तरपरिध्योर्वासंधिस्रुवांवाग्राणिउत्कंरवाभिमुखउपविशतीतिविशेषः। मानवे
विशेषः। ब्रह्मण्एकपचरत्यन्यस्यवाकर्मकुर्वाणस्यानेदीष्टोऋत्विजांस्यात्सउपासीतापिवादर्भ
मुष्टिमुदपात्रंवाब्रह्मासनेन्यस्येदस्तन्यासनमेवंस्यादिति। ।वाग्यतआनुयाजप्रसवात्॥
इतिप्रभृतिआअनुयाजप्रसवात्ब्रह्मावाग्यतःकृतवाग्यमःस्यात्। ब्रह्मन्प्रस्थास्यामीत्येतद्धे
षपर्यंतमित्यर्थः। भागपरिहरणानिवा॥ ।अथभागमस्मैपरिहरतीत्येतस्माद्भागपरिहरणादारभ्य ॥१३॥
प्रसवाद्ब्रह्मावाग्यतोभवति। नादितआरभ्याकुतः। अथास्मैब्रह्मभागंपर्यहरंतीतिप्रकृत्यस ॥देवे०भा०
वेवाचंयमएवस्याद्ब्रह्मन्प्रस्थास्यामीत्येतस्माद्धचमसइतिश्रुतत्वात्। आप्रसवादितिमर्या
दायामाङ्। नत्वभिविधौ। श्रुतौतथादृष्टत्वात्। अत्रवाशब्दोवधारणे। तेनभागपरिहरणाद्

वब्रह्मावाग्यतोभवतीतिसिद्धांतः॥ ।आहुतावषट्कारासु॥ ।पूर्णाहुतिपूषाहुतिषष्ठोत्तराहु
तिसावित्र्याहुत्याद्याहुतयोऽवषट्काराः॥ तास्ववषट्कारास्वाहुतिषुब्रह्मवरणाद्युपवेशनांत
माहुतातूष्णीममंत्रकंक्रियामात्रेणसर्वंकर्तव्यं॥ तूष्णींवरणंब्रह्मसदनेहुतणंतृणनिरसन
मुपवेशनंचेति। आहच्छंदः समस्तममंत्रकंविधिमाह। शाखांतरेतूष्णींश्रवणादाचार्यप्रय
त्नाद्धतूष्णीमितिगम्यते॥ अवषट्कारसुचेत्येतावतैवकर्मस्यमंत्रकंत्वप्राप्तत्येव॥ अत्रवाव्रतोपा
यनं॥ अत्रास्मिन्नवसरेवाब्रह्मणवरणोत्तरकालंब्रह्माणिस्वासनउपविष्टेसतियजमानेयथोक्तं
व्रतोपायनंकरोतिवापूर्वदिनएव। पूर्वेद्युरुक्तमंतरेणपराग्निंगत्वापरेणाहवनीयंप्राङ्
ष्ठन्नाग्निमीक्षमाणोपउपस्पृश्यव्रतमुपैत्यग्नेव्रतपतइदमहमितिवेतिवाशब्दोविकल्पार्थः॥
॥व्याहृतस्वैष्णवंमंत्रंजपेत्॥ ब्रह्मावाग्यतःसन्व्याहृत्यावाचंविसृज्यमानुषींवाचस्तु स्यन्त्रां
व्याघैवैष्णवंविष्णुर्देवतप्राकर्णिकमेवमंत्रंजपेत्॥ सवेवाचंयमएवस्यादितिप्रकृत्यसय

॥१४॥
१देवया०२

दिपुरा मानुषीं वाचं व्याहरेत्तत्रो वैष्णवीमृचं वा यजुर्वा जपेदिति श्रुतत्वात् । मानुषीं मनुष्यबुद्धिप्रभवां संस्कृतामपि । वैदिकाक्षरव्यतिरिक्ता । काठके शुचिर्वाग्यतः शालीस्यान्नाय ज्ञियां वाचं ब्रूयाद्यदि ब्रूयाद्वैष्णवीमृचं यजुर्वा जपेदपि वा नमो विष्णव इत्येव ब्रूयादिति । अध्वर्युश्च । अध्वर्योरपि शूर्पाग्निहोत्रहवण्यादानानंतरं हविष्कृदाह्वानं यावद्वाग्यमनं वक्ष्यति । तस्मिन्वाग्यमनेऽध्वर्युर्व्याहृत्य भ्रांत्या वा चं विसृज्य मानुषीं वाचमुच्चार्य चकाराद्वैष्णवं मंत्रं जपेत् । अत्रापि श्रूयते यां वा अमूं हविर्ग्रहीष्यन्वाचं यच्छति तत्रैवैतां विसृजत इति प्रकृत्य स यदि पुरा मानुषीं वाचं व्याहरेत्तत्रो वैष्णवीमृचं वा यजुर्वा जपेदिति । केचिच्चकारेण यजमानश्चेति व्याचक्षते यजमानस्यापि दीक्षाकाले अंगुल्यंचनोत्तरकालमास्तमयाद्वाग्यमनं विहितमस्ति ॥१५॥ तस्मिन्वाग्यमनेऽसति यजमानो व्याहृत्य वैष्णवं मंत्रं जपेत् अत्रापि हि श्रूयते । अथ यद्वाचं यच्छति प्रक्षत्य अथ यद्वाचं यमो व्याहरति तस्माद्दुहेष विसृष्टोऽपचारेत्वाध्वर्यवमेव भवति । शाखांतरे तु सामान्येन वाग्यमनलोपे वैष्णवमंत्रजपउक्तोऽस्ति अकाले वा चं विसृज्य वैष्णवीं निगद्य पुनर्यच्छेदिति । आपस्तंबः ब्रह्माणं ॥शोध्य॥

२ यह पराङ्मवर्त्तनेतत्रो वैष्णवीमृचं वा यजुर्वा जपेदिति ॥ यजमानवाचं प्रच्छेत्यस्य वाग्यमस्या २

प्रकृत्य पठ्यते आहवनीयमध्यावृत्यास्ते कर्मणि कर्माणि वा चं यच्छति मंत्रवत्सु कर्मसु । यथाकामीत्युक्तो विष्णुर्यदि प्रमत्तो व्याहरेद्वैष्णवीमृचं व्याहृतं ब्रजयित्वा वा चं यच्छतीति । प्रणय यज्ञं देवता वर्द्धय त्वं नाकस्य पृष्ठे यजमानोऽस्तु सप्तऋषीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्यो प्रणये इति प्रणीताः प्रसौति । ब्रह्मन्नपः प्रणेष्यामीत्यध्वर्युणा मंत्रितो ब्रह्मा प्रणय यज्ञमित्यमुं मंत्रं पठित्वों३ प्रणयेत्यनेन प्रणीताः प्रणीयमानाः प्रसौति अनुजानाति । अनेकयजमानकेऽस्य मंत्रस्योहो भवति । यजमानोऽस्त्वाय जमानो धेहीति यजमानके अहीनेंद्राग्न कुलायादौ यजमानाः संतु यजमानान्धेहीति बहुयजमानकेऽहीनसत्रगणयज्ञादौ । एवमामंत्रित ॐकारेण वक्ष्यमाणेष्वपि हविःप्रोक्षणपरिग्रहेध्मबर्हिःप्रोक्षणसामिधेन्यवचनेषु आमंत्रीत इदं करिष्यामीति । एवं पृष्टो ब्रह्मा एवममुनैव प्रकारेण लोकमध्यमपुरुषैकवचनेन न ॐकारेणोंकारप्रयुक्तेन प्रसौति । ततश्च ॐम ३ प्रोक्ष ॐ परिगृहाण ॐ ३ अनुब्रूहीत्येवं शब्दस्यार्थः । प्रो

॥१५॥
॥देवया०२

क्ष्य यज्ञमिति हविषि ॥ हविषि हविः प्रोक्षणेऽध्वर्युणा ब्रह्मन्हविः प्रोक्षिष्यामीत्येवमामंत्रितो ब्रह्मा प्रोक्ष
यज्ञमिति मंत्रेण प्रसौति ॥ इध्माबर्हिषोश्च ॥ ॥ इध्माबर्हिषोश्च प्रोक्षणे ब्रह्मन्निध्मं प्रोक्षिष्यामीत्येवमध्व
र्युणामंत्रितो ब्रह्मा चकार। प्रोक्ष यज्ञमित्यनेन मंत्रेण प्रसौति ॥ बृहस्पते परिगृहाण वेदिं स्वगा वो देवाः
सदनानि संत्वस्यां बर्हिः प्रथतां साध्वंतरहिं स्वा पृथिवी देव्यास्त्विति वेदिं परिगृहीतं ब्रह्मन्पूर्वं
परिग्रहं परिगृहीष्यामि ब्रह्मन्नुत्तरं परिग्रहं परीगृहीष्यामीत्येवं दृष्टो ब्रह्मा वेदिं परिगृहीतां वेदेः परिग्र
हं कुर्वंतमध्वर्युं बृहस्पते परिगृहाणेत्येवमादिना मंत्रेण प्रसौति ॥ ॥ प्रजापते नु ब्रूहि यज्ञमिति सामि
धेनीरनुवक्ष्यंत ॥ ब्रह्मन्सामिधेनीरनुवक्ष्यामीत्येवं होत्रामंत्रितो ब्रह्मा सामिधेनीरनुवक्ष्यंतं सामिधे
नीनामनुवचनं करिष्यंतं होतारं प्रजापतेऽनु ब्रूहि यज्ञमित्यनेन मंत्रेण प्रसौति ॥ ॥ देवता वर्धयत्वमि
ति सर्वत्रानुषजति ॥ सर्वत्र पूर्वोक्तेषु प्रोक्ष यज्ञमित्यादिकेषु सर्वेषु त्रिष्वपि मंत्रेषु देवतावर्धयत्वं नाकस्ये
त्यादिकं मंत्र यजमानं वर्धय हीत्यं तमनुषजति ॥ संयोजयतीत्यर्थः ॥ ततश्च प्रोक्ष यज्ञं देवतावर्धयत्वं पृथि

देवी

॥१५॥
॥कोष्ठे॥

वीं देवी देव्यस्तु देवतावर्धयित्वं ॥ प्रजापतेरनु ब्रूहि यज्ञं देवतावर्धयित्वमिति एवं सिध्यति ॥ अत्र
वरुणप्रयासेष्वध्वर्युर्द्वित्वेऽध्वर्युपरं वचनं द्विवचनांतमुह्य ॥ ब्रह्मन्हविः प्रोक्षिष्याव इत्यामंत्रणे ॥ प्रो
क्षतं यज्ञं देवतावर्धयतं युवां नाकस्य० यजमानं च धत्तं ॥ ३ ॥ म २ प्रोक्षतमिति ॥ अनेकयजमाने क
सत्राहीनादौ नानागार्हपत्यपक्षे प्रत्यग्निसवनीयपुरोडाशेषूदयनीयासु च बहवोऽध्वर्यवो भवं
ति विरोधात ॥ तत्र ब्रह्मन्हविः प्रोक्षिष्याम इत्यामंत्रणे ॥ प्रोक्षत यज्ञं देवतावर्धयत यूयं नाकस्य पृ
ष्ठे यजमानाः संतु० ॥ यजमानांश्च धत्त ॥ ३ ॥ प्रोक्षतेति ॥ वरुणप्रयासेषु पूर्वोत्तरपरिग्रहेषु अध्वर्यु
परं वेदिपरं च वचनं द्विवचनांतमुह्य ॥ तत्र ब्रह्मन्पूर्वौ परिग्रहौ परिगृहीष्याव इति ॥ ब्रह्मन्नुत्तरौ
परिग्रहौ परिगृहीष्याव इत्यामंत्रणे ॥ बृहस्पती परिगृह्णीतं वेदीं स्वगा वो देवाः सदनानि
संत्वनयोर्बर्हिषी प्रथेतां साध्वंतरहिं स्ते पृथिव्यौ देव्यौ देव्यौ स्तां देवतावर्धयतं युवां नाक॰
स्येत्यादि यजमानं च धत्तं ॥ ३ ॥ परिगृह्णीतमिति ॥ कुंडपायिनामयने यजमानपरं च ॥ इध्माबर्हि
षोः प्रोक्षणे हविः प्रोक्षणवदूहः ॥ अनेकयजमानके बह्वीषु देवसानियासु बहुष्वध्वर्युषु प

॥१६॥
॥देवयां०२

रिग्रहे बृहस्पतयः परिगृह्णीतं वेदीः सुगावो देवाः सदनानि संत्वासु बर्हीषि प्रथंतां साध्वं तरद्भिस्वा
ः पृथिव्यो देव्यो देवाः संतु देवता वर्धयत यूयं नाकस्य पृष्ठे यजमानाः संतु० यजमानांश्च धत्त । इं परि
गृह्णीतेति । इध्माबर्हिषाः प्रोक्षणेन हविः प्रोक्षणवत् । सुगावो देवाः पितरः सदनानीति महापितृ
यज्ञे ऊहः इति अनंतयाज्ञिका आहुः । हरिस्वामिमते वरुणप्रघासेषु कुत्राप्यूहो न भवति । तच्च स~
युक्तिकं चातुर्मास्यप्रकरण एव व्याख्यानः । याज्ञिकानां मते ब्रह्मत्वमंत्रेषु वरुणप्रघासवदूहाभावः
॥ मित्रस्य त्वां चक्षुषा प्रतीक्षे इति प्राशित्रं प्रतीक्षते । मित्रस्य त्वेत्यनेन मंत्रेण ब्रह्मा प्राशित्रमवदी
यमानं आह्रियमाणं वा चक्षुषा प्रतीक्षते विलोकयति । तथाहापस्तंबः । मित्रस्य त्वा चक्षुषा प्रेक्षे
इति प्राशित्रमवदीयमानं प्रेक्षत इति । मानवे च । मित्रस्य त्वा चक्षुषान्वीक्षे इति प्राशित्रमाह्रियमा ॥१६॥
णं प्रेक्षत इति । आश्वलायने । काठकप्येवं । प्राशित्रमिति ब्रह्मणो भागस्य यवमात्रं पिप्पलमात्रं वाव ॥भाष्य॥
त्तस्य नामधेयं संव्यवहारार्थं नं प्राशित्रं विलोक्य देवस्य त्वेति मंत्रेणांजलिना सपात्रं प्रतिगृह्णाति ॥
*प्राशित्रमिडांतं भवतीत्यादौ ॥ देवस्य त्वेति प्रतिगृह्णाति । तदध्वर्युणा समर्प्यमाणं*तत्प्र
२ २

तिगृह्णाति देवस्य त्वेत्यादिश्रुतत्वात् । आश्वलायनसूत्रे । प्राशित्रमाह्रियमाणमीक्षते मित्रस्य त्वा
चक्षुषा प्रतीक्षे इति देवस्य त्वा० गृह्णामीति तदंजलिना प्रतिगृह्य पृथिव्यास्त्वेति कुशेषु प्राग्दंडं निधा
यांगुष्ठोपकनिष्ठिकाभ्यामसंखादन्नाश्नीयादग्नेष्ट्वेति । वैतानसूत्रे च । सुहुतेन निप्राग्दंडं स्थं
डिले निदधाति पृथिव्यास्त्वेति । अत्र भक्ष्यपक्षेप्यासादनमुक्तं ॥ पृथिव्यास्त्वेति सादयत्यपो हव ई
षि । ब्रह्मा तत्प्राशित्रं प्रतिगृह्य वेदेर्दक्षिणांसदसेस्त तानि बर्हिष्यपोह्यापसार्य पृथिव्यास्त्वेति मं
त्रेण तत्रासदेशे प्राशित्रं सादयति ब्रह्मेव सपात्रं । कुतं प्राग्दंडं सादयतीति । आश्वलायनादिसूत्रेषु प्रा
ग्दंडं निधायेति दर्शनात् । पुनरादाय देवस्य त्वेत्यनामिकांगुष्ठाभ्यामग्नेष्ट्वेति प्राश्नाति दंतैरनुपस्पृशन्न
त्रेवेत् । अत्रास्मिन्नवसरे च त्प्राशित्रं ब्रह्मा प्राश्नाति तदा देवस्य त्वेत्यनेन मंत्रेण पुनरनामिकांगुष्ठा~
भ्यां पात्रात् रूप्यमादायाग्नेष्ट्वेत्यनेन मंत्रेण दंतैरनुपस्पृशन्न चर्वयन् तत्प्राशित्रं प्राश्नाति भक्षयति ॥
तत्प्राश्नात्यग्नेष्ट्वास्येन प्राश्नामीति तन्न दद्भिः खादेदिति च श्रुतत्वात् ॥ निदधाति वा ० संदेशे
वेद्यग्रत्र न प्राश्नाति तदा संदेशे निदधाति आसादयति । वाशब्दो विकल्पार्थः पूर्वमासादनमुक्तं परं

प्राग्दंडं

॥१७॥
॥देवयाज्ञि॥

स्थानं नोक्तं। तदिहोच्यते॥ यदि कालांतरे प्राशनं तदा प्रतिगृह्य स्वसदेशे निदधाति॥ एवं च सादनपक्षे
उपविष्टा एव प्राशनं नात्र॥ एवं सादनस्य दृष्टार्थता भवति॥ इतरथा हि अदृष्टार्थता स्यात्॥ कालांतरे
प्राशित्रस्य प्राशनं सूत्रकारो वक्ष्यति॥ अत्र वा ब्रह्मा प्राश्नातीति॥ तेनात्र भक्षणपक्षे प्रतिगृह्य
सादनमकृत्वैव पुनरंगुष्ठमनामिकांगुष्ठाभ्यामादाय भक्षः॥ कालांतरभक्षणपक्षे तु स्वसदेशे आ
सादनमिति पितृभूतिः कर्कश्च॥ अन्ये त्वत्र भक्षणपक्षेप्यानीय तद्देशे सादनं उपरिष्टाद्भक्षणपक्षे
तु अस्वदेशे निधानं प्रयत्नस्थापनं रक्षार्थं कर्तव्यमित्याहुः॥ तथा च वैतानसूत्रे॥ गृह्य हरणानि
प्राग्दंडस्थंडिले निदधाति पृथिव्यास्त्वेति॥ अत्र भक्षणं अत्र भक्षणपक्षेप्यासादनमुक्तं॥ श्रुतौ हि
तत्प्रतिगृह्णातीत्यस्यानंतरं तत्प्राश्नातीति श्रुतत्वात् प्रतिग्रहणानंतरमेव भक्षणं तदनंतरमेव
अथास्मै ब्रह्मभागं पर्याहरंतीति श्रुतत्वाद्भागपरिहरणात् प्राग्वा प्राशित्रहरणं भक्षणीयं॥ अ
त एव सूत्रकृता विकल्प उक्तः॥ ॥ प्रक्षाल्य पात्रं नाभिमालभेत यात्र अप्स्वंतरिति॥ ततो ब्रह्मा पा
त्रं प्राशित्रहरणं प्रक्षाल्य यात्र अप्स्वंतरित्यनेन मंत्रेण नाभिमालभते मंत्रांते स्पृशति॥ पात्रमि

॥१७॥
॥भाष्य॥

दामंत्रेणांसमि ५

त्येकवचनं जात्यपेक्षं॥ कर्णयोः प्राशित्रहरणे इति प्रतिपत्तौ द्वयोः श्रवणात्॥ अत एकेन पात्रेणाभि
धानं कार्यं॥ अपरस्मिन्नवदानमिति द्वयोरप्यत्र प्रक्षालनं॥ भक्षणानंतरमाचमनं मर्त्यांत्रा
प्रमिति न सूत्रितं॥ अथाप आचामति अथ परिक्षाल्य पात्रमिति हि श्रूयते॥ पात्रप्रक्षालनं चो
त्तरकार्यं॥ उत्करो वा अतिरिक्तस्य प्रतिष्ठा इत्युक्तत्वात्॥ ॥ एतं त इति समिदामंत्रितः प्रसौति॥
॥ समिधमादाय यदामंत्रणं तत्समिदामंत्रितः समिधमादायाध्वर्युणा ब्रह्मन्प्रस्थास्या
मीत्येवमामंत्रितो ब्रह्मा एतं ते देवसवितरिदं मंत्रं पठित्वा प्रसौति॥ स यत्राह ब्रह्मन्प्रस्थास्यामी
ति तद्ब्रह्मा जपत्येतं त इति श्रवणात्॥ ॥ प्रतिष्ठेति ब्रूयाद्वा॥ अत्र प्रतिष्ठेति मंमंत्रं ब्रूयाद्वा न वे
ति विकल्पः॥ स यदि कामयेत ब्रूयात्प्रतिष्ठेति यद्युकामयेतापि नाद्रियेतेति श्रुतत्वात्॥ वरुण
प्रघासे प्रतिष्ठत मिति प्रयोगः॥ सत्रेषु उदवसानीयासु प्रतिष्ठतेति॥ ॥ कर्मापवर्गे समिधमाद
धाति जुहोत्युपतिष्ठते वा नमः कृतायेत्यादि स्वाहेति यथेतमेत्येवमंतं॥ सूत्रे कर्मणोपवर्गः स
माप्तिः कर्मापवर्गः॥ तस्मिन्कर्मापवर्गे कर्मसमाप्तौ ब्राह्मणेनंतरं ब्रह्मा यथेतमेत्यथ यागतं प्र

ण
त
ति
तिष्ठते
तर्पण

॥१९८॥
॥देवया० २

त्यागत्य वरणोत्तरकालं स्वासने उपवेशनार्थं येन मार्गेण गतो भवती आहवनीयमपरेण वा तेनैव (पूर्वेण वा)
मार्गेण प्रत्यागत्य नमः कृताय इति मंत्रेण आहवनीये समिधमादधाति। अथवा तेनैव मंत्रेण आज्यस्थाल्या
स्रुवेण जुह्वां सकृद्गृहीतमाज्यं गृहीत्वा जुहोति। अथवा तेनैव मंत्रेण आहवनीयमुपतिष्ठते। होमप
क्षे इदं जातवेदसे इति देवतोद्देशः। मंत्रलिंगात्। मंत्रमध्ये स्वाहाकाराम्नानमुपस्थाने समिदाधानयोर
पि प्राप्त्यर्थं होमे तु परिभाषयैव स्वाहाकारस्य प्राप्तत्वात्। एतच्चारादुपकारकमंगं प्रयाजादिवत्। अत
श्च गृहमेधीयादौ स्मावदुक्तं तापच्छिन्ने च पित्र्यादौ निवर्त्तते। एतद्ब्रह्मत्वमिष्टिपश्वोर्ब्रह्मणः कर्मेत्यर्थः
ब्रह्मणस्त्व इति कर्मणि त्वप्रत्ययः। नन्विष्टिग्रहणं न कर्त्तव्यं। कुतः। प्रकृतत्वात्। पशुग्रहणमपि न क
र्त्तव्यं प्रकृतिवत् इत्यतिदेशेन तत्रापि प्राप्तत्वात्। कर्त्तव्यं वा पशुग्रहणं पशुप्रोक्षणे ब्रह्मानुज्ञा ॥१८॥ ॥प्रोष्य॥
प्राप्त्यर्थं अन्यथा पशोः सान्नाय्यविकारत्वात्सान्नाय्यस्य च प्रोक्षणाभावात्प्रोक्षणमेव तावन्न प्राप्नो
ति। अनुज्ञानु दूरापास्तैव। तस्माद्ब्रह्मन्स्त्वेति पशुं प्रोक्षणीभिः प्रोक्ष्यतीत्यनेन विहिते पशोः प्रोक्षणं
ब्रह्मानुज्ञापूर्वकं यथा स्यादित्येवमर्थं पशुग्रहणं। इष्टिग्रहणमपि कर्त्तव्यं अकृते ह्विता स्मिन्यशा वै वे

पतस्मा उक्तं ब्रह्मत्वं पादिकमिष्टिपश्वोः

तद्ब्रह्मत्वं स्यात् तन्मा भूदित्येवमर्थं ब्रह्मवरणप्रस्तावात् स्यवक्तव्यं त्वाच्चयावत्किंचिन्न ब्रह्मत्वं
तत्सर्वमभिहितं। अतः परं प्रणीताप्रणयनाद्याध्वर्यवमुपदिशति॥२॥ ॥गार्हपत्यमुत्तरेणोद
पात्रं निधायालभते भूतस्त्वा भूतं करिष्यामीति॥ ॥ततोध्वर्युर्गार्हपत्यस्योत्तरतः समीप एव
उदपात्रं उदकस्य पात्रं निधाय आसाद्य स्थापयित्वा भूतस्त्वा भूतं करिष्यामीत्यनेन मंत्रेण तदुदपा
त्रमालभते मंत्रांते हस्तेन स्पृशति उत्तरेणेत्ययं सप्तम्यंतादेनप्रत्ययो दूरेऽर्थे। तद्योगे गार्हपत्यमित्ये
नपा द्वितीयेती द्वितीया। उदकस्य पात्रं उदपात्रं। यद्यपि उदपात्रमिति सामान्येनोक्तं तथापि चम
सरूपं तत् ज्ञेयं। चमसेनापः प्रणयतीति शाखांतरात्। स्वशाखायामपि प्रतिपन्नो श्रूयते। शी
र्षं चमसं प्रणीता प्रणयनमिति। अतोयं चमसः स च वारणः वारणान्यहोमसंयुक्तानीति परि
भाषणात्। स च चतुरस्रो द्वादशांगुलदीर्घश्चतुरंगुलखातः। सवृंतश्च भवति। परिपिष्ठा सूत्रका
र प्रस्थाच्च। चमसवत्त्वक्वेणेति स्रुक्वस्य चतुरस्रतां विधातुं चमसवादित्यनेन चमसस्यसिद्धं चा च
तुरस्रता माह। स वै प्रातरप एव प्रथमेनेति प्रकृत्य ता उत्तरेण गार्हपत्यं सादयतीति श्रु

॥१२॥
॥देवया०२०॥

तत्वात्। गार्हपत्ये णोदपात्रं निधायेत्युक्तं। ताउत्सिच्यातिवमसस्योपरि सिक्त्वा पूरयित्वा पुनस्तेनै
व पात्रेण कुतश्चिज्जलाशयादुद्धृत्य गार्हपत्यमुत्तरे देशे समीप एव स्थापयतीति श्रुत्यर्थः। आ
लंभेपि विप्रतिपत्तिः पात्रस्येति कर्कः। उदकस्येति याज्ञिकाः। ब्रह्मन्नपः प्रणेष्यामि यजमानवा
चं यच्छेत्याह। आलंभानंतरं ब्रह्मन्नपः प्रणेष्यामीति ब्रह्माणमामंत्रयते। पृच्छति। यजमानवा
चं यच्छेत्यनेनाध्वर्युर्यजमानं वाग्यमने प्रेषयति। यदा च प्रणीतानां सर्वार्थत्वं संयमनार्थत्वं वा
तदा तस्मिन् कर्मणि चरुश्रपणार्थं पयो घृतं वा विहितं यथा वैश्वदेवश्चरुः पयसि वेति घृते च
रुरादित्येभ्य इति च। तत्र पयसो घृतस्य प्रणयनं कर्तव्यं। तत्र ब्रह्मन्पयांसि प्रणेष्यामि ब्रह्म
न्घृतानि प्रणेष्यामीत्येवमूहः कार्यः। यत्र च मंथार्थं दधि प्रणीयते तत्र ब्रह्मन्दधीनि प्र
णेष्यामीत्यूहः। पित्र्यायामपि प्रणयनात्पूर्वमेव निवान्यादुग्ध्वा तद्दुग्धस्य प्रणयनं कर्तव्यं। अत्र
चाध्वर्युपायेन प्रणीतापात्रे संयुतपिष्टादिना तथा मर्यादा कर्तव्या यथोदकघृतादेः संकरो
न भवति। प्रणीतानामदृष्टार्थत्वे तु द्रव्यांतरस्य प्रणयनमेव न भवति। तत्र दृष्टार्थत्वे संभव

॥२९॥
॥प्रणेष्य॥

तत्वात्। गार्हपत्यमुत्तरेणोदपात्रं निधायेत्युक्तं। ताउत्सिच्येतिवमसस्योपरि सिक्त्वा पूरयित्वा पुनस्तेनैव पात्रेण
कुतश्चिज्जलाशयादुद्धृत्य गार्हपत्यमुत्तरदेशे समीप एव स्थापयतीति श्रुत्यर्थः। आलंभेपि विप्रतिपत्तिः पात्र
स्येति कर्कः। उदकस्येति याज्ञिकाः। ब्रह्मन्नपः प्रणेष्यामि यजमानवाचं यच्छेत्याह। आलंभानंतरं ब्रह्मन्न
पः प्रणेष्यामीति ब्रह्माणमामंत्रयते। पृच्छति यजमानवाचं यच्छेत्यनेनाध्वर्युर्यजमानं वाग्यमने प्रेषय
ति। यदा च प्रणीतानां सर्वार्थत्वं संयमनार्थत्वं वा तदा यस्मिन्कर्मणि चरुश्रपणार्थं पयो घृतं वा विहितं यथा
वैश्वदेवश्चरुः पयसि वेति घृते चरुरादित्येभ्य इति च। तत्र पयसो घृतस्य प्रणयनं कर्तव्यं। तत्र ब्रह्मन्पयां
सि प्रणेष्यामि ब्रह्मन्घृतानि प्रणेष्यामीत्येवमूहः कार्यः। यत्र च मंथार्थं दधि प्रणीयते तत्र ब्रह्मन्दधीनि प्र
णेष्यामीत्यूहः कार्यः। पित्र्यायामपि प्रणयनात्पूर्वमेव निवान्यादुग्ध्वा तद्दुग्धस्य प्रणयनं कर्तव्यं। अत्र चाध्वर्यु
पायेन प्रणीतापात्रे संयुतपिष्टादिना तथा मर्यादा कर्तव्या यथोदकघृतादेः संकरो न भवति। प्रणीतानामदृ
ष्टार्थत्वे तु द्रव्यांतरस्य प्रणयनमेव न भवति। तत्र दृष्टार्थत्वे संभवत्यदृष्टार्थत्वं वक्तुं वचनाभावे दुःशक्यमि
ति। तत्र पशौ प्रतिषेधाद्धविर्यज्ञविधेर्निरूढे पुनः प्रतिप्रसवाद्युपसदि प्रणयनवचनाद्व्यप्रकृष्टे दं

१ त्र

संप्रति आर्जिं येन चाहि वेदीं प्रणीता निदधाति॥ आसादयति कस्त्वेति मंत्रांते॥ ६।२

॥२०॥ ॥देवया०२

ष्टार्थत्वात्तु सर्वार्थत्वं युक्तं संयवनार्थत्वं तु तस्यैवैकदेशानुवादः। अदृष्टार्थत्वपक्षे पुपसदि प्रणयनं वच
नं। सर्वविधे प्रतिषेधो हविर्यज्ञविधिमति प्रसवश्चोपपद्यत एवात्र जैमिनेर्मते प्रणीताः संयवनार्था एव। क
र्काचार्याणां मते सर्वार्था एव। इतरेषामदृष्टार्था एवेति। अनेकयजमानके यजमानो वाचं यच्छतं। यजमाना
वाचंयच्छतेति यथा प्रथमूहः। अनुज्ञात उत्तरेणाहवनीय संप्रति निदधाति कस्त्वेति॥। ब्रह्म

नं६१ ती१३

णा प्रणयेत्यनुज्ञातो ध्वर्युः प्रणीताः प्रणीय गार्हपत्यसमीपत आहवनीयसमीपं नीत्वाहव
नीयस्योत्तरतः समीप एवं संप्रतिनाहवनीयमतिक्रम्य न वा प्राप्य। स प्रणयती
ति कस्त्वा युनक्तीति तासुत्तरेणाहवनीयं प्रणयतीति। ता नातिहृत्य सादयेन्नो अनाप्ताः सादये
दिति तस्मादुसंप्रत्येवोत्तरेणाहवनीयं प्रणयतीति चशब्दतत्वात्। प्रणयतिरत्र निधानार्थः। तेन

॥२०॥ ॥सौष्य॥

निधान एवं मंत्रः। संप्रति शब्द ऋज्वर्थः। संप्रति शब्दस्य प्रादिपाठदधिकरणम्भूतेन्यः पदार्थे व्ययी
भावः समासः। संप्राप्यातिष्ठत्यस्मिन्नातिक्रामतीति संप्रति। तैत्तिरीयसूत्रे। उत्तरेणाहवनीयं दर्भे
ष्वासादयित्वा दर्भैः प्रच्छाद्येति। उपबिलं च मसंस्पर्शयित्वेति च। आपस्तंबे च। उत्तरेणाहवनीयमसंस्प

॥२५॥ ॥देवया०२

ति। अत्र वानस्पत्यस्य कामसंयोगेनाकामसंयोगेन च श्रवणं। कामसंयोगे नैवोत्तरयोः। तस्माद्वान
स्पत्यं क्रत्वर्थमतस्तद्विकृतिषु प्रवर्त्तते। तृणैरग्नीन्परिस्तीर्य पुरस्तात्प्रथमं द्विशः पात्राणि सं
सादयति। अध्वर्युः प्रणयनानंतरं तृणैर्दर्भतृणैः प्रागुदगग्रैरग्नीनाहवनीयगार्हपत्यदक्षिणाग्नी
न्क्रमेण परिस्तीर्य तत्रापि प्रथमं पुरस्तात्प्राच्यां दिशि परिस्तरणं ततः दक्षिणक्रमेणोदक्संस्थ

प्र

पुरस्तात्प्रथममित्येतत् श्रौतं। ततश्च तदपचारे श्रौतं प्रायश्चित्तं। ततः प्रदक्षिणापचारे तु स्मार्त्त
मिति। अत्राहापस्तंबः। उदगग्रैः प्रागग्रैश्च दर्भै रग्नीन्परिस्तृणाति उदगग्राः पुरस्तात्पश्चाच्चेति। ततो
द्विशः पात्राणि संसादयति निदधाति द्वे द्वे इत्यर्थे द्विशः। एकेन प्रयत्नेन द्वयोर्द्वयोः सह वनिधानं
करोतीत्यर्थः। अथ तृणैः परिस्तृणाति द्वंद्वं पात्राण्युदाहरतीति श्रुतेः। द्वे द्वे इत्यस्मिन्नर्थे द्वंद्वं रह

॥२१॥ ॥सौष्य॥

स्य मर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिष्वित्यनेन द्वंद्व शब्दो निपातितः। उदाहर
तिउच्चैराहरत्या सादयितुमिति गम्यते। सूत्रे त्वासादन एव द्वंद्वता तदर्थत्वादाहरणस्य। पात्राणि
ति सामान्यनिर्देशेन प्रयोजनवत्वाद्यज्ञपात्राणि गृह्यंते पांतिरक्षंति। हविरादीभिरिति पात्रा॰

यथासंख्यं॥ ॥अभिचारब्रह्मवर्चसप्रतिष्ठाकामा ६

ष्टादर्भेष्वासादयति॥ निगयंतिनेत्यत्यासंस्थातोदर्भैराच्छादयेति॥ काठके च॥ उत्तरतो गेहः स्फ्योद्धृतेनिधा चं२
यद्दर्भैरपिधायेति॥ अतः प्रणीतानां दर्भेष्वासादनं दर्भैरपिधानं कर्तव्यं॥ ब्रह्मानुज्ञात इति प्रैषद्वये
चारणाद् द्वैऽनुज्ञावचनं यथा स्यादित्येवमर्थं॥ तेन ब्रह्मन्नपः प्रणेष्यामीत्यस्यानंतरमेव प्रण
नं यय ज्ञमिति पठनीयं॥ किंतु यजमानवाचं यच्छेत्यस्यानंतरमेवेति॥ नांतरेण गच्छेयुः॥ प्रणीता
आहवनीययोरंतरे प्रकृताप्रकृतान गच्छेयुः॥ तानांतरेण संचरेयुरिति श्रवणात्॥ ॥का
ंस्यवानस्पत्यमार्त्तिकैरभिचारब्रह्मवर्चसप्रतिष्ठाकामाय यजमानाः कांस्यवानस्पत्यमार्त्तिकै
ःपात्रैर्यथासंख्यं प्रणयंति॥ तत्राभिचरन्प्रथमेन कांस्येनपात्रेण प्रणीताप्रणयनं करोति॥ ब्रह्मवर्चस
कामो वानस्पत्येन द्वितीयोक्तेन पात्रेण प्रतिष्ठाकामो मार्त्तिकेन तृतीयेन मृन्मयेनेति यथासंख्यं
शब्दार्थः॥ अत्र तु गुणदेवे तत्फलं॥ न तु क्रतोः॥ कांस्यादीनामेव फलसंबंधश्रवणात्॥ अतश्चावि
कारेणैषाम प्रवृत्तिः पुरुषार्थत्वात्॥ प्रकृतौ यत्र क्वत्वर्थमंगजातं तदेव विकारेष्वतिदेशेन गच्छति॥ आ
पस्तंबः॥ कांस्येन प्रणयेत् ब्रह्मवर्चसकामस्य मृन्मयेन प्रतिष्ठाकामस्य गोदोहनेन पशुकामस्य

णी॥ ननु पिबत्यमिरिति किन्न विगृह्यते नैतदेवं॥ अस्यां हि श्रुत्यन्तौ स्रुवमेव जुह्वा अपात्रत्वं स्यान्न शूर्पादीनां इ
तरथा तु सिद्धं भवति॥ इध्माबर्हिषी अपि पात्रे॥ ताभ्यामप्यग्निवेद्योः पालनात्॥ नन्वेवमृत्विगादिष्वपि पात्र
त्वप्रसंगः॥ नैष दोषः॥ तेषां करणत्वेनानिर्देशात्॥ तद्यदेवैषामत्राशुद्धस्तच्छावान्यो वा मेध्य इति वा कश्चेषवि
नां रोधात्॥ शूर्पादीनि हियाज्ञिकाः प्रसिद्धानि॥ यजमानो वा॥ अथवा यजमानः पात्राण्यासादयति विशिष्ट
देशे स्थापयति॥ तान्येव पात्राण्याह॥ शूर्पाग्निहोत्रहवणी स्फ्यकपाल शम्या कृष्णाजिनमुलूखलं दृषदु मुसलं
पलमर्थवद्धा॥ शूर्पाग्निहोत्रहवण्यादीनि दश पात्राणीयथोपदिष्टमासादयति शूर्पं च अग्निहोत्रहवणी च शू
र्पाग्निहोत्रहवणि॥ द्वंद्वैकवद्भावो यं॥ एवं सर्वत्र वक्ष्यमाणेष्वपि ज्ञेयं॥ स्फ्यः कपालमित्येकवद्भावादिदमेकं द्वंद्वं ते
न बहुभिरपि कपालैरेकमेव पात्रमिति द्रष्टव्यं॥ कपालानि च भिन्नस्य घटादेर्ग्राह्याणि॥ अभिन्नान्यपि रोहि
णकपालवन्निर्मितानि भवंतीत्येक इति धूर्तस्वामिनः॥ शूर्पं च नडत्वणमयमीषीकावेणुदलनिर्मितं वा
भवति॥ यदि नडानां यदि वेणूनां यदीषीकाणामिति वा कात्यशेषात्॥ अर्थवचेति अर्थः प्रयोजनं॥ सोस्यास्तीति
त्यर्थवत्॥ येन येन पात्रेणात्र प्रयोजनं न तत्सर्वमासादयतीत्यर्थः॥ तत्रोपयोगक्रमेणार्थवतामासादनं कर्तव्यं॥ तथा

स्मा

॥ २२॥
॥ दर्श० २

चकात्यायनः। प्रांचं प्राचमुदगग्रे उदगग्रं समीपतः। तत्र यथा सादयेद्द्रव्यं यद्यथा विनियुज्यत इति। तत्रैवं। अग्नेर्वा
पात्रीवा व्रीहयो यवा वा। ततश्चैवं। अग्नेर्व्रीहयश्च अग्नेर्यवाश्चेति वा। अथवा पात्री व्रीहयश्च। पात्री यवाश्चेति वा। प
वित्रच्छेदनानि पवित्रे च। उपवेषः संयवनार्थमुदकं च। आज्यस्थाली आज्यं च। अमावास्यायां दोहनं चतुष्टयं वे
दार्थः कुशमुष्टिं दक्षिणार्था। अन्वाहार्यं तंडुलाश्च। दर्भेतृणमभ्रिश्च। इध्मो बर्हिश्च। स्रुवो जुहूश्च। उपभृत् ध्रु
वा च। प्राशित्रहरणेस्य तावदानं च। द्वे पुरोडाशपात्र्यौ इति कर्कादयः। तद्युक्तमिति केचित्। स्वसूत्रे शाखां
तरसूत्रेषु सादनप्रतपनोपस्तरणादिष्वेकस्याएव दर्शनात्। यच्चेडापात्री पिष्टपात्र्योर्भेदमाहुः। तदपित्र
युक्तं। शाखांतरसूत्रेषु तयोर्भेददर्शनात्। तथा तैत्तिरीयसूत्रं। प्राशित्रहरणं चेडापात्रं च मेक्षणं च पिष्टपा
त्री चेति। मानवे। प्राशित्रहरणे इडपात्र्यपिधानपात्री संयवनपात्रीति। आपस्तंबः। उपभृतं ध्रुवां वेदं पात्रीमा
ज्यस्थालीं प्राशित्रहरणं पात्रमिति। विकृतौ चातुर्मास्यादौ यत्र चर्वादिभिर्व्यवहिताः पुरोडाशाः। तत्र भवतु पु
रोडाशपात्री भेदः। योक्त्रं मूतं कुशाश्च। परिधयः कुशास्तीर्णहोतृषदनं च। इडापात्री षडवत्तं च। अत्र तद्दान
कटः पूर्णपात्रं च। पक्षे कर्मा[illegible]पवर्गसमिदप्यासाद्यते। परिधीनामपि पृथगासादनं अष्टादशकाष्ठके ध्म

भिरा

॥ २२॥
॥ शा० प्य॥

३

पक्षे यदा त्वेकविंशतिकाष्ठके ध्मेति पक्षस्तदा तस्मादेवेध्मात् त्रीणि काष्ठान्यादाय विकल्पेन परिधिपरि
धानविधानात्। तदुक्तं इध्मस्यैवैतान्परिधीन्परिदध्यातीति॥ एकविंशतिं वा ततः परिधानेक इति सू
त्राच्च। एवमत्र पात्राणामुपादानक्रमेणासादनमुक्तं॥ तथा कुंः पितृभूत्याचार्याः॥ पात्री धान्यं पवि
त्रोपधिष्टिं संपवनोदकं। स्थाली चाज्यं च वेदश्च दक्षिणार्था उदकूतणं। इध्मो बर्हिः स्रुक्चत्वश्चैव स
मार्गा होणियानि च॥ योक्त्रयूनकुशाश्चैव पक्षे परिधयस्त्रयः॥ पात्री पीठ कुशास्तीर्णं षडवत्तं च
ताकृतं॥ अपूर्वा सामित्येहणे तदर्थं वदुच्यत इति॥ अतश्च यस्य यस्य पात्रस्य येन क्रमेण प्रथमं
कार्यार्थहस्तेनोपादानं तेनैव क्रमेण तस्य तस्यासादनं युक्तं॥ एवं च सुतरां दृष्टार्थता भवति लाघवं
च विनियोगक्रमेणासादने च तथा न स्यात्॥ हविर्ग्रहणे पात्र्याः हविर्द्रव्यस्य च देशाविप्रकर्षात्॥ आ
ज्यनिर्वापे स्थाल्या आज्यस्य च॥ तस्मादुपादानक्रम एव पितृभूतियाज्ञिकसंमतः॥ पात्रासादनेयु
क्तः। एवं विकृतावपि यस्य प्रथमं ग्रहणं क्रियते कार्यार्थं तस्य तस्य पूर्वं पूर्वमासादनं इतरस्य आ
दिति॥ ननु श्रूयते अग्निहोत्रहवण्यादिपात्राणां पंचदशद्वानि समामनंति॥ ततश्च तेषामेव ह्रिरात्रा आदा

चा

सा

पस्यपात्रस्य

प
सा

तो २

॥२३॥
॥ देवया०२

नंस्यान्त्रेतरेषामिति॥ उच्यते॥ नियमार्थमेतत्समाम्नातं॥ शूर्पस्याग्निहोत्रहवण्यैव द्वंद्वतास्या
स्यकपालैरेव सह इति॥ एवं सर्वेषु इतरथा प्रयोगक्रमेण द्वंद्वता स्यात्॥ तदा च स्फ्यस्य स्यकपालैः
सह द्वंद्वता न स्यात्॥ अत एव नियमाद्विकृतौ पश्वादिके कपालाभावे स्फ्य एक एवासाद्यते॥ यत
स्तत्र कपालानि द्वंद्वतासंपादकानि न संति॥ यदि च स्फ्यस्याग्निहोत्रपात्रेण द्वंद्वता क्रियेत॥ तदा
एकस्यापि पात्रस्य यथाश्रुता द्वंद्वता न स्यात्॥ तत्र च बहूनामनुग्रहो न्याय्य इति॥ एकस्यैव पृथगा
सादनं पुरुके एवं शूर्पादि सर्वेषु पात्रेषु वाच्यं॥ ततश्च शूर्पादि दशाकमध्ये विकृतौ यस्याभावस्त
त्सहचरितं तद्द्वितीयमेकमेवासादनीयमिति॥ अर्थवदासादितानां तु नियमसमाम्नायाभावान्न्या
य नियमः॥ तत्र यस्य कस्यचित् येन केन सह द्वंद्वता कर्तव्या॥ कर्काचार्यास्तु विनियोगक्रमेणासाद
नमाहुः॥ अथ पात्राणामासादनस्थानमाह॥ अपरेणस्फ्यपश्चादुत्तरतो वा॥ अपरं तेनेनहविंषि
इति स अपरयोर्गार्हपत्यो वाऽऽहवनीयो वा यः अपरेणो भवति॥ तस्य पश्चात् प्राक्संस्थान्युदगग्रा
णि वा पात्राणि आसादयति॥ अथवा अपरेणस्योत्तरतः॥ प्रागग्राणि उदगग्राणि वा उदक्संस्था

प्रागग्राणी

॥२३॥
न्याय्य॥

स्फ्यपा ४

न्यासादयेत्॥ तदुक्तं कारिकायां॥ उत्तरे चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेदिति॥ तेन विपुलस्थानसंभवे उ
त्तरत उदक्संस्थं पश्चाच्च प्राक्संस्थमिति॥ असंभवे तु यथासंभवं तदप्युक्तं॥ प्राचं मां च मुदगग्ररुदग
ग्रसमीप तदइति॥ स यस्य गार्हपत्ये हवींषि श्रपयंति गार्हपत्ये तस्य पात्राणि संसादयतीति॥ तथा यस्या
हवनीये हवींषि श्रपयंत्याहवनीये तत्राणि संसादयतीति च श्रुतत्वात्॥ कर्मणे वामिति शूर्पाग्निहोत्र
हवण्यादापवाचं यच्छतीत्यनेन मंत्रेणाध्वर्युः शूर्पमग्निहोत्रहवणीं च सह हैवादाय गृहीत्वा वाचं यच्छति वा
ग्यमनं करोति॥ अथ शूर्पं चाग्निहोत्रहवणीं चादत्ते कर्मणे वामिति॥ अथ वाचं यच्छतीति च श्रुतत्वात्
मंत्रश्चोभयार्थः॥ द्विवचनांतत्वात्॥ ततश्चैकस्यादानविस्मरणे पुनरपि द्विवचनांत एव प्रयुज्यते॥ शूर्पाग्नि
होत्रहवण्योरादानं च हविर्ग्रहणार्थं॥ अतो ग्रहणाभावे पयस्यापश्वादौ वाग्यमस्तु तत्र पदार्थधर्मः॥ तेन प
श्वादावपि पात्रप्रोक्षणकाले भवत्येव॥ प्रतपनं प्रत्युष्टंनिष्टप्तसमितिवा॥ तयोरात्रायोः शूर्पाग्निहोत्रह
वण्योर्गार्हपत्याग्नौ प्रतपनं करोति॥ प्रत्युष्टं रक्षः इति मंत्रेण निष्टप्तमित्यनेन वा गार्हपत्ये संस्कार इति
परिभाषणात् गार्हपत्येऽग्नौ प्रतपनं करोति॥ अथ प्रतपति प्रत्युष्टमित्यादि श्रुतत्वात्॥ मंत्रयोरा[illegible]

ये
॥कर्मणे वामि

न भवति॥४

॥२४॥
॥देवया०२

नदुच्चारणानंतरमप उपस्पृशेत्॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति हि कात्यायनेनोक्तं प्रतपनं च हविर्ग्रहणार्थः संस्कारः॥ ततश्च हविर्ग्रहणाभावेन भवति। गच्छत्पूर्वं तरिक्षमिति अपरेणाध्वर्युः। गच्छत्विति मन्त्रेणाध्वर्युरनः शकटं प्रतिगच्छति॥ यद्वा स्थिते अनः अपरेणास्य पश्चात्तिष्ठन् गार्हपत्यादपरस्मिन् देशे स्थितं॥ पुनः कीदृशं समंगि संयुक्ते मंगैः युगयोक्त्रवरत्रादिभिः समंगि सर्वांगोपेतं शाखांतरात् प्राङीषं च॥ अपरेण शब्देनात्र गार्हपत्य एवोच्यते नाहवनीयः। तथा च श्रूयते॥ स जघनेन गार्हपत्यं प्राङीषमनो वा स्थितं भवति तस्य दक्षिणं चक्रमारुह्यानसो धिहविर्निर्वपतीति॥ पित्र्यायां च स जघनेन गार्हपत्यमित्यनुवादाच्च॥ धूरसीति धूरभिमर्शनं॥ युगस्य प्रांतौ धूः शब्देनोच्येते। यौ अनडुहस्कंधयोरुपरि निधीयेते॥ अध्वर्युरनः समीपे गत्वा उत्तरतो वस्थितो धूरसीत्यनेन मंत्रेण धुरोरभिमर्शनं करोति॥ प्रथमं दक्षिणस्याः ततः उत्तरस्या इति॥ कुतः प्रादक्षिण्यानुग्रहात्॥ उरस्के स्यतास पत्रेश्च सधुरमभिमृशति धूरसि इत्यादि श्रवणात्॥ अत्रहापस्तंबः उर्वंतरिक्षमन्विहीतिश कटयाभिव्रजति अपरेण गार्हपत्यं

॥२४॥
॥श्लाघ्ये॥

प्राङीषमुदङीषं वानहयुगं शकटमवास्थितं भवति॥ हि मयवमद्वाधूरसीति दक्षिणां युगधुरमभिमृशत्युत्तरां वेति। तस्योत्तरां धूरमभिमृशतीति त्रिरीसूत्रे काण्वे॥ उर्वंतरिक्षमिति प्रत्युङ्संकुदिक्कायश कटायगच्छत्यनंतकम् गार्हपत्यं दक्षिणां धूरमालभते॥ धूरसीत्यतिक्रम्य देवानामिति शकटमिति॥ मानवेचापस्तंबवत्सूत्रवत्॥ तेनैकस्या एव धुरोऽभिमर्शनं युक्तं दक्षिणस्या उत्तरस्या वा स्वशाखायामप्येकवचनं श्रूयते॥ देवानामित्युपस्तंबनस्य पश्चादीषां॥ अभिमृश्य जपतीति शेषः॥ ततोऽध्वर्युरुपस्तंभनस्य पश्चादुत्तरामीषामभिमृश्य देवानामसीत्यमुं मंत्रं जपति॥ अथ जघनेन कस्तंभीमीषामभिमृश्य जपतीति श्रुतेः॥ कस्तंभीमिति कुत्सितोत्यल्पत्वात्॥ कस्तंभः कोः कभावः पृषोदरादित्वात् कस्तंभः॥ कस्तंभस्य भार्येव पुयोगाद्दारख्याया मितिङीष्॥ कस्तंभी अत्र न सउपस्तंभीता जघनेनस्या॥ पश्चात्समीप एव तामभिमृश्य जपतीत्यर्थः॥ तत्राहापस्तंबः॥ त्वं देवानामसि [illegible] सस्नितममित्युत्तरामीषामालभ्य जपतीति॥ एवमेव मानवेपि॥ पितृयज्ञेपि तृणमसि वह्नितमं॥ पितृहूतमामित्यूहः॥ एकदेवत्ये त्वाग्नातिथ्या पवमानेष्याद्दौ देवस्यासीति॥ स्त्रीदेवत्ये देव्यासीति॥ द्विदेवत्ये देवयोरसीति॥ यथा मृहकार्यं इ

प्रायणीयादावेकवत्ये

दा

॥२५॥
॥देवया०२

स्योप

तिककर्त्ताचार्यः। केचिदत्रलिंगवचनयोरनूहमिच्छंति प्रकृतावपि सान्नाय्यवत्यां दर्शेष्टौवसमवेतत्वा
त्। अतोयथाश्रुतमेव सर्वत्र प्रयोज्यः। यज्ञपतिशब्देनैकयजमानके ऊहः कृतो मा ते यज्ञपतिर्ह्वार्षीदिति
द्वियजमानके। मा ते यज्ञपतयो ह्वार्षुरिति बहुयजमानक इति॥ ॥विष्णुस्त्वेत्यारोहणं॥ ॥तस्यान
संपश्चात्परीत्य विष्णुस्त्वेत्यनेन मंत्रेण दक्षिणेन चक्रैस्या[illegible] पर्यारोहणं करोति तस्य दक्षिणं चक्र
मारुह्येति शाखांतरात्॥ अथाक्रमते विष्णुस्त्वाक्रमतामिति श्रुतेः॥ ॥अत्राहापस्तंबः॥ ॥विष्णु
स्त्वाक्रंस्येति सव्ये चक्रे दक्षिणं पादमभ्याधायाङ्कुतमसीहविर्द्धानमित्यारोहयतीति तैत्तिरीसूत्रे
अथविष्णोः क्रमोसीति दक्षिणं चक्रं क्रमित्वाभ्यारुह्य प्रउगे शूर्पं निदधाति शूर्पे स्कंचामिति॥ एवमेव
मानवेपि॥ प्रेहृत उरुवातायेति हविष्यान्॥ आरोहणानंतरं उरुवातायेत्यनेन मंत्रेण हविष्यान्प्रे
हृते व्रीहीन्यवान्वा॥ अथ प्रेहृत उरुवातायेति श्रुतत्वात्॥ एतच्च हविःप्रेहणं हविषः संस्कारः॥ अ
तश्च नानाबीजेषु देवसुहविष्षु चातुर्मास्यादिषु च प्रतिबीजमीहणं कर्त्तव्यं॥ ॥अपहतमिति निर
स्यत्यन्यत्॥ ॥हविषोभ्यो यदन्यत्तन्मध्ये पतितं भवति तृणकाष्ठादिकं तदपहतमित्यनेन मंत्रेण

॥२५॥
॥भाष्य॥

द

निरस्यति। नीचैः क्षिपति॥ अथापास्यत्यपहतमिति श्रुतेः॥ नानाबीजेषु सर्वेभ्यो न्यग्रही त्वा मुग
परेव निरसनीयं शकत्वात्॥ मंत्रस्य राक्षसत्वाद्रूपामुपस्पर्शनं कार्यं॥ ॥अविद्यमानेभिमृशे
त्॥ ॥अस्मिन्नृतृणलोष्ठादिके अविद्यमाने अनेनैव मंत्रेण हविष्यानेवाभिमृशेत्॥ अथापा
स्यत्यपहतं रक्ष इति यद्यत्र किंचिदापन्नं भवति यद्युनाभ्येवमृशेदिति श्रुतेः॥ अभिमर्शनं च
नानाबीजेष्वप्रतिबीजं मंत्रेण कर्त्तव्यं॥ ॥यच्छंतामित्यालभते॥ यच्छंतामित्यनेन मंत्रेणाध्वर्युर्हवि
ष्यान्व्रीहीन्यवान्वालभते स्पृशति॥ अथाभिपद्यते यच्छंतां पंचेति श्रुतेः॥ नानाबीजेष्वेन तत्त्वभेदेन स्व
मंत्रकं कुर्यात्॥ देवस्य त्वेति निरूप्य त्याग्नेय चतुरो मुष्टीन् [illegible]॥ ततोध्वर्युर्मुष्टिना व्रीहीन्य
वान्वा तूष्णीमादाय देवस्य त्वेति मंत्रेणाग्नेय चतुरो मुष्टीन्निर्वपतीति शाखांतरात्॥ अत्र मुष्टित्र
यं मंत्रेण प्रक्षिप॥ चतुर्थं तूष्णीमिति॥ तदुक्तं मुष्टौ चोत्तम इति॥ तथा चाहापस्तंबः॥ त्रिर्यजुषा तू
ष्णीं चतुर्थमिति॥ एवमिव सर्वेषु सत्रेषु॥ ग्रहणानंतरं च शूर्पे हविः प्रक्षेपणीयं॥ यद्यप्यत्राग्निहोत्र
हवण्यां गृह्णातीति सूत्रकृता नोक्तं॥ तथापि हविर्ग्रहणपात्रमपः कृत्वेति वक्ष्यमाणत्वादेवमुक्तं भ

हस्तेनस्पर्शेन

ती

२

॥२६॥
॥देवयो॰ २

वति। तेन यद्यपि गृहस्थकाले एतावदेवोक्तं शूर्पाग्निहोत्रहवण्यादायेति। तथाप्यग्रे विशेषोपदेशादग्निहो
त्रहवण्या गृहीत्वा चार्यां च्छूर्पे पृथक् पृथक् प्रक्षेप्स्यामिति गम्यते। एवं शूर्पादानस्यापि दृष्टार्थता भवति। अ
ग्निहोत्रहवण्यां च रिक्तायां हविरतरं गृहीष्यते। आपश्च नत्र कश्चिद् तदिति। एवमग्नीषोमीयं। ए
वमेवाग्नीषोमीयं हविर्गृह्णाति। अग्निहोत्रहवण्यां चतुरो मुष्टीन् देवस्य त्वेति मंत्रेण अग्नीषोमाभ्यां
जुष्टं गृह्णामीत्यं तेन। यथादेवतमन्यत्। अन्यदर्थं ऐंद्राग्नादिकं हविर्यथादेवतं गृह्णाति यायादेव
तायथादेवमिति। अनुदितेष्यभिप्रायेण वीप्साया मव्ययीभावः। तत्र हि निर्वापात्पूर्वं चंद्रोदयज्ञाने वे
हेताभ्यो देवताभ्यो निर्वापे देवताबद्धत्वमस्ति। ननु अनेनैव मंत्रेण सिद्धं रे वाच्यमेवमग्नीषोमीति वाच्यं
वाग्निषोमाभ्यां जुष्टमिति मंत्रसमाम्नायास्य प्रदर्शनार्थत्वात्। अर्थो न्ये हि परादिना पूर्वां तदित्युक्तत्वा
ल्लिंगोप्याग्नेयग्रहणे एव प्राप्नोति। तद्युदासार्थमेवमग्नीषोमीयमिति सूत्रं। भूताय त्वेति शेषाभिम
र्शनं। उपयुक्तादन्यः शेषः भूताय त्वेत्यनेन मंत्रेण न सिस्थितस्य हविषः शेषस्य गृहीतावशिष्टस्याभि
मर्शनं कुर्यात्। अथाभिमृशति भूताय त्वा नारायण इति श्रुतेः। नानाबीजेषु च सम मंत्रकमभिमर्शनं

ता:
मीय
॥२६॥
॥कात्या॥

कार्यं॥ स्वरिति प्राङीक्षते॥ ततोऽध्वर्युः स्वरभिविख्येषमित्यनेन मंत्रेण प्राङीक्षते प्राच्यां दिशि ईक्ष
णं विलोकनं करोति। तच्चैतदृष्टिनिरोधसंजातश्रमापनयनार्थमीक्षणं यतः श्रूयते परिवृतमिव वा
एतदनो भवति तदस्यैतच्चक्षुः पाप्मगृहीतमिव भवति परिवृतमिव परिसमंतादृष्टितमी वैतदनो भवति॥
अत एव वाक्यशेषादेतदनः शून्नं स्यात्। अत एव काष्ठके सद्दिदिक्षायश कटायत्र जतीति। चिंतायां प्र
योजनं हविर्ग्रहणाभावे प्राङीक्षणाभावः। श्रमाभावात्। पिच्छायांतु दर्शिणयाये वेक्षणं। दिग्विपर्यये लत
स्याः स्वत्र प्राचीत्वात्। दृंहतामित्यवरोहति॥ दृंहतामित्यनेन मंत्रेणानसः सकाशादवरोहति अवत
तरति। अथावरोहति दृंहतामिति श्रुतेः॥ गच्छत्पुर्वंतरिक्षमिति॥ अनसो वरूथो र्वंतरि
क्षमिति मंत्रेणोत्तरदेशं प्रतिगच्छति। अथ प्रेत्युर्वंतरिक्षमन्वेमीति सोऽसौ वै [illegible] इति श्रुतेः॥ अप
णस्य पश्चात्सादयति पृथिव्यास्त्वेति॥ अपणो गार्हपत्यं आहवनीयो वा अग्निः अपूणं करिष्यन्
भवति तस्य अपणस्य पश्चात्। शूर्पस्थानि गृहीतानि हवींषि सादयति पृथिव्यास्त्वेत्यनेन मंत्रेण।
समयस्य गार्हपत्ये हवींषि अपयती प्रकृत्य जघनेनोत्तर्हि गार्हपत्यं सादयेत्। तथा यस्याहवनीये हवि

८

॥२७॥
॥देवया०२

ॐ षिञ्रपयतीतिप्रकृत्यजघनेनोत्तर्यां हवनीयं ॐ सादयेत्पृथिव्यास्त्वा नाभावित्यादिश्रवणात्। वरुण
प्रघासेषु च पूर्वेद्युर्मेषमिथुनकरंभपात्रार्थं गृहीतानां यवानां दक्षिणाग्नेः पश्चादासादनं तस्यैव तत्र श्रप
णत्वात्। यां च दिग्विपर्ययाद्गार्हपत्य दक्षिणाग्न्योरुत्तरतो हविषामासादनं त्र्यंबकेषु गार्हपत्यं दक्षिणत
इति पात्र्यां स्फ्येयापहितायां वा विकल्प। अथवा स्फ्यापहितायां पात्र्यामेतदनः संबद्धं सर्वकर्मप्रत्येतव्यं। उ
तो पात्र्येग्रहीतीति प्रकृत्यमुत्तर्यधस्तादुपोह्य गृह्णी पुरित्यर्थः। तेर्हि स्फ्यं प्राप्य अधस्तादुपोह्य उहवे
तर्के। अत्र प्रेरणे दृष्टव्यः। अधस्तात्प्रापयित्वेत्यर्थः। अत्र विशेषमाह यो दितिश्रुतेः। उत शब्दोपार्थे उत
शब्दो वाक्यपूरणार्थः। पात्र्येइति पंचम्यर्थे चतुर्थी पात्र्या अपि गृह्णीयात्। धूरीषारोहणानि पात्रीबिलेज
पति। अत्र धूरीषारोहणेस्तत्संबद्धा मंत्रा लक्ष्यं ते पात्री तोग्रहणपक्षे धूरीषारोहणसंबद्धानि यजूंषि पा
त्रीबिलेपात्र्या मुखे गर्तेखाते जपति। उतो पात्र्येग्रहीत्वा नंतरायमुत र्हि यजूं ॐ षि जपेदितिश्रुतेः। अ
नंतरायं अविछेदं अविछिद्य अविछिद्योति यावत्। तत्र हि धूरीषारोहणनामभावात्तदभिवादीनि
यजूंष्यंतरित्यांतरामुक्तापरित्यज्यान्येषामपहतमित्यादीनां समवेतार्थानां प्रयोगः प्राप्नोति। त

॥२७॥
॥स्वाध्ये॥

स्य

स

ध्या द्वृत्यर्थमुच्यते॥ अनंतरायमिति॥ अंतरा पूर्वस्य ड्णः। आभीक्ष्ण्ये णमुल्चेति णमुल्। अंतरित्यां
तरित्यांतरायं॥ न अंतरायमनंतरायं॥ किंपुनस्तद्देषां मंत्राणामर्थाभिवंतितएवयेअ नसि॥ कथंधूस्ता
बद्धूर्वते र्बंधकर्मणइतिसापिकिंचिदागच्छद्विंहंतितत्राप्यग्निरास्तिसर्वगतत्वात्॥ हविर्ग्रहीष्यन्नध्व
र्युस्तामतिक्रामतितस्याश्रपि निह्नुते धूरसीत्यादिना अनोवत्पात्र्यपिहविर्हाविष्यान्धारयतीति
वक्तितमित्यादिशहेरुच्यते॥ विष्णुश्चाधर्यात्मकस्तत्रपादेनक्रमते॥ अत्रतुहस्तेनेतिविशेषस्तस्मात्सि
द्धप्रयोगाणां पात्र्यामपि तएवार्था इति हरिस्वामी॥ यदि तु पात्र्यां गृह्णीयात्तदा धूरीषाद्यभावेनतदनुस्थाँ
नं छेतव्यवधानमंतरायमंतरेणतत्प्रकाशकयजूंषि जपेदित्यर्थः इति माधवाचार्याः॥ मानवे॥ पात्र्यां वा
स्फ्यमुपकृष्यानोमंत्रास्तु जपेदिति॥ आपस्तंबेच॥ यदि पात्र्यां निर्वपेद्दक्षिणतस्फ्यमुपधाय तस्यास
र्वानुशकटमंत्रान्जपेदिति॥ तैत्तिरीयसूत्रे॥ यद्युवैनानोभवतिजघनेनगार्हपत्यं स्फ्यं निदधातिस्फ्य
उपरिपात्रीं पात्र्यां पुरोडाशीयानावपत्यथ पूर्वार्द्धपात्र्या अभिमृशति धूरसीत्यादि पात्रीतोग्रहणपक्षे
पि पात्रीं गार्हपत्यचांतरेणनगंतव्यपात्रीतः पश्चाद्देशेउत्तरास्मिन्चोपविश्य प्राङ्मुखोग्रहणं कुर्यात्॥

ष्ठा

॥२८॥
॥देवया॰ २

दक्षिणआसीनएतं गृह्णाति उदङ्ङासीन एतान् गृह्णातीति प्राची विपर्ययेनुवाददर्शनात् । पित्र्यायां हि दक्षिणा
प्राची । अवकेषु तूदीचीप्राचीति । अनस्यापि प्राङ्मुखोपविष्टेन ग्रहणं कार्यं । अग्निर्वा एष धुर्यस्तमेतदत्येष्यन्
भवति हविर्ग्रहीष्यंस्तस्मा एवैतं निह्नुते तथा हैनमेषो नियंतमग्निर्धुर्यो न हिनस्तीति । अस्यार्थः युगस्य
धुरि भवो धुर्यः । भवे छन्दसीति यः । हविर्ग्रहणाय शकटस्य परिश्रितप्रादेशं पश्चाद्गंगायास्यन्त्रध्वर्यु
स्तं धुर्यं धोरस्यमग्निमत्येष्यन्नतिक्रमिष्यन् भवति तदतिक्रममेव सन्नुध्येत् । तस्य प्रसादनायै तद्धूर
सीति मंत्रोच्चारणेन तस्मा एवाग्नये निह्नुते अपलपयति । अपक्रमजनितं स्वापराधं प्रशमय्य प्रसाद
यतीत्यर्थः । अत एव श्रुतिबलात्पात्री गार्हपत्ययोरंतराले गमनं सिध्यति अतः पात्र्याः पश्चादुत्तरतो वा
प्राङ्मुख उपविश्य ग्रहणं कुर्यात् । तत्र स्थानासंभवे तु पात्र्यामपरेणैव गत्वा दक्षिणतः प्राङ् उपविष्टेन
वग्रहणं कार्यं । पात्रीपक्षे अवरोहणमंत्रेण किंकर्तव्यमित्यपेक्षायामाह । दृंहतामित्युत्थानं । हवि
र्गृहीत्वा शेषमभिमृश्य प्राचीमेव दृंहतामित्यनेन मंत्रेणासनादुत्थाय पवित्रे स्थ इत्यनेन मंत्रे
णाध्वर्युरनं करोति । उत्तिष्ठतीत्यर्थः । कुशौ समौ शीर्णाग्रावनंतर्गर्भौ कुशौ छिनत्ति पवित्रे स्थ इति कुशैः

वप्र॰

॥२८॥
॥भाष्ये॥

करणभूतैः कुशौ छिनत्ति । मूलच्छेदनेन प्रादेशप्रमाणौ करोति । कुशशब्देनैकं तृणमुच्यते । न तु स
मशाखः । तेन कुशौ इति द्वे दर्भतृणे इत्यर्थः । कीदृशौ कुशौ समौ मूलादारभ्याग्रपर्यंतं तुल्यप्रमाणौ
पुनः कीदृशौ कुशौ अप्रशीर्णाग्रौ अहरिताग्रौ अग्रवंतौ । तथा अनंतर्गर्भौ न विद्यतेंतर्मध्ये
गर्भो ययोस्तावनंतर्गर्भौ गर्भे हि सति सख्यांतरं स्यात् । तथा चाहापस्तंबः समावप्रच्छिन्ना
ग्रौ प्रादेशमात्रौ पवित्रे कुरुते तृणं काष्ठं वा तद्वयि छिनत्ति न नखेनेति । तैत्तिरीयसूत्रेपि । बर्हि
षः पवित्रे कुरुते प्रादेशमात्रे समे अप्रतिच्छिन्नाग्रे अनखच्छिन्ने इति । मानवे च । बर्हिषः पवित्रे कुरुते प्रा
देशमात्रे समे अच्छिन्नप्रांतरे इति । अत्र पवित्रयोरेव समतोक्तः । छेदनेन पवित्रे एव समे कार्ये । न तु
समप्रमाणौ कुशौ छित्वेत्यत्राग्रहः । भिन्नप्रमाणावपि छित्वा समौ कार्याविति तात्पर्यं । त्रीन्वा अ
थवा त्रीन्कुशान् कुशैः छिनत्ति पवित्रे स्थ इत्यनेन मंत्रेण । अयं चाहित एव पवित्रत्रयपक्षे
पि प्रवर्त्तत इति कर्कः । द्वयोश्चरितार्थत्वादनभिधानाच्च त्रिषु न प्रवर्त्तत इति पितृभूतिः । अन्वा
पि कीदृशौ कुशान् समौ तथा अप्रशीर्णाग्रान् । तथा अनंतर्गर्भानिति विशेषणान्यूह्यानि । पवि

र

॥२९॥
॥देवया०२

त्रे करोतीति प्रकृत्य । ते वै द्वे भवतो यो अपित्राणीरित्युभयस्य श्रवणात् तुल्यविकल्पोयं । हविर्ग्रहण्या
मपः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इति । हविर्गृह्यते अस्यामिति हविर्ग्रहणी अग्निहोत्रहवनी
तस्यामपः कृत्वा स्वयमेवोदकमासिच्य ताभ्यां पवित्राभ्यामुत्पुनाति उत्क्षिपति सवितुर्व इत्यने
न मंत्रेण । ताभ्यामेताः प्रोक्षणीरुत्पूयताभिः प्रोक्षतीति सउत्पुनाति सवितुर्व इति श्रुतत्वात् । अत्रा
हापस्तंबः सस्फ्यः काया माग्निहोत्रहवण्यामप आनीय पूर्ववदुत्पूयेति । मानवे अति मृण्मयामप
आसिच्येति । अत एव हविर्ग्रहण्यामित्युपदेशादादानप्रतप्रपन विधानात् तस्या हविर्ग्रहणं क्रियत
इति प्रतीयते । तेन हविर्ग्रहण्यामित्यग्निहोत्रहवण्यामित्यर्थः कुतः अग्निहोत्रहवण्यां हवींषि निर्व
पतीति शाखांतरात् । तेन पश्चाद्दोहे हविर्ग्रहणाभावेपि पात्रप्रोक्षणार्थमग्निहोत्रहवण्यामेवापः क्रि
यंते । तास्थानं तयोः । तयोः पवित्रयोः स्ता अग्निहोत्रहवण्यांस्थिता आपः स्थानं ज्ञेयं । अत ऊर्ध्वं
पवित्रे तास्वेव स्थाप्ये यावत्तासां सद्भावः प्रोक्षणीषु पवित्रे भवत इति श्रवणात् । तासु च बर्हिषः मू
ले निषिक्तासु पवित्रे निधाय प्रणीतास्वित्युक्तत्वात् । सव्ये कृत्वा नोदिंगयति देवीरापइति ॥

॥२९॥
॥प्रोक्ष्य॥

ते
सुधा न्यंयपती ५

ततस्ता अग्निहोत्रहवण्यां स्थिता एवापः सव्ये पाणौ कृत्वा सोदकमग्निहोत्रहवणीं सव्यहस्ते निधा
य ततो देवीरापइति मंत्रांते दक्षिणेन पाणिनोदिंगयति ता आपऊर्ध्वं चालयति । ऊर्ध्वं नयति सव्य
हस्तस्यामेवाग्निहोत्रहवणीं दक्षिणेनोर्ध्वमुद्गृह्णातीत्यर्थः । ताः सव्ये पाणौ कृत्वा दक्षिणे नोदिंगय
तीति श्रुतेः । अत्र दक्षिणेनेति न कर्त्तव्यं स्मृतितएव प्राप्तत्वात् । वाच्यं वा । स व्यहस्तस्थिता नामे
व प्रोक्षणीनामुद्गिंगनं यथा स्यादिति । अनेकयजमानकेस्मिन्मंत्रे ऊहो भवति यज्ञपती देवयु
वाविति द्वियजमानके । यज्ञपती सुधातं यज्ञपतीन् देवयुव इति बहुषु । पितृयज्ञे च यज्ञपतिं देव
पितृयुवमिति । प्रोक्षितास्थेति तासां प्रोक्षणं । प्रोक्षितास्थेत्यनेन मंत्रेण तासामेवाग्निहोत्रह
वण्यां स्थितानामपामेकदेशेन तासामेव प्रोक्षणं कुर्यात् । नन्वेवं स्वात्मनि क्रियाविरुध्यं तेनेषा दो
षः एकदेशेनैवैकदेशस्य प्रोक्षणोपपत्तेः । अथोच्यते । नैकदेशएताः शब्देनताभिः शब्देनो
च्यत इति । ताभ्यामेताः प्रोक्षणीरुत्पूयताभिः प्रोक्षतीत्यत्र तदपि न किंचिदेतत् । त्वया पि हि ए
कदेशेनैव हविषः प्रोक्षणमिष्यते पात्राणां च । इतरथा त्वेकस्मिन्नेव हविषि सर्वासु प्रोक्षणीषु

॥३०॥
॥देवयाः०२

वि

इत्युक्तास्तु हविरंतराय पात्रेभ्य इध्माद्यर्थं चान्याउत्याद्येरन् । न चैव न त्वापीष्टं । तस्मादेकदेशे नैवेति । हवि
श्चाग्नये त्वाग्नीषोमाभ्यां त्वेति । ततः प्रोक्षणीनां प्रोक्षणानंतरं प्रोक्षणीभिर्हविः प्रोक्षति अग्नये त्वा जुष्ट
मिति । अग्नीषोमाभ्यामिति च मंत्राभ्यामिति च मंत्राभ्यां । चकारेण प्रोक्षणमित्यनंतरं त्यदमनुकृष्यते तच्च न
यथास्थितं संबंधं प्राप्नोतीति प्रोक्षतीत्येवं परिणम्य संबध्यते । अत एव प्रोक्षणविधानादूर्ध्वं बर्हिष्युपेष्टं पृथ
क् पृथक् स्थापनीयानि । यथास्वं च प्रोक्षणं कार्यमिति । तस्माद्धावघ्नंतितत्सह पिंषतीत्यवघातप्रोक्षण
योरेव सहत्वविधानान्नान्यत्र सहत्वं । यथादेवतमन्यत् ॥ ॥ अन्यस्मै विर्यथादेवतं प्रोक्षति । इंद्राग्नि
भ्यां त्वा जुष्टमित्येवमित्यर्थः ॥ ॥ पात्राणि दैव्यायेति ॥ ॥ दैव्याय कर्मणे इत्यनेन मंत्रेण पात्राणि प्रोक्ष
ति । अथ यज्ञपात्राणि प्रोक्षति दैव्याय कर्मणे इत्यादिस्कतेः । तत्र शुंधध्वमिति प्रोक्षणमंत्रगतबहुवचनसा
मर्थ्यात्सर्वाणि पात्राण्येकत्र राशीकृत्य प्रोक्षणं कर्तव्यं । कर्काचार्यास्तु प्रोक्षणस्य पात्रोद्देशेन विधानात्समु
दायस्य चाचोदितत्वात्प्रतिसंस्कार्यं च संस्काराऽऽवृत्तेर्न्याय्यत्वाच्च प्रतिपात्रं प्रोक्षणं कर्तव्यं । बहुवचनं पूजा
र्थमित्याहुः । कर्काचार्यैर्यदुक्तं प्रतिपात्रप्रोक्षणमिति तदसत् । यथा व्रीहिप्रोक्षणे जातेः प्रोक्षणं न व्यक्तिप्रो

पृथक्

॥३०॥
॥२॥ व्याख्या॥

वपित्र्यन्यायाहत्स्यूहः २

क्षणं तद्वत्पात्रप्रोक्षणेऽपि जातिप्रोक्षणं न व्यक्तिप्रोक्षणं । अनेन बहुवचनमप्युपपन्नं । । आपस्तंबः । उत्ताना
नि पात्राणि पर्यावृत्त शुंधध्वं दैव्याय कर्मणे इति त्रिः प्रोक्षतीति । एवं सर्वेषु सूत्रेषु । । पितृयज्ञे च दैव्याय पित्र्या
य कर्मणे शुंधध्वं [illegible] प्र[illegible]ति पात्रप्रोक्षणपक्षे च केवलप्रधानार्थेषु पात्रेषु शूर्पक
पालकृष्णाजिनोलूखलमुसलशृतावदानोपसर्जन्यादिषु पित्र्याय कर्मणे इति प्रयोगः । अन्यप्रधाना
र्थेषु दैव्याय पित्र्यायेति केवलदेवकर्मार्थे दैव्यायेति ॥ ॥ असंचरे प्रोक्षणीर्निधाय ॥ शर्मासीति कृष्णाजि
नादानं । असंचर इति यस्मिन्स्थाने कोऽपि न संचरति न गच्छति प्रणीताहवनीययोरंतराले सोऽसंचर
स्तत्र प्रोक्षणीर्निधाय याभिरद्भिर्हविषः पात्राणां प्रोक्षणं कृतं ताः प्रोक्षणं कृतं ताः प्रोक्षणीरित्युच्यंते । ताः
प्रोक्षणी रग्निहोत्रहवण्यां स्थाल्यां वा संचरे निधाय स्थापयित्वा शर्मासीत्यनेन मंत्रेण कृष्णाजिनादानं ॥
कृष्णमृगस्य चर्मणो हस्तेन ग्रहणं कुर्यात् । अथ कृष्णाजिनमादत्ते शर्मास्यसीति स्कतेः । तानांतरेण संच
रेयुरित्युक्तत्वात् । अत्र प्रणीताहवनीयांतरालमसंचरशब्देन गृह्यते प्रकृतत्वात् । यद्यपि गार्हप
त्याहवनीयौ न वाच्ये यादित्ययमप्यसंचर एवासत्व प्रकृतत्वान्न गृह्यते इति कर्कः ॥ ॥ आपस्तंबसूत्रे

॥३१॥
॥देवया०२

विशेषः । प्रोक्षणीशेषमग्रेणगार्हपत्यंनिधायेति । असंचरेऽस्रुवंनिधायेतिमानवे । प्रोक्षणीरितियौगिकशब्दो
नसंस्कारनिमित्तोजातिनिमित्तोवाप्रोक्षणीभिरुद्धेजिताः स्मइत्यादावसंस्कृतास्वपिअप्सुशब्दप्रयोगात् । प्र
शब्दःप्रकर्षे । उत्प्रसेचनेप्रोक्ष्यतेप्रकर्षेणसिच्यतेहविरादिकमाभिरितिप्रोक्षण्यः । करणेल्युट् । चिंतायाःप्र
योजनमेतत् । आज्यप्रोक्षणेऽह्यमप्येवमादावसंस्कृताएवापोगृह्यंतेकृष्णाजिनमित्यत्रकृष्णस्य । अजिन
मितिषष्ठीतत्पुरुषोनकर्मधारयः । कृष्णंचेदजिनंचेति । कुतः । सकृष्णोमृत्वाचचारतस्यदेवाअनुविद्यत्वच
मेवावत्सायाजुहुरितिचर्मवाएतत्कृष्णस्येतिवाक्यशेषश्रुतेः । अत्रकृष्णइतिकृष्णमृगोभिधीयते । किंप्रयो
जनमस्याश्चिंतायाः । कर्मधारयेतुयस्यकस्यचित्कृष्णंचर्मग्राह्यं । तत्पुरुषेतुमृगचर्मैवेति । तदेतद्दादानम
वघातार्थमतस्त्वावघाताभावेपश्चादौनभवति । अपेत्यपात्रेभ्योवधूनोत्यवधूतमिति । । ततगृहीतंकृष्णा
जिनमासादितेभ्यःपात्रेभ्योपेत्यातिनीयपरंनीत्वावधूतंरक्षइत्यनेनमंत्रेणावधूनोति । धूञ्कंपने । नी
चैःकंपयति । यत्संलग्नममेध्यमयज्ञियंतत्कंपयित्वाधःपातयतीत्यर्थः । अत्रकृष्णाजिनस्यैवापनयनंनक
र्तुः इतिकर्कः । अतिनत्येवपात्राण्यवधूनोतियज्ञस्यामेध्यमभूत्तस्मैतदवधूनोतीतिश्रुतेः । हरिस्त्वा

॥३१॥
॥श्रौते॥

द्विअ१ ध१

त्याति २ वौ १

नस्त्वाधूर्योरेवातिक्रमणंव्याख्यानंवंतः । तथाहि अतिनैंक्रमेत्यर्थः अतिपूर्वस्यनमैत्यधीत्यनुनासिक
लोपः । ह्रस्वस्यपितिकृतितुक् । पात्राण्यतीत्यकिंकारणं । यद्धिअस्यकृष्णाजिनस्यामेध्यंअभूत्तेद्धास्मा
देतदवधूनोति । नचपात्राणिमेध्यानिसंतिपुनरमेध्यानिकर्तुमुक्तमित्यभिप्रायः । अतःपात्रेभ्योपेत्यअ
तीत्याधूर्युरेवातिंम्यकृष्णाजिनमवधूनोतीत्ययमेवार्थः । मंत्रस्यराहूसत्वाद्उच्चारणानंतरंउपस्पृशेत् ।
उच्चैस्तदवधूननंसकृदेवकर्तव्यं । आवृत्तेरनुक्तत्वात् । शाखांतरस्त्वेषुत्रिरवधूनोतीत्युक्तमस्ति । । प्र
त्यग्ग्रीवमास्तृणात्यदित्यास्त्वगिति । । चर्मण्युत्तरलोमानिप्राग्ग्रीवाणीतिप्राग्ग्रीवताचर्मणामुक्तात
स्यायमपवादः । अवधूननानंतरंतत्कृष्णाजिनंविहारादुत्तरप्रदेशेप्रत्यग्ग्रीवमास्तृणातिअदित्यास्त्वगसी
तिमंत्रेण । प्रत्यंचोग्रीवायस्यतत्प्रत्यग्ग्रीवं । तत्प्रतीचीनग्रीवमुपस्तृणातीतिश्रुतेः । प्रतिपूर्वादंचेःक्विप्प्रती
च्यांदिशिदेशेत्यर्थे दिक्शब्देभ्यःसप्तमीत्यादिसूत्रेणास्तातिः । तस्याचांचेर्लुगितिलुक् । ततःप्रत्यंचशब्दा
त्विभाषांचेरदिक्स्त्रियामितिस्वार्थिकःखप्रत्ययः । ईनादेशः । अंचतेर्नकारलोपः । अचईत्यकारलोपः ।
चादुपसर्गस्यदीर्घः । प्रतीचीनोदेशः । तस्मिन्ग्रीवायस्यतत्प्रतीचीनग्रीवमितिएवंप्राचीनग्रीवादयोपि

२२

॥३२॥
॥देवया०२

व्याख्येयाः। किं पुनः प्रेङ्खाग्रीवायाश्च अवयवेनावयविनोपेक्षितत्वात्। कृष्णाजिनस्यास्तरणार्थो यो देशो नि
रूपितस्तद्देशस्य प्रतीचीन इति गम्यते। उपस्तृणाति स्तृ आच्छादन इत्येष उपपूर्वस्य धात्र विकाशेऽत्रान्यार्थे
यद्विस्तारणं तत्र वर्त्तते। परार्थं विकाशयतीत्यर्थः। तैत्तिरीये। कृष्णाजिनमवधूनोत्यूर्ध्वग्रीवमुदङ्लोमेत्याव
धूतमित्यनेन तु पुरस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृणातीति। आपस्तम्बः। उत्तरेण गार्हपत्यमुत्त
रदेशे वा प्रतीचीनग्रीवमुत्तरलोमोपस्तृणातीति पुरस्तात्प्रतीचीनं सदमुपसमस्यतीति। मानवे पश्चादुत्क
रस्यास्तृणाति प्रत्यग्ग्रीवमुत्तरं प्रतीचीनसदं प्रत्यस्यति न रिक्तमवसृजतीति। सव्याशून्येनिदधात्युलूख
ले [illegible] अद्रिरसि ग्रावासीति वा। सव्यहस्तेनाशून्ये अमुके कृष्णाजिने अद्रिरसीति मंत्रेणोलूखलं निद
धाति। ग्रावासीत्यनेन वेति मंत्रविकल्पः। अभिनिहितमेव सव्येन पाणिनाभवत्यथ दक्षिणेनोलूखलमाह
रति अथोलूखलं निदधात्यद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्न इति वेति श्रुतेः। प्रति त्वेत्युभयो
ः प्रतित्वात्युभयोः। प्रति त्वादित्यास्त्वग्वेत्त्वित्ययमवयवः। पूर्वयोरद्रिरसि ग्रावासीत्येतयोरुभयोर्म
न्त्रयोः शेषः। तेनैवं प्रयोगः। अद्रिरसि वानस्पत्यः प्रति त्वादित्यास्त्वग्वेत्तु ग्रावासि पृथुबुध्नः प्रति

अ२
॥३२॥
॥भाष्य॥

त्वादित्यास्त्वग्वेत्त्विति वा॥ हविरावपत्यग्नेस्तनूरिति॥ ततोऽध्वर्युरुलूखलमध्ये हविरावपति कं ड
नार्थं मध्ये प्रक्षिपति अग्नेस्तनूरित्यनेन मंत्रेण। अथ रावंत्यग्नेस्तनूरिति श्रुतेः। हे हविस्त्वमग्नेस्त
नूरसि रत्येष हविषोग्नेः संबंधादुच्यते तेन दार्ढ्यद्वृताव भव्ये अपां तन्नेरसीत्युक्तः। पितृयज्ञे वरेव वीतय
इत्यस्य स्थानेपितृवीतय इति प्रयोगः॥ अत्राहापस्तम्बः॥ अन्तःसृजत्कृष्णाजिनं तस्मिन्नुलूखल
मधिवर्त्तयत्यनुसृजन्नुलूखलमग्नेस्तनूरसीति तस्मिन्हविरावपतीति। एवमन्येष्वपि सूत्रेष्वस्ति॥
॥ वाचं विसृजते॥ हविरावापानन्तरं मध्वर्युर्वाचं विसृजते। यो वा अमृं हविर्गृहीष्यन्वाचं यच्छत्य
त्रैवैतां विसृजते तद्यदेतामिति श्रुतेः॥ यजमानश्च॥ यजमानोपि हविरावापानन्तरं चकाराद्वाचं विसृ
जते॥ हविष्कृतावा॥ वाशब्दो विकल्पार्थः। अथवा हविष्कृता हविष्कृच्छब्देन सह हविष्कृदाह्वानका
ले वाचं विसृजते अध्वर्युर्यजमानश्च। अत्रापि हि श्रूयते वाग्वै हविष्कृता द्वाचमेवैतद्विसृजत इति। अ
थ नानाबीजेष्वयं विकल्पो विधीयते यथा हेवसू हविःषु तत्र नानाबीजानां तंत्रेण ह नानासंभवात्प
र्यायेणावहत्यमानेषु भवति संशयः। किमाद्ये हविषु लूखले संप्राप्ते वाग्विसर्गः किं वा अनियमः। अथ

प
वं

॥३३॥
॥देवया०२

वाअंत्यइति॥ किं तावन्न प्राप्नोति॥ नियमकारिणः शास्त्रस्याभावादनियमः॥ अथ
वा मुख्य आद्ये एव वाग्विसर्गः। एवं सति मुसलादानादयो विसृष्टवाचा क्रियमाणाः प्रकृतिवत्कृता
भविष्यंति। अंत्ये तु वाग्विसर्गे क्रियमाणे मुसलादानादयो वाग्यमनेन क्रियमाणा न प्रकृतिवत्कृता

वि

भवेयुः तस्मादाद्य एवं हविष्युलूखलं प्राप्ते वाग्विसर्ग इत्येवं प्राप्ते आह। ॥नानाबीजेष्विति सामर्थ्यात्॥
नानाबीजेष्ववहन्यमानेषु अन्य एव हविषि उलूखलं प्राप्ते वाग्विसर्गः स्यात् नाद्ये प्रथमो न मुख्य इति। कुतः सामर्थ्यात्।
अस्ति हि चोदकस्य सामर्थ्यमुत्तरेष्वपि हविष्षु प्रक्षिप्यमाणेषु वाग्यमनं प्रदेष्टुं यथैव हि मुख्ये हविषि
प्रक्षिप्यमाणे वाग्यमनं चोदकः प्रविशत्येवमुत्तरेष्वपि न कश्चिद्विशेषः। ननु च त्वेवं हविषि वाग्विसर्गे क्रियमा
णे मुसलादानादयो वाग्यमनेन क्रियमाणा न प्रकृतिविकृता भवेयुः। तत्र चोदको बाधितः स्यात्। न चोदके
बाध्यते अस्ति हि नियमस्यानियमं बाधितुं सामर्थ्यं। नियम्यते वाग्यमो हविषि प्रक्षिप्यमाणे मुसलादानादिषु त्व

॥३३॥
॥प्रयोगे॥

नियमः। तस्मादेते वाग्यमेनाविसृष्टवाचा क्रियमाणा अविगुणा एव। हविषस्त्वविसृष्टवाचा प्रक्षिप्यमाणस्य वैगु
ण्यं तस्माद्यथोभयोरवैगुण्यं स्यात् तथा कार्यं। ॥ दृढग्रावेति मुसलमादत्ते। अध्वर्युरुलूखलमध्ये हविरावा
पानंतरं दृढग्रावेत्यनेन मंत्रेण मुसलमादत्ते हस्तेन गृह्णाति। अथ मुसलमादत्ते दृढग्रावासीति श्रुतेः। सइदमि

त्यवदधाति। सइदमित्यनेन मंत्रेण तदात्तं मुसलमुलूखलमध्ये वदधाति। प्रक्षिपति। तदवदधातिस
इदं देवेभ्य इति श्रुतेः। कर्कमते तु सइदं देवेभ्य इत्यत्र देवाभ्यां देवाय देवेभ्य इत्येवं देवानाम सीति वत् नि
र्णयः पितृयज्ञे च सइदं पितृभ्य इत्यूहः॥ ॥हविष्कृदेहीति त्रिराह्वयति॥ ॥ततोऽध्वर्युरवघ्नन्हविःकंड
नं कुर्वन्हविष्कृदेहीत्यनेन मंत्रेण त्रिर्वारं हविःकृतमाह्वयति। आकारयति। हविःकरोतीति ह
विःकृत् पत्नी वा आग्नीध्रो वा वक्ष्यमाणस्तत्राह। अथ हविःकृतमुद्वादयति हविष्कृदेहि हविष्कृदेही
ति श्रुतेः॥ ॥अतः पत्न्यवहंत्यन्यो वा॥ ॥अत आह्वानात् पत्नी व्रीहीनवहंति। अन्यो वा॥ ॥अवह

व

ननं तस्याः कर्तव्यं हविष्कृदुत्तिष्ठतीति वचनात्। अत इति गृहणात् पूर्वमध्वर्युरवघाते प्रवृत्तोऽस्तीति ग
म्यते तत्कृतो वचनात्। तथा च शाखांतरे श्रूयते हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीति त्रि त्रिरित्यस्य
आह्वयतीत्यनेन संबंधः न त्ववघ्नन्नित्यनेन तेन अवघाते न संख्यानियमः। अन्यशब्देनात्राग्नी
ध्रोऽभिधीयते संनिकर्षात् समाख्यानुग्रहाच्च। अस्ति चाग्नीध्रोऽध्वर्युशब्देनाभिधानं। आग्नीध्रमध्व
र्यवोऽभक्षयंतीति प्रकृत्य तत्र आग्नीध्रं न भक्षयंत्यध्वर्युः प्रतिप्रस्थाताग्नीध्र इति। तास्मादन्यशब्देनात्रा

॥३४॥
॥देवेया०२

ग्नीध्रस्याभिधायकः नन्वन्यशब्दे न ब्रह्मा कथं नाभिधीयते उच्यते वचनं विना ब्रह्मणः कर्तृत्वा
योगात् न वै ब्रह्मा प्रचरति न श्रुतेन संचरतीति प्रतिषेधात् कृताकृत प्रत्यक्षवेक्षणेव्यापृतं
त्वाच अध्वर्युशब्दे न कश्चिदपि ब्रह्मणः समाख्यानाभावाच्च तद्धस्मैतत्पुराजायैवहविष्कृदुपेत्तिष्ठ
तितदिदमप्येतर्हिय एव कश्चापोत्तिष्ठतीति श्रुतत्वात् अपि शब्दान्य अपि अन्योयः कश्चित्य विशेषे
पि अप्रकृतानामनधिकारात्प्रकृतामेवर्त्विग्यजमानानामन्यतमः सोपि वेदसंबंधात्स्थानाविरोधा
च्चाग्नीध्र एव युक्तः तथाहि होतुस्तावद्याजुर्वैदिके हविःकरणे असंबंध एव ब्रह्मयजमानावपिद-
क्षिणश्रौतेसातेतौविशेषवचनादेवतत्तउत्तिष्ठतोनेदृशाद्विशेषवचनात् उपोत्थाय चावहंति ह
विष्कृदुद्वाउपोत्थानस्य दृष्टार्थत्वमेवगम्यते इति हरिस्वामिनः आह्वयत्याहंत्यन्यो दृषदुपलेकु
कुटोसीति त्रिः शम्यया द्विर्दृषदं सकृदुपलां आह्वयतीति चात्र तंतं सम्यम्येकवचनेन तु क्रियाप
दं अध्वर्योहि विष्कृतं हविषः कंडनकर्त्री पत्नी हविःकंडनं कर्त्रीरमग्नीध्रं वा कंडनार्थमाह्वयति आ
कारयति सति अध्वर्योरन्यस्याग्नीध्रो विहारस्योत्तरउपविष्टः शम्यया करणभूतया दृदुपले आह

द
ना
र

दि
मः
॥३४॥
॥श्रौ॥
ष

तिं अत्रैवायं विशेषः दृषदं शम्यया द्विर्द्विवारमाहंति कुट्टयति उपलां च शम्यया सकृदेकवारमाहंति
॥-॥ तत्र कुक्कुटोसीत्ययं मंत्रस्त्रिप्रयोज्यः वारत्रयं दृषदाहननेनो सकृदुपलेमित्यत्रैकद्रव्ये कर्मावृत्तौ सन्मंत्रव
चनं कृतत्वादित्यनेन सकृन्मंत्रवचनं प्राप्नोति तन्मा भूदपत्याहननमंत्रावृत्तिर्यथास्यादित्येवमर्थं त्रि
रित्युक्तं अन्यइति कुतः वचनात् संप्रैषहविष्कृतमुद्वादयति तदेकोदृषदं उपलाहनन इति यदिदं नोच्यते त
दाद्विर्दृषदं दृदुपलेसमाहंतीति यत्र यस्मिन्काले एषोध्वर्युरुद्वादयति तत्र काल एकोन्यः स एवाग्नीध्रः पू
र्वोक्तेरेकारणेदृषदुपलेसमाहंति कथं समाहंति तौ विशेषापेक्षायां तस्माच्छम्यया समाहंतीति वक्ष्य
माणत्वात् शम्यया करणभूतया द्विर्दृषदं सकृदुपलामिति शाखांतरात् एक इति न संख्याव
चनः समाहंतीत्यनेनैवैकत्वस्यासिद्धत्वात् अतः संख्यावचनत्वे अनर्थकः अन्यवचनेतु नानर्थ
कः आध्वर्यवत्वाद्धिसमाहननमध्वर्योः प्राप्यते दृषदुपले इति द्वितीया श्रुतेः करिष्यमाणकार्ये दृ
षदुपले संस्कार्ये इशक्यते अत्रतीक्ष्णीकरणार्थत्वमाहनने नेष्यते नहि शम्याघातेनाश्मातीक्ष्णो भ
वति तस्माद्द्वितीया श्रुत्या घातयोः संस्कारत्वं शम्या दर्शयितुमयमिति हास्यः प्रतिज्ञायते तं दृता

य
॥-

श्रु
स्यन

मारांभ्यशक्यतेवर्त्त१
त्या
न्ययस्मा१

दादाबस २

इति॰

॥३६॥ ॥देवया॰२॥ त ला

मन्त्रवाचे प्रत्युद्वादयंतीति तत्कारणं वक्ष्यते शेषः । ननु विधेयार्थस्यासंबंधुर्वास्यो न वाचमुद्वादयतीत्युपन्यस्तं किंत
र्हि समाहंतीति । तेनैवं विज्ञायते दृषदुपले समाहंति । वाचं प्रत्युद्वादयितुं ततएवं संस्कर्तुं तद्वादनेवाऽवांतन
रसंनिधेरवघातांगं तच्चोपसर्त्यपि पेषणेवघातांगत्वात्कार्यं । अवघाताभावे त्वाज्यस्थालीषु वर्तते सूत्रकारौ
रस्तु महाप्रकरणाद्दर्शवियागांगतामंगीकृत्याह । स्याद्वा धर्ममात्रं दितिहरिस्वामिनः । ननु दृषदुपले इतिन
वाच्यं । द्विर्दृषदं सकृदुपलामित्यनेनैव सिद्धत्वात् । सत्यं । उभयत्र सूत्रेणैतज्ज्ञापयति यत्सामान्यस्य शाखांत
रीयेणापि विशेषणैकवाक्यता भवति । तेन यद्यपि सापि माध्यंदिनीयायां सामान्योपदेशो दृषदुपले समा
हंतीति । तथापि तदाहननमात्रेण शास्त्रार्थानुष्ठानसिद्धिः किंतु द्विर्दृषदं सकृदुपलामिति विधिविशे
षेण । अतएकवाक्यताप्रसाधनार्थमुभयस्य सूत्रणं । अत्र वचनादग्नीधः कर्तृत्वं न कपालोपधानं द्विधिविरो
धात् । सयत्रैषइतिश्रुतिवाक्ये एषशब्देनाध्वर्योः परामर्शः । एकशब्देन चाग्नीध इति कपालोपधानपेषणयोस्तु नैवं तत्र
हि सवै कपालान्येवान्यतंडपदधाति दृषदुपस्त्रन्यतरइत्यनिर्धारितः कर्तृविशेषः । इहैं निर्द्धारोस्ति । अथ हवि
ष्कृतमुद्वादयतीत्यत्र निःसंदिग्धः समाख्येनाध्वर्युः कर्ता । सएव च स यत्रैषइ अनेनैषशब्देन परामृश्यते । तस्मा

नि स्त्रे प व ॥३५॥ ॥अर्ष उ र

रथयोद्वा १ ति॰

न्नात्र विरोधादग्नीधः कर्तृत्वं किंतु वचनादिति । तथा च मानवे । आग्नीध्रो दृषदुपले समाहंतीति । आप
स्तंबे च । आग्नीध्रोश्मानमादाय तेन दृषदुपले समाहंति । सावित्रेण वा शम्यामादाय तया समाहंतीत्यत्र
स्याश्रितायाएतत्प्रयोजनं । पश्चादौ निर्व्यापारस्य च्चुर्याचग्नीध एवाहननं इति । हरिस्वामिनां मते अवघाता
हननयोः साहचर्यं नैतत्प्रयोजनं । अदृष्टार्थमोंकुंपुकारकमेतदाहननं । अतश्चपावकुत्रेग्रहमेधीयापयस्या
दौ न भवति । हरिस्वामिनां मते तु यत्रावघातस्तत्र भवति । यत्रावघाताभावस्तत्र न भवतीत्युक्तं प्राक् । वर्षवृद्ध
मसीति शूर्पमादत्ते । ततोध्वर्युस्तु सेषु विमुक्तेषु वर्षवृद्धमसीत्यनेन मंत्रेण शूर्पमादत्ते हस्तेन गृह्णाति । अथ
शूर्पमादत्ते वर्षवृद्धमसीति श्रुतत्वात् । प्रतित्वेति हविरुद्वपति । प्रतित्वा वर्षमित्यनेन मंत्रेणोलूखलाद्धवि
रुद्वपति । बहिर्निष्काशयति । शूर्पादानस्यादृष्टार्थत्वायोद्धुपशूर्पे करोति । अथ हविरुद्वपतीति श्रुतेः । उलूख
लान्निष्कास्य शूर्पे निर्वपतीत्यर्थः । पराप्रूतमिति निष्पुनाति । पराप्रूतमित्यनेन मंत्रेण शूर्पेण हविर्नि
ष्पुनाति पवनेन तुषान्पृथक्कृत्याधः पातयति । शाखांतरे प्रस्कंदयतीति वचनात् । अथ निष्पुनाति पराप्रूतमि
ति श्रुतेः । यदि व्रीहयो यदि यवा इत्येतएवकम्रशेषाद्व्रीहियवाः पुरोडाशप्रकृतित्वेनानियम्यंते । ताविमौ व्रीहि

ग श्र नि ती॥

यवोऽइतिचयदिशश्राद्धिकल्यस्तयोः॥ ॥अत्राहापस्तंबः॥ ॥वर्षवृद्धमसतीपुरस्ताच्छूर्पमुपहरन्तुत्तरतो वा वर्षवृद्धा
स्मेत्यभिमंत्र्यप्रतित्वावर्षवृद्धं वेत्वित्युद्धपतिपरापूतमित्युत्करेपरापुनातिप्रविद्धमितितुषान्प्रस्कंदेतानुमंत्रयते
मध्यमेपुरोडाशकपालेतुषानोरक्षसांभागोसीत्य[illegible]धस्तात्कृष्णाजिनस्योपवपत्युत्तरमपरमवांतरदेशंसास्तेनो
पवीतीतिबह्वृचब्राह्मणमद्भिःकपालंसंस्पर्श्यप्रज्ञातंनिधायोपस्पृशेदिति॥ ॥मानवेच॥ ॥[illegible]तत्तुषेषुव
र्षवृद्धमसीतिपुरस्तात्प्रत्यक्शूर्पमुपोह्यतिप्रतित्वेत्युद्धपतिपरापूतमित्युत्करेनिष्पुनातिप्रविद्धोरक्षसांभा
गइतितुषान्प्रविध्यंतेपुरोडाशकपालेतुषानोप्येदमहमित्यधस्तात्कृष्णाजिनस्योपवपतीति॥तैत्तिरीयेतुउ
तुषान्कृत्वोत्तरतः॥शूर्पमुपयच्छवर्षवृद्धमसीतितस्मीन्पुरोडाशीयानुपतिप्रतित्वेति॥अथोदेकपर्यावृत्यप
रापुनातिपरापूतमितिसव्येनतुषानुपहृत्येमांदिशंनिरस्यतिरक्षसांभागोसीत्येथापउपस्पर्शति॥ ॥अप
हतमितितुषान्निरस्यति॥ ॥आग्नेयस्यमध्यमेकपालेतुषानोथकृष्णाजिनस्याधस्तात्तुषान्निरस्यतिउत्क
रदेशे॥ ॥काठके॥ ॥तुषान्बहिर्वेदिनिरस्यतीति॥अथतुषानुपहृत्यपहतंरक्षाइतिश्रुतेः॥प्रहृतिप्रक्षिप
तिशाखांतरीयोविशेषः पूर्वसूत्रएवप्रदर्शितः॥माध्यंदिनीयायांतुकणपासनेत्र्यविधिरुपदिष्टः॥नतु

अथापविनक्तिवायुर्वइतिश्रुतेः॥विचिपृथक्भावे॥अपरार्थः प्रसंगार्थः॥अकंडितान्प्रसकृत्वाप्रतः खंडितान्करोतीत्यर्थः॥२

षनिरसनेशाखांतरेषुकणनामपासनमेवनास्ति॥कणकानांहोमविधानात्॥ ॥वायुर्वइतिविनक्ति॥ ॥वा
युर्वइत्यनेनमंत्रेणविविनक्ति॥विचिरपृथग्भावेसतुषानिस्तुषांश्चपृथक्करोती[त्य]र्थः॥अत्रसूत्रांतरे॥अ
थापउपस्पृश्यविविनक्तिवायुर्वइतिपात्र्यांतंदुलान्प्रस्कंदयतीति॥ ॥आपस्तंबः॥ ॥वायुर्वइतिविविच्यदेवो
इतिपात्र्यांतंदुलान्प्रस्कंदयित्वेति॥कर्काचार्यस्तुवंव्याहृतेपृथक्करोतितंदुलान्कणांश्चवितुषीकरणपक्षेतु
ष्वान्संख्यांश्चेत्यर्थः॥वितुषीकरणयेत्यत्रसतुषाणामितिज्ञेयंतच्चैतद्विवेकीकरणं॥तुषनिरसनात्पूर्वंप्रति
पत्तव्यंसामर्थ्यात्॥अशेषनिरसनंचेवंसतिभवति॥उक्तौविरोस्तत्परत्वादिति सूत्रक्रमश्चयथाश्रुतीत्यर्थः
विरोधः॥यद्यपिकर्काचार्यैरेवंव्याख्यातं तथापिस्वश्रुतौसूत्रेशाखांत[रसू]त्रेषुच्चादृश्यमानत्वात्तदुर्जे
यं॥तत्रनानाबीजस्थास्थूलरूखलस्यैकत्वादेवस्यहविषःफलीकरणंतत्कर्मकर्तृत्वंएतावत्पर्यंतस्यावद्या
तस्यैकैदार्थत्वात्तपदार्थनचानुसमयइष्यते॥ ॥तथाचमानवे॥ ॥नानाबीजानामुखेषुहवींतमादाय
त्यावपनप्रभृतिफलीकरणंतमेकैकस्यनिष्पवनांतंयवानामिति॥ततश्चहविरावपनमुसलयोजनंकंडन
हविरुद्धपनविष्पवनविवेकीकरणपुनःकंडनतुषनिरसनअभिमंत्रणफलीकरणकणनिधानानिसर्वेषां

॥३७॥ ॥देवया०२

हविषां ग्रहणक्रमेण पृथिवीमंत्रवंतिकर्त्तव्यानि ॥ अन्यत्सर्वं तंत्रेण ॥ देवो व इति पात्र्यामोप्याभिमंत्रयते ॥ तान् पृथक्कृतांस्तंदुलानध्वर्युस्तूष्णीमेव पात्र्यामोप्य पात्र्यां प्रक्षिप्य देवो व इति मंत्रेणाभिमंत्रयते तंदुलान्स्पृष्ट्वा विलोकयित्वा मंत्रं पठतीत्यर्थः ॥ तथा चोक्तं ॥ स्पृशंस्त्वनामिकाग्रेण क्वचिदालोकयन्नपि ॥ अनुमंत्रणीयं सर्वत्र सदैवमनुमंत्रयेदिति ॥ भट्टाचार्यैरप्युक्तं ॥ मंत्रमुच्चारयन्नेव मंत्रार्थत्वेन संस्मरेत् ॥ शेषिणं तन्मना भूत्वा स्यादेतदनुमंत्रणमिति ॥ नानाबीजेषु पृथगेवाभिमंत्रणं कालस्य भिन्नत्वात् ॥ त्रिः फलीकरोति ॥ अभिमंत्रणानंतरं स्तंदुलांस्त्रिः फलीकरोति फलनिष्पत्तौ निष्पादयति सर्वेणापि रजोभागात्मकेन स्थूलमलतुषरूपेणानुपेताः फला अफलान्करोति फलीकरोति अवहत्यावहत्य स्थूलतुषेभ्यो वियोज्य निष्पूय निष्पूय च निरजस्कांस्तंदुलान्करोतीत्यर्थः ॥ त्रिरिति त्रिन्पर्यायान् ॥ वारत्रयमेवं करोति मंत्रानुपदेशात् तूष्णीमेव ॥ मेव

अथ त्रिः फलीकरोतीति श्रुतेः ॥ देवेभ्यः शुंधध्वं देवेभ्यः शुंधध्वमित्येके ॥ एके शाखिनो देवेभ्य इत्यनेन मंत्रेण फलीकुर्वंतीति ॥ अर्थादन्ये तूष्णीमेव कुर्वंतीति गम्यते मंत्रांतरस्यानुपदेशात् ॥ वीप्सा प्रति पर्यायं संकृत्स्वकृन्मंत्रप्राप्त्यर्थं नह्यत्र प्रतिप्रहारं मंत्रावृत्तिर्युज्यते ॥ कर्कमते तु देवेभ्य इत्यस्य देवाभ्यां देवाय देव्यै इत्या

॥३७॥ ॥शाखे॥

शुंधध्वमित्यस्य ह॥ नद्वे के देवेभ्यः शुंधध्वं देवेभ्यः ७ ५ सप्रयोजनस्य त॥ वक्ष्यति हितेषां प्रतिज्ञा॥ ५

दिविपरिणामो देवानामसीति देवशब्दवत् ज्ञेयः ॥ पितृयज्ञे च पितृभ्यः शुंधध्वमिति फलीकुर्वंतीति मंत्रेण फलीकरणं विधाय तद्वत्तथा न कुर्यादिति प्रतिषिध्यस्मात्तूष्णीमेव फलीकुर्यादिति उक्तं स्यात् ॥ आपस्तंबः ॥ त्रिः फलीकर्तव्यं इति संप्रेष्यति याजमानस्य पत्नी सा भि कृत्यावहंतियो वा कश्चिद् विद्यमानायामिति ॥ पलीकृत्यकणान्निदधाति ॥ उक्तप्रकारेण तंदुलान्फलीकृत्य कणान् सूक्ष्मरूपान्निदधाति सुगुप्तान्स्थापयति पुरोडाशकपालेन कणान पास्यतीति ॥ अतस्तदर्थं यत्नेन रक्षणमत्र विधीयते ॥ अनेनैव च तेषां कणसंज्ञा च विधीयते ॥ संग्रवहारार्थं पाठक्रमात्सिध्यत्यपि प्रतिफलीकरणं कणनिधानविधानार्थं फलीकृत्येत्युक्तं तैः प्रतिपर्यायं पदार्थं तया कणस्यापनं क्वचित्कर्तव्यं ॥ पेषणोपधाने युगपत् [illegible] ॥ तंदुलानां पेषणं कपालानामुपधानं च एतद्भयं युगपदेकस्मिन्नेतत्काले सहैव कर्तव्यं ॥ स एव कपालान्येवान्यतर उपधाति दृषदुपलेऽन्य तर इति प्रकृत्य नद्वाएतदुभयं सह क्रियत इति श्रुतेः ॥ आग्नेयोऽष्टाकपाल इत्यस्यायमर्थः ॥ अष्टसु कपालेषु संस्कृतोऽष्टाकपाल इति तत्संख्योत्पत्तिश्रमात्कृतैव कपालानामपणं ग सिद्धेन तेनोपधानमात्रं विधीयते ॥ ननु

॥३८॥
॥देवया०

चानुपहितेषु श्रवणानुपपत्तेरर्थप्राप्तमुपधानं तदप्यविधेयमेव ॥ नैतदेवं परोपहितान्यपि कथंचिदासाद्य ते
भ्यश्चपर्येत ॥ ततश्च नैकांततोर्थादुपधानं प्राप्नोतीति विधेयं ॥ तथा कंडनेनापि तंडुलापिष्टीकर्त्तुं शक्याद् इतिपे
षणमपि न नियोगतः ॥ प्राप्नोतीति तदपि विधेयं ॥ न च दृषदुपले अन्यतरउपदधातीत्यनुषंगादुपधानमत्रो
च्यते ॥ न पेषणं ॥ न च दोषउपधानग्रहणं पेषणलक्षणार्थं कुत एतत् ॥ मास्तिकएवपिष्टानीति वाक्यशेषात् ॥
अन्यतर इत्यध्वर्योराग्नीध्रस्य वा व्यपदेशं कुतएतदध्वर्योस्तावत्समाख्यानादाग्नीध्रोपि
सन्निधानात् ॥ वेदसंयोगाद्विरोधाच्च युगपद्यतेच विहितेतत [illegible] योन्यतरउपधानेन्यतरः पेषणं
प्राप्नोतीति वेत्यन्यतरग्रहणेनित्यानुवादादेवेत अपेषणस्य साक्षाद्विधिः सबंधात्कपालोपधानस्य
विप्रकृष्टत्वात्पेषणे एवाध्वर्युः कर्त्ता भवितुमर्हति कपालोपधाने त्वाग्नीदिति ॥ ॥ तदुक्तं जैमिनिना ॥ ॥३८॥
अंगिगुणविरोधे च तादर्थ्यादिति ॥ अतो विरोधादेव कपालोपधाने ग्नीधः कर्तृत्वं न वचनात् ॥ ततश्च ॥भाष्य॥
त्रयविरोधो नास्ति वरुणप्रयासे ध्वर्योर्मेषकरणे प्रतिप्रस्थातुः करंभपात्रमेषीकरणे च ॥ तत्रोभयो
र्यथास्वंस्वयमेव दक्षिणाग्नौ कर्परोपधानं नाग्नीध इति तत्रवाचः क्रमवर्त्तित्वाच्छ्रुतिमंत्रक्रमानु-

सारेण पूर्वमनुपधानमुपदिशति ॥ धृष्टिरसीत्युपवेषमादाय ॥ प्राग्नइत्यंगारान् प्राचः करोति ॥ ॥ उपवेषोंगारापोह ५
नसमर्थं हस्तावृतिकाष्ठं धृष्टिरसीत्यनेन मंत्रेण तमुपवेषमादायते नौ वेषेण खरस्थानअपरभागात् गार्ह
पत्यांगारान् प्राचः करोति खरस्य प्राग्भागे प्रेरयति अपाग्न इत्यनेन मंत्रेण पश्चाद्भागस्य कपालोपधाना
र्थरिक्तीकरणाय ॥ सयः कपालान्युपदधाति स उपवेषमादत्ते धृष्टिरसीति तेन प्राचोंगारानुदूहत्यपाग्न
इति च श्रुतेः ॥ ततोंगारापोहनस्य कपालोपधानार्थरिक्तीकरणार्थत्वाच्चविष्ट्यातदभावः ॥ धानाभर्जनो
पधाने च उभयोरप्यंगारेष्वेवाधिश्रयणप्रसिद्धेः ॥ पितृयज्ञे च दक्षिणार्धादुत्तरार्द्ध [illegible] दुहनं दक्षिणार्द्धे क
पालोपधानविधानात् ॥ त्र्यंबकेषु चोत्तरार्द्धाद्दक्षिणार्धेंगारप्रेरणं उत्तरार्द्धे कपालोपधानविधानात् ॥ ॥ आदेवय
जमित्यंगारमाहृत्य कपालेनावच्छादयति ध्रुवमसीति ॥ ॥ आदेवयजमित्यनेन मंत्रेण तेनोपवेषेण दूरेभ्योंगारे
भ्यः सकाशादेकमंगारमाहृत्य पुरोडाशश्रपणस्थाने आनीय ध्रुवमसीत्यनेन मंत्रेण तमंगारं कपालेनावच्छादय
ति ॥ आथांगारमास्थोनीतिश्रुतत्यतंमध्यमेन कपालेनाभ्युपदधातीति श्रुतेः ॥ आस्थेति आकर्षतात्यर्थः ॥ अयं
पदार्थो भर्जने चरुस्थाल्यां च न भवति ॥ पितृयज्ञेप्यपि तृयज्ञे वेहत्पूहः ॥ ॥ अनुष्पतिद्विषछछेभिचरन्‍ ॥ ॥ क

॥२१॥
॥देवया० २

र्मणा शत्रोः पीडनमभिचारः ॥ तत्राभिचरन्नपरस्याभिचारं कुर्वन् ध्रुवमसीत्येतन्मंत्रमध्ये द्विषन्तं शत्रुं वैरिवाच
केनाऽऽत्मव्यस्येत्यस्मिन् शब्दे अस्य स्थाने अमुष्येत्येवं षष्ठ्येकवचनांतं शत्रोर्नाम शब्दं पठेत् ॥ अमुष्य वधायेति
येति यदि नाभिचरेद्यद्यभिचरेदमुष्य वधायेति ब्रूयादिति श्रुतेः ॥ अत्र द्विषदित्यस्य न स्वरूपग्रहणमात्रं ॥ किं
तु तत्पर्यायाणामपि आत्मव्यादिशब्दानां तथा श्रुतत्वात् ॥ तेनास्मिन्मंत्रे आत्मव्यपदस्थाने पित्र्यमादेशः सि
ध्यति ॥ अन्यत्रापि ॥ न केवलमत्र द्विषच्छब्दे अमुष्येत्यादेशः किंतु अन्यत्रापि अभिचारान्विषच्छब्दे शत्रुनामग्र
हीयात् ॥ तद्यथा द्विषतो वधोसि ॥ भ्रातृव्यमव बाधो द्विषंतमवबाधे वज्रोऽभिमर्शनं जपे द्विषतो वध इत्यत्र योस्मान्द्वेष्टि यं
च वयं द्विष्मस्तमतो मा मौगित्येवमादिषु ॥ तत्र तत्र तथा श्रुतत्वात् ॥ तथाहि ॥ अयोदं च स्फ्यं प्रहरत्यमुष्मै त्वा वज्रं प्र
हरामीति यद्यभिचरेदिति ॥ द्विषतो वध इति यदि नाभिचरेद्यद्यभिचरेदमुष्य वध इति ब्रूयादिति ॥ यद्यभिचरेदमु
मतो मा मौगिति ब्रूयादिति च ॥ यदाभिचारबुद्ध्या ध्रुवमसीत्यादीनां प्रयोगः ॥ क्रियते तदा तदुच्चारणोत्तरकाल
मुदकोपस्पर्शनं कर्तव्यं ॥ अभिचरणीकं मंत्रमुक्त्वाऽपस्पृशेदित्युक्तत्वात् ॥ अभिचरणं प्रयोजनमस्यासावा
भिचारणीकः ॥ प्रयोजनमिति सूत्रेण ईयिष्टकु ॥ तेनाभिचारबुद्ध्यभावे मंत्रस्याभिचरणप्रयोजनाभावान्नाभिचा

भ्रातृव्यं वधा स्य

॥२१॥
॥कोष्ठे॥

धानान्तर्द्वयापि प्रथमकपालधर्मा भवंति ॥ तेन ध्रुवमसीत्युपधानं अग्नेस्तपरिविशेषः ॥ ३

ति

रणिकत्वे अतस्तदुच्चारणे उदकोपस्पर्शनाभावः ॥ सव्यांगुल्या श्न्येंगारं निदधात्यग्ने ब्रह्मेति ॥ मध्यमक
पालोपधानानंतरं सव्यांगुल्यांऽश्न्ये अविमुक्ते मध्यमकपाले अग्ने ब्रह्मेति मंत्रेणांगारं निदधाति ॥ अभिनि
हितमेव सव्यस्य पाणेरंगुल्या भवति ॥ अथांगारमधूहत्यग्ने ब्रह्म गृह्णीष्वेति श्रुतत्वात् ॥ ततः सव्यांगुल्याश्न्ये
गारं निधानं भवति ॥ अदृष्टार्थत्वात् ॥ सव्याश्न्ये कपालेऽग्ने ब्रह्मेति मंत्रेणांगारनिधानं प्रतिकपालं भवती
ति कर्कः ॥ तद्युक्तं ॥ यत आपस्तंबोप्येवमाह ॥ अपिवा मध्यममुपधाय सव्यस्य पाणेरंगुल्याभिनिधा
य निर्दग्धं रक्षो निर्दग्धा अरातय इति कपालेंगारमभ्यावधाय धर्त्रमसीति तस्मादपरं धरुणमसीति तस्मा
त्पूर्वं यथायोगमितराणि तस्य तस्यांगुल्याभिनिधानमंगाराधिवर्तनं च वाजसनेयिनः समामनंतीति ॥
धरुणमिति पश्चात् ॥ मध्यमकपालस्य पश्चाद्धरुणमसीति मंत्रेण द्वितीयं कपालमुपदधाति ॥ अथ यत्पश्चा
त्तदुपदधाति धरुणमसीति श्रुतेः ॥ पुरस्ताद्धर्त्रमिति ॥ मध्यमस्यैव कपालस्य पुरस्तात्तृतीयं कपालमुप
दधाति धार्त्रमिति ॥ अथ यत्पुरस्तात्तदुपदधाति धर्त्रमसीति श्रुतत्वात् ॥ विश्वाभ्य इति दक्षिणतः ॥ तस्यै
व प्रथमकपालस्य दक्षिणतश्चतुर्थं कपालमुपदधाति ॥ यथा यद्दक्षिणतस्तदुपधाति विश्वाभ्यस्त्वेति श्रुतेः ॥

॥दे॰ वै॰ या॰ २॥

समं विभज्य द्वे दक्षिणत एवमुत्तरतश्चित्तस्येति ॥ ॥ चतुर्णां कपालानामुपधानानंतरं यान्यवशिष्टान्यष्टानां मध्ये चत्वारि तानि समं विभज्य द्वे दक्षिणत उपदधाति ॥ एवमेव द्वे एवोत्तरतः चित्तस्यो इचित्त इति तेषां सर्वेषां प्रत्येकमुपधानमंत्रः ये दक्षिणतो द्वे उपधीयेते तयोर्मध्ये एकं चतुर्थात्पूर्वं द्वितीयं चतुर्थात्परं ॥ ततउत्तरतः प्रथमं पश्चात्ततः पूर्वमित्येवं प्रादक्षिण्येनोपधानं कर्तव्यं ॥ उत्तरतो यत्कपालद्वयं तदप्रादक्षिण्येनेति मा नैवं स्मार्तं चैतत्प्रादक्षिण्यं तत्त्वतदपचारे स्मार्तं प्रायश्चित्तं ॥ ननु द्वे दक्षिणत एवमुत्तरतस्त्यनेनैव सिद्धत्वात्समं विभज्येति न वक्तव्यं ॥ सत्यं ॥ तत्र सिध्यति ॥ अग्नीषोमीयार्थत्वेतत्र न ह्येकदेशकपालः ॥ तत्र हि बहूयाति ॥ एवमेकादशाग्नीषोमीयस्याधिकं दक्षिणत इति ॥ तत्र चतुर्णामुपधानंतरं अवशिष्टान्यसमं विभज्याधाधिकया दक्षिणत उत्तरतश्चोपदध्यात् ॥ एवं समविभागे क्रियमाणे यदधिकं तद्दक्षिणत उपदध्यादित्यमर्थः सिध्यति ॥ अन्यथासंख्याधिकमथाशंक्येत ॥ न हि द्वे दक्षिणतः एवमुत्तरइत्यत्रो क्ते अग्नीषोमीयेद्वागेत्वावशिष्टानां विभज्योपधानं सिध्यति ॥ ॥ तूष्णीं वा ॥ ॥ अथवा तूष्णीमेव चतुर्भ्योधिकानि सर्वाणि कपालानि उपदधाति न मंत्रेण ॥ तूष्णीं वैवेतराणि कपालान्युपदधाति चित्तस्यो इचित्त इति वेति श्रुतेः ॥ ॥ अत्र तैत्तिरीयसूत्रे विशेषः ॥ ॥ अथैतानि कपा

॥४॥ ॥साध्य॥

मा नै

णा

पौर्णमास्कपाले॥





लान्यग्निप्रक्षालितानि जघनेन गार्हपत्यमुपसादयत्यन्यो दक्षिणत एकादशोत्तरतो जघनेन गार्हपत्यमुपविश्यत्यष्टिमादत्ते धृष्टिरसीति ॥ एवमेकादशाग्नीषोमीयस्य ॥ एवमुक्तेनैव प्रकारेणाग्नीषोमीयस्य पुरोडाशस्यैकादशकपालान्युपदधाति ॥ एवं शब्देन अंगभाहरणकपालोपधानादि सर्वमतिदिश्यते ॥ विशेषमाह ॥ अधिकं दक्षिणतः ॥ चतुर्णामुपधानानंतरं अवशिष्टानां सप्तानां समविभागे क्रियमाणे यदधिकं विभक्तुं न शक्यते तद्दक्षिणत उपदधाति ॥ तत्रायं क्रमः ॥ प्रथमं मध्ये ॥ द्वितीयं ततं पश्चात्तं मध्यस्य पुरस्तात्तृतीयं ॥ मध्यस्य दक्षिणतश्चतुर्थं तस्मात्पूर्वं किंचिदंतरालमुक्त्वा पंचमं ॥ पंचमचतुर्थयोरंतराले षष्ठं ॥ चतुर्थस्य पश्चात्सप्तमं तस्य पश्चादष्टमं ततो नव प्रभृतीनि त्रीण्युत्तरतः प्राक्संस्थानि ॥ एतानि सर्वाणि कपालानि निरंतराणि संश्लिष्टानि समानि यथांतरा भूमिर्न दृश्यते ॥ अत्र मध्यमपंक्तिकपालानि द्वयंगुलानि समचतुरस्राणि भवंति एवं च षडंगुलदीर्घा मध्यमपंक्तिर्भवति ॥ दक्षिणोत्तरपंक्ति तु न मध्यमपंक्तिसमे ॥ ॥ किं तु ॥ ॥ किंचित्ततो न्यूने न तु अतिरिक्ते ॥ ॥ कुतः ॥ ॥ पुरोडाशस्य कूर्माकारत्वात्तत्राकारत्वप्रासिद्धेर्यावत्कपालं प्रथमविधे अतदर्थकपालस्वितेरपि अर्थाहृताकारतायागम्यमानत्वात् ॥ ऐंद्राग्ने तु चतुर्थोप

अमाकपाले॰





४ चोपदेयानि

॥ ५५ ॥
॥ देवया० २

मे २

धानानंतरं सम विभागे न चत्वारि दक्षिणतश्चत्वार्येवोत्तरत इति ॥ अत्र कठसूत्रे विशेषः । यथा प्रथमस्य कपालस्योपधानमेवमेककपालाद्यपयथा द्वयोरेवद्विकपालाद्येव मत ऊर्ध्वमूहे दिति ॥ अत एव वचनादेककपाले प्रथमकपालधर्मेण तस्योपधानं द्विकपाले प्रथम द्वितीयधर्मेण तद्द्वयोरुपधानं ॥ त्रिकपाले त्रयाणामपि प्रकृतिवदेवोपधानं ॥ परिमाणं तु सर्वत्र पुरोडाश परिमाणापेक्षया अर्थात्कल्प्यं ज्ञामदग्न्ये चतुरात्रे पुरोडाशिनीषु प्रवृत्तस्तु चतुःकपाले सोमस्य प्रतिगृहेष्टौ वारुणे च चतुर्थकपालस्य दक्षिणत एवोपधानं विभ्राड्भ्यं इति मंत्रेण ॥ पंचकपाले च चतुर्थस्य पश्चात्पंचमस्योपधानं प्रादक्षिण्यानुग्रहात् ॥ षट्कपाले तु समं विभज्येत्यादिन्यायेन चतुर्थस्य पश्चात्पंचमं षष्ठमुत्तरतः ॥ सप्तकपाले तु चतुर्थस्य पुरस्तादेकं पश्चादेकं च सप्तममुत्तरत इति ॥ नवकपालेषु चतुर्थकपालोपधानानंतरं अवशिष्टानि कपालानि विभज्य त्रीणि दक्षिणतः तन्मध्ये चतुर्थस्य पूर्वं पंचमं ॥ चतुर्थस्य पश्चात्षष्ठं सप्तमं द्वे चोत्तरतः ॥ त्रयोदशकपाले षड् दक्षिणतः षडुत्तरत इति ॥ अत्र कपालचितिच्छिन्नमध्यमा अपि प्रमाणं षडंगुलं वृत्तं कृत्वा । तत्प्राक्पश्चाद्देन समं त्रेधा विभज्य मध्यमभागस्य तिर्यक्पक्षछेदे द्वेधा विभागः कार्यः ॥ दक्षिणोत्तरभागयोस्तु खंडचंद्राकारयोः पुरो

॥ ५१ ॥
॥ आष्यं ॥

एकादशकपाले दक्षिणतः पंचधा इतरो त्रेधा ॥ द्वादशकपाले दक्षिणः पंचधा मध्ये त्रेधा ४

कार्यः ॥

डाशकपालसंख्यानुरोधेन तिर्यक् विभागः ॥ तत्र षट्कपाले दक्षिणो भागो द्वेधा ॥ उत्तरे तु क्रमेण कपालं खंडचंद्राकारं उत्तरभागप्रमाणं ॥ सप्तकपाले दक्षिणे भागस्त्रेधा उत्तरो द्वेधा ॥ अष्टकपाले दक्षिणस्त्रेधा उत्तरो द्वेधा ॥ नवकपाले दक्षिणो भागश्चतुर्धा इतरो अष्टकपालवत् ॥ दशकपाले दक्षिण श्चतुर्धा मध्यमो त्रेधा ॥ उत्तरश्चतुर्धा ॥ त्रयोदशकपाले दक्षिणः षड्धा उत्तरश्चतुर्धा मध्यमः सर्वत्र त्रिधैव ॥ एककपालं चेत्तत्याणिसंमितं ॥ द्विकपाले वृत्तस्य तिर्यगपक्षछेदेन द्वेधा विभागः ॥ त्रिकपाले वृत्तस्य तिर्यक् समं त्रेधा विभागः ॥ चतुष्कपाले वृत्तं संप्राचमपक्षिछेदोत्तरभागस्य त्रेधा विभागः ॥ दक्षिणत एकं ॥ पंचकपालेपि वृत्तं प्राचं द्वेधा पक्षिछेदोत्तरस्य त्रेधा विभागः ॥ दक्षिणस्य द्वेधा ॥ कपालानि तु घर्षणाद्युपायेन तथा करणीयानि ॥ यथा कपालचितिछिद्रं वृत्तं संपूर्यते ॥ भृगूणामित्यंगारैरभ्यूहति ॥ भृगूणामित्यादिश्रवणात् ॥ एककपाले तथस्येत् ऊहः ॥ कपालद्वये वतप्येथामिति ॥ तद्वदंगारान्यूहेथं सुतप्तान्यसनिति वाक्यशेषात् ॥ सुतप्त बधिश्रितः पुरोडाशो धस्तात्युच्यते ॥ एवं च कपालेधर्मग्राहिणो पिधानाभर्जनस्यांगारैरभ्यूहनं न भवति प्रासिद्धभावात् ॥ भर्जनस्य ह्यधस्ताद्देवतापनं प्रसिद्धमिति ४ ॥ उपसर्जनीरधिश्रयति ॥ अंगारैरभ्यूहनानंतरमग्नीद्वो

ष्टदणामीयनेन मंत्रेण तानि कपालानि गार्हपत्यांगारैरभ्यूहति ॥ आच्छादयति ॥ अथांगारैरभ्यूहति ॥ ४

मध्यदर्शेनैव कर्त्तव्यं ॥ ॥अथ पेषण ७

॥४२॥
॥देवया० २

पसर्जनीरधिश्रयति गार्हपत्ये एव ॥ पिष्टसंयवनार्थापठपसर्जनीशब्देनोच्यंते ॥ तदधिश्रयणं च दृष्टा र्थं तप्ताभिर्हि संयवनं यदा क्रियेत तदा पिष्टानां मार्दवं भवति ॥ एवं च पुरोडाशपाकार्था एवैताः ॥ ततश्च यदाआ हवनीये हविश्रपणं क्रियते तदोपसर्जन्यधिश्रयणं कपालोपधानं चाहवनीय एव कर्त्तव्यं ॥ यदा गार्हपत्ये श्र यणं तदोभयमपि गार्हपत्य एवेति ॥ पित्र्ययज्ञे च दक्षिणाग्नौ श्रपणविधानान्मथ्यार्थं नीवानीदुग्धोपसर्जन्यधिश्रय णमपि दक्षिणाग्नावेव कार्यं ॥ ननु पेषणोपधानयोः सहकर्त्तव्यत्वोक्तेरुपधानानंतरं पेषणमेवाभिधेयं तत्कथमं तरोपसर्जन्यधिश्रयण मुक्तं ॥ सत्यं ॥ उपधानवत्पेषणे न सहोपसर्जन्यधिश्रयणस्यापि योगपद्यप्राप्त्यर्थंत त्क्षोपसर्जन्यधिश्रयणेपि विरोधाद्देवाग्नीत्कर्तृत्वं तेन विरोधाभावे च विद्ध्यामुपसर्जन्यधिश्रयणमाह ॥ कृष्णाजि नमादत्ते पूर्ववच्छ्रतिकृष्णाजिनं ॥ फलीकृत्यक णनिधानानंतरमेवाध्वर्युः कृष्णाजिनमादत्ते कृष्णाजिने प्रतिवृष्ट र्वव द्विधिर्भवति पूर्ववदित्यादानमवधूननं आस्तरणं चेति ॥ अथयोदृषदुपलेउपदधाति स कृष्णाजिनमादत्ते शर्मासीति तदवधूनोत्यवधूतमिति ॥ तत्प्रतीचीनग्रीवमुपस्तृणात्यदित्यास्त्वचा देत्रापि श्रवणात् ॥ सव्यास्त न्यकरणमिति शाखांतरात् ॥ तथा च मानवे ॥ आदानात्प्रभृति कृष्णाजिनस्य समानमास्तरणान्तरिक्त

सव्यास्तन्यकरणं ३

॥४२॥
॥पोषे॥

मवसृजतीति ॥ आपस्तंबश्च ॥ अत्र कृष्णाजिनस्यादानादि प्रागधिवर्त्तनात्कृत्वेति ॥ तत्रह्युक्तमनुत्सृजन् कृष्णा जिनमधिषवणमसीति तस्मिन्नुलूखलमधिवर्त्तयतीति ॥ तस्मिन्दृषदं धिषणीसीति ॥ तास्मिन् कृष्णाजि ने सव्याश्रन्ये दृषदमुपदधाति धिषणासीत्यनेन मंत्रेण ॥ अथ दृषदमुपदधाति धिषणासीति श्रुतेः ॥ पश्चा छम्यामुपोहत्युदीचीदिव इति ॥ पश्चाद्दृषदः पश्चाद्भागे उदीचीमुदगग्रां शम्यामुपोहति दृषदो धस्तात्प्रवेश यति ॥ अथ शम्यामुदीचीनाग्रामुपदधाति दिवस्कंभनीरसीति श्रुतत्वात् ॥ इयं च दृषदउपर्युपधेया कुतः उप धानक्रमादंतरिक्षसंस्तवात् ॥ जिह्वासंस्तवाच्चेति चेन्न ॥ तदयुक्तं ॥ अदृष्टार्थकल्पनाप्रसंगात् ॥ उपधान [illegible] अत तवा देवविशेषाश्रवणे सति यत्रोपधीयमानोपकरोति तत्रोपधेयेति गम्यते ॥ यदुक्तमुपधानक्रमादिति ॥ तत्रापि किं चित् नहि यत्पश्चादुपधीयते तत्पूर्वस्योपरीति किंचित्कारणमस्ति ॥ यदप्यंतरिक्ष स्यैव [illegible] रूपेणैत्यं तरिक्षसंस्तवे दिति सोप्यंतरालवर्त्तित्वमात्रनिमित्तोंतरिक्षसंस्तवः ॥ देशतो हि स[illegible] उपलांतराल वर्त्तित्वं शम्यायाः कार्यविरोधीति कृत्वा उपधानकालतो यदंतरालवर्त्तित्वं नाम तदेवापेक्ष्यायमंतरिक्षसंस्त वः ॥ अवश्यं चैतदेवमभ्युपगंतव्यं ॥ अन्यथा देशतोंतरालवर्त्तित्वे सति शम्याया दृषदुपर्युपधीयेत तत यौ पेषणमेव न

संवर्त्तेत॥ प्रतीत्वा पर्वती वेत्विति च साक्षात्तेषत्संबंधमेवोपलाया दर्शयति इतरथा तु शम्पयाया वहितयोर्दृषदुप
लयोरसंबंधात्कुतो हिंसाशंका येन तन्निवृत्त्यर्थं ये [illegible] प्रतीत्वा पर्वती वेत्विति नेदन्योन्यं छिन्नसान्त
इति वोच्यते॥ एवं जिह्मा संस्त वेष्टन्य ततः सा मान्या दिति वक्तव्यं॥ कालतस्त्वावदन्तरालसंबंधस्थित एव॥ किंचा
धस्तात्पश्चाद्गलग्नस्य प्रवेशिता शम्या दृषदः प्राकृष्टप्रणतां करोति निश्चलां च॥ अतो दृढार्थत्वाद [illegible] धस्तादेवो
पधेया। तथा च लिंगं॥ सयज्ञघने न शम्यापि ष्यमाणानामवशीर्यंते पिष्टानि वा तंदुलानि वेति॥ अतश्चाधस्तादु
पहिताया एव भवति नोपरि॥ ॥दृषदुपलांधिषणासीति॥ ॥धिषणासीत्यनेन मंत्रेण दृषदि दृषदउपर्युपला
मुपदधाति। अथोपलामुपदधाति धिषणेत्यादिश्रुतेः॥ ननु पेषणार्थत्वादुपलाया दृषद्येवोपधानं प्राप्नोतिन
त्किमर्थमुक्तं दृषदीति सत्यं॥ दृषद्युपलाया एवोपधानं न शम्याया इति नियमार्थमित्यदोषः॥ धान्यमसीति तंदुल
नोप्यपिनष्टि प्राणाय त्वेति प्रतिमंत्रं॥ ॥धान्यमसीतिमंत्रेण दृषदि तंदुलानोप्य दृषद उपरि तंदुलान्निधाय प्राणा
यत्वेति प्रतिमंत्रं पिनष्टि॥ पिष्टं चूर्णेन चूर्णयति पिष्टत्वमापादयतीत्यर्थः॥ अथ हविरधिपेति धान्यमसीति॥ अ
यपिनष्टि प्राणाय त्वेति च श्रुतत्वात्॥ दृषदो धिउपरि वपति सामर्थ्याद्दृषदुपरि नोपलायाः॥ डुं वपू बीजप्रक्षेपणे॥

अत्र प्रक्षेपणमात्रे प्रक्षिपतीत्यर्थः॥ पितृयज्ञे धिनुहि पिंष्टेनित्येवमूहः॥ शान्तपानामयने चतरसमयेषु सव
नीयेषु तरसमंधिनुहीत्येवमूहः॥ पिनष्मीत्येवं त्रिष्टुपिमंत्रैर्ध्याहारः साकांक्षत्वात्॥ अत्राहापस्तंबः॥ प्रा
णाय त्वेति प्राचीमुपलां प्रोहत्यपानाय त्वेति प्रतीचीं व्यानाय त्वेति मध्यदेशे व्यवधारयति ततः संततं पिनष्टीति
॥ मनुः॥ प्राणाय त्वेति प्राचीमुपलां प्रोहत्यपानाय त्वेति प्रतीचीं प्रकर्षति व्यानाय त्वेति मध्यदेशे व्यवगृह्णा
तीति दीर्घामिति संततं प्राचीं दीर्घं पिनष्टीति॥ ॥दीर्घामिति कृष्णाजिने प्रोहति॥ ॥सर्वेषु तंदुलेषु पिष्टीभू
तेषु दीर्घामित्यनेन मंत्रेण तानि पिष्टानि कृष्णाजिने प्रोहति॥ उपलया प्रेरयित्वा प्राच्यां कृष्णाजिनस्योपरि पा
तयतीत्यर्थः॥ दीर्घामनुप्रसितिमायुषे धामिति प्रोहतीति श्रुतत्वात्॥ कृष्णाजिने पिष्टानि प्रस्कंदयतीति शाखांत
रात्॥ आपस्तंबः॥ अ संवपंती पिंषाण्वूनि कुरुतादिति संप्रेष्यति दासी पिनष्टि पत्नी वा अपि वा पत्न्येव हंति
शूद्रा पिनष्टीति॥ ॥चक्षुषे त्वेति हृते॥ ॥ततः कृष्णाजिने पतितानि पिष्टानि चक्षुषे त्वेत्यनेन मंत्रेण हृते॥ चक्षु
षा पश्यति ईक्षते इति चाध्याहारः साकांक्षत्वात् यागसाधनैं तद्द्रव्यसंस्कारोयं॥ ततश्च पेषणाभावेपि विद्यां तं
दुलानामीक्षणं भवत्येव॥ वाजप्रसवीयजुहोतौ चयने वाजपेये च मसदौषधानामपि॥ पिष्यमाणेषु निर्वपत्यन्यो

॥४८॥
॥देवया०२

स्यामाज्यनिर्वपति॥पात्रीं तरादाज्यस्थ्या २

महीनामित्याज्यं॥ ॥पिष्यमाणेषु तंडुलेषु अध्वर्योराग्नीध्राद्वान्यो यजमान एव महीनामित्यनेन मंत्रेणाज्यस्था
ल्यां प्रक्षिपतीत्यर्थः॥ आज्य स्थाली लक्षणमुक्तं छेदोगपरिशिष्टे॥ आज्यस्थाली प्रकर्तव्या तैजसद्रव्यसंभवा॥
महीमयी वा कर्तव्या सर्वास्वाज्याहुतीषु च॥ आज्यस्थाल्याः प्रमाणं तु यथाकामं तु कारयेत्॥ सुदृढामव्रणां भद्रामाज्य
स्थालीं प्रचक्षत इति॥ पिष्टेषु तिपिष्टान्यभीधते कपालान्यथैक आज्यं निर्वपतीति स्कतेः॥ मंत्रे हरिस्वा
मिनः॥ अध्वर्योराग्नीध्राद्वान्य एकः सनिधेयं यजमानो मंत्रानध्ययनादेक इति पुल्लिंगनिर्देशाच्च न पत्नी ब्र
ह्माद्य परितोषणे प रङ्कस्य पृथक्करणेनातिसमर्थः॥ अतः स्वामित्वाद्यजमान एवात्राज्यनिर्वापं कर्तु
मर्हमिति स एवान्यः॥ एवं च निरस्थात्यं वेदोसीति यजमानो वेदं करोतीति सूत्रे वेदकरणे न समानकर्तृकमा
ज्यनिर्वापणं गम्यमानमनुपपन्नं भवति अतो यजमान एवाप्यं कृत्वा वेदं करोति॥ तदुक्तं सूत्रकृता॥ नि
रुप्याज्यं वेदोसीति यजमानो वेदं करोति कुशमुष्टिं सव्या कृत्वं मूतकार्यं वा पशुब्रह्मवर्चसान्नाद्य
कामा यथा सख्यमिति॥ ॥मत्रुः॥ ॥वेदं करोति वत्सज्ञं प्रसव्यमावेष्ट्य तत्त्लैर्दक्षिणोत्तर तूलेषु शु
ल्वं प्रतिनिधाय त्रिरा वेष्ट्य सव्यं त्तु तं प्रदक्षिणं प्रादेशमात्रं शुल्वात्परिवास्यान्करे मूला

ज्यनिर्वा
॥४५॥
॥भाष्य॥

सव
स्य
॥तु

वत्सानां त्रिवृतं ३

२ स्वर्गकामस्येति॥लौगाक्षिः॥वेदं करोति दर्भमुष्टीं प्रसव्यमावेष्ट्योपयुक्त्या ग्राणा शुल्वं कृत्वा त्रिः परिहर २

निगमयति मूलानि दधाति॥ वेदं कृत्वा वेदीं करोतीति तेत्तिरीये वेदं करोति वत्सजानुं पशुकामस्य मूतका
र्यमन्नाद्यकामस्य त्रिवृतं तेजस्कामस्योर्ध्वाग्रैत्यगुणेषु शुल्वातमकृष्णायमयं शुल्वान्प्रादेशे छि
त्वाग्राणी निधायोत्करे मूलानि ततो वेदिकरणमिति॥ ॥आपस्तंबः॥ दर्भाणां वेदं करोति वत्स
जं पशुकामस्य मूतकार्यमन्नाद्यकामस्य त्रिवृच्छिरसं ब्रह्मवर्चसकामस्य शुल्वान्प्रादेशपरिवास्य वेद
परिवासनानि निदधातीति॥ वत्सजुर्वत्सजानुतुल्यः॥ मूतकार्यो मूतवत् क्रियते यत्र धान्यं निधी
यते स मूत इति त्रिवृदेकशिरास्त्रिवृच्छिराः॥ त्रीणि शिरांसीति केचित्॥ कामाभावे चैता आकृतयः अ
कामस्या स्याविधानादिति तद्भाष्ये वेदपरिवासनानि सर्वाण्येव वेद्यग्राणीति च॥ ॥पात्र्यां सप
वित्रायां पिष्टान्यावपति देवस्य त्वेति॥ ततः सपवित्रायां पात्र्यां पिष्टानि आवपति कृष्णाजिनमुत्पाद्य तेनै
व पात्र्यां प्रक्षिपतीति हरिस्वामिनः॥ देवस्य त्वेत्यनेन मंत्रेण॥ पवित्रवतीं संवपति पात्र्यां पवित्रे अवधा
य देवस्य त्वेति श्रुतत्वात्॥ पात्र्यामित्याकारविशेषवति महति पात्र इत्यर्थः॥ आपस्तंबः॥ ॥प्रक्षालि
तायां पात्र्यां निष्टप्तो पवातायां पवित्रवत्यां पिष्टानि संवपतीति॥ तथा संवपन्वाचयक्षति ता

ति

॥४६॥ ॥देवया०२

मभिवासयन्विसृजेंतिपात्र्यामावपनंचसंयवनार्थं ॥ अतश्चरुतंडुलेषु न भवतिसपवित्रतानुचरावपि वर्तते अदृष्टार्थत्वात् ॥ ॥ अपरेणस्यपश्चादुपविशत्यंतर्वेदिवा ॥ संपवेनानंतरंसपिष्टांपात्रीमादायेतउत्थाय अपरेणस्य गार्हपत्यस्यपश्चादुपविशति ॥ अथवापरेणदेशादुत्थायांतर्वेदि मध्येउपविशति ॥ वेदंरतः अंतर्वेद्याः करिष्य माणायाः प्रदेशोलक्ष्यतेयस्मिन्देशे शास्त्रेणवेदिर्विहितातस्यदेशस्याभ्यंतरेउपविशतिसपिष्टांपात्रींगृहीत्वातामेव तत्रासादयतीत्यर्थः ॥ कुतएततपरतःपिष्टंनासंयवनश्रूयते ॥ निधानेचविहितेसोकार्यदेवोपवेशनंप्राप्तमेवानूद्यते ॥ अंतर्वेदीतिपृथगुपादानात्कूपरेण शब्देनात्रगार्हपत्योभिधीयते ॥ अथवाअपरेणस्य पश्चादुपविशेतावनेवपाक्षिकंतर्वेद्युपवेशनेसिद्धेयदंतर्वेदीत्युच्यतेतत्गार्हपत्येअपरेणपक्षेप्यंतर्वेद्युपवेशनंविकल्पेनयथास्यादि ॥ ॥ उपसर्जनीरानयत्यन्यः ॥ ॥ अध्वर्योरन्यआग्नीध्रः उपसर्जनीरुद्धास्यानीयउप विश्यपात्रीस्थ पिष्टानामुपर्यानयतिनि नयतीत्यर्थः ॥ अथेवउपसर्जनीभिरतितान्आनयतीतिश्रूयतेः ॥ अस्यार्थः ॥ ॥ एकोन्यआग्नीध्रउपसर्जनीभिः उपशमर्थेसंसृज्यतेसंमिश्र्यतेहविराभिरित्युपसर्जन्यः आपः समापत्ओषधीभिरितिमंत्रलिंगात्तदेशस्वंतरात्तुनमाभिः सहेतिसहयुक्तेइतित्नीयागृहीत्वा आगच्छतिगार्हपत्यादेदिदेशं ॥ तान्आन

॥४६॥ ॥प्रोष्य॥

यतिप्रकृतेपिष्टेकः कस्यहस्तेवर्त्ततेसएवआग्नीध्रः ॥ ॥ पवित्राभ्यांप्रतिगृह्णातिसमापइति ॥ ॥ अध्वर्युस्ताअग्नीधा नीयमानाउपसर्जनीसंज्ञाआपः समापइतिमंत्रांतेपवित्राभ्यांप्रतिगृह्णाति ॥ ताः पवित्राभ्यांप्रतिगृह्णातीतिश्रूयतेः ॥ ॥ संयौतिजनयत्यैत्वेति ॥ ततोध्वर्युर्जनयत्यैत्वेतिमंत्रेणसंयौति ॥ युमिश्रणेपिष्टान्याद्भिः सम्यक्मिश्रयतीत्यर्थः अत्राहापस्तंबः ॥ प्रोक्षणीवातिष्टान्युत्पूयप्रणीताभिः संयौत्यन्यावायज्जुषोत्पूययद्दिप्रणीतानाधिगच्छेत्स्रुवेणप्रणीताभ्यआदायवेदेनोपयम्यसमापोअद्भिरग्मतेतिपिष्टेष्वानीयाद्भिः परिप्रज्ञाताइतितमाभिरनुपरिप्लाव्यजनयत्यैत्वेतिसंयौतीति ॥ मनुरपि ॥ वेदोपयामःस्रुवेणप्रणीतामाहरतिसमाप ओषधीरित्यासिंचतितमाभ्यश्चांइति ॥ तथापृथग्ध्रुमितितमापरिसारयतिपिष्टानिसंनयतीतिवि ॥ ॥ लौगाक्षिः ॥ ॥ प्रणीतास्तपाः घृतवतीः समापइत्यासिच्ये ति ॥ ॥ तैत्तिरीसूत्रेपि ॥ ॥ अथपरिकर्मिणमाह ॥ आहरापइतिआनयेत्याह ॥ आहरतिप्रैषकारः प्रणीताभ्यंस्रुवेणोपहत्यवेदेनोपयम्यपाणिनांतद्भीयेवंमद तीभ्यस्ता उभयीः समानीयमानाः प्रतिमंत्रयतेसमापइत्यादि ॥ पूर्वव्याख्यानेनैवोक्तंतपतिपिष्टसंयवनीयाआपइति ॥ वरावे पसर्जनीमिनयनंभवत्येवतत्राप्युदकार्यस्यविद्यमानत्वात् ॥ संयवनंतुन

॥४६॥
॥देवयो०२

मग्नी २ मं २

भवतिकार्यलोपात्॥ ॥समंविभज्यासᳮहरिष्यन्नालभत इदमग्नेरिदंषोमयोरिति॥ ॥संयवनानंतरंसविभ
ज्यद्वौपिंडौकृत्वाऽसंहरिष्यन्पुनर्मिश्रणमकरिष्यन्क्रमेणैतौपिंडावालभते॥ उदकसंस्थौपात्र्यांनिहितौ
अवरोक्तमुत्तरᳮहविषीत्युक्तेः॥ इदमग्नेरितिदक्षिणमात्रयमालभते॥ इदमग्निषोमयोरित्युत्तरमग्नीषोमीयं॥
अथद्वेधाकरोतियदिद्वेहविषीभवतःपौर्णमास्यांवैद्वेहविषीभवतंसयत्रपुनर्नसᳮहरिष्यंत्स्यात्तदभिमृ
तीदमग्नेरिदमग्नीषोमयोरितिनानावाएतदग्रेहविर्गृह्णंतितत्सहावद्यंतिततत्सहपिᳮषंतितुनर्नेनाना
करोतितस्मादेवमभिमृशंतिश्रुतत्वात्॥ यदिद्वेइतिऽवन्नमावास्यापिप्रष्ठतेवेतिदर्शयतिपौर्णमास्यांवै
द्वेनित्यंइत्यभिप्रायः॥ ऐंद्राग्नयाजिनस्त्वमावास्यायामपिद्वेभवतएवअतएवानयोर्द्विषोग्रहणंप्रोक्षणं
चपृथक्कृत्वाततएकत्रसंयोज्यसहैवकंडनपेषणसंयवनानिकृत्वाऽधुनाविभज्ययथास्वमालंभःका
र्यः अतश्चदृष्टार्थोयमालंभः॥ तेनैकस्मिंश्चविनिप्रवर्त्तते॥ किंच विभागपूर्वोह्यालंभः॥ नचैकस्मिन्विभा
गोस्ति॥ ननुसमंविभज्यत्येतावतासिद्धेअसᳮहविष्यन्नितिकिमर्थं॥ ॥उच्यते॥ ॥विषमेपिविभागेभ्रांत्या
कृतेआलंभानंतरंपुनरपिसहत्यसविभागकरणवारणार्थमेतदेतिपिष्टभ्रूतिः॥ अथचैवं योजना असं

ती

त

॥४६॥
॥भाष्यं॥

२

२ पत्न्य आलं

वति २

हरिष्यन्नित्यनेनालंभस्यकालांतरंविधीयते॥ यस्मिन्कालेअसंहरिष्यन्तं तदैवविभज्यालंभः॥ पुरोडाशा
नांᳮतेनेमंकालंप्रतीक्ष्यते॥ तेनकृष्णंफलीकरणंतएवविभागः॥ पोक्षस्यपेषणंतएवविभज्यालंभः॥ तुसं
यवनांते॥ अतएवश्रूयतेसयत्रपुनर्नसᳮहरिष्यंत्स्यात्तदभिमृशतीति॥ यत्रयस्मिन्कालेसोध्वर्युःपुनरसंह
रिष्यंत्स्यात्पुनमिश्रीकरणंकरिष्यन्नभवेत्तत्रास्मिन्नेवकालेविभज्याभिमृशतीति॥ तेनचवीदीनांविभज्या
लंभेपुरोडाशसंयवनोत्तरकालतानियमोनभवतितीतात्पर्यं॥ एतच्चरूणांपुरोडाशैःसहविभागेज्ञेयंच
रूणांतुपरस्परंचह्रुषेत्वेतीकृष्णंतएवाईकृष्णस्यप्रकृतोसहदृष्टत्वात्॥ अत्राप्यविरोधाच्च॥ ॥यथादेव
तमन्यत्॥ ॥अन्यदैंद्राग्नादिकंहविर्यथादैवतंयायातस्यदेवतातस्यषष्ठ्यंतनामोच्चारणेनाभिमृशेत्॥ इदम
ग्नेरिदमिंद्राग्न्योरित्येवं॥ ॥इषेत्वेत्याज्यमधिश्रयत्यन्वः॥ ॥अध्वर्योरन्यआग्नीध्रइषेत्वेत्यनेनमंत्रेण
ज्यंगार्हपत्येधिश्रयति॥ सौसावाज्यमधिश्रयति॥ अधिश्रयामीतिवाध्याहारःसाकांक्षत्वात्॥ ॥अप
त्नीकस्याहवनीयेतच्छ्रापिणः॥ ॥अपत्नीकस्यरजोदोषप्रसवप्रवासादिनाअसंनिहितपत्नीकस्यतच्छ्रा
पिणइत्याहवनीयश्रापिणस्त्राहवनीयेहविःश्रपणंकुर्वतोयजमानस्याहवनीयेआज्यमधिश्रयति॥

च

र्य

प

तिश्रुतेः॥

सा

॥४७॥ ॥देवया०२

आहवनीयेश्रपिणो सन्निहितायां पत्न्यां गार्हपत्य एव ॥ यत एवं श्रूयते यस्याहवनीये हवींषि श्रपयंति प्रत्यंतीत्यं यस्य पत्नी न भवत्यग्र एव तस्याहवनीये धिश्रयतीति ॥ यस्य पत्नी नस्यात्तस्य नियमेनाहवनीयश्रपीतस्याग्रे प्रथमाधिश्रयणमप्याहवनीय एक कर्तव्यं हरिस्वामिनः ॥ ॥ शाखांतरे चैवं श्रूयते हि निपत्न्यमनालंभुकीस्यात्तामपरुध्य यजेतेति ॥ अनालंभुकी रज[illegible]स्वला केचिदपत्नीकोऽमृतपत्नीक इत्याहुः ॥ तद्विषयमेतत्तस्याप्येकाकिन एवाधानं श्रूयते ॥ ॥ आश्वलायनब्राह्मणे तदाहुरपत्नीकोऽप्यग्निमाहरेन्नाहरे[illegible]दित्याहुर्यदि नाहरेदनद्धा पुरुषः स्यात्कोऽनद्धापुरुष इति न देवान्न पितॄन्न मनुष्यानवतीति तस्मादपत्नीकोऽप्यग्निमाहरेन्नदेषाय ज्ञगाथाभिगीयते यजेत सौत्रामण्यामपत्नीकोऽसोमपः ॥ मातापितृभ्यामनृणार्थाय यजेतवचनाच्छ्रुतेरिति तस्मात्सोमं याजयेतु तस्मादपत्नीकस्याधानं कुर्वत्यपत्नी[illegible]र्वत्यपत्नीकोऽग्निहोत्रं जुहोति श्रद्धापत्नी सत्यं यजमानः श्रद्धा सत्यं तदित्युत्तमं मिथुनं श्रद्धया सत्येन च मिथुनेन स्वर्गान्लोकं यजतीति ॥ तथा च पत्न्यां मृतायां अग्निनिर्दग्धायां पुनर्विवाहासंभवे आत्मार्थमग्न्याधानमाहापस्तंबः ॥ दारकर्मणि यद्यशक्त आत्मार्थं अग्न्याधेयं दर्शपौर्णमासाग्रयणार्थं शेषाणि कर्माणि न भवंतीति ॥ अमुमेवार्थं त्रिकांडमंडनो पि[illegible]आह स्त्री ॥४७॥ ॥काश्यां॥

णि १

मात्रमविशेषेण दग्ध्वान्ये वैदिकाग्निभिर्विवाह्यादधते यद्वाधानमेवास्ति चेद्दधुः ॥ एकाकीवादधीताग्नीन्विवाहश्चेन्न सिध्यति ॥ नित्येष्ट्याग्रयणान्यग्निहोत्रं कर्मास्य नेतरदिति विशेषणेति ॥ प्रथमां वा द्वितीयां इति विशेषरहितं स्त्रीमात्रं दग्ध्वेत्यर्थः ॥ तथा पत्नीमरणेऽप्यग्नीनारक्षणमप्युक्तं [illegible] तस्मान्नैव कदेशेन दग्धव्या पूर्वमारिणी ॥ पत्नी ज्येष्ठतरा वापि यज्ञपार्श्वे निरूपितं ॥ कात्यायनः ॥ मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत् ॥ उपाधिनापि तत्कर्म यावज्जीवं समापयेदिति ॥ ॥ घर्मोसीति पुरोडाशं युगपत् ॥ ॥ घर्मोसीत्यनेन मंत्रेणाध्वर्युः पुरोडाशं कपालेष्वधिश्रयति ॥ आज्येन युगपत् ॥ आज्येन सह आज्याधिश्रयणं पुरोडाशाधिश्रयणं च सह एव भवतीत्यर्थः ॥ अधिवृणक्त्येवैष पुरोडाशमधिश्रयंसा वाजं तद्वाए तदुभयं सह क्रियत इति श्रुतेः ॥ एषोऽध्वर्युः पुरोडाशमधिवृणक्ति ॥ अधिश्रयति असावाग्नीध्र आज्यमधिश्रयतीति असावितिसमाख्यासंनिहितोऽध्वर्युरपेक्ष्याविप्रकृष्टतरमग्नीध्रमदःसादूरस्थवचने नाह ॥ अत्र पुरोडाशाधिश्रयणं वेदेन कपालेभ्योंगारान्परोह्येत्य कर्तव्यं ॥ ॥ तथाहापस्तंबः ॥ ॥ इदमहमिति वेदेन कपालेभ्योंगारानपोह्य घर्मोसीत्याग्नेयं पुरोडाशमष्टासु कपालेष्वधिश्रयत्येवमुत्तर[illegible]मुत्तरेष्वेवमनुपूर्वाण्येव तदूर्ध्वं कर्माणि क्रियांते ॥ समानजातीजेन कर्मणैकैकमपवर्जयतीति

॥५८॥ ॥देवया॰२ ॥

दाद्यपतितत्

स्य

यातिविभवंतीति [illegible]नित्क्रिनिक्रियं तइति ॥ अत्र विरोधादन्यं कर्तृकत्वे तेन विरोधाभावेश्चौ वाज्येष्टा
पयस्यादो चाध्वर्योरेवाज्याधिश्रयणमिति कर्कः ॥ तत्कथमेप पद्येते इति सिवे [illegible]यतस्त्रे नेवाहनने वच
रादग्नीधः कर्तृत्वमुक्तं ॥ सयत्रैष पूर्हविष्कृतमुद्वादेको दृषदुपलेसमहंतीत्यनयाश्रुत्या ॥ अपित्रैतादृश्येव
श्रुतिरस्ति अधिवृणक्ते चेष [illegible] पुरोडाशमधिश्रयत्यसावाज्यमिति ॥ अतोत्रापिवचनादग्नीधः कर्तृत्वं ॥
तेनाध्वर्युतेप्य ध्वर्युर्वा [illegible]हननवदग्नीध एवाज्याधिश्रयणमिति युक्तमुत्पश्यामः ॥ सहाधिश्रयंविधा
नाद्विरोधादित्यस्मिन्प्राप्ते यदन्यग्रहणं सूत्रकृत्करोति तद्विरोधे [illegible] पस्तदास्यन्य [illegible] एवाज्याधिश्रयणे
कर्त्तायथादित्येवं यत्कर्काचार्यैरुक्तं तदेवसाधु ॥ व्याख्यानांतरं तु तत्रैतमयुक्तमिति ॥ उरुप्रथाइति
यावत्कपालेमननति पृथुं ॥ उरुप्रथा इत्यनेन मंत्रेणाधिश्रितं पुरोडाशपिंडं यावत्कपालमनति
पृथुं प्रथयति [illegible] यावत्कपालमिति यावंति यत्परिमाणं पृथुनि कपालानि तावंति पृथुंक
रोतीत्यर्थः ॥ कीदृशं अन [illegible]ति पृथुं ॥ अतिशयितं पृथुरतिपृथुरतिविपुलः नअतिपृथुरनतिपृथुस्तमनतिपृ
थुं नातिविपुलं लोकिकापूपसदृशमित्यर्थः ॥ तं प्रथयतीति प्रकृत्य तन्नसत्रापृथुंकुर्यादश्वशफमात्रं कुर्यादित्युक्त

॥५८॥ ॥सा॰ष्वं॥

नसा

आकुर्यावंतमेवस्वयंमनसत्रापृथुंमन्येतैवं कुर्यादितिश्रुतेः ॥ तत्रसत्रेतिसत्राशब्दः सत्यनामसुप
ठितः ॥ पदृशशब्दश्चसतुस्पष्टवचनोत्रशतपथे ॥ यच्चसत्यंस्पष्टमेवतदित्यविरोधएव ॥ ततश्चनस्पष्टं
पृथुंकुर्यादिति ॥ यादृशं स्पृष्टं पार्थवं भवति ॥ तादृशं कुर्यादित्यर्थः ॥ तेनार्थादितदुक्तंभवति ॥ अतिपृथुंनकु
र्यादिति ॥ अन्येत्वेवमन्यर्थं गम्यमानं दृष्ट्वातिशब्दस्येवार्थसत्राशब्देवर्णयंति ॥ तेषांसत्रानामश्रुति
विरुध्यते नाहेवसत्रात्यंतिकेनोद्धूरइतिचातिशब्देनसहप्रयोगश्चापयायित्वादनुपपन्नः ॥ तस्मात्स्पष्ट
वचनोसत्राशब्दौ मानुषमनुष्या राजकं मंडकं कुर्यादितिकस्तत्रदेहेति ॥ अश्वशफोप्यनियतपरिमा
णएवमहतोश्वस्यमहानअल्पस्याल्पःअनियतपरिमाणं चयस्त्वन्यपरिछेदकत्वायात्नमित्यभि
प्राय ॥ यावंतमेवस्वयंमनसेतिनयुगशम्यादिवदश्वशफोमानायास्तुपेतव्यः ॥ मनसैवयावंतं
मध्यमानाश्वशफपरिमाणोद्देशेननातिपृथुंमन्येतदेवतसोविष्टकृतेडाद्यवदानपर्याप्तम
न्येततत्परिमाणंविशिष्टंकुर्यादिति ॥ ॥ अत्राहापस्तंबः ॥ उरुप्रथस्वेतिपुरोडाशं प्रथयन्स
र्वाणिकपालान्यभि प्रथयत्यतुगामनपूपाकृतिं कूर्मस्येवप्रकृति मश्वशफमात्रंकरोतियावंतं

ति

तन्त्र मह

॥४७॥ ॥देवया०२

वामन्येतं मन्त्रा प्रथुं करोतीत्येके इति ॥ मनुरपि ॥ इदमहमिति वेदेन कपालेभ्यो भस्मापोहति घर्मोसि विश्वा
युरित्यधिश्रयत्येव मुत्तरमेकैकं कर्मोभयोः कुर्यादुरु प्रथस्वेति यावत्कपालं कूर्माकृतिं प्रथयतीति ॥ लौ
गाक्षिरपि ॥ पिंडीकृत्वा घर्म इत्यधिश्रित्योरु प्रथस्वेति प्रथयति कूर्मरूपाविति ॥ सूत्रांतरे च ॥ संयुत्य
गृह्याभिमृश्य त्यग्नये त्वाग्नीषोमाभ्यामसुभा असुभा इति यथा दैवतं पिंडं करोति मखस्य शिर इति तद व
क्षिणेषां कपालानां प्रत्युह्यांगारांस्तेष्वधिश्रयणं क्रि घर्मोसि विश्वायुरिति प्रथयत्युरु प्रथस्वोरु ते यज्ञप
तिः प्रथतामिति ततं च तं कूर्मप्रकारं करोति सर्वाणि कपालान्यभिप्रापयतीति ॥ अत्र सर्वेषु सूत्रेषु पुरो
डाशयोः क्रमेणाधिश्रयणविधानात्सहाधिश्रयणमनुपपन्नं तेन एकस्यैव पुरोडाशस्याज्यवत्सहाधिश्रयणं
द्वितीयादेर्नानुक्रमेणैव ॥ ननु यावत्कपालमित्युक्ते तावत्परिमाण एव पृथुर्भविष्यति नन्यूनाधिकपरिमा ॥४८॥
णस्तत्किमर्थमुच्यते अत्र नतिपृथुमिति ॥ सत्यमुच्यते ॥ कपालपरिमाणे पूर्वसिद्धे तेन पुरोडाशप्रथनपरि ॥भाष्यं॥
माणज्ञापनमुपपद्यते ॥ न च तत्प्राक्सिद्धमत्रानुक्तत्वात् ॥ अतः कपालपरिमाणज्ञानार्थं वैतदनतिपृथुग्रहण
मिति ॥ तेन तावत्परिमाणान्येव कपालानि कुर्यात् तावत्परिमाणेषु यावत्कपालेषु यावत्कपालं विस्तृता

नि

रितः पुरोडाशो लौकिकापूपवन्नातिपृथुर्भवति ॥ अतः षडंगुलत्वं त्वात्कपालचर्यैर्यथा संपद्यते तथा कपा
लपरिमाणं श्रयणीयं ॥ अनेकयजमानके तु अस्य मंत्रस्योहो भवति ॥ उरु ते यज्ञपती प्रथेतामिति द्वियजमान पामा
के ॥ उरु ते यज्ञपतयः प्रथंतामिति बहुयजमानके ॥ चरोस्त्वकार्याभावात्प्रथनाभावः ॥ अत्राधिश्रयणप्रथन
मद्भिरभिमर्शनं चेति त्रयमेकैकस्य कृत्वा परस्परं कर्तव्यं बहुषु हविःषु ॥ अन्यथा सुतप्तेषु कपालेष्वधि
श्रयणात्पिंडः शुष्येत तथा तिं सप्रथमं न संभवति ॥ तेनार्थादेव कर्तव्यं ॥ पुरोडाशांग हस्वधिश्रयणादयः तद
गस्य क्रमः पदार्थानुसमयरूपं तदाश्रयणे च पुरोडाशशोषप्रसंगः ॥ न चांगानुरोधेन प्रधान बाधो
युक्तः ॥ यत्र यत्र तु नास्ति प्रधानबाधो दर्शपूर्णमासादौ द्वित्रिचतुरादिहविःषु तत्र पदार्थानुसमयेनैव
कर्तव्यं ॥ अग्निष्टे इत्यद्भिरभिमृशति सकृत्त्रिर्वा ॥ अग्निष्टे त्वचमित्यनेन मंत्रेण तं पृथुकृतं पुरोडाशं
सकृदेकवारमभिमृशति ॥ सोदकेन हस्तेन सर्वतः स्पृशति प्रथनेन क्रियमाणे यत्र यत्र विदीर्णं भवति त
दद्भिः संदधाति संयोजयतीत्यर्थः ॥ त्रिर्वा वारत्रयं वाभिमृशति न सकृदेव ॥ तमद्भिरभिमृशति सकृत्
त्रिर्वा तद्यदेवास्यात्राबध्नं तो वेत्युक्तत्वात् ॥ तदद्भिः संदधातीति वाक्यशेषात् ॥ अस्मिन्पक्षे सकृन्मंत्रे

॥५०॥
॥देवया०२

णाद्धिस्त्वंहीं॥ एकद्रव्ये कर्मावृत्तौ सकृन्मंत्रवचनमित्युक्तत्वात्॥ पिष्टलेपेनाविद्धारयं स्त्रिः परिमार्ष्टी
तिमानवे॥ त्वंच गृह्णीष्वेत्यद्भिः श्लक्ष्णीकरोत्यनतिद्रावयन्नित्यापस्तंबः॥ एतच्चद्वौ न स्यात्॥ ॥प
र्यग्निकरोत्यंतरितं रक्षोंतरिता अरातय इति सहाज्यं॥ ॥सहाज्यमाज्यसहितं पुरोडाशं अंतरि
तमित्यनेन मंत्रेणोल्मुकेन पर्यग्निकरोति॥ तं पर्यग्निं करोतीति श्रुतेः॥ तमित्येकवचनमविवक्षि
तं॥ उद्देश्यगतत्वात्॥ एवं सर्वेषु संस्कारवाक्येषु ज्ञेयं॥ प्रातिपदिकार्थस्तु विवक्षित एव॥ तेन सान्ना
य्यपर्यग्निकरणाभावः॥ पिष्टलेपापनयनं पात्र्यंगुलिप्रक्षालनं च पर्यग्निकरणात्प्रागेव कर्त्तव्यं
सामर्थ्यात्॥ अन्यथाग्निसंयोगात्कालविलंबाद्वा शोषणे सति प्रतिपत्तिकाले क्षालनमशक्यं
स्यादिति॥ प्रतिपत्तिश्च चोदिता॥ पात्र्यंगुली प्रक्षालं मार्ष्टेभ्यो निनयति पिष्टलेपां जुहोतीति उत्पत्ति
श्चचोदिता॥ अतः सामर्थ्यादुत्पत्तिरवसीयते॥ ॥अत्र काण्वे विशेषः॥ ॥प्रत्युष्टमित्युल्मुके न युग
पत्रिः परिहृत्येति॥ ॥आपस्तंबः॥ अंतरितमिति सर्वाणि हवींषि त्रिः पर्यग्निकृत्येति॥ ॥देवस्त्वेति
श्रपणं॥ ॥पर्यग्निकरणानंतरं देवस्त्वेत्यनेन मंत्रेण पुरोडाशस्य श्रपणं करोति तं श्रपयति देवस्त्वे

॥५०॥
॥भाष्यं॥

तिश्रुतेः॥ ॥मनुः॥ ॥देवस्त्वेत्युल्मुकेनाभितापयति दर्भैस्त्वचं ग्राहयतीति॥ ॥आपस्तंबः॥ ॥देव
स्त्वेत्युल्मुकैः प्रतितपति दर्भै रभिज्वालयति॥ ज्वालैर्वाविदहंतः श्रपयंतेति वाचं विसृजेत आग्नीध्रा
हवींषि सुशृतानि करोतीति॥ ॥लौगाक्षिरपि॥ ॥देवस्त्वेत्यधिश्रित्याग्निष्टइत्यादीप्रेनत्वचं ग्राहयती
ति॥ एतच्च श्रपणं सामर्थ्याच्चरोरधस्तादुल्मुकप्रेरणेन कर्त्तव्यं॥ धानानां च॥ पुरोडाशस्य तूपरीति॥
॥ ॥माभेरित्यालभते॥ ॥तौ पुरोडाशौ माभेरित्यनेनालभते प्रत्येकं॥ सोभिमृशति मा भेरिति श्रु
तेः॥ अभिमर्शनं च शृताशृत ज्ञानार्थं॥ तमभिमृशति शृतं वेदानीति वाक्यशेषात्॥ अतश्चरा
दावपि प्रवर्त्तते॥ धानासु च माभेष्ट मा संविग्ध्वमित्येव मूहः॥ अधिश्रयणमंत्रे घर्मास्य विश्वा
युष इति॥ ॥अंतमेरुरिति शृतौ भिवासयति भस्मना वेदेनोपवेषेण वा॥ ॥शृतौ पुरोडाशावंतमे
रुरित्यनेन मंत्रेण वेदेनोपवेषेण वा करणभूतेन भस्मनाभिवासयति भस्मना आच्छादयतीत्यर्थ
॥ यदा शृतौ अभिवासयतीति श्रुतेः॥ अशृतयोः पुनः श्रपणप्रदानार्थं शृतग्रहणं शृतावितिद्विवच
न निर्देशः प्रदर्शनार्थः॥ यथेह यदा शृतावभिवासयतीत्येकत्वयुक्तमभिवासनमुभयोरुक्तमेवाधि

॥५९॥
॥देवया०२

अयणमथनस्य स्नानपर्यग्निकरणान्यथेकत्वयुक्तानुभयोरपि पुरोडाशयोर्भवंती तिंउंद्देशगते कत्वसंख्या
या अविवक्षितत्वादिति विरोधात्त्रावनिवासनस्याभावः यजमानयोः प्रजायजमानानांप्रजेति पथायथम
नेकयजमानकेऊहः॥ अत्राहापस्तंबः॥ वेदेन पुरोडाशे सांगारं भस्माधूहतीति सांगारेण भस्मनात्र
छाद्येतिकाठके॥ पात्र्यंगुलिप्रक्षालनमाप्येभ्यो निनयत्यभितप्य प्रत्यंस ॐस्यांदमानंत्रितायत्वेति प्रतिमं
त्रं॥ त्रितायत्वेति प्रतिमंत्रं पात्र्यंगुलिप्रक्षालनमिति पिष्टलिप्तपात्रीप्रक्षालनं पिष्टलिप्तांगुलिप्रक्षालनं
चाभितप्य पात्रीस्थमेवज्वलतोल्मुकेनतापयित्वा प्रत्यक्संस्थमसंस्पंदमानं परस्परंसंगतिमप्राप्नुवदाप्येभ्यो
देवताभूतेभ्यो निनयति॥ अथ पात्रीनिर्णेजनमंगुलिप्रणेजनमाप्येभ्यो निनयति तद्यदाप्येभ्यो निनयति त
दभितपति तथैव ॐ स्तंभवतिस निनयति त्रितायत्वेत्यादिश्रवणात्॥ नानानानिनयतीति नानापृथक्‌प
रस्परमस्पृशदित्यर्थः आप्यग्रहणं यागदेवताज्ञापनार्थं आप्येभ्य इति चतुर्थ्या आम्नानामंत्रदेवतात्वाव
गमात्॥ न तस्मात्राप्यानुद्दिश्य त्यागः कार्यः अतश्चास्विष्टकृद्वदुभयरूपमेतत्कर्मप्रतिपत्तिरूपमपूर्वोत्पादकं
च॥ तेनद्रव्यविनाशेपि स्विष्टकृद्वद्देवद्रव्यांतरेणापि निनयनं कर्तव्यं अपरे तु द्रव्यप्रधानत्वात्तद्विनाशेनोत्प

कृतः॥
ग
॥५९॥
॥भाष्यं॥

त्रितादयोपि देवतांतरं॥६

त्रिमिछंति॥ अत्राहापस्तंबः॥ अंगुलिप्रक्षालनं पात्रीनिर्णेजनं चोल्मुकेनाभितप्य स्फ्येनांतर्वेदि तिस्रो लेखाः
लिखति प्राचीः उदीचीर्वा तासु संस्पंदयन् स्त्रिर्निनयति प्रत्यगपवर्गमेकतायस्वाहेत्येतैः प्रतिमंत्रं निनीय वाभि
तपेदिति॥ मनुः॥ पूर्वार्द्धे वेद्या वितृतीयमात्रे प्रागुदीचीस्फ्येन तिस्रो लेखा लिखति एकतायस्वाहा द्वितायस्वाहा त्रितायस्वा
हेत्येतैरसंस्पंदयंल्लेखासु पिष्टलेपं निनयतीति॥ तिस्त्रिरीसूत्रे॥ अथैतत्पात्रीसंक्षालनं गार्हपत्यादंगारेणाभि
तप्य हुत्वांतर्वेदि प्रतीचीनं तिसृषु लेखासु निनयतीति॥ आप्येभ्य इत्युच्यमाने माभूत्कस्यचिदाशंका यथा आ
प्या अपि देवतांतरं अयपुनराप्येभ्यस्त्रितायत्वेति प्रतिमंत्रं निनयतीत्युक्ते सत्येवं ज्ञायते यएते त्रितादयस्तएवा
प्याः यस्मात्स्यास्त एव त्रितादय इति॥ तथाच श्रूयते ततआप्याः सबभूवुस्त्रितो द्वितएकतइति॥ अतोवि
शेष्यविशेषणभावेनोभयोस्त्यागे प्रयोगः कार्यः इदं त्रितायाप्याय इदं द्वितायाप्याय इदमेकतायाप्याये
ति॥ अन्वाहार्यं दक्षिणाग्नावधिश्रयति॥ ततोध्वर्युरन्वाहार्यसंज्ञकं दक्षिणार्थं तंदुलरूपं दक्षिणाग्नावधि
श्रियति अन्वाहार्य इति दक्षिणार्थस्यौदनस्य संज्ञा तद्यदेतद्दीनं यज्ञस्यान्वाहरति तस्मादन्वाहार्यो नाम
ति श्रुतेः ततो देवा एतां दर्शपूर्णमासयोर्दक्षिणामकल्पयन्यदन्वाहार्यं नेददक्षिणं ॐ हविरसदिति श्रुते

ति
श्र

म

श्च ॥ अत्राप्यापस्तंबेविशेषः दक्षिणाग्नावन्वाहार्यं महांतं परिमितमोदनं पचति क्षीरे भवतीत्येक इति ॥ ॥ काठ

॥५२॥ ॥देवय्या०२

केच ॥ ॥ अन्वाहार्यमोदनं दक्षिणाग्नौ श्रृतं महांतपरिमितिं ति ॥ ॥ मानवेप्येवमेवास्ति ॥ ॥ अतश्चतुर्णामृत्विजां त

तमि

भ्रियावता संभाव्यते तत्परिमाणं नतोधिकं वाऽन्वाहार्यमोदनं कुर्यात् ॥ ॥ अत्रवाव्रतोपायनं ॥ ॥ अत्रास्मिन्काले

वाव्रतोपायनं व्रतग्रहणं कर्त्तव्यं शाखांतरात् ॥ ॥ ५ ॥ ॥ अपरेणाहवनीयं वेदिं खनति ॥ ॥ खनति रत्र करोत्यर्थः ॥ अ

हवनीयमपरेण वेदिं करोति ॥ अग्निं पुरस्तात्समाधायेत्युक्तत्वात् ॥ अपरेण हवनीयमित्युक्ते खनतीति प्रस्कृत

सा

त दाह ॥ ॥ अंगुलखातां ॥ त्र्यंगुलं त्र्यंगुलपरिमाणं खातमस्याः सा त्र्यंगुलखाता तां त्र्यंगुलखातां वेदिं करो

ति ॥ अथ वेदिं परिमाणमाह ॥ व्याममात्रीपश्चात् ॥ पश्चादिति अपरस्यां दिशि तिर्यक् प्रमाणेन व्याममात्रीं व्यामप्र

माणां कुर्यात् ॥ व्याममात्री पश्चात्स्यादित्याकुरितिश्रुतेः ॥ चतुर्भिरत्निभिर्व्यामो भवति ॥ त्र्यरत्निं प्राची ॥ त्रयोऽ

॥५२॥ ॥भाष्यं॥

र त्नयः प्रमाणमस्याः सा त्र्यरत्निः तां त्र्यरत्निं ॥ अरत्नित्रय प्रमाणां प्राचीं पूर्वापरायतां दीर्घां वेदिं कुर्यात् ॥ त्र्यर

त्निः प्राचीतिश्रुतेः ॥ पुरस्तात्तिर्यक् प्रमाणमप्यरत्नित्रयात्मकमेव क्वचिद्दर्शनाच्चत्र यः पुरस्तादिति ॥ सावैपश्चा

द्वरीयसीस्यान्मध्ये सं ह्वारिता पुनः पुरस्ताद्उर्वीति श्रुतेश्च ॥ अपरिमितां वा ॥ अथवा अपरमितां वेदिं कुर्यात् ॥

२

नपरिमितात्रपरिमिता तां अपरिमितां ॥ तेन पूर्वोक्तप्रमाणान्न्यूनप्रमाणां वा ॥ अधिकप्रमाणां वा कुर्यात् इत्य

र्थः ॥ नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यादिति श्रुतेः ॥ अत्र वेद्याः परिमाणं नास्त्ये

व यावती यत्परिमाणविशिष्टामेव वेदिं स्वयं मनसा हविरासादनादिकार्यपर्याप्तामन्येत तत्परिमाण

विशिष्टां वेदिं तिश्रुत्यर्थः ॥ व्याममात्री त्वादरयमर्थः ॥ पश्चिमपार्श्वे च तिर्यक् प्रमाणमेतत्तद्रष्टव्यं ॥ व्याममा

त्री तित्र्यरत्निः प्राचीदैर्घ्यमेतत् ॥ पूर्वपार्श्वे तिर्यक्प्रमाणं नोक्तं ॥ तदेवमिव हि येषां प्रशंसतीति वचना

द्व्याम एव मानादूनइति कल्पनीयं ॥ नात्र मात्रास्तीति पूर्वमान प्रतिषेधो विकल्पार्थः ॥ ननु विनैव विधि

धा

प्रतिषेधाभ्यां अनियमप्राप्नोतीति नियमकारिणो विधिप्रतिषेधावनर्थकौ स्यातां ॥ नैष दोषः ॥ विधिना

विना व्यामादिमानद्रव्येणमातव्येत्ययमर्थो न सिध्यति ॥ प्रतिषेधेनापि विना तद्रहितानसिध्यति ॥ तत

श्च षोडशिनिग्रहणाग्रहणवदयंव्यामादिमानद्रव्यस्य विकल्पो द्रष्टव्यः ॥ व्यामादिमानपक्षस्यैव विहित

त्वात्तेदंगीकरणेंगुलविशेषफलं विशेषो द्रष्टव्यः ॥ सावैपश्चादिति ॥ वरीयसीउत्तरा संह्वारिता ह्वाकौटि

त

ल्ये संकुटिता संकुचितेत्यर्थः ॥ पुरस्तादुर्वी मध्यापेक्षया ॥ तस्यानंतरस्यापेक्षया प्रयुक्तत्वात् ॥ वरीयसी

त्ययमुरुत्वस्य प्रकर्षः उरुत्वं च पुरस्तादुर्वीत्येतत् ॥ ततश्च मध्यापेक्षायापुरस्तादुर्वी ॥ ततोपि पश्चादुरुत्तरा ॥

॥५३॥
॥देवया०२

किमर्थं पुनरिदमुच्यते नियमार्थं ॥ व्यामाद्यनियमे तावद्बहुत्वमेव व्यामादिनियमपक्षेऽपि अश्वात्परिमाणमुक्तं स्यात् ॥
प्राक्परिमाणाच्चयत्र मध्यस्य संकारितत्वं तदपह्रुत्या चारुत्वमेतत् प्राप्तमेवंविधेयं पृथ्व्या श्रोण्या ॥ अस्याः पृथुश्रो-
णिः ॥ विमृष्टांतरांसेति श्रोणिनोर्विमृष्टं न्यूनमंतरं अवकाशो ययोस्तौ विमृष्टांतरौ ॥ तथाविधांसौ यस्याः
सा तथोक्ता ॥ संग्राह्येति मध्यदेशे हस्तेन गृहीतुं शक्या कृशोदरीति यावत् ॥ एवंभूतां प्रशस्तां योषितो-
कारां वेदिं कुर्वन् देवेभ्यः प्रियां करोतीति ॥ अस्मिन्नस्तु ग्रंथे द्वावेवापरिमितशब्दौ श्रुतौ वाक्यानुसरणाद्
परिमाणवाचिनो ॥ अपरितां अपरिमितं ष्टकावेति च ॥ अत्यन्त्यपरिमितं प्रमाणाद्भूय इत्युक्तत्वात् तत्पूर्वोक्तं
परिमाणदतिशयेनाधिकपरिमाणवाचकाइति ॥ अपरिमितपक्षेऽपि सा वेदिः पश्चाद्गरीयसी स्यादित्यादत्तुसा-
रेणैच्छिकमानं भवत्येव ॥ अपरिच्छिन्नदेशखननस्तरणादेः कर्तुमशक्यत्वात् ॥ ॥ प्राक्प्रवणामुदक्प्रवणां ॥
प्रवंते स्मिन्नापो नेनवेति प्रवणं नीचं ॥ प्रवन्ते वाव नमुदकमस्मिन्निति तदेव निम्नं ॥ प्राक्प्राच्यां दिशि प्रवणं
निम्नं नीचमस्याः सा प्राक्प्रवणा तां प्राक्प्रवणां वेदिं कुर्यात् ॥ उदक्प्रवणां वेति सा वै प्राक्प्रवणा स्यादि-
ति ॥ अथो उदक्प्रवणेति श्रुतेः ॥ ॥ मध्यसंगृहीतां ॥ मध्ये संगृहीता संकुचिता मध्ये संगृहीता ॥
तां ॥ एवंविधां मध्यप्रदेशे संकुचितां वेदिं कुर्यादित्यर्थः ॥ मध्ये संकारितेति श्रुतेः ॥ संग्रहसाधन-

सा

॥५२॥ शि
॥भाष्यं

वा

प्रकारस्त्वपरिशिष्टेउक्तः ॥ आनीय रज्जुं पृथ्वीं द्वित्यश्वांइ यावदेवत् ॥ द्विगुणीकृत्य ततो रज्जुमंते तस्यास्तु शंकुको
॥ भ्रामयेत्तेन मानेन तत्याः रज्ज्वाष्टभागया ॥ वा पृथुत्वतुरीयेण भागेनास्त्रिरव्य संग्रहाविति ॥ क्वचित्तु द्विरश्रो-
ण्य सयोर्मध्ये तयाः रज्ज्वाष्टभागयेति पाठः ॥ ॥ अग्निमभितोऽंसौ ॥ ॥ अस्या वेदेरंसौ अग्न्ये शानकोणे अग्नि-
माहवनीयमभितः तडभयतो भवतः ॥ अभितोऽग्निमंसावुन्नयतीति श्रुतेः ॥ आहवनीयस्य दक्षिणोत्तर-
पार्श्वयोर्वेद्यंसावुन्नयति ऊर्ध्वं प्रापयतीति ॥ अंसयोर्मध्ये आहवनीयो भवतीत्यर्थः ॥ अतोंऽसावपि द्वे एवावय-
वौ श्रोणिवत् ॥ अंतश्च तयोरपि खननस्तरणादयो वेदिसंबंधाः संस्काराः वर्त्तंते ॥ सूत्रकारोऽप्यपोह्य बर्हिरं-
सदेशे प्राशित्रं निदधातीति ब्रुवन् अंसयोरपि बर्हिस्तरणं सिद्धं दर्शयति ॥ ॥ अत्रायं साधनोपायः ॥ ॥ ष-
डरत्निरज्जुं मित्वा द्वितीयरत्न्यन्ते लक्षणं श्रोण्यंकनार्थं ॥ ततो रत्नेश्चतुर्थे भागे लक्षणमाकर्षणार्थं ॥ तृतीय-
रत्न्यन्ते प्राच्यंतांकनार्थं ॥ ततश्चतुर्भागेनारत्न्यं संकर्षणार्थं ॥ ततश्चतुर्भागेन अंसांकनार्थं ॥ ततःसा-
र्धेरत्नौ पाशः इति अन्ययेच पाशौ विपर्यासेन साधनोपायः ॥ विपर्यासपक्षे तु षडरत्निरज्जुमुभयतः पाशौ
कृत्वा प्रथमं सार्धारत्न्यंते अंसांकनार्थं ॥ ततो धारत्नौ [illegible] श्रो-
ण्यंकनार्थं ॥ ततो रत्नेश्चतुर्थभागे आकर्षणार्थं ॥ अरत्नित्रये च प्राच्यंतांकनार्थमिति ॥ अपरिमितपक्षाश्रयणे

आ
च
प्र
आ

॥१५४॥
॥देव या॰२

च प्राचीप्रमाणं पुरस्तात्तिर्यक्प्रमाणं चतुर्थं पश्चात्तिर्यक्प्रमाणं च प्राचीप्रमाणतृतीयभागेनाधिकमि
तियुक्तप्रकल्पनीयं ॥ तत्र प्राचीप्रमाणं रज्जुं द्विगुणां कृत्वा रज्जोर्मूलात्पुरस्तात्तिर्यक्प्रमाणस्यार्धं मूळ
रज्ज्वोश्चांतिमचतुर्थभागस्य दोरन्याकर्षणं यथे दक्षिणमिति ॥ अथ खननप्रमाणे पक्षांतरमाह ॥ आ
मूलोच्छेदनादोषधीनां ॥ प्राक्प्रवणमुदक्प्रवणं वा स्मात्स्तृत्वा न्यंगुलं कृत्वा तिन्त्ययेन वा शष्पेत्राणुवर्तते अ
ध्याद्भिर्यतेत वा ॥ अथवा आओषधीनां मूलोच्छेदनाद्वेदिं खनति ॥ त्र्यंगुलं वा ॥ अस्मिन्पक्षे विशेषमाह ॥ ओष
धीनां मूलान्युच्छेत्तवै ब्रूयात ॥ अध्वर्युरग्नीधं प्रत्योषधीनां मूलान्युच्छेत्तवा इतीमं प्रैषं ब्रूयात ॥ स च प्रैषितस्त्वो
षधीमूलोच्छेदपर्यंतं निम्नां वेदिं खनति ॥ तस्मात्र्यंगुला वेदिः स्यादिति ॥ त्र्यंगुलखननं विधाय ॥ तदु तथा न कुर्यादो
म्लो षधीनां वै सन्मूलान्युपाश्रांच तस्मादोषधीनामेव मूलान्युच्छेत्तवै ब्रूयादिति श्रुतेः ॥ मूलानि च भूमिमध्ये दूरमपि या
वत्प्रसरंति तावत्पर्यंतं वेदेः खननं कर्तव्यं ॥ अतस्त्र्यंगुलखातमूलोच्छेदनयोर्विकल्पः ॥ प्रैषश्च मूलोच्छेदनपर्यंतं ॥१५४॥
खननेपक्षेऽप्येवं तत्रैव श्रवणात ॥ अत्रौषधीमूलोच्छेदावधिखननं परिमाणोपलक्षणार्थः ॥ तेन दर्शपूर्णमासयो ॥काण्व्या॥
वपि यावति खाते मूलोच्छेदनं संभाव्यते तावत्खनितव्यं ॥ अत्राहापस्तंबः ॥ स्फ्योनोत्तमात्प्रदेशाद्धरति तथा खन
ति द्व्यंगुलं त्र्यंगुलं चतुरंगुलं यावत्पार्ष्णियाः ॥ शुल्बे तावती पृथुमात्री रथवर्त्ममात्री सीतामात्री प्रांशमात्री वा पु

उ६१ मवेदेरुत्तरतो वित्ततीयेपरि समुह्य नोपसा ९

रीषवतीं नेतामात्राच्चातिखनति दक्षिणतो वर्षीयसीं प्राक्प्रवणां वक्प्रवणां वेति ॥ आहार्यपुरीषां पशुकाम
स्य ॥ पशुकामस्य यजमानस्याहार्यपुरीषां वेदिं कुर्यात ॥ आहार्यमन्यस्मात्प्रदेशादाहरणीयं पुरीषं य
स्याः सा तथा ॥ ततश्च प्रागनुमार्जनाद्वेदेः स[illegible]काशाद्वेदिपुरीषमपसार्यान्यः पुरीषमानीय वेदिमध्ये प्र प
क्षेपणीयं ॥ एतच्च पुरुषार्थं प्रणयनेकांस्यादिवत ॥ अतश्च विकृतो न भवति ॥ निष्कामेनापि वेदिः पुरीषवत्येव कार्या व
पु वेदिपुरीषं तत्रैव तिष्ठति ॥ न ततो निष्कास्यते वचनाभावात ॥ तथा च श्रूयते ॥ पुरीषवतीं कुर्वीतेति खाता वेदिर्नाद्भिः
श्लक्ष्णीकरणीया किंतु पांसुलैव कार्येत्यर्थः ॥ आपस्तंबः ॥ प्रांचौ वेद्यंसावुन्नयति प्रतीची श्रोणी पुरस्ताद्ंहीयसी पश्चात्प्रथी थ्वी
यसी मध्ये संनतरा भवति ॥ यन्मूलमतिशेते स्फ्येन तच्छिनत्ति न नखेन यत्पुरीषमतिशेते तदुत्करे तं निर्वपत्याहार्यपुरी प
षां पशुकामस्य कुर्यादिति ॥ वेदिं परिसमुह्य वित्ततीये न्निदुत्तरे उत्करं करोति ॥ अन्वाहार्याधिश्रयणानंतरं प्रथमं
वेदिमानमध्वर्युः करोति ॥ यथोक्तं ॥ ततोऽग्नीध्रो वेदिं परिसमुह्योत्तरां वेदिमध्यपतितं तृणपुरीषादिकं अपसारितस्य
तृणपुरीषादेरुत्करे राशिं करोति ॥ उत्कीर्यत इत्युत्करः ॥ वितृतीयं च वेदेः प्रकृतत्वाद्वेदीयमेव ॥ गार्हपत्याहवनीयांत
रालं वितृतीयं च शुल्बकृतोक्तं ॥ गार्हपत्याहवनीययोरंतरं षोढा समं धा वा गं तु सम्मं त्रेधा विभज्याप रवितृता [illegible]

॥५५॥
॥देवया०२

[illegible] यलक्ष्णेनेन दक्षिणायास्तस्मि
न्नग्निर्विपर्यस्योत्तर तउत्कर इत्येकः प्रकारः ॥ अपि वांतरत्रिभागोनया रज्ज्वा पूर्वार्द्धे [illegible] सम चतुरस्रं कृत्वा श्रोण्यामग्निर्विप
र्यस्योत्तरांसे उत्कर इति ॥ विपर्यासश्चैवं पूर्वोक्तवित्तीयलक्षणेनोत्तरतश्चायम्येति प्रथमे प्रकारे गार्हपत्याहवनीययोरंतरत्रि
भागोनया रज्ज्वापरार्द्धे समचतुरस्रं कृत्वा तस्य चतुरस्रस्योत्तरां [illegible] से उत्कर इति द्वितीयः प्रकारः ॥ आपस्तंबः वे
धान देवस्य सवितरित्युत्तरतः पुरस्ताद्वित्तीये वेदेरुदग्द्विपदे परिमिते वा वेदेर्निवपति स उत्कर इति ॥ ॥ लौगाक्षिः ॥ ॥ उ
त्वोत्तरतो निवपति स उत्कर इति ॥ ॥ मानवे ॥ ॥ उत्तरतो लेखनामाग्नीध्रः प्रक्रममात्रे उत्करे पाणिकोष्ठं कृत्वोपविशतीति ॥
लेखास्थानं चैतेनैव प्रागुदक्त्वं पूर्वार्द्धे वेद्यावित्तीयमात्रे प्रागुदीचीः स्फ्येन तिस्रो लेखा लिखतीति वित्तीयं च सा मध्या
द्वेदेर्याह्यं ॥ तच्च पूर्ववित्तीयपरिशिष्टकारवचनात् ॥ आचार्याभिप्रायाच्च ॥ वात्वा लोत्करांते रत्नसंचर इति ॥ संनिहि
तो हि त्वास्योत्करः पूर्ववित्तीये भवतीति कर्कः ॥ ॥ देवस्य त्वेति स्फ्यमादाय सतृणं सव्ये कृत्वा दक्षिणेनालभ्यज
पतीन्द्रस्य बाहुरिति ॥ ॥ ततोध्वर्युर्देवस्य त्वा आददेध्वरकृतमिति मंत्रेण सतृणं स्फ्यमादाय सव्ये पाणौ कृत्वा दक्षिणेन
पाणिना तमेव सव्यहस्तस्थितं सतृणं स्फ्यमालभ्य स्फ्यस्थाद इन्द्रस्य बाहुरित्यमुं मंत्रं जपति संहितास्वरेण ॥ सतृणमि

॥५५॥
॥श्रौत्रं॥
स्फ्य

त्युक्तत्वात्तृणस्य सहत्वमात्रं ॥ आदानं तु स्फ्यस्यैव ॥ प्रयोजनं तृणादानं विस्मरणे तूष्णीमेव तृणादानं ॥ सव्यस्फ्यमादत्ते देवस्य
त्वेति तं सव्ये पाणौ कृत्वा दक्षिणेनाभिमृश्य जपतीति च श्रुतत्वात् ॥ संश्यतीति शोतनूकरणे ॥ तीक्ष्णीकरोतीत्यर्थः ॥ जप
प्रयोजनं तनूकरणसंस्कारः ॥ तदर्थं दक्षिणाभिमर्शश्च ॥ ततश्च तदर्थमनुकारः कर्त्तव्यः ॥ संश्यतीति प्रत्यक्षनिर्देशादिति
हरिस्वामिनः ॥ पितृयज्ञे च आददे अध्वरकृतं देवपितृभ्य इत्यूहः ॥ स्मृतितः प्रागेपि दक्षिणाग्रहणं सव्यहस्तस्फ्यस्यैवालंभनवि
धानार्थं ॥ अन्यथा भूमौ निधाय याथालंभं प्राप्नोति ॥ तदेवतद्ध्यजादानं स्तंबयजुर्हरणार्थं ॥ अतश्च तदभावे भावः ॥ ॥ नोपस्पृशे
त्पृथिव्यात्मानोतेन स्तंबयजुर्हरिष्यन् ॥ ॥ स्तंबयजुर्हरिष्यन् स्तंबयजुर्हरणात्प्राक् तेनाभिमृष्टेन वज्रेण पृथिव्यात्मा
नं चनोपस्पृशेत् ॥ तेन संशितेन नात्मानमुपस्पृशन्न पृथिवीमिति श्रुतेः ॥ ॥ वेद्यां तृणं निदधातु पृथिव्यै वर्मा
सीति ॥ ॥ तदानंतरं तृणं वेद्यां वेदिमध्ये उदगग्रं निदधाति पृथिव्यै वर्मासीत्यनेन मंत्रेण ॥ उदगिति नियमः श्रौतः ॥ प्राक्
कं प्राक्त्वनिवृत्त्यर्थः ॥ ततश्च उत्कापचारे श्रोतेभुवइति प्रायश्चित्तं भवति ॥ ॥ पृथिवीदेवयजनीति तृणे तर्हिते प्रह
रति ॥ पृथिविदेवयजनीत्यनेन मंत्रेणाध्वर्युस्तृणे तर्हिते भूप्रदेशे तृणस्याधस्ताद्भूमौ स्फ्येन प्रहरति ॥ अथ तृणमंतर्द्धाय
प्रहरति स प्रहरति पृथिवीत्यादिश्रुतेः ॥ तृणमंतर्द्धीयतस्योपरि प्रहर्त्तव्यमिति माधवाचार्याः ॥ पितृभूत्याचार्यास्त्वपिं त

देवया० २
।।५६।।

र्हितेतृणेप्रहरतीत्येवमेवव्याख्यातवंतः ।। कर्काचार्यास्तुप्रहरणंचवेद्यांनतृणे ।। अंतर्हितेइतिसूत्रितत्वात् इतर
थाहितृणेप्रहरतीत्येवमवक्ष्यत् ।। अथपुनरंतर्द्धायवचनात्तदर्थमेवतृणस्य ।। नप्रहरणाधिकरणता ।। तृणेएवप्रहर
णमितिसंप्रदायइति ।। अत्राहापस्तंबः ।। पुरस्तात्स्तंबयजुषोवेदेनवेदिंत्रिःसंमार्ष्टिपरिगृह्णाति पूर्वार्द्धाद्वेदेर्वितृतीयदे
शात्स्तंबयजुर्हरतिपृथिव्यैवर्मासीति ।। तत्रोदगग्रंप्रागग्रंवादर्भंनिधायपृथिवीदेवयजनीतिस्फ्येनप्रहृत्याहपहतोररुः
पृथिव्याइतिस्फ्येनसतृणंन्यास्तनपादायव्रजंगच्छेतिहरतीति ।। एवमेवसर्वेषुशाखांतरसूत्रेषु ।। पितृयज्ञेपृथिवि
देवपितृयजनीत्यूहः ।। अंगप्रधानार्थत्वाद्वेदेः ।। पृथिवीशब्दोत्रवेदिवाचकः ।। तत्संस्काराभिप्रवृत्तेः ।। व्रजंगच्छेतिपु
रीषमादत्ते ।। अत्रस्फ्येनप्रहारकृतः तस्माद्वेदिस्थानात्स्फ्येनोत्खातंपुरीषमुत्खातात्पांसूनादत्तेहस्तेनगृह्णाति
व्रजंगच्छेतिमंत्रेण ।। वर्षतुतइतिवेदिंप्रेक्षते ।। वर्षतुतइत्यनेनमंत्रेणाध्वर्युर्वेदिंप्रेक्षतेयतःस्थानात्पुरीषंगृहीतंतमेववे
दिप्रदेशंविलोकयति ।। बधानेत्युत्करेकरोति ।। तदेवहस्तगृहीतंपुरीषंबधानेत्यनेनमंत्रेणोत्करेकरोति उत्करस्योपरि
प्रक्षिपति ।। प्रहरणशेषोवाविशेषोपदेशात् ।। प्रक्षिप्यतेनेनमंत्रेणेतिप्रहरणमंत्रान्प्रहरणशब्देनात्राभिधीयते ।। व्रजंगच्छेत्यादिमा
मोगित्यंतोमंत्रःप्रहरणमंत्रस्यपृथिवीदेवयजनीत्यस्यैवशेषोभवति ।। कुतः ।। अविशेषोपदेशात् ।। अविशेषेणप्रहरणेएवोपदिश्यते यतःसप्रहर

।।५६।।
भाष्य

६ पुरीषादानादीनांदार्थाःसमंत्रकान्दर्शयति ५ अन्यथाअपाररुमिति द्वि

विधो २ विशेष्प २

तिपृथिवीत्यादिना ।। अथावाएवंयोजना ।। अविशेषोपदेशात् ।। व्रजंगच्छेत्यनेनपुरीषमादत्ते ।। वर्षतुतइत्यनेनवेदिंप्रेक्ष
ते ।। बधानेत्यनेनपांसूनुत्करेकरोतीत्येवंविशेषोपदेशो विधानेशतपथेनास्ति ।। केवलंसप्रहरातिपृथिवीत्येवमे
वसर्वोपिप्रहरणमुपक्रमपठितोस्ति ।। अतएवंज्ञायतेप्रहरणमंत्रस्यैवायंशेषइति ।। अपरेत्वेवमाहुः ।। यद्यपि
शतपथेविशेषोपदेशोनास्तितथापिशाखांतरेविशेषोपदेशोऽविशेषस्यचविशेषपरतेवन्यायात्तस्माद्भेदेनेवा स्ति
विशेषःपुरीषादानादीयथोक्तोविनियोगः ।। ।। अपाररुमितिद्वितीयंप्रहरणं दि ।। अपाररुमित्यादिभिर्मंत्रैःप्रहरणादिप्रहर
णादारभ्यपुरीषस्योत्करणांतंद्वितीयंकर्मभवति ।। अत्रादिग्रहणादेवमवक्ष्यत् ।। अथद्वितीयंप्रहरत्यपाररुमिति
कृतत्वात् ।। अपाररुमररोऽत्रासुरेइतिकात्यायनवचनादासुरोयंमंत्रः ।। तथाचश्रूयतेअररुर्हवैनामासुररक्ष
समासेतितत्रश्चोच्चारणानंतरं अपउपस्पृशेत् ।। पितृयज्ञेचदेवपितृयजनादित्येवमूहः ।। अग्निन्यस्यत्यग्नीद
त्वाररोदिवमिति ।। ततोऽग्नीदररोदिवमितिमंत्रेणोत्करमभिन्यस्यति ।। अभिनिदधातिपाणिभ्यामुत्करस्योपि
धानंकरोति ।। उत्कराभिमुखोहस्तौनिदधातीत्यर्थः ।। तमग्नीदभिनिदधात्यररोदिवमितिश्रुतेः ।। अभिधानंच
द्वाभ्यामेवहस्ताभ्यांभवति ।। नैकेनहस्तेन ।। प्रस्तरणमंतरेमभिनिदधातीतिविदधात्याहाभिनिहितएवसव्येन

न प यं ति यतः

प पा

…प्रहरणं ६

१ रास्त ते १

१ दक्षिणं दधातीति संनिधानमेव श्रुतत्वात्॥ ततो हस्ताभ्यां हस्ताभ्यामुत्करस्यावबाधनं नीचैराक्रमणं कर्तव्यं तथा १

॥५७॥
॥देवया० २

पाणिना भवत्यथ दक्षिणेन जुहूं प्रतिगृह्णातीति॥ अत्रैव क्रमेणैव पूर्वमभिनिहितमेव दर्शयति॥ इहापि वतम ग्नीं चापस्तं बः॥ अररुस्ते दिवं मा स्कानिति॥ न्युप्तमाग्नीध्रोंजलिनाभिगृह्णात्येवं द्वितीयं च हरति च तुर्थं हस्त्ये वेदं भेशेषं हरतीति॥ इदमस्या सुरा यजु॥ अपाररुमररो आसुरे इत्युक्तत्वात्॥ अत तदंकेस स्पर्शनं भवति॥ इष्मस्त इति तृतीयं प्रहरणादीत्यनुवर्त्तते॥ इष्मस्ते घ्रामित्यादिभिर्मंत्रैः तृतीयप्रहरणादि उत्करे निवपनांतं कर्मभवति॥ अथ तृतीयं प्रहरतिरूपमस्त इतिश्रुतत्वात्॥ तूष्णीं चतुर्थं सतृणं॥ चतुर्थप्रहरणांतं कर्म तूष्णीं भवति इयांस्तु विशेषः सतृणं उदृष्टि हि तेन तृणेन सहितं पुरीषं उत्करे करोति॥ तूष्णीं चतुर्थमिति श्रुतेः सतृणमिति शाखांतरात्॥ पूर्वपरिग्रहं परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्च स्फ्येन गायत्रेणेति प्रतिमंत्रं॥ ततो ध्वर्युर्ब्रह्मन्पूर्वं परिग्रहं परिग्रहीष्यामीति॥ एवं ब्रह्माणमामंत्र्योपरिग्रहाणेतिते नानुज्ञातः स्फ्येन करणभूतेन क्रमेण दक्षिणः पश्चादुत्तरभस्त्वे वेदिं परिगृह्णाति॥ परिसमंतात्स्फ्येन रेखाकरणादिइयती वेदिरिति ज्ञापनार्थं परिगृह्णाति॥ तथा च लोगाक्षिः॥ स्फ्येन वेदिं परिगृह्णातियावतीं कृषिष्यन्निति॥ पूर्वपरिग्रहमित्यस्य कर्मणः संज्ञा संव्यवहारार्था॥ पूर्वेण परिग्रहेण परिगृह्येत्यादौ॥ गायत्रेणत्वा छंदसेति प्रतिमंत्रं॥ एकैकेन मंत्रेणैकैकस्मिन्पार्श्वे परिगृह्णातीत्यर्थः॥ तेन गायत्रेणेति दक्षिणतो

सर्वांगं स्तंभ्य रक्षे त्वा यं

॥५७॥
॥भाष्यं॥

दक्षिणपार्श्वे नैर्ऋतकोणादारभ्य पुरस्तादुदक्दिमध्यं यावत्॥ स्फ्येन लेखां करोति॥ ततस्त्रैष्टुभेनेति पश्चादपरपार्श्वे दक्षिणश्रोणीत आरभ्य उत्तरश्रोणिपर्यंतं॥ ततो जागतेनेत्युत्तरश्रोणेरारभ्योत्तरउत्तरपार्श्वे वेदिं परिगृह्णाति पुरस्तादुदिमध्यं यावत् सर्वैस्त्रिः पूर्वपरिग्रहं ति परिगृह्णा॥ तथा गायत्रेण त्वा छंदसा परिगृह्णामीति दक्षिणत इत्यादि श्रवणात्॥ छंदोभिरभितः पर्यगृह्णन्निति त्रिभितः समंतात्॥ तथा पित्रिषु दिक्षु इति द्रष्टव्या॥ अग्निं पुरस्तान्समाधायेति वचनादिति हरिस्वामिनः॥ तेनां सपर्यंतं आहवनीयखस्थिरपर्यंतं वा परिग्रहणं कार्य॥ वेद्यां त्रिरूहत्रिस्त्वाह्वहरत्रिरिति॥ वेद्यां वेदिमध्ये त्रिरुद्धिं स्फ्येन तिस्रो रेखाः प्राचीउदक्संस्था उदीचीर्वा प्राक्संस्थाः कृत्वाग्नीधं प्रत्यध्वर्युराह ब्रवीति हरत्रिरित्येवं॥ हृत्वाग्नीह्लेखाः रौति॥ अग्निदेवं प्रेषितन सम्नृतान्यो लेखाभ्यः पांसून्त्रिर्हृत्वा उत्करे प्रक्षिप्यतदनंतरं लेखांसंमृशति संमर्शनेन समीकरोति॥ पितृयज्ञाग्निचित्ययोः॥ एतदुक्तं लेखाकरणं हरत्रिरिति प्रेषोग्नीध्रस्त्रिहरणं संमर्शनं च पितृयज्ञाग्निचित्ययोरेव भवति॥ तत्रैव श्रुतत्वात्॥ न दर्शपूर्णमासयोः कृतः॥ अश्रुतत्वादिति तथाहि पितृयज्ञे तावत् स तत एव प्राक्तत्तेब यजुर्हरतीति प्रकृत्य पूर्वेण परिग्रहेण परिगृह्य लिखति हरति यद्वायं नव तीति श्रूयते॥ अग्निचित्यायामपि अथ प्रायणीयं निर्वपति तस्य हविष्कृता वाचं विसृजते वाचं विसृज्य स्तंबयजु

जो१

ले

ण

स्य

स्त्रा

॥५८॥
॥देवया०२
त

हरतिस्तंबयजुर्हृत्वा पूर्वेण परिग्रहे [illegible] णपरिगृह्य लिखित्वा हरहरत्रिरितिहरति त्रिराग्नीध्र इति॥ अतो त्रैवंश्रूयते॥
तत्रैवं भवतीति तीसाधृत्तेऽपि तयज्ञाग्निचित्ययोरितितस्योरेवेदेरतत्संस्काराधिकं वचनादिति प्राप्ते आह॥ ॥वा
तत्र दर्शनात॥ ॥अत्र वा शब्दः पूर्वपक्षनिरासार्थः॥ न पितृयज्ञाग्निचित्ययोरेव तत्संस्काराधिकं यत्तर्हि अत्रापि द
र्शपूर्णमासयोर्भवति॥ कुतः॥ तत्र दर्शनात॥ तयोरेव तत्र पितृयज्ञाग्निचित्ययोर्हि अन्यविधिपरे वाक्ये लेखा
करणादीनि दृश्यंते॥ यतस्तत्र प्रकृतितः प्राप्तानां दर्शनमेव न तु विधानं॥ कुतः॥ वाक्यस्यान्यपरत्वात॥ कथमन्य
परता पितृयज्ञे तावत्सयज्ञोपवीती भूत्वाज्यानि गृह्णाती तिआज्यग्रहणे यज्ञोपवीतित्वविधानपरं वचनं॥ य
तः कर्मणः पित्र्यत्वे न प्राचीनावीतित्वमेव प्राप्नोति॥ तत्र वचनाद्यज्ञोपवीतित्वं विधीयते॥ अन्यत्स्तंबयजुर्हरण
दि सर्वं प्राप्तमेवानूद्यते॥ अग्निचित्यायामहावेद्यादिसंमर्शनात्तस्य कर्मणोऽवसरविधानार्थं वचनं॥ तत्र हि सौ
मिकायावेदेरोपवसथ्यात्पूर्वेऽहनि स्फ्यादानादि कर्म प्रकृतितः प्राप्नोति प्रायणीयहः स्वच्छंदतेत्त्वचनेन न विधीयते॥
अतस्तत्र प्रकृतितः प्राप्तानां दर्शनमेव विधानं॥ अतो दर्शपूर्णमासयोरपि लेखाकरणहरणप्रैषहरणसंमर्शना
नि भवंतीति सिद्धं॥ वरुणप्रघासेषु हरस्त्री स्त्रिरित्येवं प्रैषोदयः॥ ॥आपस्तंबः॥ ॥स्फ्येनोत्तमां त्वचं छित्त्वा स्याग्नीध्र उत्करे

कुर्वंतीति॥ मनु

वे
द्विं
न
वं
॥५८॥
॥भाष्यं॥

त२

ध्र
ति
रंप
त
शप

त्रिर्निवपतीति॥ मानवे॥ ॥खनति द्व्यंगुलं चतुरंगुलं वोद्धताद्याग्नीध्रस्त्रिर्हरतीति॥ ॥नेत्रिरिस्तृत्रेपि॥ ॥अथ प्रा
चीस्फ्येनवेदिमुद्धंति अथाग्निमाहा [illegible] ग्नीदितस्त्रिर्हरेतिंतस्त्रिराग्नीध्रो हरति यदाग्नीध्रस्त्रिर्हरत्य
प संप्रैषमाह ब्रह्मन्नुत्तरमित्यादि॥ ॥वेदिकरणं यथोक्तं॥ अत्रेत्यनुवर्त्तते॥ यथोक्तं यथापूर्वमुक्तं वेदिकरणांत
स्तास्मिन्नवसरे लेखासंमर्शनानंतरं भवति॥ किंच पूर्वमुक्तं द्व्यंगुलं खातां खनति ओषधीनां मूलोच्छेदन
पर्यंतं वा खनतीति॥ तदस्मिन्नवसरे कर्त्तव्यमित्यर्थः॥ उत्तरं परिग्रहं [illegible] परिग्र [illegible] ह्णाति सुक्ष्मा
स्यानोर्जस्वतीं प्रतिमंत्रं पूर्ववत॥ अत्रापि ब्रह्मन्नुत्तरं परिग्रहं परिग्रहीष्यामीति ब्रह्माणमामंत्र्य॥ अपरि
गृहाणेत्येवं तेनानुज्ञातोऽध्वर्युः पूर्ववद्वेदिं परिगृह्णाति सुक्ष्मा चासीत्यादिभिर्मंत्रैः प्रतिमंत्रं॥ तमनु विद्यात्त्र
रेणपरिग्रहेण पर्यगृह्णात्स्य सुक्ष्मा चासीत्यादि श्रूयते॥ उत्तरी गृहमित्यस्य कर्मणः संज्ञा तदुत्तरपरिग्रहादिक
रानीत्यादौ संव्यवहारार्थं॥ ॥पूर्ववदिति स्फ्येन दक्षिणां पश्चादुत्तरत इति॥ प्रतिमंत्रमित्येतावता सिद्धेय
त्रयाणां मंत्राणां प्रतिकोच्चारणं तत्पादिना पूर्वांत न्यायेन मंत्रांतेनाः॥ इतरथाहि सुक्ष्मा चासि शिवा चेत्य
त्रापि वाक्यसमाप्तिः संभाव्येत॥ त्रयाणां प्रतीकोपादानेन च कृते तत्पृषसंदेहो न भवति॥ पुरा क्रूरस्येत्यनुमार्ष्टि

त्रं

तां प्रति १

ये १

॥५९॥
॥देवयो० २

॥ पुरा क्रूरस्य त्वनेन मंत्रेण स्फ्येन वेदिमनुमार्ष्टि समं करोतीमां ॥ इति श्रुतेः ॥ प्रतिप्रवं त्रियाविपर्यं वर्त्तं तैः पूर्वं खनिताविषमा कृता अधुना तां समीकरोतीत्यर्थः ॥ अत्राह मनुः ॥ पुरा क्रूरस्येति स्फ्येन वेदिं प्रतीचीमनुमार्ष्टि इति ॥ आपस्तंबस्तु ॥ प्रतीचीं वेदिं स्फ्येन योयुष्मेइति ॥ तन्निरिस्तुत्रेचं अथ प्रतीचीं वेदिं स्फ्येन योयुष्मत इति तेन पुरस्तादारभ्य प्रत्यक्संमनुमार्जनं कार्यं ॥ स्थ तोस्तु त्रेच विशेषानुपदेशात् ॥ पशुकामस्यानुमार्जनात्प्राग्वेदेः पुरीषं निष्कास्योत्करे प्रक्षिप्यान्यस्माद्देशात्पुरीषमानीय वेदिः पूरणीया ॥ ततोनुमार्जनेन समीकरणमिति ॥ अध्यधि वेदिं प्रोक्षणीर्धारयत्यन्यः ॥ अध्वर्यो रन्य आग्नीध्रोध्यधि वेदिं वेदेरुपरिष्टात्समीप एव नीचैः प्रोक्षणीर्धारयति ॥ पूर्वं हस्तु क्रमसंचरे प्रोक्षणीर्निधायेति तां विदानीतत्तदुत्याद्य वेदेरुपरिष्टाद्धारयति ॥ अथ स्फ्यमुद्यम्याह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं स्रुचः संमृड्ढि पत्नीᳫंसन्नह्याज्येनोदेहीति ॥ यदीच्छेत् ॥ अथ आग्नीत्कर्तृकं प्रोक्षणीधारणानंतरं अध्वर्युर्यद्दीप्रैषवचनमिच्छेत्तदा प्रोक्षणीर्बुवेदिमध्येग्नीधाधार्यमाणास्तु वेदेः स्फ्यं शास्त्रस्फ्यमुद्यम्य हस्तेनोर्ध्वमुत्याद्याग्नीध्रं प्रति प्रोक्षणीरासादयेत्यादिस्त्राज्येनोदेहीत्यंतं प्रैषमाह ब्रवीति ॥ यदि प्रैषदातुं नेच्छेत्तदा तोन ब्रूयात् ॥ स्वयमेवाग्नीध्रोप्रेषितो पिस्राहननादिवत्प्रोक्षणीरासादनादीन्यदार्थान्कुर्यात् ॥ सवाउपष्टुपर्यवप्रोक्षणीर्धार्यमाणास्त्वथ स्फ्यमुद्यच्छतीति ॥ तथा अथैतां वाचं वदति प्रोक्षणीरासादयेध्मं

स्थ

प

छे

॥५८॥
॥भाष्यं॥

बर्हिरुपसादयेत्यादीति तथा संप्रैष एवैष स यदि कामयेत ब्रूयादेतद्यद्यु कामयेतापि नाद्रियेत स्वयमु ह्येवैतद्यथा देवमतः कर्म कर्त्तव्यमिति च श्रुतेः ॥ सूत्रे अध्यधिश्रुतो चोपर्युपरीति ॥ अत्रोपर्यध्यधसः सामीप्य इति द्वित्वं ॥ तद्योगे द्वितीया भयतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितांतेष्विति ॥ वेदिमिति द्वितीयाः प्रैषपक्षे तदभावपक्षे च प्रोक्षण्यासादनादीनामग्नीध एव कर्तृत्वं इति हरिस्वामिनः ॥ स्वयमेवाग्नीत् श्रुतिविहितं वेदमतः परं कर्त्तव्यमिति ॥ अतोऽप्रेषितोपि कुर्यादिति ॥ अन्ये त्वप्रैषपक्षेपदार्थानामध्वर्युकर्तृत्वमाहुः ॥ स्वयमेवाध्वर्युर्वै देरमतः कर्म कर्त्तव्यमिति का एव पाठात् ॥ पत्नीशब्दस्यानेकपत्नीकेप्यनूहः ॥ एकवचनांतस्यैव समाम्नानात् ॥ नप्रकृतावपूर्वत्वादिति न्यायात् ॥ अथ शब्दो धार्यमाणास्वेव प्रोक्षणीषु सर्वप्रैषाणां प्रापणार्थः ॥ अन्यथा प्रैषसमनंतरमेव प्रैषार्थानुष्ठानस्य सर्वत्र न्याय्यत्वात्प्रोक्षणीरासादयेति श्रवणानंतरमेव प्रोक्षण्यासादनं प्राप्नोतिं न्मान्नूत्सर्वप्रैषानंतरमासादनं यथा स्यादित्येवमर्थो यशब्दः ॥ अत्रेध्माबर्हिः शब्दौ वरुणप्रघासेषु विपरिणंस्येते आज्यशब्दः प्रोक्षणीशब्दस्तु नोह्यते बहुवचनांतत्वात् ॥ ततश्चैवं ॥ प्रोक्षणीरासादयेध्माबर्हिषी उपसादय स्रुवश्च स्रुचः संमृड्ढि पत्नीᳫं सन्नह्याज्याभ्यामुदेहीति ॥ गृहमेधीयायां स्रुचः एकत्वात् स्रुवं च संमृड्ढीत्यूहः ॥ उपसदि तु स्रुगूह्य स्रुचौ

दे

इति

य

त

॥६०॥
॥देवया०२
बोविप्रति
ति
प्र

संमृड्ढीति ॥ अनेकयजमानके वह्नौ पृदवसानीयासु इध्मान्बर्हिष्षु प्रसाद या ज्येष्ठदेहोतदः ॥ अत्रेदं संदिह्य-
ते किं य एव प्रैषः स एव प्रैषार्थ उतान्यः प्रैषमन्यः प्रैषार्थ इति किं तावत्प्राप्तम् एक एव प्रैषः प्रैषार्थयोरिति कुतः ॥ समाख्या-
नात् ॥ अन्यथा ह्यकृतत्वाच्च ॥ ननु स्यात्मनि प्रैषो विधीयते न हि कश्चिदात्मानं प्रेष्यति ॥ नायं प्रैषः किं तर्हि प्राप्तकाले लोट्
व्यत्ययेन समध्यमपुरुष उत्तमस्थाने भविष्यति ॥ अतश्च यमेकेनैव कर्तव्यमिति प्राप्ते आह ॥ ॥ यथा प्रैषितमन्यः
पराधिकारात् ॥ ॥ यथा प्रैषणमिमिति प्रोक्षणासादनादिकं तदन्यः करोति ॥ अन्यश्च प्रैषं करोति ॥ कुतः पराधिका-
रात् ॥ परशब्दस्यार्थः परमन्यमधिकृत्य प्रैषो वर्त्तते ॥ न हि कश्चिदात्मानं प्रेषयतीदं कुर्विति ॥ ननूक्तं नायं प्रैषः ॥
किं तर्हि प्राप्तकाले लोड् यमिति तेन विरोधो न भविष्यतीति ॥ तत्रोच्यते नायं प्राप्तकाले लोट् ॥ किं तर्हि प्रैषण एव ॥ कुतः
संप्रैष एवेत्य इति वचनात् ॥ तस्मादन्यः प्रैषमन्यः प्रैषार्थ इति ॥ एवं स्थिते इदं संदिह्यते किमग्नीत्प्रैषे अध्वर्युः प्रैषार्थो ॥६०॥
उताध्वर्युप्रैषे आग्नीध्रश्च प्रैषार्थ इति ॥ किं तावत्प्राप्तम् आग्नीध्रः प्रैषमध्वर्युः प्रैषार्थ इति ॥ कुतः ॥ समाख्यानुग्रहात् ॥ ॥भाष्यं॥
एवं समाख्यानं मार्गादिषु बहुषु समन्त्रकेषु पदार्थेषु समाख्यानुगृहीता भवन्ति ॥ प्रैषमात्रं तु बाध्यते ॥ इतरथा समा-
ख्या विरुध्यते ॥ तस्मादाग्नीध्रः प्रैषे इति प्राप्ते आह ॥ स्वयं वा विरोधात् ॥ ॥ स्वयं वाध्वर्युरेव प्रैषं स्यात् ॥ अर्थादाग-

---

ब
द

ग्नीध्रः प्रैषार्थ इति ॥ कुतः अविरोधात् ॥ न ह्येवं क्रियमाणेऽपि समाख्या विरुध्यते ॥ कथं प्रैषं स्वयं दत्त्वा स्वाज्ञ-
या प्रैषार्थो नपि कारयति ॥ एवं प्रैषे तदर्थानुष्ठाने चाध्वर्युसंबंधस्य विद्यमानत्वात् ॥ समाख्यान विरुध्यते ॥ कु-
तः ॥ तत्प्रयोजको हेतुश्चेति चकारात्कर्त्ता चेति प्रयोजकत्वस्यापि कर्तृत्वस्मरणात् ॥ इतरथा तु पदार्थमात्रकर्तृत्वा-
त्प्रैषसमाख्या बाध्येत ॥ तस्मादध्वर्युरेव प्रैषे ॥ आग्नीध्रश्च प्रैषार्थ इति ॥ किंच ॥ ॥ संप्रैषवचनाच्च ॥ ॥ संप्रैषेषु अध्व-
र्योरेवं वचनाच्चाध्वर्युरेव प्रैषं स्यात् ॥ यदि चाग्नीदग्नीन्विहर प्रतिप्रस्थातः पशुनेहि नेष्टः पत्नीमुदानयोन्नेतर्होत-
श्चमसमन्नूनयस्व हि यजमान होतरेतद्यजेत्यादावेवाध्वर्योः प्रोक्षणीरासादयेत्येवं संप्रैषमध्य एवाध्वर्योर्वच-
नं स्यात् ॥ तदा वचनोध्वर्युः प्रैषार्थ स्यादपि ॥ न चैवं तस्मादध्वर्युरेव प्रैषे ॥ अग्नीत्प्रैषार्थ इति ॥ अपि च संप्रैष एवेत्य इतिव-
चनादध्वर्योः प्रैषत्वं निश्चितं ॥ ततश्च यदि अग्नीत्प्रैषं कुर्यात्तदा निकृष्टेनोत्कृष्टस्य प्रैषणमयुक्तमापद्येतेत ज्ञानिष्टं ॥
तस्मादुत्कृष्टोध्वर्युः प्रैषणे निकृष्टोग्नीत्तदर्थानुष्ठाने इत्येवमुक्तः सिद्धांतः ॥ जैमिनिनापि तृतीयस्याष्टमे एवमेव सि-
द्धांतितं ॥ प्रैषेषु च पराधिकारादध्वर्युस्तु दर्शनात्प्राणेवाकर्मसामान्यादिति प्रैषार्थस्तु हे आग्नीध्र त्वं प्रोक्षणार्थम-
प सादय अग्निसमिंधनानार्थमिध्मां वेदिस्तरणार्थं बर्हिः ॥ आहवनीयसमीपे सादय ॥ स्रुक्ताघास्रुचः संमार्जन-

॥६१॥
॥देवया॰ २

संस्कारेण संस्कुरु॥ यजमानस्य या पत्नी तां योक्त्रेण संनह्य अधानं यत्प्रागधिश्रितमाज्यं तेन सह उदेत्य ध्रुवे विदिदेशे आगच्छे
ति॥ प्राक्स्तरणाद्बर्हिनावमृशेत्॥ ॥प्राक्स्तरणादनुमार्जनादूर्ध्वं स्तरणादर्वाग्बर्हिना वमृशेत् न स्पृशेत्॥ ॥शृतानि चरु
वींष्याप्रचरणात्॥ ॥शृतानि पुरोडाशचर्वादीनि हवींषि नावमृशेत् न स्पृशेत् आप्रचरणात् यावत्प्रधानप्रचरणं न
भवति तावदुक्तेन न स्पृशेदित्यर्थः स ये ह ग्रई जिं प्रकल्य यछुतानि हवींषि ब्रह्मा वेदिरिति च प्रकृत्या क्रियते इत्या बर्हिष
स्तरणादिति तस्मादनवमर्शमेव यजेतेति च श्रुतत्वात्॥ परिष्कृत बीजमांजीविकेत्यर्थः॥ क्रमास सर्वसंस्कारसंस्कृता॥
अन्यत्तु गमं॥ शृतानीति ह्रूतेति विशेषोपादानात् क्रियमाणेषु हविःषु संस्क्रियमाणायां च वेदीस्पर्शे न दोषः॥ ॥अंगु
ष्ठांगुलिभ्यां मांससंहिताभ्यामवद्यत्येके॥ ॥अवमर्शन निषेध प्रसंगात्तत्प्रतिप्रसवार्थमेतत्॥ एके शाखिनो मां
ससहिताभ्यां मांसोपलक्षिताः तः प्रदेशसंबंधाभ्यां अंगुष्ठांगुलिभ्यां न खाभ्याम स्पृशंतो हवींष्यवद्यंति॥ अन्ये तु अष्ट
तावदानं संज्ञकेन वारणेन प्रादेशमात्रेण काष्ठेन॥ तथा चोक्तं॥ साम र्यां त्वधितिर्मांसेष्वेषु त्स्यात् त्वुवस्तथा॥ हस्त
काष्ठे पुरोडाशमवदातुं प्रकल्प्यत इति॥ अत्र स्रुवेणावद्यति हस्तेनावद्यति काष्ठेनावद्यतीत्यन्वार्यवदानसाधनानि
श्रूयंते तेषां सामर्थ्याद्दूरी स्पृशतव्यवस्था ज्ञेया॥ ॥आपन्नं स्तरणं निरस्येत्॥ ॥स्तरणगतप्राग्वेदिमध्ये तृणपर्णका

२ क्ते त्वा। स्वधितिनावद्यति २

॥६१॥
॥जोष्यं॥
ति॥

द्यादि यदापन्नं पतितं भवति तदध्वर्युः स्तरणं न्नेव बर्हिस्तरणं कुर्वन्नेवोत्करे निरस्येत्ततः प्राक्॥ सयदि पुराबर्हिषस्त
रणात् किंचिदापद्येत बर्हिरेव तत्स्तरणं न्नप स्पृदथ यदाबर्हिस्तरणं त्वपि पदामिति छिती तिश्रुतत्वात्॥ स्तरणगतप्राकातित
तृणाद्यपसार्यं हस्तेनापि न स्पृशेत्॥ स्तरणे क्रियमाणे तु पादेनाप्यभिष्ठानं न दोषायेत्यर्थः॥ ॥द्विषतो वध इति स्फ्यमुदं
चं प्रहरति॥ ॥द्विषतो वध इत्यनेन मंत्रेणाध्वर्युः प्रेषार्थं मुद्यतं स्फ्यं वज्रं प्रेषात उदंचं प्रहरति उदग्रं उत्करे प्रक्षिपतीत्य
र्थः॥ अथोदंचं स्फ्यं प्रहरतीति श्रुतेः उत्करोपस्पर्शनं चोप स्फ्ये एवं नान्यदित्युक्तं प्राक्॥ अत्र स्फ्यस्य प्रक्षेपणमुत्करे
कर्तव्यं॥ ॥तथा चापस्तंबः॥ द्विषतो वध इति पुरस्तात् प्रत्यंचमुत्करे स्फ्यमुदग्रं निरस्यति द्वेष्यं मनसा
ध्यायन्निति॥ ॥मनुरपि॥ ॥द्विषतो वध इति पुरस्तात् प्राङ्मुखः स्फ्येनोत्करमभिहत्य भुस्यप्रत्यासादयतीति॥ ॥सो
गाक्षिरपि॥ ॥स्फ्यमुत्करे प्रत्यंचमपहत्याभ्युद्याहत्य वेद्यां निदधाति॥ अदृष्टार्थं चेतत् दृष्टस्यासंभवात्॥ प्रयाजादिव
दारादुपकारकं चात्रतोयावदुक्तेनिवर्त्तंते॥ ॥अग्निज्यपाली अपरेण प्रीणीताः स्फ्यानि दधाति॥ ॥तत उत्करेपाली अ
वनिज्य प्रहस्तावुत्करे इध्मः प्रक्षाल्य प्रणीता अपरेण प्रणीतानां पश्चात्समीपएव स्फ्यानि दधाति आसादयेदध्वर्युः॥ ॥इ
ध्माबर्हिश्च पूर्वमिध्मं॥ ॥चकारेणापरेण प्रणीतानि दधाति आसादयतीत्यनुकृष्यते॥ आग्नीध्र इध्माबर्हिश्चापरेण
प्रणीताः प्रणीताभ्योपरस्यां दिशि समीपएव निदधाति उपविश्य आसादयाति॥ तत्र विशेषः पूर्वं प्रथममिध्मं प्रागग्रं

रण ग भिन्ना स

॥६२॥
॥देवया०२

निदधाति ततो बर्हिषि प्रागग्रमेवेध्मादुत्तरं निदधाति ॥ तथा चापस्तंबः ॥ ॥हस्ताववनिज्य स्फ्यं प्रक्षाल्यं यत्यग्रमप्रति मृशं तुत्तरेणाहवनीयं प्रागग्रमिध्माबर्हिर्निदधाति दक्षिणमिध्ममुत्तरं बर्हिरिति ॥ ॥एवमेव सर्वत्र सूत्रेषु विद्यते ॥ ॥प्रणीता दक्षिणेन वाहृत्य ॥ ॥प्रथवा प्रणीता दक्षिणेन प्रणीतानाहवनीयस्य चांतरालेन प्रदक्षिणमिध्माबर्हिराहृत्य निदधाति प्रणीतानां पश्चादेव ॥ ॥तथा च तैत्तिरीसूत्रे ॥ ॥आहरंत्यंतरेण इध्माबर्हिः प्रणीताश्चाहवनीयं चांतरं तर्वे दिपुरस्तात् कूर्च्यासादयेत् प्रोक्षतीति ॥ ॥अथ वायार्थेयं प्रयत्नतः ॥ ॥स्रुवं प्रतप्य पूर्ववद्वेदाग्रैरंतरतः प्राक्संमार्ष्ट्यनिशितः इति विपर्यस्य बहिर्मूलैः प्राङ्क्रम्य ॥ ततोग्नौ स्रुवं पूर्ववदिति प्रत्युष्टमित्यनेन मंत्रेणैवामंत्रेण गार्हपत्ये प्रतप्यापउपस्पृश्य ततोग्निदेशात्प्राच्यां गत्वा वेदाग्रैरग्रप्रतिपत्तिविधानाद्वेदास्तथक्षेत्रेतरंतरतोमुखं प्रदेशे स्रुवं प्राक्संमार्ष्टि वेदाग्रैर्मूलादारभ्याग्रपर्यंतमुपरि प्रदेशे प्राचं संमार्ष्टि मार्जनेन तत्संलग्नरजः पातयतीत्यर्थः ॥ ॥अनिशितोसीति मंत्रेण ॥ एवमुपरिभागे संमार्गानंतरं तमेव स्रुवं बहिर्बुध्नप्रदेशे वेदस्य मूलैर्विपर्यस्य संमार्ष्टि देशभेदात्तु न रप्येनैवानिशितइति मंत्रेण विपर्यस्येति प्रागित्यस्य विपर्ययमाह ते न प्रत्यगित्यग्रादारभ्य बुध्नपर्यंतमित्यर्थः ॥ देशभेदाच्च मंत्रावृत्तिर्भवति ॥ तथा च दर्शयत्यग्निसंमार्गो तूष्णीमुप ... रीति ॥ ॥अत्र देशभेदात्प्राप्तो मंत्रस्तूष्णीमित्यनेन वार्यते ॥ ... नैव ज्ञायते दैमंत्रावृत्तिर्भवतीति ॥ ॥प्राङ्क्रमणं च संमार्गमा राभेदे

स्रु
मा
निष्टप्तमिशं न
स्व
॥देष्ट॥
॥भाष्यं॥

प्रस्थ २

त्रे न प्रतपने कुतः ॥ ॥सवै तथैव संमृज्याद्यथाग्निनाभिवृक्ष्येदिति प्रकृत्य प्राङ्वै वोत्क्रम्येति श्रुतेः ॥ प्रतपनं तु पश्चात्स्वस्थानमागत्यैव कार्यं ॥ ॥अथ स्रुवमास्ते तं प्रतपति प्रत्युष्टमित्यादिकं सर्वं श्रूयते ॥ ॥अतः पूर्व... वदित्यनेन न वैकल्पिको मंत्रो तिदिशति ॥ ॥प्रतप्य प्रयच्छति ॥ ॥यस्य स्रुवादेः संमार्गो विहितो विधीयते च तस्य तस्य समार्गानंतरं तं प्रतप्य प्रतप्याध्वर्यवे प्रयच्छति ॥ समर्पयति ॥ ॥ततश्च स्रुवस्य पूर्वं प्रतपनं ॥ ततः प्राङ्क्रम्य यथोक्तः संमार्गः प्रत्यागत्य प्रतपनं ॥ उपस्पर्शः ॥ समर्पणमित्येतेसंस्काराभवंति ॥ ॥अत्र प्रैषपक्षे अध्वर्योः प्रतपनानुष्ठानपक्षे चा... र्याभ्याधेसमर्पणंवीप्रयाप्रतपनस्य स्रुगादि सर्वपात्रविषयतागम्यते ॥ ॥तेन स्रुगादीनामप्युत्तरं प्रतपनं भवति ॥ ॥सवै संमृज्य प्रतप्य प्रयच्छतीति श्रुतेः ॥ ॥पूर्वं प्रतपनं तु स्रुवस्यैव विशेषविधानात ॥ ॥न स्रुगादीनां ॥ ॥अनिशितेति स्रुचः ॥ ॥अनिशितासीत्यनेन मंत्रेण जुह्वाद्याः स्रुचः संमार्ष्टि स्रुववद्वेदाग्रैरंतः प्राकू ... वदमूलैर्बहिः प्रत्यग्जुह्वा संमार्गः ॥ ॥ततः प्रतपनात्र पउपस्पृश्याध्वर्यवे समर्पणमिति ॥ ततएवमेवोपभृतः ॥ एवमेव ध्रुवाया इति वाजिनीत्वेति स्रुचमितिश्रुतत्वात ॥ ॥तूष्णीं प्राशित्रहरणं ... तावदानं पात्री च ॥ ॥स्रुचां संमार्गानंतरं तूष्णीं प्राशित्रहरणं सं

त
य
संमृज्य
तत

प्रतप्य
उनः
प्रतप्य
प्रत्यगिति॥

॥६२॥
॥देवया०२

६२

मार्ष्टीति ततः प्रतप्य प्रयच्छेदिति ॥ अविशेषाद्द्वयोरपि संमार्गः ॥ एकवचनं तु जात्यपेक्षं ॥ न ततः स्रुक्तावदानं तु स्रुक्संम
ज्य प्रतप्य प्रयच्छति ॥ ततः पात्रीमिति ॥ अविशेषा[illegible]प्रदेशात्तु पुरोडाशपात्र्या अक्रमेण तु स्रुक्संमार्गप्रतपनसमर्पणा
नीति कर्कः ॥ तदयुक्तं ॥ पात्रीमित्येकवचनादत्रैकैव पात्री द्वयोः पुरोडाशयोरासादनार्था भवति ॥ शाखांतरीयसर्व
सूत्रेषु आसादनप्रस्तारादौ च क्वाप्यदर्शनात् ॥ इडापात्र्यास्तु संमार्गप्रतपने कुत्रापि सूत्रे विहिते न स्तः ॥ तेन इडा
पात्रीषडवत्तयोः संमार्गप्रतपनकल्पनं निर्मूलमेव ॥ अत एव पितृभूत्याचार्यैः पात्रासादने संमार्गाणि यानि तूक्ता प्रा
त्रीपीठं कुशास्तीर्णं षडवत्तं कृतां कृतमिति संमार्गेभ्यः पृथगेव पात्रीषडवत्तयोरासादनमुक्तं ॥ यदि चानयोः संमार्गो
भिप्रेतः स्यात्ततः पृथगतिदेशं न कुर्यात् ॥ करोति च ॥ अतो नयोर्न संमार्ग इति तेषामभिप्रायो गम्यते ॥ तत्संप्रतपने चोदकस्पर्शो ना
भावः ॥ रक्षोदैवतमंत्रोच्चारणाभावात् ॥ न ह्यत्र रौद्रं तस्यापि संमार्गादि भवति ॥ प्राशित्रे धर्मप्रवृत्तेः सान्नाय्यस्य च
स्रुवेणावदानविधानात् पशुमांसावदानार्थस्यासेः स्थानापत्त्या स्रुवधर्मलाभः ॥ ततः स्रुक्स्रुवसंमार्गानंतरं अग्रेः पूर्वं स्रु
वमंत्रेण प्रतपनं अनिशितोसीति संमार्गः ॥ पुनः प्रतप्याप उपस्पृश्य समर्पणमिति ॥ वसाहोमहवन्याः प्रचरण्याश्च जुहूव
त्स्रुक्संमार्गप्रतपने ॥ अन्येषामपि जुहूस्थानापन्नानां शूर्पार्कपर्णदोहनोदुंबरस्रुक्वारीनां जुहूवदेव संमार्गप्रतपनस
मर्पणानि ॥ इडाजोष्योपभद्दत मेक्षणस्य स्रुतावदानवत् ॥ वाजिनभांडस्य पुरोडाशपात्रीवदिति संप्रदायः ॥ तत्तु विचार

योरिडापा
र्हो चे
॥६३॥
॥भाष्यं॥

पघ्नत१

५ इडासमानन्यायात् ॥ परीशासान्नाय्यपयो ५

णीयं उपदेशातिदेशयोरभावात् ॥ आपस्तंबादिसूत्रेषु वेदाग्रैर्वेदाग्रग्रहणमेव मूलैर्वस्य पात्राणां संमार्गउक्तः ॥ कर्का
चार्यैरप्येवमेव व्याकृतमस्ति ॥ मूलैरिति वेदाग्रमूलैः ॥ अन्ये तु वेदाग्रैर्वेदमूलैरिति व्याचक्षते ॥ तेषामयमाशयः ॥ स्रुवा इ
त्यग्रैरंतरतः संमार्ष्टीति मूलैर्बाह्यत इत्यत्र कस्याग्रैः कस्य मूलैरित्यपेक्षते ॥ तत्रापो हि कुशा ब्रह्मयजुरिति वाक्यशेषात्कु
शाग्रैः कुशमूलैरित्येतावत्प्रतीयते ॥ तथा तेद्वैके स्रुवं संमार्जनान्यग्रावण्यादधाति वेदस्याह ॥ भवन्तीति वाक्यशेषाद्वेदस्या
ग्राणि वेदस्य मूलानीति गम्यते ॥ हरिस्वामिनस्तु अग्रैरिति वचनाद्वेदाग्रग्रहणं मूलैरिति वचनान्मूलानां ॥ अन्य
तरस्मिन्गृहीते उभयं न संभवतीत्युभयग्रहणं ॥ मूलं हि परिच्छिन्नाग्रपरिच्छिन्नमूलं चाग्रमिति सूत्रे तु वेदाग्रैरि
ति समस्तात्पदात्केवलं वेदपदं निःश्रूप्य मूलैरित्यनेन योजयितुं दुःशकं ॥ तेन संनिधानाद्वेदाग्रमूलैरिति कर्काचा
र्यैर्व्याख्यातं ॥ आपस्तंबसूत्रे विशेषः ॥ पत्नीसंनहनमेके समामनंति स्रुक्संमार्जनमेके इति तथा आहव
नीयगार्हपत्ययोर्वा प्रतितपति ॥ वेदाग्राणि प्रविभज्याथोवाततः स्रुवः संमार्ष्टि प्राचीरुदीचीर्वोत्तानाधारयमाण इति तत्थान
सं श्लक्ष्णान्यसंमृष्टैः संस्पर्शयतीति ॥ पुनः प्रतितप्य प्रोक्ष्याग्रेणोत्करं दर्भेषु सादयति ॥ जघनेनेवेति संमृष्टा यथास्था
नमुत्तानाः स्रुचः सादयतीति मानवे ॥ संमार्जनान्यपास्यति ॥ सर्वसंमार्गानंतरं [illegible] संमार्जनानि समा
र्जनसाधनानि वेदाग्रमूलान्युत्करेपास्यति प्रादेहिपति ॥ तस्मादुपरास्ये दैवतानीति वचनात् ॥ आहवनीये प्रासनमेके ॥ ॥

का॰
हर्व
ये

प्रविभ ४

शान दिस्यु रवी मुपमि ष्टां पत्नीयज ५

॥६५॥ एकेशाखिनः स्रुक्संमार्जनानां वेदाग्रमूलानां आहवनीये प्रासनं प्रक्षेपं कुर्वंति ॥ तदेके स्रुक्संमार्जनान्य
॥देवया०२ ग्नावभ्यादधातीति प्रकृत्य तद्भुतथा न कुर्यादिति श्रुतेः ॥ अत्राहापस्तंबः ॥ संमार्जनान्यद्भिः संस्पृश्या
तपस्तु ग्नौ प्रहरतीति यस्मिन्नुत्करे वेति ॥ ६ ॥ पत्नीं संनह्यतीति प्रत्यगुदक्षिणेन तदुपविष्टां गार्हपत्यस्य मुंजयो
क्त्रेण त्रिवृता परिहरत्यधिवासो दित्यै रास्नेति ॥ ततो ऽग्नेः गार्हपत्यस्य प्रत्यग्दक्षिणे तानेन त्या दि
त्रि त्यै रास्नेति मानस्य भार्या त्रिवृतां गुणेन मुंजमयेन योक्त्रेण संनह्यति बध्नाति कथं संनह्यति अदित्यै रास्ने
स तिमंत्रेण ॥ तद्योक्त्रमधिवासः वासो बहिः परिहरति परितो वेष्टयति अथ पत्नीं संनह्यतीति प्र
त्ययोक्त्रेण संनह्यति स वा अभिवासः संनह्यति स संनह्य त्वादित्यादि ॥ तथा सावे पश्चात्प्राचीयज्ञ
मन्वासीतेति च श्रुतेः ॥ आपस्तंबः ॥ अपरेण गार्हपत्यमुदीचीमासीनां पत्नीं संनह्यति तिष्ठंतीं वेति ॥
त अनेन कश्चित्सर्वासां संनहनं तच्चैतत्संनहनं नाभेरधः कटिप्रदेशे कर्तव्यं कुतः ॥ अस्ति वै पत्न्या अ ॥६५॥
त मेध्यं यदवाचीनं नाभेरथैतदाज्यमवेक्षिष्यमाणा भवतीति तद्देवास्या एतद्योक्त्रेणांतर्दधात्यथ मध्यमेनैवोत्त ॥भाष्यं॥
रार्द्धेनाज्यमवेक्षत इति वाक्यशेषात् ॥ दक्षिणं पाशमुत्तरे प्रतिमुच्याधः मुदूहति विष्णोर्वेष्य इति
॥ परितो वेष्टितादनंतरमग्नीदेवतस्य योक्त्रस्य दक्षिणं पाशमुत्तरे पाशे शंकुस्थानीये प्रतिमुच्य प्रो

ता। तस्मादुदक्षिणा तद्देवान्वासी ५

तयित्वा ततः सामर्थ्याद्द्विगुणं वेष्टयित्वा तं दक्षिणं योक्त्रपाशमूर्ध्वमुदूहति ॥ वेष्टितयोक्त्रमध्ये ए
व प्रेरयति विष्णोर्वेष्य इति मंत्रेण ऊर्ध्वमितो दूहति विष्णोर्वेष्योसीति श्रुतेः ॥ सत्वग्र त्रिगुणीकृतमुभ
यीं रज्जुमभितः प्रवरग्रंथित्रययुक्तमं तयोः पाशग्रंथिद्वययुक्तं योक्त्रं तेन बध्नातीति हैस्वामिनः ॥ तथा रि
सं संनह्यतीति वचनात्समंततो नहनं बाह्य समुपरि वेष्टयित्वा ऽर्ध्वं योक्त्रमध्ये गूहति ॥ ऊर्ध्वं [illegible] गूह
नं सामर्थ्यात् द्विर्वेष्टनं ॥ एकवेष्टने गूहनस्याशक्यत्वात् ॥ न ग्रंथिं करोति ॥ योक्त्रबंधनं कुर्वन्न ग्रं
थिं न करोति सर्वेन ग्रंथिं कुर्यादिति श्रुतेः ॥ ऊर्जे त्वेत्याज्यमुद्वास्य पत्नीमवेक्ष यत्प्रद्छेनेति ॥ वे
दं सव्येन गृहीत्वा ऊर्जे त्वेत्यनेन मंत्रेणाग्नीदाज्यमुद्वास्य पुरोडाशाभ्यां पूर्वतः आनी [illegible]
योत्तरतो भूमौ निधाय ॥ ततस्तदाज्यं पत्नीमवेक्षयति ॥ लिंगेनोपदेशात् ॥ आज्यमवेक्षस्वेत्यध्वर्युणा सा
च वेदं हस्ते गृहीत्वा ऽदब्धेनेति मंत्रेणाज्यमवेक्षते ॥ अथाज्यमवेक्षेत इति प्रकृत्य सा वेक्षते दब्धेन त्वे
ति श्रुतेः ॥ आपस्तंबः ॥ ऊर्जे त्वेत्याद्यजुर्वेदेनोपयम्य पत्न्या उपाहरति तत्सा निमील्य वीक्ष्य अनुच्छ्वसंती
वीक्षत इति ॥ मानवे च ॥ वेदापर्यादब्धेति पत्न्याज्यमवेक्षत इति ॥ तच्चैतदाज्यावेक्षणं परार्थत्वादनेकपत्नी

मा ने

आहवनीये श्रौतधृष्टि आपिणः ॥ नधिष्ण्यापिणस्याहवनीयश्रापिणो यजमानस्य पत्न्यवेक्षणानंतरं माज्यमा ५

॥६५॥ ॥देवयाग २ कोऽपि कैव करोति नीकर्कः ॥ अथ पत्नीनावकाशयेऽत्र दियाद्धयज्ञात्पत्नीमिति वाक्यशेषान्तु सर्वा अथाज्यावेक्ष णं कुर्वतीति गम्यते । पिरयुङ्क्ते चाध्वर्युरेवावेक्षते ॥ आज्यसंस्कारस्याप्रतिषिद्धत्वात् ॥ एवं रज्जस्वलायां प्रसूतायां प्रोषि तायां वाज्ञेयं पितयजे च सुमङ्गेवपितभ्यइरूः कार्यः ॥ सावेक्षतेक्षेवेनत्वेतिवचनाद्वेक्षणएव मन्त्रो न प्रेक्षणे ॥ वेद्यां क रोत्यपरं प्रोक्षणीभ्यः ॥ ॥ पत्न्यवेक्षणानंतरमग्नीन्द्राज्यं नीत्वा प्रोक्षणीभ्योपरं आसादितानां प्रोक्षणीनां पश्चाद्वे द्यां करोति उपविश्य आसादयतीत्यर्थः ॥ अथाज्यमादाय प्राङुदाङ्रवति तं दत्त वेद्यासादयतीति श्रुतेः ॥ आ हवनीये कृत्वा आहवनीये धिष्ण्यत्यपुनरुद्धास्य प्रोक्षणीभ्योपरं वेद्यां करोति वाशब्दो व्यवस्थायां ॥ आहवनी य आपिणि नित्यमेवं श्रूयते ॥ अथाज्यमादाय प्राङुदाङ्रवति तदाहवनीये धिश्रयति यस्याहवनीये हवींषि श्रप यति सर्वमेव यज्ञ आहवनीये श्रुतो सदिति ॥ तथा तत्र आदत्ते तं दत्त वेद्यासादयतीति च ॥ सावितु स्त्वेत्याज्यमुत्पुना ति ॥ ॥ वेदमुपगृह्य सवितुस्त्वेत्यनेन मंत्रेण ध्वर्युर्वेद्यामासादितमाज्यं पवित्राभ्यामुत्पुनाति ॥ प्रोक्षणीषु पवित्रे

॥६५॥ ॥भाष्य॥ ती

भवतस्तेन त आदत्ते ताभ्यामाज्यमुत्पुनातीति श्रुतेः ॥ ॥ प्रोक्षणीश्च पूर्ववत् ॥ प्रोक्षणीश्च पूर्ववदुत्पुनाति ॥ पू र्ववदिति पवित्राभ्यां सवितुर्व इति मंत्रेण स्फ्योपग्रहणं चकारेण तु नान्यस्यानुकर्षणार्थः ॥ कर्काचार्यस्तु चकारा दाज्यं च पूर्ववद्वेदेनह्यन्यथा आज्योत्पवने पवित्रे प्राप्नोते इति व्याख्यातवंतः ॥ प्रोक्षणीनां पुनरुत्पवनमिध्माबर्हिषोः

प्रोक्षणमेव कर्तव्यं ॥ गार्हपत्य श्रापिणस्तु प्रागुक्तमेव ॥ कुतः ॥ दृष्टव्यवस्थेति चेत् ॥ आहवनीयश्रापि ६

तिरस्कर्यति ॥ तेजोसीत्यनेन मंत्रेण ॥ अथाज्यमवेक्षत इति श्रुतेः ॥ ॥ यजमानो वा ॥ यजमानो वा आज्यमवेक्षते तेजोसीत्यनेन मंत्रेण ॥

१ ५

प्रोक्षणार्थं अतश्च तदभावे न भवति ॥ ॥ आज्यमवेक्षते तेजोसीति ॥ ॥ अध्वर्युराज्यमवेक्षते तेजोसीत्यनेन मंत्रेण ॥ तेद्देके यजमानमवेक्षापयंतीति तस्माद्ध्वर्युरेवावेक्षेत तदुभयथाश्रुतत्वाद्विकल्पः ॥ ॥ स्रुवेणाज्यग्रहणं ॥ ॥ तत्र यदाज्यग्र हणं तत्स्रुवेणैव कर्तव्यं सामर्थ्यात् ॥ ॥ चतुर्जुहूं धाम नामेति सकृन्मंत्रः जुह्वां चतुराज्यग्रहणं चतुरः स्रुवा न्पूर्णान्गृह्णीयादित्यर्थः ॥ तत्र धाम नामेत्ययं मंत्रः सकृत्प्रयोज्यः प्रथमस्रुवग्रहणे वा स एतेन यजुषा सकृज्जुह्वां गृ ह्णाति त्रिस्तूष्णीमिति श्रुतत्वात् ॥ न ग्रहणत्ववनेत्यादिनाज्यग्रहणे प्रतिग्रहणं मंत्रः प्राप्नोति तत्रानेन वचनेनोत्तरे षु ग्रहणेषु मंत्रो निवार्यते ॥ ननु चेत्तदपि प्रागुक्तमेवं च नादाज्य इति ॥ सत्यं ॥ अत्र सकृन्मंत्र इति पुनरारंभो वाक्यद्वय ज्ञापनार्थः ॥ स एतेन यजुषा सकृज्जुह्वां गृह्णातीत्येकं वाक्यं तदा तु स्त्रिस्त्रिरेव यजुषा गृह्णीयादित्यपरं ॥ तेनाज्यग्रह णे त्रिर्मंत्रवचनं सकृन्मंत्रवचनं वेति विकल्पः सिध्यति सकृन्मंत्रवचनं मंत्रविधीयते ॥ त्रिर्मंत्रवचनं तु परिशेषात्परि भाषायां सिद्धमिति ॥ तेन त्रिरिति सूत्रे प्रोक्षणीषु पवित्रे अवधायादत्ते दक्षिणेन स्रुवं सव्येन जुहूं वेदं प्रतिष्ठाप्य तस्यां गृह्णीत त्रि॥४

८ गृह्णीयात् ॥ तच्चोपभृत्याज्यमल्पीयः जो हवादाज्यातिशयेनाल्पग्राह्यं ॥ स यच्चतुर्जुहूं गृह्णात्यष्टौ कृत्वा उपभृति गृ ह्णान्कनीय आज्यं गृह्णातीति श्रुतेः ॥ एतेनैव यजुषा सकृदुपभृति गृह्णाति स मकृत्वाश्च त्रिमिति श्रुतेः ॥ अत्रा पि सकृदेव मन्त्रः ॥ इह्यानुयाजानां नित्यत्वाच्छेदो विकृतिविषयः ॥ ॥ चतुरन्यत्र प्रतिविभागात् ॥ ॥ अन्यत्रानु

अष्टउपभृत्यनुयाजाश्चेत् ॥ ॥ चेद्यदि अनुयाजा भवंति तदा उपभृत्यष्टौ स्रुवाज्यं गृ ८ ४ १२ ह्न भरय आज्यं २ ३

स्या२ व२

॥६६॥ ॥देवयो०२ च

याजवत्कर्मणोन्यस्मिन्कर्मणि अनुयाजाभावेपि । अन्यद्व्यानुयाजकेचोपभृति चतुरेव चतुर्गृहीतमेव ग्राह्यं कुतः॥
प्रतिविभागात् ॥ औपभृतस्यार्द्धस्य प्रयाजेष्वनुयाजेषु यतः प्रतिविभागेनोपयोगो दृश्यते अर्द्धं प्रयाजेषु उपयुज्यते अर्द्ध
मनुयाजेष्विति । अतऔपभृतस्योभयार्थत्वं गम्यते तेन यत्रानुयाजाभावः तत्र प्रयाजार्थमेव चतुर्गृहीतं भवतीत्यभिप्रा
यः ॥ किंच ॥ पश्वातिथ्यादर्शनाच्च ॥ पशावातिथ्यायां चोपभृति चतुर्गृहीतस्य दर्शनाच्चैवं गम्यते । यस्त्वनुयाजाभावेन्य
द्व्यकेष्वनुयाजेषु चोपभृति चतुर्गृहीतमेव गृह्णीयादिति । पाशौ तावत् न्येदेड्व्यकेष्वनुयाजेषु सत्सु उपभृति चतुर्गृ
हीतं श्रुतिर्दर्शयति । अथोत्सृज्या [illegible] ज्यं चतुर्गृहीते जुह्वां चोपभृति च गृह्णाति पंच गृहीतं पृषदाज्यमिति । तथा आतिथ्या
यामनुयाजाभावे सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति यत्रानुयाजा भवंतीति । अत्रानुयाजार्थेन चतुर्गृहीतेन
[illegible] प्रयोजनाभावात् प्रयोजनार्थमेव प्राप्तं चतुर्गृहीतं दर्शयति ॥ न कृत्स्नोपदेशात् ॥ नैतदेवं यदुक्तमुभयार्थमेतदि
ति कुतः कृत्स्नोपदेशात् कृत्स्नस्य समग्रस्याष्टगृहीतस्यानुयाजार्थत्वेन श्रुतावुपदेशात् । अथ यदष्टौ कृ
त्वा उपभृति गृह्णातीति प्रकृत्यनुयाजेभ्यो हि गृह्णातीति । ननूक्तं प्रतिविभागादिति अर्द्धस्य प्रयाजेषूपयो
गोर्द्धस्यानुयाजेषु इति सत्यं अनुयाजार्थस्यैव सतो वचनात् प्रयाजेषूपयोगः यथा प्रयाजार्थस्यैव जौहवस्य व
चनादुत्तराघारे ननूक्तं पश्वातिथ्ययोर्दर्शनादिति तत्राह ॥ पश्वातिथ्ययोर्वचनात् ॥ यदा वा केन कृत्स्नस्योप

॥६६॥ ॥जोष्यं॥

भृतस्यानुयाजार्थत्वं तदा पश्वातिथ्यायां त्वाष्टगृहीतमेवोपभृति प्राप्नोति अतो वचनात् तत्र च [illegible]तुर्गृहीतं वि
धीयते । अतो विधानमेतन्न [illegible] दर्शनं तद्धि प्राप्तिपूर्वकं भवति प्राप्तिश्च नास्तीत्युक्तमेवास्मिन्सिद्धांते वरुणप्र
घासेषु महाहविषि च अनुयाजार्थं पृषदाज्यमुपभृति न गृह्यते । पृषदाज्यादेव मानो अनुयाजाः क्रियान इति वि
शेषः ॥ अत्र भ्रमः स्यादेतदेवं यदि कृत्स्नोपदेशो भवति स कृत्स्नमष्टौपभृतं यदि केन विद्वाकोनानुयाजार्थमु
दिश्यते नन्नूपदिश्यते यतः शाखांतरे एतदुभयार्थं श्रूयते यदष्टौ कृत्वा उपभृति गृह्णाति प्रयाजानुयाजे
च भ्यस्तद्गृह्णातीति ॥ ननु अनुयाजार्थतापि सकलस्य श्रूयत एव ॥ अनुयाजेभ्यो हि तत् गृह्णातीति ॥ सत्यं ॥ शा
खांतरे उभयार्थत्वविधानादेकदेशानुवादः स इति ॥ ननु विपरीतं कुतो न भवति ॥ अनुयाजार्थत्वबोधकं
जो विधायकमुभयार्थबोधकमनुवादकमिति ॥ नैवं अनुयाजेभ्यो हि तं गृह्णातीत्यनेन सकलस्यानुयाजार्थत्वे हि वि य
ते प्रयाजार्थप्राप्त्यभावान्न प्रयाजानुयाजेभ्यो हीत्यनेनोभयार्थतानुवादितुं शक्या ॥ उभयार्थत्वबोधके
वाक्येन विधाने कृते इतरेण यथाप्राप्तो नुजांशो अनूद्यत इत्यदोषः ॥ अतः कृत्स्नस्यानुयाजार्थत्वे नोपदेशाभा
वात् ॥ उभयथार्थमेवोपभृतमिति सिद्धं ॥ पश्वातिथ्ययोरपि वचनं तदेव स्यात् यद्यौपभृतस्य वाक्यादुभयथार्थतान

॥६७॥
॥देवया०२

स्यात् तस्य चोभयार्थं पूर्वमेव साधिता ॥ अत आतिथ्यायां पशौ चोपभृति चतुर्गृहीतमेव प्राप्नोति अतः
प्राप्तिपूर्वं कृत्वा दर्शनमेवैतत्र विधानमिति तेन वरुणप्रघासेषु महाहविषि चान्यद्रव्यके ऽष्टैश्वर्यार्थं सु
पभृति चतुर्गृहीतमाज्यं ग्राह्यमिति चिंतायाः प्रयोजनं ॥ ध्रुवायां च जुहूवत् ॥ ध्रुवायां जुहूव
दाज्यं गृह्णीयात् जुहूवदिति चतुर्गृहीतं सकृन्मंत्रवचनमिति तेनैव यजुषा सकृद् ध्रुवायां गृह्णा
ति त्रिस्त्वष्टौ मिति शिष्टत्वात् ॥ चकारादुपभृत्यपि जुहूवदेव गृह्णीयात् तेनोपभृत्यपि सकृन्मंत्रवचने
मुक्तो भवतीति मंत्रवचनपक्षे चतुर्जुहूध्रुवायां च चतुर्थं तूष्णीमुपभृति च ॥ आपस्तंबः ॥ भूयो जु
हामल्पीयउपध्रुवायामिति ॥ इध्मं प्रोक्षति विस्रस्य वेदिं च बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्तात् कृषिं
कृष्णोसीति प्रतिमंत्रं ॥ इध्मं वेदिं बर्हिश्च कृष्णोसीत्यादिभिः प्रतिमंत्रं क्रमेण प्रोक्षति कथं प्रोक्षति तं
त्रेध्मं विस्रंस्य तत्रस्थमेव कृष्णोसीत्यनेन प्रोक्षितिः ॥ प्रोक्षणीरध्वर्युरादत्ते सइध्ममेवाग्रे कृष्णोसी
ति श्रुतेः अग्रे प्रथममित्यर्थः ततो वेदिरसीति वेदिं प्रोक्षति ॥ अथ वेदिं प्रोक्षति वेदिरसीति श्रुतेः ॥ ततो ब
र्हिः प्रतिगृह्याग्नीध्रासमर्पितं हस्तेनादाय पुरस्तात् कृषिपर्यायाविघ्नाकृत्वा दग्रमासाद्य बर्हिरसीति मंत्रे

स्यात्तथा

वरुणप्रघासेषु ब्रह्मन्निध्मं प्रोक्षिष्यामः ॥ प्रस्तरं बर्हिः प्रोक्षिष्यामः इत्यूह ॥ ४

प्रोक्षति ॥ अत्र प्रतिगृह्येति प्रतिपूर्वको गृह्णातिरन्यसमर्पितस्यादानेन वर्तते ॥ तथा च श्रुतिः ॥ अथास्मै बर्हिः प्रय
च्छति तत्पुरस्तात् कृष्या सादयति तत्प्रोक्षति बर्हिरसीति ॥ तत्रेध्मप्रोक्षणे ब्रह्मन्निध्मं प्रोक्षिष्यामीत्यामंत्रणं ॥ ॐ
प्रोक्षेत्यनुज्ञातस्य प्रोक्षणं ॥ बर्हिः प्रोक्षिष्यामीत्यामंत्रणं ॥ इतरदिध्मवत् ॥ वेदीप्रोक्षणे त्वामंत्रणानुज्ञे न भवतः ॥
अविहितत्वात् ॥ इध्मस्याग्नीसमीधनार्थस्यैव प्रोक्षणं ॥ अग्नये त्वा जुष्टं प्रोक्षामीति मंत्रलिंगात् ॥ तन्मे ध्मामे
वेतद्मेध्यं करोतीति वाक्यशेषाच्च ॥ अतो शतरुद्रियेपरिधुपस्पर्शनोस्य न प्रोक्षणं ॥ अध्मार्थत्वाभावात् ॥ वेदेर
पिस्तरणार्थमेव प्रोक्षणं बर्हिषे त्वेति मंत्रलिंगात् ॥ तन्मेध्यामेवेतद्बर्हिषे करोतीति वाक्यशेषाच्च ॥ अतएव पयस्या
यां स्तरणाभावे वेदिप्रोक्षणाभावः ॥ उपसत्स्वग्नीषोमीये च स्तरणाया अपि पुनरेकवत् स्तरणं क्रियते इति भवत्ये
व तत्र प्रोक्षणं वेदेः ॥ बर्हिर्मंत्रे स्रुग्भ्यस्त्वेत्यस्य बहुवचनं समवायात् ॥ स्रुग्द्वित्वैकत्वयोरूहः ॥ ततश्च गृहमेधी
ये पयस्यायां चानुबंध्यास्थानीयायां प्रस्तरमोत्रबर्हिषि स्रुचे त्वेति प्रयोगः ॥ ज्योतिष्टोमे शकृद्बर्हिषि पय
स्यापक्षे स्रुग्भ्यां त्वेति प्रयोगः ॥ पयस्यायां तास्मिन्बर्हिषि उपभृत्ध्रुवयोरासादनात् ॥ येषां मते पयस्यायां
उपभृदभावः ॥ तेषां शकृद्बर्हिषः स्रुचे त्वेति प्रोक्षणं ॥ अनुबंध्यापक्षे तु बर्हिरसि स्त्वा जुहूमित्येवं स्रुक्शब्द प्र

तद्बर्हिरंतरणे प्रणीताश्चाहवनीयं चांतरेण वेदिं पुरस्तात् ग्रंथ्या सादयन् प्रोक्षति ॥ अत एव प्रणीता दक्षिणेन बाहस्यो २

॥६८॥ ॥देवया०२

योगवर्जिते एवं मंत्रः ॥ कुतः ॥ शकटबर्हिषि स्रुगादनाभावात् ॥ तत्कुतः ॥ अग्नीषोमीयसवनीयानूबंध्यासु पुनरेकवृंतस्तरण
विधानात् ॥ नैत्तिरीयसूत्रे आहरं तैस्तु मुक्तं ॥ शेषं मूलेषूपसिंचत्यादित्यभ्युदनमिति ॥ ॥ बर्हिषः प्रोक्षणानंतरं प्रोक्षणीशेषं
बर्हिर्मूलेषूपसिंचति तानि नयानि श्रादित्येभ्युदनमिति मंत्रेण ॥ तथा च श्रुतिः ॥ अथ याः प्रोक्षण्यः परिशिष्यंते ताभिरोषधीनां मू
लान्युपनिनयत्यदित्यादाइति ॥ अत्र मूलानीति द्वितीयया मूलानां संस्कार्यत्वं गम्यते ॥ ताभिरिति तृतीयया वा पात्रकरण
त्वं सूत्रे तु विपरीतं तत्र सूत्रं श्रुतिमूलत्वाच्छ्रुत्यनुरोधेनैव तद्व्याख्येयं ॥ ततश्च नेयं शेषस्य प्रतिपत्तिः ॥ अतश्च नाशदोषा
दोपुनः प्रोक्षणीग्रहणम् लोपसेचनं कर्तव्यं शेषे प्रयोगस्य समस्तानां निषेकार्थः ॥ ॥ पवित्रे विधाय प्रणीतासु ब
र्हिर्विस्रंस्य पुरस्तात् प्रस्तरग्रहणं विष्णोरिति ॥ ॥ मूलोपसेचनानंतरमध्वर्युहस्ते न प्रणीतासु पवित्रे निधाय त
तो बर्हिर्विस्रंस्य तेन बर्हिषः पुरस्तात् पूर्वभागाद्विष्णोस्तूपोसीति मंत्रेण प्रस्तरग्रहणं निःकाशनं करोति स्वायं
मूलकात् प्रस्तरस्य पृथक्करणे मंत्रः ॥ अथ विस्रंस्य ग्रंथिं पुरस्तात् प्रस्तरं गृह्णाति विष्णोस्तूपोसीति श्रुतेः ॥ तेन
प यस्यायं गृहमेधीये पित्र्यायां च नायं मंत्रः ॥ पृथक्करणाभावात् पृथक्कृत एव तत्रासावितिपित्र्यायां च हस्ते गृहीतोपि
प्रस्तरमात्र शिष्टत्युक्तेः ॥ ॥ ब्रह्मणे प्रदाय संनहनं विस्रंस्य दक्षिणस्यां वेदिश्रोण्यां निधायान्यैर्वर्हिर्वेदिं
स्तृणन् पूर्णं प्रदसमिति त्रिवृत ॥ तं गृहीतं प्रस्तरं श्राहवनीयं पूर्ववत्स्रुत्नी ब्रह्मणे प्रदाय समर्प्य बर्हिषः संनहनबंध

॥६८॥ ॥भाष्यं॥

नरज्जुं विस्रंस्य विमुच्य रज्जुरूपत्वं परित्याज्य दक्षिणस्यां वेदिश्रोण्यां प्रागग्रमुदगग्रं वा यथासंभवं निधाय प्रस्तुताब
र्हिषोऽन्यैर्बर्हिस्तरणैः स्तरस्त तं संहननमवष्टभ्य प्रच्छाद्य ऊर्णप्रदसमिति मंत्रेण त्रिवृत् त्रिधातु बर्हिषा वेदिं स्तृणाति ॥
आच्छादयति ॥ अथ सन्नहनं विस्रंसयति ॥ तद्दक्षिणायां श्रोण्यां निदधाति ॥ तत्तु नाभिच्छादयती ॥ अथ बर्हि
स्तृणाति त्रिवृत् स्तृणातीति च श्रुतत्वात् ॥ पितृयज्ञे च स्वास्यां देवपितृभ्य इत्यूहः ॥ ॥ मनुः ॥ ॥ अग्रेणाहवनीयं पर्या
हृत्य प्रस्तरं ब्रह्मणे प्रयच्छति ॥ तथा मुखवतः प्रस्तरं गृह्णाति नोत्सृज्यान्नावमृज्यान्न विधूनुयादिति ॥ ब्रह्मा प्रस्तरं
धारयति यजमानो वेति वाऽऽपस्तंबः ॥ ॥ उपपत्त्या वा ॥ ॥ वाशब्दो विकल्पार्थः ॥ न त्रिवृदित्ययं नियमः उपपत्त्या वृद्धा
स्तृणाति ॥ यावतीभिराहृताभिर्वेदिस्तरणमाच्छादनमुपपद्यते संपद्यते तावदास्तरणीयं पंचावृतं सप्तावृतं वेति ॥
न हि अपरिमितादिपक्षेपप्युसोमादौ च त्रिवृत्स्तरणेन समस्तवेदेः छादनमुपपद्यते ॥ तेनेदमुच्यते उपपत्त्या
युग्मा आवृतो भवतीति ॥ अत एव शाखांतरे श्रूयते ॥ अयुग्धातु वेदिं स्तृणाति त्रिधातु पंचधातु वा वेदिं स्तृ
णातीति अधराणि अधस्तान्मूलानि यस्य तदधरमूलं ॥ पूर्वस्तृतस्य बर्हिषो मूलानि पश्चात् स्तीर्यमाणं बर्हि
षोग्रैः प्रच्छादनीयानीत्यर्थः ॥ अत एव शाखांतरे उक्तं ॥ मूलान्यग्रैः प्रच्छादयंतीति ॥ ॥ पश्चादपवर्गं ॥ ॥ प

न

२ तीतिच ॥ ॥ बहुलं ॥ बहुलं निबिडं घनं निरंतरं बर्हिः स्तृणाति यथा भूमिर्न दृश्यते ॥ तद्धि बहुलं स्तृणीयादिति श्रुतेः ॥ ॥ अधरमूलं ॥

अधरमूलं स्तृणा २

समाप्तिर्य १

॥६९॥
॥देवया०२

अपवर्गस्य तत्पश्चादपवर्गे वेदेः पूर्वभागादारभ्य पश्चिमभागे समाप्तिर्यथा भवति तथा स्तृणातीत्यर्थः ॥ ॥
[illegible] ३ स्तृणाती ॥ तत ३ [illegible] ॥ तत्रैकं मुष्टिं वेदेः पूर्वभागे स्तीर्त्वा
द्वितीयं मुष्टिं वेदेर्मध्यभागे पूर्वस्तृतबर्हिषो मूलान्यग्रैः छादयन्स्तृतीयं मुष्टिं वेदेः पश्चिमप्रान्ते पूर्ववत् द्वितीय
मुष्टिस्तरणेन संबद्धं पूर्ववत् तृतीयादित्येवं स्तरणस्य प्रत्यक्संमाप्तिरित्येकः पक्षः पक्षांतरमाह ॥ ॥ प्रवहन्त्वा
वाशब्दो विकल्पार्थः ॥ बृहू उद्यमे ॥ अथवा पूर्वं पूर्वस्तृतबर्हिषोऽग्राणि प्रवृहन्नूर्ध्वमुत्पाटयन् ॥ तेषामग्राणा
मधस्तात् द्वितीयं मुष्टिं स्तृणाति ॥ तस्याग्राणि प्रवृहन्स्तृतीयं मुष्टिं स्तृणाति एवं च प्रागपवर्गमेव स्तरणं कृतं भ
वति ॥ [illegible] अथो अपि प्रवर्हं स्तृणी यात्स्तरणं तिबर्हिरानुषंगिति सूत्रे षिर्णमूलन्तूक्तमधरमूल [illegible] मि
तिश्रुतेः ॥ प्रवर्हमिति बृहू उद्यमे प्रवृह्य प्रवृह्योत्पाद्योत्पाद्येत्यर्थः ॥ वेदेः पश्चिमपार्श्वे स्तीर्त्वा तस्याग्राणि यथा
दिनोत्पाद्य तेषामधस्तादन्यस्य बर्हिषो यथा मूलानि भवंति तथा स्तृणीयात् ॥ तस्याप्यग्राण्युत्पाद्यान्यस्य मू
लान्यधः कुर्यादित्येवं प्रवर्हमित्यस्यार्थः ॥ आनुषंगित्यानुपूर्वस्य नाम ॥ एवं चैतत्किलानुपस्तीर्णं भवति ॥
तरथात्वधरमूलत्वसंपादनाय प्रप्रागारभ्य प्रत्यपवर्गस्तीर्यमाणमनुपूर्वं स्तीर्यते ॥ नन्वपूर्वं पश्चादनुपूर्वमि

रिस
र्ग
॥६९॥
॥भाष्यं॥
स्य

ग०

ति ॥ सूतरां प्रत्यगपवर्गेनुपूर्वता भवतीति सत्यमेवं ॥ किंतु पूर्वस्तीर्णस्योत्तरेणान्याकारस्तरणेनानुपूर्वमित्यभिप्रायः
इति हरिस्वामिनः ॥ आनुषंगमुक्तं परस्परसंबद्धं बर्हिरच्छिद्रं यथा स्तृणातीति शथकादस्यार्थः ॥ अनेनास्मान्मंत्रलिंगा
त्पूर्वमुष्टिं प्रतिगृह्य तस्याधस्तात्तत्संसक्तमेवापरं मुष्टिं स्तृणीयादिति भाव इति माधवाचार्यः ॥ ॥ आपस्तंबः
॥ ॥ वेदिं स्तृणाति बहुलमनतिदृश्नं प्रागपवर्गं प्रत्यगपवर्गं वा त्रिधा तु पंचधा तु वाग्रैर्मूलान्यभिच्छादयन्ति धा
तौ धातो मंत्रमावर्त्तयतीति ॥ ॥ मानवे ॥ ॥ वेदिं स्तृणात्यपरमपरं स्युग्धातु बहुलमनाशेकमिति ॥ ॥ लोगा
क्षिरपि ॥ ॥ ऊर्णम्रदसमिति दक्षिणवेद्यंसं स्तृणाति तृसीमुत्तरमग्रैर्मूलानि छादयन्नयुग्ममिति ॥ अथ प
रिस्तरणं प्रागग्रैः कुशैः परिस्तृणाति त्रिवृतं च वृद्धा पुरस्तात्प्रथममथ पश्चादथ पश्चान्मूलान्यग्रैः प्रच्छादय
तीति ॥ अत्रोद्वासनमाहवनीयाः पितृणः ॥ ॥ आहवनीय आपिणो यजमानस्यात्रास्मिन्काले हविषामु
द्वासनं कर्तव्यं ॥ ॥ कुतः ॥ ॥ विरोधात् ॥ यदीदानीमुद्वासनं न क्रियते तदाहवनीयकल्पेन कृतेन सह तिर्वीषि
दह्येरन् अतएव कपालोद्वासनमपि इदानीमेव कार्यं ॥ इध्मात्समिधमादायाहवनीये कल्पयन्सर्वं परिप्र
स्तरं धारयन् ॥ इध्मादेकां समिधमादाय तदनंतरं ब्रह्मणः सकाशात् प्रस्तरं स्वार्थाददायाहवनीयस्योप

य
म

॥७०॥
॥देवया०२

रिष्टात्समीपएवप्रस्तरंधारयन्गृहीतयासमिधाकरणभूतयाहवनीयंकल्पयती॥ कृप्सामर्थ्यै॥ समिद्दाधाने नकृप्तेइंधनेधप्रादेर्ज्वालनसमर्थंकरोतीत्यर्थः॥ लोकेपिकाष्ठादिनापूर्वमग्निमाहृत्यपश्चात्संधुक्षणंक्रियतेएवमत्रापिकरोति॥ अथाग्निंकल्पयतिउपर्युपरिप्रस्तरंधारयन्कल्पयतीतिश्रुतेः॥ उल्मुकेउदूहत्यनुयाजेश्चेत॥ चेद्यद्यनुयाजाःप्रकृतेकर्मणिभवंतितदाआहवनीयाद्वेउल्मुकेउदूहतिअपसार्यपृथक्स्थापयति॥ उहनेचवूहनवद्भूमिसंलग्नयोरेवपुरस्तात्प्रेरणंनात्याद्यउहनेप्रेरणार्थस्यैवसर्वदृष्टत्वात्॥ [illegible] वेच्छवूहस्यातिध्योपसर्गेहेधीयपयस्यादिति कृतिविषयः॥ यत्रानुयाजानामभावस्तत्रोल्मुकोदहनंनभवति॥ अतोनुयाजार्थमेवैतदुल्मुकोदूहनं॥ यतस्तयोःसमासेनाहवनीयस्यायातयामता क्रियते अनुयाजार्थं॥ तेवाएतेउल्मुकेउदूहेत्यनुयाजेभ्यइतितेषुनर [illegible] सर्वस्पर्शयंतीत्यादिश्रवणात॥ अतोनुयाजार्थाहवनीयसंस्कारार्थंतोल्मुकयोःततश्चोल्मुकोदूहनंततंआहवनीयानुगमेनोल्मु [illegible] कात्प्रत्यानयनं॥ किंतुगार्हपत्यादेवान्वग्निरितिपुनराहरणं॥ तयोःपुनरनुसमासविस्मरणेचोत्तमानुयाजानंतरंआहवनीयसमासोनकार्यः॥ अनुयाजानांनिवृत्तत्वादिति॥ अध्यर्यवप्रायश्चित्तंहोतव्यमिति॥७॥ परिधीन्परिदधात्यार्द्रानेकवृह्लीयान्बाहुमा

नं

॥७०॥
॥भाष्यं॥

त्रान्पालाशवैकंकतकार्ष्मर्यबैल्वान्पूर्वालाभेपूर्वालाभउत्तरान्खादिरोदुंबरान्वामध्यमदक्षिणोत्तरान्॥ गंधर्वइतिप्रतिमंत्रं॥ ॥गंधर्वस्त्वाविश्वावसुरित्यादिभिर्मंत्रैर्मध्यमदक्षिणोत्तरांस्त्रीन्परिधीन्परिदधातिप्रतिमंत्रंक्रमेण॥ कीदृशान्परिधीन॥ आर्द्रानशुष्कान्॥ पुनःकीदृशान्॥ एकवृह्लीयान्॥ वक्ष्यमाणानांपालाशवैकंकतादिपरिधिवृक्षाणांमध्येएकजातीयवृक्षसंबंधिनःएकवृह्लीयाः॥ तानेकवृह्लीयान्॥ त्रीनपिपालाशान॥ [illegible] अथवात्रीनपिवैकंकतानीति॥ किमर्थमिदंवक्ष्यतिपूर्वालाभेपूर्वालाभउत्तरानिति॥ तन्नएकस्यपरिधेर्द्वयोर्वापालाशयोरभावेजातिभेदोमाभूदित्येवमर्थमेकवृह्लीयानिति॥ त्रयोपियज्जातीयाःसंभवंतितज्जातीयानेवगृह्णीयात॥ नतुमुख्यद्रव्य [illegible] लाभेनैकोद्वौवापालाशौएकोद्वौवावैकंकतावितिकिंजातीयान्परिधीनित्यपेक्षायामाह॥ पालाशवैकंकतकार्ष्मर्यबैल्वान॥ पालाशान्पालाशवृक्षावयवान॥ ततोवैकंकतान्॥ विकंकतवृक्षावयवान॥ ततःकार्ष्मर्यान्श्रीपर्णीवृक्षावयवान॥ ततोबैल्वान्बिल्ववृक्षावयवान॥ किंप्रमाणान॥ बाहुमात्रान्॥ यजमानबाहुप्रमाणानित्यर्थः॥ प्रमाणेमात्रच्प्रत्ययः॥ बाहुःप्रसारितांगुलिहस्तआस्कंधात॥ तथालाभेपूर्वालाभेपूर्वोक्तवृक्षजातीयानामलाभेअप्राप्तौउत्तरा [illegible] त्तरान्परिदधाति॥

पूर्वा१ पूर्व१

व

॥७१॥ ॥देवया०२

ग्रा०

व२

त्रयाणां प्रथमं पालाशान्परिदधाति पालाशालाभे वैकंकतान् तेषामलाभे कार्ष्मर्यान् तेषामलाभे बैल्वानिति खादिरोदुंबरान्वा अथवा कार्ष्मर्याभावे खादिरान् खादि [illegible] रहृक्षयं वानस्पत्युदुंबरानुदुंबरवृक्षावयवान्वा परिधीन्परिदधाति ॥ ॥ कुतः ॥ ॥ यदि कार्ष्मर्यमयान्नाविंदेदिति कार्ष्मर्यालाभं प्रकृत्य श्रयाणामपि बैल्वखादिरोदुंबराणां तुल्यविकल्पतयाश्रुतत्वात् ॥ ननु पालाशैः सह विकल्पः कस्मान्न भवति व्यवहितसंबंधादभावविधानाविरोधाच्च । पालाशाभावे वैकंकतानामुदानकं कुर्यात् ॥ सर्वोपि मुख्याभाव एव खादिरोदुंबरानुपाददीत एवं पालाशाभावे वैकंक [illegible] तैः सह खादिरोदुंबराणां विकल्पेपि एतदेव दूषणद्वयं ॥ अतो बैल्वैः सहैव विकल्पः ॥ ॥ तदुक्तं ॥ ॥ अभावे हि पालाशस्यैव वैकंकतविधिर्यतः ॥ तेन बिल्वविकल्पाहौ खादिरोदुंबराविति ॥ नैव पालाशाः स्युरिति प्रकृत्य यदि पालाशान्न विंदेदथो अपि बैल्वाः स्युरथो खादिरा अथो औदुंबरा एते हि वृक्षा यज्ञिया स्तस्मादेतेषां वृक्षाणां भवंतीति वा आर्द्राः स्युः समध्यममेवाग्रे परिधिं परिदधाति गंधर्वस्त्वेति अथ दक्षिणं परिदधातींद्रस्येति अथोत्तरं परिदधाति मित्रावरुणौ त्वेति च श्रुतत्वात् ॥ पालाशादीनां पूर्वालाभे पूर्वालाभे उत्तरोत्तराणामयं विधिः प्रतिकावत्प्रतिनिधिनियमः ॥ तेनोत्तरोत्तरोपादाने प्रायश्चित्ताभावः ॥ प्रतिनिधित्वे तु प्रायश्चित्तं भवति ॥ त्रयः परिध

५ वैकंकतास्युर्यदि वैकंकतान्न विंदेदथो अपि कार्ष्मर्यमयास्युर्यदि कार्ष्मर्यमयान्न विंदे ५

पा

वे

॥७१॥ ॥भाष्यं॥

न

धीपरि६

यः पालाशकार्ष्मर्यखादिरौदुंबरबिल्वरोहीत विंकंकतानां येवाय ज्ञियवृक्षा आर्द्राः शुष्का वा सत्वक्कास्थ विष्ठो मध्यमो णीयां द्राघिष्ठो दक्षिणः द्राघीयानिष्ठो कृसिष्ठ उत्तरार्ध्ये इति ज्येष्ठ गंभमध्यमं प्रागग्रावितरावित्यापस्तंबः ॥ संस्पृष्टान्परिधीननुपदधातीति विसप्रवाह ॥ परि समंततो धीयंते स्थाप्यंतइति परिधयः ॥ न तस्याग्निकोयं शब्दो न संस्कार निमित्तो जातिनिमित्तो वातैलरूपमाहकात्यायनः ॥ बाहुमात्राः परिधय ऊर्जवः सत्वचो व्रणाः त्रयो भवंत्यशीर्णाग्रा एकेषां तु चतुर्दिशमिति ॥ ननु परितो धानाच्चेत्परिधय इति नाम तर्हि चत्वारः ॥ सत्यं ॥ मध्यमदक्षिणोत्तराणीति त्रयाणामेवोक्तत्वान्न भविष्यंति ॥ एवं च सति यत्रेदृशं वचनं नास्ति तत्र चत्वारो भवंति ॥ यथा पितृमेधे वारुणान्परिधीयैर्घ्नं त्रय एवाकृत्वा मध्यमपरिधावि तु लक्षणत्वात् श्रुतेर्मध्यमादिशब्दश्रवणाच्च त्रय एव ॥ एतच्च परिधिपरिधानमदृष्टाग्निसंस्कारार्थत्वात्तत्कार्यापन्नासु परिश्रित्स्वपि भवति ॥ मित्रावरुणौ त्वा पुरस्तात्परिधत्तामित्येवमूहः पितृयज्ञेइति कर्काचार्याः ॥ नेति संप्रदायः ॥ ॥ प्रथमं परिधिं समिधोपस्पृश्य वीतिहोत्रमित्यादधाति ॥ इध्मात् गृहीतायाः पूर्वसमितः ॥ तया समिधा तेनेध्मकाष्ठेन प्रथमं परिधिमुपस्पृश्योपविष्ट एव स्पृष्ट्वा ततउत्थाय तां समिधं वीतिहोत्रमित्यनेन मंत्रेणाहवनीयेभ्यादधाति प्रक्षिपति [illegible]

त्रयाणां हि मध्यमो भवंति ॥ न चतुर्णां ॥ पैतुरारवे यपि सर्वबदित्युक्तत्वान् ॥ ५

स्युः

वं

तृमे

॥अनुपस्पृश्यद्वितीयां२समिदसीति॥परिधिमनुपस्पृश्यैवद्वि॥भ्याधाय द्वितीयां५

॥७२॥ ॥देवया०२

वनीयेभ्याद्धातिप्र... ॥अथसमिधमभ्यादधातिमध्यममेवाग्रेपरिधिमुपस्पृशतितेनैतानग्नेसमिंधेयाग्नावभ्यादधाति तेनोऽअग्निंप्रत्यक्षं७समिंधेसोभ्यादधातिवीतिहोत्रमितिश्रुतत्वात॥ ॥उपस्पर्शनंचपरिधेःसंस्कारः॥परिधिमितिद्वितीयाश्रवणात॥अतश्चशतरुद्रियेपिभवति॥आहवनीयेभ्याधानंतुदृष्टार्थंतेनोऽअग्निंप्रत्यक्षं७समिंधइतिवाक्यशेषात॥अतश्चशतरुद्रियेसमिंधनरूपस्यदृष्टस्याभावादभ्याधानाभावः॥परिध्युपस्पर्शनमात्रंकृत्वासमित्त्रिरसनीयेतिसमीधमाहवनीयेभ्यादधातिसमिदसीत्यनेनमंत्रेणद्वितीयाग्रहणेप्राप्तमुपस्पर्शनंनिषिध्यते॥अनुपस्पृश्येति॥अथयांद्वितीयां७समिधमभ्यादधातिसमिदसीतिश्रुतेः॥सूर्यस्त्वेतिजपत्याहवनीयमीक्षमाणस्तद्वचनत्वात॥ ॥अध्वर्युरुपस्पृशन्नाहवनीयमीक्षमाणआहवनीयंविलोकयसूर्यस्त्वेत्यमुंमंत्रंजपतिसंहितास्वरेण॥अथाभ्याधायजपेत्सूर्यस्त्वेतिश्रुतत्वात॥कुतएतत॥आहवनीयमीक्षमाणइतिमंत्रस्यतद्वचनत्वादाहवनीयवाचित्वात॥सूर्यस्त्वेतिमंत्रस्यहेअग्नेसूर्यस्त्वापुरस्तात्प्राच्यांपात्विति॥अत्रपुरस्तात्पूर्वस्यदिग्वाचकत्वात्पितृयज्ञेसूर्यस्त्वादक्षिणतःपात्वित्यूहःसंप्रदायकारमतेअनूहः॥तदभिप्रायस्तुपुरस्तात्शब्दोग्रवचनोनदिग्वचनइति॥परिधापरिधानाद्धा

ति ॥७२॥ ॥भाष्यं॥

र्थ ना
वि
ति

२ योजनं॥नैमित्तिक२ ४ समीपेप्रत्यागत्य...तस्यैवबर्हिषोदेन्तृणेआदाय४

हवनीयेक्षणजपांतमिदमेकंकर्म॥एककार्यत्वात॥एकंहिकार्यमग्निसंस्कारःपरिधयश्चाग्निरक्षणार्थाःसूर्येक्षणजपोपितदर्थमेव॥तत्कुतःश्रुतेःगुप्त्यैव॥अभितःपरिधयोभवंत्यथैतत्सूर्यमेवपुरस्ताद्गोप्तारंकरोतीतिप्रैमंतेभवतीति॥ ॥अग्रेणवेदिंबर्हिषस्तृणेतिरश्चीनिदधातिसवितुरिति॥ ॥अध्वर्युर्वेदिंप्रत्याहवनीयसमीपाद्वेदिंसवितुर्बाहुस्थइतिमंत्रेणवेदिमध्येस्तृतस्यबर्हिषउपरिआहवनीयस्यपश्चात्प्रदेशेतिरश्चीउदगग्रेनिदधातिस्थापयति॥अथस्त्रीणांवेदिमुपावर्त्ततेसदेवतृणेआदायतिरश्चीनिदधातिसवितुरित्यादिश्रवणात॥ ॥आपस्तंबः॥ ॥समावनंतर्गर्भौदर्भौविधृतीकुरुतेइति॥तयाग्रंतेर्वेद्युदग्रेनिधायेतिचतथाअरत्निमात्रेविधृतीकरोतीति॥अयतेकैकाणवीर्ययांतुतस्यादेवतृणेआदायेतिपठितेतेनबर्हिषस्तृणेइतिसूत्रितंतिरश्चीइत्युदग्रे॥अतएववेदिस्तरणंप्रागग्रैर्बर्हिर्भिःकर्त्तव्यं॥आहुत्यावेदिमित्यवाच्य॥सामर्थ्यादेवतत्प्राप्तेर्वाच्यत्वात॥तृणनिधानस्यवेद्यधिकरणत्वाभावार्थत्वात॥अन्यथाहिनज्ञायतेक्वैतेतृणेनिधीयेतेइति॥ ॥अन्येवायुक्तत्वात॥ ॥अन्यएववातृणेआदायतिरश्चीनिधेयेतनन्वतस्यबर्हिषस्तृणे॥कुतः॥ ॥अयुक्तत्वादन्ययोरविनियुक्तत्वात॥अन्येहिअविनियुक्तेबर्हिषस्तृणेच

५ क्वान्वेच॥पुरस्तात्प्रस्तरादनंतर्गर्भौदर्भौविधृतीआदायसवितुरिति॥५

ग
ग
ग

वेदिस्तरणे विनियुक्ते। न च विनियुक्तयोर्वचनं विं अन्यत्र विनियोगो युक्तः॥ यथा अथ स्तीर्णायै वेदेर्दर्भतरणे अध्युषाद्दर्भे इति। तस्मादत्रान्य एव तरणे ग्राह्या। नन्वत्रापि वचनमस्ति काण्वीयायां अथ स्तीर्णं वेदिमुपावर्त्तेते तस्या दर्भतरणे आदायेति। न हि अत्रापि भवतु वेदितरणयोरेवोपादानं अत्र अधिकरणं तु कृत्वा चिंतावचने सत्ति न्यायस्य दुर्बलत्वात्। न हि न्यायो वचनं बाधितुमीष्टे। तस्मादत्र प्रकृते तु बर्हिषस्तरणे एवादाय वेद्यां निधेये। तथा च हरिस्वामिनः अथ स्तीर्णं वेदिमुपावर्त्तेत इत्युपावर्त्तनस्य दृष्टार्थत्वात्काण्वानां च तस्माद्धे तरणे आदायेति। विनास्तीर्णायाएव वेदेर्बर्हिषस्तरणे ग्राह्ये इति उक्तन्यायमन्यत्रातिदिशति। अन्यत्रापि तरणार्थे। अतोन्यत्रापि पवित्रप्रशूपाकरणग्रहोपस्पर्शनश्रपणाग्निमंथनादौ तरणार्थे तरणकार्ये प्रस्तुताद्बर्हिषोन्यान्येव तरणानि ग्राह्याणि। कुतः युक्तत्वादेव। यतः श्रुतेरेव विनियुक्तविनियोगे यत्नं करोतीति तस्या

द्दर्भतरणे आदायेति। अथ स्तीर्णायै वेदेरिति। अतो वचनाभावे अन्यदेव ग्राह्यं। ननु विषये लौकिकमिति वक्ष्यमाणत्वाद्वाच्यमेतत्। तद्धि सामर्थ्येन सर्वार्थं तथा प्राप्तानां मन्त्रीनां वाचनिकं विनियोगं विनान्यस्मिन्कार्ये तेषां नि राकरणपरं इदं तु सर्वकार्यस्य द्रव्यविशेषस्य संनिधानात्प्राप्तस्य नैकरणविषयमित्य

नरुक्तं। अत्र प्रसंगादिदं चिंत्यते। यूपांजने च सर्पिः किं प्रकृतं स्थाल्यां गृहीतां ज्यमुत लौकिकमिति॥

2 अतः पत्न्यावपि सर्वमाज्यकार्ये तेनैव कर्त्तव्यं इति प्राप्ते आह॥ ॥यूपांजने च सर्पिः॥ ॥यूपांजने सर्पिश्च तन्मन्यदेव ग्राह्यं॥
2 ननु प्रकृतं स्थाल्याज्यं॥ यद्यपि तत्र कृतानां संयुक्तेमुसर्वं तथापि यानि प्रकृतानां 2

पोनरुक्त्यं। अत्र प्रसंगादिदं चिंत्यते। यूपांजने च सर्पिः किं प्रकृतं स्थाल्यां गृहीताज्यमुत प्रकृतं लौकिकमिति। किं तावत्प्राप्तमाज्यस्थाल्याज्यं। कुतः। प्रकृतौ यावदाज्यकार्यं तत्सर्वं तेन कृतं ज्यकार्याणि तदर्थमेवं अतः प्रकृतिवत्पशावपि तेन तदर्थं नैव भवितव्यं न च प्रकृतौ यूपांजनमस्ति। तस्मान्न तदाज्यस्थाल्याज्यस्य प्रयोजकं अतो लौकिकमेवोपादाय यूपांजनं कर्त्तव्यं। ननु न हि विषये लौकिकमित्यनेनैव सिद्धत्वात्पुनरुक्तमिदं। मैवं तद्धि बाक्यावगतकार्यविशेषसंबधानामग्नीनां तद्व्यतिरिक्तेषु कार्येषु रणार्थमित्यपौनरुक्त्यं। पुरोडाशपयस्याधानासु चेद्धन्। ज्योतिष्टोमे श्रूयते पुरोडाशमात्रामैंद्रवायवे प्रास्यति पयस्यां मैत्रावरुणे आश्विने धानाः इति। तत्र पुरोडाशादिषु इद्धं न प्रकृतानि गृह्णीयात् इद्धन्नकृतानि लौकिकानीति विकल्प इति केचित्। पितृभूत्याचार्यास्त्वेवं व्याचक्षते। च शब्दस्तु शब्दस्यार्थे पुरोडाशपयस्याधानासु तु यो प्रकृतान्युपादद्यात् इद्धन्ये वोपादद्यान्नैं शास्त्रतः। अशास्त्रार्थ एवायं। प्रकृतस्योपादानं कुतः पुरोडाशादिषु द्वितीयादर्शनात्पुरोडाशादीनामेवायं प्र

पुसंबंधनिराकरणार्थं॥ इदं तु प्रकरणावगतकार्यविशेषसंबंधस्य घृतस्याप्रकृतकार्यसंबंधनिराक ५

तयोरसद यग्र स्तीर्णयोर्विधृत्योरुपरि प्रागग्रं प्रस्तरं स्तृणाति ऊर्णम्रदसमित्यनेन मंत्रेण ॥ तस्मादेव विधृती नामैते प्रस्तरं ८ ४
स्त्वा १ स्तृणात्यूर्णम्रदसमिति ४ ते १

॥७४॥
॥देवया०२

तिपत्ति रूपः संनिरोन ग्रहणं प्रतिपत्तिश्च विद्यमानानां कचिदुपयुक्तानां च भवति ॥ न प्रतिपत्यर्थमुत्पाद्यौ ॥ अपि चैवं
यवश्रवणान्येतानि विद्यमानानां चाग्रत्र गृह्यंते नावयवार्थमुत्पाद्यौ ॥ तस्माद्विद्वेव त्यपात्रेषु प्रतिपादितं
शेषं यजमानेन भक्षयितव्यमिति जैमिनेरप्ययमेव सिद्धांतः अपन यस्त्वेकदेशस्याविद्यमानसंयोगादि
ति अत इदं व्याख्यानं युक्तं ॥ तयोः प्रस्तर ७ स्तृणात्यूर्णम्रदसमिति श्रवणात् ॥ अत्र प्रस्तरस्याग्र प्रधानार्थं जुहू

अतः

धारणार्थत्वं तेन स्तरण मंत्रोपि ॥ तद्यज्ञे स्वासस्थं देवपितृभ्यः इत्यूहः ॥ अभिनिदधात्यात्वावसव इति ॥ आत्वावस
वइत्यनेन मंत्रेणाध्वर्युर्द्वाभ्याम पिहस्ताभ्यां प्रस्तरमभिनिदधौ आक्रामति प्रस्तराभिमुखोपाणी निदधाति तमभिनिद
धात्यात्वेति श्रुतेः नात्रोदकस्पर्शः [illegible] र्णम्रदसमात्वा प्रस्तरे इत्युक्तत्वान्मंत्रस्य प्रस्तरो देवता यतः ॥ आपस्तंबः तयोः ॥७४॥
प्रस्तरमभ्यादधात्यभिहुतं वराणि प्रस्तरमूलानि बर्हिर्मूलेभ्यो जुहूरसि घृताचीत्येते मंत्रे र नूची रसंसृष्टास्स्रुचः सा ॥भाष्यं॥
दयतीति ॥ सव्यांश्रन्येजुहूं प्रतिगृह्यनिदधाति घृताचीइति ॥ अध्वर्युर्जुहूं प्रतिगृह्य प्रतिशब्दाद्ग्नीत्समर्पिता ·था
मादाय सव्यांश्रन्ये सव्येन हस्तेनाश्रन्यत्र विमुक्ते प्रस्तरे निदधाति घृताच्यसि जुहूरित्यनेन मंत्रेण प्रस्तरस्यो

उपभृद्दक्षिणयाच ध्रुवामनवद्य छामिति ॥ उत्तराभ्यां मंत्राभ्यां प्रति मंत्रमेकैकामासादयति ॥ १

परि प्रागग्रमासादयति ॥ अभिनिहित एव सव्येन पाणिना भवत्यथ दक्षिणेन जुहूं प्रतिगृह्णाति स वा उपरि जुहूं सा
दयत्यध इतराः स्रुचः इति श्रुतत्वात् ॥ अपि वा जुहूमेव प्रस्तरे समं मूले जुहूं दंडं करोतीत्यापस्तंबः ॥ मनुश्च जुहूं प्रस्तरे
सादयति न रिक्तामवसृजेत् इति समं मूले दंडं करोतीति ॥ प्रतिग्रहणं च समर्पणपूर्वकं यतो यस्मै बर्हिः प्रयच्छतीति श्रुतो
समर्पणे विहिते बर्हिः प्रतिगृह्येति सूत्रितं ॥ अतोत्रापि प्रतिगृह्यति सूत्रेण समर्पणपूर्वकमेवोपादानं ॥ घृताचीइति मं
त्रस्य यथार्थत्वाज्जुहूमेव धीयप यस्या दावाज्यसहितत्केवलस्रुगासादने घृताचीत्यस्यैकस्य पदस्याप्रयोगः ॥ असि जु ६
मंत्रे हूर्नाम्नेत्येव प्रयोज्यं एवं पयस्यायाम सुपभृन्नाम्नीति ॥ प्रकृतावपि प्रागाज्यग्रहणादेः हविर्नाशे पंचशरावादौ क्रिय
माणे जुहूपभृतोर घृतवत्योरासादने चैवं वज्ञेयं ॥ एवमितरे उत्तराभ्यां प्रतिमंत्रं बर्हिषि उपभृतं ध्रुवां चाकृष्टं नुपू
र्वं ॥ इतरे जुहूं आन्ये द्वे स्रुचौ बर्हिष्यासादयति ॥ एवमिति प्रतिगृह्य ॥ इतरे के उपभृतं ध्रुवां च कथमासादयति
म अनुपूर्वं अनुक्रमेण वकृष्टे अपकृष्टे जुहूापेक्षया उपभृतं वकृष्टं उपभृन्नाम्नेत्युपभृतं ध्रुवा नाम्नेति ध्रुवामिति ॥
एवमेव श्रुतत्वात् ॥ आपस्तंबः उत्तरेण जुहूमुपभृतं प्रतिकृष्टतरामिवाधस्ताद्विधृत्योरुत्तरेणोपभृतं ध्रुवां प्रति
कृष्टतरामिवोपरिष्टाद्विधृत्योरिति ॥ तथा दक्षिणेन जुहूस्थानं सादयत्युत्तरेण वा ध्रुवामिति मानवे च ॥ अधस्ताद्विधृ
त्योरुपभृतं उपरिष्टाद्विधृत्योर्ध्रुवामसंसक्ताः स्रुचो नूचीः सादयतीति ॥ मंत्रांतर विधानाद्बर्हिषीत्यनेन च प्रस्त

॥७५॥
॥देवया०२

से

रणसादेवंशब्दे नप्रतिगृह्ये तावदेव लभ्यते ति नान्यसमर्पितेनादाय आसादयति । ननु उपभृतं ध्रुवां चेति नवक्त
व्यं इतरे इत्युक्त्वात् । सत्यं स्रुचामेवेदमासादनं न तत्स्य स्याज्यस्येति ज्ञापनार्थं पुनरुक्तमित्यदोषः । तत्कुतः । अ
तो स्रुचामेवासादनविधानात् । जुहूर्नाम्नेति जुहूमुपभृन्नाम्नेत्युपभृतं ध्रुवानाम्नेति ध्रुवामिति । तथा सवा उप
रि जुहूं सादयत्यधइतराः स्रुच इति च जुहूर्नाम्नेत्यादि मंत्रलिंगाच्च । प्रयोजनं च । ॥ विकृतावाज्यग्रहणभा
वेपि जुह्वादीनामासादनप्राप्तिः जुहूस्थानापन्नानां च शूर्पकपिर्णदोहनोदुंबरस्रुवादीनां प्रतिगृह्य पूर्वकं प्र
स्तरे सादनं भवतीति । पुरोडाशाभिघार्योद्वास्योपस्तीर्णे निधायानक्ति यस्ते प्राण इति । ध्रुवासादनानंतरं गार्हपत्य
समीपे गत्वा पुरोडाशावभिघार्योत्तरतउद्वास्य । पूर्वतरमुप [illegible] स्तीर्णे
पात्रे निधाय यस्ते प्राण इति मंत्रेणानक्ति । उपस्तीर्णे इति निष्ठांतेन भूतपूर्वनिर्देशात्पूर्वतरमुपस्तरणं । यत उद्वास्योप
स्तरणं कर्त्तुमशक्यं पुरोडाशेन रुद्धहस्तत्वात् । एतदभिघारणं हविर्मात्रस्य भवति पुरोडाशग्रहणमुपलक्षणार्थं अ
त्राहापस्तंबः । कपालवत्पुरोडाशादंगारानपोहति । स्रुवेणेत्याग्नेयं पुरमभिघारयति । तूष्णीमुत्तरं । यस्त इति प्रात
र्दोहं स्योनं स्रुर इति । पात्र्यामुपस्तीर्य पर्यावर्त्तयन्पुरोडाशमुद्वास्य वेदेन प्रमृज्य तस्मिंस्तीदेति पात्र्यां प्रतिष्ठाप
यति स्रुवेण कपालानि प्रम... त्य पुरोडाशमनाक्ति स्वशक्ति... मिति । उपरिष्टाज्जेभ्ये ज्याधस्तादुपानक्तीति च । कपा

ता याः प्रयोजनं

॥७५॥
॥भाष्यं॥

ब
ह
रोगरा

८

५८

लवदिति वेदेनेत्यर्थः । तैत्तिरीयेपि । अथादक्षिणेनाज्यस्थालीं स्रुवं च सव्येन पात्रीं वेदमित्येतत्समादाय प्रदक्षिण
मावृत्य प्रागुग्र त्य जघनेन गार्हपत्यमुपविश्य पात्र्यां द्वेधा परस्तरणी ते स्योनं इति । अथ दक्षिमादाय दक्षिणस्य पुरोडाशस्यां
गारान्प्रोहती दैर्मीति वेदेन विरजसं कृत्वाभिघारयति । अथैनमुद्वासयति उपरिष्टादभ्यज्याधस्तादुपानक्तीति च । अत्र
एकस्यामेव पात्र्यां द्वेधोपस्तीर्णविधानात्सर्वस्मृत्रेष्वेकवचनस्येव दर्शनादेकैव पुरोडाशपात्री भवति । तस्यां दक्षि
णोत्तरप्रदेशे निम्नस्थानद्वयं कृत्वा तत्रोपस्तीर्य पुरोडाशौ स्थापनीयौ । प्रकृतित्वाच्छानुहितेनैव प्रियेण धाम्ने
ति मंत्रेण सादनीयौ प्रकृतौ समवेतत्वात् । अस्य मंत्रस्य विकृतौ कुत्राप्यूहो न भवति । मानवे च । वेदेन पुरोडा
शयोर्भस्मापोहति । वेदोपयाम त्राज्यस्थाल्याः स्रुवेणाभिघारयति । पात्र्यामुपस्तृणाति उदगुद्वासयति वेदेना
पभस्मानं करोत्यनभिघ्नत्पाणिना वेदशिरसा वेति न तउपस्तीर्णे सादयति न ततो यस्त इत्यनक्ति अपर्यावर्त्तयन्न
धस्ताच्चोपनक्तीति दोहावलंकरोति अनुदाहरति हवींषि दक्षिणतो जुह्वाः पूर्णं स्रुवं सादयत्यग्रेण ध्रुवां
वेदमुत्तरेण ध्रुवामाज्यस्थालीमपरेण स्रुवं दक्षिणतः पात्रीं दक्षिणस्यां वेदिश्रोण्यां सायं दोहमुत्तरस्यां प्रातर्दो
हमिति ॥ ॥ का० क० च ॥ ॥ स्रुतो पुरोडाशौ वेदेन स [illegible] ज्यालंकृत्य पात्र्यां सादयति यानि घर्म इति कपालानि
विमुंचति विमोचनेतेनो हृद्धवींष्युद्वावेद्यां सादयति श्रोण्योर्दोहौ दक्षिणस्यां सायं दोहमृषभ इति प्रस्तरे स्रुचं

त्य
मह
ब

न
ध
५

॥७६॥
॥देवयो०२

दक्षिणस्रुग्भ्य इति ॥ ततोत्रायं क्रमः ॥ प्रथमं वेदेन पुरोडाशविभस्मीकरणं ततः पात्र्योः स्थापनं ॥ ततः पुरोडाश-
योरभिघारः ॥ ततः पात्र्यास्थानद्वये उपस्तारः ॥ अथ वा प्रथमं पात्र्यामुपस्तारः ततः पुरोडाशयोरभिघारः ॥ ततउद्गुद्वा-
सनं वेदेन उन्नविरजस्करणं ॥ ततः स्थापनं पात्र्योरुपरि ॥ ततः प्रा [illegible] णदानमिति ॥ अस्मिन्मंत्रे यजमानाभ्यां विंदेति द्वि-
यजमानके ऊहः ॥ स्वर्यजमानेभ्यो विंदेति बहुयजमानके महापितृयज्ञे च पशुषु प्रविष्टः पितॄणां विद्याम नुष्य-
इत्यूहः यथादेवतमन्यत ॥ अञ्जनमंत्रे ग्निं गच्छेत्यस्य स्थाने यथादेवतं प्रयोज्यं ॥ यस्मिन्हविषो यद्देवता तस्मिन्ह- यस्य या
तं विषि तद्देवतावाचि पदं द्वितीयांतं प्रयोज्यमित्यर्थः ॥ तद्यथा अग्नीषोमीये पुरोडाशे अग्नीषोमौ गच्छेति ॥ होह-
योरिंद्रं गच्छेति एवं सर्वत्र ॥ प्रत्यनक्ति कपालानि यानि घर्म इति ॥ यानि घर्म इति मंत्रेण स्रुवेण कपालान्यनक्ति ॥
अञ्जनं च प्रत्येकमुपधानक्रमेणैकार्थं युगपत्कर्तुमशक्यत्वात् ॥ प्रतिकपालं च मंत्रप्रयोगः बहुवचनं तु प्र-
जार्थं अत एव विकृतो एककपालद्विकपालेष्वनूहः प्रकृतावसमवेतत्वात् तस्मिं [illegible] वा अथवा तस्मिं मंत्रे वि- ॥७६॥
नैव शाखांतरात् ॥ स्रुवेणैव प्रत्येकमुपधानक्रमेणैव कपालान्यनक्ति ॥ तथा हापस्तंबः ॥ स्रुवेण कपालानि ॥गंभ्य॥
प्रत्यञ्ज्यति संख्यया उद्वासयति संख्यया संख्यावाचिना पूरणप्रत्ययांतेन शब्देन करणमंत्रांते तेन प्रथमं द्वितीयं
नं तृतीयमित्येवं गणयं उपधानक्रमेणैव कपालान्युद्वासयति प्रथममुद्वासयामीत्येवं यावत्कपालं प्रयोगः ॥ वि
मि द्वितीयमुद्वासयामि २

ष्ठतो कर्परस्यापि कपालस्थानीयस्यांजनोद्वासने भवतः ॥ प्रियेण धाम्नेति हवींषि वेद्यां कृत्वा ध्रुवा असादं-
निति सर्वाण्यालभते ॥ प्रियेण धाम्नेत्यनेन मंत्रेण आज्यस्थाली पुरोडाशादीनि हवींषि आलभते ॥ उपयोगक्रमेण ॥ ते- न्ना
न प्रथममाज्यस्थाल्या आज्यस्य ततो जुहूपभृद्ध्रुवास्थस्याज्यस्य ततः पुरोडाशादेरिति ॥ क्रमेणैव वेद्यां कृत्वा उदकू-
संस्थानि ध्रुवा यात उत्तरतो वेद्यामासाद्य ध्रुवा असदन्निति मंत्रेण तानि सर्वाणि हवींषि पाहि यज्ञपतिं नेति यजमानके ॥ इ
नि. ॥ पाहि यज्ञपतीनिति बहुयजमानके चोहः ॥ आपस्तंबः ॥ अपरेण स्रुचः पुरोडाशावासादयत्युत्तरैः सवपि वाम ध्ये वेद्याः ग्रा दो
सान्नाय्यकुंभ्यौ संदधाति पूर्वं शृतमपरं दध्य पेने स्रुहदन्ते दक्षिणा शृतं शृतमासोयमुत्तरस्यां दधीति ॥ त- द
था ॥ अग्रेणोत्तरेण वा ध्रुवां वेदं निधाय वेद्यां तात्परिस्तार्य होत्रे सदनं कल्पयित्वा सामीधेनीभ्यः प्रतिपद्यत इति ॥ वि-
कृतौ वपुप्रयोगक्रमेणैव हविषामालंभनं ॥ तेन ध्रुवालंभनादुत्तरं पृषदाज्यालंभनं पशौ कार्यं ॥ पाहि मा मित्यात्मा-
नं ॥ हविषामालंभानंतरं पाहि मा यज्ञन्यमित्यनेन मंत्रेण अध्वर्युरात्मानमालभते ॥ हृदयदेशं हस्तेन स्पृशति ॥ उपनि-
९ षत्सु हि अंतर्हृदये आत्मानं पश्येदिति कथ्यते ॥ अतो हृदयस्योपस्पर्शः ॥ आत्मा वै मनो हृदयमित्यर्थवत ॥ हेतु त्र- ८
५ स्यात्मनैविभोरस्पृष्टस्य स्पर्शासंभवाद्वा ॥ ततो उपस्पृशति च ॥ आत्मानमालभ्य उपस्पृशेदिति परिभाषितत्वा-

॥७७॥
॥देवया०२

तः सचायमालंभश्चात्मसंस्कारः करिष्यमाणकर्मार्थश्चोपकारः ततश्चपशोसुत्यायांच पुनःपुनर्हवि
रासादनेकृते नभवति प्रथमतएवसकृत्कृतेनात्मनः कर्मसमाधिपर्यंते संस्कृतत्वादिति ॥ अश्वमेधेचप्रथ
मेहनि संस्थिते वैश्वात्र मध्वर्योरन्नहोमो विहितः सच संस्थितेग्निष्टोमे प रितासु वसतीवरीष्वध्वर्युरन्नहोमं
जुहोतीति ॥ ततश्च विरोधान्मध्यमाहः संबंध्यापरात्रिकं कर्म सर्वं प्रतिप्रस्थाता करोति तत्र च प्रतिप्रस्थाता
परात्रे सवनीयपशुं तत्रस्य आज्यासादनात्लंभांते कृते अध्वर्युरन्नहोमं कुर्वन्नेवात्मालंभनं करोति ॥ तस्यकरि
ष्यमाणकर्मार्थत्वादिति ॥ अत्र वाव्रतोपायनमं ॥ अत्रास्मिन्नवसरे वाव्रतोपायनं व्रतग्रहणं भवति शाखां
तरात् ॥ द्विरभ्यासोध्यायपरिसमाप्तिसूचनार्थः ॥ इति श्रीमहायाज्ञिकदेवदत्तकृते कात्यायनसूत्रवृत्तौ तृती
योध्यायः समाप्तः ॥ श्रीशुभंभवतु ॥ श्रीरस्तु ॥ लेखकपाठकयोः कल्याणंभूयात् ॥ अदृष्टिदोषात्स्मृतिवि
भ्रमाद्वा यदर्थहीनं लिखितं मयात्र ॥ तत्साधुमुख्यैः परिशोधनीयं कोपं नकार्यं खलु लेखकस्य ॥१॥ भग्नपृष्ठ
कटीग्रीवा बद्धमुष्टिरधोमुखं कष्टेनलिखितं ग्रंथं यत्नेन प्रतिपालय ॥२॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखि
तं मया यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥३॥ संवत् १८२२ वर्षे पौषशुद्धि दशमी मंदवासरे इदं समाप्तं

॥७७॥
॥भाष्यं॥

त्रवाव्रतोपायनम् ६

॥श्रौतसूत्रस्य भाष्यं देवयाज्ञिकं तृतीयोध्यायः ॥७॥

॥१॥
॥देवया०२

श्रीगणेशायनमः ॥ ॥ होतृसदनंकृत्वापरेण वेदिं श्रोणिं वोत्तरेणेध्मात्समिधमादायाग्नयेसमिध्यमानाया ये
नुब्रूहिसाह। अध्वर्युर्वेदिमपरेणवेदेः पश्चाद्गार्हपत्याहवनी ययोरंतरालेहोतृषदनंकृत्वाहोतुरुपवेशनार्थं
वर्हिषादि वक्ष्यमाणशुष्ककुशैः शस्तीयमासनंस्थापयित्वा अथवावेदिश्रोणिमुत्तरेणहोतृषदनंस्थापयित्वातत
एहिहोतरित्येवंहोतारमामंत्र्यहोतरित्यत्रागतेसतीध्मादेकांसमिधमादायहस्तेगृहीत्वाग्नयेसमिध्यमानायानु
हो ब्रूहीत्येवंहोतारंप्रत्याह ब्रवीतिसअग्नयेसमिध्यमानायेत्यादिश्रुतेः। होतासीदतिअस्मिन्नितिहोतृषदनं॥
तस्यकरणमत्रस्थापनं। नतुसतउत्पादनं। आमंत्रितोहोतातरेणोत्करमित्यादिश्रौतसूत्राद्धोतुरेहि
होतरित्येवमामंत्रणंकर्त्तव्यं। वरुणप्रघासेषु अग्निभ्यांसमिध्यमानाभ्यामनुब्रूहीत्यूहः। अनेकयजमानेषु
स्यनीयाबहुत्वपक्षे ग्निभ्यः समिध्यमानेभ्योनुब्रूहीत्यूहः॥ ॥ होतरितिचैके॥ ॥ एकेशाखिनोग्नयेसमिध्य
मानायहोतरनुब्रूहीत्येवंविधप्रैषंकुर्वंति। तदुहैकआहुरग्नयइत्यादिश्रुतेः॥ ॥ प्रथमस्थानेनप्राक्स्विष्टकृतः॥
स्विष्टकृत आ सर्वेमंत्राः प्रथमस्थानेनप्रयोक्तव्याः स्विष्टकृतःप्रैषाणांमध्यमेवस्वरः। प्रथमस्थानंचोपां य
श्वपेक्षयाकिंचिदुच्चैर्भवति॥ ॥ मध्यमेनेडायाः॥ स्विष्टकृतंआरभ्यआइडायाः मध्यमेनस्वरेणसर्वेमंत्राजातं
प्रयोज्यं॥ ॥ शेषमुत्तमेन। इडातआरभ्यकर्मापवर्गांतंसर्वेमंत्राउत्तमेन स्वरेणप्रयोक्तव्याः। अतनुपांशुप्रयो
गः श्रुतेरित्यस्यदर्शपूर्णमासयोरत्रवृत्तिः स्वरांतरविधानात्॥ ॥ संतनवन्निवमेब्रूहीत्याहयजमानः। यजमानो ॥१॥
नु
॥भाष्य॥

दूष्यं देषांहैं वैरिणमवधीते॥ आक्रामन्निति॥ अंगुष्ठाभ्यांभूमिमाक्रामति॥ द्वेष्यंमनसास्मरन्नाइदमहमंत्रेणहस्तांगुष्ठाभ्यां ६

लि नेनमंत्रेणहोतारंसंबोधयेत्संतन्वन्नित्यादिना॥ ॥ अनूक्तमेवास्यसामिधेन्यस्तस्मात्ताब्रूयात्संतन्वन्निवमे
ब्रूहीतिश्रुतत्वात्। अयंचहोतृसंबोधनार्थः अतश्चप्रोषितेननवक्तव्यः। तत्रस्थेनेहसंबोधनासंभवात्। होतु
स्त्र संबोधनमत्राध्वर्युणाकर्त्तव्यं विशेषकर्तुरसंभवेसामान्यस्यसमाख्याप्राप्तस्यातिक्रमेकारणाभावा
दिति। तदुक्तंगुणेषुप्रतिनिधिः परार्थत्वादिति। अनेकयजमानेष्वेकएवहोतारंसंबोधयति। कृतत्वात्। सं
तन्वन्निवनाचनुब्रूहि। संतंन्वन्निवनोनुब्रूहीत्यूहश्च भवति॥ ॥ अंगुष्ठाभ्यांवाववाधतपाद्याभ्यांवेदमह
ममुमवबाधइतिद्वेष्य। चकाराद्यजमानएवेदमहमितिमंत्रेण हस्तांगुष्ठाभ्यांभूमौपीडयतीत्यर्थः। द्वेष्यस्य
सन्निधावभावात्। पाद्याभ्यांवा। पदयोर्भवौपाद्यौ। ताभ्यांपाद्याभ्यांअंगुष्ठाभ्यामितिविशेषश्रवणात्। अव
ष्य बाधनंचात्र वोवाजा इत्याद्यासुसामिधेनीषूच्यमानासुकर्त्तव्यं कुतः। तस्मादेतास्वनूच्यमानासुयंद्विष्या
त्तमंगुष्ठाभ्यामवबाधतेदमहममुमवबाधइतिश्रुतौपाद्याभ्यांश्रुतावंगुष्ठाभ्यामिति विशेषश्रवणं

तथापि काण्वानांपाद्याभ्यामितिविशेष श्रवणा सामान्यस्यविशेषपरतायांव्याप्यत्वाच्चन विक
ल्पः। तस्मात्पाद्याभ्यामेवांगुष्ठाभ्यांभूम्याक्रमणीया। अत्रामुमितिस्थस्थानेद्वेष्यस्यनामप्रयोज्यं। तन्नकेव क्र
लं नपुरुषार्थं। आभावेद्विषंतमितिभ्रातृव्यमितिवेतिमदांतरप्रयोगविधानात्। यदीदंद्वेष्यस्यनामोच्चारणंपुरु
मंगुष्ठाभ्यामेवद्वेष्यमवबाधते॥ नन्वांगुष्ठाभ्यामिति॥ बाराबोवधारणे। काण्वानांपाद्याभ्यां ७
कृतः

॥२॥ ॥देवयाज्ञ॥ ह

षार्थस्यात्तदाद्विष्या भावेद्विषदादिपदोच्चारणं न विदधीत। विहितं च। अतो नेदं पुरुषार्थमिति। अतश्च यजमाने
प्रोषितेध्वर्युणाप्यत्रैव वक्तव्यं। अंगानां प्रधानदेशकालतायाः उत्सर्गित्वात्। एवं थस्थादेवचाने कोप्येकः एव
करोति। उद्दृष्टो पि न भवति पुरुषार्थत्वाभावादेव॥ ॥अभावे द्विषंतं भ्रातृव्यमिति वा द्विष्यस्याभावे इदमहं द्विषंत
मवबाध इति अथवा इदमहं भ्रातृव्यमवबाध इति प्रयोगं कुर्यात्॥ शाखांतरादिविकल्पः। यावत्सामिधेनि वेद द
मरूतावतिथेन वज्रेणेति। इदमहममुमवबाध इति पूर्वोक्तेवबाधनमंत्रे अयमधिको विशेषः। इदमहमित्यस्या
नंतरं यावत्संख्याः सामिधेन्योस्मिन्कर्मणि तद्यावत्सामिध्यनी प्रस्तुतकर्म्म यावत्सामिधेनि
वेद यावत्संख्यास्सामिधेनीकं जानीयात्॥ तावतिथेन वज्रेण द्विषंतमवबाध इत्येवंविधमंत्रप्रयोगेणावबा
धते। तावतां पूरण स्तावतिथः। तेन तावतिथेन अयं भावः। यस्मिन् चदश्नासामिधेनीकं कर्म्म। तत्रेदमहं
पंचदशेन वज्रेणेति ब्रूयात्। यत्सप्तदशसामिधेनिकं तत्रेदमहं सप्तदशेनेति। ननु प्रकृतौ पंचदशैव सामि
धेन्यस्तर्हि पंचदशेन वज्रेणेत्येव कुतो नोक्तं। किं लक्षणावाक्येन। सत्यं। पक्षांतरसद्भावज्ञापनार्थं। अस्ति हि
पक्षांतरामेकविंशतिः सामिधेनीरपि दर्शपूर्णमासयोरनुब्रूयाद्विसाकुरिति। तेनश्चैतदा एकविंशेन
वज्रेणेति द्युर्थं लक्षणवाक्यमित्यदोषः। इदमहमित्यस्य पुनरुपादानेनतावतिथेनेत्यस्यावसरविधानार्थं
तावतिथेनेति पूरणात्र स्य यांतनिर्देशात् सर्वत्रेन सप्तदशे नवाएकविंशतितमेन चेत्येवं पूरणप्रत्य ॥२॥ ॥आर्थे॥

नो
५३
सि

श्री

८१

इति॥

यांतस्य संख्याशब्दस्य प्रयोगः सिध्यतीति ततः अपि त्र्यायां सामिधेनी त्रित्वे द्वेस्त्त यस्तैः संप्रसारणं चेति
त्रिशब्दस्येति यप्रत्ययांतस्य प्रयोग इदमहं तृतीयेन वज्रेनेति। उपसत्सु चनवस्तु सामिधेनीष्विदमहं नव
मेनेति प्रयोगः॥ नातादसंख्यादेर्म डितिस्मरणात्। इष्टका पशो च तेषां चतुर्विंशतिः सामिधेन्य इत्य
स्मिन्पक्ष इदमहं चतुर्विंशेन वज्रेण चतुर्विंशतितमेन वेति यथेच्छं प्रयोगः॥ प्राजापत्यपशुपक्षे तस्यैक
विंशतिः सामिधेन्य इति श्रुतत्वात् इदमहमेकविंशेन एकविंशतितमेन वेति। विंशत्यादिभ्यस्तमड
न्यतरस्यामिति स्मरणात्॥ ॥प्रतिप्रणवमाधानं॥ ॥सामिधेन्यनुवचनं कुर्वन् होता पंचदशानामपि
सामिधेनीनां मंतेषु प्रत्यृचं प्रणवं पठति तत्राध्वर्युः प्रतिप्रणवं प्रणवे एकैकस्येध्मस्याहवनीये आधानं
प्रक्षेपं करोति। सर्वार्थं कालार्थः संयोगो नांगांगिभावः। उभयो रथेन्यथर्थत्वात्। इध्मो ह्यग्नींधनार्थः सामि
धेन्योपि ह्यमानाग्न्यनुवादिन्यः। प्रयोजनं सामिधेन्यामनुक्तायामिध्मकाष्ठप्रक्षेपे सामिधेनी अनूच्यत
एव। सामिधेन्यभावेपि पशौ स्यायां इध्मकाष्ठानां प्रक्षेपो भवति। अग्नींधनार्थत्वात्। उपवाजनसंमार्गादिव
दग्निसंस्कारकत्वात्। सौत्रामण्यां च प्रतिप्रस्थातुरपि दक्षिणाग्नौ॥ ॥समिद्ध इति प्रागतः सर्वमिध्ममेकं
वर्जमनुयाजार्थं॥ समिद्धो अग्न आहुतेस ततः प्रतीकात्प्राग्यः प्रणवस्तस्मिन्प्रणवे एकं वर्जं एकां सामि

प

॥३॥
॥देवेया०२

धेनीं वर्जयित्वा अवशिष्टं सर्वमिध्मं प्रक्षिपेत्। अनुयाजार्थं वेदिति। यद्यनुयाजा भवंति तदैकं वर्जं एकां वर्जयित्वा इहानुयाजानामेव त्रयभावादेतद्वितिविषयं। आतिथ्यादावनुयाजा भावे समित्परिशेषणं न भवति। समिद्धो अग्न आहुतेत्यतः प्राचीनं पूर्वं सर्वमिध्ममभ्यादध्यायदन्यत्समिध इति। समिद्ध इति प्रागतइत्यस्तः शब्दोपादानात्सामिधेनी विवृद्धावागतुनामत्वायोः प्रथमं च सर्वे ध्मस्य प्रक्षेपः। अर्द्धे द्वौ हि काष्ठे वृद्धि भवति। तथा चाहापस्तंबः॥ प्रणवे प्रणवे समिधमादधाति सामिधेनी विवृद्धौ काष्ठानि विवर्द्धते प्रतिलक्ष्य मानासु प्रद्धाति वत्समिद्धो अग्न आहुतेत्यभिज्ञायैकामनूयाजसमिधमवशिष्य सर्वमिध्मशेषमभ्यादधाति परिधानीयायां वेति॥ ॥ अनुवचनांते वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेण पूर्वमाघारमाघार्याग्निमग्नीत्संमृड्ढीति। त्रिरेव प्रथमां त्रिरुत्तमामन्वाह इत्यनुब्रूयादिति प्रकृते तदनुवचनमितिश्रुतेः। अतानुवचनांतः सामिधेन्यंतः। तस्मिन्ननुवचनांते सामिधेनीनामंते ध्वर्युर्वेदेन करणभूतेनाहवनीयमग्निं त्रिरुपवाज्य वाजयित्वा आज्यस्थाल्याः सकाशादाज्यं गृहीत्वा स्रुवेणाहवनीये उत्तरभागे जुहोतीत्यर्थः ततः प्रांच तूष्णीमेव पूर्वमाघारमाघार्य। ततोग्नीध्रं प्रति अग्निमग्नीत्संमृड्ढीति प्रैषमाह। स्रुवेण पूर्वमाघारमाघार्याग्निमग्नीत्संमृड्ढीति श्रुतत्वात्। तथा स्रुवेण तमाघारयति तूष्णीं तमाघारयतिन स्वाहेति वचनेति श्रुतेः ॥३॥
॥भाष्ये

माघार

अभिरुक्तो वै प्रजापतिरिति श्रुतेः॥१

तत्लाश्वौ अ त्र प्रजापतिर्देवता। अनिरुक्तत्वात्। पूर्वे देवतासामान्यादिति स्त्रत्वात्। तथा चाहापस्तंबः। प्रजापतिं मनसा ध्यायन्निति। अत्र स्वाहाकारोपि न भवति न स्वाहेति वचनेति प्रतिषेधात्। च शब्दोप्यर्थे। स्वाहेत्यपि न भवतीत्यर्थः। उपवाजनं त्वदृष्टार्थं न हि वेदेन त्रित्वविशिष्टोपवाजनेनाग्नेर्दीपनं दृष्टार्थः संभवति। तस्माददृष्टार्थमेव। प्रयोजनं परिश्रित्तस्वपि भवति। स्रुवेणेति जुहूनिवृत्त्यर्थं यतो जुह्वावचन इति होमे जुहूः प्राप्नोति। आघारमिति संज्ञा संव्यवहारार्थः। आघारयेत्येतद्ध्यादिगुणप्राप्त्यर्थं। अनुमाघारयति दीर्घमाघारयति संततमाघारयति प्रांचमाघारयतीति। वरुणप्रघासेषु सौत्रामण्यां चाग्नीदग्नी संमृड्ढीत्यूहः। क्रमेण भयोः संमार्गः। दशाहुतिपक्षे वन्यथ्यामयोग्नी संमृड्ढीत्यूहः। षडाहुतिपक्षे तु संमार्ग एव न भवति। पूर्वघारस्तु अदृष्टार्थ आरा पंडुकारकः। अतश्च यावदुक्तो गृहमेधीयपक्षस्यादौ न न भवति॥ उपवाजनं तु चत्ततएवाग्नेरदृष्टसंस्कारत्वात्। मानवे वसुदेवतास्त्वप उपस्पृश्य वेदेनाग्निं त्रिरूपवाज्याग्रे वेघाः सम्मृज्य पूर्णे स्रुवे स्रुवायाहवनीयस्योप त्यवदापयाम उत्तरपरिधिसंधिस्पर्शयित्वोत्त मर्दन्याहितस्य प्राचीनं मनसा प्रजापतये स्वाहेति ज्वलति जुहोति सपायेन स्रुवं मंथा व्ययथास्थानं स्रुवं वे दचनिदधाति। काठके च। इध्मसामिधेनीशेषं प्रणवे प्रणवे समिधमादधात्यनूक्तासु स्रुवेणाघारं मनसा प्रजापतये स्वाहेत्युत्त इग्नेः संततं दीर्घं प्रांचं जुहोति ध्मसाघारमाघार्याग्नीत्परिधींश्चसादि॥ ॥इध्मसंनहनैरनुपरिधि संमार्ष्टग्ने वाजजिदिति त्रिस्त्रिः परिक्रामं॥ इध्मस्य संन

प्र
ज

परिधि

॥४॥ ॥देवया०३॥

नानीध्म संनहनानि। तैरिध्मसंनहनैरिध्मबंधनार्थैः स्रुग्भिरनुपरिधिं संनिकृष्टेषु त्रिष्वग्निप्रदेशेषु प्रदक्षिणं क्रमेणैकैकस्मिन्प्रदेशे आहवनीयमग्निं त्रिस्त्रिः संमार्ष्टि संमार्जनेनाग्निं विस्रस्तस्कं उज्ज्वलं करोतीत्यर्थः। अग्ने वाजजिदिति मंत्रेण किं कृत्वा परिक्रामं परिक्रम्य परिक्रम्य तत्तत्परिधिदेशं गत्वा तदायामानुसारेण पार्श्वतोऽग्निं संमार्ष्टीत्यर्थः। अथ संमार्ष्टीति प्रकृत्य परिक्रामं संमार्ष्टि परिक्रामं हि योग्यं युंजतीति त्रिस्त्रिः संमार्ष्टि त्रिवृद्धि यज्ञः ससं मार्ष्ट्यग्ने वाजजिदिति श्रुतेः। अत्र हरिस्वामिनः। परिक्रामं परिक्रम्य परिक्रम्य प्रकृतत्वात्तमेवाहवनीयं पूर्वेण परिक्रम्य यजतिस्थाने स्थितो दक्षिणपार्श्वे संमार्ष्टि। ततस्तत्रैवस्थितः पश्चिमपरिधिलग्नं संमार्ष्टि। ततः पूर्वेण परीत्य उत्तरतः संमार्ष्टि उपरि च। एवं परिक्रामं अन्ये त्वाहुः। अग्निसंस्कारायपश्चिम पार्श्वे प्रथमपरिधिः परिहितस्ततो दक्षिणास्ततउत्तरश्च। अग्निप्रकरणेप्येकमेवयोगादेशेन चेहकश्चित्तस्यक्रमस्य विरोधस्तथापि स्रुदेशे संस्थैव भवतीति पश्चिमपार्श्वएव प्रथमं संमार्जनीयस्ततो दक्षिणात्ततउत्तरतश्चेति। त्रिस्त्रिरिति दिशि दिशि त्रिस्त्रिरिति वीप्सा। तत्र च त्रति दिशि सकृत्सकृन्मंत्रेणाग्निं संमार्ष्टि। ततो प्रदक्षिणं परिक्रम्योत्तरतः स्थितः पश्चात्पार्श्वेऽग्निं संमार्ष्टि। पुनः प्रदक्षिणं परीत्य यजतिस्थानस्थ उत्तरे पार्श्वे द्विर्द्विस्तूष्णीं। अपरे अनुपरिक्रामं संमार्ष्टीति वचनात्प्रतिदिशं मार्गं परिक्रमणं कुर्वंतीति। तथा च पूर्वे

॥४॥ ॥भाष्य॥

१ संमार्ष्टि। पुनः पूर्वेण परिक्रम्य यजतिस्थाने स्थित उत्तरपार्श्वे संमार्ष्टि। पुनरप्रादक्षिणेन उत्तरतो गत्वा पश्चा-

णा परिक्रम्य यजतिस्थानस्थो दक्षिणपार्श्वेऽग्निं संमार्ष्टि। पुनरप्रदक्षिणं परीत्योत्तरस्थो मध्ये उपर्यग्निं तूष्णीं संमार्ष्टि। केचित्प्रतिसंमार्गं प्रदक्षिणमेव परिक्रम्योपविश्य संमार्गं कुर्वंति। अंते च सकृदितरथावृत्ति तूष्णीमुपरि॥ ॥परिक्राममित्यत्राप्यनुवर्तते। परिक्रम्याहवनीयस्योपरि मध्यप्रदेशात्तूष्णीं त्रिर्मार्ष्टि त्रिस्त्रिरिति वीप्सया त्राप्रिपि त्रित्वप्राप्तेः। अथोपरिष्टात्तूष्णीं त्रिरिति श्रुतेः। अत्र सूत्रे तूष्णीमिति यत्नाद् न्यासु तिसृषु दिक्षु प्रतिदिशं मंत्रावृत्तिर्भवतीति ज्ञायते। उपरिष्टात्तूष्णीमिति त्र वत्पार्श्वेषु सकृत्सकृदावर्तते संमार्गं मंत्र इति दर्शयिति। इतरथा स्ये कद्रव्ये कर्मावृत्तौ सकृन्मंत्रवचनमिति संमार्गदौ सकृदेव मंत्रः स्यात्। केचिदाचार्या स्त्वेवमाहुः। नपरिधिषु प्रधानक्रमेण संमार्गः। नह्ययं परिधिसंस्कारायेनाभिप्रवृत्तात क्रमत्र आश्रीयते। अग्निसंस्कारस्त्वयं तेन प्रदक्षिणोपचारोदकसंस्थतां संपादनाय प्रथमं दक्षिणतः संमार्गः। स चायं संमार्गे यावत्कृतेपि भवति कुतः। होमसाधनभूताहवनीयसंस्कारत्वात्। अदृष्टार्थश्चायं। तेनाहवनीयस्थापन्नासु परिश्रित्स्वपि भवति। दशाकृतिपक्षे चावभृथेष्टिमस्वपि भवति। तत्रापो वाजजितो वाजं तः सरिष्यंतीर्वाजजितः संमार्ग्मि स्यूह॥ ॥अपरमाहवनीयादंजलिं करोति नमो देवेभ्यः स्वधा पितृभ्य इति दक्षिणात्तु तानं। आहवनीयादपरं आहवनीयस्य पश्चात् पूर्वतो पुरस्तात् नमो देवेभ्य इति मंत्रेणाध्वर्युरंजलिं करोति।

॥५॥
॥देवया०३
त

नमस्कारार्थत्वाच्च पुटांजलिः। ततः स्वधापितृभ्य इत्यनेन मंत्रेण तस्मा [illegible]
दंजलेर्दक्षिणतो द्वितीयमंजलिमुत्तानं करोति पूर्वाभिमुखयज्ञोपवीत्येव। मनुः। उत्तानौ पाणी कृत्वा।
जुहूपभृतोरग्नेरिति। तदेतदंजलिकरणमुत्तराघारार्थं। कुतः। श्रुतेः। स स्रुचोत्तरमाघारमाघारयिष्य
न्पूर्वं पारस्कन्चाचंजलिं निदधाति नमो देवेभ्यः स्वधापितृभ्य इति। अतश्चोत्तराघारे भावे ऽंजलिकरणाभावः॥
अप उपस्पृश्य सुयमे मे इति जुहूपभृतावादायोत्तरां जुहूं कृत्वा दक्षिणातिक्रामन् संम्रिणाविध्यवितिः॥
अंजलिकरणानंतरमप उपस्पृश्य यदकं स्पृष्ट्वा प्रथमं पाणिभ्यां जुहूमादायोत्तरां कृत्वा उपभृतमुपरि नि
धाय ततः सुयमे मे इति मंत्रांते द्वे अपि स्रुचौ सहैवादायाघि [illegible] विलि विति मंत्रेणौ क्षिणातिक्रामति दक्षिण
स्यां दिशि गच्छतीत्यर्थः। सुयमे मे भूयास्तमिति स्रुचावादत्त इति श्रुतेः। आपस्तंबः। उपभृति जुहूमस्या
दधाति मुखतो भित्त्वा मु [illegible] वउपावहरति सर्वत्रैवमसाधानो यावदरणोन नवतान वशिजयति नाभि
दैवो स्रुचोराघारयत्य [illegible] गाविद्धु मावामवक्रामि षमित्यग्रेपास्कचा रपरेणमध्यमं परिधिमनवक्रा
मन्प्रस्तरमिति मिहापितृयज्ञे चस्रुचोरादानमंत्रे अस्कन्नमद्य देवपितृभ्य आज्यं पूसंभ्रियासमित्यूहः
कार्यः। नन्व पस्पृश्ये तिनवक्तव्यं। पित्र्यमंत्रमुक्त्वा प उपस्पृशेदिति परिभाषायामुक्तत्वादिति चेत्।
महाप्रेत्यपक्षे च स्रुचोरपरेण मध्यमं परिधिमनवक्रामन्प्रस्तरमिति॥२

॥५॥
॥का०७॥

न प्राचीनावीतीत्वदक्षिणामुखत्वयोर्व्युदासार्थं पुनरुक्तमित्यदोषः॥ ननूत्तरां जुहूं कृत्वेत्येतत् व्यर्थमुक्तं॥
पाणिभ्यां जुहूं परिगृह्योपभृत्साधानमादानकाल इति परिभाषायामुक्तत्वात्। सत्यं व्यर्थं। व्यर्थं सदेतस्या
र्थस्य ज्ञापकं भवति मंत्रवज्जुहूपभृतोरादानमुत्तराघारार्थं एवादाने भवति। न प्रयाजाद्यर्थमादान इति।
यतः पुनः सूत्रकरणे नैवं ज्ञायते ऽन्यस्मात्स्रुगादानादिदं स्रुगादानमन्यत्ततो विशिष्टमिति। अंद्रिणा
विसयंयपजतिस्थानप्रतिगमने मंत्रः। सोप्युत्तराघारार्थगमन एवाउ वांतरप्रकरणात्॥ परिधीनपरेण
संचरा होष्यतः॥ अपरेणात्यैपूप्रत्ययांतं तत्संयोगे एनपा द्वितीयेति परिधीनिति द्वितीया। परिधीनपरेण प
रिधीनां पश्चात्स्रुचा पूर्वेण होष्यतो होमं करिष्यतो ध्वर्योर्गमनागमनायायं संचरो मार्ग इत्यर्थः। संचरय
नेनत्यस्मिन्चेति संचरः गोचरसंचरेत्य। सर्वाधिर्ययं संचरो नोत्तराघारमात्रे। होष्यतः संचर इत्युक्तत्वात्। अ
न्यथा परिधीनपरेण दक्षिणातिक्रामती त्येतावदेव ब्रूयात्॥ सव्येनेता दक्षिणेनाभुतैः ग च्छतीति सूत्रशे
षः। इतो स्मात्स्थानाद्यजति देशं गंतुं सव्येन पादेन गच्छति। अमुतो यजति देशात्प्रत्यागच्छन्दक्षिणेन पा
देन प्रत्यागच्छति। एकैकेन पादेन गंतुमशक्यत्वात्तस्य प्रथमं प्रवृत्तिर्विवक्षिता। तेनेतो गच्छता सव्यपादः प्र
ति क्रमणप्र थमं प्रथममग्रतः प्रेरणीयः॥ आगच्छता च दक्षिणा इति। अथातो तिक्रमणस्येति प्रकृत्य यजमा
न आवर्तयिष्यं सव्येनातिका [illegible] मति दक्षिणेनाव्यतिश्रुतेः। एतदपि सर्वार्थं

न
ध

॥६॥
॥देवया०३

मेव। अथातोतिक्रमण। ऽस्येसतिक्रमणमात्रं प्रकृतस्य श्रवणात्। न चाश्रावयिष्यन्निति श्रवणादाश्रावण विशिष्टएवातिक्रमणेऽयं नियम इति वाच्यं। तथा सति विशिष्टानुवादलक्षणवाक्य भेदापत्तेः तस्मा त्सर्वथैव। अत एव सूत्रकारेणोत्तराघारस्सूत्रितो। उक्तं च। आश्रावणविशिष्टे तु नियमो यद्ययं भवेत्। विशिष्टस्यानुवादत्वाद्वाक्यभेदः प्रसज्यत इति॥ ॥ वसुमतीमित्यवस्थाय इत इंद्र इति जुहोत्युत्तराघारं। वसु मतीमग्न इति मंत्रेण यजति दिव्यो। उदं [illegible] प्रा [illegible] वस्थाय ईशानाभिमुखः स्थित्वा जुहू मवता येतिं इंद्र इति मंत्रेण आ हवनीयस्य दक्षिणभागे स्रुजुदीर्घसंतं तं प्राञ्चं जोहवेनाज्येनोत्तराघारं जुहोति। तस्माद्दक्षिणतस्तिष्ठन्नाघारयति॥ स यदुन्नयत आघारयतीति चैत्र श्रवणात्। उन्नयत इति पूर्वाघार उत्तरतः। उत्तराघारश्च दक्षिणत इति। उत्तराघार इत्यस्य संज्ञा संव्यवहारार्था। जुहोतित्वादुपवेशनेप्राप्ते अ[illegible] वस्थाये त्येन तद्बाध्यते। कुतः तिष्ठत्ययं वाचैतस्माद् क्षिणतस्तिष्ठन्नाघारयतीति वचनात्। अत उत्तराघारे तिष्ठति क्रिया वाचनिकी तेन शातरुद्रियादि जुहोतिष्वपि सद्भ्यः जुहोतिनाज्येन तिष्ठते चेंद्राय स्वाहेत्युत्तराघारो होतव्यः [illegible]
[illegible] मंत्रवर्णाच्चात्रेंद्रो देवता। कथं। इत्थं। इत इंद्र इति जुहोतीति होमो विहितः। होमश्च देवतोद्देशेन परित्यक्तस्य द्रव्यस्याग्नौ प्रक्षेपः। तत्रावश्यंभाविन्यां देवतायां तद्धितचतुर्थ्योरश्रवणान्मंत्र स्य च क्रियासाधनाभिधायित्वसामर्थ्यात्ततो मंत्रवर्णाद्देवता परिकल्प्यते। अतश्चात्रेंद्रो देवता॥ ततश्चेंद

॥६॥
॥लाघ्रे

दौनभवन्ति। अग्निसंमार्गस्त्विअनुयाजाभावेप्यग्निसंस्कारकत्वादातिथ्यादौप्रवर्त्तत एवदंतर्यश्चप्रैषोपि। गृ
हमेधीयेतुनप्रवर्त्तते। सांतपनीयातत्रमध्यपातात्। समिदादानमाधा नार्थंनतुप्रैषार्थयमुपग्रहः। ततश्चा
नुयाजाभावेतस्यात्रभावादेवादानाभावः। उल्मुकसमासश्चानुयाजार्थश्चाहवनीयसंस्कारः। अतश्चसमासवि स
स्मरणेत्रअनुयाजसमाप्त्यनंतरंपुनस्समासः। वरुणप्रघासेषु ब्रह्मन्प्रस्थास्यावः। समिधावाधायाग्नीअग्नीत्संमृड्ढि बाधा
त्येवमूहः कार्यः। दर्व्याहुतिपक्षेवमध्येष्टावपाग्नीन्संमृड्ढीत्यूहः। षडाहुतिपक्षेचसंमार्गएवनभवति॥ एषातइति
होतानुमंत्रयते। होतोषाँइत्यनेनमंत्रेणात्तांसमिधमंत्रयते। प्रैषश्रवणानंतरंचाग्नीनांसमिधमिध्मकाष्ठरूपा ध्मं
माहवनीयेत्यादधाति। ततस्तस्याअनुमंत्रणं॥ अथसमिधमभ्यादधातीतिपठित्वातान्होतानुमंत्रयतइति
अभ्याधानानंतरमनुमंत्रणश्रुतेः॥ अत्रानतियजमानः॥ अनुमंत्रणंकर्तृमत्वानतिहोतरियजमानए
षातइतिसमिधमनुमंत्रयते॥ तांहोतानुमंत्रयतएषातइतिसयदिमन्येतइत्युक्त्वानहोतावेदेस्यपि

॥२६॥
॥देवया०३

स्वयमेव यजमानोनुमंत्रयेतेति श्रुतेः। वरुणप्रघासे
षुच एते वामनी समिधौ ताभ्यां वर्द्धेथां वाचवयायेथां। इत्यूहः। अनेकयजमानके ऽउदयनीयाबद्धत्वेब्रह्मन्प्रस्था
स्यामः। समिधमाधायाग्नीनग्नी समृड्ढीति प्रतिष्ठतेति प्रसवः। समिदनुमंत्रणे। एता वो ग्नयः समिध (तेत्र)
स्ताभिर्वर्द्धध्वं वा वयायध्वमिति ब्रूहः। द्वित्वे च वरुणप्रघासवत्। कर्कमते त्वग्निपदस्य कुत्राप्यूहो व भवति॥ ॥
संमार्ष्टि पूर्ववदपरिक्रामं सकृत्सकृत्सस्रवाः समिति। अग्नी पूर्ववत्सस्रवाः समिति मंत्रेण सकृत्सकृद
ग्निं समं मार्ष्टि संमार्जनेनाग्निं विरलस्क सुज्वलं करोति। कथं। अपरिक्रामं। परिक्रमणमकृत्वा एकत्रोत्तरतः
स्थित एव। दक्षिणपश्चिमोत्तरमध्येषु चतुर्ष्वपि अग्निप्रदेशेषु संमार्ष्टि। पूर्ववदिति ध्मसंनहनेरनुपरिधय्य ग्ने
वाजजिदिति त्वयैतावल्लभ्यते। त्रिस्त्रिरिसेतन्नित्यर्थं सकृत्सकृदित्युक्तं। परिक्रामसमित्येतस्य निवृत्त्यर्थमपरि
क्राममिति। .... ।सस्रवाः
समित्ययं अग्ने वाजजिदित्यस्मिन्मंत्रे विशेषः॥ पूर्वसंमार्गे हि परिक्रामं संमार्ष्टि परिक्रामं हि योग्यं यु
जतीति अर्थवादात्। परिक्रम्य परिक्रम्यतिष्ठत एव योग्ययोजनवत्संमार्गेपि योजनस्थानीयस्तिष्ठता
कर्तव्य इति गम्यते। संमार्गश्चाग्निसंस्कारः। तेन तु तारुद्रियेतत्स्थानीय त्रासु परिश्रित्स्वपि भवति। इ
शाकुतिपक्षे व भस्थेष्वाल्स्वपि। तत्रापो वाजजितो वाजं वः सस्रृवांसो वाजजितः समार्ज्मी त्यूहः। ब्रह्मानुरातो

(परिक्रम्य)

॥२६॥
॥भाष्य॥

नुयाजैस्त्रिभिः श्वरत्योपभृतं समानीय। ब्रह्मणा ॐ प्रतिष्ठेत्येवमभ्यनुज्ञातोध्वर्युरोपभृतमाज्यं सशेषं (उ)
जुह्वां समानीय त्रिभिरनुयाजैश्चरति। ब्रह्मानुरात इति ग्रहणं सर्वप्रैषोत्तरकालमेतत् इत्यस्यावसर
विधानार्थं। अन्यथा जत्रित्वप्रज्ञापनार्थमुक्तं। अथानुयाजान्यजति स वैरखलु बर्हिः प्रथमं यजति
अथ नराशंसं द्वितीयं यजत्यथाग्निरुत्तम इति च श्रुतत्वात्॥ ॥अतिक्रम्याश्राव्याह देवान्यजेति।
समानयनानंतरं जुहूमध्युह्यातिक्रम्य यजतिदेशं गत्वा आश्राव्य देवान्यजेत्येवमाह ब्रवीति। अतिक्र
म्याश्राव्य इत्यनेन यजतिदेशप्राप्तपुरोनुवाक्यानिरासः। तत्कुतः। अथ यत्पुरोनुवाक्याः अनुयाजा भ (न)
वंतीति श्रुतेः॥ ॥यज यजेत्युत्तरौ। उत्तरौ द्वावनुयाजौ यज यजेत्येवं प्रेष्यति। थमे एवं देवान्यजेति (त्र)
उत्तरयोस्तु यज यजेत्येवाय ज्ञौ वरुणप्रघासेष्वेवमनुवादादृश्यते देवान्यजति यज यजेतीति॥ ॥देवां
देवानिति वा सर्वत्रानियमश्रावात्। अथवा देवान्यज देवान्यजेत्येवमेव सर्वत्र त्रिष्वपि अनुयाजेषु ब्रूयात्।
कुतः॥ नियमश्राबान्। देवान्यजेत्येवाध्वर्युराह देवं देवमिति सर्वेषु होतेति अत्र नियमप्रतिपादकस्यैव
कारस्य श्रवणात्। अत स्त्रिष्वपि देवान्यज ...स्येन नत्वद्वयोरुत्तरयोर्यजयजेत्येतावन्मात्रमिति। किंच॥ ॥ (स्वेवं)
विकृतिदर्शनाच्च॥ ॥विकृतावुत्तरयोरथ नुयाजयोर्देवान्यजेत्यस्य प्रेष्यस्य दर्शनाच्च॥
प्रकृतावपि सर्वेष्वेव प्रेषो भवतीसवसी

ब्रह्मन्प्रस्थास्यामीत्येतत्प्रैषसमनंतरमेव प्राप्नोति॥ न सर्वप्रैषानंतरं त्रिभिरिति ...चा ३

॥२७॥
॥देवया०३

यते। तथाच महापितृयज्ञे प्रथमानुयाजाभावोपि श्रूयते। देवान्यजेतिसोपबर्हिषोद्वावनुयाजौ यजतीति। अ
तो नियमेन सर्वेष्वप्यनुयाजेषु देवान्यजेत्येव प्रैषः। यत्तु वरुणप्रघासेषु अवणं तद्गुणविधानार्थमेकदेशा। यजयजेति
नुवादइतिपितृभूतिः। अत्रत्तोरायस्त्रातराद्विकल्पः। वरुणप्रघासेषु पुनर्यजयजेतिवचनं तस्यैवप्रयोगनि
यमार्थमितिकर्कः। प्रतीचोजुहोति। एतास्त्रीननुयाजानध्वर्युः प्रतीचः प्रत्यक्संस्थान्जुहोतिप्रत्यंचोनु
याजाइतितस्मात्तु उपसद्रूपेण प्रत्यंचोद्भूयतइतिश्रवणात्। अनुवृत्तिलोभेन प्रसंगादाह॥ ॥उपसद्वत्॥ ॥
ज्योतिष्टोमे उपसत्संज्ञा इष्टिषु चाग्निषोमविष्णुदेवतयागेषु प्रतीचोजुहोतिप्रत्यक्संस्थान्होमान्करोति॥
तस्मात् उपसद्रूपेण प्रत्यंचोद्भूयतइति उपस द्धोमानां प्रत्यक्संस्थत्वं प्रसिद्धमेवद्रक्ष्यति। प्रयाजवत्कर्तु
रप्यपसरणे प्राप्तेसत्याह॥ ॥ध्रुवः॥ अनुयाजे ष्वध्वर्युर्ध्रुवः स्थिरो निश्चलएकत्रस्थितएवत्रीनप्यनुयाजा
न्प्रत्यक्संस्थान्जुहोतिनप्रतिहोमं प्रत्यगपसरणं॥ ॥चतुर्थं समानीयप्राची। तृतीयानुयाज
होमानंतरमुपविश्ययोपभृतंसर्वंजुह्वांसमानीयचतुर्थहोमंकरोति। अथोत्तममनुयाजमिष्ट्वासमानीयजुहोतीति
श्रुतेः। संस्थानंपतिः। तच्चतुर्थग्रहणमस्यहोमस्यानुयाजाङ्गत्वप्रसत्त्यर्थं। अन्यथापूर्वोद्यारवदपूर्वोपाद
नं स्वतंत्रहोमातरस्याङ्गत्वेतु सत्यनुयाजसद्भावेभवतिअनुयाजाभावेचनभवतीति अनुयाजांतस्व
रूहोतीति। स्वरूहोमोपिसंगानुयाजोत्तरंकालंभवति। अथवादेवाः॥ नोतत्वमस्मिन्होमयथास्यादित्येव
मर्थंचतुर्थग्रहणं। मंत्राभावेपिस्वाहाकारेणहोमः कर्त्तव्यः। पूर्णाहुतोएवंसर्वत्रेतिवक्ष्यमाणत्वात्। अत्राह

तत्रच प्राचीप्राक्संस्थामाहुतिंजुहोति॥ तच्चयजतिस्थानादेशोऽन्तरतउपविश्यतञ्जुहोति॥ ब देव २

॥२७॥
॥ब्राह्मं॥

यत
देवान्यजेति

मनुः। संमार्गंचस्त्रंस्याप्युक्ष्याग्नावध्यस्यत्योपभृतंजुह्वामानीयाश्रावयंत्रीननुयाजान्यजतिदेवान्यजेति
प्रथमंयजेत्युत्तरौसमिधिप्रतीचः। पश्चाद्दितमेनप्राचावनुसंभिनत्यैकम्यपथास्थानंस्रुचोसादयतीति। काठ
के। उपभृतंजुह्वामासिच्यतनानुयाजान्यजतिप्रथमंयजयज्ञेत्युत्तराविति॥ ॥आपस्तंबः॥ ॥इध्मसंनहना
न्यद्भिःसंस्पृश्याहवनीयेनूतानमित्यग्नौप्रहरत्युल्करेवान्यस्येति॥ उपभृतंजुह्वामानीयजुहूपभृतावादायदक्षि
णासद्दृतिक्रातोग्रणाश्राश्रावयसंभेदंप्रतीचस्त्रीननुयाजान्यजत्याश्रावमाश्रावप्रत्याश्रावितेदेवान्यजेतिप्र
थमंसप्रेष्यतियजयजे तीतरौपूर्वार्द्धेप्रथमंसमिधिजुहोतिमध्येद्वितीयंप्राचमुत्तमंसंस्थापन्नितरावनुसंभिद्य
प्रत्याक्रम्यायतनेस्रुचोसादयित्वेति। तैत्तिरीयेपि। इध्मसंनहनान्यद्भिःसंस्पृश्याहवनीयेनुप्रहरतियोभूमा
नाभिन्यथसुक्रूपभृतावादायात्याक्रम्याश्राव्याहादेवान्यजेतिवषट्कृतेजुहोतियजयजेतित्रीन्प्रतीचोनुया
जान्यजतिप्राचीततः संभिनत्यथोदङ्तिक्रम्यप्रथायतनेस्रुचोसादयतीति॥ ॥अभिचरन्ननुयाजानुमंत्रण
मन्यमुज्जहिप्रादुन्यमुजत्युत्कुष्यमुजहीति। अभिचरन्नध्वर्युरन्यमुज्जहीत्यादिस्त्रिभिर्मंत्रैः क्रमेणानुयाजा
नामनुमंत्रणं करोति। सप्रथममनुयाजमनुमंत्रयेत अन्यमुज्जही
यंद्विष्मादह्रादुन्यमुज्जहीतिद्वितीयमुत्कुष्यमुज्जहीतितृतीयमितिश्रुतेः। एतच्चानुमंत्रणमध्वर्युरेवकरोतिस
माख्यानात्पुरुषयोगाभावाच्च। एवंद्वेधासमविभजेत। विकृतौवरुणप्रघासेषु परशाच्चानुयाजप्रवृद्धा
तानित्रीण्यनुमंत्रणानिसमंविभजेत्। कुतः समंस्यादस्त्रतत्त्वादितिजैमिनिनोक्तत्वात्। यद्यपिपुरुषार्थत्वा

अतोऽभ्यासेनैव पूरणीया॥९

॥२८॥ ॥देवयाज॥

नुमंत्रणानां विकृतौ प्रवृत्तिर्नेष्यते तथा प्यनुयाजप्रवृत्तौ प्रवृत्तिरिष्टे वा वानस्पत्यस्य स्वे स्थाने प्रवर्त्तमाने तदा म
श्रित ब्रह्मवर्चसी दित्यभिप्रायः॥ सिद्धांतमाह॥ ॥स्वस्थानात् [illegible] पायितात् वा शब्दः पूर्वपक्षनिरासार्थः॥
स्वस्थाने यो त्यः संस्थानीयः तेन स्वस्थानीयेनागंतूनामनुमंत्रणं कर्त्तव्यं॥ कुतः उपायितत्वादागंतूनां तस्य
स्वस्थानां यस्य हि स्थानमुपयंत्यागच्छंत्यागंतवः॥ अत स्तत्स्थानापन्नास्तद्धर्माणो भवंतीति युक्तमेवोक्तं॥ प्रथमानुया
जबर्हिषीतिरद्वितीयस्य नराशंसस्य स्थानं। तस्मिन् द्वितीयस्य स्थाने देवीर्द्वार इत्यादयः षडागंतवः पतिताः॥ ततः स
होमो नराशंसः। तेनैव नराशंसोद्धाः प्रभृतीनां स[illegible]नामंत्र्यः॥ अत एते षां नराशंसानुमंत्रणेन ह्यदुनीत्यनेना
नुमंत्रणं॥ द्वितीयस्थाने एकत्र समानां होमश्च कार्यः ततस्तृतीयस्य [illegible] स्विष्टकृतः स्थाने देवो वनस्पतिरिंद्रं च बर्हि
रिति द्वौ विकृतौ चानुयाज संख्या प्राकृतानुयाजाभ्यासेनैव पूरणीया॥ तस्या उत्पन्नविशिष्टत्वेनोत्पत्तिशिष्टया त्रि
संख्यया सह विकल्पसमुच्चये बाधानुपपत्तेः। तस्मादत्र द्वितीय तृतीययोरभ्यासेन पूरणं युक्तं। तदुक्तं अनुत्पत्तौ
तु या संख्या सा भ्यासेनैव पूर्यते। इष्टस्तेनानुयाजानामभ्यासो विकृतावि ति। तत्राप्यभ्यासे स्वस्थानस्य होय
दांतरासितित्वं तत्र पाठेनुनायस्यास इष्यते॥ यतो विकृतानां स्थानां पठनादनंतरं मध्ये नराशंसः पठितः॥ अत
स्तत्पूर्वेषां नराशंसधर्मसंबंधस्तत्स्थानापन्नत्वात्। ततः परेषामुत्तमस्येति। प्रयाजेषु तु विकृतमध्ये प्राकृतस्यापा
ठो नास्ति किंतु चतुर्थानंतरं सर्वे वैकृताः पठिताः। ततो तत्स्वाहाकारः पंचमः पठितः। तेन तद्वा त्यस्यैवाभ्यासो युक्तः

॥२८॥ ॥याज्य॥

पठितौ भवतो देवा अग्निः स्विष्टकृदिति प्राकृतौ यः अतो वनस्पती प्रभृतीनामसौ स्व स्थानीयः अत एते
षां तृतीयस्यानुमंत्रणेनोल्लुकी यनेनानुमंत्रणं॥ तृतीयस्थाने होमश्चेति सिद्धं॥ विकृतौ ६

सर्वेषां तत्स्थानापन्नत्वादिति सर्वमनवद्यं। अत्रेयं कृत्वा चिंता। अनुमंत्रणं हि द्विकृतौ न प्राप्तेव। तस्याक्रत्वर्थत्वेन
विकृतावनपेक्षितत्वात्। न च वानस्पत्यस्य मसंन्यायः। तत्र हि वानस्पत्यस्य मसः क्रत्वपेक्षयैव प्र[illegible] वृत्तः। इ
ह त्वनुमंत्रणनिबंधनो भिचारो नानुयाज निबंधनः। अनुमंत्रणं च पुरुषार्थत्वान्न क्रत्वपेक्षया गच्छते। अ
तो न्यायोपप्रदर्शनार्थं कृत्वा चिंतैवेयं। अथवा भ्य स्यमानानां होमस्थानादि संबंधनिर्णयार्थमिदमधिकरणं।
तेन द्वितीयप्रभृतीनां नराशंसानां द्वितीयस्थाने होमः। ततो वनस्पतिप्रभृतीनामत्यस्य स्थान इति सिद्धं॥
अत्राहुः पितृभूत्याचार्याः॥ अनुमंत्रणस्य पुरुषार्थत्वाद्विकृतौ व प्रवृत्तेर्वचना प्रवृत्तिः कृत्वा चिंतास्त्विति॥ ॥

॥ त्य
एत्य जुहूपभृतौ व्यूहति। यजति स्थानादागत्य स्रुचौ स्वस्थाने सादयत्यध्वर्युः। ततो यजमान एत्य। स्वस्थानाद्देहः
पश्चादागत्य जुहूपभृतौ व्यूहति। ऊह वितर्के अत्र प्रेरणे द्रष्टव्यः। वि वधमन्योन्य विपरीतं ऊहति। प्रेरयति
जुहूमन्यस्या दिशि मन्यस्यामिति विशाद्दस्यार्थः। कथं व्यूहतीति विशेषापेक्षयामाह॥ ॥अग्नीषोमयोरि

उपभृतं ता न

ति जुहूं प्राचीं दक्षिणेनैनेन। अग्नीषोमयोरुज्जितिमित्यनेन मंत्रेणोत्तानेन दक्षिणेन पाणिना हस्तेन जुहूं प्र
स्तारीत प्राचीं वा ददाति। प्रेरयति। स वे स्रुचौ व्यूहत्यग्नीषोमयोरुज्जितिमनूरुज्जेषं वाजस्य मा प्रसवेन प्रोहा
मीति जुहूं प्राचीं दक्षिणेन पाणिनेग्निश्रूतः॥ अत्राग्नीषोमयोर्मंत्रेन्याय प्राप्त प्रधानदेवतामंत्रोपवलक्षणा ह णं
र्थः॥ ॥अग्नीषोमौ तमितीत्तरेणोत्तरां नीचा प्रतीचीं। अग्नीषोमौ तमपनुदत्तामिति मंत्रेणोत्तरेण सव्येन पाणिना नी

श्रयाजाग्नीषोमयोरुपांशु

॥२१॥ ॥देवया०३ ३

चान्युक्तेनप्रतीचीमुपभृतंव्यूहतिप्रतीच्यांदिशिबर्हिर्वेदिश्रेरयतिप्रागग्रामेवसतीमित्यर्थः। अग्निषो
मोत्तमपदंतयोस्मादृष्टिपंचवयंद्विषोवाजस्येनंप्रसवेनापोहामीत्युपभृतंप्रतीचीपूंसव्येनपाणिना
यद्दिस्वयंयजमानइतिश्रुतेः। अत्रापिमंत्रेग्नीषोम ग्रहणंप्रधानदेवतामात्रोपलक्षणं। ततश्चैवंप्रयोगः।
अग्नेरग्नीषोमयोरग्नीषोमयो रुज्जितिमिति अग्निरग्नीषोमावग्नीषोमोत्तमपनुदंत्विति। अत्रमतभेदः।
३ प्रैष व्यतिरिक्तस्यसर्वस्योपांशुत्वपक्षेपांशुयाजपुरोडाशदेवताभूतयोर्द्वयोरग्नीषोमयोस्त्त्रेणो
च्चारणंशुपाभेदाभावात्। शेषमुत्तमेनेत्यनेनानुया मप्रभृतिमंत्रमात्रस्ये ञमस्वरविधानपक्षे वगुपाभेदा
स्त द्वैदेनोच्चारणंतदाचोपांशूच्चारणं। पुरोडाशदेवतयोस्तूच्चैरिति। एवंसर्वत्रोपांशुदेवते पुन्यदेवतासहि
तेषु से यं। आपस्तंबसूत्रेविशेषः। प्राचीजुहूंप्रोहतिसव्ये नोपभृतंप्रतीचीबर्हिर्वेदिनिरस्तप्रोक्ष्यैना
मभ्युदाहत्येति। मानवेच। विषूचीव्यूहतिप्राचींजुहूंप्रस्तरात्। प्रतीचीमुपभृतंबर्हिर्वेदेर्निरस्यत्यभ्युक्ष्य
प्रसास्नादयति। नजुहूंप्रस्तरेइतिजुहूश्चप्रस्तरस्योत्तरतोबर्हिषिसादनीया प्रस्तरस्यादानविधानादि
त्यभिप्रायः। काठकेपि। प्राचींजुहूंप्रतीचींबर्हिर्वेद्युपभृतमभ्युक्ष्याहृत्यवेद्यांनिधायेति॥ ॥यथादेवतम
न्यत्। अग्नीषोमयोरित्येवंव्यूहनप्रकारप्रदर्शनार्थमुक्तं। अन्यदपियथादेवतंव्यूहति। यायादेवतात्रान्या
भवतितस्यात्रापिषष्ठ्यंतंनामकीर्त्तयित्वाजुहूंव्यूहतिप्रथमांतंकीर्त्तयित्वा चोपभृतमिति। एवंयथादेवतंव्यूह

॥२१॥ ॥भाष्यं

तीतिश्रुतत्वात्। तेनाग्नेयपुरोडाशदेवतायात्र ग्नेः उपांशुयाजदेवतयोः अग्नीषोमीयस्य विष्णोश्चसान्नाय्य
देवताया इंद्रस्यमहेंद्रस्यचमंत्रमध्येकीर्त्तनंसिद्धं। ततश्चामावास्यायांसांनाय्ययाजिनोग्नेरग्नीषोमयोरिं
द्रस्येतिअग्नीरग्नीषोमौव्यूहनमंत्रौ। असान्नाय्ययाजिनस्त्वग्नेर्विष्णोरिंद्राग्न्योरुज्जितिमग्निर्विष्णु

विंद३ति३

रिंद्राग्नीतमपेत्येवंविधौमंत्रौपौर्णमास्यांतुप्रदर्शितौ ननुएवंयथादेवतंव्यूहतीतिसामान्येनोक्तत्वात्
उपभागप्रयाजाद्दिदेवतासंकीर्त्तनमपिसूक्तवाकोवाहनादिवत्कस्मान्न भवति। उच्यते। मंत्रपाठेप्रधान
देवतयोरेवाग्नीषोमेत्याग्नयोः पाठाद्देवंयथादेवतमित्यत्रैवंशब्देनप्रधानदेवतानामेवव्यूहनप्रकारस्यो
पदेष्टुवाक्यत्वात्प्रधानदेवतानामेवसं कीर्त्तनेनव्यूहतिनांगदेवतासंकीर्त्तनेनेत्येवमवसीयते। अत्र
दर्शिस्वामिभिर्वं प्रयोगादर्शितः। अग्नेरग्नीषोमयोरितिपौर्णमास्यां। अग्नेर्विष्णोरिंद्रस्येतिसान्नाय्यया
जिनइति। तदभिप्रायस्तुपौर्णमास्यामग्नीषोमयोस्तंत्रेणोच्चारणं। अमावास्यायांतुसांनाय्ययाजिनो
पिविष्णोरुपांशुयाजइति। अध्वर्युर्वा। अथवाध्वर्युः स्रुचौव्यूहति। नस्वयजमानः। एवमपिश्रुतत्वात्। अत्र
अध्वर्युपक्षेजुह्वाव्यूहनमंत्रेविशेषमाह॥ ॥अनूज्जयत्वयंजमानोवाजस्येनमितिपूर्वो। पूर्वेजुहूव्यूहन

मंत्रे। उज्जितिमनूज्जयेत्त्वयंयजमानोवाजस्येनंप्रसवेन प्रोहामीतिविशेषः कृतः। यद्येतुअध्वर्युरग्नीषो
मयोरुज्जितिमनूज्जयत्वयंयजमानोस्येनंप्रसवेन प्रोहामीतिश्रुतेः। अथोपभृद्व्यूहनमंत्रेविशेषमाह॥ ॥
यमयंयजमानोद्वेष्टियश्चेनंद्वेष्टीत्युत्तरे। अध्वर्योर्व्यूहनपक्षेउत्तरेउपभृद्व्यूहनमंत्रेतमपनुदंतुयमयंयज

॥३०॥
॥देवया०२

मानोद्वेष्टि यश्चैनं द्वेष्टि वाजस्यैनं प्रसवेनापोहामीत्येवं विशेषो भवति॥ अग्नीषोमौ तमपनुदतां यमयं यज
मानो द्वेष्टि यश्चैनं द्वेष्टि वाजस्यैनं प्रसवेनापोहामीति पौर्णमास्यामिति श्रुतेः। अथामावास्यायामिति
पौर्णमासवद्देवयजमानाध्वर्युकर्तृको भयविधस्यापि व्यूहनस्य श्रवणात् सोमे च सोमेऽपनुदत्विति बहु सोम
वचनदर्शनात्तत्र कृत्तावपि व्यूहने बहुवचनं प्रयुज्यत इति गम्यते। मंत्रपाठे द्विवचनं यथाप्राप्तस्योपलक्षणा
र्थं अग्नीषोमग्रहणवत्॥ अनेकयजमानके तु व्यूहनस्य यजमानकर्तृकत्वपक्षे इतरान्वारब्धे एक एव व्यूहति॥
अनूज्जीयास्त्व वाजस्या वो प्रसवेन तिङ्योः। अनूज्जीयासम वाजस्यास्मात्प्रसवेनेति बहुषु। अध्वर्युकर्तृकपक्षेपि।
उज्जितिमनूज्जेषं ज्जुता। मिमौ यजमानौ वाजस्यैनौ प्रसवेन प्रोहामि। तमपनुदतां यमिमौ यजमानौ द्वेष्टि यश्चैनौ द्वेरि
वाजस्यैनं प्रसवेनापोहामीति द्वियजमानके। बहुयजमानके। उज्जितिमनूज्जयन्त्विमे यजमाना वाजस्यैनान्प्रसवे
मे नप्रोहामि। नुदतां य इमे यजमाना द्विषन्ति यश्चैनान् द्वेष्टि वाजस्यैनं इत्यादि। व्यूहनं चेष्टदेवतासंकीर्त्तनेन दृष्टार्थं कृत
प्रयोजनस्रुक्संस्कारार्थं च। अतश्चातिथ्योपसत्सु अस्यादोयावदुक्तान्तापच्छिन्नेष्वपि भवति। तत्रापि स्रुचो देवता
ह याश्च संस्कारस्येष्टत्वात्। अत एवास्सूत्रकारः। व्यूहनपरिध्यंज नेष्वेक इति॥ ॥जुहूस्थानापन्नानां च शूर्पा
र्कपर्णदोहनोदुंबरस्रुवादीनामपि व्यूहनं भवति। वसाहोमहवन्याश्च। पृषदाज्योपभृतेः श्चोपभृत्स्थानापन्न
२रि त्वात्॥ ॥अभ्युक्ष्य जुह्वा परिधीननक्ति यथापूर्वं वसुभ्य इति प्रतिमंत्रं। व्यूहनानंतरं तस्रुचावभ्युक्ष्य स्वस्थाने
प्रसानीय जुह्वा करणभूतया यथापूर्वमित्युपधानक्रमेण परिधीननक्ति वसुभ्य इति प्रतिमंत्रमके। अथ
कं

॥३०॥
॥भाष्य॥

जुह्वा परिधीन् समनक्तीति प्रक्रमस सर्वस्य श्रुतत्वात्। परिध्यंजनं च वेदोपग्रहणे न कार्यं। न च रुद्रेभ्यस्त्वे त्य
थामुपस्पर्शनिमंत्रस्यारौद्रत्वात्। वसुभ्यस्त्वयाणं परिधय इति कात्यायनेन परिधिदेवतात्वस्योक्तत्वा। च्च।
अत्राभयोः स्रुक्चार स्रुक्षणप्रत्यासादनरूपः शाखांतरीयो विशेषोग्नीषोमौतमित्यस्मिन्सूत्रे इति
नेह पुनरुच्यते। प्रथमं परिधिं गृहीत्वाश्राव्याहे षितारत्यादि ब्रूहीत्यंतं परिध्यंजनानंतरमध्वर्युः प्रथमं
हे परिधिं गृहीत्वाश्राव्यैषितादेव्या इत्यादिकं प्रेषं होतारं प्रत्याह ब्रवीति। अथ परि धिमभिपद्याश्राव
यति स ओश्राव्याहेषितादेव्या होतार इत्यादेः श्रुतत्वात्। अभिपद्याभिगम्य हस्तेनालभ्येत्यर्थः।
इषिताः सांत्विता इत्यर्थः। आश्रावणार्थमेतत्परिधिग्रहणं। ततश्चैश्रावणाभावे द्विहोमेषु न भवति॥ ॥
पत्नीः प्रेष्यति। पश्चैः सूक्ता ब्रूहीत्यस्य स्थाने सूक्ता प्रेष्येत्येवं मैत्रावरुणं प्रत्याह न तु सूक्ता ब्रूहीत्येवं
होतारं प्रतीति। संजानाथामिति प्रस्तरदानं। प्रेषानंतरमध्वर्युः संजानाथामिति मंत्रेण प्रस्तरदानं
कुर्यात्। हस्तेन प्रस्तरस्य ग्रहणं कुर्यात्। एतेनैवाददीत संजानाथामित्यादि श्रवणात्॥ ॥विधृती स्थाने
कृत्वा नत्येनं व्यंतु वय इति। ततो विधृती तयोः स्थाने कृत्वा बर्हिषोपसमा स्थानाद्गृहीते तत्रैव निधाय तत
एनं प्रस्तरं व्यंतु वय इति मंत्रेणाग्रमध्यमूलेषु नक्ति। तदुक्तं मनवे। प्रस्तरमपादत्ते बर्हिषि विधृती प्रस्र
वसृजतीति। आपस्तंबोपि साक्ष्ये नामभ्युदाहृत्य जुह्वा परिधीननक्ति वसुभ्यस्त्वेति प्रथमं रुद्रेभ्यस्त्वेति

॥ ३१ ॥
॥ देवेया० २

दक्षिणामादित्यास्त्वेत्युत्तरं न प्रस्तरे जुहूं सादयति संजानाथामिति विधृतीभ्यां प्रस्तरमपादाय यवैस्स्रुचो
गृह्णाति सर्पं स्त्रवभागा इति सहस्रवान्तुहेति तत्तोध्वर्युः स्रुचो जुहूपभृतो प्रगृह्णाति नुभाभ्यां हस्ताभ्यां
गृह्णाति गृहीत्वा चस पूस्त्रवभागा इति मंत्रेण ताभ्यां स्रुग्भ्यां संस्त्रवान्जुहोति । अथ जुहूं चोपभृतं च सं
प्रगृह्णाति स वै विश्वेभ्यो देवेभ्यः संप्रगृह्णातीति श्रुतत्वात् । मंत्रलिंगादत्र विश्वेषां देवानां देवतात्वात्
वैविश्वेभ्यो देवेभ्य इति वाक्यशेषाच्च । ततश्च जुहोति पुर्विश्वेभ्यो देवेभ्यः स्वाहेति प्रयोगः । उभयोस्स्रुचोः
प्रग्रहणवचनादुभाभ्यामपि होमः । अन्यथोपभृतो जुह्वा समाने यहोमः स्यादिति । मंत्रस्त्तु संस्त्रवहोमे
न प्रग्रहणे । स्वाहा वाजितिं तद्यथा वषट्कृतं हुतमेवमस्यैतद्भवतीति श्रुतेः । प्रतिपत्त्यर्थकर्म चेततश्चातः
पच्छिन्न यावदुक्तं च प्रवर्त्तते । संस्त्रवाणामविशेषात्सानाय्यसाधनकयागांगत्वात् । ततश्च सर्वत्र प्रवृत्तिः ॥ ॥
घृताची इति धुरि निदधाय न सिञ्चेद्ग्रहणं । घृताची स्थ इत्यनेन मंत्रेणाध्वर्युरनसो धुरि स्रुचौ निदधाति स्था
पयति । चेद्यदि अनसि हविर्ग्रहणं प्राक्तनं भवति । स यस्यानसे हविर्गृह्णाति स नसस्तस्य धुरि विमुंचेतेति
श्रुतेः । चरितार्थत्वात्स्रुग्संस्कारोयं । नांतापच्छिन्नं यावदुक्तयोरपि भवति ॥ पत्नो स्रुग्वत्कुत्वेसवसि
धुरि धानं । धृताव्यस्थ धुर्यौ पातं सुम्ने स्थ सुम्ने मा धत्तेति चेह ॥ गृहमेधीयायामेकस्या जुह्वा घृताच्यसि
धुर्यौ पाहि सुम्न्यासि सुम्ने मा धेहीति विशेषः ॥ ॥ स्फ्यपात्र्यां चेत् ॥ ॥ न्वेद्यदि पात्र्यां हविर्ग्रहणं कृतं तदा

॥ ३१ ॥
॥ भाष्य ॥

जुह्वा परिधी समनक्तीति प्रकृत्य सर्वस्य श्रुतत्वात्परिध्यंजनं च वेदोपग्रहणे न कार्यं । न च रुद्रेभ्यस्त्वेत्य स
आपामुपस्पर्शनं मंत्रस्यारौद्रत्वात् । वसुभ्यस्त्रयाणां परिधय इति कालायने न परिधिदेवतत्वस्योक्तत्वाच्च ॥
अत्रोभयोः स्रुचोरस्तु क्षण प्रसासादनरूपः संस्कारो वांतरीयो विधिर्योग्नीषोमौ तमित्यस्मिन्सूत्रे इति नेह पुन
रुच्यते । प्रथमं परिधिं गृहीत्वा आश्राव्याहेषिता इत्यादि ब्रूहीत्यंतं । परिध्यंजनानंतरमध्वर्युः प्रथमं परिधिं गृही
त्वा आश्राव्याहेषिता दैव्या इत्यादिकं प्रैषं होतारं प्रसाह ब्रवीति । अथ परिधिमभिपद्याश्रावयति स आश्राव्या
हेषिता दैव्या होतार इत्यादेः श्रुतत्वात् । अभिपद्याभिगम्य हस्तेनालभ्येत्यर्थः । इषिताः सांत्विता इत्यर्थः ।
आश्रावणार्थमेतत्परिधिग्रहणं । ततश्चाश्रावणात्वेदर्विहोमेपुन भवति ॥ ॥ पत्नौ प्रेष्यति । पत्नौ सू
क्ता ब्रूहीत्यस्य स्थाने सूक्ता प्रेष्येत्येवं मैत्रावरुणं प्रत्याह ॥ न तु सूक्ता ब्रूहीत्येवं होतारं प्रतीति । संजानाथा
मिति प्रस्तरादानं । प्रैषानंतरमध्वर्युः संजानाथामिति मंत्रेण प्रस्तरादानं कुर्यात् । हस्तेन प्रस्तरस्याग्रह
णं कुर्यात् । एतेनैवाददीत संजानाथामित्यादिश्रवणात् ॥ ॥ विधृती स्थाने कृत्वानन्तं स्पेनं व्यतुं वयइ
ति ॥ ॥ ततो विधृती तृणे स्थाने कृत्वा बर्हिषो यस्मात्स्थानाज्जुहोति तत्रैव निधाय ना
तत एनं प्रस्तरं व्यंतु वय इति मंत्रेणाग्रमध्यमूले घ्रनक्ति । तदुक्तं मानवे । प्रस्तरमपादत्ते बर्हिषि विधृती प्रस

॥३१॥
॥देवया०३

विसृजतीति। आपस्तंबोपि सामेध्येनाभ्युदाहृत्य जुह्वा परिधीननक्ति वसुभ्यस्त्वेति प्रथमं रुद्रेभ्यस्त्वेति दक्षि-
णमादित्येभ्यस्त्वेत्युत्तरं न प्रस्तरे जुहूं सादयति संजानाथामिति विधृतीभ्यां प्रस्तरमपादाय वैषिविधृती अ-
पिसृज्य स्रुक्षु प्रस्तरमनक्तीति। कथं प्रस्तरमनक्तीत्यपेक्षायामाह॥ अग्रं जुह्वां प्रस्तरस्याग्रमनक्ति। उपभृ-
ति मध्यं॥ उपभृति प्रस्तरस्य मध्यमनक्ति॥ मूलं ध्रुवायां॥ प्रस्तरस्य मूलं ध्रुवायामनक्ति॥ त्रिरपि स्थानेषु क-
तु वैरैसपमेवांजनमंत्रः सर्वत्र अग्रं जुह्वामनक्ति मध्यमुपभृति मूलं ध्रुवायामिति सोनक्ति व्यंतु वय इति श्रु-
तेः॥ मरुतामिति नीचैर्हृत्वा तृणमादायानुप्रहरति॥ मरुतामित्यनेन मंत्रेण तमक्तं प्रस्तरं स्रुचो दक्षिणेन
वा परेण चानीयाहवनीयं प्रति नीचैर्भूमिसंलग्नमिव हृत्वा आहवनीयसमीपमानीय ततः प्रस्तरादेकं तृ-
णमादाय प्रथक्कृत्वा जुह्वा प्रस्तरमनुप्रहरति प्रागग्रमुदगग्रं वा आहवनीय एव प्रक्षिपति॥ तं नीचैरिव हर-
ति सहरति मरुतामिति॥ अथैकं तृणमंगृह्णातीतं नु हृतं धारयीतो नुप्रहरति तं प्रांचं अनुसमस्यति अधो
उदंचमिति च श्रुतत्वात्॥ आपस्तंबः॥ अनूच्यमाने सूक्तवाके सह शाखया प्रस्तरमाहवनीये प्रहरति न
स्वाहाकरोति न विधूनोति नावधूनोति विक्षिपति न प्रमार्ष्टि न प्रतिमार्ष्टि नानुमार्ष्टि। तथा तिर्यंच हस्तं धा-
रयन् कर्षन्निवाहवनीये प्रहरतीति॥ अंजनानंतरं प्रस्तारः स्रुचो दक्षिणतः पश्चाद्वा नेयः॥ स्रुक्षु वर्तमान-
स्याज्यस्य हविष्ट्वात्॥ प्रस्तरस्य पात्रत्वात्॥ हविष्पात्रस्वामृत्विजामित्यनेन पात्रस्यैवरोबहिर्भावो

ह१

य
प

ईं
तु कां

॥३१॥
॥भाष्य॥
१

पदेशात्॥ ॥हस्तेनाचरति॥ आचरणं चोपसमूहनं अग्निमध्ये प्रेरणं तच्चात्र हस्तेन विधीयते॥ अग्नौ
हुतं प्रस्तरं हस्तेनाचरति प्रेरयति॥ हस्तेनांगुलिभिरेव न पाणितलेन। तमंगुलिभिरेवाप्युपेरच्छा-
द्येरिति श्रुतेः॥ युपविमोहने॥ पुनः पुनः संमूर्छयेयुः हस्तेनैव प्रेरयेयुरित्यर्थः॥ यजमानभागं च प्रोषिते॥
यजमानभागं च हस्तेनैव जुहोति॥ प्रोषिते कृतप्रवासे यजमाने। चकारो हस्तेनैवस्यानुकर्षणार्थः॥ क्ष-
त्रियवैश्ययोश्च नित्यं॥ क्षत्रियवैश्ययोर्यजमानयोर्नित्यं प्रोषिते च यजमाने यजमानभागं हस्तेनैव जुहो- अप्रोषिते
ति। अहं त्वदस्मीति॥ अयं सर्वेषां श्रीलक्ष्मणादीनां भागहोममंत्रः। स्वाहाकारांतत्वात्। सन्निधानाच्च। अ-
त्र च मंत्रवर्णाज्ज्ञातवेदसो देवतात्वं। ततश्चैदं जातवेदसे इति यागः। सूक्तवाकांते। प्रस्तरानुप्रहरणं य-
जमानभागहवनं चैतदुभयं सूक्तवाकांते भवति। कुतः। सूक्तवाकेन प्रस्तरं प्रहरतीति शाखांतरात्। अत्र
सूक्तवाकप्रस्तरप्रहरणयोरंगांगिलक्षणः संयोगः। कुत एतत् सूक्तवाकेनेति करणविभक्त्या निर्देशात्॥
प्रस्तरमिति च कर्मविभक्त्या॥ सूक्तवाक एव याज्याः प्रस्तरश्चाहुतिरिति शाखांतरे श्रवणाच्च॥ तत्रायं
यागः प्रस्तरद्रव्यको देवताकश्च॥ अग्न्यादयो ह्यत्र संकीर्त्यंते॥ मंत्रस्य च क्रियासाधनप्रकाशकत्वघर-
त एव तेनात्र प्रस्तरद्रव्यस्याग्न्यादयो देवता इति गम्यते॥ अयमेव जैमिनेरपि सिद्धांतः॥ तेन सूक्तवाके-
न जुह्वा प्रस्तरमाहवनीये जुहोति॥ इदमग्नये सोमायाग्नयेग्नीसोमदिवेन्द्राज्यपेभ्यो अग्नये होत्रायेत्ये- भ्यां
वं यागश्च कर्तव्यः॥ आतिथ्योपसत्स्विष्ट्यादौ च प्रस्तरप्रहरणाभावेपि वचनात् सूक्तवाकस्य प्रयोगः॥ तथा

॥३२॥
॥देवया०२

चपित्र्यायं श्रूयते॥परिधिमभिपद्या आम्याहेषिता इत्यादि। कर्कमतेतु विपरीतं। कालाद्यर्थियसंयोगः॥प्रस्त
रस्यहस्ते नैवाहवनीये प्रक्षेपमात्रं॥ सागाता वस्त्रेति प्रस्तरहोमानंतरमेव हस्ते नयजमानभागो होतव्यः॥
केचित्तु यजमानेस्य भक्षणकालएव तद्भागस्य होममिच्छंति॥ अग्नीदाहानुप्रहरेति॥ प्रस्तरेणानंतरमग्नप्रहर
ग्नीद्यनुप्रहरे सेवमाहाध्वर्युरिति॥ अथाग्नीदाहानुप्रहरेती तिश्रुतेः वरुणप्रघासे घनुप्रहरेतमिति॥
बहुधूद्वेस्तानीयास्वनुप्रहरतेति पूर्वत्रैवाध्वर्योः कर्तृत्वस्यस्थापितत्वादग्नीदिति वचनं॥ ॥ प्रास्यते
णचक्षुष्पाइत्यात्मानमालभते॥ ततोध्वर्युः प्रस्तराद्गृहीतं तृणमाहवनीये प्रास्य प्रक्षिप्य चक्षुष्पा इत्यनेन
मंत्रेणात्मानमालभते। हृदयदेशोस्पृशति ततो पशुपस्पृशति च॥ तूष्णीमेवानुप्रहृत्य चक्षुष्या अग्ने सि
चक्षुर्मेपाहीत्यात्मानमुपस्पृशेतीतिश्रुतेः॥ ॥संवदस्वागानग्नीदगंछ्रौषट्स्वगादेव्याहोत
भ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीत्येतेषां संवदस्वागं श्रौषडित्यग्नीद्वेषमितरो व्यत्यासं ब्रूतः॥ संवदस्वे
त्यादीनां यथाक्रमपठितानां तेषां नामध्ये संवदस्वागं श्रौषडित्येतान्यग्नीद्ब्रूयात्॥ शेषमवशिष्टमगान

से

ग्नीद्धावयस्वगैर्ति दितरोध्वर्युर्ब्रूयात्॥ उभावपि नैन निरंतरं किं तु व्यत्यासं ब्रूतः॥ पूर्वं संवदस्वेत्यग्नीदाह॥ त
तोध्वर्युरगानग्नीदिति ततोग्नीदगंनिति॥ ततोध्वर्युः श्रावयेति ततोग्नीच्छ्रौषडिति॥ ततोध्वर्युः स्वगा
दैव्याहोतृभ्यः इत्यादिमंत्रार्थस्त्त। अग्नीदध्वर्युप्रेष्यति संवदस्वत्वमयासह शंयुवाकप्रैषार्थमिति॥ तमध्व
र्युः प्र ब्रवीति किमगमत्प्रस्तरशरीरो यजमानः स्वर्गंलोकं॥ किं दग्धः प्रस्तर इत्यर्थः॥ अग्नीत्वगान्निति प्रति

॥३२॥
॥भाष्यं॥

२

वचनं ददाति। गतो यजमानः दग्धः प्रस्तर इत्यर्थः॥ अध्वर्युस्त्वाह॥ यद्येवं ततः शंयुवाकपरिधिप्रहरणयोः
कालो वर्तते। ततस्त्वं श्रावय होतारमाकर्णयेत्यर्थः॥ अग्नीत्वाह श्रौषट्॥ शृणोत्येवायमवहितो ब्रूहीत्यय
द्विवक्षितमिति॥ स्वगादैव्याहोतृभ्य इति शंयुवाकप्रैषः॥ हे होतः शंयोर्वाह स्वस्त्यस्य ऋत्विग्भ्यो ब्रूहि
स्वगा स्वस्थानगामित्वं देवेभ्यो होतृभ्यः परिधिशरीरेभ्यो दूयतां परिधय इत्यर्थः॥ मानुषेभ्यस्त्वहोतृ
भ्यः स्वस्तिरविनाशो तीयेवेरूपवाक्यं ब्रूहि अयं तावद्वाक्यार्थः॥ श्रुतिस्तु गूढमर्थांतरमाह॥ ॥
परिधिननुप्रहरति यं परिधिमिति प्रथममितरौ च युगपदग्नेः प्रियमिति॥ ततोध्वर्युर्हस्तेनैव परिधीना
हवनीयेनुप्रहरति प्रक्षिपति तत्र प्रथमं परिधिं यं परिधिमिति मंत्रेण प्रक्षिपति॥ इतरौ चदक्षिणोत्तरौ परिधी
युगपत्सहैव हस्तेनानुप्रहरति अग्नेः प्रियमिति मंत्रेण। अथ परिधीननुप्रहरति समध्यममेवाग्रे परि
धीमनुप्रहरति यं परिधिमिति अग्नेः प्रियं पाथोपीतमितीतरावनुसमस्यतीति श्रुतत्वात्॥ ॥
स्रुचौगृह्णाति सं स्रवभागा इति संस्रवानजुहोति॥ ततोध्वर्युः स्रुचौ जुहूपभृतौ गृह्णाति उभाभ्यां प्र
भ्यां हस्ताभ्यां गृह्णाति गृहीत्वा च सं स्रवभागा इति मंत्रेण ताभ्यां स्रुग्भ्यां संस्रवानजुहोति। अथ

॥२३॥
॥देव०२

जुहूं चोपभृतं च संप्रगृह्णातिस वै विश्वेभ्यो देवेभ्यः इतिवाक्यशेषाच्चो। ततश्च जुहोति पुवि-
श्वेभ्यो देवेभ्यः स्वाहेत्ति प्रयोगः। उभयोस्रुचोः प्रग्रहणवचनादुभाभ्यामपि होमः। अन्यथोपभृ-
तो जुह्वां समानीय होमः स्यादिति। मंत्रस्तु संस्रव होमे न ग्रहणे। स्वाहा वाडिति तद्यथा वषट्कृ-
तं पूर्णहुतमेवमस्यैतद्भवतीति श्रुतेः। प्रतिपत्त्यर्थ कर्म चैतत् तूर्ष्णीं तापच्छिन्ने यावदुक्ते च प्रवर्त्तते। सं-
स्रवो नाम विशेषित्वान्नाज्यसाधनकेयागंगता॥ ततश्च सर्वत्र प्रवृत्तिः॥ ॥घृताची इति
धुरि निदधात्यनसि चेद्ग्रहणं घृताची स्थ इत्यनेन मंत्रेणाध्वर्युरनसो धुरि स्रुचो निद-
धाति स्थापयति। वेद्यादिष्वनसि हविर्ग्रहणं प्राकृतं भवति। सयस्पानहं सौविर्ग्रहणं स
नसस्तस्य धुरि विमुंचं तीति श्रुतेः चरितार्थत्वात् स्रुसंस्कारो यांनां तापच्छिन्न यावदुक्ते ते
योरपि भवति॥ पशौ स्रु बकुचे सर्वासां धुरि धानं। घृताच्य स्थ धुर्यौ पात सुम्ने स्थ सुम्ने
माधत्तेति चोहः। गृहमेधीयायामेकस्यां जुह्वां घृताच्यसि धुर्यौ पाहि सुम्नासि सुम्ने मा
धेहीति विशेषः॥ ॥स्फ्ये पात्र्यां चेतु॥ ॥वेद्यादि पात्र्यां हविर्ग्रहणं कृतं तदा ॥२३॥
।आब्ध॥

स्फ्ये वज्रे उत्तरांसदेशो उदगग्रे निहितेस्रुचो सादयति प्रागग्रेए वायस्योपात्र्ये स्फ्ये न तस्ये ति श्रुतेः। अत एव
त वरुणप्रघासे उभौ स्रुचः संप्रगृह्य स्फ्ये सादय इति नियमात्पात्र्याए वहविर्ग्रहणं नियमेनावसीयत्ते।
स्या हविर्ग्रहणाभावे चोपसर्पर्दो भूमावेव निधानं न स्फ्येन वानसि॥ ॥यस्तनमश्चत इति वेदिमालभते॥
मंत्रलिंगाद्यजमानो वेदिमालभते यस्तनमश्च त इति मंत्रेण॥ सम्यत्राज्ञ्यो नाह तदभिमृशतीयज्ञेन मश्चत
इति श्रुतेः। सवायं वे दिसंस्कारो वेदिमिति द्वितीयाविभक्त्या देवे संस्कार्यत्वावगमात्। सत्वसमिष्ट
यजुर्होमार्थं श्रेवप्रयुक्तस्ततश्च समिष्टयजुषो भावेन भवतीति कर्कः। अन्ये तु सम्यत्र संयोगा हत्तदभि-
मृशतीति शंयोर्वाकिसहभावश्रवणाच्छ योर्वाका भावेन भवती साह। अपरे त्वाहुः। सयदतिरेचयति तन्न
मस्कारेणाशमयतीत्याद्यर्थवादात् अभिमर्शनिस्यन्नूनातिरिक्तशमनार्थत्वावगमात्समिष्टयजुरभावेपि २
शंयोर्वाकाभावेपि सर्वत्राभिमर्शनं भवतीति। युक्ततरमिव चैतदाभाति। आपस्तंबसूत्रेयं पदार्थो याजमान-
कांडे पठितोस्ति। अनेकयजमानके चेकएवेतरैरन्वारब्धो वेदिमाहमालभते। स्वस्विष्टेनः संतिष्ठस्वेति
च यथायथमूहो। कर्कमतेत्वध्वर्युकर्तृकत्वा होमाभावः॥ ॥वेदं होतास्तृणति कस्तु वमध्वर्यु-
राज्यस्थालीमग्नीदादाय॥ ॥पत्नीसंयाजेभ्यो गार्हपत्यं गच्छति। ततो होतास्वयमेव वेदमादाय अध्वर्युः
स्रुवं स्रुचमादाय अग्नीदाज्यस्थालीमादाय पत्नीसंयाजेभ्यः पत्नीसंयाजानां कर्तुं गार्हपत्यं प्रतिएतेगच्छंति॥

।।३४।।
।।देवया०३

ते वै पत्नीः संयाजयिष्यंतः प्रतिपरायंति जुहूं स्रुवं चाध्वर्युरादत्ते वेदं होताज्यविलापनीमग्नीदिति श्रुतेः।
तत्राध्वर्योर्गमनाय मार्गमाह। अध्वर्युः पूर्वदक्षिणेन गार्हपत्यमेत्य। अध्वर्युर्गार्हपत्यं पूर्वदक्षिणेनेत्य गार्हपत्य
दक्षिणाग्न्योरंतरालेनागत्य पत्नीसंयाजैश्चरति। तस्मादुपूर्वेणैव गार्हपत्यमंतरेणाहवनीयं वेतीत्यादि
श्रुतत्वात्॥ ॥ पूर्वेण। अथ वाध्वर्युराहवनीयं पूर्वेणापरीत्य दक्षिणतो वितानं गार्हपत्यं गच्छति। तदेकेषा
मध्वर्युः। पूर्वेणाहवनीयं पर्येतीति श्रुतेः॥ ॥अपरेणांतरेण पत्नीमेकेषां। अथवाध्वर्युरपरेण गार्हपत्यं यजति
देशं प्रतिगच्छति। तत्रापि मार्गद्वयं। एकेषां मते पत्नीमंतरेणानेतृ तदिगुपविष्टां। पत्नीमग्नीं च चांतरेणा दक्षिण
तो यजतिस्थानं गच्छति। अथ दिन्येषां मते पत्न्या बाह्यं इति सिध्यति। जघनेनाहैव पत्नीमेकेषामध्वर्युरेतीति॥
अथांतरेणाहैव पत्नीमेकेषामध्वर्युरेतीति च श्रवणात्। पत्नी तु गार्हपत्यान्तं रेसामुपविष्टा। अध्वर्युणा
व गार्हपत्यस्य दक्षिणतो गंतव्यं। गार्हपत्यमपरेण च। अतो विकल्पोंतरेण बाह्येन वा पत्नीमिति। स्रुकस्रुवग्रहण
मुपभरणार्थं आमायुउपभृतो निरासार्थं अत्राह आपस्तंबः। आज्यलिप्तं प्रक्षाल्य सस्रुवं जुहूपभृतावध्वर्युरादत्ते वेदं होतास्फ्यमाज्यस्थालीमुदकमंडलुं चाग्नीध्र अग्नीध्रः प्रथमाः पत्नीः संयाजयिष्यंतः प्र
संचाय सग्रेणागार्हपत्यं दक्षिणेनाध्वर्युः प्रतिपद्यते उत्तरेणेतराविति। स्रुग्भ्यां स्रुवेण च पत्नीः संयाजयंति
वेदमुपभृतं तत्त्वाजह्वा स्रुवेणान्वेत्येके। परेणागार्हपत्यमूर्ध्वज्ञो वेआसीनाध्वानेन वोपांशुवा पत्नीः संयाज

।।३५।।
।।भाष्ये।।

२ण

यंति दक्षिणोध्वर्युरुत्तर आग्नीध्रो मध्ये होतेति। एवं सर्वसूत्रेषु॥ ॥ उपविश्य दक्षिणं जान्वाच्य। अध्वर्युर्गार्हप
त्यस्य दक्षिणत ईशानाभिमुख उपविश्य दक्षिणं जान्वाच्य। भूमौ पातयित्वा सोमादीन्यजति। यजतित्वात्तिष्ठद्धो
मप्राप्ते वचनादुपविश्य दक्षिणं जान्वाच्येति॥ ॥एवं सर्वत्रोपविष्टहोमेषु। न केवलमत्रैवं। सर्वत्र सर्वे
ष्वपविष्टहोमेषु पूर्वयोरदक्षिणाग्निहोमकर्मापि वर्गहोम यूपाहुतिसावित्रहोमादिष्वेवं भवति। एवमि
त्युपविश्य दक्षिणं जान्वाच्येति गृह्यते। उपांशु चरंति। पत्नीसंयाजैरुपांशु चरंति। ते वा आज्यहविषो भवंतीति
नोपांशु चरंतीति श्रुतेः॥ ॥चरणशब्दे सर्वं। यत्र चरणशब्दो विधिवाक्ये तत्र सर्वमुपांशु भवति। यथा महा
पितृयज्ञे तेनोपांशु चरंतीति पितृयज्ञमुपांशु चरणमिति पुनराधेये पंचकपाले चानोपांशु चरंतीति। ते
।उपांशु चरंतित्राग्नीषोमीयादिति॥ ॥देवतान्यत्र॥ ॥अन्यत्रेति चरणशब्दादन्यत्र। यत्र
चरणशब्दो न भवति यथोपांशु प्रकरणे ऐंद्रः सौत्रामण्यां प्रथमो वायोधसश्चेति दैवस्त्वदेविकाहवींषि तन्हवी
ंषीति च तत्र देवतोपांशु भवति नान्यत्॥ ॥यजति सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति। स्थाल्या
नयनस्य दृष्टार्थत्वात् स्थालीस्थेनाज्येन चतस्रो देवता यजति सोमं प्रथमं। त्वष्टारं द्वितीयां। देवानां पत्नी
स्तृतीया। अग्निं गृहपतिं चतुर्थीमिति॥ चतस्रो देवता यजतीति त्र कुयत्ता आज्यहविषो भवंति अथ सोमं
यजति अथ त्वष्टारं यजति अथ देवानां पत्नीर्यजति अथाग्निं गृहपतिं यजतीति श्रवणात्॥ ॥तृतीयं तद्वनिं

॥३५॥
॥देवेया०२

पुरस्तात्। तृतीयेपत्नीसंयाजेपुरस्तात्कटादिनाअंतर्द्धानंकरोति। सयत्रदेवानांपत्नीर्यजंतिपुरस्तात्तिरःक रोतीतिश्रुतेः॥ ॥पत्न्यन्वारभतेध्वर्युं अधिकारात्तृतीयएवपत्नीसंयाजेपत्न्यध्वर्युमन्वारभते। सचायमध्वर्युसंस्कारोद्वितीयानिर्देशात्। अतःपत्न्यभावेपियेनकेनचित्कर्त्तव्यः॥ ॥शंयुवंतंभवतीडांतंवा। वाशब्दस्य शंय्वंतेनसंबंधः। तेनायमर्थः तदिदंपत्नीसंयाजाख्यंकर्मइडांतंभवत्येव। शंय्वंतंवाभवतीतिशंयुर्भवतिनवेति संशयः। कुतएतदिडांतंभवतीतिनियमेनेडांतंश्रूयते। तथाउतोप्रस्तरस्यैवरूपंक्रियतेसयदिप्रस्तरस्यरूपंकुर्या द्वेदस्यैकंतृणमाच्छिद्येत्येवमादिकंकर्मशंयुदिशब्दाद्विकल्पनविधीयते। ततश्चगृहपतियागानंतरंपूर्ववदिडां पंचावत्तामाज्येनावद्यायेडाᳪहोत्रेप्रयच्छेदिति। विसृजंदक्षिणातिक्रामतीडांप्रतिगृह्यहोतुरंगुलिपर्वणीअनक्त्य वांतरेडामादधातिपूर्ववदिडांचसर्वेन्वारभंतेमर्यादमितियजमानोपजेत्युपहूतांप्राश्नंतियुक्तायजमान श्चपवित्रयोरभावान्मार्जयंतेपरेणवेदिंसुमित्रियानइत्येतावदिडांतंभवति। सनेनगृह्यतइतिककाचार्यः। काठके चतुर्गृहीतामिडामवदायहोतुःस्रुवेणांगुलिपर्वणीअनक्तिअपरमग्रेथपूर्वंतस्यपाणौपंचबिंदू निडामवदायहोत्रेइडामादधात्युपहूयमानामिडामन्वारभ्यासीतेति। आपस्तंबमानवेत्वितिरिसूत्रेषुबहू स्तेएवावदानमुक्तंनत्विडायां। तथाचापस्तंबःपूर्ववद्धोतुरंगुलिपर्वणीअक्त्वोपस्तीर्याहोतुर्हस्ते चतुरआज्यबिंदूनिडामवदधातिपउग्नीधउपहूयमानामन्वारभंतइति॥ ॥शंय्वंतेवेदतृणमादायान

॥३५॥
॥भाष्यं॥

क्तिप्रस्तरवत्स्रुचिस्रुवेस्थाल्यांच। शंय्वंतेकर्मणिक्रियमाणेएषविशेषः। वेदस्यतृणमादायस्रुचिजुह्वांस्रुवे स्थाल्यांचप्रस्तरवदनक्ति। प्रस्तारवदितिअग्रंमध्यंमूलंमितिक्रमेणव्यंतुवेपोनक्तिमित्यंजनंमंत्रश्च। सयदि प्रस्तरस्यरूपंकुर्याद्वेदस्यैकंतृणमाच्छिद्याग्रंजुह्वामनक्तिमध्यंस्रुवेबुध्नंस्थाल्यामितिश्रुतेः॥ अ परेत्वाहुःप्रस्तरवदितिवतिनात्रअग्रंमध्यंमूलंचेत्येतावदेवगम्यतेएतावतएवश्रुतत्वात्। नमंत्रोश्रुत त्वादिति। युक्तंचैतत्॥ ॥अग्नीदाहानुप्रहरेति। ततोग्नीदनुप्रहरेत्यध्वर्युंप्रत्याह। अथाग्नीदाहानुप्रहरेति श्रुतेः॥ ॥प्रास्यतृणादिपूर्ववत्। प्रास्यतृणंचक्षुष्पाइत्यादिशंयोर्ब्रूहीत्यंतंपूर्ववद्भवति। अत्रापितथैव श्रुतत्वात्। तूष्णीमेवानुप्रहृत्यचक्षुष्पाअग्नेसिचक्षुर्मेपाहीत्यात्मानमुपस्पृशति। अथाहसंवदस्वेत्यस गानग्नीदगंध्वावयश्रोषइहगोदेव्याहोतृभ्यःस्वस्तिमानुषेभ्यःशंयोर्ब्रूहीति॥ ॥शंयुवंतेस्रुक्स्रुवप्रग्रहणात्यद्द्यायविति। शंय्वंतकर्मणिक्रियतेति अध्वर्युःस्रुक्स्रुवप्रग्रहणाति उभयंगृह्णातिहोमा र्थं। अग्नेदब्धायविप्यनेनसᳪस्रुवांजुहोति। अथजुहूंचस्रुवंचसंप्रगृह्णातिसवाग्नयेसंप्रगृह्णा त्यग्नेदब्धायविति श्रुतेः। एतच्चपांजनादिहोमांतंगार्हपत्यस्योत्तरतउपविष्टेनकर्त्तव्यं। अत्रमंत्रवर्णा दग्निरदब्धायुरश्मीतितमोदेवता। ततश्चेदमग्नयेदब्धायवेऽशीतमायेतित्यागः। एतदपिगार्हपत्यएव जुहोतितस्यैवप्रस्तुतत्वात्प्रतिपत्यर्थकर्मचैतत्। पत्नीसंयाजशेषसाध्यत्वाच्चतदभावेनभवति। प

ने

॥३६॥
॥देवया० ३

सं २

शावपिनभवतिसंस्त्रवाभावेनार्थलोपात्। अदृष्टाकुसभावेपिपशोशंयोवकोभवतीतियुक्तमितिया शि
काः। पत्नीयाजानामर्थकर्मत्वाद्धावदुक्तौता वच्छिन्ने पुनिरुक्तिः॥ ॥सव्येनावत्यद क्षिणाग्नौजुहोत्य
ग्नयइतिसरस्वत्याइतिच। तंप्रकृतंगार्हपत्यमग्निंसव्येनो दृत्यादक्षिणंपरीस दक्षिणग्नेः पश्चादुप
विश्यदक्षिणाग्नौसकृद्गृहीतमाज्यंस्रुचाजुहोतिसमिदाधानपूर्वकं। अग्नयेसंवेशपतयइतिप्रथमा
माहुतिं। सरस्वत्याइतिद्वितीयां॥ एतदप्यर्थकर्म। ततश्चयावदुक्तंतावच्छिन्नेषुभवति। स व्ये न स्य न
त्येतत्सांगपत्नीसंयाजांतेप्रतीसनिष्क्रमणं। तेनयदागार्हप त्यदक्षिणाग्न्यो रंतरालेनागतस्तदैव
तद्भवतिनान्यमार्गेपिगमने। उलूखलेमुसलेयच्चशूर्पेआशिश्लेषदृषदियत्कपालेउत्कषोचि क्षेपः
संजुहोमिसत्याःसंतुयजमानस्यकामाःस्वाहेतिपिष्टले पांजुहोति। उलूखलेमुसलइत्यनेनमंत्रेणा
ध्वर्युःपिष्टलेपामाहुतिंजुहोति। अधिकाराद्दक्षिणाग्नावेव। अत्रप्रतिपत्तिःकेचिदाज्यंजुह्वति। केचि
च्चपिष्टसंधिनोल्ले पानिति। येत्वाज्यंजुह्व तितेषामयमभिप्रायः॥ पिष्टलेपामितिद्वितीयेकवचन
माहुतिविशेषणं। पिष्टलेपसंबंधेनहूयमानत्वात्पिष्टलेपपदेनसाविशेष्यते। ननुतर्हिपिष्टलेपाएव
कुतो नहूयंते। तेषांअभावात्। नहि पिष्टानांलेपाःसंतियत्प्रतिपत्त्यर्थमियमाहुतिःस्यात्। पात्रं
गुलिस्थाश्चेतसंभाव्यंते। तेषांतुवचनात्प्रक्षालन दृ विकानिनयनरूपाप्रतिपत्तिरुक्तानापितेषां

ब·

वि

॥३६॥
॥भाष्ये॥

क णवत्स्थापनमुपदिष्टं। मंत्रमध्येचपात्रंगुलीस्थानांलिंगमपिनास्ति। अतोवचनंविनापात्रंगुलीसं
सक्ताहोतुंनशक्यंतेप्रागुक्तप्रतिपत्तिविधिविरोधात्। उलूखलादिषुतुपिष्टलेपसंभावनैवनास्तितदानीं
हविषःपिष्टत्वाभावात्। दृषदुपलयोश्चसंश्लिष्टानांग्रहीतुमशक्यत्वाच्च। अतोचिष्टहोमदृवतार्थगृहीतस्य
हविषोयदुलूखलादिषुश्लिष्टंग्रहीतुमशक्यंचतेनविनावैगुण्यमाभूदितितत्प्रायश्चित्तत्वेनतत्प्रतिनिधि
भूतमाज्यंहोतव्यं। यथाविष्णुहोमे भिषक्कालेग्रहपाकालेवेतस्मातःस्कन्नानांसोम बिंदूनांस्कंदनप्रत्यवाय
परिहारार्थंतत्प्रतिनिधित्वेनाज्यंहूयतेवचनात्। एवमत्रापि। पिष्टग्रहणंचांगप्रधानहविमत्रोपलक्षणं।
उत्कषोविप्रुषइतिलिंगात्। तेनांगप्रधानहविषामाज्यपयश्चपुरोडाशादीनामवयवस्यान्यत्रश्लिष्टस्यग्र
हीतुमशक्यस्यप्रतिनिधिभूतोयमाज्यहोमः। अतश्चचरुसान्नाय्य पयस्यादिहविःष्वपीयमाहुतिर्भवति।
व्यवहाराभावेपिष्टलेपामित्येषासंज्ञा। सवनसंतनिंजुहोत्यथावत्तानांजुहोत्यथप्रत्येवरोहंजुहोतीत्यादिवत्।
यस्मादंगप्रधानहविषांस्वावयवहीनतानिमित्तवैगुण्यनिरासार्थोयंप्रायश्चित्तहोमः। तेनपशौरप्ययमि
ष्यतएव। अतःपाशुकत्वादग्नीषोमीयसवनीयपश्चादौदक्षिणाग्निहोमोत्कर्षोनास्याप्युत्कर्षादस्यचपश्चार्थ
स्यैवसतःसवनीयपुरोडाशप्रभृतिसर्वतंत्रोपकारकत्वात्। पशुअंगक्रमएवानुष्ठानानप्रासंगिकएवाय
मितिकेचित्। प्रतिसवनंपृथक् दक्षिणाग्निहोमसहचरितत्वाच्चैवरूपस्यापिदक्षिणाग्निहोमाभावेत्राम
पीयातिथ्यादावस्याभावः। वैद्यालंभवत्। यथान्यूनातिरिक्तदोषोपशमनार्थेपि वैद्यालंभःशंया।

॥३५॥
॥देवया॰२

वींकुसहचरितत्वात्तदभावेऽतिथ्यादौ न क्रियते। एवमयमपि। अस्य होमस्य प्रायश्चित्तार्थत्वं आज्यसाधनत्वं
चोक्तं तैत्तिरीयसूत्रे। अथ यस्य कश्चिच्चतुर्गृहीतं गृहीत्वोपसल्लविपर्यावित्यान्वाहार्यपचने प्रायश्चित्तं जुहोति यु
लुखले मुसले यच्च शूर्पे आश्लिषद् दृषदि यत्कपाले। उत्कर्षो विप्रुषः संय जामि विश्वे देवा हविरिदं जु
षंतां यज्ञे या विप्रुषः संति बह्वीरग्नौ ताः स्विष्टाः सुहुता जुहोमि स्वाहेति। यागश्चात्रेदं विश्वेभ्यो देवेभ्य इत्येवं
कर्तव्यः। मंत्रलिंगात्। ये तु पिष्टलेपानां होममिच्छंति तेषां पिष्टलेपानिति द्वितीया बहुवचनं। पिष्टसंबंधिनो लि
पाः पिष्टलेपा इति तान् जुहोतीति होमविधानादेव च पात्र्यंगुलीसंल

ग्नान् पिष्टलेपानुपादाय होमार्थं स्थापयित्वा पात्र्यंगुलि
प्रक्षालनं कार्यं। तन्मते च प्रतिपत्यर्थकर्मैव पुरोडाशसाधनकेष्वेव कर्मणि भवति। नाज्यादिसाधनके॥ पिष्टलेप
होमप्रकारस्तु शाखांतरे। आपस्तंबः। फलीकरणहोमं पूर्वमितरं वा विपरीतं चतुर्गृहीतं आज्ये फलीकरणान्नो
प्याग्ने दब्धायोऽशीततनो इति जुहोति एवं पिष्टलेपानुदूखले मुसले इति तैत्तिरीयमंत्रपाठोऽस्ति॥ ॥मानवं च॥
तस्याः पुनर्गृहीत्वा पिष्टलेपं द्विरवत्तमभिघार्योलूखले मुसले यत्कपाले उपलायां दृषदि धारयिष्यति। अवप्रुषो
विप्रुषः संसृजामि विश्वे देवा हविरिदं जुषंतां स्वाहेति जुहोतीति। केवलाज्यहोमपक्षे आज्यमिश्रपिष्टलेपहोम
पक्षेऽपि सर्वसूत्रेषु विश्वेदेवमंत्रस्य लिंग होममंत्रदर्शनात्तदुद्देशेनैव यागः कार्यः। सर्वसूत्रेऽपि आज्यहोमपक्षेऽप

॥३५॥
गव्याधे॥

क्षांतस्यैव होमस्य अंगप्रधानभूतप्रसक्तसर्वदेवताहविषां किंचित्संश्लिष्टानां स्वावयवहीनता निमित्तप्रत्य
वायपरिहारार्थतत्प्रतिनिधिद्रव्यस्य तादृश एव होतुमुचितत्वात्। अत एव विश्वेभ्यो देवेभ्य उद्देशः। विश्वे
देवाः सर्वे देवा इति यास्कोक्तेः। किंच। अनादिष्टदेवतानां मंत्राणां प्रसक्तदेवताकत्वमेव युक्तं कुतः॥
तद्येनादिष्टदेवता मंत्रास्तेषु देवतोपपरीक्षा यद्देवताः स यज्ञो वा यज्ञांगं वा तद्देवता भवंतीति। यास्कोक्तेः।
अत्र यज्ञांगस्य हूयमानस्याज्यादिद्रव्यस्य मंत्रलिंगेन प्रसक्तबहुदेवतासंबंधित्वं गम्यते। बहवश्चात्रांग
प्रधानदेवताः प्रसक्ताः। अतश्च बहुदेवत्वात्। विश्वेषां देवतानां देवतात्वं युज्यत एव। यत्तु किंचिद्बहु
देवतं तद्वैश्वदेवानां स्थाने युज्यत इति च यास्कोक्तेः। याज्ञिकोऽपि मनोज्योतिः प्रसक्तसर्वप्रधानदेवता
कमाहुः। केचित्वायस्त्वेवमूचुः। एक स्यैव देवस्य सिद्धत्वात् किमर्थमनेकदेवतत्वं कल्प्यत इति प्राप्त
स्यादेकैवात्राग्निर्देवतेति। अतस्तन्मते प्रकृतिविकृतिरूपसर्वकर्मसु इदमग्नय इत्येवास्य त्यागः। दैवतानस्त्वे
पिष्टलेपहोमानंतरं पठ्यते॥ अग्नीध्रः संमार्गानग्नौ प्रहरतीति। संमार्गाभि धानसंनहनं। अग्निराहवनीयः।
पत्नी वेदं प्रमुंचति वेदोऽसीति। वेदोऽसीत्यनेन मंत्रेण पत्नी वेदं प्रमुंचतीत्यर्थः। अथ वेदं पत्नी विस्रंसयतीति
श्रुतेः। पित्र्यायां चास्य मंत्रस्य वेदबंधनविमोके चोहः। येन त्वं देववेद देवपितृभ्यो वेदो भवेति। अनेकयज

मतेनान्येन क्रियमाणत्वात् देवतांतरस्यानुपदेशाच्च प्रस्तुतसर्वदेवताकत्वं तत्संदृष्टि २

॥३८॥
॥देवया०३

मानवे च तेनास्मभ्यं वेदो भूया इति बहुषु। तेनावाभ्यां वेदो भूया इति द्वयोः। अनेकपत्नीके एकैव विमुं
चति परार्थत्वात्। अत एव बंधनं वदूहो न भवतीति केचित्। भवतीत्यपरे॥ ॥योक्त्रं च प्रमामुंचामीति। वक्का
रात्पत्नी योक्त्रं विमुंचति प्रमामुंचामीति मंत्रेण योक्त्रविमोको यावदुक्ते तापच्छिन्ने च भवति दे वे विमोकस्य
दृष्ट प्रयोजनत्वेन प्रतिपत्तिरूपत्वात्॥ ॥स्तृणात्यावेदः॥ वेदं होताऽऽवेदः स्तृणाति। गार्हपत्य
स्योत्तरप्रदेशात्प्रारभ्य वेदिपर्यंतं। आङ् अमर्यादायां। द्रव्यविषयत्वात्। तमावेदेः स्तृणातीति
श्रुतेः। आङ् अभिविधौ वेदिं व्याप्येति। योषा वै वेदिरिति वावेदः परिगृह्य वेयोषा वृषाणं पूं स्तृणातीति वचना
दिति हरिस्वामिनः। शांखायने तु उत्तरेण गार्हपत्यमाबर्हिषस्तीर्त्वेति। आपस्तंबः। तंतुं तन्वन्निति वेदं स्तृ
णाति गार्हपत्यात्प्रक्रम्य संततमाहवनीयात्स्तृणाति सा वा वेदरिति। मानवे होता वेदं स्तृणाति गार्हपत्या
दधि संततमाहवनीयादिति। अतः शाखांतर वचनादावेदे स्त्रियमाणे पि चिधौच्यो रव्येया॥ ॥ध्रौवं पूं
समिष्टयजुर्जुहोतीति श्रुतेः। समिष्टयजुरिति कर्मणः संज्ञा संव्यवहारार्थी। समिष्टयजुरंतं भवतीत्येव
मादौ। वेदस्य विमुक्तत्वात् स्रुक्ष्वोपग्रहणं। वातश्चात्र देवता। स्वाहा वाते धा इति मंत्रलिंगात्। ततश्च जुहो
तौ वाताय स्वाहेति होमः। अर्थकर्मत्वादिति कर्कः। ततश्चांतापच्छिन्ने यावदुक्तेषु निवृत्तिः। प्रतिपत्तिरिति
तट्टीकायां तानि वाएतानि नव समिष्टयजूंषि जुहोतीति सत्र हरिस्वामि भाष्येपि प्रतिप त्तिः समिष्टयजुरि   ॥३८॥ ॥भाष्यं

समिष्टयजुर्जुहोति देवा गातुविद इति॥ ॥ध्रौवमाज्यं देवा गातुविद इति मंत्रेण समिष्टयजुर्जुहोति॥ अथ ५

देवा गातुविद इ[illegible]यंत वेदस्य च्छीत्वा ध्रुवया समिष्टयजुर्जुहोतिती॥ मानवे च संध्रुवामाप्याय्य १

स्रुक्तं ततश्चांतापच्छिन्नादिष्वपि भवति। अत्राहापस्तंबः। पूर्ववद्ध्रुवामाप्याय्य बर्हिषो दर्भमुष्टिमपादाया
तर्वेद्यूर्ध्वस्तिष्ठन्देवा गातुविद इति ध्रुवयासंततं समिष्टयजुर्जुहोत्या मंत्रस्य समापनात्प्रोक्तस्वाहाकाराद्दर्भ
मुष्टिमनुप्रहरति॥ ॥काठके च॥ ॥वेद्यामूर्ध्वस्तिष्ठन्ध्रु[illegible]
[illegible]नुप्रहरे वयास पूं स्थितय जुर्जुहोति देवा गातुविद इति संततं यज
मानभागं च प्रवसतः समिष्टयजुषा सह प्रवसति जुहोतीति शांखायनः। आपस्तंबोपि। दियजमानः
प्रसूर्वे त्वजायते विभाग स लोक इति ध्रुवायां यजमानभागमवधाय समिष्टयजुषा सह जुहुयादिति।
बर्हिः संबर्हिरिति॥ ॥संबर्हिरिति मंत्रेणा जुह्वा बर्हिर्जुहोति अथ बर्हिर्जुहोतीति वचनात् प्रतिपत्ति रि
यं चरितार्थत्वात्। ततश्चांतापच्छिन्ने यावदुक्ते च प्रवर्तते। नाशादोषादौ सह जुहोते नाज्यहोमः॥
वेद्यां प्रणीता निनयति परीत्य कस्त्वेति। अध्वर्युः स्वयमाहवनीयं परीत्य वेदेर्दक्षिणभागे उदङ्मुख
उपविश्य प्रणीता आदाय वेदिमध्ये आसाद्य तत्रैव निनयति कस्त्वेति मंत्रेण। अथ प्रणीता दक्षिणतः
प्रतीत्य निनयतीति प्रकृत्य स निनयति कस्त्वा विमुंचतीत्यादि श्रवणात्। आपस्तंबः। अंतर्वेदि प्रणीता
आसाद्य विमुंचतीति। अत एव पूर्वं वेदिमध्ये अनासादने गम्यते। प्रतिपत्तिरियं चरितार्थत्वात्। ततश्चांता
पच्छिन्नेपि भवति। नाशशोषादौ स्वप्रायश्चित्तमात्रं॥ ॥पुरोडाशकपालेन तुषानुपवपत्यधः कृष्णाजिन   पं२
मस्तामिति। पुरोडाशकपालेन तुषस्वत्वात्प्रथमेन अधः कृष्णाजिनं[illegible]। जिनस्या[illegible]त्समीपएवक

रव्य   ध स्ता १

॥३९॥
॥देवेया०३

णानयास्यातिउल्केरत्रक्षिपतिरक्षसांभागोसीत्यनेनमंत्रेण। अथफलीकरणान्कपालेनाधोधःकृत्वाजिन
मुपास्यातिरक्षसांभागोसीतिश्रुतत्वात्। तथाग्रनग्नावेवेभ्यएतदंधेनतमसिप्रवेशयतीतिवाक्यशेषा
देभ्यइतिचतुर्थ्यारक्षसाम त्वंदेवतात्वं। रक्षसांपूराक्षसमितिकात्यायनोक्तेश्च। ततश्चेदंरक्षोभ्यइतियागः॥
अपांस्पर्शश्च। शाखांतरगतोविशेषस्तूपनिंसेनप्रागुक्तएव॥ इयमपिप्रतिपत्तिः ततश्च। तापच्छिन्नादोन
वति॥ ॥पूर्णपात्रंनिनयतिपरीत्यसंततं। ततोध्वर्युराहवनीयंपरीत्यदक्षिणतउदङ्मुखोवस्थितःसंततं
पूर्णपात्रंनिनयति। सपूस्थितेयज्ञेदक्षिणतःपरीत्यपूर्णपात्रंनियतेतितथात्युदग्भवतीतिश्रुतेः। पूर्णं
निनयतिसंततमव्यवच्छिन्नंनिनयतीतिश्रुतेः। पूर्णंचितत्पात्रंचपूर्णंपात्रं। तत्रशांतिरापइतिवाक्यशेषा
दद्भिःपूर्णमितिगम्यते॥ ॥यजमानोंजलिनाप्रतिगृह्णातिसंकर्षसेति। तदद्ध्वर्युणासंततंनिनीयमानंपूर्ण
पात्रंयजमानःसंकर्षसेतिमंत्रेणांजलिनाप्रतिगृह्णाति। एतदुदकंहस्ताभ्यांधारयति। तदंजलिनाप्रति
गृह्णातिइतिश्रुतेः। अत्रग्रहणंप्रधानंनियनंतदर्थं। तेनप्रोषितेयजमानेयजमानोस्तित्रेवपूर्णपात्रस्यनिनयनं न
केनचित्कारणीयंयजमानेनांजलिनाप्रतिग्रहस्त्वकार्यः॥ ॥मुखंविमृष्टे॥ ॥ग्रहणानंतरंयजमानस्तज्जलो
नैवमुखंविमृष्टे। तेनगृहीतेनोदकेनमुखंपवस्थशांतिशोधयतीत्यर्थः। एतच्चार्थकर्मततश्चातापच्छिन्ना
दोनभवति। अनेकयजमानकेउपर्युपर्यंजलीन्कृत्वासर्वेपूर्णपात्रजलंग्राह्यं। विष्णुक्रमणंचसर्वैः

२ अथमुखस्पर्शनेइतिश्रुतेः॥

॥३९॥
॥भाष्य॥

५ ज्यायां ६ चतुरःप्राचःप्रक्रमान्प्रक्रामतिनाहवनीयमतिक्रामेदिति॥ खराखायनोपि॥ दक्षिणाद्वेदिश्रोणि

कर्तव्यं॥ ॥विष्णुक्रमान्क्रमतेदिविविष्णुरितिप्रतिमंत्रं। ततोयजमानःस्वासनादुत्थायदक्षिणाद्वेदिश्रोणि
देशादारभ्याहवनीयंयावद्विष्णुक्रमान्क्रमतेविष्णुक्रमसंज्ञान्क्रमणान्करोतिदिविविष्णुरितिप्रतिमंत्रंएके
केनमंत्रेणैकैकंक्रमणंकरोतीत्यर्थः। अथविष्णुक्रमान्क्रमतइतिप्रकृत्यसर्वस्यश्रुतत्वात्। एवंतदपूर्वकर्म
तेनातापच्छिन्नादोनभवति। अत्राहापस्तंबः। विष्णोःक्रमोसीतिदक्षिणवेद्यंतेदक्षिणापदाच्चतुरोविष्णु
क्रमान्प्रक्रामत्युत्तरउत्तरंसमनतिहरत्सव्यंनाहवनीयमतिक्रामतीति। मानवोदक्षिणात्वेदेःप्राचीनंदक्षिणेन
पादेनविष्णुक्रमान्क्रामतीति। काठकेचो नीयंयावदिति॥ पृथिव्यामितातउर्ध्वा॥ अथवापृथिव्यांविष्णु
रितिप्रथमंक्रामति। अंतरिक्षेविष्णुरितिद्वितीयांदिविविष्णुरितितृतीयमित्येवमितःपृथिवीलोकातूर्ध्वआ
रोहेक्रमेणवाविष्णुक्रमान्क्रामति। तदुक्तंपृथिव्यांविष्णुर्व्यक्रंस्तेतिश्रुतेः। तद्वाइतएवपराचीनंभूयिष्ठ
इवक्रमतइतिच। इतोस्माल्लोकात्पराचीनमूर्ध्व। अंतरिक्षंदिवंइत्येवभूयिष्ठाबहुतमाःक्रमंतइत्यर्थः।
परस्तात्त्वेवार्वाङ्क्रमतेतिच। अतउभयथाप्यर्वाग्विकल्पःपरस्तादर्वाग्वाअवरोहणंक्रमेणदिव्यंतरिक्षे
पृथिव्यामिति। इतऊर्ध्ववाआरोहणक्रमेणपृथिव्यांअंतरिक्षेदिवीति॥ ॥अस्मादन्नादितिभागमवेक्षते।
ततोयजमानोस्मादन्नादित्यनेनमंत्रेणपास्त्वंगृ॥ साकांक्षत्वात्। अयंचभागसंस्कारःतेनातापच्छिन्नादोभवति
अतएवानेकयजमानकेप्येक करोतिस्वांशावेक्षणमित्यन्ये। एककर्तृकावेक्षणपक्षेन्वारंभंकुर्युः॥ ॥

भागमवेक्षतेत्यस्थानेउपविष्टएव। अस्मादन्नादित्यस्यत्रनिर्भक्तइत्याद्यनुषं २ सर्वे

॥आचःप्रक्राम

देवयाज्ञिकपद्धतिः

॥४०॥
॥देवया०३॥

अस्यैप्रतिष्ठायाइति भूमिं। अस्यैप्रतिष्ठाया। इत्यनेनमंत्रेणयजमानोवेदिस्तुमि मवेक्षते। उपविष्टएव। अत्रापि
विभक्तिइत्यनुषंगः। सांक्षिलत्वात्। यतदप्यर्थक मतितश्चात्पच्छिन्नेन भवति। अगन्मस्वरितिप्राङ्ः प्रेक्षेतइति
शेषः। अगन्मस्वरित्यनेनमंत्रेणप्राङ्ीक्षते। प्राचीदिशंप्रोक्षतइत्यर्थः। कुतः अथ प्राङीक्षतेप्राचीहिदेवा
नांदिगितिवाक्यशेषात्। एतदप्यृथं कर्म॥ ॥संज्योतिषेत्याहवनीयं। अवेक्ष्यतइतिशेषः। संज्योतिषेत्यनेना
हवनीयमवेक्षते। एतदप्यृथकर्म। अप्रतिपत्तिरूपत्वात्। ज्योतिषाहिसं भवनमत्रप्रार्थ्यते। तेनाहैयसंस्कार वनी
कल्पनेनकार्यं। ततश्चात्तंनु सं निवृत्तिरिति कर्कः। वरुणप्रघासेषुतुवेदिद्वयस्याध्यवेक्षणाम
न्याश्चेतिसंप्रदायः। स्वयंभूरितिसूर्यं। स्वयंभूरसीत्यनेनयजमानः सूर्यमुदीक्षते। अथसूर्यमु दीक्षतेस उ
दितस्वयंभूरसीतिश्रुतेः॥ ॥वर्चोदाइतियंवाकामकामयते। सूर्यदीक्षणानं तरं वर्चोदाइत्यनेनमंत्रेण
सूर्यंप्रार्थयेत्। अथवायजमायंकाममभिलाषपुत्रपश्वादिककामये तवां तत्तब्रूयात्। गोदाअसिगामेदेहि
धनदाअसिधनंमेदेहिपुत्रदाअसिपुत्रंमेदेहीत्येव। वर्चोदाअसिव र्चोमेदेहीत्तिखेवाहब्रवीमीतिहस्माह
याज्ञ वल्क्यस्तद्ध्येवब्राह्मणेनैष्टव्यं यद्ब्रह्मवर्चसीस्यादित्युतो हस्माहौपोदितेयएववामह्यंगोदास्यति
गोदागामेदेहीत्येवंयंकामयतेसोस्मैकामः समृध्यतइतिश्रुतत्वात्। सूर्यस्यत्यावृत्तमन्वावर्त्तेदक्षिणं ततः सूर्यस्य
त्यनेनमंत्रेणयजमानःप्रदक्षिणमावर्त्तते। आवृत्तिंभ्रमणंकरोति। परिभाषयेवसिद्धेत्र दक्षिणग्रहणमिति

॥४०॥
॥भाष्यं॥

प्रतिगीर्यैतस्यैवावृतमन्वावर्त्तेत ४

पु
हग्र

रथावृत्तिंव्यक्तद्यासार्थं वाश्रोतत्वलापनार्थं वा तेनास्यापचारेश्रौतंप्रायश्चित्तं भवति। प्रसंगादाह॥ ॥ग्रहग्रहण
प्रतिगरहोमेचतुर्ष्वसौ। ग्रहग्रहणानंतरं प्रागासादनात्प्रदक्षिणावर्त्तनंकार्यं। प्रतिगरदानानंतरं चशस्त्रस
माप्तौ। ग्रहहोमानंतरं च। एषुग्रहणप्रतिगरहोमेषुतुष्वसौप्रदक्षिणमावर्त्तितव्यो॥ ग्रहंगृहीत्वैतस्यैवावृत
मन्वावर्त्ततेग्रहं हुत्वैतस्यैवावृतमन्वावर्त्ततेतिश्रुतेः। अत्रापिप्रदक्षिणग्रहणस्यपूर्वसूत्रे प्रयोजनं व
व्याख्येयं। सशस्त्रग्रहेष्वेवायंधर्मः। नशस्त्रमात्रेप्रतिगीर्य। नग्रहणमात्रे। नहोममात्रइतिप्रदक्षिणक्रिया ग्रह
शेषत्वान्मंत्रापिप्रागस्तुष्वसौमिसेनेन व्यावर्त्तते॥ ॥गार्हपत्यमुपतिष्ठतेग्नेगृहपतइति। ततोयजमानोगार्हपत्यमुप

तिष्ठते। गार्हपत्यसमीपस्थितोग्नेगृहपत इतिमंत्रेणांतप्रकाशयतीत्यर्थः। अथगार्हपत्यमुपतिष्ठतेस उपतिष्ठते
ग्नेगृहपतइतिश्रुतत्वात्। एतदप्यृथकर्मैव। ततश्चात्तलुप्तदोषोनभवति॥ ॥शतंहिमाइतिब्रूयाद्वागार्हपत्यमुप
स्थायशतंहिमाइतीमंमंत्रावयवंयजमानोब्रूयाद्वानब्रूयाद्वेतिविकल्पः। शतंहिमाइतिप्रकृतसदृशेत्यंश्च
नोद्रियेतेतिश्रुतेः॥ ॥सूर्यस्येत्यावर्त्तते प्रदक्षिणं। गार्हपत्योपस्थानानंतरं पुनरपिसूर्यस्येत्यनेनमंत्रेणप्र
दक्षिणमा वर्त्तते॥ पुनरपिमंत्रपाठात्। श्रुतावपि पुनर्विधानाच्च। अथ आवर्त्ततेसूर्यस्येति॥ ॥गच्छतिप्रा
उरुविस्तिविति। उरुविस्तिवितिमंत्रेणयजमानःप्राङ्गच्छतिप्राच्यांदिशियाति। एतदप्यृथकर्म॥ ॥ततोसी
त्यादिसंतनोविति पुत्रस्यनामगृह्णातीत्येवमंतंसूत्रं। ततोसीत्यमुंमंत्रंपठित्वाइदंमकर्ममेदिवीर्यंपुत्रइत्यत्रपुत्र

॥ ७१ ॥
॥ देवयाज्ञ ॥

स्यनामप्रथमैकवचनांतं गृह्णाति। इदंमे कर्मेदं वीर्यं पुत्रोमुकन्नामानुसंतनो त्वित्येवं। अथ पुत्रस्य नाम गृह्णाती।
दमेयं वीर्यं पुत्रो नुसंतनवदिति श्रुतेः। ततोसितंतुरसीत्येतस्मिन्मंत्रे तत्पदैरेकवाक्यभूतं गृह्णातिः कुतः काण्वसमा
म्नाना दिदंमेकर्मेदं वीर्यं पुत्रो देवदत्तोनुसंतनोत्विति हरिस्वामिनः। अनेकेषु पुत्रेषु सर्वेषां नामग्रहणं प्रतिपुत्रंच
ततोसीत्ययमावर्त्तनीयः पुत्रनामग्रहणार्थत्वात्। ज्येष्ठस्य पुत्रस्य नामाभिव्याहृत्य यावंतो वा भवंति तिशांखायनः।
प्रियस्य पुत्रस्य नाम गृह्णातीत्यापस्तंबः। अनेकयजमानकेषु सर्वैः पुत्राणां नामग्रहणं कार्यं पुत्रस्याशीः प्रा
र्थनार्थत्वात्॥ ॥ आत्मनो विद्यमाने। अविद्यमाने पुत्रे अजाते मृते वा यजमान आत्मनो नाम गृह्णीयात्। यदि पुत्रो
न स्यादथात्मन एव गृह्णीयादिति श्रुतेः। कथंचित्पुत्ररहितश्चेन्मृतपुत्रो वा तदा आत्मनो नाम गृह्णीयात्तथा च इदं
मे कर्मेदं वीर्यं देवदत्तोहं संतनवानीति नामग्रहणमिति हरिस्वामिनः॥ ॥ ततं वेत्वा ज्योतिषेत्वेति वा॥ अथवा
अविद्यमाने पुत्र इदंमेकर्मेदं वीर्यं ततं वेत्वा ज्योतिषेत्वानुसंतनोत्विति प्रयोगो भवति॥ एतदप्यर्थकर्म अनेकयज
मानके विष्णुक्रमणभागभूमित्राकसूर्यविक्षणप्रदक्षिणावर्त्तनप्राग्गमनं ध्वन्चारं भः। आहवनीयावेक्षण
गार्हपत्योपस्थानपुत्रनामग्रहणात्तूष्णीमाहवनीयोपस्थानव्रतविसर्गभागप्राशनानि भेदेनेति संप्रदायः॥ ॥
आहवनीयमुपतिष्ठते तूष्णीं। पुत्रनामग्रहणानंतरयजमानस्तूष्णीमाहवनीयमुपतिष्ठते। समीपेस्थित्वा तं
विलोकयति। तूष्णीमिति लौकिकं वागुच्चारणनिषेधः। क्रियते मंत्राभावात्। अथाहवनीयमुपतिष्ठते प्राङ्मे

॥ ७१ ॥
॥ भाष्यं ॥

यज्ञोनुसंतिष्ठतामिति तूष्णीमुपतिष्ठत इति श्रुतेः। द्विविष्णुरिति क्रमणप्रभृत्याहवनीयोपस्थानांतं कर्म विष्णुक्रमसं
ज्ञं भवति। कुतः आहवनीयं चोपस्थाय व्रतादीनिवर्त्तेदिति ज्ञापकात्। प्रयोजनं यत्र विष्णुक्रमान्न क्रियंते सर्वविधौ तत्रा
हवनीयोपस्थानांतं कर्म निवर्त्तते। न क्रमणमात्रं। यत्र च वि धीयते। विष्णुक्रमान्कुर्यादिवियज्ञविध इत्ति तत्राहवनी
योपस्थानांतं विधीयत इति॥ ॥ व्रतं विसृजतेयनोपेयात्। ततो यजमानो व्रतं विसृजते। शास्त्रितं सत्यवदनादि
नियमं मुंचति। यनोपेयादिति येन मंत्रेण पूर्वमुपेयादुपेतं भवेत्तेन मंत्रेण विसृजेदित्यर्थः पूर्वं हि व्रतग्रहणे द्वौ मंत्रौ
उक्तौ। अग्ने व्रतपत इदमहमिति वी त। तेनैव मुच्यते। यद्वा पूर्वमग्ने व्रतपते व्रतं चरिष्यामीत्यनेनोपेतं तदा अ
धुनाग्ने व्रतपते व्रतमचारिषमित्यनेन विसृजते। यदा च पूर्वमिदमहमनृतादित्यनेनोपेतं तदेदानीमिदमहंय
एवास्मि सोस्मीत्यनेन मंत्रेण विसृजते। एवमेव अर्थसंस्थिते विसृजत इत्युभयपत्र एषक्लृप्यते॥ ॥ सम्प्र पतिरा
षेति भागं प्राश्नाति। सयज्ञपतिरित्यनेन मंत्रेण यजमानः स्वभागं प्राश्नाति। अनेकयजमानके सर्वे विभज्य प्रा
शनं कुर्युः। ब्रह्माणस्मिन्नेव काले ब्रह्म भागं प्राश्नाति। तमिष्टौ संस्थितायां प्राश्नीयादिति छंदोगसूत्रात्। ब्रह्म
भागमाहरति नासंस्थिते तं भक्षयतीत्यापस्तंबः॥ ॥ मानवे॥ ॥ प्राशित्रहरणे ब्रह्मभागमा दधाति। तत्रांच्यते
प्राश्नामि सर्वं वासमिष्टयजुष इति। व्रतविसर्गभागप्राशनयोरत्र पाठश्चिन्नोपि प्रवृत्तिः प्रतिपत्तिरूपत्वात्॥ ॥
ब्राह्मणं तर्पयितवै ब्रूयाद्यज्ञमेव तत्तर्प्पयतीति श्रु तेस्तर्पयतीति श्रुतेः। भागप्राशनानंतरमध्वर्युर्ब्राह्मण

॥४१॥
॥देवयो०२

तर्पयितवा इतीमं प्रैषं यजमानं प्रतिब्रूयादुपचिष्ट एव। प्रैषानंतरमेवात्र ब्राह्मणस्तृप्तिपर्यंतं भोजयित
व्यः। कुतः। यज्ञमेवैतत्तर्पयतीति श्रुतेः। इति श्रवणात्॥ स हैष यजस्तु उवाचेति प्रकृत सत्र [illegible] यावैवि नेमीति
कातेतर्पितिरि [illegible] त्तिब्राह्मणस्यैव तृप्तिमनुतर्प्येयमितितिस्मात्स[illegible] स्थितेयज्ञे ब्राह्मणं तर्पयितवै ब्रूयाद्यज्ञमे
न होवैतत्तर्पयतीति ब्राह्मणतर्पणेनैव यज्ञस्तृप्तो भवति नान्यथा। अतश्च प्रैषार्थानुष्ठानं ब्राह्मणभोजनरूप
मत्र पदार्थो निप्रैषमात्रमित्येव स्थापयितुमन्नस्य उपादानं। अयं च प्रयाजादिसदृशं आराडुपकारको ऽदृष्टो
त्पादकः प [illegible] दार्थः। कृतार्थं गैतेन प्रयाजाद्यक[illegible]रणइवास्याकरणे कृते वैगुण्यं भवति। अकृते च तस्मिन्नि
ष्टेरसमाप्तत्वादिष्टांतरारंभो न कार्यः। ब्राह्मणभोजनानंतरं च नमः कृताय इति न समिदाधानोपस्थानहो
मानामन्यतमं कुर्यात्करोति। द्विरभ्यासोध्यायपरिसमाप्तिसूचनार्थः॥ ॥ अत्रश्रुता व्रतविसर्जनादि
मद्यप[illegible]वास्मि सोस्मीति त्रयमेव व्रतविसर्गमंत्राभिहितत्वान पक्षांतरं। तेनेवं ज्ञायते इदमहमित्ययमेवमंत्रः
श्रुत्य भि [illegible] इति हरिस्वामिनः॥ समाप्तोयं पौर्णमासः सर्वास्विष्टिषु पशुबंधेषु सोत्रामण्यां च प्रकृतिभूतः। यागेषु
प्या यद्य[illegible]प्ययकृता धानस्य भवति। तथा धानेषु नां तत्र हविः संस्कानां पौर्णमासयागः प्रकृतिस्तस्मात्पूर्व
मुपदेशः। ननु तर्हि तत्र हविषामेव सर्वेष्टिप्रकृतित्वं कृत्वान्येव पूर्वं कस्मान्नोपदिष्टानि। सत्यं। किंतु तेष्वी

॥४२॥
॥श्राद्ध॥

तिकर्तव्यतावैकृतस्य दर्शनात्सर्वप्रकृतित्वं न संभवतीति तस्मात्पौर्णमासयाग एव पूर्वमुपदिष्टः॥ दर्शपौर्णमासयोर्महि
मानमाह सत्यव्रतः। जीवतो हि शिलोंछाभ्यामहन्यहनि यत्फलं। तद्दर्शपूर्णमासाभ्यां सम्यगाप्नोति मानवः॥ वा
य युपुराणेपि॥ दर्शं च पौर्णमासं च ये यजंति द्विजातयः॥ न तेषां पुनरावृत्तिर्ब्रह्मलोकात्कदाचनेति। हारीतः। नास्य
यस्य लोको वै नायज्ञो विंदते शुभं। अनिष्टयज्ञो पूतात्मा नश्यति छिन्नपर्णवत्। यज्ञेन लोका विमला विभांति
यज्ञेन देवा अमृतत्वमी[illegible]युः। यज्ञेन पापैर्बहुभिर्विमुक्तः प्राप्नोति लोकान्परमस्य विष्णोः॥ ॥गर्गः॥ यो वैदिक
मनादृत्य कर्म स्मार्तं रिहासिकं। मोहात्समाचरेद्विप्रो न स पुण्येन युज्यते। प्रधानं वैदिकं कर्म गुणभूतं तथेतरत्।
गुणनिष्ठः प्रधानं हि त्यक्त्वा गच्छत्यधोगतिं॥ ॥व्यासः॥ ॥श्रौतं कर्म न चेद्युक्तः कर्तुं स्मार्तं समाचरेत्। तत्रा
प्यशक्तः करणे सदाचारं लभेद्बुध इति। अनुत्रासनिकेपि। सुशुद्धैर्यजमानैश्च ऋत्वि[illegible]ग्भिश्च तथाविधैः।
शुद्धैर्द्रव्योपकरणैर्यष्टव्यमिति निश्चयः। तथा कृतेषु यज्ञेषु देवानां तोषणं भवेत्। तुष्टेषु देवसंघेषु यज्ञा यज्ञफलं
लभेत्। देवाः संतोषिता यज्ञैर्लोकान्संवर्धयंत्युत। उभयोर्लोकयोर्देव भूतिर्यज्ञैः प्रदृश्यते। तस्माद्यज्ञाद्दिवं या
ता पूर्वैः सह मोदते। नास्ति यज्ञसमं दानं नास्ति यज्ञसमो विधिः। सर्वधर्मसमुद्देश्यो देवयज्ञे समाहित इति। नित्यक
र्मलोपे प्रायश्चित्तमाह प्रजापतिः। दर्शं च पौर्णमासं च लुप्त्वा चोभयमेव वा। एकस्मिन्नुत्क्षेपादेन द्वयोरर्धेन
शोधनं। हविर्यज्ञेषु शक्त्या तु लुप्तेष्वेकमादितः। प्राजापत्येन शुध्येत पातकं संस्थासु चैव हि। संध्योपासन

॥४३॥
॥देवया०३

हानौ च नित्यस्[illegible]नं चिलोप्य च। होमं च नैत्यकं शुद्ध्येज्जायत्र्यष्टसहस्रकृत्। समाप्ते सोमयज्ञानां हानौ चांद्रायणं चरेत्॥ अहूतान्यतमं यज्ञं पंचानामधिकारतः। उपवासेन शुद्ध्येत पाकसंस्था सु चैवहीति॥ ॥कात्यायनोपि॥ ॥पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च। अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा॥ भोजने पतितान्नस्य चरुर्वैश्वानरो भवेदिति॥ विहितद्रव्याद्यलाभेपि नित्यलोपो न कार्यः॥ ॥तदाह बोधायनः॥ ॥यस्य नित्यानि [illegible] लुप्तानि तथैवागंतुकानि च। विप्रा गच्छोपि न स्वर्गं गच्छत्युपतितो हि सः। तस्मात्कंदैः फलैर्मूलैर्मधुना थरसेन वा। नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेत्॥ ॥इति श्री त्रिरग्निचित्सम्राट्स्थपति महायाज्ञिक श्री [illegible] प्रजापतिसुत नयाज्ञिक श्री देवनद्वृत्ते कात्यायनसूत्रव्याख्याने तृतीयोध्यायः॥

॥ॐ॥ ॥श्री॥

॥श्रीतस्तत्रस्य भाष्यं देवयाज्ञिकं चतुर्थो योध्यः॥

॥१॥ ॥दर्श० ४

श्रीगणेशाय नमः॥ श्रुतिक्रमानुसारिणाचार्येण प्रथमं पौर्णमासमनुविहितं॥ अधुना दर्शस्यानुविधानं क
रिष्यंस्ततः प्राक्कालीनं पिंडपितृयज्ञमनुविधत्ते॥ अपराह्णे पितृयज्ञश्चंद्रादर्शनेऽमावास्यायामिति॥ ॥अह्नो हि
दिवसस्य समं द्वेधा विभक्तस्यापरो द्वितीयो भागोऽपराह्णः॥ शब्दसामर्थ्यात्॥ समं त्रेधा विभक्तस्यान्त्यस्तृती
यो भागोऽपराह्ण इत्यपरे। तत्कुतः॥ स वा अपराह्णे ददातीति प्रक्रम्य पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामप
राह्णः पितॄणामित्यर्थवादे पूर्वाह्णमध्याह्नापराह्णानां त्रयाणां दिवसभागानामभिधानात्। अह्नः पूर्वो भागः
पूर्वाह्णः। दिनस्य मध्यं दिनः मध्याह्नः। अह्नोऽपरो भागः अपराह्ण इति। पूर्वापराधरोत्तरमेकदेशिनैकाधि
करण इति समासः॥ राजाहःसखिभ्यष्टजिति हशब्द टच॥ अह्नोऽह्न एतेभ्य इत्यह्नादेशः॥ अह्नोऽदन्तादि
ति णत्वं॥ पिंडपितृयज्ञ इति वक्ष्यमाणस्य कर्मणः समानसंज्ञा। सा च पिंडदानपदार्थस्यैवानुगमात्॥ पिंडैः
पितॄणां यज्ञः पिंडपितृयज्ञ इति अतश्च होमजपाद्यस्तदंगं॥ प्रयोजनं चिंतायाः पिंडदानस्याकरणेऽप्या
वृत्तिः॥ न होमादेः॥ अमावास्यायामपराह्णे चंद्रादर्शने पिंडपितृयज्ञो भवतीत्यन्वयः॥ तत्रामावास्यायामपरा
ह्णे पिंडपितृयज्ञ इत्येतावत्युक्ते अमावास्याशब्दस्यामावास्यायां यजेत॥ य एवं विद्वानमावास्यां यजेत इत्या
दौ कर्मण्यपि दर्शनात्कर्मसंबंधेनैव पिंडपितृयज्ञो विहितः स्यात्। कर्मण एव प्रस्तुतत्वात्। नामावास्यातिथि
लक्ष्या कालसंबंधेन॥ भवत्वेवं को दोष इति चेत्॥ मैवं॥ तथा सति दाक्षायणराजसूयकौंडपायिनामयने

॥१॥

त२

सारस्वतसत्रादौ पक्षमध्ये मावास्ये पिंडपितृयज्ञप्राप्तेः॥ अतस्तद्व्यावृत्त्यर्थं चंद्रादर्शन इति विशेषणं। चंद्र
स्यादर्शने॥ चंद्रस्यादर्शनं चाभ्रादिनां द्वीपांतरवर्तित्वादिनापि भवति तेन चंद्रादर्शनेऽमावास्यापदेन त
द्विशेषयति। चंद्रादर्शनशब्देनात्र चंद्रमसः परमक्षयो लक्ष्यते॥ न क्षयमात्रं॥ तस्य प्रतिदिनं सद्भावात्॥
कुत एतदवसितमिति चेत्॥ तस्मिन्नक्षीणे ददातीत्युपक्रम्य यदेवैष न पुरस्तान्न पश्चाद्ददृशेऽन्यो ददातीति श्रुतेः॥
अतोऽमावास्यायां तिथावपराह्णे चंद्रस्य परमक्षये विशिष्ट एव काले पिंडपितृयज्ञो भवतीति सूत्रार्थः॥
तेन दाक्षायणादौ पक्षमध्यमावास्यानुष्ठाने पिंडपितृयज्ञस्य निमित्तभूतकालाभावादननुष्ठानं सिद्धं॥ काल
उक्तोऽथ विधिमुपदिशति॥ दक्षिणाग्नौ श्रपणं॥ अत्र पितृयज्ञे दक्षिणाग्नौ चरोः श्रपणं भवति। गार्हपत्याहव
नीययोरपवादोऽयं शाखांतरात्॥ होमश्च॥ दक्षिणाग्नावित्यनुवर्तते॥ मेक्षणेन जुहोत्यग्नय इति सोमायेति
चेति वक्ष्यमाणो होमोऽपि दक्षिणाग्नावेव भवति॥ आहवनीये होमाः इत्यस्यापवादः॥ ॥परिस्तीर्य तं पूर्ववत्पा
त्रासादनमेकशः॥ ॥तं दक्षिणाग्निं दर्भैः परिस्तीर्य॥ पूर्ववत्पौर्णमासवत्पात्राणामासादनं भवति पूर्ववदि
त्यनेन श्रपणस्य पश्चादुत्तरतो वा अर्थवच्चेत्येतावदतिदिश्यते। द्विश इत्येतदपि प्राप्नोतीति तन्निवृत्त्यर्थमेकश
इति॥ एकशः एकैकं पात्रमासादयति॥ न द्वंद्वं। तच्चाप्ययोगक्रमेण दक्षिणाग्नेरुत्तरतो दक्षिणसंस्थं॥ स्फ्यः॥
शूर्पं॥ अग्निहोत्रहवणी वा॥ चरुस्थाली वा॥ कृष्णाजिनं॥ शाखांतरात्॥ उलूखलं॥ मुसलं॥ व्रीहयः॥

॥२१॥
॥देवया०४

स्रुच्चिग्रहणपक्षे अत्र चरुस्थाली। चरुश्रपणार्थमुदकं। आज्यं। मेक्षणं॥ समित्त्रयं॥ उदकपात्रं॥ सकृदाच्छिन्ना
नि दर्भतृणानि॥ सूत्रादीनामन्यतमदिति॥ ननु परिस्तरणस्याकृतिमात्रांगत्वादत्रापि तत्प्राप्तौ पुनः किमर्थं पुन
रुच्यते परिस्तीर्येति। सत्यं। तत्तु होमा नूर्ध्वं प्राप्नोति नास्मिन्काल इति तेन कालविशेषविधानार्थं पुनर्वचनं। ये
षां तु नाकृत्यंगं तेषामप्राप्तस्य विधानार्थं। एतच्च परिस्तरणं होमांगत्वाद्धोमस्य यज्ञोपवीतिनाकरणपक्षे इद
मपि यज्ञोपवीतिनैव प्रागुदगग्रैर्दर्भैः प्रागुदक्संस्थं प्राङ्मुखेन कार्यं॥ प्राचीनावीतिना करणपक्षे
परिस्तरणमपि तथैव कार्यं॥ अत्र सर्वं कर्मापि सव्येन दक्षिणाभिमुखेन कर्त्तव्यं॥ अत्र नीविस्रंसनविधानात्
प्रथममेव नीवीबंधनं कार्यं॥ ततः परिस्तरणादि॥ आपस्तंबः॥ दक्षिणाप्रागग्रैर्दर्भैर्दक्षिणामग्निं परिस्तीर्य
प्रा दक्षिणतः पश्चाद्वा दर्भान्स्तीर्त्वा दक्षिणाप्रागग्रैः पिंडपितृयज्ञपात्राणि प्रयुनक्ति स्फ्यं मेक्षणं कृष्णाजिन
मुलूखलं मुसलं सूर्पमाज्यस्थालीं चरुस्थालीं येन चानार्थो भवति॥ आश्वलायनोपि॥ दक्षिणाग्नेः प्रागुदक्
वैकंकराः पात्राण्यासादयेच्चरुस्थालीं शूर्पं स्फ्यमुलूखलं मुसलं कृष्णाजिनं सकृदाच्छिन्नं ध्मामेक्षणं कमंडलुमिति॥
२ अपरेण गार्हपत्यं चरुं मपूर्णं स्रुचं वा तूष्णीं गृहीत्वोत्तरेण दक्षिणाग्निमवहंति तिष्ठन्॥ गार्हपत्यादपरस्यां दिशि ति
अपूर्णां चरुस्थालीं तूष्णीं व्रीहीन्न्युब्जेन मुष्टिना प्राचीनावीती दक्षिणामुखोध्वर्युर्गृह्णीयात्। अथवा अ
पूर्णां स्रुचं गृह्णीयात्॥ अतश्च विकल्पः॥ चरुस्थाल्यां ग्रहणं स्रुचि वा। मंत्रस्याविधानात्तूष्णीं ग्रहणं लोकिकत्वा
॥२१॥
॥शा

ना०१

गुणाभावप्रतिषेधार्थं॥ आपस्तंबसूत्रे विकल्पः। चरुस्थाल्यां ग्रहणं॥ स्रुचि वा। दक्षिणतः प्राङ्मुखं व्रीहिमयच्छ
टमवस्थितं नवत्यध्वर्युरुपवीतिना स्थालीमेकपवित्रेणांतर्धाय तयादक्षिणतः शकटादधि निर्वपति
उत्तरतो वा प्राचीनावीती तां पूरयित्वा निमार्ष्टि अमुष्मै त्वा जुष्टं निर्वपामीति पितृभ्यो जुष्टं निर्वपामीति वा तूष्णीं वेति॥
अतश्च स्थाल्यैव ग्रहणं। मानवे। उदक्यामेकपवित्रमवधाय पूरयित्वा बिलं निमार्ष्टीति॥ शांखायनः॥ गार्ह
२ पत्यस्य पश्चाद्दक्षिणाग्रेषु कुशेषु स्फ्यं निधायोपरिष्टाद्व्रीहीन्पात्र्यां पुरस्तात्शूर्पे स्थालीमादायापसव्यं जा
नुनी वा मुष्टिना व्रीहीन्गृह्णाति पितृन्ध्यायन्यथाधो बिलाच्छ्रुतः स्यादिति॥ आश्वलायनः॥ दक्षिणतोग्निष्टमारु
ह्यचरुस्थालीं पूर्णां निमृजेदिति॥ तत एवं गृहीत्वा दक्षिणाग्नेरुत्तरतो गार्हपत्यस्य पुरस्ताद्दक्षिणाभिमुखस्तिष्ठन्नव
हंति॥ अत्र शाखांतरात् दक्षिणाग्नेरुत्तरत उदग्ग्रीवं कृष्णाजिनमास्तीर्य तत्रोलूखलं निधाय तस्मिन्व्रीहीणां प्रक्षेपं
कृत्वा मुसलमादाय दक्षिणाभिमुखस्तिष्ठन्नवहननं कंडनं व्रीहिणां करोति॥ ततः शूर्पमादायोलूखलाद्व्रीहीन्नि
ष्काश्य निष्पवनेन तुषान्निष्काशयेत्॥ आपस्तंबः॥ अपरेणान्वाहार्यपचनं प्रत्यगुदग्ग्रीवं कृष्णाजिनमुलू
खलं प्रतिष्ठितं दक्षिणाप्राचीं तिष्ठंती पत्न्यवहंति परापावमविवेकं सकृत्फलीकरोतीति तं दक्षिणाग्नौ जीवतंडुलं
श्रपयति॥ आश्वलायनः॥ कृष्णाजिन उलूखलं कृत्वेतराधः पत्न्यवहन्याद्विच एव हेतान्सकृत्प्रक्षाल्य द
क्षिणाग्नौ श्रपयेदिति॥ सकृत्फलीकरोति॥ ततः सकृदेव फलीकरणं करोति। लोके तस्य पुनःपुनः क्रियमाण

॥३॥ ॥देवयं०४॥

त्वात्सर्वादित्युच्यते॥ सजघ्नेनेनगार्हपत्यमितिप्रकृत्य सर्वस्यश्रुतत्वात्॥ सारतंडुलमपूर्णं श्रपयित्वा भिघार्योद्वास्यमेक्षणेनजुहोत्यग्नयइतिसोमायेतिच॥ इदमेवचरुंसारतंडुलं॥ ईषत्स्विन्नतंडुलं तथा अपूर्णं। यथाश्रृंतेनच रुस्थाल्याः पूरणंन भवतितथा कर्त्तव्यं॥ एवंचरुंश्रपयित्वाज्यादितेनाज्येना भिघार्यदक्षिणात उद्वास्यदक्षिणाग्नेः पूर्वमार्गेणाप्रदक्षिणमुत्तरतआनीयसव्यं कृत्वातिष्ठंस्तिस्रः समिध आधायोपविश्य प्राङ्मुखोमेक्षणेनचरुंजुहोतिदक्षिणाग्नौअग्नयेकव्यवाहनायेतिसोमाय पितृमतइति द्वाभ्यांप्रतिमंत्रंद्वेआहुती। ब्रह्मपुराणे। ततोघृतामन्नंतुसोमादायसाधितं॥ तानग्नौकरिष्यतइदंप्रसयतः प्रार्थ्ययेद्विजान्।ॐ कुरुष्वेतिनिरुक्तोदक्षिणाग्निंसमाश्रयेत्। दक्षिणाग्नौचतुर्दिक्षुदर्भानास्तीर्यवाग्यतःद घ्याच्चसमिधस्तिस्रस्तस्मिन्प्रादेशमात्रिकाः पालाशाः समिदर्थेचनियोज्याः पितृकर्मणि॥ घृताक्ताः समिधो द्वत्वादक्षिणाग्राः समंत्रकाः॥ मेक्षणेनघृताक्तेनजुहुयादाहुतित्रयमिति। अत्राग्नौकरणेसमिदाधानदर्शनि त्पिंडपितृयज्ञेपिसमिदाधानंसमूलोश्च तमभिघार्यदक्षिणत उद्वासयतीतिमानवकाठकेच॥ यज्ञोपवीती आसीनोमेक्षणेनजुहोतीतिशांखायन ः॥ अध्वर्युरुपवीतीदक्षिणंजान्वाच्यमेक्षणाउपस्तीर्यतेनावर्द परभिघार्यत्यापस्तंबः॥ कात्यायनः। अग्नौकरणहोमश्चकर्त्तव्यंउपवीतिना। प्राङ्मुखनैवदेवभ्याजुहोती तिश्रुतेरिति। अत्रकेचिदपसव्येनहोमंकुर्वतितेषांउद्वस्याग्नौद्वेआहुतीजुहोतिदेवेभ्यइतिश्रुतिविरोधः॥ अ

गा१

॥३॥ ॥श्राद्ध॥

तस्तद्द्वारंतरीयंविधानं। तथाचकात्यायनः अपसव्येनवाकायेदिक्षिणाभिमुखेनवेति। मेक्षणंचहोमसाधन त्वाद्वैकंकतं॥ पालाशमपि भवति। तथाचकात्यायनः॥ इध्माजातीयमिध्मार्धप्रमाणंमेक्षणं भवेत्॥ वृत्तंचांगुष्ठ पृथ्वग्रमवदानक्रियाक्षममिति॥ अत्रहरिस्वामिनः॥ एतेआहुती पिंडदानांगभूते॥ ततश्चविस्मृतयोर्नकुरु र्त्पाद्यः कित हिप्रायश्चित्तंकृत्वाआसमाप्तेराज्येनहोतव्यमिति। प्रास्यत दक्षिणेनोल्लि खत्यपहताअसुरा॥ तन्मेक्षणंदक्षिणाग्नौप्रास्यप्रस्तुतत्वाद्दक्षिणाग्निंदक्षिणेनतस्मादृक्षिणस्यांदिशि। अथवातंदक्षिणाग्निम परेणतस्मादपरस्यांदिशिवास्फ्येनोल्लि खतिदक्षिणासंस्थाल्लेखांकरोत्यपहताइतिमंत्रेण। सव्येन होमपक्षे मेक्षणप्रासनमपिसव्येनैव। तदंगत्वा॥ तदंगत्वेवाग्नौमेक्षणमभ्यादधातितत्स्विष्टकृद्धोमनमितिश्रुतेः॥ अपसव्येनहोमपक्षेत्वपसव्येनैवमेक्षणप्रासनमिति। स्फ्येनेतिशांखायनात्॥ तथाचापस्तंबः सकृत्स्फ्येनो ल्लिखेति। आश्वलायनोपि। स्फ्येनलेखामुल्लिखेदपहताइति। उल्मुकंपरस्तात्करोतियेरूपाणीति॥ रेखा याःपरस्तात्रेखायाः दक्षिणप्रदेशेयेरूपाणीतिमंत्रेणोल्मुकंदक्षिणाग्नेरेकदेशंनिदधातिस्थापयति॥ उदपात्रेण वनेजयत्यपसव्यंसव्येनवोद्धरणसामर्थ्यादिसाववनेनिक्ष्वेतियजमानस्यपितृप्रभृतीत्रीन्। उदकस्यपात्र शूर्पपात्रादितेनोदपात्रेणाध्वर्युर्यजमानस्यपितृप्रभृतिपितुरारभ्यत्रीन्पूरुषानृपितृपितामहप्रपितामहानेप सव्येपथास्याद्धस्तस्यसव्यप्रदेशाद्दक्षिणप्रदेशेनोदकनिनयनंयथास्यात्तथांगुष्ठप्रदेशिन्योरंतरालेन॥

प्र

प्र

॥४॥ ।देवयो०४॥

वनेजयति॥ अवनिक्तान्स्रुस्वीन्करोतिपिंडदानाय। तद्यथाशिष्यतेभिषिंचेदेवंतदितिश्रुतेः॥ असावितिसंबु
ध्यंतगोत्रनामादेशपूर्वकंअमुकसगोत्रयजमानस्यपितरमु कशर्मन्नवनेनिक्ष्वेत्यनेनमंत्रेण। एवंपितामहा
मुकशर्मन्प्रपितामहामुकशर्मन्निति। रेखायामूलमध्याग्रप्रदेशेषुदक्षिणसंस्थामवनेजनंकार्यं॥ अपसव्य
मवनेजनंकस्मात्॥ सव्येनोद्धरणासामर्थ्यात्॥ अनेनसूत्रावयवेनोद्धरंतिमनुष्येभ्यइतिश्रुतिः प्रकटीक्रियते।
अस्यांहिश्रुतौअभिनिपन पितॄणांअंगुष्ठप्रदेशिन्योरंतरालेनदानंप्रतीयते॥ तथाहिसवाइतिदहातीतिवैदेवेभ्यो
जुह्वत्युद्धरंतिमनुष्येभ्योथैवपितॄणामिति॥ अग्रेणामिति॥ अग्रेणदेवानांहोमः॥ कनिष्ठिकाप्रदेशेनमनुष्याणा
मुद्धरणंपरिवेषणोपरपर्यायं अथैवमित्यंगुष्ठप्रादेशिन्योरंतरालमेवपितॄणांपरिशिष्यते। अतइदमाहमपसव्य
स्य नितियजमानौपितृप्रभृती निसूत्रणात्॥ असावेतत्तइत्येवयजमानस्यपितृइतिश्रुतेश्चपिंडपितृयज्ञेध्वर्युरेव
कर्त्तेतिप्रतीयते॥ उपमूलंसकृदाच्छिन्नानिलेखायांकृत्वायथावनिक्तंपिंडंदद्यात्सासावेतत्तइति॥ अवनेज
नानंतरंउपमूलंमूलसमीपेसकृदाच्छिन्नानिएकेनैवप्रयत्नेनच्छिन्नानिदर्भतृणानिदक्षिणाग्राणिरेखायांकृत्वा
स्तीर्यथावनिक्तंयत्रयत्रावनेजनंयस्ययस्यदत्तंतत्रतत्रपितृपितामहप्रपितामहानांपिंडान्दद्यात्सासावेतत्तइति
मंत्रेण॥ असावित्यस्यस्थानेमुकसगोत्रामुककर्मन्नेतत्तइतिप्रयोगः॥ आपस्तंबः॥ सव्यंजान्वाच्याप्राचीनया
पिः सकृदाच्छिन्नेबर्हिषिदक्षिणापवर्गान्पिंडान्दद्यात्सासावेतत्तेततइतियेचत्वामन्वितियेतेरिति॥ अत्राहआ

॥४॥

पस्तंबः। समूलंसकृदाच्छिन्नंबर्हिराहरति॥ सकृदाच्छिन्नान्निवातृणान्युपमूलंदिना नीतिबर्हिःकु शात
णानिकाशानीतिहेमाद्रिः। अत्रविशेषमाह। देवलः॥ तस्मिन्स्थानेततोदर्भानेकमूलाञ्शिवान्बहून्। द
क्षिणाग्राननुदक्प्राद्दान्सावस्तीर्णास्त्वणुयात्समं॥ तस्मिन्नितिपिंडदानस्थाने॥ एकमूलान् एकमूलसंसक्त
बहुशिखान्। शिवानितिसाग्रान्अस्फुटिताग्रत्वादिविशिष्टान्। बहुवचनात्त्रीनेकेतिनियमोमाभू
दितिबहून्भुम्याच्छादनपर्याप्तान्। संख्यानियमस्तुनास्तिआस्तरणस्यादृष्टार्थत्वात्। समंसमस्यैतया।
समांतरंतयासमम्मूलंतयावेति। एकमूलत्वविधानादेकतेषांसमूलत्वमपिगम्यते॥ अतंक्वापिमूलंमूल
समीपएवछेदनमुक्तं॥ येचत्वामन्वितिचैके॥ एकेएतत्तेयेचत्वामनुइत्येवंपिंडदानमंत्रशेषंकुर्वंति। मानवे।
पिंडान्निदधातिपितुर्नाम्नासावेतत्तेयेचत्वामनुतस्मैतस्वधेतिप्रथमं पितामहस्यनाम्नास्थवीयांसंम
ध्यमं॥ प्रपितामहस्यनाम्नास्थविष्ठं दक्षिणंद्वयोरपरयोर्नामिनीगृह्णन्मूलदेशेलेपंनिमार्ष्टिलुप्यतेजीव
त्पितुःपिंडनिधानंवाजीवत्पितामहस्यवानजीवंतमतिदद्याद्येभ्यएवपितादद्यात्तेभ्योदद्याद्यदिवधुनामवि
द्यात्स्वधापितृभ्यःपृथिवीषद्भ्य इतितृतीयइति॥ एवमेवापस्तंबसूत्रेपि॥ यदिद्विपितृकःस्यादेकैकस्मिन्पिंडे
द्वौद्वावुपलक्षणेदितिविशेषः। शौनकः नामान्यविद्वान्पितःपितामहप्रपितामहेति। व्याघ्रपात्॥ गोत्राज्ञाने
काश्यपइति॥ ततश्चकाश्यपगोत्रपितःपृथिवीसन्अवनेनिक्ष्व। पितामहांतरिक्षसत्। प्रपितामहदिविस

॥५॥
॥देवया०५

दितिप्रयोज्यं॥॥ अत्रपितरइत्युक्त्वोदंङास्तआतमनात्। अत्रपितरइतीमं मंत्रंपिंडसंमुखएवोक्त्वासंहितास्वरेण
पठित्वाप्रदक्षिणंपर्यावृत्योदङ्मुखोभूत्वाश्वासधारणंकृत्वोपविशेत्। आ तमनात्। तमुवलानौ। तमनं निः
नचोदङ्मुखावस्थापनमात्रेणातमनंसं भवतिअतः शाखांतरोक्तंश्वासधारणमत्रकार्यं तथाचाश्वला
यनः। यथाशक्त्यप्राणनात्मित्त्वेति। अप्राण प्राणनिरोधंकृत्वेत्यर्थः। यदाह विष्णुः॥ यथाशक्तिप्राणनिरोधं
कृत्वासीतेति। शक्तिमनतिक्रम्ययथाशक्ति। जपश्चायं॥ तत्रजपस्तत्रपितरोमादयध्वमितिश्रुतत्वात्। तत
श्चसंहितास्वरेणप्रयोगः॥ ॥आवृत्यामीमदंतेतिजपति आवृत्यप्रदक्षिणंप्रत्यावृत्यपिंडसंमुखोभूत्वामीम
दंतेतिमंत्रंजपतिसंहितास्वरेण॥ अवनेज्यपूर्ववन्नीविंविस्रंस्य नमोइत्यंजलिंकरोति। पूर्ववदवनेज्यउदपा
त्रेणावनेजयतीत्यादिप्रकारेणावनेजनंकृत्वानीविंविस्रंस्यनमोवइत्यादिभिःषड्भिर्मंत्रैःषडंजलीन्कुर्यात्।
षट्कृत्वानमस्करोतीतिश्रवणात्। यद्यप्यंजलिमितिसूत्रएकवचनं॥ तथापिसमानीयांश्रुतौमहापितृयज्ञे
षड्वानमस्कारानितिसूत्रकारेणैवोक्तत्वात्तथैवानुष्ठानंयुक्तं॥ अत्रनमोवःपितरोमन्यवेनमोवःपितरःपितरोन
मोवइत्येतावान्षष्ठोमंत्रःपूर्व्येपंचचतुर्थ्यंताःप्रसिद्धाएव॥ गृहाणांपत्नीनांवापिंडानांवावेक्षणंकुर्वतागृहान्नः
पितरइतिजपश्चमहापितृयज्ञवदत्रापिकार्यः। समानश्रवणात्। एतद्वउपास्यतिसूत्राणिप्रतिपिंडं। एतद्वः
पितरइत्यनेनमंत्रेणप्रतिपिंडंबहुवचनात्त्रीणित्रीणिसूत्राण्युपास्यतिपिंडानामुपरिनिदधातीत्यर्थः॥ ऊर्णादिशा

ग्ला २

॥५॥

वा॥ ऊर्णामिषरोमापितन्निमित्तिवस्त्रदशावाबहुकुलविशिष्टा॥ प्रतिपिंडमेतद्वइत्युपास्यति। अथवाऊर्णावादशा
वेतिपक्षद्वयं॥ तथाचमानवे। वासःसऊर्णांदशांवेति॥ आपस्तंबसूत्रेपि। वाससोदशांछित्त्वानिदधत्यूर्णास्तुकां
वापर्यवयस्युत्तरआयुषिस्वलोमचेति। वयस्युत्तरेयजमानल्लोमानिवा। उत्तरेवयसियजमानस्यपंचा
शत्तमवर्षादूर्ध्वंयजमानलोमानिपतितानिंदयस्यानिसूत्रस्थानेप्रतिपिंडंप्रास्यति। उत्तरशब्दोपादानात्पूर्वो
त्तरभागेनशतवर्षरूपस्यवयसोद्वैधाविभागः। तथाचपराशरः॥ पंचाशद्वार्षिकोयस्तुदद्याल्लोमस्वपंशुक
मिति॥ शा... द्याप निः पंचाशदूर्ध्वमुरोलोमयजमानस्येति॥ ऊर्जमित्यपोनिषिंचति। पितृणामधिष्ठानपिं
डाःतेनऊर्जंवहंतीरित्यनेनमंत्रेणोपात्रेणावनेजनावशिष्टमुदकंपिंडानामुपरिनिषिंचति। पिंडसमीपेभूमौवा
उभयथाशाखांतरेश्रवणात्स्वधास्थतर्पयतमेपितृनितिमंत्रलिंगात्। अवधायावजिघ्रतियजमानः। पिंडान
ध्वर्युःस्थाल्यांप्रत्यवधायस्थाल्यांपिंडान्समधायेत्यापस्तंबः॥ ततोयजमानःसव्यंकृत्वापिंडान्स्थालीस्थान
वावजिघ्रति। अवघ्राणंयजमानसंस्कारःसयजमानभागइत्यर्थवादात्॥ ततश्चप्राशितेयजमानेनभवति॥
अल्पवादेशःपूर्वकालतामात्रेणसमानकर्तृकतायां। निरूप्याजप्रातर्दहिनमितिवत्। उल्मुकसकृदाछिन्ना
न्यग्नौ। पूर्वंसकृदाच्छिन्नानियानिस्तीर्णान्यासंस्तान्यभूवन्॥ तान्यग्नौदक्षिणाग्नौप्रक्षिप्यततःउल्मुकंत
त्रैवप्रक्षिपति। अग्नौसकृदाच्छिन्नान्यभ्यादधातिपुनरुल्मुकमपिसृजतीतिश्रुतेःसूत्रेचोल्मुकपदस्यत्रय

८
त्र

८१

॥ ६ ॥
॥ देवया० ४

मोच्चारणमल्पांतरत्वात्॥ तेन प्रथमं सकृदाच्छिन्नप्रासनं। तत उल्मुकस्य॥ आधत्तेति मध्यमपिंडं पत्नी प्राश्नाति
पुत्रकामा॥ पुत्रकामा गर्भग्रहणयोग्या ऋतुस्नाता पत्नी मध्यमं पिंडं पितामहस्य पिंडमाधत्त पितरो गर्भमिति मंत्रेण
प्राश्नाति॥ आपस्तंबः तं पत्नी प्राश्नाति पुमांसं ह जानुका भवतीति विज्ञायते। पत्नीबहुत्वे पिंडविभागो मंत्रावृत्तिश्चेति
धूर्तस्वामी॥ मानवे। मध्यमपिंडं पत्नी प्राश्नीयाद्यद्या वितरावा दध्याद्ब्राह्मणो धिनक्षयेदप्सु वा गमयेदिति। पा
राशरः। पिंडानां मध्यमं पिंडं पितॄन् ध्यायन् समाहिता॥ प्राशयेत् पुत्रकामा तु भार्यां तं श्राद्धदस्य च। स्नुषा वापि
सगोत्रा वा पुत्रकामा द्विजालया। आधत्त पितरो गर्भं व्याहरेयुर्द्विजातयः। महारोगगृहीता वै तद्रोगोपशमाय
च। घ्नंतु मे पितरो रोगमित्युक्त्वा प्राशयेद्व्रतं॥ अन्यानप्सु हुतान्वा क्षिपेद्गवे द्विजाय वा॥ अजाय वा प्रदद्याच्च प
श्चाद्विप्रविसर्जनमिति॥ प्रेतेभ्यो ददाति॥ यत्पितृप्रन्नेति भ्यो दानमुक्तं तन्मृतेभ्यो मृतेभ्यः पितृपितामहप्रपिता
महेभ्यो ददाति॥ अत्र हरिस्वामिनः। के ते पितरो येभ्य उद्दीयते॥ उच्यते॥ यजमानस्य पित्रे ददातीत्यादिवचना
दत एव पितरस्तेभ्यो पि जीवत्स्वप्येवं दाने प्राप्ते प्रेतेभ्यो ददातीति वचनात्सकृद्युत्ये वपरंत्व पितर इत्यादिदर्शनेभ्य
श्च प्रेतेभ्यो देयं। अथ ये एते देवा॥ वसवः पितरो ज्ञेया रुद्रा ग्नेयाः पितामहाः॥ प्रपितामहास्तथादित्या इत्याद्याः॥ त
था पितरो वै त आसन्निति॥ तथा त्रार्द्धेमंतः शिशिरस्ते पितर इति। अग्निष्वात्तादयः तेषां कोपयोगः उच्यते
एषामेव तु आधिदैविकः पितरः तत्तश्चयथा ब्रह्मपोतृप्यति पितरस्तृप्यंति। तथा तेष्वपि पितृष्वतृप्त्वाधिदैविका

॥ ६ ॥

वस्वादयस्तृप्यंति। महापितृयज्ञे तु त एव सोमवदादय इज्यंते। पिंडाश्च प्रेतेभ्य एव दीयंते॥ जीवपितृकोपि॥
॥ जीवपितृको पिंडपितृयज्ञेनाधिक्रियते॥ जीवांतर्हितेपि। यतो जीवपितृकस्य जीवेन पित्रादिना अंतरे पिव्यवहिते
पि पितामहादये पिंडदानं भवति। सोमादा विवा। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्तथा सुत इति स्मृतेः॥ जीवपितृक
स्य होमांतमनारंभो वा। जीवपितृकस्य यजमानस्य होमांतमेव पिंडपितृयज्ञसंज्ञकं कर्म भवति। अथवानारंभ
एव पिंडपितृयज्ञस्य। वाशब्दः पूर्वपक्षनिरासार्थः। अत्रानारंभपक्ष एव युक्तः। यतः पिंडदानं प्रधानं॥ तदभावे होम
स्यांगभूतस्यानुष्ठानं न घटते॥ एवं जीवपितृकोपीति पक्षं दूषयित्वा जीवपितृकस्य होमांतमित्यत्रोपपत्तिमाह॥ न
व्यवेतेजातूकर्ण्यो न जीवंतमतिददातीति श्रुतेः। जीवपितृकस्य होमांतकर्म कुर्वीत। यतो जातूकर्ण्य आचार्यो न व्यवे
ते जीवता पित्रा व्यवहिते पितामहादौ पिंडदानं न भवतीत्याह॥ कुतो न भवतीत्यत्र हेतुः। न जीवंतमतिददातीति श्रा
त्वांतरेश्रवणात्॥ अतः प्रधाने पिंडदाने जीवपितृकस्य निषिद्धे अनारंभ एव घटते। न होमांतता। आपस्तंबः। यदि
जीवत्पिता न दद्यादाहोमात्कृत्वा विरमेतदिति। मानवे च। यदि दद्याद्येभ्य एव पिता दद्यात्तेभ्यो दद्यादिति। काठके॥
पितापुत्रो बद्धाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात्पिता प्रेतः स्यात्पितामहो जीवेत्पित्रे पिंडं निधाय पिता
महात्पराभ्यां द्वाभ्यां दद्यादिति॥ श्वानोदतेत्यदृष्टे वेति पक्षे चतुर्दश्यामुपवासो विहितः॥ तदा चतुर्दश्यामग्न्यन्वा
धानादि कृत्वा प्रातरमावास्यायां दर्शेष्टिः क्रियते। ततो पराह्णे पिंडपितृयज्ञः प्राप्नोति। अपराह्णे पिंडपितृयज्ञश्च

८

॥ ७१ ॥
॥ दे रया ॰ ४

प्रादर्शनिमावास्यायामिति तत्कालस्य प्रागुक्तत्वात्। अमावास्योपवासपक्षे चामावास्यायां पूर्वाह्णे दर्शयागमग्नी
न्विहरेत्यागम्यन्वाधानं कृत्वा विधेश्च देवं चत्कृत्वा ततोपराह्णे पिंडपितृयज्ञः प्राग्दर्शेष्टेः प्राप्नोति। एवं कदाचित्प्राक्कदाचि
त्पश्चादिति नियमे प्राप्ते नियमार्थमाह। पूर्वो वांगत्वात् पिंडपितृयज्ञः पूर्व एव दर्शेष्टेः पिंडपितृयज्ञः न पश्चात्। कुतः
अंगत्वात्। अंगत्वप्रतिपादकवाक्यात् पूर्वेद्युः पितृभ्यो पिंडनिः क्रियते प्रातर्देवेभ्यः प्रतनुत इति वाक्यात्। एतज्जीव
पितृकस्यैव चतुर्दश्यामुपवासपक्षे न मृतपितृकस्येत्युक्तं भवति। तस्य हि पिंडपितृयज्ञोऽवश्यं कर्त्तव्यः। प्रागेव क
र्त्तव्यः। न चासौ चतुर्दश्यामुपवासपक्षे प्राग्दर्शात्सिंभवति। विहितकालाभावात्। अतो मृतपितृकस्यामावास्या
यामेवोपवासो जीवपितृकस्य चतुर्दश्याममावास्यायां चेति विकल्पः॥ ॥ प्रकरणकाललिंगानुग्रहवचनान्नहि
ताग्निश्राद्धतिन्यो नांगं। पिंडपितृयज्ञ इत्यनुवर्त्तते। पिंडपितृयज्ञो दर्शस्यांगं। दर्शांगं न भवति॥ कुतः। प्रकरणभेदात्।
यस्य प्रकरणे यत्पठ्यते। तत्तदंगं भवति॥ न चायं दर्शप्रकरणे पठ्यते। अतो नांगं। किंचि। कालभेदात्। अंगानां प्र
धानकालतान्याय्येति न्यायो दंगानां प्रधानानामेककालता भवति॥ अत्र च कालभेदो विद्यते॥ दर्शस्य प्रतिपदि
पूर्वाह्णे श्रा। पिंडपितृयज्ञस्यामावास्यापराह्णे श्चेति अतोपि न दर्शांगं। तथा लिंगाच्च। यक्ष्मणागृहीतः पौर्णमासेन
यजेत्तत्मितयज्ञेन चामावास्यामवरुंधे इत्यमावास्यां विनापि केवलपितृयज्ञं दर्शयति। दर्शांगं स्यात्तदा दर्शं
प्रधानं विना केवलस्यांगमात्रस्यानुष्ठानं दर्शनं न स्यात्॥ अस्ति च। अतोस्माल्लिंगादपि न दर्शांगं॥ तथानु

॥ ७१ ॥
॥ भाग ॥

ग्रहवचनाच्च। अस्य पिंडपितृयज्ञस्य गवामयनादौ संवत्सरसत्त्रे दर्शात्पृथगनुग्रहवचनमस्ति॥ कथमेषां पितृयज्ञो
नंतरितो भवतीति। यद्यंगं स्यात्॥ तदा कथमेषाममावास्याहविरंतरितं भवतीति दध्ना च पुरोडाशेन चेत्यमावास्यानु
ग्रहणेव पितृयज्ञस्यापि प्रयाजादिवदनुग्रहसिद्धेः पृथगनुग्रहवचनं न स्यात्॥ अस्ति च पृथगनुग्रहवचनं॥ औ
पासने रितिब्रूयदिति॥ अतोप्यनंगं॥ अपि वाऽनाहिताग्निश्राद्धतुश्च॥ अनाहिताग्नेरपि पिंडपितृयज्ञः श्रूयते॥ ॥
अथानाहिताग्निना कार्य इति॥ यदि दर्शांगं स्यात्तदा अनाहिताग्नेर्दर्शाभावान्न श्रूयते॥ श्रूयते च॥ अतोपि न दर्शांग
मिति॥ एवं प्राप्ते आह॥ अंगं वा समभिव्याहारात् अथवा दर्शांगमेव पिंडपितृयज्ञः॥ कुतः। समभिव्याहारात्। समि
त्यकीभावे। अभीत्याकांक्षायां। ततश्चाकांक्षायोग्यतासंनिधिमतां पदानामुच्चारणं समभिव्याहारो वाक्यं॥ तस्मा
दिसर्थः पूर्वेद्युः पितृभ्यो यज्ञः क्रियते प्रातर्देवेभ्यः प्रतनुत इति॥ तेन यथा प्रथमं शांतिकं कृत्वा ततः कृत्स्नं समारभेदित्या
दौ ग्रहयागादेर्विवाहांगत्वं ॥ एवमत्रापि दर्शांगत्वं पितृयज्ञस्येति॥ यच्च पूर्वपक्षे उक्तं प्रकरणभेदादनंगमिति॥
तत्रोच्यते। प्रकरणांतरपठितमप्यंगं भवति। यथा प्रवर्ग्यः सौत्रामणी चेति यच्चोक्तं कालभेदादिति॥ तत्रोच्यते। भिन्न
काले विहितमपि वचनादंगं भवति॥ यथाग्निहोत्रदर्शपौर्णमासादावुद्धरणादि। यक्ष्मणागृहीत उत्यात्तादिपद
नंगत्वे लिंगमुक्तं॥ तत्तु वाचनिकं॥ दर्शं विना पिंडपितृयज्ञस्य केवलानुष्ठानं नास्ति वचनस्यातिभारः। अतस्त
दपि नानंगत्वसाधकं॥ यच्चोक्तमनुग्रहवचनादिति तदनुवचनमर्थवादप्रापकमंगत्वेप्युपपद्यत एव॥ अतस्त

॥८॥
॥दे०वयो०४॥

दपिनानंगत्वंज्ञापयितुमीष्टेः। यच्चोक्तमनाहिताग्निश्चेत्येति॥ तदपिन्यायविरुद्धं वाचनिकं॥ अनाहिताग्नेर्दर्शंविना
पिंडपितृयज्ञस्यानुष्ठान विधानं। नहिवचनस्यापितन्यायसहस्रेणापि परा कर्तुं शक्यं॥ तस्माद्दर्शांगं पिंडपितृयज्ञ इति। जै
मिनेस्त्वनंगमेव॥ तथा चाह पिंडपितृयज्ञस्स्वकालत्वादनंगस्यादिति पिंडपितृयज्ञेनुक्तः॥ इदानीं दर्शेष्टिमाह॥ श्वोनो
देतेत्यदृष्टे वा पर्णशाखां छिनत्ति शमीलं वेषे त्वोर्जेत्वेति वा॥ श्वः आगामिनि दिवसे न उदेत नोदेष्यति चंद्रमा इति शो नि
त्वो चतुर्दश्यां पर्णशाखां पर्णस्य पलाशस्य शाखां इषे त्वेति मंत्रेण ऊर्जे त्वेति अनेन वा मंत्रेण वृक्षात् छिनत्ति। अथवा
शामिलीं शमीमयीं शाखां छिनत्ति चतुर्दश्यां कुतः॥ तद्दिके दृष्टोपवसंतीति वचनात्॥ अदृष्टे वा। अथवा अदृष्टेचं द्र
मसि यथोक्तां शाखां छिनत्ति॥ अमावास्यायामित्यर्थः तत्कुतः॥ अमावास्यायामवास्येन यजेतेति वचनात्॥ तथा
असोमयाजी तु क्षीरयाजी स्यादिना चतुर्दश्यामुपवासपक्षे दोषमुक्त्वाह। सयत्रैषएतां रात्रिं न पुरस्तान्न पश्चाद्ददृशे इत्यादि
नामावास्यायामुपक्रमविधानाच्च। शम्या अवयवः शामीली॥ शम्याष्टू नौ दिद्रुणायति ङीपू॥ तामाच्छिनत्ति॥ षेत्वोर्जे टि सात्॥
त्वेत्युभयोः छेदनविधानाकरणमंत्रत्वेन समुच्चयासंभवाद्विकल्पः॥ ॥छिनद्मीति वोभयोः साकांक्षत्वात्॥ इषे त्वे त्यूर्जे त्वेत्य
नयोरुभयोरपि मंत्रयोः प्रयोगे छिनद्मीति विशेषो भवति॥ कस्मात्साकांक्षत्वात्। क्रियापदसापेक्षत्वात्॥ ननूभयोरपि
छिनद्मीत्यध्याहारः कुतः॥ तामाच्छिनत्ति षेत्वोर्जे त्वेति द्वयोरपि छेदने विनियुक्तत्वात्॥ ऊर्जेत्वेति मंत्रे वैकल्पिकमध्या
हारांतरमाह॥ ॥सन्नमयामीति नोत्तरे॥ ॥अथवोर्जेत्यस्मिन्नुत्तरे सन्नमयामीत्यध्याहारो भवति॥ नच्छिनद्मीति॥

॥८॥
॥१२॥बौ

मा

कुतः ऊर्जेत्वेत्यनुमार्ष्टी ति शाखांतरात्॥ अनुमार्जनं तत्पर्णादिया न नेन प्रगुणीकरणं॥ तच्च मंत्रलिंगादेव प्राप्त
त्वात् भाष्यकारेण सूत्रितं॥ अतश्च माध्यंदिनीयपाठ आपस्तंबयोर्मंत्रयो विकल्पेन छेदने विनियोगः॥ काण्वशाखापाठ
आपस्तंबात्तु उत्तरस्त्वनुमार्जन एव विनियुज्यते। तथा चापस्तंबः॥ ऊर्जे त्वेति सन्नमयत्यनुमार्ष्टि वेति॥ सन्नमनं मृजूकरणं।
मूलादारभ्याग्रात्स्पर्शनमनुमार्जनमिति धूर्तस्वामी॥ काठके। परिसमूढाग्नेर्व्रतोपेतस्याध्वर्युः शाखां छिनत्ति॥
शामीं शाखां पलाशशाखां वा दर्भपिंजूलानि वेषे त्वेति तया च तिसृणां वत्सानपाकरोति देवो व इति धेन्वः प्राचीः प्रकाल
यतीति। मानवे च॥ व्रतोपेतस्य शाखामच्छेत्तीति॥ बहुलपलाशां शुष्काग्रां प्रागुदीचीमन्यतमां वा। कीदृशीं शाखां म
छिनत्ति॥ बहुपलाशां बहुपर्णां। पुनः कथंभूतां अशुष्काग्रां। अशुष्कमार्द्रमग्रं यस्याः सा तथा। पुनः कीदृशी। प्रा
गुदीचीं। वृक्षादेशान्यां दिशि प्रसृतां। अन्यतमां वा॥ प्राचीवृक्षात् प्राच्यां दिशि प्रसृतां। उदीचीवृक्षादुदीच्यां दिशि
प्रसृतां वा। प्राचीमाहरति॥ उदीचीमाहरति प्रागुदीचीमाहरतीति शाखांतरात्॥ व्रतमुपैति॥ शाखाच्छेदनानंतर
मंतरेणापराग्नी गत्वा परेणाहवनीयं प्राङ् तिष्ठन्नग्निमीक्षमाणोप उपस्थाय व्रतमुपैति अग्ने व्रतपत इदमहममिति वेद
नेन प्रकारेण व्रतमुपैति॥ ननु किमर्थमिदमुच्यते पौर्णमासवदन्यदस्य इत्यनेन प्राप्तत्वादिति चेत्॥ सत्यं॥ अ
मावास्यस्य शाखाच्छेदनस्य कालविधानाय इदमुक्तमित्यदोषः॥ ततश्च व्रतोपायनीयाच्छाखानंतरं शाखां छित्वा
प्रगुणीकृत्य व्रतोपायनं कर्तव्यं॥ शाखां छित्वा व्रतमुपैतीति शाखांतरात्॥ अमावास्यायां व्रतग्रहणस्याप्यमेव

॥१॥
॥दर्शयो० ५॥

कालनियमइतिकस्यचिद्भ्रमं कास्यात्तामपाकर्तुमाह॥यथोक्तं वा शाखाच्छेदस्तस्मिन्नेवावसरे नियमेन भवति॥अतएवाह
यंतु यथोक्तं यस्मिन्काले वैकल्पिकं प्रायुक्तं तथैव तत्र तत्र कालेवा भवति वा इह॥केचिदग्न्याधानानंतरं पूर्वाह्ण एव
शाखाच्छेदः कर्तव्य इत्याहुस्तेषां मते व्रतमुपेतीत्यनेन व्रतोपायनस्यापि कालांतरविधिः क्रियत इति॥मातृभिर्वत्सान्

स्व

संसृज्य वत्सं शाखया उप [illegible] इति वा यवस्थेति॥ततः शाखाच्छेदव्रतोपायनानंतरं षड्वा त्सान्स्वमातृभिः सहसं
योज्य वायवस्थेति मंत्रेण मात्रा संगतं वत्सं शाखयोपस्पृशति॥उपस्पर्शनेन मातुः पृथक्करोतीत्यर्थः॥तथा षडेव ना

२

ध्यत्वित्सानपाकरोति॥दर्भैर्दर्भपिंजूलैर्वेति आपस्तंबः॥वत्सं शाखयेत्यत्र वत्सस्योद्दिश्यमानत्वाच्च लिंगवचन
योरविवक्षा॥तेन प्रति वत्समुपस्पर्शनं शाखया कर्तव्यात्लिंगस्याविवक्षितत्वाच्च स्त्री वत्सा अपि गावः सान्नाय्या
प्रदेश्याः॥अग्निहोत्रे पुंवत्सामिति नियमतदर्शनादन्यत्रापुंवत्सापि भवतीति प्रतीयते॥यदि वत्सशब्देन वत्सतर्ण्यप्यभि
धीयते॥तदैवैतदुपपद्यते॥वत्सामित्यत्र ग्राम्यपशुसंघेषु तरुणेषु स्त्री इति सूत्रे अतरुणेष्वित्युक्तत्वात्तरुणेषु पुंशब्द

घ

प्रोषः॥ततश्च स्त्री वत्सा अपि गावः सान्नाय्ये भवंति॥उपायवस्थेति त्वेके॥॥एके आचार्या वायवस्थेत्यस्मिन्मंत्रे उपाय
वस्थेतिच विशेषकुर्वंति॥एतच्छा [illegible] खयोपस्पर्शनसंयोजितानां वत्सानां मातृभ्यः पृथक्करणार्थं॥देवो व इति मातॄणामे
मेकां व्याकृत्य॥ततो वत्समातॄणां गवां मध्ये एकां गां वत्सेन वियोज्य देवो व इत्यनेन मंत्रेण तां गां शाखयोपस्पृशति॥अ
नेकयजमानके [illegible] चधकवा अनयो गोपत्योः स्यातेति ध्रुवा अस्मिन्गोपतौ स्यातेति यथार्थमूहः॥अत्र एकस्या गोरुप
स्पर्शनेन सर्वासां गवां संस्कारो भवति॥मंत्रे आप्यायध्वमघ्न्या इति बहुवचनदर्शनात्॥अतो वहिनिदर्ध्यैर्मन्त्र

॥१॥

मंत्रस्योहो भवति॥आप्यायस्वाघ्न्येति॥अपरे तु उपस्पर्शनस्य संनिपत्योपकारत्वादेकस्या एव गोरयं संस्कार इत्याहुः॥
तेषां मंत्रगतं बहुवचनं पूजार्थं॥॥ऐंद्रं भवति माहेंद्रं वा॥तत्सान्नाय्यं हविरिंद्रदेवत्यं भवति महेंद्रदेवत्यं वा॥गोरुपस्पर्शनि
मंत्रे इंद्रस्यैव दर्शनात्तस्यैव [illegible] देवत्वं माभूदिति महेंद्र वेत्युक्तं॥तदुक्तं महेंद्रायेति कुर्वंतीति श्रुतेः॥आप
स्तंबः॥नागतश्रीर्महेंद्रं यजेत त्रयो ह वै गतश्रिय इत्युक्तं मौ वै गौतम भरद्वाजस्ततोनंतरं सोमेज्यायां महेंद्रं यजेतन्यो वाक
श्चिदिति॥मानवे च॥सोमयाजिनां गतश्रीर्यो वै गौतमो भारद्वाजस्ते महेंद्रं यजेरन्नन्ये त्वितरे संवत्सरमिंद्रमिष्ट्वाग्नये
व्रतपतये ष्टाकपालं निरूप्य ते महेंद्रं यजेरन्निति॥यजमानस्य पशून्नित्यग्न्यगारस्यान्यतरस्य पुरस्ताच्छाखामुपगु

ग्र

हति॥द्वेह्यग्न्यगारे आहवनीयागारं गार्हपत्यागारं च॥तयोरग्न्यगारयोरग्निगृहयोर्मध्ये अन्यतरस्याग्न्यगारस्य
आहवनीयागारस्य पुरस्तात्प्रदेशे पूर्वभागे वा गार्हपत्यागारस्य वा पुरस्तात्पूर्वभागे वा शाखामुपगूहति यजमान
स्य पशून्पाहीति मंत्रेण॥अस्य चानेकयजमानके यजमानानां पशून्निति यजमानयोः पशूनित्यूहः॥पशून्पाहीत्येव बहुनी
रधनिराजसूये॥मूलादुपवेषं करोति वेषोसीति॥मूलात्शाखामूलादेषोस्युपवेष इति मंत्रेणोपवेषं करोति॥त
च्च मूलं प्रथमं तु मूलेशाखामूलमरत्निप्रमाणादधिकं प्रमाणं छित्वा पृथक्कार्यं॥ततस्तस्मात्पृथक्कृतान्मूलान्मंत्र
णोपवेषकरणं॥मूलतः शाखां परिवास्योपवेषं करोतीति शाखांतरात्॥उपवेषश्चारत्निमात्रं प्रादेशमात्रो वा परि
शिष्टात्तः॥तस्य च कपालोपधानार्थत्वात्केवलपयो हविष्के केवलपयस्या हविष्के चोपधानाभावादुपवेषकरणाभा
नावेपि तूष्णीं शाखामूलस्य परिवासनं भवत्येव॥शाखापरिवास्येति द्वितीयया परिवासनस्य शाखासंस्कारत्वा

॥१०॥
॥ दे.ब्रा. ४

वगमात्स यस्यायापयसश्च प्राकृतपयोविकारत्वेनपरिवासितत्वाच्छाखयोपाकरणंकार्यं। प्राकृतोहिपरिवासितया
पय सोपाकरणमिति॥ ॥सान्नाय्येशाखासंयोगात्॥ इदंशाखयोपवेष करणंसान्नाय्येससान्नाय्यकृदर्शेष्टाविवभ
वति॥ नान्यत्रासान्नाय्यकृदर्शेष्टौपौर्णमास्येच॥ कस्मात्शाखासंयोगात्॥ शाखापरिवास्योपवेषंकरोतीति
वचनादुपवेषस्यशाखासंबंधावगमात्॥ शाखायाश्चवत्सापाकरणार्थत्वात्सान्नाय्यकृत्ववत्सापाकरणाभावेशा
खायाअभावात्तत्संबद्धस्यतस्यउत्पाद्यमानस्योपवेषस्याभावएवयुक्तः॥ उपधानाद्वोभयोः॥ ॥वाशब्दःपूर्व
पक्षनिरासार्थः। उपधानात्उपवेषस्यकपालोधानार्थत्वात्तस्यचससान्नाय्यकेअसान्नाय्यकेचकर्मणिभावा
दुभयत्रोपवेषोभवत्येव॥ ततश्चशाखायाअभावेवारणोभवतियतस्तंविनातेनप्राचोंगारानुहतीत्यादिनासिध्य
ति ॥वसोःपवित्रमितिपवित्रमस्यांबध्नातिकुशौ॥ वसोःपवित्रमसीत्येतावतामंत्रेणअस्यांशाखायांकुशावेव
द्वेसाग्रेदर्भतृणएवपवित्रंबध्नाति॥ त्रिवृद्वा॥ अथवात्रिवृत्पवित्रंबध्नातित्रिवृदितित्रिशलाकं॥ त्रीणिदर्भतृणानी
त्यर्थः॥ हस्तप्रादेशमात्रंतुत्रिवृत्कृत्वापवित्रंमिसत्रत्रिवृत्त्रिशलाकमितिहेमाद्रिणाप्येवंव्याख्यातत्वात्॥ मानवेवि
शेषः॥ दर्भमियंपवित्रंत्रिगुणारज्जुःशाखायामनुलोममवसज्जेग्रंथिमकुर्वन्निति॥ आपस्तंबः॥ त्रिवृद्दर्भमयंपवि
त्रंकृत्वापश्चनापवित्रमसीतिशाखायांशिथिलमवसजतिमूलेमूलान्यग्रेग्राणिनग्रंथिंकरोतीति॥ नवभिस्त्रि
गुणेःत्रिगुणंनिमितिमितिकेचित्॥ वेण्याकारमितिकेचित्पवित्रबंधनानंतरंशाखोपगूहनंकुर्वंतितथासत्युपगू

॥१०॥
॥ भा.पत्रं

दर्भ ४

हनस्य शाखायांअनाशार्यत्वेनदृष्टार्थत्वेनदृष्टार्थता भवतिपाठक्रमेणात्वदृष्टार्थता॥ नत्वासोदृष्टेसंभवति
युक्ता॥ तेनात्रोपगूहनमिति। अपरेतुवत्सापाकरणानंतरंपाठक्रमेणैवकुर्वंति॥ यवाग्वाग्निहोत्रहोमःसन्न
यतस्तांरात्रिं। सन्नयतःसान्नाय्यंदुग्धदधिरूपहविकुर्वतोयजमानस्यतांरात्रिंतस्याममावास्यासंबंधिन्यां
रात्रौयवाग्वायवागूसंज्ञेनद्रव्येणाग्निहोत्रहोमसायंप्रातर्भवति। तंडुलैःशिथिलपक्वयवागूरित्युच्यते॥
पयोपवागूरितिधूर्तस्वामी॥ संन्नयत इतिविशेषणोपादानादसंन्नयतोनयवाग्वाहोमनियमः॥ नापिचरुः
सान्नाय्याल्लोभइतिसान्नाय्यस्थानेचरुकरणे। आपस्तंबः॥ अमावास्यायांरात्र्यांस्वयंयजमानोग्नि
होत्रंजुहोति॥ अग्निहोत्राच्छेषणमातंचनार्थंनिदधातीति॥ पूर्वेपिद्युष्टेनदध्नाआतंचनानंतरंयवागूशेष
स्यदोहमध्येप्रक्षेपउक्तोस्ति॥ तदर्थमिवशेषणं। मानवेच॥ यवाग्वेतांरात्रींयजमानोग्निहोत्रंजुहोतितस्याः
पिंडंनिदध्यादिति॥ हुतउपसृष्टांप्रब्रूतादित्याह॥ हुतेग्निहोत्रेउपसृष्टामितिदोग्धारंप्रत्याह। हेदोग्धःउपसृष्टां
वत्सेनसंगतांगांमांप्रतिप्रब्रूतादितिप्रैषार्थः॥ प्रोक्तेघोरसीतिस्थाल्यादानं॥ ॥दोग्धुरध्वर्युप्रत्युपसृष्टेतिप्रोक्ते
प्रतिवचनेऽध्वर्युःघोरसीतिमंत्रेणस्थाल्याआदानंकरोति। गोरुपसृष्टावत्सेनसंगतातावयत्स्थाल्यादानादि
कर्त्तव्यंभवतितद्धुचितिप्रैषार्थः॥ आदानंचाधिश्रयणार्थंतेनवायव्येपयस्यधिश्रयणाभावेनतदादानमितिके
केः॥ तदयुक्तं। स्वचैनवपाश्रपणयोरपिश्रपणाभावेपितदादानमंत्रेपूहस्योक्तत्वात्स्वोक्तविरोधात्॥ अधिश्रयणा

॥११॥
॥ दे. श्या. ०४

भावेपिकश्चित्संदेहोस्छापनमवश्यंकर्त्तव्यं। तदर्थमिप्यादानेमंत्रोभवत्येवेत्यपरे॥ स्थालीस्छानापत्यापश्रो
व पाश्रपण्योरादानेममंत्रस्यद्यौरसिपृथिव्यसीत्यूहः॥ उल्मुकादानेचोखादानेचानूहितस्यैव॥॥ मातरि
श्वनइत्यधिश्रयति॥ मातरिश्वनइत्यनेनमंत्रेणस्थालींगार्हपत्येधिश्रयति॥ आहवनीयश्रपिणामाह
वनीयएव॥ अत्रमातयज्ञपत्नीकार्ष्ट्रेमितिद्वियजमानके॥ मातयज्ञपतयोकार्षुरितिबहुयजमानकेस्त्रूहः॥॥
वसोः पवित्रमितिपवित्रमस्यांकरोत्युदग्वा॥ वसोः पवित्रमसिशतधारमितिमंत्रेण स्थाल्यांपवित्रंकरोति।
स्थाल्या उपरिस्थापयतिप्रागग्रमुदगग्रंवा॥ श्रौतंचेतत्प्रागुदगग्रत्व॥ अथपवित्रंनिदधातितद्धप्रागुदं
ध्यान्प्राची हि देवानांदिगथोउदीचीतिश्रुतत्वात्॥ प्राकसायंपवित्रमादधातितिर्यक्प्रातरितिमानवे। ततस्था
स्यापचारश्रौतंप्रायश्चित्तंभवति॥ केचित्सपवित्रंशाखायाःक्रियोज्यस्थाल्यांनिदधाति॥ दोहनानंतरंपुनः
शाखायांबध्नंति॥ अन्यतुशाखाबद्धमेवोषायांनिदधतिवाग्यतोदोहयत्यशूद्रेण॥ अध्वर्युर्वाग्यतःसन्न
शूद्रेणशूद्रव्यतिरिक्तेनब्राह्मणक्षत्रियवैश्यादिनापुरुषेणगांदोहयतीतिसंयतोपदेशात्। धुक्ष्वेतिदोग्धारं
प्रेष्यति। ततएवंप्रेषितोदोग्धागांदुग्धि॥ आपस्तंबः॥ नशूद्रोदुह्यात् दुह्याद्वादारुपात्रेदोग्धीति॥ ॥स्थाल्य
न्वारब्धेदेवस्त्वेत्यासिच्यमानेपंजति। स्थाल्यामन्वारब्धेयजमानेदोहानंतरंदोग्धादोहपात्रेणेवस्थाल्या
मासिच्यमानेपयसिदेवस्त्वेत्यमुंमंत्रमध्वर्युर्जपति॥॥ कामधुक्षइतिप्रश्नः कामधुक्षःकांगांदुग्धवानसी

च

ख

॥११॥

त्येवंदोग्धारंप्रतिप्रश्नः कर्त्तव्यः॥ प्रोक्तेसाविश्वायुरित्याह॥॥ दोग्धाअमूमितिगोनाम्निप्रोक्तेअध्वर्युंप्रतिकथितेऽध्वर्यु
साविश्वायुरित्यमुंमंत्रंब्रूयात्॥ एवमितरेउत्तराभ्यांप्रतिमंत्रं॥ ॥एवमेवअनेनैवप्रकारेणगांधुक्ष्वेत्यादिनाइतरेद्वेगा
वोदोहयति॥ इयांस्तुविशेषःसाविश्वायुरित्यस्यस्थानेगोनामकथनानंतरउत्तराभ्यांसाविश्वायुरित्यस्मान्मंत्रा
दनंतरंपठिताभ्यांमंत्राभ्यांसाविश्वकर्मासाविश्वधायाइत्येताभ्यांप्रतिमंत्रमेकैकामभिदधाति॥ साविश्वकर्मेतिद्वितीयां
साविश्वधायाइतितृतीयां। एवंशब्देनप्रैषादिसर्वमतिदिश्यते॥ तेनदोहनप्रैषःदोहनं॥ स्थाल्यामन्वारब्धायामा
सेकः॥ आसिच्यमानेपंजनं नामप्रश्नःतत्कथनं॥ मंत्राभिधानंचेति॥ विसृष्टवागुत्तराअन्वारब्धे॥ तिसृणां
दोहनानंतरंविसृष्टवागध्वर्युरुत्तरागाःदोहयतिपूर्ववत्॥ तत्रविशेषः स्थाल्यामन्वारब्धेयजमानेदोग्धापय
आसिंचंति॥ तत्रगाःधुक्ष्वेतिप्रैषः दोहनं आसेकजपौ एतावदेववारत्रयंभवति॥ उत्तराइत्यत्रबहुवचनश्र
वणात्संख्यासंदेहेनिर्णयार्थमाह॥ यावत्त्वमधिकारात्॥ यावत्यःस्वाआत्मीयाःयावत्त्वंयावदवधारण
इत्यव्ययीभावोयं॥ यावत्यआत्मीयागावोभवंतित्रिप्रभृतितावतीःसर्वाअपिदोहयति। कुतःअधिकारात्॥ता
वतीयांसर्वासांदोहनेअधिकारोस्तियतः॥ तिस्रोवानित्यत्वात्॥ वाशब्दःपक्षव्यावृत्तौ तिस्रएवदुह्यंतेनाधिकाः।
कस्मान्नित्यत्वात्॥ त्रित्वेबहुवचनस्यनियतत्वात्॥ ननुचतुष्टादावपिबहुवचनंनित्यमेव। तत्राह॥ आदिसा
मर्थ्यात्॥ यद्यपिचतुष्ट्वादावपिबहुवचनंनियतमेव॥ तथाप्यादिसामर्थ्यात्त्रिगमेवग्राह्यं॥ प्रथमातिक्रमेकारणा
भावादितिन्यायात्॥ तिस्रोदुग्धंतावतेवशास्त्रार्थस्यकृतत्वात्॥ किमर्थमधिकानांदोहनं॥ दर्शनाच्च॥ नकेवल

न

न

ख

॥१२॥
॥देवया॰४

मुक्तन्यायेनैवत्रिस्त्रोदुह्यंतेअपितुश्रुतोदर्शनाच्च॥श्रुतौह्येवंदृश्यतेयथाबहुवचनेनत्रित्वसंख्यैवपरिगृह्यंत इति॥
तद्यथाअश्वमेधेशिल्पावैश्वदेव्यः कृष्णग्रीवाआग्नेयाः॥श्वेतावायव्याः श्वेताः सौर्याः इत्यत्रबहुवचनेनैवपशवोवि
हिताः॥कथाकपिंजलादयोपिप्रायेणबहुनात्वविशिष्टाएवविहिताः शतपथेचतेषांसंख्योपबंधनंश्रूयतेसप्तदशैव
पशून्मध्यमेयूपआलभंतेषोडशेतरेषु॥ त्रयोदशत्रयोदशारण्यानाकाशेषालभंतइत्यादि॥संख्योपबंधनंचतदैवो
पपद्यते।यदाबहुवचनेत्रित्वसंख्याविशिष्टाएवगृह्यंतेनाधिकाः॥अतोत्रापितिस्रएवोत्तरेदोहनीयाः॥परिक्षालन
मानयतिसंपृच्यध्वमृतावरीरित्यनेनमंत्रेण॥षष्ठ्या॥गोदुग्धासेकानंतरंदोहनपात्रस्यपरिक्षालनंप्रक्षालनोदकंस्था
लीस्थदुग्धमध्येनिनयतिसंपृच्यध्वमृतावरीरित्यनेनमंत्रेण।तच्चाध्वर्युः दोहनमात्रेऽन्यस्येोक्तत्वात्॥उद्वास्यातनक्ति
प्राग्घुतशेषेणेंद्रस्यत्वेति।तांदुग्धस्थालीमुत्तरतउद्वास्यप्राग्घुतशेषेणपूर्वदिनेकृताग्निहोत्रहोमशेषेणदध्नादु
ग्धमातनक्तिप्राग्निहोत्रहोमावशिष्टंदधिदुग्धमध्येप्रक्षिपतिदधित्वसंपत्यर्थं।इंद्रस्यभागमितिमंत्रेण।अत्रविप्रति
पत्तिः।केचित्प्रातर्होमशेषेणातंचनंकुर्वंति।केचित्साग्निनसायंहोमशेषेणेति।केचिदुभयहोमशेषेणेति।शाखांतरे
चोपसंधस्यपुरस्तादेकाहेद्व्यहेवातंचनस्योपकल्पनमुक्तमस्ति।अग्निहोत्राद्धेषेणादध्नातनक्तीति॥ तदीनेसायंकृतो
वशिष्टयवाग्वाःपिंडमवदध्यातीतिमानवे।आपस्तंबसूत्रेच॥एकस्याद्व्येस्तिस्रणांवेकाहेद्व्यहेत्र्यहेचतुरहेवापुर
स्तादुपवसथादातंचनार्थंदोहयित्वातेनशीतदुग्धेनातनक्तीति।अग्निहोत्रोच्छेषेणान्वधायेतिच।अतएवचतुर्दश्यां
रात्रौदध्नाग्निहोत्रहोमः कार्यइतिप्रतिपत्तेरुक्तत्वाच्छेषस्थालीस्थोग्राह्योनस्रुग्गतः॥केचिदमावास्यायांयत्सायंपत्ना

॥१२॥
॥भा॰जो॰

ग्वाग्निहोत्रंहूयतेतच्छेषेणाय वाग्वातंचनंकुर्वंति॥तदसंगतं॥तस्यातंचनार्थत्वाप्रसिद्धेः॥शाखांतरविरोधाच्च॥अ
स्वांतरेह्यग्निहोत्रोच्छिष्टेनदध्नातनक्तीत्युक्तं॥तथाउच्छेषणाभावेतंदुलैरातंच्यात्तदाभावेप्योषधीभिरिति।काठकेच।त
दैवाग्निहोत्रोच्छिष्टंनविंदेत्तंदुलैरातंच्याद्यदितंदुलंनविंदेदोषधीभिरातंच्यात्पर्णचिकुलकुवलवर्जमिति॥॥सोदकेनापि
धात्यमृन्मयेनविस्रोहव्यामीति॥आतंचनानंतरंसोदकेनजलवतोत्तानेनपात्रेणअमृन्मयेनमृन्मयवर्जितेनदोहस्था
लीमपिदधाति॥ढंकयति।विस्रोहव्यमितिमंत्रेण।मानवेसोदकेनापिदधातिदारुपात्रेणवायदिमृन्मयस्यात्तृणं दारुंवां
तर्दधाति॥एवमेवापस्तंबसूत्रेपि।काठकेच॥॥निधायवत्सापाकरणंपूर्ववत्॥तांदोहस्थालींसुगुप्तेदेशेनिधायपूर्ववद्व
त्सापाकरणंकार्यं।तच्चमातृभिर्वत्सासंशाखयोपस्पृशतिवायवस्थेत्येवमादि।अन्यतरांशाखांशाखोपगूहनांतंकुर्यात्॥
तच्चप्रातर्दोहार्थं॥वक्ष्यतिहिनिरुप्याज्यंप्रातर्दोहेनमन्यस्मिन्निति।तयैवशाखयादर्भैर्वासायंदोहवत्प्रातर्दोहायवत्सा
नपाकरोतीति॥॥प्रातराग्नेयऐंद्राग्नश्चद्वादशकपालोऽसन्नयतः॥प्रातः प्रतिपदिइष्टिविशेषउच्यते।आग्नेयोष्टा
कपालः पुरोडाशोभवति॥असंनयतः सान्नाय्यमकुर्वतोयजमानस्यद्वादशकपालऐंद्राग्नः पुरोडाशोद्वितीयंहवि
र्भवति।असन्नयतइतिविशेषितत्वात्संनयतऐंद्राग्नोनभवति॥निरुप्याज्यंप्रातर्दोहेनमन्यस्मिन्॥आज्यंनिरुप्या
ज्यनिर्वापानंतरमन्यस्मिन्निति सायंदोहपात्रादन्यस्मिन्पात्रेप्रातर्दोहंनकर्तव्यं।अन्यस्मिन्नित्युक्तत्वात्सायंदोहस्ये
नसात्रस्थस्येवातंचनं।निरुप्येतिपूर्वकालतामात्रेक्त्वाप्रत्ययोल्यप्।नसमानकर्तृकतायांनिर्देशातकर्तृकत्वात्॥आ
पस्तंबः॥उपधायकपालानिसायंदोहवत्प्रातर्दोहंदोहयित्वातंचनापिधानेनिधानंचनिवर्ततइति॥परिक्षालनांते

॥२ऽस्यवत्स७

॥१२॥
॥देवयो॰५

कृत्वासायंदोहमातृत्यप्रातर्दोहं श्रपयित्वाभिघार्योद्वास्योभावनक्ति॥ उपसृष्टंप्रकृत्य दित्यादिपरिक्षालनमानयती
त्यंतंसायंदोहवत्कृत्वाततःप्रातर्दोहंदेवस्त्वेतिमंत्रेणश्रपयित्वाततःसायंदोहमातृत्यप्रातर्दोहमेवाभिघार्यतत समुद्वा
स्यपुरोडाशाञ्जनानंतरंयस्तेप्राणइतिमंत्रेणाभौसायंप्रातर्दोहौक्रमेणानक्ति॥ अत्रा प्रातर्दोहं श्रपयित्वाभिघार्ये
तिप्रातर्दोहस्यैवाभिघारणाभिधानात्॥ अंजनेनउभावितिविशेषोपादानाच्चाभिघारणंपयसएवनदध्नइतिप्र
तीयते॥ अंजनंतुप्राणदानमेव।प्रकृतावप्यनक्तियस्तेप्राणइत्युक्तेः॥ अत्रप्राणदा नादयःसंस्काराःप्रथमं
दध्नःकार्यास्ततःपयसः अवदानंतुपयसःपूर्ववचनात्॥ ॥शृतस्याग्रेवद्यतीतिश्रुतेः॥शृतस्यदुग्धस्य
प्रथमंवद्यतिजुह्वामवदानकाले।ततोदध्नः॥कुतएवंव्युत्क्रमेणावदानं॥इतिश्रुतेः॥शृतस्याग्रेरवद्यती
त्येवंविधायांशाखांतरीयायाःश्रुतेः।न्यायविरुद्धव्युत्पादानं।दध्नोहिप्रथममुत्पत्तिरिति॥ दधिपयसो
रुक्वेपाद्विरवदानंप्रत्येकं॥तंत्रेणोपस्तारासिघारौ।सहप्रदानंचदेवतागुणयोरेकत्वात्॥ तदुक्तंनद्रव्य
भेदगुणयोगादितिवात्स्यइति।रुक्वेपाज्यसान्नाय्ययोरेवावद्यतीत्यापस्तंबः॥ समस्यमार्जनं॥ शाखा
पवित्रंप्रपीतासुनिहतपवित्रेचसमस्यभक्षांतेयन्मार्जनंविहितंतत्कर्त्तव्यं॥मार्जनानंतरंच शाखायामेव
कर्त्तव्यं॥प्रस्तरेकरणंतुतस्यनभवतिइत्युक्तंप्राक्॥ इंद्राग्न्योरितिव्यूहनं॥ इंद्राग्न्योरु ज्जीतिमितिमंत्रेण
व्यूहनंभवति॥ ननुवयथादेवतमन्यद्विसुकृत्वान्नवक्तव्यमेतत्।सत्यं इंद्राग्न्योरित्यस्यमंत्रस्यामावास्या

शाखापवित्रे२

॥१२॥
॥साध्य॰॥

यांविनियोगज्ञापनार्थत्वात्।अन्यथापाराद्विना पूर्वंतइतिपरिभाषितत्वात्।इंद्राग्न्योरित्यस्यमंत्रस्यपूर्व
मंत्रशेषतास्यान्न मा भूदित्यतउक्तमिंद्राग्न्योरितिव्यूहनमि ति॥ ॥सहशाखयाप्रस्तरानुप्रहरणं॥ य
दीसूक्तवाकांतेप्रस्तरानुप्रहरणंक्रियतेतदाशाखया सहकर्त्तव्यं।प्रस्तरेणसहवत्सापाकरणार्थशाखा
यात्राहवनीयेप्रक्षेपः कार्यः॥ ॥ परिधिभिः सहोपवेषंजुहोमित्वेति॥यदापरिध्यनुप्रहरणमध्वर्युःकरोति
तदापरिधिभिःसहैवविरोधादग्निच्छाखामूलादुत्पादितमुपवेषंजुहोमित्वेतिमंत्रेणजुहोतिप्रतिपत्तिरियं
चरितार्थत्वात्॥नात्रादोषादौसकृद्गृहीतेनाज्येन होमः।वारणस्योपवेषस्यनहोमः॥ पौर्णमासप्रकरण
उपवेषस्याविधानात्॥ पौर्णमासवदन्यदसद्यः॥ उक्तादन्यत्सर्वंपौर्णमासवद्भवति॥ एतावान्विशेषः॥
असद्यः॥पौर्णमासेतुसद्योवाप्रातरितिपक्षे अग्न्यन्वाधानकर्मपिवर्गंतीयत्सद्यस्त्वमुक्तमस्तितदिह
नभवति॥ सोमयाजीसंनयेत्॥सोमयाजीसंनयेत्सान्नाय्यंदधिदुग्धरूपंहविद्वयममावास्यांकुर्यात्॥सो
मेनाग्निष्टोमादिनायइष्टवान्ससोमयाजीतस्यसान्नाय्यनियमः॥कामादितरः॥ ॥तस्मादप्यसोमयाजी
समेवनयेदितिश्रुतेरितरोऽसोमयाज्यपिकामादिच्छयासंनयेत्॥ अमावास्यायांसान्नाय्येहविः कुर्यात्॥
त्रिंशतंवर्षाणिदर्शपूर्णमासाभ्यांयजेत॥उक्ताभ्यांदर्शपूर्णमासाभ्यांत्रिंशतंवर्षाणियजेत्।ततःऊर्ध्वंनि
यजेत्॥तस्माद् त्रिंशतमेववर्षाणियजेतेतिश्रुतेः॥सान्नाय्यप्रस्तुतत्वात्सांनाय्ययोरेवदर्शपूर्णमास

स्य

॥१४॥
॥देवया॰४

योऽयंनियमः स्यात्समाभूदितितयोः अस्तावेपिपुनर्दर्शपूर्णमासग्रहणं॥ पंचदशाद्दाक्षाय णयज्ञी॥ दाक्षा
यणायज्ञीदाक्षायणायज्ञसंज्ञकदर्शपूर्णमासयाजी पंचदशवर्षाणिवेवयजेत्॥ नत्रिंशतंवर्षाणि॥ पक्षदा
क्षायणायज्ञीस्याद्यथोअपिपंचदशैववर्षाणियजेतेतिश्रवणात्॥ दर्शपूर्णमासावेवगुणाभूतोदाक्षायण
यज्ञेन ततः कर्मांतरमित्यग्रेपि वक्षति॥ गुणविधानंवासंनिधिसंपद्वचनाभ्यामितत्र॥ ॥अग्निहोत्र
मेववाजुहुयात्॥ प्राकृतदर्शपूर्णमासपक्षेत्रिंशद्वर्षानंतरंदाक्षायणागुणाकदर्शपूर्णमासपक्षेपंचदशवर्षा
नंतरंकेवलमग्निहोत्रमेवजुहुयाद्दानान्यत्किंचित्कुर्यात्॥ केचिद्देवशब्दमिवार्थेव्याचक्षते॥ अग्निहोत्र
मिववाजुहुयात्॥ यथाग्निहोत्रंयावज्जीवंजुहुयात्॥ तथादर्शपूर्णमासावपीत्येवं उभयत्रयावज्जीवम
नुष्ठानश्रवणात्॥ यावज्जीवंदर्शपूर्णमासाभ्यांयजेत॥ यावज्जीवमग्निहोत्रंजुहुयादिति॥ अतस्त्वेनय
थाश्रवणात्विकल्पः यावज्जीवंदर्शपूर्णमासयागः कार्यः॥ त्रिंशद्वर्षाणिवा॥ दाक्षायणपक्षेपंचदश
वर्षाणिवेति॥ अत्राहापस्तंबः॥ स्वर्गकामोदर्शपूर्णमासावेककामः सर्वकामोवायुगपत्कामयेताहारएव
केवा॥ यावज्जीवयजेतत्रिंशतंवर्षाणिजीर्णोवाविरमेदिति॥ अत्रयावज्जीवादिविकल्पः॥ दर्शपूर्णमासो
परमेतद्विकाराणामप्युपरतिः तत्प्रकृतित्वात्॥ दर्विहोमाग्रयणंक्रियते। सोमानामपिनिवृत्तिः केवल
मग्निहोत्रमित्युपदेशः॥ अग्निहोत्रमेवजुहुयादितिहिकात्यायनमिति धूर्त्तस्वामीआचार्यपासधर्म

॥१४॥
॥[illegible]ष्य॥

२

त्रि

कोदर्शपूर्णमासावुक्तौ। अथतद्विकाराणेष्टिपश्वादीन्वैदिष्य सौर्यंचरुंनिर्वपेदग्नीषोमीयमजमालभतेत्येवमा
द्यानांविकृतीनांचोदनानांयजतित्वनिरूपणपूर्वकंतदुपयुक्तात्सामान्यातिदेशविशेषातिदेशबाधाद्विकृतिक
ल्पंचनिरूप्यदाक्षायणयज्ञंवक्षति। ननुदाक्षायणयज्ञोत्पत्त्यनंतरमतिदेशादिनिरूपणीयं। तस्यापिगुणमात्रविकृति
दर्शपूर्णमासत्वेनप्रकृतित्वात्॥ सत्यं। दाक्षायणयज्ञेपयस्याविधत्ते। अमावास्यायांपयस्यामैत्रावरुणीति॥ तस्या
श्चसान्नाय्यपयोविकारत्वादतिदेशादिनिरूपणाधीनातत्रपयोधमप्राप्तिः। ततत्राग्दाक्षायणयज्ञादतिदेशादि
निरूपणंयुक्तं॥ इदानींमिदंविचार्यते॥ सौर्यंचरुंनिर्वपेद्ब्रह्मवर्चसकामः। अथबार्हस्पत्यंचरुंनेवारंपूसप्त
दशशरावंनिर्वपेत्॥ अथसारस्वतंचरुंनिर्वपति॥ अथैनं वायवेनियुत्वतेयुक्तंतूपरमालभते॥ सएतेमा
श्विनंधूम्रमालभेतत्र अग्नीषोमीयमजमालभेतेत्येवमाद्यासुविकृतीषुचोदनासुकिंव्रीहीनवहंति अवेक्ष
तीतिवद्यावदुक्तनिर्वपालंभरूपसंस्कारमात्रविधिः। उतयागविधिरिति॥ तत्रधर्मशब्दमूलत्वाद्द्रव्यदे
मनपेक्षस्यादितिन्यायेननिर्वपालंभमात्रप्राप्नोतीत्यतआह॥ २॥ कर्मशब्दाद्द्रव्यदेवतायुक्तोयजतिः॥
द्रव्यदेवतायुक्तेकर्मशब्दः क्रियाशब्दः आख्यातप्रत्ययातोनिर्वपत्यादिशब्दोयजतिः प्रत्येतव्यः यागोज्ञेय
इत्यर्थः॥ ततश्चसौर्यंचरुमग्नीषोमीयमजमित्यादौद्रव्यदेवतासंयुक्तोनिर्वपेदालभेतेत्यादितिङ्प्रत्ययातः
शब्दोयागविधायकोननिर्वापालंभरूपसंस्कारमात्रविधायकइतिस्थितं॥ ॥यद्यपियजतिशब्दोयजतिधा

श्रीः
स्य

॥१७५॥
दीपयो० ४

धातु

तु मेवाभिधत्तेद्वकृत्तिपौनिर्देशइतिस्मरणात्॥ तथाप्यत्रतदर्थयागपरोज्ञेयः॥धातोर्द्रव्यदेवतासंयो
गाभावा तूतदर्थस्यपागस्यतुद्रव्यदेवतासंयोगः सूत्रकारेणैवाभिहितोयज्ञंव्या ख्यास्यामोद्र
व्यंदेवतात्यागइति॥ देवतोद्देशेनद्रव्यस्यपस्त्यागः सयागइति। नकेवलंसूत्रकारेणैवद्रव्यदेवतायु
क्स्यानिर्वपेदालभेतइत्सोदिकस्यकर्मशब्दस्ययागविधायकत्वमुच्यतेकिंतुश्रुतिरपिनिर्वपत्यादेःशब्दे
श्रुतेयागंदर्शयति॥ अथमैत्राबार्हस्पत्यंचरुंनिर्वपतीत्युपक्रम्यतयोरुभयोरेवोद्दिशन्नाह मित्राबृहस्पति
भ्यामनुब्रूहीत्याश्राव्याह मित्राबृहस्पतीयजेतिवषट्कृतेजुहोतीति सहोवाचनविधिपरेवाक्येयागं
दर्शयति॥ तथावाजपेयपशुषु॥ अथसप्तदशप्राजापत्यान्पशूनालभतइत्युपक्रम्यप्रजापतयइत्युपांशू
क्त्वा छागानांहविषोनुब्रूहीतिप्रजापतयइत्येवोपांशूक्त्वाछागानांहविःप्रस्थितंप्रेष्येतिवषट्कृते
जुहोतीति। अथअग्नीषोमीयेअथाहाग्नीषोमाभ्यांछागस्यहविषोनुब्रूहीत्याश्राव्याहाग्नीषोमाभ्यांछा
गस्यहविःप्रेष्यतिवषट्कृतेजुहोतीति॥ अशेषविशेषविधिपरेवाक्येयागंदर्शयति। ननुयत्रनिर्वपादेर्विहित यत्र
यागोदृश्यतेतत्रतत्रतथाभवतु। अन्यत्रनभविष्यतीतिशंकानकार्यासमानन्यायेन० दनपूर्णस्थाल्याए
कसिक्तश्चतेसर्वेषांश्रुतज्ञानवदन्यत्रापितथाकल्पनात्॥ तस्मादेवमादेर्यागविधिरिति। एवंयागत्वेसिद्धेपि ॥७५॥
इदंसंदिह्यते॥ सोयंचरुंनिर्वपेदग्नीषोमीयमजमालभेतेत्यादेःकिंयागमात्रंभवतिउतधर्मात्रपिभवंतीति॥ ॥

२

यद्वाचधर्माभवंतीति पक्षस्तदापिसंदेहःकिंपूर्णाहुतिसंबंधिनोधर्माभवंतिउताग्निहोत्रसंबंधिनःआहोस्वि
दर्शपूर्णमासयोः॥ अथवाज्योतिष्टोमस्येति। अथवादर्शपूर्णमासयोरेवेतिकिंप्राप्नोति॥ धर्माणामनाम्नाना
द्यथाश्रुतेयागमात्रंकर्त्तव्यमितिएवंप्राप्तेआह॥ ॥दर्शपूर्णमासधर्माइष्टिपशुषुसामर्थ्यात्॥ सोयदिधर्मा
भवतिनयागमात्रंकस्मात्सामर्थ्यात्॥ एवमेतानिविधिवाक्यानिसमर्थान्यर्थवंति॥ सप्रयोजनानिभवंति॥
अ न्यथासाकांक्षत्वादर्थप्रतिपादनाभावेननिरर्थकान्येवस्युः॥ तथाहिसोर्यपायागेनब्रह्मवर्चसंभावयेदि
त्यत्रंाराात्रयवतीभावना विधीयतेकिंकेनकथमितितत्रकिंमंशोब्रह्मवर्चसंकेनांशःसोयेणेति॥ कथमंशस्तु
वाक्यमध्येनास्तितेनकथंभावयेदितिवाक्यंकथमंशासापेक्षं॥ यच्चसापेक्षंभवतितदध्याहारेणानुषंगेणवा
पूरयित्वानिराकांक्षंकर्त्तव्यंअन्यथातस्यानर्थक्यापत्तेः॥ नचवेदमात्रामात्रस्यापित दिष्यते॥ तस्मादत्रनि
राकांक्षीकरणाय विध्यंतेतिकर्त्तव्यतापरपर्यायः कथमंशोत्र कस्यविदनुषजनीयइतिसिद्धेआह॥ दर्शपूर्ण
मासधर्माइष्टिपशुष्विति॥ सर्वासुइष्टिषुअग्नीषोमीयपश्चोश्चदर्शपूर्णमासयोरेवधर्माभवंति॥ नपूर्णाहुत्यादेः
कस्मात्सामर्थ्यादिति। पूर्वोक्तएवहेतुरत्रापियोज्यः दर्शपूर्णमासधर्माएवसोयादिविधीनांशेषीभवितुंसम
र्थाः चरुपुरोडाशादयोल्विकधर्मादिभिरेवसिध्यंतिनाभिघवादिभिरिति। किंचाव्यक्तचोदनाचोदितत्वात्क्वचि
तनचदेवतानिर्देशः०षधद्रव्यकत्वमित्यादीनिदर्शपूर्णमासाग्नेयादिचोदनयादृष्टसंबंधानिसौर्यवाक्ये

॥१९६॥
॥देवयो॰ ४

विध्यंतापेक्षदर्शयमानानितांचोदनामुपस्थापयंति॥ साचस्वार्थमुपस्थापयंतित्यंशात्रयवती भावनाचत
स्याः स्वार्थः। ततः किमंशाकांक्षायोरिहसत्वात्तावंनादित्यकथमंशो विध्यंतधर्मपरपर्ययोगइष्यते॥ एवंसौर्या
दिविधीनांआग्नेयादिविधिसारूप्याद्दर्शपूर्णमासधर्मा एवसौर्यादिषु भवंतिनाग्निहोत्रादीनांसारूप्याभावा
दिति॥ इष्टिपशुष्वपियत्रेष्टिषुसर्वासुपशुगोचाग्नीषोमीयेएकस्मिन्निति व्याख्येयं। पश्वंतरेषु त्वग्नीषोमीयाधर्मा
भवंतीतिसूत्रकारोवक्षतिअग्नीषोमीयापशुष्विति। दर्शनाच्च॥ नकेवलंसामर्थ्याद्दर्शपूर्णमासधर्माइष्टि
पशुषु भवंति। अपितुश्रुतो विकृतिषु दर्शपूर्णमासधर्मप्रवृत्तेर्दर्शनाच्च॥ तथाहि॥ अथसावित्रीमिष्टिं निर्व
पतीत्युक्तोपक्रम्यपठ्यते॥ तस्यैप्रयाजेषुजायमानेषु ब्राह्मणोवीणागाथीदक्षिणत उत्तरमंद्रामुदाघ्नंस्ति
स्त्रः स्वयंसंभृतागाथांगायतीति॥ अस्यामिष्टौप्रयाजेषुहूयमानेषुब्राह्मणस्यगाथागानंविधीयतेनप्र
याजाः। तेचप्रकृतितः प्राप्ताएवविद्यंते। अतोविकृतिरूपायांसावित्र्यांइष्टौप्रयाजानांदर्शनादप्येवंज्ञायते
यद्दर्शपूर्णमासधर्माइष्टिषु भवंति। तथापशौ॥ सउत्तरमाघारमाघायस्रुचंस्पर्शयित्वाचोपयेत्यजुह्वापशु
समनक्तीतिपशुसमंजनविधिपरेवाक्येउत्तराघारंदर्शयिति॥ अतः पशावुत्तराघारदर्शनादेवंज्ञा
यते॥ यद्दर्शपूर्णमासधर्माः पशौभवंतीति॥ तदेवंप्रकृतिवद्विकृतिः कर्तव्यत्येवंरूपेणानुमानिकवचनेन ॥१९६॥
सर्वेष्टिषुदर्शपूर्णमासधर्माभवंतीत्युक्तं। अधुनातदपवादत्वेनप्रत्यक्षशब्देनधर्मप्राप्तिमाह॥ वैश्वदेव ॥प्राप्य॥

४

धर्माश्चातुर्मास्येषु वचनप्रवृत्तिभ्यां॥ चातुर्मास्येषुचत्वारिपर्वाणिसंति॥ वैश्वदेवं। वरुणप्रघासाः॥ साक
मेधाः शुनासीरीयंचेति। तत्रप्रथमेवैश्वदेवेपर्वणिदर्शपूर्णमासधर्मा भवंति॥ ततोतिरिक्ताअपि पदेशिका
अपिधर्माभवंति॥ प्राचीनप्रवणेत्रेधाबर्हिः। कुशाप्रस्वः प्रस्तरोहत्तवासाः पत्नीचेत्येवमादयः॥ तत्रव
रुणप्रघासादिषु त्रिषुपर्वसुवैश्वदेवस्यधर्माभवंति। कस्मात्। वचनात् प्रवृत्तेश्चेतिद्वाभ्यांहेतुभ्यां॥
वचनादित्ययमुपदेशोहेतुश्च। तेनयत्रयत्राथैतान्यवपंचहवींषीभवंतीतिवचनं॥ वरुणप्रघासेष्वध्वर्यु
कर्तृकतंत्रेमहाहविषिशुनासीरीयेच॥ तत्रैववैश्वदेवधर्माः प्राचीनप्रवणतादयोभवंतिनान्यत्र
मारुत्यनीकवतीसांतपनीयागृहमेधीयाक्रीडनीयापित्र्यासु। अतश्चमारुत्यादिषुप्राकृतमेवबर्हिरेक
धासंनद्धं नत्रेधा। प्रस्तरोपिप्राकृतएव। नकुशाः प्रस्वः। प्रत्यक्षवचनातिदेशोयं॥ अथैतान्येवपंचहवीं
षीति॥ एतान्येवेत्येतच्छब्देनपूर्वोक्तानिसर्वाआग्नेयोष्टाकपालइत्यादीनियानिवैश्वदेवपर्वविहितानिह
वींषीपरामृश्यंते। तानिचवैश्वदेवपर्वणिउपक्षीणानिप्रधानयागस्विष्टकृत्प्राशित्रइडाभागचतुर्धाकरणे।
सर्वाण्यपिविनियुक्तानि॥ अतोनेनवाक्येनेतानीत्येतद्धर्मकाणीतिविधीयंते॥ किंचप्रवृत्तेश्चश्रुतोशुनासीरी
येधर्मप्रवृत्तिदर्शनाच्च॥ तस्याबर्हिरुपकिरंत्युत्तरवेदिंनगृह्णातिपृषदाज्यंनमथत्यग्निमितिमंथनप्रति

॥९७॥
॥देश्या०४

षेधश्चप्राप्तिपूर्वको भवति। उत्तरवेदिपृषदाज्ययोस्तु वैश्वदेवेऽभावान्न योः प्रतिषेधो नित्यानुवादः॥ नन्व
ग्निमंथनमपि शुनासीरीये विहितमस्तितेषां वे चतुर्थे ग्निं मंथंतीति। सत्यं। न मंथंत्यग्निमिति निषेधोपि
विद्यत एव। अतउभयथा श्रवणात् षोडशिग्रहणवच्छुनासीरीये ग्निमंथनस्य विकल्पः सिद्धो भवति।
एवं प्रसक्षवचनातिदेशमुक्त्वा नामातिदेशमाह॥ सोमाच्चावभृथे साम प्रतिषेधात्॥ अवभृथे वरुणप्र
घासस्संबंधिन्येवभृथसंज्ञके कर्मणि सौत्रामण्यादौ च तादृशावभृथे च सोमात्। सौमिकादवभृथात् ध
र्मो भवति॥ कुतः साम प्रतिषेधात्॥ तत्र न साम गीयत इति सामगानस्य प्रतिषेधात्॥ सामगानं च सौमि
कावभृथ एव विहितमस्ति॥ तत्प्रतिषेधस्तदेवोपपद्यते॥ यदि सौमिकादवभृथाद्धोरुणप्रघासिकाव
भृथे धर्मा भवेयुः। चकारो वचनप्रवृत्तिभ्यामित्यस्य हेतोरनुकर्षणार्थः॥ उच्यते भिधीयते नेन शब्देनेति
वचनं नामधेयमुच्यते अवभृथ इत्यस्य रूप। तेनावभृथ इति नामसामान्यैं तत्र सौमिकादवभृथात् धर्मप्र
वृत्तिर्भवति॥ धर्मप्रवृत्तिरपि साम प्रतिषेधात् ज्ञायते। तस्य प्राप्तिपूर्वकत्वात्॥ तेनो रूपं हीति वाचनादि सर्व
तदीयं भवति प्रतिषिद्धवर्जं॥ एवं कुंडपायिनामयने मासमग्निहोत्रं जुहोति दर्शपूर्णमासाभ्यां मासं। वाजपे
येनेष्ट्वा बृहस्पतिसवेन यजेतेत्यादौ तत्र नामधेयाद्धर्मप्राप्तिर्ज्ञेया॥ कण वत्पशौ न मंत्रोपदेशात्॥ ॥
तथा एवास्कन्पशौ रितिवचनेन पशौ कणापासनवत्कपालेनाधोधः कृष्णाजिनं रुधिरापासनमात्रमस्य

॥९७॥
॥बोध्यं॥

निषेधति॥ पशौ कणावद्रुधिरापासनं न भवति॥ कस्मात् मंत्रोपदेशात्॥ यद्यपि तथा एवास्कन्गित्यनेन सर्वस्याः
कर्पापास्यनेतिकर्तव्यतायाः प्राप्तिः स्यात्। तदा रक्षसां भागोसीति पुनर्मंत्रोपदेशो न स्यात्। मंत्रस्यापि प्रा
प्तत्वात्॥ अस्ति च पुनर्मंत्रोपदेशः तथा एवास्कन्पशो रक्षसां भागोसीति तस्माद्रुधिरापासनमात्रमेव भवति॥
विषयलौकिकमयुक्तत्वात्॥ यत्रयत्र कर्मणि विषयः संशयो भवति किमत्र लौकिकं वस्तु ग्राह्यमुत वैदिकमिति॥
तद्यथा उभयाभावो उल्कुषीं हिरण्यं वोपर्युपरि धारयन्निति॥ तथा गर्गत्रिरात्रे आज्यदोहे पुरुषं मस्वरिनिमु
पनिधाय स्तुवंत इति॥ तत्र उल्कुष्यादौ किं लौकिकोग्निर्ग्राह्यः उत वैदिको गार्हपत्यादिरिति विशये। एवं
विधे संदेहे सति लौकिकमेवाग्निं गृह्णीयात्॥ न वैदिकं गार्हपत्यादिकं॥ कुतः अयुक्तत्वात्॥ लौकिकस्याग्नेः
कुत्रापि वाक्येनाविनियुक्तत्वात्॥ इतरस्य गार्हपत्यादेर्वचनेन कार्यांतरे विनियुक्तत्वात्॥ गार्हपत्ये ह
वींषि श्रपयति आहवनीये जुहोति दक्षिणाग्नावन्वाहार्यं पचतीति। नन्वन्येनायुक्तत्वादन्यत्र।
पित्र्येणार्थ इत्यनेनैव सिद्धेरनारंभणीयमिदं विषयलौकिकमिति सूत्रं। स्तोत्रवेलायां तं प्रज्वलयेयुः।
तमनुमंत्रयेत ताग्निरसीति॥ अत आज्यदोहसामाग्नि रत्रानुदाहरणं॥ अन्यदेवोदाहरणं प्रदर्शयिनीयं
सत्यं। तद्विप्रकरणावगतसर्वार्थित्वस्य द्रव्यस्य प्रकरणविहितातिरिक्तकार्यसाधनतो निरूपणा
परं॥ इदं तु गार्हपत्यादीनां सामर्थ्यात्सर्वार्थित्वे प्राप्ते वाक्यबोधितहविःश्रपणादिकार्यातिरिक्त

२।२

येषु तेषां साधनता निराकरणपरमित्यदोषः॥ त्रिषु स्वेगर्गत्रिरात्रेआज्यदोहानि सामानि संति। आज्यदोहा
नामग्निमुपनिधायस्तुवत इत्ति। तत्रछंदोगसूत्रे विशेषः। ब्राह्मणमाज्यदोहानामग्निमुपनिधायस्तुवत इति
होतुर्धिष्ण्येग्निं धारयेयुः प्रथमेह नियमं माध्यंदिन आनयेयुः॥ माध्यंदिने धिष्ण्येष्वग्निविहारकालेयमानये
युस्तं धारयेयुर्यावदाज्यदोहकाल इतितत्रह्यानवि आज्यदोहं॥ तथा प्रातः सवन उत्तरयोः द्विती
तृतीयोरह्नोः प्रातःसवने धिष्ण्येष्वग्निविहरणीयहोतृधिष्ण्ये आनयेयुस्तं धारयेयुर्यावदाज्यदोहका
इतितयोर्हि माध्यंदिने आज्यदोहं॥ इष्टिषु पशौ च दर्शपूर्णमासधर्मा भवंतीत्युक्तं। दर्शपूर्णमासयोश्चाग्नेया
दयः षट्प्रधानयागाः। तत्रायमपि संदेहः किं यत्र कुत्रचिद्विकृतेयागे नियमेनयतः कुतश्चिताग्नेयादर्धर्मा
भवंति। उत्ता स्मिन्नस्मादेवेनियम इति॥ तत्र नियमकारणाभावात् अनियमे प्राप्ते आह॥ ॥विधिविशेषः कर्म
ण्येक द्विशब्दपरिमाण द्रव्य देवता गुण सामान्येभ्यः॥ ॥कर्मणि वैकृते प्रधानकर्मणि एक द्विशब्दपरि
माण द्रव्य देवता गुण सामान्येभ्यः कारणेभ्यो विधिविशेषो भवति॥ अस्मादेव प्रकृतात्प्रधानयागादस्मिन्वै
कृतप्रधानकर्मणि धर्मा भवंतीत्येवंविधो विधिविशेषो भवतीत्यर्थः॥ विधिरितिचकर्तव्यता विधेर्विशेषो
विधिविशेषः॥ सामान्यशब्दः प्रत्येकमभिसंबध्यते॥ एकद्वीति भावप्रधानो निर्देशः॥ अतश्च एकत्वसामा
न्यात्॥ द्वित्वसामान्यात्॥ शब्दपरिमाणसामान्यात्॥ द्रव्यसामान्यदेवतासामान्यात्॥ गुणसामान्याच्चेति हेतु॥ भाष्य

या१

विभागः यथासंभवमेतेभ्यो हेतुभ्यो विशेषधर्माणां प्राप्तिर्भवति॥ तद्यथा। वैकृते एकदेवत्ये सौम्यसारस्वतपौ
ष्णवारुणादौ यागे एकदेवत्यत्वेनावांतरसामान्येनआकृताग्नेययागतः धर्मा भवंति॥ तेन सर्वेष्वेकदेवत्येषु च
तुर्धाकरणाग्नेयधर्मा भवंति॥ यद्यपि व्यक्तानोदयाष्वेषधद्रव्यैकत्वादिसामान्यं अग्नीषोमीयादिष्वप्यस्ति तथा
प्याग्नेये एकदेवत्यत्वमवांतरसामान्यमधिकं। तेनैवं नियमः आग्नेयादेवेतिनाग्नीषोमीयादेरिति॥ सदृशे हि
दृष्टासदृशे प्रतीतिर्भवति। सादृश्याच्च धर्मत्वमनुमीयते॥ तद्यथा एकस्मिन्नश्वानडुन्महिष्यादौ शीघ्रगति
त्वादिरुपायुक्तेप्रथमं ज्ञायते यदा पश्चात्तत्सदृशमेवाश्वादिकं दृष्यते तदा तस्य पूर्वदृष्टाश्वादिसदृशगुणत्वं कल्पते
सादृश्यात्॥ तथात्रापीत्यर्थः॥ यथा प्राकृतिककर्तव्यताकव्रीहितंडुलौदनपाकशोतश्यामाकगवेधुकतंडुलाद्योदन
पाके अनुपदिष्टेतिकर्तव्यताके पि ओदनपाकसाम्यात् व्रीहितंडुलौदनपाकेतिकर्तव्यता यथा कल्प्यते तद्वदत्रापी
त्यर्थः॥ तथा द्विदेवत्यत्वसामान्यादाग्नेयैवैन्द्राग्नेऽग्नीषोमीयस्य धर्मा भवंति॥ ननु द्विदेवत्यत्वसामान्यमैन्द्राग्नेपि
विद्यते। ततश्चानियमो भविष्यत्यग्नीषोमीयादैन्द्राग्नाद्वेति। मैवं शब्दपरिमाणसामान्यमधिकमग्नीषोमीये
न्द्राग्नात्॥ शब्दपरिमाणसामान्यं च तुल्यसंख्याक्षरत्वं अत अग्नावैष्णवाग्नीषोमीययोरुभयोः पंचाक्षरत्व रूपे
अवांतरसामान्यात् अग्नीषोमीयादेवाग्नावैष्णवे धर्मा भवंति नैन्द्राग्नादिति। अनेनैव शब्दपरिमाणसामान्येन
मारुते ऐन्द्राग्नस्य धर्मा भवंति उभयोरपि त्र्यक्षरत्वात् नाग्नीषोमीयात्॥ तथा। द्रव्यसामान्यादपि तत्सदृशे वैकृते
द्रव्यांतरे धर्मप्राप्तिर्भवति॥ यथा ओषधसामान्यात् पुरोडाशस्य धर्माश्चरुधानामंथादिषु भवंति॥ सान्नाय्ये

प्रधाने धर्मप्रवृ निर्भवंति॥ यथाप्राकृतउपांशुयाजादेवस्ते ४

॥१९॥ ॥देवया॰४

सान्नाय्यपयस्यादिषु॥ द्रवत्वसामान्यात्॥ आज्यधर्मा मधूदकादिषु। छागधर्मा मेषादिषु॥ देवतासामान्या
दपिधर्मा निर्वर्तंति॥ यथाग्नेये आग्नेयस्य॥ ऐंद्राग्नेयेंद्राग्नस्येति। नन्वेतत्पुनरुक्तं। देवतैकत्वादिनासिद्धत्वात्॥
सत्यं। द्रव्यदेवताविरोधे द्रव्यस्य समवायादिति वक्ष्यति॥ तदर्थं देवतासामान्यादित्युच्यते॥ अन्यथा द्रव्य
देवताविरोध इत्येतस्य वक्तुमशक्यत्वात्॥ गुणसामान्यादपि वैकृतैः सावित्रसोमयागेषु उपांशुयागे तेन प्रकृतिध
र्मेयजामहे वषट्कारः संप्रेषाः प्रैषाश्चोपांशुहविःषु देवतानामधेयं चोपांश्वित्यादयो धर्मास्तेषु भवंति॥
यथा वैश्वानरयागादौ पौर्णमास्यां क्रियमाणे पौर्णमास्याग्नेयधर्मा उदिते आरंभादयो भवंति॥ अमावास्यायां
क्रियमाणे त्वामावास्याग्नेयधर्मा अनुदितारंभादयो भवंति। कालो ह्यत्र गुण इति कालस्यापि कर्मार्थत्वेन
परार्थत्वादंगत्वं भवत्येव॥ तदुक्तं जैमिनिना। शेषः परार्थत्वादिति॥ अथवा इदमुदाहरणं। द्वादशकपालत्वगुण
दैवे अनेकदेवतात्वसामान्येनाग्नीषोमीयधर्मा ऐंद्राग्नधर्मा वा नियमेन प्राप्नुवंति॥ तत्र द्वादशकपालत्वरूपगुण
सामान्यादैंद्राग्नस्यैव नाग्नीषोमीयस्येति। शब्दपरिमाणसामान्यत्वं त्वेकस्यापि नास्ति॥ अथ द्रव्यदेवताविरोधे चिंत्यते॥ यथा आतिथ्यायां वैष्णवो नवकपालः पुरोडाशो विहितोस्ति द्रव्यदेवताविरोधे तत्र द्रव्यसा
मान्यात्पुरोडाशिका धर्माः प्राप्नुवंति। देवतासामान्याच्च वैष्णवे उपांशुयागस्य धर्मा इति॥ यथा चाग्नि
होत्रसोमपयसी अग्निहोत्रयोरित्यत्राग्नेये पयसि द्रव्यसामान्यात्सान्नाय्यस्य धर्मा देवतासामान्याद्वा उ

॥१९॥ ॥भाट्ट॥

६

पुरोडाशस्येति॥ यथा राजसूये पंचबिलेंद्र एकादशकपालः पुरोडाशो भवति। द्रव्यसामान्यात्पौरोडाशिका
धर्माः॥ देवतासामान्याच्च सान्नाय्यस्येति॥ एवं द्रव्यदेवताविरोधे नियमकारिका रसमवायात्॥ द्रव्यदेवता
विरोधे द्रव्यस्यैव द्रव्यसामान्यादेव धर्मा निर्वर्तंतीति नियमः॥ ना नियमो द्रव्य सामान्याद्धि देवतासा
मान्याद्धीति विरोधे द्रव्यसामान्यमेव बलीय इति। कस्मात्॥ समवायात्॥ द्रव्यस्य यागे समवायात्॥ द्रव्यं हि स्व
रूपेणात्सृज्यमानेयागं निष्पादयति॥ देवता तु शब्दमात्रेणाग्नय इत्याद्यक्षरमात्रोच्चारणेन तत्रोपकरोतीति द्रव्य
वत्स्वरूपेण। तेन यागस्य द्रव्यं संनिकृष्टं॥ देवता तु विप्रकृष्टा। सन्निकृष्टविप्रकृष्टयोर्मध्ये संन्निकृष्टमेव बल
वदिति न्यायेन द्रव्यमेव बलवदिति तत्सामान्येनैव धर्मप्रवृत्तिर्न देवतासामान्ये न। अथवा वैष्णवादौ द्रव्य
स्य हृदये विशेष्यत्वेन समवायाद्देवतायाश्च विशेषणत्वेन॥ विशेषणविशेष्ययोर्मध्ये विशेष्यमेव बलीय इति
न्यायात्॥ द्रव्यस्य बलत्वं॥ तेन वैष्णवे नवकपाले पुरोडाशधर्मा एव भवंति॥ नोपांशुयाजस्य॥ एवमाग्नेये पयसि
सान्नाय्यस्यैव॥ ऐंद्रे पुरोडाशे पुरोडाशस्यैव। चरुसान्नाय्यमालाभ इत्यत्रापि द्रव्यसामान्येन पुरोडाशस्यै
न देवतासामान्यात्सान्नाय्यस्येत्यादि ज्ञेयं। दाक्षायणे श्रूयते॥ मैत्रावरुणी पयस्येति। तथा चातुर्मास्येषु वै
देवी पयस्येति॥ पयस्ये वारुणी मारुती चेति। सा च पयस्या दधिपयोभ्यां निष्पाद्यते। तत्रोभयनिष्पाद्यत्वा
त्किमस्याः पयस्याया दधिपयसोरुभयोर्धर्मा भवंति॥ उत दध्नः॥ अथवा पयस एवेति तत्राचार्या उभयो
आमिक्षायामुभयोस्तन्निर्वर्त्तेः॥ आमिक्षाया पयस्येति चानर्थांतरं॥ आमिक्षायां पयस्यायां उभयोर्दधि

॥२०॥
॥दरया०४

पयससो धर्मा भवंति। कुतः तन्निर्वृत्तेः। यत स्तस्यामेव दधिपयोभ्यां कारणभूताभ्यामामिक्षा निर्वर्त्यते। निष्पा
द्यते॥ इमं पक्षं दूषयति॥ नैकचोदनात्॥ यदुक्तं आमिक्षायामुभयोधर्मा भवंतीति तन्न। कुतः एकचोदनात॥ यत
इयं एकचोदना मैत्रावरुण्यामिक्षेति॥ एवं हि पयस्याद्रव्यविधीयते॥ मैत्रावरुणी पयस्या वैश्वदेवी वारुणी मारुती
त्येकवचनश्रवणात्॥ एकस्य चोभयधर्मत्वं न संभवति॥ विरोधात्॥ दधिधर्मत्वे हि अपरिवासितया शाखया
वत्सापाकरणं प्राप्नोति॥ पयोधर्मत्वे तु परिवासितया॥ तथा पयोधर्मत्वे च दोहनचतुष्टयस्य स्थापनं प्रा[illegible]ण
च प्राप्नोति॥ न दधिधर्मत्वे। अत उभयधर्मत्वे विरोधादन्यतरधर्मत्वमेव युज्यते॥ अथ द्वितीयं पक्षमुद्भावयति॥॥
दध्नः संघातात्॥ ॥आमिक्षायां दध्नो धर्मा भवंति कुतः संघातात्। संघातः काठिन्यं काठिन्यसामान्यात्। दिप्सर्पः॥
दधि कठिनं। आमिक्षापि कठिनेति। अथ सिद्धांतमाह॥ पयसस्तद्भावात्॥ आमिक्षायां पयस एव धर्मा भवंति॥
न दध्नः॥ कुतः तद्भावात्॥ पयसो ह्यामिक्षा भवति। न तु दध्नोपि भवति पूर्ववत्युक्तं आमिक्षायामुभयोस्तन्निर्वृत्ते
रिति॥ तन्न। घनत्वसंपादनायैव दधिनिनयनं क्रियते पयस्यां तु पयस एव भवति॥ अथवा तद्भावात्॥ तद्रस
स्य पयसो रसस्य मधुरस्यामिक्षायां भावात्॥ पयो हि मधुरं। आमिक्षापि मधुरेति॥ अतः पयस एव धर्मा आमि
क्षायां भवंतीति सिद्धं॥ ततश्च परिवासितया शाखया पवित्रबंधनानंतरं वत्सापाकरणं॥ दोहनचतुष्टयस्या
सादनं प्रोक्षणं च आज्यनिर्वपानंतरं दोहनं श्रपणमभिघारणं चेत्यादयः पयोधर्माः पयस्यायां भवंति॥

॥२०॥
॥भाष्यं॥

अथाग्नीषोमीये पशौ देवतासामान्यात् प्रकृताग्नीषोमीयपुरोडाशधर्मप्राप्तौ चाह॥ ॥पशोः सान्नाय्यस्य तद्
तं॥ पशोः अग्नीषोमीयस्य पशोः सान्नाय्यस्य धर्मा भवंति॥ न प्राकृताग्नीषोमीयपुरोडाशस्य। तदुक्तं॥ त
च प्रागेवोक्तं॥ द्रव्यदेवताविरोधे द्रव्यस्य समवायादिति॥ अत्र कथं द्रव्यदेवतयोर्विरोधः इह हि पशुर्द्रव्यं वि
धीयते॥ तच्च प्रकृतौ नास्ति॥ अतस्तत्कृ स्य धर्माननुपस्थापयतीति॥ उच्यते॥ पशुत्वात् पशो रूपं घते॥
[illegible] ॥पयोपि पशो रूपं घते॥ अतः पशुद्रव्ये प्रतीते सान्नाय्यं बुद्धावागच्छति। उक्तसादृश्यात्॥ अतः
पशुद्रव्यं सान्नाय्यधर्माणां प्रापकं। अग्नीषोमदेवता तु अग्नीषोमीयपुरोडाशस्य। अतः कारणाद्देवमपि द्रव्य
देवताविरोध एव भवति॥ अतः साधूक्तं तदुक्तमिति॥ ननु तर्हि तेनैव सिद्धत्वात्पुनरुक्तमिदं॥ मैवं। तत्र हि वै
ल्लचादौ साक्षात्प्राकृतमेव पुरोडाशादिद्रव्यं धर्माणां प्रापकं॥ इह हि प्राकृतसान्नाय्यद्रव्यसदृशं पशुद्रव्यमिति॥ ॥ ३
व्यवधानात्पुनः सूत्रारंभः॥ प्रायश्चित्तश्रुतेश्च॥ प्रायश्चित्तश्रुतेरप्येवं ज्ञायते यत्सान्नाय्यधर्माः पशौ भवं
ति॥ कथं॥ पशुः स्रवाच्चेत्स्रवेत्सान्नाय्योरखावा तामभिमंत्रयेतेति प्रायश्चित्तश्रुतिः॥ अस्यां हि श्रुतौ पशा[illegible]
त
स्रवाद्दृश्यते। सोच द्वैवोपपद्यते यदा पशौ सान्नाय्यधर्मा भवंति। नान्यथा॥ नन्वेतया श्रुत्या विपरीता बुद्धि[illegible]
यस्मात् सान्नाय्यधर्मान् भवंतीत्येवंविधा। कथं परि पशौ सान्नाय्यधर्मा भवेयुस्तदा सान्नाय्योरखायाः स्रवं
यदभिमंत्रणं तत्पयसो रखास्रवणद्रवपक्षे रखायाः अपि स्रवणे प्राप्नोत्येव किमर्थं पुनरुच्यते पशुः स्रवाच्चेत्स्रवे

॥२१॥
॥देवया०५॥

दिति। उक्तं च॥ तेनैवं ज्ञायते सान्नाय्यधर्माः पशौ न भवंतीति। उच्यते। सान्नाय्योखायां हि प्रधानद्रव्यस्य सान्नाय्य
स्य स्रवणं स्मृतिः॥ पशौ च गुणभूताया वसाया॥ अतः प्रधानद्रव्यस्रवणे यत्प्रायश्चित्तं विहितं तदंगभूताया
वसायाः स्रवणे न प्राप्नोतीति तदर्थमुच्यते पशुरुखायां चेत्स्रवेदिति॥ तेनात्र प्रायश्चित्तश्रुतौ पशावुखायां दर्शनात्सान्ना
य्यधर्मा भवंतीति सिद्धा पशौ सान्नाय्यधर्मा भवंतीत्युक्तं॥ सान्नाय्यं विद्विधां दधि च पयश्च। तत्र संघातसा
न्यात् पशौ दध्नो धर्मप्राप्ते आह॥ पयसः कालानंतर्यधर्मानुग्रहेभ्यः॥ पशौ पयस एव धर्मा भवंति न दध्नः॥ क
स्मात्। कालात्॥ आनंतर्यात्॥ धर्मानुग्रहाच्च॥ कालादिति कालसामान्यात्। समानकालता हि पशोः पयस
श्रूयते॥ तस्माद्यद्दायोषारेतो धत्ते पयसा धत्त इति॥ तत्र गर्भधारणं पयोधारणं चैककालमुच्यते॥ तथा॥ यदा
पशुर्जायते थ पयो जायत इति। अथवा पशुः सद्यस्कालो य इष्ट्येत्यादिवाक्यात्॥ पयोपि सद्यस्कालं। न दधि वत्
द्व्यहनिष्पाद्यं। तथानंतर्यात्॥ पशुरपि गोरजादेर्वा पशोः साक्षादुत्पद्यते। पयश्च। दधि तु पयस उत्पद्यते न साक्षात्पशोः॥
अतः पशोः पयो ऽनंतरं दधि तु पयसा व्यवहितं। तेनानंतर्यात् पशौ पयोविध्यत एव भवति॥ किंच धर्मानुग्रहाच्च॥
पयोधर्मत्वे सति पशुपात्राणां वपाश्रपणीशूलोखानामासादनप्रोक्षणादीनां प्राकृतानां धर्माणामनुग्रहः कृतो भव
ति॥ न दधिधर्मत्वे अतोपि कारणात्पशौ पयोधर्मा एव भवंति। ततश्च वपाश्रपणीशूलोखानामासादनप्रोक्षणे।
द्यौस्थः पृथिवीस्थ इत्यूहितेन मंत्रेण वपाश्रपण्योरा दानविरोधादर्थलोपाच्चाधिश्रपणाभावः॥ अन्वारब्धेय
जमाने वपाप्रोपविवं। वपाश्रपण्योः स्थितायाएव वपाया वेद्यामासादनं। शूलस्यापि द्यौरसीत्यादानं। विरोधा

॥२१॥
॥ओघं॥

दधिश्रपणाभावः॥ अन्वारब्धेहृदयप्रतर्दनं॥ उखाया अपि मंत्रेणादानाधिश्रपणे अन्वारब्धायां मांसप्रक्षेपश्च
इत्येवमादयश्च पयोधर्मा भवंति॥ दर्शपूर्णमासधर्म इष्टिपशुविल्यनेनानुमानिकवचनेन प्राप्ता तत्पदार्थमात्रं
विकृतो भवतीत्युक्तं॥ तेन प्रकृतौ पाद्व्यहकालता क्रमेणोक्ता सापि विकृतौ प्राप्नोत्यत आह॥ ॥सद्यस्कुक्काश
कृत्स्निः॥ काशकृत्स्निराचार्यो विकृतीनां सद्यस्कसद्यःकालत्वं ब्रवीति। कस्मात्। य इष्ट्या पशुना ग्रयणेन
सोमेन यक्ष्यमाणः स पौर्णमास्याममावास्यायां वा यजेतेति वचनात्॥ ॥अनुवादः पूर्वस्येति नात्स्यबादरी॥ वात्स्य
श्च बादरीश्च वात्स्यबादरी॥ तावेवं आह। य इष्ट्येत्यनेन वाक्येन पौर्णमास्याममावास्यायां वा विकृतीनां अनुष्ठान
मुच्यते। तच्च प्रकृतितः प्राप्त मेव। अतः कारणाद्य इष्ट्येत्याद्यनुवाद एव पूर्वस्य प्रकृतितः प्राप्तस्य
कालस्य नापूर्वविधिरिति। स्थितं तावदसिद्धांतितमेतदधिकरणं॥ अंतरा अन्यच्चि सते॥ स्थानापत्तेर्द्रव्येषु
धर्मलाभो विप्रतिषेधः॥ इदं श्रूयते। मो चरुं निर्वपेच्छ्रियेकाम इति। तथा बार्हस्पत्यं चरुं नैवारं सप्तदशश
रावं निर्वपतीति॥ अथ रुद्राय पशुपतये रौद्रं गावेधुकं चरुं निर्वपतीत्यादि। तत्रेदं संदिह्यते। किमुद्गादिषु प्र
द्रव्यस्थानापन्नेषु प्राकृतव्रीह्यादिद्रव्यधर्मा भवंति उत न भवंतीति। तदर्थं चेदं चिंत्यते। किं प्रकृतौ धर्माणां
स्वरूपं प्रयोजनमपूर्वसाधनत्वं वा॥ किं चातः। यदि स्वरूपं प्रयोजकं तदा स्वरूपस्य विकृतौ मुद्गादिषु अ
वान्यत प्रयुक्तानां धर्माणामपि प्राप्तिर्भवतीति। तत्र व्रीहीनवहंति व्रीहीन्प्रोक्षतीति व्रीहिसंयोगेन धर्माणां श्र
वणान्मुद्गादिषु न भवंतीति प्राप्ते आह॥ द्रव्येषु वैकृतेषु मुद्गादिषु प्राकृतद्रव्यधर्मलाभो भवति॥ तत्र प्राकृत

वानंतद्धर्मप्राप्तिः। अपूर्वसाधनत्वस्य धर्मप्रयोजकत्वे तस्य मुद्गादिष्वपि भा२

॥२२॥
॥दैवया०४

द्रव्यधर्मत्र आसादनग्रहणप्रोक्षणकण्डनादयो भवंतीत्यर्थः॥ कुतः स्थानापत्तेः॥ कार्यापत्तेः वैकृतस्य द्रव्यस्य प्राकृत
द्रव्यकार्यापन्नत्वात्॥ यतः प्रकृतौ व्रीही णामपूर्वसाधनत्वं धर्मिणां प्रयोजकं न व्रीहिस्वरूपं। व्रीहिस्वरूपस्य प्रयोज
कत्वे धर्मिणाम् नर्थक्यापत्तेः॥ विनासंस्कारं व्रीहित्वस्य सिद्धत्वात्॥ अतो व्रीहीन्प्रोक्षतीत्यादौ अपूर्वसाधनप्रो
तीत्यर्थः॥ अपूर्वसाधनत्वं च वैकृतेष्वपि मुद्गादिष्वस्तीति भवत्येव प्राकृतद्रव्यधर्मलाभः॥ कीदृशः॥ अविप्रति
षिद्धः प्राकृतद्रव्यधर्मो विकृतद्रव्यधर्मेणान विप्रतिषिध्यते। यस्तु विप्रतिषिध्यते स न भवति॥ यथा परिधौ पशु
नियोजनमित्यत्र परिधेर्यूपकार्यापन्नस्य यूपधर्मप्राप्तौ उच्छ्रपणं न भवति। परिधानेन विप्रतिषेधात्॥ एवं वैकृ
द्रव्ये प्राकृतद्रव्यकार्यापन्ने प्राकृतद्रव्यधर्माः सर्वे भवंतीत्युक्तं॥ तेन प्राकृतद्रव्यसंबंधिमंत्रैरपि तस्याभिधानं
प्राप्तं। तत्रायं संदेहः॥ किमूहितेनाभिधानमुतानूहितेन यथाश्रुतेनेति॥ विशेषानुपदेशाद्यथाश्रुतेनानूहितेनाभि
धाने प्राप्तेत्राह॥ यथार्थमूहश्चोदिते॥ ॥ चोदिते विहिते वैकृते द्रव्ये यथार्थमूहो विपरिणामः कर्त्तव्यः। यो यो वैकृ
पदार्थः॥ यस्यां विकृतौ यः प्राकृतद्रव्यस्थानापन्नो वैकृतोर्थः तस्यां तद्वाचिपदप्रयोगः कार्यः॥ यथा प्रकृतौ अ
ग्नीषोमीभ्यां छागस्य वपाया मेदस इति छागस्य यागसाधनत्वेन तस्याभिधानं कृतं। विकृतौ च सारस्वतौ
मेषावित्यत्र मेषयोर्यागसाधनत्वेन विधानात्॥ छागस्येतरस्य स्थाने मेषस्य रूपमुस्येति वैकृत
स्य मेषस्याभिधानं कर्त्तव्यं॥ एवं प्रकृतौ छागस्यैकत्वात् छागस्येत्येकवचनं। विकृतौ तु छागद्वित्वानेकत्वे छागयोः

॥२२॥

छागानामित्यूहः॥ वपानेकत्वे च वपाभ्यां वपाभ्य इत्येवमपि यथार्थमूहः कार्यः॥ यत्र प्रकृतौ मंत्रेण प्राकृतद्रव्यदेवतादे
रभिधानं कृतं॥ विकृतावपि प्रकृतिवद्भावात्तेन वैकृतद्रव्यादेरभिधानं कर्तव्यं॥ अनूहितश्चेत्तत्कर्तुं न शक्यते
यदूह्यते॥ चोदित इति विशेषणादनुरव्यसादृश्येन गृहीते प्रतिनिधिभूते मेषादावूहो न भवति॥ तथा चोक्तं
अविप्रतिपत्तिरिति। एवं सर्वत्रोहे प्राप्ते क्वचिदपवादमाह॥ ॥ न प्रकृतावपूर्वत्वात्॥ प्रकृतौ पत्नी एं सनह्य पत्नीं वाचं वि
सृजस्व पत्नीं वाचयच्छेत्येषु पत्नीमुद्दानयेत्येकवचनं एकपत्नीकप्रयोगे उपपन्नार्थं। अनेकपत्नीकप्रयोगे ऊहित
व्यं भवेत्तिसंदेह निर्णीयते। प्रकृतावूहो न भवति। कस्मात्॥ अपूर्वत्वात्प्रकृतेः॥ यतः प्रकृतेरन्या प्रकृतिर्नास्ति। यदि
क्रियते। अतोनेकपत्नीकेपि पत्नीमित्येकवचनान्तमेव युज्यते नोहितं॥ एवं पवित्रस्य इत्यत्र पवित्रत्रयपक्षेपि नो
हितव्यं। प्रकृतिवद्विकृतिः कर्त्तव्येत्यनेन प्रकृतितः सर्वे धर्मा विकृतौ प्राप्नुवंति॥ तत्र केषांचिद्धर्माणां बाधमाह॥ ॥
विकृतौ वचनार्थलोपविरोधेभ्योऽप्रवृत्तिः॥ विकृतौ प्राकृतधर्माणां वचनादप्रवृत्तिर्भवति॥ यथा पितृयज्ञे न प्रस्तरं
स्तृणाति नांतर्दधाति विधृती॥ अथ आश्राव्येन होतारं प्रवृणीते॥ नाध्वर्युः प्रस्तरं समुल्लुपतीति॥ यथा गृहमेधीयेन प्र
शित्रमिति॥ तथा अर्थलोपादपि विकृतौ प्राकृतधर्माणामप्रवृत्तिर्भवति॥ यथा मुद्गेषु कण्डनस्य। यथा च चरौ प्रथन
भिमर्शनिर्वपनादेः॥ यथा सान्नाय्ये शकला जिनोलूखलमुसलादानादेः॥ तथा विरोधादपि प्राकृतधर्माणां विकृतौ
अप्रवृत्तिर्भवति। तद्यथा चरोः पेषणमधिवासनं च॥ परिधौ पशुनियोजनमित्यत्र यूपस्थानापन्नस्य परिधेस्तक्षणं च
दध्युपसर्जनीनामधिश्रपणं च॥ परार्थेत्यि नोत्सत्तदभावे भावः॥ परार्थमिन्यार्थमुत्पत्तिर्यस्यासौ परार्थोत्पत्तिः॥ तस्य

॥२३॥
॥दर्श्यो.४

परार्थोत्पन्नेस्तदभावेतस्यपरस्याभावेतस्यपरार्थोत्पत्तेरप्यभावोभवति॥तद्यथाप्रकृतौतंडुलनिष्पत्तिनिमित्तकणा
नामुत्पत्तिः॥तंडुलार्था॥अतःपरार्थोत्पत्तेःकणादेःतस्यपरस्यतंडुलादेरभावेपयस्यादौतस्यापिकणादेरभावो
भवति॥तदभावाच्चतदर्थस्यापासनस्याप्यभावः॥यथाचविष्ठ्यापात्र्यंगुलिप्रक्षालनस्यतदर्थनिनयनस्य
एवंसर्वत्रप्राप्तौकंचिद्विशेषमाह॥चोदितत्वाद्भावः॥॥यत्रपरार्थोत्पन्नंद्रव्यंकंचित्कार्यंतिरसाधनत्वेनचोदितं
भवति॥तत्रपरस्याभावेपिपरार्थोत्पन्नस्यद्रव्यस्यभावोभवति॥तद्यथायूपशकलेनस्रुक्संमार्ष्टीतियूपतक्षमा
उत्प न्नंशकलंतस्यग्रहसंमार्गसाधनत्वेनविहितत्वाद्यूपाभावेपिशकलमात्रंगृह्यतेसंमार्गसिध्यर्थं॥य
तोशकलादिद्रव्यंक्रियार्थं।तेनक्रियाप्रधानभूता।तदंगभूतेशकलमात्रंस्वसिध्यर्थमाक्षिपाति॥यत्रतुक्रियाद्रव्या
र्था॥तत्रद्रव्यस्यसाधनभूतस्याभावेंगभूतायाःक्रियायाअभावएवप्रयुज्यतेस्थितादुत्तरउच्यते॥तत्रैवपूर्वप
क्षःकृतोसि।पौर्णमास्यांपौर्णमास्यायजेतामावास्यायामावास्यायजेतेत्येवमादिनाप्रकृतिविहितस्यप्रतिल
क्षणस्ययागकालस्यविकृतावपिप्राप्तत्वाद्यइष्ट्येतिवाक्येअमावास्यायांपौर्णमास्यामित्यनुवादएवनापूर्वकाल
विधिरिति॥तत्रसिद्धांतमाह॥॥नविपक्षेक्रियास्युःसमभिव्याहारात्॥विपक्षशब्देनप्रतिपदुच्यते॥विपक्षेप्रतिपदि
वैकृत्यःक्रियानस्युः॥किंतर्हिपौर्णमास्याममावास्यायामेवस्युःकस्मात्।समभिव्याहारात्॥समभिव्याहारो
वाक्यंतस्मात्॥यइष्ट्येत्यादिवाक्यात्॥ननुप्राकृतस्यैवकालस्यायमनुवादइत्युक्तं॥नानुवादःअनुवादेहिव

॥२३॥
॥

११

वाक्यानर्थक्यमेवस्यात्प्रवृत्तिविशेष्यकत्वाभावात्॥पौर्णमास्यमावास्यशब्दयोर्लक्षणप्रसंगाच्च॥अनुवादेहिपौ
र्णमास्यममावास्याशब्देनगौण्यावृत्याप्रतिपल्लक्ष्यते॥तथाचश्रुतार्थपरित्यागोभवति।नचैतदुपपन्नं।यल्लक्ष्यणा
नुरोधेनश्रुतिर्बाध्यते॥॥किंचिसोमस्येदमेवकालविधानं॥नहिवाक्यांतरेणतस्यकालोविहितोस्ति।यस्यायमनुवाद
इत्युच्यते॥अतोपिनानुवादः॥यइष्ट्येत्यत्रवाक्येइष्टिग्रहणेनेवाग्रयणग्रहणेसिद्धेनिष्टिरूपस्याग्रयणस्यपौर्णमास्य
मावास्यालक्षणकालविधानायपृथगाग्रयणग्रहणं।तेनदर्शपूर्णमास्यानीजानोदक्षिणाग्निपक्वंत्वनुष्ठाय
ब्राह्मणान्भोजयेदित्यादावनिष्टिरूपेप्याग्रयणेअयंकालःसिद्धोभवति॥३॥अथदाक्षायणयज्ञमुपनिबध्नाति
दाक्षायणयज्ञःप्रजापशुअन्नयशस्कामस्य॥॥दाक्षायणयज्ञइतिवक्ष्यमाणस्यकर्मणोनामधेयं॥तस्माद्दाक्षा
यण. यज्ञोनामेतिश्रुतेः॥सचप्रजाकामस्यपशुकामस्यान्नकामस्ययशस्कामस्यचयजमानस्यभवति॥
पर्याये ऐकैकफलसिद्धिः॥अथयत्पूर्वेद्युरग्नीषोमीयेणयजतेपौर्ण[illegible]
मास्यामित्यादिवाक्येषुसदेवतानिदर्शपौर्णमासिकान्येवहवींषिप्रत्यभिज्ञायंते।केवलंतुअग्नीषोमीयं[illegible]
सान्नाय्यानांतिथिक्रमभेदेनविकारः॥तथाचसंदेहः।किंदर्शपौर्णमासावेवतेयागागुणमात्रविकृतात्।उतया[illegible]
ताण्येतानितुल्यद्रव्यदेवताकानिविधीयंतइतितत्रसूत्रेणैवपूर्वपक्षयति॥नामफलगुणयोगात्कर्मांतरं॥अयं[illegible]
य णायज्ञोदर्शपूर्णमासाभ्यांभिन्नंकर्मांतरं।नदर्शपूर्णमासौ॥कुतः॥नामफलगुणयोगात्॥नामान्यत्वात्॥यतोदाक्षायण

॥२५८॥ ॥देवया० ४

यज्ञ इति भिन्ननाम। तद्वेदाच्चैन्द्रदृष्टो यथा चैन्द्रादन्यो मैत्र इति॥ तथा फलभेदात्। दाक्षायणस्य हि प्रजादिफलं श्रूयते॥ फ-
लान्यत्वे च फलिनोऽन्यत्वं भवति। गुणान्यत्वाच्च॥ गुणान्यत्वं च दृश्यते मैत्रावरुण्या मिक्षा॥ अथ वाजिभ्यो वा-
जिनं जुहोतीत्यादि। अतः कर्मान्तरमिदमिति प्राप्त आह॥ गुणविधानं वा संनिधिसंपद्वचनाभ्यां। वाशब्दः पक्षव्यावृ-
न्दर्शपूर्णमासतोऽन्यत्कर्मान्तरं। किं तर्हि गुणविशिष्टौ दर्शपूर्णमासावेवैतौ विति। कस्मात्। संनिधेः॥ दर्शपूर्णमास-
संनिधाने दाक्षायणयज्ञस्य पाठात्॥ आजिवा एते धावन्ति ये दर्शपूर्णमासाभ्यां यजन्त इति दर्शपूर्णमासौ प्रकृत्य त-
स्माद् त्रिंशतमेव वर्षाणि यजेतेत्यभिधायाह यद्यु दाक्षायणयज्ञी स्यादथो अपि पञ्चदशैव वर्षाणि यजेतेति दर्शपूर्ण-
माससन्निधौ पठ्यमानत्वात् तद्गुणविधिर्जायते। तथा संपद्वचनाच्च॥ अत्रत्येव सा संपत्संपद्यते यदि हि पौर्णमास्यां यजे-
तामावास्यायां अत्रापरवत्सु सा संपद्भवतीति। दर्शपूर्णमासयागपक्षे हि एकैकः पौर्णमास्यमावास्यायागः॥ अत्र
द्वौ द्वौ पौर्णमास्यमावास्यायागौ। तेन त्रिंशद्वर्षसंपत्त्यं पञ्चदशभिरेव वर्षैः सिध्यतीति वदन्ती श्रुतिर्दाक्षायणयज्ञस्य दर्श-
पूर्णमासरूपतां गमयति॥ यदुक्तं नामान्तरत्वात्कर्मान्तरत्वमिति तद्गुणसंयोगादेकस्यापि नामान्तरत्वं भवति॥ यथा
क्षत्रियो राजेति॥ तथा च॥ ब्रह्मचारी गृहस्थो वनी परिव्राज इति धर्मभेदादेकस्यैव नामान्तरं॥ तथात्रा-
पि पयस्यादिगुणान्तरयोगान्नामान्तरत्वान्न कर्मान्तरसाधकं॥ यथा घटः कलशः कुम्भ इति॥ यच्चोक्तं फलभेदात्क- ॥२८॥ ॥भाष्यं॥
र्मान्यत्वमिति। तत्सत्यं। न तु फलं गुणात्। कथं। इत्थं। यद्यपि फलवाक्ये गुणान्तरयुक्तास्ते यागाः॥ संनिहितास्त-
थापि यागानां पौर्णमासफलवाक्ये नैव प्रयोजनत्वात् गुणा एव … फलसाधनत्वेन विधि-
तं

यन्ते न तु यागाः॥ अतो दध्नेन्द्रियकामस्य जुहुयादित्यादिवद्गुणफलं न कर्मणो भिन्नत्वमापादयति॥ यच्चोक्तं गुणान्यत्वं हि
पिनोऽन्यत्वं भवतीति। तदपि अनैकान्तिकं। यथोदाहृते अग्निहोत्र एव दधिलक्षणगुणान्यत्वेऽपि न कर्मान्तरं। यथा वा लोके अ-
न्नफलादेः तथात्रापीति॥ तस्माद्गुणमात्रविशिष्टौ दर्शपूर्णमासयागावेवैतौ विधीति सिद्धं॥ चिन्तायाः प्रयोजनं दाक्षायणयज्ञानु- क्षा
ष्ठानपक्षे दर्शपूर्णमासयोरननुष्ठानं॥ अञ्जसाह्वोऽस्य दर्शपूर्णमासाभ्यामिष्टं भवतीति श्रुतिरप्यमुमेवार्थं प्रकाशयति॥
अथ दर्शपूर्णमासतः कालक्रमभेदेन हवींष्युपदिशति॥ ॥ अग्नीषोमीयः पौर्णमास्यां॥ ॥ मुख्यायां पौर्णमास्यामुद्ध-
रणादिकर्मापवर्गन्तोऽग्नीषोमीय एकादशकपालः पुरोडाशो भवति। अथ यत्पूर्वेद्युरग्नीषोमीयेण यजते पौर्णमास्यामि-
ति केवलस्य विधानादाग्नेयोपांशुयागयोर्निवृत्तिः॥ ऐन्द्राग्नो द्वादशकपालः पुरोडाशो भवति॥ अथ यत्पूर्वेद्युरैन्द्रा- य
ग्नेन यजतेऽमावास्यायामिति। अत्राप्येकस्यैव विधानादाग्नेयोपांशुयाजयोर्निवृत्तिः॥ स वेदे पौर्णमास्यां यजते
अमावास्ये इति द्वयोर्मुख्यामुख्ययोरुपयोगं विधायाथ यत्पूर्वेद्युरिति विधानादत्र पूर्णमास्यमावास्याशब्दौ मुख्यार्थौ॥
सान्नाय्यवत्प्रातः॥ अमावास्यायां पयस्या मैत्रावरुणीति। अमावास्यायां विशेषस्य वक्ष्यमाणत्वात् पौर्णमास्य-
मेवानेन सूत्रेण विशेष उच्यत इति प्रतीयते। तेन प्रातः पौर्णमास्यां प्रतिपदि सान्नाय्यवत्कर्म भवति॥ तथा तत्राग्नेयः
पुरोडाशः दधिपयसी च हविषी इन्द्रश्च देवता एवमपि भवतीत्यर्थः। अथ प्रातराग्नेयः पुरोडाशो भवत्यैन्द्रं सान्नाय्यमि-
ति श्रुतेः। ऐन्द्रं सान्नाय्यमित्युक्तत्वात् पाक्षिकस्य माहेन्द्रस्य निवृत्तिः॥ अत्राग्नेयः स्वस्थाने स्थित एव॥ उपांशुया-

॥ ॥ ऐन्द्राग्नो मावास्यायां॥ ॥ मुख्यायाममावास्यायामुद्धरणादिकर्मापवर्गन्तः ७

॥१२५॥
॥देवयो०४

स्थाने त्विदं सान्नाय्यममावास्यायां अपकृष्य विहितं॥ अग्नीषोमीयपुरोडाशस्तु पूर्वेद्युरपकृष्ट इत्येषोत्र गुणवि
कारः॥ ऐंद्रं सान्नाय्यमित्यत्र तु दध्येव केवलं भवति न पय इति केचित्॥ पयस्तु अमावास्यमेव मैत्रावरुणी
भविष्यतीति॥ तथा शाखांतरे ऐंद्रं दध्युत्तरस्यामिति श्रूयते॥ इतरथा त्वपूर्व एव मैत्रावरुणी गः स्यात् नद्वाइपि पौ
र्णमासिकस्य गुणविकारस्तस्मात् पौर्णमास्यां दध्येव केवलं भवति न पय इत्याहुः॥ एवं चैकवचनमुपपद्यते॥ इ
तरथा दधिपयसो द्वित्वात् द्विवचनं स्यात्॥ सान्नाय्यशब्दश्च सान्नीयते गोभिरिति सान्नाय्यमिति यौगिकत्वा
देकमेव वक्तीति॥ नत्वेतद्युक्तमिव॥ अतः पथो ग्नीषोमीय एव पौर्णमासे पुरोहविः सान्नाय्यममावास्यायामैंद्रं वा
सान्नाय्यशब्दश्च सान्नाय्यमित्यादौ समस्तयोरेव दधिपयसोरेकवचनात् तस्य सान्नाय्यशब्दस्य दर्शनात्॥ धिनो
त्येवं न च तु भेपि श्रूयत इत्यस्य च दोषस्यापरिहारप्रसंगाच्च॥ तथा च दर्शयिति॥ सान्नाय्यभाजनो वा अमावास्या

मे २८

तदहस्तत् पौर्णमास्यां क्रियत इत्यमावास्यायां सान्नाय्यभावमेवाह॥ तत्र च यदि पयः स्यात् स्यादेव सान्नाय्यं॥
अतो यागांतरमेवैतत् पयस्यासाधनकं वचनादमावास्यायां क्रियते॥ दधिपयसी तु उभे अपि वचनात् पौर्णमा
स्यां स्यातामिति॥ नन्वग्नीषोमीयपौर्णमास्यामैंद्राग्नो मावास्यायामित्युक्तो सान्नाय्यवदन्यत्रापि तु भयत्रा
तः सान्नाय्यविधानं कथं न भवति उच्यते॥ अमावास्यामुपाद्य प्रातः पयस्याविधानात्॥ ननु तत्र सान्नाय्यमपि
भवतु विधानसामर्थ्यात् पयस्यापीति चेत्॥ न॥ अथ प्रातराग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेयशास्य

॥१२५॥
॥भाष्यं॥

नीति त्वेवाग्नेयः पुरोडाशोथैतावेव मैत्रावरुणो द्वेदेवत्ते इति श्रुत्या हविर्द्वयस्यैव विधानात्॥ आग्नेयमुक्त्वाथैतावेव
मित्रावरुणाविधेयं वकराथ श्रुत्याभ्यामन्यस्येह हविरंतरस्याभावप्रतिपादनात्॥ तस्मात् पौर्णमास्यां प्रतिपदि त्वाग्नेयः
पुरोडाशो दधिपयसी चेति त्रीणि हवींषि भवति॥ अमावास्यायां त्वाग्नेयमैत्रावरुणीपयस्येति द्वे एव हविषी॥ उपांशुया
जस्त्वेकत्रापि न भवति॥ विधानाभावादिति॥ अत्र मुख्यायां पौर्णमास्यामुद्धरणादिकर्मापवर्गांतमग्नीषोमीयं सद्य
एव प्रातः परिसमाप्य पुनरुद्धृत्याग्न्यन्वाधानं त्वायाशानशाखाच्छेदं दध्यर्थं वत्सापाकरणोपवेषकरणपवित्रबंध
नानि यथाकालं कृत्वा सायं होमानंतरं दोहयित्वा निधानांतं कृत्वा प्रातर्दोहार्थं वत्सापाकरणं शाखोपगूहनं च कुर्यात्॥
अमावास्यायां पयस्या मैत्रावरुणी॥ प्रातरित्यनुवर्त्तते॥ अमावास्यायां प्रातः प्रतिपदि मैत्रावरुणी पयस्या भवति॥ अ
थ प्रातराग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्येति श्रुतेः॥ अत्राप्याग्नेयः स्वस्थान स्थित एव॥ पयस्या त्वपूर्वा उपां
शुयाजस्थाने विधीयते॥ ऐंद्राग्नश्च पूर्वेद्युरपकृष्ट इति गुणविकारोत्र॥ अत्र मुख्यायाममावास्यायां प्रातःकाले सद्य एवो
द्धरणादिकर्मापवर्गांतमैंद्राग्नयागं कृत्वा तदानीमेव पुनरुद्धृत्यान्वाधानपिंडपितृयज्ञ त्वायाशानशाखाच्छेदनसंनम
नोपवेषकरणपवित्रबंधनानि यथाकालं कृत्वा सायंहोमानंतरं मैत्रावरुणपयस्यार्थं वत्सापाकरणं कुर्यात्॥ अत्र
मित्रावरुणाभ्यां भागमिति गोरूपस्पर्शने विशेषः॥ शाखोपगूहनं च॥ प्रातर्विशेषमाह॥ ॥ तत्रैव दोहनं प्रातेवाद्ध्या
नयति॥ तत्रैव तस्मिन्नुल्लोकिक दधन्ये वाज्यं निर्वपानंतरं पयस्यार्थं दोहनं कर्त्तव्यं प्रथमं दुरवायां लौकिकं च

॥१२६॥
॥दर्शपौ०४

दध्यासिच्येत्यर्थः॥ अथवापयसीभृतेतप्तेसतिपश्चाद्दध्यानयतिनिनयति नत्वधमं।केचिदेवंव्याचक्षते॥ अमाव
स्यायांपयस्यामैत्रावरुणी। तत्रैवदोहनं।प्रातरित्यनुवर्त्तते॥ अमावास्यायांप्रातःप्रतिपदिमैत्रावरुणीपयस्या
नवति।सान्नाय्यवत्प्रातरितिसायंदोहप्रातर्दोहैश्चप्राप्तेसायंदोहनिवृत्त्यर्थमाह॥ तत्रैवदोहनं।तत्रैवेतिप्रात
वनसायमिति।तथाश्रुवौतेदध्यानयतीतिवाशब्दादशृते वापयसितत्किंकदध्यानयतीएतदपिसमीचीनंव्या
ख्यानं॥ अपरेत्वेवंव्याचक्षते।सान्नाय्यवत्प्रातरित्युभयत्रदधिपयसीस्तएवतत्रैवदोहनप्राप्तिरिति।पयस्याः
पयोविकारत्वान्निरुप्याज्यप्रातर्दोहिनकार्यं॥ अथवाशृतप्रातर्दोहिसायंदोहदधिनिनयति।एवंदधिपयोभ्यांपयस्या
उत्पाद्यतइतिपूर्वव्युदध्यापिमित्रावरुणाभ्यामेवनिष्पाद्यनीयमस्मिन्पक्षे॥ शारवांतरेत्वेपयस्योत्पत्तावस्यवप्रका
रस्यदर्शनादिदमपिननिर्मूलं॥ तथाचाहआपस्तंबः।तप्तेप्रातर्दोहिसायंदोहमानयतीति॥ तथाचमानवे।तप्तेप्रात
र्दोहिसायंदोहमानीयामिक्षांकरोतीति॥ सर्वत्रपयस्योत्पादनस्यायमेवप्रकारः।तथाचिनसंप्रदायोव्यवस्थित
इतिस्वश्रुतोपयस्यानिष्पादनप्रकारस्यानुपदेशात्॥ शारवांतरश्रुतिनिर्णयः॥ वाजिनंनिषिच्योत्करेकरोति॥ त
पयसिदधिनिनयनेकृतेदधिपयसोःसारभूतंयत्कठिनंसंपद्यतेसापयस्यायच्चउदकंतद्भवतितद्वाजिनमित्यु
च्यते।पयस्योद्वासनकालेतद्वाजिनंनिषिच्यपात्रांतरेवस्थाप्यतद्वाजिनंपात्रांतरस्थमुत्करेकरोति॥ सर्वहविषा
नो मासा दनंतरमुत्करेआसादयतीत्यर्थः॥ उत्करेवाजिनमासादयतीतिशारवांतरेश्रवणात्।सूत्रकारस्तुआसा

॥श्री॥
॥१२९

५२

यतीत्यस्यस्थानेप्रायेणकरोतेःप्रयोगंकरोति॥ यथातदंतर्वेद्यासादयतीति श्रुतेर्वे करोत्यपरंप्रोक्षणीभ्य इति।
अग्रेणधाम्नेतिहवींषिवेद्यांकृत्वेतिच॥ अनाज्यलिप्तंवा॥ तत्रस्थामिघारस्यायंविकल्पः॥ पयस्यामप्तत्वा
स्त्वाभिघारेकृतेअकृतेवावाजिनंनिषिंचेत्।पक्षाचाकृतेतदाअनाज्यलिप्तंनिषिक्तंभवति।तथाचशारवांतरे॥ अ
नाज्यलिप्तंनिषिंच्येति॥ तदाचवाजिननिषेकानंतरंपयस्यावाजिनयोःपृथक्तत्ताभिघारणं।प्राणदानं
भयपक्षेपि॥ अथवा॥ अनाज्यलिप्तंवापोनकार्यः॥ अस्मिन्पक्षेवाजिनस्यतत्ताभिघारप्राणदानोपस्तरणाभि

जिनस्यान्यले

घारापानामभावः॥ वाजिनयागस्यकालमाह॥ ॥प्रहृत्यपत्तृणंतेनचरति॥ ॥तृणंप्रहृत्यप्रस्तरहोमानंतरंप्र
स्तरमध्याद्गृहीततृणस्यानुप्रहरणंकृत्वात्मानमालभ्यापस्पृष्ट्वावाजिनेनचरति॥ वाजिनेनयागमनुतिष्ठति।
यद्यपिप्रहृत्यतृणमितितृणप्रहरणानंतरमेववाजिनयागोयुक्तः।तथापिप्रास्यतृणंचक्षुष्पाइत्यात्मानमालभतं
इतिप्रकृतौतृणप्रहरणानंतरमात्मालंभस्यविधानात्प्राकृतंचविकृतावित्येनेनन्यायेनपूर्वमात्मालंभोदकस्पर्शौ
नेकृत्वैवचवाजिनयागःकर्त्तव्यः॥ ॥वाजिनयागस्यकालांतरमाह॥ ॥विमुच्यवास्रुचौ॥ अथवास्रुचौविमृच्यद्य
ताच्यसीतिमंत्रेणस्रुचोर्धुरिस्पृश्येवानिधानानंतरंवाजिनेनचरतीतिगतेनसंबंधः॥ सर्वेपश्चादिवयज्ञस्यजु
होतीतिश्रुतेः॥ ॥बर्हिरेवसिंचनुरन्ततीति॥ इवत्वात्स्रुवेणाग्रहणेप्राप्तेबर्हिरेवसिंचन्नित्युपदेशादेवप्रतीत्यश्रवणा
च्चस्थाल्यामुखेनैवजुहुनिनयतिबर्हिषिस्कंदनंकुर्वन्॥ नहि स्रुवेणसकृद्ग्रहणेक्रियमाणेबर्हिरेवसेचनवाजिन

यागदिग्व्याघारणभक्षणपर्यंतंवाजिनंसंभवति। अतस्थालीमुखेनैववस्तुन्विनिनियमनंकार्यं। अत्रवाजिनस्याज्यनिषे
धपक्षेनोपस्तारणाभिघारौ। स्रुताभिघारमात्रनिषेधपक्षेतुभवतएव। कस्मादिवमन्यायंहविषः स्कंदनमुच्यतइत्यत
आह। तदप्सुभरतोदधातीतिश्रुतेः। शाखांतरेएवंश्रूयते। यद्बहिर्वस्त्विन्नगृह्णातितदप्सुभरतोदधाति। तेनश्रु
तिबलादेवमन्यायम्यमपियुक्तमेव। नास्तिन्वनस्यास्तिभारइति॥ ॥वाजिभ्योनुवाचयति॥ ग्रहणानंतरंवाजिभ्यो
नुब्रूहीत्यनुवाचयतिहोतारं। तदनंतरमेवोपदेशात् नपूर्वं॥ प्रतिवषट्कारंहुत्वावाजिनशेषेणदिशोव्याघा
यतिदिशइतिप्रतिमंत्रंप्रदक्षिणंपुरस्तात्प्रथमं॥ होतुर्हितत्रद्वौवषट्कारौस्तः॥ वषट्कारस्य। प्रतिवषट्कारंद्वयोरपिवषट्कार
योर्हुत्वायजतिस्थानाज्जुहोतिस्थानमागत्यस्रुक्स्थेनवाजिनशेषेणदिशः प्रदिशइत्यादिभिर्मंत्रैः प्रतिमंत्रंप्रदिशं
सर्वासुदिक्षुआहवनीयस्याग्नेः प्रदक्षिणंदिशोव्याघारयतिदिशः कर्मभूताअभिलक्षीकृत्यवाजिनशेषंक्षारयति।
अग्नेस्तत्तद्दिक्प्रदेशेजुहोतीत्यर्थः। तत्रापिप्रथमंपुरस्तात्प्राच्यांदिशिव्याघारयति॥ तत्रप्रदक्षिणंपुरस्तादुद्ग्रहणंच
श्रौतं॥ अतस्तदन्यथाभावेश्रौतंप्रायश्चित्तं। एवंचतुर्भिर्मंत्रैश्चतसृषुदिक्षुव्याघारणेसिद्धेआह॥ ॥उत्तमाभ्यांमध्ये
पूर्वार्द्धेच। दिशइत्यादीनांषण्णांमंत्राणांमध्येउत्तमाभ्यांपंचमषष्ठाभ्यांउद्दिशः दिग्भ्यइत्याभ्यांमंत्राभ्यांयथाक्रमं
अग्निमध्येअग्नेःपूर्वार्धेपूर्वभागेचव्याघारयति॥ वषट्कारानुवषट्कारयोर्होमस्तुआहवनीयस्यपूर्वभागएवकार्यः॥ र
वेप्रागेवाग्नेजुहोत्यग्नेवीहीत्यनुवषट्करोतिततस्स्विष्टकृद्भाजनंसर्वेप्रागेवजुहोतीतिश्रुतेः। अत्रेचविशेषमाह।

स्वाहाकारः सर्वत्रसाकांक्षत्वात्॥ सर्वत्रदिशः प्रदिशइत्यादिमंत्रेषुस्वाहाकारोप्यनुषंजनीयः। दिग्भ्यः स्वाहेत्य
त्रैवपठितत्वादत्रैवप्राप्नोतिनान्यत्रेत्यतउच्यतेसर्वत्रेति। कस्मात्साकांक्षत्वाद्दिशइत्यादीनांमंत्राणांसाकांक्षा
एतैःक्रियापदाभावात्। अतः स्वाहाकारोनुषज्यतेनिराकांक्षीकरणाय। ननुतर्हिस्वाहाकारयोगेदिग्भ्यइत्यादौच
तुर्थ्याभवितव्यं। नैवं मंत्रत्वात्॥ मंत्राह्येतेमंत्राश्चयथापठिताएवप्रयुज्यंते॥ उपहूयोभवतीति। प्रथमेवतत्रचतु
र्थ्यर्थेभवति। शेषस्तुपह्वयस्वेत्यामंत्र्योमंत्राभक्षणमुपहूतइतिप्रसूतः॥ शेषस्तुक्स्थितहस्तेभक्षणार्थंगृहीत्वा
सुकोपह्वयस्व। भक्षणार्थमनुजानीहीत्येवंहोत्रादीन्सर्वानामंत्र्यामंत्र्यपृष्टःपृष्टःउपहूतइतितेनपृष्टेनप्रसू
तोनुज्ञातः सन्तस्यशेषस्यभक्षणंकरोति। शेषमिसस्यद्वितीयांतस्यभक्षणमित्यनेनान्वयाद्भक्षणार्थंहस्तेन
हीत्वेत्यध्याहृत्ययोज्यं। व्यावहारिकैर्नामभिर्होत्रादीनामंत्रणेप्राप्तेआह॥ युक्तनामभिर्वा। वावधारणे। युक्त
नामानिचहोत्रादीनि। तैर्होताअध्वर्यवादिनामभिरेवामंत्रणंकर्तव्यंनव्यवहारिकैर्यज्ञदत्तइत्यादिभिः। तेनहोत
रुपह्वयस्वाध्वर्यउपह्वयस्वेत्येवमामंत्रणंकार्यं। प्रसंगात्सोमभक्षणेपीमंविधिमुपदिशति॥ सोमेच॥ सोमेपि
अग्निष्टोमादौग्रहचमसादिस्थस्यहुतशेषस्यसोमस्येवमेवहोतरुपह्वयस्वेतिनामभिरामंत्र्यामंत्र्योप
हूतइतितैरनुज्ञातोभक्षणंकुर्यात्॥ नानुपहूतः सोमः पातव्यइतिवचनात्॥ अविशेषाद्धोमाभिषववषट्कार
समाख्यादिनिमित्तेनानेकसाधारणेषु सोपहवभक्षणेप्राप्तेआह॥ ॥साधारणेषुवासामर्थ्यात्॥ वा व

धारणे। साधारणेष्व वसोमेषु सोपहवं भक्षणं। नासाधारणेषु नाराशंसचमसादिषु। कुतः सामर्थ्यात्॥ साधारणेषु वसोमेष्वनुज्ञाप्रार्थनं सामर्थ्ययुक्तं भवति। अधिकपाने दोषाशंकायां हि भागिभ्यः अनुज्ञा प्रार्थ्यते॥ अनुज्ञा तस्याधिकपानेपि दोषो न भवतीति। अतो होमाभिषववषट्कारसमाख्यादिनिमित्तेनानेकसाधारणेष्व बहुतरोपसोमेषु सोपहवं भक्षणं भवति। नासाधारणेषु। अथवा जिनभक्षणे मंत्रानाह॥ ॥ऋतूनां त्वा वाजिनां वाजिनं भक्षयामीति अनेनैव मंत्रेण वा जिनशेषभक्षणं संपत्ति॥ ॥वाज्यहं वाजिनस्योपहूतस्योपहूतो भक्षयामीति वा॥ अनेन वा भक्षणं कुर्वंति॥ ॥वाजे वाजी भूयासमिति वा। अनेन वा जिनशेषं भक्षयंति॥ अथ भक्षणक्रमं भक्षयितॄंश्चाह॥ ॥होत्रध्वर्युब्रह्माग्नीद्यजमानाः॥ वाजिनशेषमनेनैव क्रमेणोपहवपूर्वकं भक्षयंतीति शेषः॥ तद्देपंचैव भक्षयंतिहोता वाध्वर्युश्च ब्रह्मा चाग्नीध्रश्च यजमान इति श्रुतेः॥ ॥प्रथमो वा भयतस्तत्र यजमानः॥ अथवा यजमानः प्रथमो वाजिनशेषं भक्षयति। ततो होता। ततोध्वर्युः॥ ततो ब्रह्मा॥ ततोग्नीदिति। अस्मिन्पक्षे उभयतस्तु यजमानः॥ तु पुनः अस्मिन् उभयतः प्रथम उत्तमश्च यजमानो भक्षयति॥ प्रथमो यजमानो भक्षयति अथो अप्युत्तम इति वचनात्॥ तेनाग्नीधानंतरं पुनर्यजमानो भक्षयति॥ ततश्चोपहव प्रार्थने प्रथमं पश्चाच्च यजमानः सर्वैः प्रष्टव्यः यजमानोपह्वयस्व। होतरुपह्वयस्व। अध्वर्यउ०। ब्रह्मन्नु०। अग्नीदुप०। यजमानोपह्वयस्वेत्येवं॥ उपह्वव प्रार्थनं च द्रव्यभक्षणाय हस्ते गृहीत्वा कर्त्तव्यं ततो भक्षणं॥ एवं क्रमेणा सर्वैर्भक्षणं कर्त्तव्यं। नतु सहव्युत्क्रमेण॥ ॥दाक्षायणं वा दक्षिणा॥ दाक्षायणं सुवर्णमुच्यते

तेनात्र हिरण्यं दक्षिणा। तच्चन्नातमानं॥ रक्तिकाशतपरिमितमित्यर्थः॥ हिरण्यपरिमाण॰ न्यत्रापीष्यत्यमेधे सत्रेणात्॥ अन्वाहार्यो वेति विकल्पः॥ ॥संवत्सरं वा यजेत॥ यावज्जीवं वा पंचदश वर्षाणि वा यजेतेति प्रोक्तं॥ अधुना पक्षांतरमभिधीयते॥ अथवा दाक्षायणयज्ञेन संवत्सरं यजेत॥ संवत्सरमिति कालाध्वनोरत्यंतसंयोगे इति द्वितीया॥ साकल्येन संयोगश्चात्यंतसंयोग इत्युच्यते। तेन सकलं संवत्सरं दाक्षायणयागेन व्याप्नुयादित्यर्थः॥ अत्र संवत्सरः सावनः परिगृह्यते न चांद्रादिः॥ यतोत्रापि पक्षे सैव यागसंपत्क र्त्तव्या॥ पंचदशाभिर्वर्षैर्यावत्य इष्टयो भवंति तावत्य एव संवत्सरे यागपक्षेपि संपादनीयाः॥ तावत्यश्च सावन एव संवत्सरे संपद्यते नान्यस्मिन्निति॥ तत्रैवं॥ प्रथममपो णमास्यां श्राद्धान्वारंभणीयापूर्वक अग्नीषोमीययागः॥ पुनरुद्धृत्य सान्नाय्यवदुपक्रमः॥ प्रतिपद्याग्नेयेन पुरोडाशैनैंद्रेण दध्ना पयसा च यागः॥ पक्षे वैमृधः॥ मांसमैथुनवर्जनसंकल्पः॥ पुनरुद्धृत्य तस्मिन्प्रतिपद्दिन एवैंद्राग्नयागः॥ पुनरुद्धृत्य मैत्रावरुण्याः पयस्याया उपक्रमः॥ प्रातर्द्वितीयायामाग्नेयेन मैत्रावरुण्या च यागः॥ यथोक्तः॥ पक्षे आदित्यश्चरुः तदानीमेव पुनरुद्धृत्याग्नीषोमीययागः। ततः पुनरुद्धरणादि दधियागक्रमः। प्रातस्तृतीयायामाग्नेयसान्नाय्ययागः। पक्षे वैमृधः॥ तदानीमेवोद्धृत्यैंद्राग्नयागः॥ पुनरुद्धृत्य मैत्रावरुण्या उपक्रमः॥ तदनंतरमादित्यो वा। इत्येवं प्रकारेण संवत्सरं यावत्प्रत्यहं कर्त्तव्यं॥ ॥माएं सरस्वति अन्त

॥२९॥
॥देवया॰४

मूत्रकृत्तवासाꣳसि वर्जयेत्॥ मांसभक्षणं न कुर्यात्॥ स्त्रियं न गच्छेत्॥ अनृतं न वदेत्॥ मूत्रकृतं रजक
धौतं वासः श्च न परिदधीत॥ मूत्रकृतमिति कारुधौतं॥ तत्कृतलवस्यत्वनिर्मितस्यापरिहार्यत्वात्॥ तद्
नत्वा देवकरणस्य॥ एतौ नियमौ पौर्णमास्यमावास्ययोः रात्रावेव वर्जयेत्॥ पौर्णमासीत आरभ्यामावास्या
पर्यंतोयं नियमविधिः॥ अहर्निशाꣳ समैथुनं वर्जयेदिष्येतत्तु कर्मणि वर्त्तमाने भवत्येव॥ अयं तु पूर्व
त्तरा नियमः॥ दर्शपूर्णमासप्रकरणे पवस्य एषउभयत्राच्युत आग्नेयोऽष्टाकपालः पुरोडाशो भवतीयु
पक्रम्य सैव कामस्य योगं विदधाति॥ यत्कामो ह वा एतेन यज्ञेन यजते सोऽस्मै कामः समृध्यत इति॥ इद
मेव काम्यत्र आग्नेयं प्रकृत्य सोपांशुत्वं विहितम् स्ति॥ स य दीष्टिं कुर्वीत सप्तदश सामिधेनीरनुब्रूया
दुपांशु देवतां यजति तद्वीष्टिरूपं मूर्धन्वत्यौ याज्यानुवाक्ये स्यातां वार्त्रघ्नावाज्यभागौ विराजौ स
याज्य इति॥ अस्य चोपांशुत्वं सूत्रकारेणात्र वक्तव्यं तत्प्रसंगेनान्यत्रापि यस्य यस्योपांशुत्वं भव
श्रु ति तस्य तस्योच्यते॥४॥ उपांशु काम्यदेवता॥ काम्यस्य कर्मणो या देवता उपांशु भवति॥ यस्यार्थवर्णो
वे काम्या इष्टयस्तस्मात्ता उपांशु कार्या इति शारवांतरात्॥ ननु चरणाशब्दैस्त्वे देवतान्यत्रेति प्रागुक्ता ॥भाष्यं॥
न्नेदु उपांशु काम्यमित्येतावदेव सूत्रं कर्त्तव्यं॥ न देवताग्रहणं॥ अंगप्रधानदेवतानां विशेषेणोपांशुत्वं मा ॥२९॥
भूत् प्रधानदेवताया एव यथा स्यादिति पुनर्देवताग्रहणं॥ ॥आग्रयणो वैश्वदेवः॥ स्वरः स उपांशु भवति॥
आग्रयणे वैश्वदेव॰

आग्रयण इति विशेषोपादानादन्यत्र श्राव्य एव॥ ॥एककपालश्चावारुणाः॥ वारुणवर्जिता अन्ये सर्वे एककपालाः
पुरोडाशा द्यावापृथिवीयादयः उपांशु भवंति॥ ॥प्राजापत्यः॥ सर्वत्र प्राजापत्यः पशुश्चरुः पुरोडाशो वा उपांशु भवति॥
तस्माद्यत्किंच प्राजापत्यं यज्ञे क्रियते उपांश्वेव तत्क्रियत इति श्रुतेः॥ ॥सावित्रश्चातुर्मास्येषु॥ चातुर्मास्येषु यः सा
वित्रो द्वादशकपालोऽष्टाकपालो वेति विहितः सावित्रः स उपांशु भवति॥ चातुर्मास्येष्विति करणत्वादन्यस्य सावित्रस्य नोपां
शुता॥ ॥वैश्वदेवी॥ चातुर्मास्येषु या वैश्वदेवपर्वणि वैश्वदेवी पयस्या सोपांशु भवति॥ वैश्वदेवीति स्त्रीलिंगनिर्दे
शाच्चातुर्मास्येषूपांशुकेषु वैश्वदेवः पशुस्तत्पुरोडाशश्च तद्देवताश्च नोपांशु भवति॥ ॥वायव्यं॥ शुनासीरीये वायव्यं वा
युदेवत्यं हविरुपांशु भवति॥ पयो यवागूर्वा॥ अत्रापि चातुर्मास्येष्वित्यनुवर्तते॥ तेन प्राजापत्यवायव्यमित्यादौ नोपां
शुत्वं॥ ननु वायव्यमिति नपुंसकनिर्देशात्पयः पक्ष एवोपांशुत्वं भविष्यति॥ न यवागूपक्षे॥ नैवं॥ तेषां वैश्वदेव चतुर्णां
द्वयोस्त्रीणि त्रीणि हवीꣳष्यतिरिक्तानि भवंति द्वेद्वे द्वयोरिति हविः संबंधेनैवोपांशुत्वविधानात्॥ तेन वायव्यं हवि
रित्येव व्याख्येयं॥ अतो यवागूपक्षेऽप्युपांशुत्वं भवत्येव॥ एवं वैश्वदेवे त्रीणि हवीꣳष्युपांशु भवंति॥ सावित्रो वैश्वदेवी द्यावा
पृथिवीयश्चेति॥ वरुणप्रघासेषु द्वे सावित्रः कायश्च॥ साकमेधेषु महाहविषि द्वे सावित्रो वैश्वकर्मणश्च॥ शुनासीरी
ये त्रीणि सावित्रो वायव्यः सौर्यश्चेति॥ ॥तनूहवीꣳषि॥ स यदग्नये पवमानाय निर्वपतीत्यादीनि त्रीणि हवीꣳषि उ
स एतास्तिस्रस्तनूरित्युक्तत्वात्॥ अग्नये पवमानाय प्रथमं॥ अग्नये पावकायाग्नये शुचय इति द्वितीय॥ आदित्ये तृतीये

॥३०॥
॥देवया०४

२

तानित्रीणितनुहवींषुपांशु भवंति॥ तनचोवाएताअग्न्याधेयस्ययदिष्टयस्तस्मात्ता उपांशुकर्तव्याइतिश्रुतेः॥
अत्रेष्टिग्रहणात्सोमा नामिष्टीनामुपांशुत्वं केचिदाहुः॥ तन्नयुज्यते॥ तनूहवींषीति निर्देशात्॥ देवसूदेविका ह
वींषीतिवत्॥ तनवोवाएताअग्न्याधेयस्ययदिष्टयइतीष्टिग्रहणात्सर्वेषांपांशुतेतिचेत्॥ न॥ यद्यथर्वणेव
काम्याइष्टयइत्यत्रापिसमानत्वात्॥ अत्रापिसूत्रकारेणनिःसंदिग्धंदेवतायाएवोपांशुत्वमुक्तं॥ उपांशुकाम्य
देवतेति॥ तथास्त्वमानवे॥ अग्न्याधेचिक्यइष्टयः सद्यः सका लीः॥ सर्वाउपांशुदेवताइति॥ काठकेच॥ अग्न
येपवमानायप्रथमं॥ अग्नयेपावकायाग्नयेशुचयेद्वितीयांउभेउपांशुदेवतेइति॥ शांखायनेपि॥ सर्वास्तू
पांशुहविषेत्युक्तं॥ नतुसर्वाउपांशुभवंती॥ अतस्तनुहवींष्यपिदेवतैवोपांशु॥ नसकलाइष्टयइति॥ ॥दीक्षणी
याप्रायणीयातिथ्यादेवताः॥ दीक्षणीयादीनांदेवताउपांशुभवंति॥ उपांशुश्चरतिप्रागग्नीषोमीयादिसस्मि
न्पक्षेदीक्षणीयादीनांसकलानांमिष्टीनांसदेवताकानामुपांशुत्वंसिद्धमेव॥ यदातुवागतेनवादीक्षणीयान्नी
चैस्तरानीचैस्तरामित्तेरइतिपक्षस्तदादीक्षणीयादिदेवतानामुपांशुत्वविधानार्थमिदंसूत्रं॥ देवसूदेवि
काहवींषिच॥ वक्ष्यति॥ अग्नीषोमीयस्यपशुपुरोडाशमनुदेवसूहवींषिनिर्वपतीति॥ पशुपुरोडाशमन्वन्वेध्य ॥३०॥
देविकाहवींषिनिर्वपतीतिच॥ इमानिदेवसूहवींषिदेविकाहवींषिचउपांशुचभवंति॥ [illegible] ॥सौम्य॥

पा

७

४

उभयत्रोपांशुत्वेतानिष्टिहीतिश्रुतत्वात्॥ ॥वायव्योग्नौ॥ अग्नेश्चयनेवायव्येवानियुत्वतेश्वेतलक्षुदीति
अयंवायव्यः पशुरुपांशुभवति॥ ॥मैत्रावरुणीच॥ अग्नावेव॥ अंतेपयस्यामैत्रावरुणीतूपरमिथुनदक्षिणो
दक्सानीयांतइतियामैत्रावरुणीसोपांशुभवति॥ अमैत्रावरुण्यापयस्ययायजतइत्युपक्रम्योपांशुभवत्युपां
शुहिरेतःसिच्यतइतिश्रुतत्वात्॥ ऐंद्रः सौत्रामण्यांप्रथमः॥ सौत्रामण्यांप्रथमऐंद्रः पशुरुपांशुभवति॥ त्रिपशु
मध्येवर्तमानस्यैंद्रस्यपरिइसस्यव्यावृत्त्यर्थंप्रथमइत्युक्तं॥ ॥वायोधसश्च॥ सौत्रामण्यामेवतदंतेपशुरिंद्राय
वयोधसइतिवायोधसः पशुरुपांशुभवति॥ लोकोवयोधास्तस्मात्सोनिरुक्तइतिश्रुतेः॥ ॥आग्नेयंप्रतिकाममा
हरेत॥ आग्नेयमष्टाकपालंपुरोडाशंप्रतिकाममाहरेत्कुर्यात्॥ कामंकामंप्रतिकामं॥ यत्किंचित्कामयतेतस्यसर्वस्य
साधकोयमित्यर्थः॥ इममेवप्रकृत्यश्रूयतेपद्यते॥ यत्कामोहवाएतेनयज्ञेनयजतेसोस्मैकामः समृध्यतइति॥
वर्षार्थंविशेषतोवाब्रूयाद्वृष्टिकामोस्मीति॥ आग्नेयंप्रतिकाममाहरेत्युक्तं॥ तेनवृष्टिकामस्याग्नेयः प्राप्नोति॥ तत्रवि
शेषउच्यते॥ वर्षार्थंवृष्ट्यर्थंआग्नेयेक्रियमाणेयजमानउद्धरणकालेऋत्विजः प्रतिएवंब्रूयात्वृष्टिकामोस्मीति॥
अथवाप्रकृतोप्राकृतदन्यपूर्णमासेष्टावेवंब्रूयात्॥ तेनैवंसिद्धं॥ वृष्टिकामः प्रथमाग्नेयीमि[illegible]ष्टिंकुर्यात्॥ प्रकृ
तावेववावृष्टिकामोस्मीसादिकअधिकंकुर्यादित्याग्नेय्याः प्रकृतथ्वाविकल्पः॥ ॥अध्वर्युर्ब्रूयात्पुरोवातंचविद्यु
तंचमनसाध्यायेति॥ प्राक्प्रयाजेभ्योध्वर्युंप्रतियजमानोब्रूयात्पुरोवातंचविद्युतंचमनसाध्यायेत्येवं॥ ॥अन्नाद्यं

॥२१॥
॥देवया०४

ग्नीधं॥ अत्राणि मनसाध्यायेदग्नीधं प्रतियजमानो ब्रूयात्॥ स्तनयित्नुं च वर्षं चेति होतारं॥ स्तनयित्नुं च वर्षं च मनसा ध्यायेति होतारं प्रति यजमानो ब्रूयात्॥ ॥सर्वाण्येतानीति ब्रह्माणं॥ यजमान एव ब्रह्माणं प्रति सर्वाण्येतानि मनसा ध्यायेति ब्रूयात्॥ एतानीति चैतच्छब्दप्रयुक्तपुरोवातं चेत्यादि पर॥ नैतानीत्येवंविधशब्दपरं तेन पुरोवातं च विद्युतं चाभ्राणि स्तनयित्नुं च वर्षं च मनसा ध्यायेत्येवं ब्रह्माणं प्रति ब्रूयादिति केचित्॥ यथाश्रुतमेवेत्यपरे॥ सर्वाण्येतानि मनसा ध्यायेति ब्रह्माणमित्येवंविधस्यैव श्रुतत्वात्॥ स यदि वृष्टिकामः स्यादेतयैवायजेतेति प्रक्रम्य सर्वमेतद्ब्रूयात्॥ दर्शपूर्णमासयोराग्नेयाश्च सर्वकामार्थत्वाद्वृष्टिकामनायामयं विशेषोऽनयोरुक्तः॥ ॥अन्वारंभणीयाग्नावैष्णव एकादशकपालः सरस्वत्यै चरुः सरस्वते द्वादशकपालो दर्शपूर्णमासारंभे॥ दर्शपूर्णमासारंभे प्रथमप्रयोगे अन्वारंभणीयाख्येष्टिर्भवति॥ उद्धरणादिकर्मापवर्गांतं॥ अत्र त्रीणि हवींष्युपदिशति आग्नावैष्णवः अग्नाविष्णुदेवतएकादशकपालः पुरोडाशः प्रथमं हविर्भवति॥ सरस्वत्यै चरुः द्वितीयं हविर्भवति सरस्वते द्वादशकपालस्तृतीयं हविर्भवति॥ चरुशब्देनानवस्रावितं तरोष्मपक्वविषद्रव्यः(?) व्रीहितंडुलसिद्ध ओदन उच्यते॥ ओदनो हि चरुरिति श्रुतेः॥ स्थाली तु तत्संबंधात् लक्ष्यते॥ लेपश्चरुरश्यादो॥ तत्र चैते प्राकृताः पदार्था निर्भवंति॥ पेषणं पवनं वापस्तापश्चोपहितिस्तथा॥ मार्जनाभ्यूहनज्वालितथाप्युद्वृत्यसादनमिति॥ अस्यार्थः॥ पेषणं चूर्णनं॥ पवनं पिष्टस्योदकमिश्रणं॥

॥२१॥
॥भाष्य॥

लो०२

वाप उदकमिश्रणाय पात्र्यां प्रक्षेपः॥ तापः लाना मंगारैः प्रतापनं॥ उपहितिरंगारेषु कपालस्थापनं॥ अथ कपाले धृतस्थापितस्य पुरोडाशस्य हस्तसंघटनेन सर्वेषु कपालेषु प्रसारणं॥ मार्जनं स्लक्ष्णीकरणं॥ अभ्यूहनं भस्मनांगारैश्चोपर्याच्छादनं॥ ज्वालादर्भैरवज्वालनं॥ उद्वृत्यसादनं कपालेभ्यः पृथक् पुरोडाशावत्पात्र्यामासादनं॥ चरुलक्षणं छंदोगपरिशिष्टे॥ स्वशारवोक्तश्च सुस्विन्नोह्यदग्धा कठिनः शुभः॥ न चातिशिथिलः पाच्यो न चवरश्चारसस्तथेति॥ स्थालीलक्षणमपि तत्रैवोक्तं॥ तिर्यगूर्ध्वसमिन्मात्रा दृढा नातिबृहन्मुखी॥ मृन्मय्योदुंबरी वापि चरुस्थाली प्रशस्यते॥ तथा मेक्षणेन चरोरवदानं कार्यं॥ लक्षणमपि तत्रैवोक्तं॥ इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्॥ वृत्तं चांगुष्ठपृथ्वग्रमवदानक्रियाक्षममिति॥ इयं चाधानंतरं प्रथमपौर्णमास्यां भवति॥ तदाति प्रवधृतश्चाग्निषु अन्वारंभणीया पौर्णमासेष्टिः कार्या॥ अन्यथा पृथक् न धृता॥ आरंभ इत्युक्तत्वात्प्रथमप्रयोग एवान्वारंभणीया॥ दर्शपौर्णमासावारंभमाणोन्वारंभणीयायजेतेत्याश्वलायनसूत्रात्॥ इयं च दर्शपूर्णमासविकारेषु सर्वेष्वपि प्रथमारंभे भवति॥ तत्र नित्यानामारंभे सकृत्॥ काम्यानां चारंभे पुनः पुनः॥ सौत्रामणीवर्ज्यं॥ तथा चोक्तं॥ नित्यानां सकृदारंभे काम्यानां च पुनः पुनः॥ सोमसौत्रामणीवर्जमन्वारंभणीयाशास्यत इति॥ अत्र मानवसूत्रे विशेषः॥ मेक्षणेन चरूणां स्विष्टकृते समवद्यति इडायै च मिथुनो गौर्दक्षिणेति सूत्रवाचकमेक्षणमन्वाहार्यस्यत इति॥ ॥पष्ठौही दक्षिणा मिथुनौ वा॥ अस्यामन्वारंभणीयायां पौर्णमास्यां चाग्न्याधानंतरं दर्शारंभ एव स दोषो भवति॥ दादशाहमाद्यग्निधारणमध्ये चेत्पौर्णमा७

पृ४

ष्ठोही गौर्दक्षिणा। मिथुनौ मिथुनौ गावौ स्त्रीपुरुषरूपौ वा दक्षिणा॥ पष्ठोही बालगर्भिणीत्यमरः॥ बाले च
या गर्भिणी सा पष्ठोहीत्युच्यते॥ अथवा मिथुनौ मिथुनौ गौ स्त्री गवी पुंगवीश्च दक्षिणा॥ ननु मिथुनशब्द न
स्त्रीयुग्ममुच्यते॥ द्विवचनं तु द्व स्त्रीपुंयुग्मे कुतो न भवतः॥ उच्यते। मिथुनौ ते गावौ तिस्रस्तेन्यारस्त्रनिष्क्रिते॥
एकस्य च स्त्रीपुंयुग्मस्य दर्शनात्॥ अत्रापि तथा दर्शनात्॥ इंद्राय विमृध एकादशकपालः पौर्णमासमनु॥
पौर्णमासमनु पौर्णमासेष्टिसमाप्त्यनंतरं तदानीमेव इंद्राय विमृधे एकादशकपालः पुरोडाशो भवति॥
उद्धरणादिकमपि वर्गंति॥ आदिविल्पः॥ किं द्वशो विमृधः॥ आदि विकल्पः॥ आद्यावारंभ एव विकल्पो॥ य
स्य सत्त्वथा आरभ्यते न वेति। यद्यारभ्यते तदा यावज्जीवं क्रियत एव॥ नारभ्यते चेत्कदापि न क्रियतेति॥
तथा चोक्तं॥ रूपं कालोनुनिर्वापो देवता श्रपणं तथा॥ आहोये विधृताः पृष्टास्त इमे सर्वदस्मृता इति॥ इम
पंचैवादि विकल्पाः॥ अन्ये सर्वे यद्वा विकल्पः॥ रूपं दर्शपूर्णमासदाक्षायणादि॥ काल उदितानुदिता दिः॥
अनुनिर्वापः वैमृध आदित्यश्च। श्रपणं गार्हपत्य आहवनीये वेति॥ देवता इंद्रो महेंद्रो वेति॥ एतेषां मध्ये य
स्यादौ स्वीकारः कृतः स एव सर्वदा भवति॥ न पक्षांतरं॥ ॥ आदित्यश्चरुरामावास्यं॥ आमावास्यमनु
आमावास्येष्टिसमाप्त्यनंतरं तदानीमेव पृथग्युधस्य आदित्यश्चरुः कर्मापि वर्गांतो भवति॥ अन्वाहार्यो द ॥३२॥
माएव॥ अयमप्यादिविकल्प एव॥ पूर्वं निर्वपतीति विधाय तस्मान्नानुनिर्वपेदित्यभयाविहितत्वात्तीति भाष्यं॥

द्वत्वात्॥ दाक्षायणयज्ञस्यापि दर्शपूर्णमासत्वात्तत्संबंधेपि वैमृधादित्यो विकल्पेन भवत एव॥ अथाग्रयणं
सूत्रयति॥ ५॥ आग्रयणमैंद्राग्नमग्रपाकस्य व्रीहीणां यवानां च॥ आग्रयणाख्यमेतदाग्रयणं पौर्णमास्याममा
वास्यायां वा भवति। शुक्लपक्षे वा पुण्ये नक्षत्रे वक्ष्यं च ब्राह्मणे श्रवणात्॥ यदि पूर्वाह्णिकपर्वतिस्तत्तदा सद्यस्कालापौ
र्णमासेष्टिपूर्वमाग्रयणेष्टिः॥ ततः पौर्णमासेष्टिः॥ अमावास्यायां त्वनंतरं चाग्रयणेष्टिः॥ तदान्वेव वचनादमावास्येष्टिरमाव
स्यामध्येपवसमापनीयात्तदुक्तं॥ अथोपूर्वाह्णिकपर्वक्षिये दर्शेष्ट्याः परमुक्तमाग्रयपाकं। प्राक्पौर्णमासाच्चेत दिति॥
॥ अथोपूर्वाह्णिकपर्वक्षियेचान्यारेष्टिपश्चाद्या विकृतयः उभयत्र प्रकृतेष्टेरनंतरमेव भवतीमिति वक्ष्यमाणस्य कर्म
णः संज्ञा सव्यवहारार्था॥ गौराग्रयणपाइत्यादौ॥ व्रीहीणां यवानां चाग्रपाकस्याग्रयणसंज्ञं कर्म भवति॥ तत्र च
प्रथमं हविरैंद्राग्नं। ऐंद्राग्नएकादशकपालः पुरोडाशो भवति॥ ताविंद्राग्नी उदयजतां तस्मादैंद्राग्न्याद्वाद
कपालः पुरोडाशो भवतीति श्रुतेः॥ शरदि व्रीह्याग्रयणं॥ वसंते च यवाग्रयणमिति केचित्॥ केचिदग्रपा
स्पेत्यनुरोधात्प्रथमपक्वव्रीहियवादिसंपत्तिकाल एव कुर्वंति॥ तथा चोक्तं शांखायनब्राह्मणे॥ अथ व्रीस
वायवसस्ये चागते इति। तथा वर्षास्वागते श्यामाकसस्ये पक्वे पुवेषु यवेष्विति च। तथा च तान सूत्रे॥ पक्वा नो
षधीष्वाग्रयणेष्टिरिति। अतउभयोक्तं कात्यायनेन॥ शरद्वसंतयोः केचिन्नवयसप्रचक्षते॥ धान्यपाके
न्ये श्यामाको वनिनः स्मृत इति॥ ननु व्रीहीन्यवान्वाह विषीति प्रागुक्तत्वादग्रपाकस्यसकृत्केपि व्रीहीणां यवा

॥३३॥
॥देवया०५

नामगरूपाकस्येति सिध्यति॥ किमर्थं व्रीहीणां यवानामिति ग्रहणं॥ उच्यते॥ वैश्वदेवश्चरुरिति वक्ष्यति सोपि यव
मयो यथा स्यादिति यवानामित्युक्तं॥ अन्यथा ओदनशब्दस्य व्रीहितंडुलसिद्धान्ने रूढत्वात्॥ ओदनो हि
रिति श्रुतेश्चरोरोदनत्वाच्च आग्रयणेपि चरुर्व्रीहितंडुलमय एव स्यात्॥ अत एव पत्नास्यत्रक्वचना भ
हिमय एव चरुर्भवतीति गम्यते॥ तेनात्र यवानामिति युक्तमुक्तं एतावसेवोक्ते तेषामेवाग्रयणेपि मिति निय
मा भूदिति व्रीहीणामित्युक्तं॥ ॥वैश्वदेवश्चरुः॥ द्वितीयं हविर्वैश्वदेवश्चरुर्भवति॥ अस्य चोपांशुत्वमुक्तं॥
वैश्वदेवमिति॥ ॥पयसि वा॥ वैश्वदेवश्चरुः पयसि दुग्धे वा श्रप्यते॥ वा उदके॥ तत्र पयः पक्षे दुग्धोपसर्जनी
नपते मंत्रं ऊहनीयः॥ संपय ओषधीभिः समोषधयो रसेन॥ सं रेवतीर्जगतीभिः पृच्यतां सं मधुमतीर्म
धुमतीभिः पृच्यतामिति॥ द्यावापृथिवीय एककपालः॥ तृतीयं हविर्द्यावापृथिवीय एककपालः पुरोडाशो
भवति॥ अस्य चोपांशुत्वमुक्तं एककपालोऽश्वावारुणाश इति॥ उद्वास्यांताश्छादयेदाज्येन॥ द्यावापृथिवीयमुद्वास्य
प्राणदानानंतरं अस्य द्यावापृथिवीयस्यांतान् आज्येन लौकिकवद्घृतेनाच्छादयेत्॥ प्राकृतं च विकृताविति अनेन
प्रथमं प्राणदाने ततोंताच्छादनमिति॥ अवद्यन् द्यावापृथिवीयस्य सर्वस्यावदानं॥ उपरिष्टाद्द्विरभिघारणं॥ च
तुरवत्तत्वसंपादनाय॥ पंचावत्तत्वसंपादनाय तु उपस्तारोपि द्विः कर्त्तव्यः॥ छंदोगग्रहे तथा दर्शनात्॥ सर्व
होमः॥ तथा प्रयत्नेन होमः कर्त्तव्यो यथा न पर्यावर्त्तते॥ उत्तानो न भवति॥ ॥आपस्तंबः॥ यदि द्रुतः पर्यावर्त्तेत ॥३३॥

स्रुचो ग्रेणाकल्पयेन्न पाणिना॥ आदायाभिघार्य पुनर्होतव्यः इत्येके॥ मानवे॥ एककपालमन्यस्यां पात्र्यामलंकुर्वन्न
भिपूरयति॥ प्रचरणवेलायां बर्हिषि सादयित्वोपस्तीर्यैककपालं सकृत्सर्वमवद्यताशयस्याज्यं वासिच्य द्विरभिघार्ये
पांशु कपालेन प्रच्यवयन् वषट्कृते मध्ये पाणिना जुहोत्यृजु प्रतिष्ठितमाशावेनाभिजुहोतीति॥ अस्य वैश्वदेविकद्याव
पृथिवीय प्रकृतित्वं जैमिनिनोक्तं॥ एककपालानां वैश्वदेविकः प्रकृतिराग्रयणेषु सर्वहोमपरिवृत्तिदर्शनादिति॥ पक्षां
तरमाह॥ ॥आज्यस्य वा यजेत्॥ अथवा द्यावापृथिवीयमाज्यस्य यजेत्॥ आज्यमेव ध्रुवायाश्चतुरवत्तमेव दाय
रेयाग संबंधेनैवोपांशुत्वस्य दर्शनात्॥ वैश्वदेवद्यावापृथिवीयेचोपांश्विति॥ ॥पुराणानां वा चरुः अथवा वैश्वदे
श्चरुः पुराणानां जीर्णानामेव यवानां व्रीहीणां च कर्त्तव्यः॥ वा नवानामिति तुल्यो विकल्पः॥ ऐंद्राग्नद्यावापृथि
वीयपुरोडाशो नवानामेव॥ चरुग्रहणात्॥ ॥प्रथमजो गौर्दक्षिणा॥ अस्मिन् व्रीहियवाग्रयणे प्रथमजो गौर्दक्षिणा॥ ते
स्मिन्वर्षे जायमानानां वत्सानां यजमानस्य गोष्ठे यः प्रथमो जातो वत्सः स दक्षिणा॥ ये प्राचीनमेकाष्टकायां वत्सा
जायंते तेषां प्रथमं ददातीत्यापस्तंबः॥ तत्स प्रथमजो दक्षिणेति शांखायनः॥ इदं चाग्रयणमेकमेव शरद्वसंतयो
र्न्यस्यते॥ दैवतैकत्वात् दर्शपूर्णमासवत्॥ न च व्रीहियवरूपसाधनद्रव्यभेदात् भिन्नकर्मत्वं दर्शपूर्णमासवद्
था व्रीहियवरूपसाधनद्रव्यभेदेपि दर्शपूर्णमासयोर्न भिन्नकर्मता एवमाग्रयणयोरपीति॥ तेन द्वयोरेकैवान्वार

॥३४॥
॥देवया०४

णीया भवति॥ अधिकारमुपजीवन्नाह॥ वैश्वदेवस्य च॥ वैश्वदेवमिति चातुर्मास्यानां प्रथमं पर्व॥ एतद्वैश्वदेवमित्युच्या-
ते॥ अत्र वैश्वदेवपर्वणि चकारात्प्रथमजो वत्सो दक्षिणा॥ तत्रापि हविर्यज्ञो हि तस्य प्रथमजो गोदक्षिणेति श्रुतेः॥
दर्शपूर्णमासानीजानो दक्षिणाग्निपक्वं चातुष्प्राश्यं ब्राह्मणान्भोजयेत्किंचिद्दद्यात्॥ सूतकशुक्रास्तादिनि-
वशाद्दर्शपूर्णमासारंभोत्कर्षे सति आग्रयणकाले आगते तदतिक्रमणशंकायामयं प्रकारः॥ दर्शपूर्णमासान-
नः निमित्तवशाद्दर्शपूर्णमासाभ्यामनिष्ट्वा यजमानो नवमान्नं व्रीहियवरूपं दक्षिणाग्निपक्वं दक्षिणाग्नौ पक्वा॥
प्रमाणमन्नं चातुष्प्राश्यं चतुर्णां तृप्तिपर्याप्तं तं च चतुरो ब्राह्मणान्भोजयेत्॥ तेभ्यो भुक्तवद्भ्यः किंचिद्यथाशक्ति दक्षि-
णां दद्यात्॥ अत्र ब्राह्मणाशनेनैवाग्रयणं सिध्यतीत्यभिप्रायः॥ तद्यथा॥ वषट्कृतं हुतमेवमस्यैतद्भवतीति श्रुतेः॥
यद्यु अनीजानः स्याच्चातुष्प्राश्यमेवैतमोदनमन्वाहार्यपचने पचेयुः तं ब्राह्मणा अश्नीयुरिति॥ तत्रो यद्यक्रुया-
त्तद्दद्यान्नादक्षिणं हविः स्यादित्याहुरिति च श्रवणात्॥ एतच्चैत्र्यां दर्शपूर्णमासारंभाभावे ज्ञेयं॥ चैत्र्यामारंभे तते
दर्शेष्ट्यनंतरं वैशाख्यां आग्रयणस्य कर्तुं शक्यत्वात्॥ वैशाख्यां दर्शपूर्णमासारंभे च तदनंतरं ज्येष्ठे वसंताभावादा-
ग्रयणकालातिक्रमः स्यादित्ययं प्रकारोऽनुष्ठेयः॥ अस्याग्रयणत्वात्पौर्णमास्याममावास्यायां वानुष्ठानमिति॥ य-
इष्ट्याग्रयणेन आग्रयणग्रहणस्यैकमर्थत्वात्॥ इष्टरूपस्याग्रयणस्य यदिष्ट्यासनेनैव कालस्य सिद्धत्वात्॥
अग्निहोत्रायणिनो नवैः सायंप्रातरग्निहोत्रहोमः॥ पूर्वेद्युरुक्त अग्निहोत्रमेव वा जुहुयादिति॥ त्रिंशतो वर्षेभ्यः

॥३६॥
॥भाष्यं॥

११

ऊर्ध्वं दर्शपूर्णमासोत्सर्गे त्वेतेऽत्राग्रयणस्य प्रकारमाह॥ अग्निहोत्रायणिनः यजमानस्याग्निहोत्रमेवायनं॥ नान्यानि कर्मा-
णि॥ सोऽग्निहोत्रायणी॥ अग्निहोत्रमेवेत्येवकारस्येतरव्यावृत्त्यर्थत्वात्॥ अस्याग्निहोत्रायणिनो यजमानस्य नवैः व्री-
हियवान्नैः सायंप्रातरग्निहोत्रहोमो भवति॥ आग्रयणकाले केचिदन्यथेदं सूत्रं व्याचष्टे॥ अग्निहोत्रेणैवाग्निहोत्रेणैवा-
ग्निहोत्रहोमेनैव आग्रयणप्राप्तिः आग्रयणसिद्धिरिष्यते इति सोऽग्निहोत्रायणी तस्यैवं कर्तव्यं॥ अतुलस्पष्टदर्शपूर्ण-
मासस्यापि एतदपि युक्तं॥ शाखांतरे सामान्येनैवोक्तत्वात्॥ ॥तदाशितायावा पयसा॥ तन्नवमाचितां तस्यानवान्ना-
स्वादितायागोः पयसा वा सायंप्रातरग्निहोत्रहोमः॥ दीक्षितव्रतं च॥ संवत्सरदीक्षादौ यज्ञे प्रारब्धे आग्रयणकालाति-
क्रमणशंकायां नवान्नेन दीक्षितव्रतं कर्तव्यं॥ तेनैवाग्रयणसिद्धिः॥ एतदप्याग्रयणकाल एव॥ ॥उपसत्सु रौहिणौ
कुर्वीत॥ संवत्सरोपसत्कादौ यज्ञे उपसत्सु आग्रयणकाले प्रवर्ग्येण नवान्नेन रौहिणौ पुरोडाशौ कर्तव्यौ॥ ताभ्यामेवाग्रयण-
सिद्धिः॥ एतदप्याग्रयणकाल एव॥ ॥सुत्यासु सवनीयान्॥ संवत्सरसुत्यादौ आग्रयणकाले नवान्नेन सवनीयपुरो-
डाशान्कुर्वीत॥ सोम्यः श्यामाकचरुः॥ एतच्च वर्षासु शरदि वा भवति शारवातरात्॥ श्यामाकाग्रपाकस्य तदानीं-
वभावाच्च॥ तदाहापस्तंबः॥ वर्षासु श्यामाकैर्यजेतेति॥ मानवे विशेषः॥ शरदि सोमाय श्यामाकानामिति॥ शांखायन आ-
ल्पोञ्च॥ अथात आग्रयणस्याग्रयणेनान्नाद्यकामो यजेत वर्षास्वागते श्यामाकसस्ये श्यामाकानुद्धृत्य वा आहि-
आपस्तंबसूत्रे चायं समानं तत्र उक्तोऽस्ति॥ नानिष्ट्वाग्रयणेनाहिताग्निर्नवस्याश्नीयाद्व्रीहीणां यवानां श्यामाकानां-
मित्यग्रपाकस्य यजेत॥ मावास्यायां पौर्णमास्यां वामावास्यं तत्र समस्तदर्शपूर्णमासौ मिथो न्यौ॥ निर्वपणकाले आग्नेयमनु
आरण्यस्य धान्यस्याग्रयणं सोम्यः सोमदेवताकः श्यामाकचरुर्भवति॥

तदाशिता

॥३५॥
॥देवया०४

कपालमितिज्ञायतेनवानामितराण्यैंद्राग्नंद्वादशकपालमग्नेंद्रंवावैश्वदेवंपयसिचरुंसौम्यंश्यामाकंचरुंद्यावापृथिव्य
मेककपालंपुरस्ताद्द्यावापृथिव्यमेकेसमामनंतीति॥ भिन्नंतंत्रोपिविकल्पेनतेनचोक्तः॥ यदिनानातंत्रेश्यामाकेष्टिं
कुर्वीतेति॥ वैणवोग्नीषोमे॥ ग्नीषोमेऋतौ वैणवोवेणुमयः सौम्यचरुर्भवति॥ सौम्यश्चरुरित्यनुवर्तते॥ शांखायन
ब्राह्मणेतुविशेषः॥ अथवसंतःआगतेपक्वेषुवेणुयवेषुवेणुयवानुद्धृत्यवाआहितिप्रकृत्यतस्याएतादेवपर्वेतंत
त्रामेवेतद्ब्राह्मणमिति॥ आपस्तंबः॥ वेणुयवानामिष्टिमेकेसमामनंति॥ वेणुयवेषुपक्वेषुवेणुयवानुद्धृत्यवाइति
संप्रैष्यति॥ तस्याएतदेवतंत्रमेषादेवताआग्नेयीमैत्रावरुणीप्राजापत्यावेति॥ एतत्तंत्रमेषादेवतेति॥ श्यामाके
यदुक्तंतस्यातिदेशोयंश्यामाकवैणवाग्रयणयोर्दक्षिणामाह॥ ॥ पुनःसंस्कृतोरथोदक्षिणाक्षौमंमधुपर्कोवृष
धृतंवावासः॥ वाशब्दःप्रत्येकंयोज्यः॥ योरथोभग्नःसपुनःसज्जीकृतःसपुनःसंस्कृतः॥ एवंविधोरथोदक्षिणा।
अथवाक्षौमंदक्षिणा। क्षुमाअतसीतत्तंतुनिर्मितंक्षौमं॥ अथवामधुपर्कोदक्षिणा॥ मधुपर्कशब्देन
दधिमधुघृतान्युच्यंते। अथवावृषधृतंवासोदक्षिणा॥ वृषाकृतोयजमानेनपरिहितंतद्वृषधृतं॥ शाखांतरा
त्तुआग्रयणस्यपक्षांतराण्यपिसंति॥ तथाचबह्वृचब्राह्मणे॥ यद्येतस्यैग्लायात्पौर्णमासेवामावास्येवाहवि
ष्यनुवर्तयेद्देवतामपरिहाणायापिवायवाग्वेवसायंप्रातरग्निहोत्रंजुहुयान्नवानामुभयस्याप्यापिवास्था
लीपाकमेवगार्हपत्येश्रपयित्वानवानामेताभ्यआग्रयणदेवताभ्यआहवनीयेजुहुयात्स्विष्टकृच्चतुर्थीभ्योमु
भ्यःस्वाहामुभ्यःस्वाहेतिदेवतानामपरिहाणायापिवाग्निहोत्रीमेवनवानांखादयित्वातस्यैदुग्धेनसायंप्रातर

॥३५॥
॥आग्र॥

ग्निहोत्रंजुहुयात्उभयस्याप्याएतएतावंतःपाताःस्तोषांयेनकामयेततेनयजेतेति॥ तत्सूत्रेच॥ समानतंत्रोवादर्शपूर्णमा
साभ्यांदर्शपूर्णमासौवानवानामग्निहोत्रंवायवाग्वासायंप्रातरग्निहोत्रीवानवानांखादयित्वातस्यैदुग्धेनसायंप्रातर
ग्निहोत्रंजुहुयात्गार्हपत्येवास्थालीपाकंश्रपयित्वाश्रयणदेवताभ्यःस्विष्टकृच्चतुर्थीभ्यःआहवनीयेजुहुयादिति
आपस्तंबः॥ अपिवामावास्यांवाग्रयणेष्टिमन्वायातयेदपिवापौर्णमासीममावास्यांवानवैर्यजेत। अपिवाग्नि
होत्रीव्रीहिस्तंबंयवस्तंबंवाग्रासयित्वातस्याःपयसासायंप्रातर्जुहुयादपिवानवानांयवाग्वासायंप्रातर्जुहु
यादपिवानवानांस्थालीपाकंश्रपयित्वाहवनीयेजुहुयादाग्रयणदेवताभ्यःस्विष्टकृच्चतुर्थीभ्योपिवानवानां
चतुरःशरावमोदनंपक्त्वाचतुरोब्राह्मणान्भोजयेदेवंयवैर्यजेततत्राग्नेयपत्रश्यामाकोनभवतइति॥ तथाआग्रयणा

६ व्रीहि

नंतरंदर्शपूर्णमासायोर्द्रव्यनियमस्तेनेवहृतःव्रीहिभिरिष्ट्वाभिरिवयजेत॥ यवेभ्योदर्शपूर्णमासावेवंयवैर
व्रीहिभ्योपिवाव्रीहिभिरेवोनयत्रैतेहवैस्तूपचरतमाभवंतीति॥ बह्वृचब्राह्मणे॥ वर्षासुश्यामाकैर्यजेत
रद्व्रीहिभिर्वसंतमवैरिति॥ कालांतरमप्याग्रयणस्यबह्वृचब्राह्मणेश्रूयते॥ यद्धनक्षत्रमुपेत्सेत्पूर्वप
नक्षत्रमुदीक्षेयास्मिन्नक्षत्रेकामयेततस्मिन्यजेततस्यैसप्तदशसामिधेन्यःसंदंताबाज्यभागौविराजौसंयाज्ये
तस्योक्तंब्राह्मणंसौम्यश्चरुःसोमोवैराजौषधीनांतदेनंस्वयाविशाप्रीणातीति॥६॥ ॥अमावास्यायामग्न्याधि
अग्न्याधेयमितिवक्ष्यमाणस्यकर्मणःसंज्ञासंव्यवहारार्थी॥ कुरुक्षेत्रेपरेणाहिरच्छलेग्न्याधेयमित्यादौ॥ सा[illegible]

॥३६॥
॥देवया॰४

धेयमितिवक्ष्यमाणाग्न्यगारकरणादीष्टुंतस्यकर्मसमुदायस्यसंता॥मंथनमात्रस्थापनमात्रस्यैव॥तच्चाग्न्याधेय
ममावास्यायांभवति॥अत्रचाऽमावास्याशब्देनगौण्यावृत्याप्रतिपदुच्यते।कुतः।श्रुतौतथादर्शनात्॥सयोमावास्या
ग्नीआधत्तइतिप्रकृत्यसयदहरेवैषनपुरस्तान्नपश्चाद्दृश्येततदहरुपवसेत्तहिंह्येषइमंलोकंगच्छतीतिमुख्यामावास्या
यामुपवासंदर्शयिति॥अत्रोपवासशब्देनयमनियमयुक्तावस्थानमुच्यते॥यदहरस्यश्वोग्न्याधेयंस्यादिवेति ...
यात्॥अथजागर्तिजागर्तिदेवाइत्यादिकंतेनोपवसेत्॥यमनियमयुक्तोभवेदित्यर्थः॥तस्मान्मुख्यामावास्यायाम...
गारादिब्रह्मौदनांतमुपक्रम्यप्रतिपद्याधानंकार्यं॥नक्षत्राधानपक्षेतुपूर्वदिनेउपक्रमः॥नक्षत्रदिनेमंथनं॥श्वोग्नीनाधा
मा स्यमानउपवसेत्पूर्वांपौर्णमासीमुत्तरामावास्यायांनक्षत्रेचेतिआश्वलायनः॥आपस्तंबः॥पौर्णमास्यांतुपूर्वस्मिन्पर्वणि
सेष्टिमन्वारंभणीयेमपवृज्यश्वोभूतेपौर्णमासेनयजतइति॥काठके॥आधानंचेत्पौर्णमास्यांपूर्वांतदनुदेवता॥न्य
उपवसेदुत्तरामन्वारंभणीयायैपर्वणोचेति॥अतश्चपौर्णमास्याधानेचतुर्दश्यामुपवासादिउपक्रमः।पौर्णमास्याम
ग्न्युत्पत्तिरिष्टयश्च॥श्वोन्वारंभणीयापौर्णमासंचेति॥पूर्वदिनेवापौर्णमास्यामन्वारंभणीयेतिसिद्धं॥कठसूत्रे॥
पौर्णमास्यामादधानः।पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वाजुह्वदग्निहोत्रमुपतिष्ठमानोवसतिश्वोन्वारंभ
णीयापौर्णमासंचेति॥मानवे॥पौर्णमास्यामाधायसोपवासमप्यारंभणीयांकृत्वासद्यस्कालायाःपौर्णमास्याय
जेतेति॥ ॥कृत्तिकारोहिणीमृगशिरःफल्गुनीषु॥कृत्तिकासुरोहिण्यांमृगशिरसिफल्गुनीषुच॥एतेषुनक्षत्रे॥४॥
ष्वग्न्याधेयंभवति॥अयममावास्ययासहविकल्पः॥कृत्तिकास्वग्नीआदधीत।रोहिण्यामग्नीआदधीतेवमादिभिर्वा
नेतामावास्यायांनक्षत्रेवापौर्णमास्यामुपोष्यारंभणीयांकुर्वीतोत्तरामुपोष्यपौर्णमास्यायां

क्येः।स्वतंत्रेष्वेवनक्षत्रेष्वाधानविधानात्॥नन्वामावास्यायामेवैतेषुनक्षत्रेष्विति समुच्चयएवकथंनभवति॥नैवं॥उ
दितानुदितहोमवदमावास्याविधौनक्षत्राधाननिंद्यामावास्यासूक्तत्वात्पक्षांतरताप्रतीतेः॥तथाहि॥सयोमावास्या
मग्नीआधत्तेयथाविवृतायांद्वारिद्वारापुरंप्रपद्येतसततएवस्वर्गंलोकमियादेवंतदित्यमावास्यायामाधानंविधाय
नक्षत्राधाननिंद्यासंस्तौति॥अथयोनक्षत्रेआधत्तेयथापिहितायांद्वार्यद्वारापुरंप्रपित्सेत्सजिह्मःपुरःस्यादेवंतादृ
॥ ॥हस्तोलाभकामस्य॥लाभकामस्ययजमानस्यहस्तोनक्षत्रंआधानकालः॥यइच्छेत्प्रमेदीयेतिप्रकर्षार्थप्रशब्दप्रयो
गाल्लाभशब्देनप्रतिग्रहेणार्थप्राप्तिरुच्यते।तेनायंब्राह्मणस्यैवकालः।प्रतिग्रहस्यब्राह्मणस्यैवोक्तत्वात्॥चित्राचक्ष
त्रियस्य॥चकाराल्लाभकाम स्यक्षत्रियस्ययजमानस्यचित्रानक्षत्रमग्न्याधेयस्यकालोभवति॥ज्योतिःशास्त्रे॥
अग्नेःपरिग्रहंकुर्याद्विशाखाकृत्तिकामृगे॥रेवतीरोहिणीपुष्येज्येष्ठायामुत्तरात्रये॥व्यवहारसारे॥अग्न्याधा
नेंद्राणांस्यात्कृत्तिकाविशाखयोःरेवतीरोहिणीपुष्यमृगज्येष्ठोत्तरात्रये॥कारिकायां॥माघादिपंचमासेषु
चाश्विनेतथा॥कुर्यान्मृगोत्तमांगेवाआधानंशुक्लपक्षतः॥हस्तद्वयेविशाखासुकृत्तिकादित्रयेतथा॥पुनर्वसुद्वयेत
ताषूत्तरासुच॥भौमार्कविवर्जितेवारेनाधिमासेतथाक्षये॥चंद्रेनुकूलेपूर्वाह्णेरिक्ताविष्टिविवर्जितेइति॥शाखां
पिनक्षत्रेष्वाधानंश्रूयते॥तद्यथा॥आपस्तंबः॥हस्तेयःकामयेतप्रमेदीयेतेतिचित्रायांराजान्यो...
शाखयोःप्रजाकामोऽनुराधेष्वृद्धिकामःश्रवणेपुष्टिकामः।उत्तरेषुप्रोष्ठपदेषुप्रतिष्ठाकामः॥सर्वाणिनित्यवदेसमान

॥३७॥
॥देवया॰॥

नंतीति॥ तथाऽमावास्यायां पौर्णमास्यां वाऽऽधेय इति॥ ॥वसंतो ब्राह्मण ब्रह्मवर्चसकामयोः॥ तस्माद्ब्राह्मणो वसंते आद
धीतेति वचनाद्ब्राह्मणस्य निष्कामस्य वसंत ऋतोरग्न्याधेयस्य कालः॥ स यः कामयेत ब्रह्मवर्चसी स्यामिति वसंते स आ
धीतेति ब्रह्मवर्चसकामस्यापि ब्राह्मणस्यैव वसंतः कालः॥ यत्तो ब्रह्मवर्चसं ब्राह्मणस्यैव युक्तं॥ ॥ग्रीष्मः क्षत्रियश्री
कामयोः॥ निष्कामस्य क्षत्रियस्य श्रीकामस्य त्रैवर्णिकस्यापि ग्रीष्म ऋतुरग्न्याधेयकालः॥ तस्मात्क्षत्रियो ग्रीष्म आ
दधीतेति वचनात्॥ अथ यः कामयेत क्षत्रं श्रिया यशसा स्यामिति ग्रीष्मे स आदधीतेति वचनात्॥ क्षत्रं श्रियेति क्ष
त्रियजातिरपि श्रिया संपदा कीर्त्या च क्षत्रात्मकः स्यामिति कामयमानस्य ब्राह्मणादेः ग्रीष्म आधानकाल इत्यर्थः॥
वर्षाः प्रजापशुकामवैश्यरथकृतां। प्रजाकामस्य पशुकामस्य त्रैवर्णिकस्य वैश्यस्य निष्कामस्यापि वैश्यस्य वर्षा॥
अथ यः कामयेत बहुः प्रजया पशुभिः स्यामिति वर्षासु स आदधीतेति सकामस्य त्रैवर्णिकस्यापि॥ वर्षासु रथका
आदधीतेति रथकारस्य निष्कामस्यापि॥ शाखांतरे शिशिरः सर्ववर्णानामिति॥ तथा च शिशिरः सार्ववर्णिक इति च॥ शिशि
रो सर्ववर्णानामग्न्याधेयं भवतीत्युक्तं॥ एवं कालमुक्त्वा कर्तव्यमाह॥ ॥अग्न्यगारे कुर्वंति॥ आगारं गृहं अग्न्योरगा
रे गृहे अग्न्यगारे द्वे अग्निगृहे अर्थात्परिमाणे अग्न्युत्पत्तिक्रमेण कुर्वंत्यध्वर्य्वादयः। ततश्च पूर्वं गार्हपत्यगृहं पश्चादा
हवनीयगृहमित्यर्थः॥ अत एव कुर्वंतीति बहुवचनादग्ने चत्वार ऋत्विजः प्राश्नंतीति उपदेशाच्च पूर्वमेव ब्रह्मादय
श्चत्वार ऋत्विजो वरणीयाः। अवृत ऋत्विक्कर्माणि नैव कुर्यान्नैव कारयेदिति सर्वसाधारण्येनोपदिष्टत्वात्॥ वैधव
रणाभावेपि त्वं मे ब्रह्मा त्वं मे होतेत्येवं लौकिकं वरणमर्थात्कर्तव्यं॥ अन्यथा विशिष्टप्रवृत्त्यसिद्धेः॥ ॥उदग्वंशं वा पर
अपरं गार्हपत्यागारमुदग्वंशं वा कुर्यात्॥ वा प्राग्वंशं॥ आहवनीयागारं तु प्राग्वंशमेव कर्तव्यं॥ ॥दक्षिणपूर्वद्वारे॥ ॥३७॥

रथकृत श्च वर्षा ऋतुरग्न्याधेयस्य कालो भवति॥ तस्माद्वैश्यो वर्षास्वादधीतेति निष्कामस्यापि॥

उत्पत्तिक्रमेणापरस्य गार्हपत्यागारस्य दक्षिणं द्वारं कर्तव्यं॥ आहवनीयागारस्य प्राच्यां द्वारं कर्तव्यं॥ नन्वेकैकस्याग्न्य
गारस्य प्रत्येकं द्वारद्वयं किं न विधीयते॥ गार्हपत्यागारे पूर्वद्वारस्यार्थादेव प्राप्तेर्विधानानपेक्षणात्॥ अतो गार्हपत्यागारे द
क्षिणद्वारं विहितं॥ पूर्वद्वारं चार्थतः। आहवनीयागारे पूर्वद्वारं विहितं॥ अपरद्वारं चार्थतः। नह्यन्यथा गार्हपत्याहवनीयप
र्यंतं धारा निनयनविधानं गार्हपत्यावेक्षणं च संभवति॥ किंच। अल्पस्वरतरत्वात्पूर्वं दक्षिणद्वारे इति निर्देशे प्राप्ते यद्दक्षि
ण पूर्वे इति निर्दिशति तदेवं ज्ञापयति॥ प्रथमं गार्हपत्यागारं तत आहवनीयगारमिति॥ तथा च सति यथासंख्येन सं मैवं॥
बंधार्थमल्पाच्तरत्वमनादृत्यापि दक्षिणशब्दं पूर्वं निर्दिशति॥ ॥पौर्णमासवद्वपनं॥ अत्र यजमानस्य पौर्णमासवत्के
शश्मश्रुवपनं भवति॥ विकल्पस्य वक्ष्यमाणत्वाद्विनापि शिखवर्ज्यमिति देश इति केचित्॥ अपरे त्वेवमाहुः पौर्णमास ८
वद्वपनमित्यनेनैव विकल्पे सिद्धे ऋतुनक्षत्रेति सूत्रे पुनर्विकल्पग्रहणादेवं ज्ञायते पौर्णमासेपि नित्यमेव वपनं म
न विकल्पेन॥ केशश्मश्रु वपते वा शिखमित्यत्र वा शब्दस्य शिखमित्यनेनैव संयोजनात्॥ शाखांतरे रवनिकृंतनम
प्याम्नातमस्ति॥ केशश्मश्रु वपति नखानि निकृंतति तते स्नाति च पत्नी केशवर्जमित्यापस्तंबः॥ ॥क्षौमे वस्ते हते॥ ...
नाऽहते अधौते सकृत्प्रक्षालिते वा क्षौमे वस्त्रे परिधत्ते॥ क्षुमा अतसी तद्विकारे क्षौमे॥ ॥पत्नी च॥ पत्न्यपि अ...
वाससी वस्ते। परिधत्ते। क्षौमे वसाना वग्नी आदधीयातामिति वचनात्॥ सर्वं स्थिते अध्वर्यवे देये ते अहते क्षौमे आ...
स्थिते समाप्तिं प्राप्ते उभाभ्यामपि अध्वर्यवे देये दातव्ये॥ चरितार्थत्वाविशेषात्प्रतिपत्तिसापेक्षत्वाविशेषाच्च॥ ॥गार्हपत्य

गार्हपत्या

॥३८॥
॥देवया॰
२५

गारेनिर्मथ्याभ्यादधाति॥ अथाक्षिप्तकाष्ठाभ्यामग्निं निर्मथ्य गार्हपत्यागारे गार्हपत्यखरस्य मध्ये निदधाति॥ अग्नेः स्थान
मुक्तिं खल्वित्युपदेशाच्च॥ गार्हपत्यस्थापन इति गम्यते॥ ॥वैश्यकुलाद्वांबरीषमहानसाद्वा॥ अग्निमाहृत्य गार्हपत्यागारे
दधातीति विशेषः। वैश्यकुलादग्निमाहृत्य तत्र स्थापयति॥ वैश्यकुलाच्चेल्लौकिकोग्निर्हृतो विशिष्टो वा ग्राह्यः नतु परि
गृहीत आवसथ्यादि। अथवांबरीषात् भ्राष्ट्रात्कंदुकगृहादित्यर्थः॥ अथवा महानसात्। महानसशब्देन धान्यादिपाक
गृहमुच्यते॥ यत्रानवरतबहुपाकवशाद्रक्षीयमाणोग्निर्भवति॥ स चाग्निः पंचभूसंस्कारान्कृत्वा स्थापनीयः॥ ॥दि
वाश्नाति रात्रौ वा॥ अथ यजमानो दिवैवाश्नातीति नियोगतः॥ रात्रौ वा अश्नाति॥ अथ न रात्रौ नाश्नातीति रात्र्यशनस्यैव विकल्पो
न दिवाशनेन सह॥ यदहरस्य श्वोग्न्याधेयं स्यात् दिवैवाश्नीयादिति नियमेन दिवाशनं विधाय तदपि काममेव नक्तमश्नीयादि
ति रात्र्यशनस्यैवैच्छया विधानात्॥ ॥उपास्तमयं देवाः पितर इति॥ उपास्तमयं अस्तमयसमीपकाले आहवनीयागारस्य पु
रस्तादुपविश्य यजमानो देवाः पितर इति मंत्रेण देवान्पितॄंश्चाह्वयति॥ स यो हैवं विद्वान् देवाः पितर इति ह्वयत्याहास्य देवा दे
वहूयं गच्छंत्या पितरः पितृहूयमिति श्रुत्यास्य मंत्रस्याह्वाने विनियोगात्॥ पत्न्यपि तत्र दक्षिणतस्तिष्ठति॥ ॥पूर्वेण प्रविशति॥
ततो यजमानः पूर्वेणाहवनीयागारद्वारेणाग्न्यगारयोः प्रविशति॥ ॥दक्षिणेन पत्नी॥ गार्हपत्यागारस्य दक्षिणेन द्वारेण
पत्नी अग्न्यगारे प्रविशति॥ प्रवेशनविधेर्विहितद्वारपरत्वस्य युक्तत्वात्॥ ॥पश्चादग्नेरुपविशतो दक्षिणतः पत्नी॥ उक्त
प्रकारेण गार्हपत्यागारं प्रविश्य तौ पत्नीयजमानौ स्थापितस्याग्नेः पश्चादुपविशतः॥ तयोर्मध्ये पत्नी दक्षिणत उपविशति॥

॥३८॥
॥दे॰

अर्थाद्यजमान उत्तरतः॥ ॥अश्वत्थशमीगर्भारणी प्रयच्छति॥ शमीमध्ये उत्पन्नोश्वत्थः शमीगर्भ इत्युच्यते। योग्निरश्वत्थे तं
यास्थाली शमीतामिति श्रुतेः॥ शम्या गर्भः शमीगर्भः। अश्वत्थश्चासौ शमीगर्भश्च अश्वत्थः शमीगर्भः तन्निर्मिते द्वे अरणी
अध्वर्युर्यजमानाय प्रयच्छति समर्पयति॥ तल्लक्षणं चैवं॥ शमीगर्भस्याश्वत्थस्य प्राङ्मुख्या उदङ्मुख्या वा ऊर्ध्वगाया ताव
शाखायाः छेदं कृत्वा तन्मध्ये अरणी कार्ये। ते चतुर्विंशत्यंगुष्ठदीर्घे षडंगुलविस्तारे चतुरंगुष्ठोच्छ्राये भवतः॥ मानं मध्य
मेनांगुष्ठपर्वणा कर्तव्यं। एवंविधा एका अधरारणिः॥ द्वितीया उत्तरारणिरिति॥ ते चैते अरणी अग्निमंथनार्थं परिगृह्येते॥
ते एव सदा धार्ये॥ अतत्प्रतिपत्तिविधानात्॥ अरणी वृषणयोरिति॥ अत एव कात्यायनोक्तं॥ अरण्योरल्पमप्यंगं यावत्ति
ष्ठति पूर्वयोः॥ न तावत्पुनराधानमन्यारण्योर्विधीयत इति॥ नाशक्षयदाहादिनिमित्ते चान्ययोः परिग्रहोपदेशाच्च॥ अरण्यो
र्दग्धयोर्वापि नष्टयोः क्षीणयोस्तथा। आहृत्यान्ये समारोप्य पुनस्तत्रैव निर्मथेत् इति॥ तथा च कात्यायनः॥ अरण्यो
क्षयनाशाग्निदाहेष्वग्निः समाहितः॥ पालयेदुपशांतेस्मिन्पुनराधानमिष्यत इति॥ एवं च निमित्ताभावे परिगृही
तयोः अरण्योरात्मेच्छया तावन्न परित्यागो यावत्कथमपि मंथसंभवः॥ ॥अभावे गर्भस्य॥ शमीगर्भस्याश्वत्थस्या
भावे अगर्भस्याप्यश्वत्थमात्रस्यारणी गृह्येते॥ तथा चोक्तं कात्यायनेन॥ अभावे त्वशमीगर्भाच्छिद्रेद्वाविलंबित इति॥ ॥
वाचंयच्छापूर्णाहुतेरित्याहास्तमिते निशायां॥ अस्तमिते सूर्ये तदानीमेव निशायां यजमानं प्रति अध्वर्युर्वाचंयच्छ
पूर्णाहुतेरिमं प्रैषमाह। अस्तमित आदित्ये रात्रौ यजमानमाहेति शाखांतरे श्रवणादेवमुक्तं॥ ॥पर्युदयं वा प्रधानका
लत्वात्॥ वा शब्दः पक्षव्यावृत्तौ। उदयसमीपं पर्युदयं॥ सामीप्ये अव्ययीभावः॥ सूर्योदयसमीपे वा रात्रावेवाग्न्युप

॥३९॥
॥देवया.४

गंबध्नातिनवा॥ ॥अरणिप्रदानानंतरंगार्हपत्यागारे

शमनानंतरंवाचंयच्छतीमंप्रैषंयजमानंप्रतिब्रूयात्॥नास्तमितमात्रे॥कुतएतत्॥प्रधानकालत्वात्॥वाग्यमोहि
पदार्थांगं॥पदार्थश्चविव्युष्टायामुपशमयत्येवमादयोव्युष्टायांरात्रौपर्युदयेविधीयंते॥अतोंगानांप्रधानकालत्वा
न्याय्येतिन्यायाद्वाग्यमनस्यतदर्थप्रैषस्यचपर्युदयकालतैवघटते॥एवंवाग्यमनस्यदृष्टार्थतानभवति॥यतवाक्
नहिपदार्थाःसुखेनकर्तुंशक्यंते॥अन्यथाअदृष्टार्थताभवेत्॥तस्मात्पर्युदयमेवेत्यवधारणा॥यत्तुश्रूयते॥अस्त
मितेआदित्येरात्राविति॥तदुदयसमीपेपिक्रियमाणेनविरुध्यते॥तदपिप्रागुदयाद्रात्रिरेवभवति॥केचित्त्वरव
संस्कारानंतरंप्रागग्न्यानयनप्रैषादिमंप्रैषमिच्छंति॥७॥ ॥गार्हपत्यागारेस्वकीयंपरकीयंवाअजंछागंबध्ना
तीति॥अथवानवाबध्नातीतिविकल्पः॥तदेकेअजमुपबध्नंतीतिविधायतदुतथानकुर्यादितिविहितप्रति
षेधाद्विकल्पः॥एतांरात्रिमजंबध्नातिइतिश्रवणादस्तमयसमयकालमेवबंधनीयः॥रात्रिमित्युपत
योगेद्वितीयाश्रवणात्॥ ॥विद्यमानंप्रातरग्नीधेदद्यात्॥विद्यमानंयजमानस्यगृहेस्वत्वेनवि
द्यमानमजं॥अबंधनपक्षेपिसंस्थितेकर्मण्यग्नीधेदद्यात्॥संस्थितइतिचकारपाठात्॥कुतएतत्॥
तदुतथानकुर्यादितिबंधनपक्षंनिषिध्ययदस्याजःस्यादग्नीधएवेनंप्रातर्दद्यात्तेनैवतंकाममाप्नोतितस्मादुतं
नाद्रियेतेत्यजबंधनकामस्यदानेनैवसंपद्यमानत्वेनहेतुभूतेनाजबंधननिराकरणात्॥तस्माद्बंधनपक्षेगृहेवि
द्यमानस्यदानं॥अत्रकेचिदेवमाहुः॥यदिस्वीयोजोनास्तितर्ह्यवश्यंपरकीयआनीयबंधनीयः॥यदिगृहेस्वी
योजोभवतितर्ह्यबध्वैवप्रातराग्नीध्रायदेयइति॥अपरेत्वेवमाचक्षते॥स्वकीयःपरकीयोविकल्पेनबंधनीयः॥अ

९९

त १

त्रस्वकीयस्यबंधनपक्षेशौग्नीधेदानं॥नाबंधनपक्षेनान्यबंधनपक्षइति॥ ॥अस्तमितेरोहितेचर्मण्यानडु
हेचत्वारिहविष्यपात्राणिमिमीतेतंचातुष्प्राश्यंपचति॥अस्तमितेसूर्येरोहितेरक्तत्वमापादितेआनडुहेब
लीवर्दसंबंधिनिचर्मणिउत्तरलोम्निप्राग्रीवेआधिकारणभूतेचत्वारिहविष्यपात्राणिहविष्यस्यतंडुलरूप
स्यपात्राणिमिमीतेप्रक्षिपति॥अत्रहविष्यशब्देनव्रीहितंडुलाएवोच्यते॥नव्रीहियोयवा॥कंडनस्यानुक्तत्वात्॥
अपचतुप्राश्यमोदनंपचतीत्योदनश्रवणात्॥तस्यचव्रीहितंडुलसिद्धान्नरूपत्वात्॥पात्राणिप्रसृतित्रयप
रिमाणानि॥ओदनस्यचतुर्णांप्राशनार्थत्वात्॥प्राशनस्यचतत्स्पर्धत्वात्॥तृप्तेश्चप्रसृतित्रयपरिमिततंडुलोद
नेनसंभाव्यमानत्वादिति॥तंचातुष्प्राश्यंपचति॥चतुर्भिःपात्रैःअमीणिप्रक्षिप्तंहविष्यंचातुष्प्राश्यंचतुर्णांप्राश
नार्हंतृप्तिजननसमर्थमोदनंतस्मिन्गार्हपत्यागारेस्थापितेग्नौपचति॥तमितिमितमात्रस्यैवनिर्देशः॥संस्कारां
तरशंकानिरासार्थं॥तेनसिद्धानेवतंडुलान्भित्वाप्रक्षाल्यपचेत्॥ ॥उद्वास्यासेचनंमध्येकृत्वासर्पिषासिच्याश्व
त्थीस्तिस्रःसमिधोघृताक्ताआदधातिसमिधाग्निमितिप्रत्यृचं॥तंशृतमोदनमुत्तरतउद्वास्यतस्यौदनस्यमध्येआ
सेचनंगर्तंकृत्वातस्मिन्गर्तेअसंस्कृतमेवसर्पिर्घृतमासिच्याश्वत्थीरश्वत्थवृक्षोद्भवास्तिस्रःसमिधोघृताक्तास्तेन
गर्तसिक्तेनैवाज्येनाक्तास्तस्मिन्नेवस्थापितेग्नौआदधातिसमिधाग्निंदुवस्यतेत्याभिःप्रत्यृचं॥ ॥उपत्वेतिजपति॥
उपत्वेतीमामृचंयजमानोजपति॥कुतः॥उत्तरस्तेअध्वर्युग्रहणात्॥त्रिभिरादधात्येकांजपतीतिशाखांतरेश्रूयते॥तेनम

ति

॥४०॥
॥देवया०४

मेणाग्येस्त्रिभिर्मंत्रैः समिदाधानं चतुर्थीं जपति॥ ॥द्वितीयां चाध्वर्युः॥ अथवा नोपत्नीति जपति। किंतु द्वितीयां सुसमिधाये
तीमामन्त्र चमध्वर्युर्जपति॥ स्वस्थाने स्थितामेव। एवं श्रूयते समिद्वतीभिर्घृतवतीभिरग्निरभ्यादधाति तिस्रः समिद्व
वतीभिः घृतवतीभिश्चाधानं श्रूयते॥ द्वितीयायां च समिद्वतीनास्ति। तेन नास्याः समिदाधाने विनियोगः॥ अत्र कि
प्रतिपत्तिः के चिदंत्ते द्वितीयां जपति॥ केचित्स्वस्थान स्थितामेवेति। चत्वार ऋत्विजः प्राश्नंति॥ तमोदनं चत्वार ऋत्विज
प्राश्नीहो त्वध्वर्युग्नीध्राः प्राश्नंति॥ ॥ राद्धस्ते ब्रह्मौदन इत्याह॥ ब्रह्मौदनप्राशनानंतरं राद्धस्ते ब्रह्मौदन इति प्रैषमध्वर्युर्य
जमानं प्रत्याह। वरं ददाति॥ ततएवमुक्तो यजमान ऋत्विग्भ्यो वरं ददाति॥ वरशब्देन यो यो दीयते तद भिल षितं स्वाधीनं वस्तु
यथा संपन्नं हिरण्यादिकमुच्यते। तदत्र चतुर्भ्योपि ददाति॥ चतुर्णां प्रस्तुतत्वात्॥ अत एवाध्वर्यादिवदर्थात् ब्रह्मणोपि
वृत्तिसिद्धेरप्रवर्त्तप्रवर्तनार्थस्य ब्रह्मवरणस्य तन्त्रहविंष्यभावः॥ संवत्सरं वा पुरस्तात्कुर्यात्तितः सवनादधीत। इदमन्य
पक्षांतरं आधानस्य पुरस्तात्संवत्सरं मानादि वरदानं तमोदनं प्रत्यहं कुर्यात्॥ ततएवंविधसंवत्सरं समिदाधानेन संस्कृता
दग्नेः सकाशात्सर्वानग्नीननुगार्हपत्याहवनीयदक्षिणाग्निसभ्यानादधीत। तेहाच्चुः संवत्सरं चातुष्प्राश्यमोदनं पचस एतस्ये
वाश्वत्थस्य तिस्रः शक्तिस्त्रः समिधो घृते तान्व ज्यसमिद्वतीभिर्घृतवतीभिरग्निरभ्याधत्तात्स्य यस्ततोग्निर्जनिता स एव स
भविजेतिश्रुतेः॥ अस्मिंश्च पक्षे संवत्सरस्य प्रथमदिने अग्न्यगारकरणाद्युपास्तमय जपांतं कर्त्तव्यं॥ ततः पूर्णे संवत्सरे
उत्तमेहनि चत्वारः पदार्था भवंति। दिवाश्नानं नियमो जंबंधनजागरणं वाग्बंधश्चेति॥ एतेषामाधानात्पूर्वाहोरात्र एव
श्रवणात्॥ तथाहि। यदहरस्यग्न्योग्न्याधेयं स्यात् द्विवैवाश्नीयाद्दिवशनं नियमश्चाधाने पूर्वदिन एव श्रूयते। तथा एता ॥आध्य॥

१०॥ ॥शाकलैवा॥॥ १०

रात्रिमजं बध्वा तीस जबंधनमपि तस्यामेव रात्रौ श्रूयते। अथ जागर्ति जागर्त्ति देवा इति प्रकृत्य स सदेवताश्चांततरस्त
पस्वितरो ग्नीत्रा आधत्त इति च तस्यामेव रात्रौ च जागरणं श्रूयते॥ वाग्यमस्य च पदार्थांगत्वेन प्रधानकालत्वानुग्र
हात्। अस्मिन्पक्षे अग्निहोत्रकाले गार्हपत्य शाम ने सति प्रायश्चित्तमाह॥ ॥गार्हपत्येनुगते ग्राममाग्निमाहृत्य चा
रे तुष्प्राश्यं पक्वा विहरेत्॥ ॥होमकाले गार्हपत्ये उपशांते ग्राममाग्निं लौकिकाग्निमाहृत्य तस्मिंश्चातुष्प्राश्यमोद
नं पक्वा चातुष्प्राश्यमिति शब्द सामर्थ्यस्ते न चतुरो ब्राह्मणान्भोजयित्वा तस्माद् अग्नेः अग्निहोत्रहोमार्थं विह
रेत्॥ चातुष्प्राश्यमित्यस्य गुणविधित्वेन नामधेयत्वासंभवान्न चानुष्प्राश्यमोदनधर्मातिदेशः॥ तेन मोदिव
रदानांतास्तद्धर्मा अत्र न भवंति॥ अतो यथाश्रुतमेव पचनं प्राशनं च भवति। ग्राममग्निमित्यनेनोद्धरणकालाति
क्रमभयाल्लौकिकस्याहरणं विधीयते। मथ्यमानश्चेन्न जायते त्यादिवत्॥ तेनैव देवहोमानंतरं स्वयोनेरेव गार्हपत्य
स्याहरणं। स्वयोनि भूतस्य नाशादो पुनरपि संवत्सरं चातुष्प्राश्यपक्षेण पुनराधानमिति॥ रात्रिजागरणधारणे
न सपत्नीकैर्यजमानेन तस्यां रात्रौ जागरणाग्निधारणे कर्त्तव्ये॥ तत्र धारणे कर्णेर नियममाह॥ ॥शाकलैः काष्ठैर्वे
र्वा॥ सामर्थ्याद्गोमय पिंडैर्वा॥ स्थापितस्याग्नेर्धारणं कर्त्तव्यं॥ ननु वचनं विनाप्येवमेव प्राप्नोति॥ सत्यं। अन्य
तरनियमार्थं पुनर्वचनमित्यदोषः॥ व्युष्टायामुपशमय्य दक्षिणावासं हरेदन्वाहार्यपचनश्चेत्॥ व्युष्टायां
रात्रौ तं गार्हपत्यागारे स्थापितमग्निं उपशमय्या नुगमयित्वा वक्ष्यमाणं कुर्यात्॥ अथवा तमग्निं दक्षिणतः
हरेत् ततउत्साद्य दक्षिणस्यां दिशि यदूरे स्थापयेत्। य दिसाग्निः अन्वाहार्यपचनकर्तुमिष्टो भवेत्॥ अस्मिन्

॥ ७१॥
॥ देवया०४

पक्षेदक्षिणाग्निमादधातीत्यस्मिन्काले तमेवदक्षिणां संहृतमग्निमाहृत्य दक्षिणाग्निखरे भुवइतिस्थापयेत्॥ न गार्हपत्या
दाहृत्य॥ ॥स्थानमुल्लिख्या भ्युक्ष्या चारं हिरण्यं निधायोरवारभ्मूत्काराग्निवपत्यं तत्तेषु शर्कराः॥ ततउपशमित्यस्या [illegible]
नभूश्रदेशं स्फ्येनोल्लिख्य यजमानेन्वारब्धे उदकेनाभ्युक्ष्य तत्र भसौ हिरण्यशकलं निधाय तत्रैवोखवाञ्श्रीवृल्करंचा [illegible]
ति। पुरखश्राब्देन वल्मीकारमृत्तिकाअभिधीयते॥ आखूत्करशब्देन चाखुभिरुत्कीर्णाः पांसवोभिधीयंते॥ उखवाखूत्कर [illegible]
नंतरं चोखवारवृत्तैरेररत्निमात्रक्षेत्रफलोवृत्ताकारःखरःकर्तव्यः॥ ततस्तस्यखरस्य खरस्यां तेषु शर्कराः परितो निद [illegible] ॥ धातेषु
ताश्चपंचाशत्। पंचाशच्छर्करानपरितपरिशिष्टोक्तेः॥ अथप्रथममग्निस्थापनांगभूताः पंचभूसंस्काराः पूर्ववत्खरं कर्त्तव्या [illegible]
ततउल्लिख्याचारब्धयजमानेभ्युक्षणादिशर्करा निधानांतं कार्यं॥ हिरण्यमुपर्येवे॥ एकेउपरिष्टात्संभारेणांसर्वेषु
हिरण्यं निधानमिच्छंति। एकेपुरस्तादिति॥ एवमितरयोः॥ ॥ इतरयोराहवनीयदक्षिणाग्न्योरेवमेवस्थानेकर्तव्ये॥ तत्रा
हवनीयस्थानमाह॥ ॥पुरस्तादाहवनीयस्याष्टासुप्रक्रमेष्वेकादशसुद्वादशसुमेत्यावा॥ गार्हपत्यस्यखरस्यमध्यात्प्रा
च्यां दिश्यष्टासुपदैकेषु प्रक्रमेषु आहवनीयखरस्यमध्यं कुर्यात्। एकादशसुप्रक्रमेषुवा॥ द्वादशसुप्रक्रमेषुमत्यावा॥
उक्तसंख्या तोन्यूनेष्वपिसमेसुषडादिषु आहवनीयस्य कुर्यात्। तेवाअष्टासुविक्रमेष्वादधीतएकादशस्वादधीतद्वाद
श स्वादधीतेति। तथाना नमात्रास्तियत्रैवस्वयं मनसामन्येत तदादधीत सयद्वाप्पल्यकमिवप्राचमुद्धरतीतिश्रवणात्।
अत्राहवनीयखरेपंचभूसंस्कारान्कृत्वापुनरुल्लिख्यान्वारब्धे भ्युक्षणादिशर्करानिधानांतं कुर्यात्॥ अत्रउखा
खूत्करैः अरत्निमात्रश्चतुरस्रः खरः कार्यः अत्रेषु त्रिसप्ततिसंख्याः शर्करानिधेयाः पूर्वेद्विश्चात्रिसप्ततिरितिवचनात्॥ ॥ ७१॥
॥आध्या॥
१८

त्र
खरप्रमाणंचयत्सपाश्वेवुक्तं॥ अरत्निश्चतुरस्रस्तुपूर्वस्याग्नेःखरोभवेत्॥ रथचक्राकृतिः पश्चाच्चंद्रार्धइवदक्षिणइति॥
निगमेच। परिमंडलं गार्हपत्यस्याधि [illegible] मरत्निमात्रं चतुरस्रमाहवनीयस्याईचिंदेदक्षिणाग्नेः सभ्यावसथ्ययोर्गा
र्हपत्यवदिति॥ इतरस्यवित्ततीयेदक्षिणतः॥ इतरस्य दक्षिणाग्नेर्दक्षिणतोवितृतीयेस्थानं॥ तस्यसाधनोपायः श्रुतं
कारेप्रोक्तः॥ गार्हपत्याहवनीययोरंतरं षड्भासमधावागंतुसमंत्रेधाविभज्यापरवितृतीयलक्षणेनदक्षिणा
स्यतस्मिन्नग्निरित्येकः प्रकारः॥ अपिवांतरंत्रिभागोनयारज्वापूर्वार्धेसमचतुरस्रंकृत्वाश्रोण्यामग्निरितिद्वितीयः प्रका
रः॥ एवमन्यतरोपायेनस्थानंकृत्वा। ततः षोडशांगुलतार्तीयेवत्तस्यात्षोडशांगुलं। तावदेवततोगत्वाहरेद्वृत्तमप्य
र्धकिश्लनेनोपायेनारत्निक्षेत्रफलमर्धचंद्राकारं क्षेत्रं कार्यं॥ अत्रोपलेपनादिशर्करानिधानांतं पूर्ववत्। उखवाखूत्क
रैरर्धचंद्राकारः कार्यः। ततः प्रांतेषुद्वाविंशतिशर्करा निधेयाः॥ सभ्यावसथ्ययोर्गार्हपत्यवदाधानमितिपरिशिष्टोक्तेर्गा
र्हपत्यखरवत्सभ्यस्यापिवृत्तः॥ खरउपलेपनादिपंचाशच्छर्करानिधानांतैः संस्कारैः कर्त्तव्यः॥ उत्सृष्टेग्निमंथनं॥
अग्निमंथनमग्नेर्गार्हपत्यस्यमंथनमुत्सृष्टेउदितेसूर्येकर्त्तव्यं॥ यएवंविद्वानुदितेमंथतीतिश्रुतेः॥ ॥ अनुत्सृष्ट [illegible]
एके अनुत्सृष्टे अनुदितएवसूर्येमंथनंकर्त्तव्यमित्याहुः॥ तद्वैकेनुदितेमंथित्वेतिश्रुतेः॥ उदितेतूद्धरणं॥ उद्धरणं तूभयपु
पपक्षेप्युदितएवसूर्येकर्त्तव्यं। तमुदितेप्राचमुद्धरतीतिश्रुतेः। अतश्चमंथनमनुदितेउदितेवा॥ उद्धरणंतू
दितएवेतिसिद्धं॥ ॥अपरेणगार्हपत्यायतनं॥ मंथनंभवतीतिसूत्रशेषः। गार्हपत्यायतनं। अपरेणगार्हपत्यखरस्यपश्चात्

॥४२॥
॥दैवया॰४

दिशो ऽदूरे ऽग्निमंथनं कार्यं। ॥ अश्वमानयेति ब्रूयात्॥ अश्वमानयेतीमं प्रैषमध्वर्युरग्नीध्रं प्रति ब्रूयात्
धिष्ण्यं स्यात्तदश्वमानेतेवै ब्रूयादिति श्रुतेः॥ ॥ स्थिते ऽश्वे पुरस्तात्॥ अश्वे पुरस्तात्प्रत्यङ्मुखे स्थिते मंथनं कुर्यात्॥ तत्र च प्रै
षमनु मधरारणिमुत्तराग्रां निधाय उत्तरारण्यैशान दिग्भागादष्टांगुलं दीर्घं द्व्यंगुलविपुलं प्रथमं छित्वा तस्य मूलं चतत्र बुध्ने
प्रवेश्य अधरारण्यं मूलादष्टांगुलं त्यक्त्वा अग्राच्च द्वादशांगुलं त्यक्त्वा तदंतराले अंगुलचतुष्टयपरिमिते पूर्वे ऽरण्यं ते मंथ
नस्थानं कृत्वा चात्र बुध्नं प्रोतस्य प्रमंथस्याग्रं तत्र निधाय चात्राग्रकीलकाग्रस्योपर्युदगग्रामोविलीं निधाय यंत्रं धै
धारयित्वा [illegible] त्रं नेत्रेण प्रदक्षिणा त्रिर्वेष्टयित्वा तथा मंथनं कुर्यात्॥ यथा जातो ऽग्निः प्राच्यां पतति तत्र यजमा
नः प्राङ्मुखो यंत्रधारणं करोति॥ पत्नी चात्र नेत्रेण त्रिर्वेष्टयित्वा मंथनं करोति॥ ततः शाखांतरादध्वर्युश्च। तस्मादध्वर्युः प्रत्
यङ्मुखो ऽभिमंथतीति॥ चत्रं च खदिरं द्वादशांगुलदीर्घं वर्तुलं अग्रे लोहकीलयुक्तं बुध्ने प्रमंथाग्रप्रवपणार्थं गर्तयुक्तं मूले
गर्ते च लोहपट्टिकया संयुक्तं कार्यं ओविलीं च खदिरां द्वादशांगुलदीर्घां चतुरंगुलविपुलां अधोभागे समा च त्राग्रस्थित
कीलकोपरिस्थापनार्थं लोहपट्टिकायुक्ता। उपरिभागे वर्तुला च कार्या। नेत्रं च गोबालरज्वात्मकं त्रेस्त्रिवृतव्याममात्रं का
र्यं केचित्प्रमंथाग्रेण मथ्यंति॥ अपरे तु मूलेन। तत्र प्रमंथमूलेन मंथनं कात्यायनोक्तं गृह्यकारिकायां च। तद्यथा चात्र बु
ध्ने प्रमंथाग्रं गाढं कृत्वा विचक्षणः। हस्तोत्तराग्रामरणिं तद्बुध्नमुपरिन्यसेदिति। जाते वरदानं॥ जाते ऽग्नौ अध्वर्युर्वरदा
नं यजमानः करोति। वरशब्देनाद्भुयेरिभिलषितं यजमानस्य स्वाधीनं किंचन हिरण्यादिद्रव्यमुच्यते॥ मनसैके। एके ऽद

॥भा॥
॥भाष्यं॥

१२

सो
ने

दानीं अहमिदं वस्तु अध्वर्यवे दास्यामीति मनसा संकल्प्य पश्चात्कर्मसमाप्त्यनंतरं ददाति। नेदानीं॥ ॥ तस्याभिश्वासो ऽपाम
मृतेर्दध इति॥ तस्य जातस्याग्नेर्यजमानेनाभिश्वासः कार्यः प्राणममृते दध इति मंत्रेण अभिश्वासश्चाग्निमभिलक्षीकृत्य मुखेन
श्वासस्य प्रेरणं। फूत्कारकरणमित्यर्थः॥ ॥ उद्धृतममृतं प्राणमादध इति॥ उद्धासो वह्निज्वालायामूर्ध्वश्वासेन मुखमध्ये ग्रह
णं॥ अमृतं प्राणमादध इति मंत्रेण यजमानेन कर्तव्यं॥ स पुनरपानीति वचनात्॥ तदेवमेतरात्मन्नाधत्त इति श्रुतेः॥
आत्मसंस्कारकत्वमुद्धासस्य प्रतीयते॥ तेनास्य यजमानकर्तृकत्वं॥ यद्येत्रेनमदो मंथंति तत्जातमभिप्राणिति
स पुनरपानितीत्यत्र स पुनरित्यनेन तच्छब्देनाभिश्वासकर्तुरेवापानन क्रियाविधीयते। अपानन क्रियायाश्च यजमान
कर्तृकत्वात्प्राणमपि यजमानस्यैव त्युभयं यजमानकर्तृकं सिद्धं॥ तज्जातमभिप्राणितीत्यभिश्वासस्य जाते संयोगा
त्ततः सर्वानादधातीत्यस्मिन्पक्षे न भवति। उद्धासस्तु भवत्येवात्मसंस्कारात्॥ वा दारुभिर्ज्वलितमादधाति भूर्भुव इति सं
भारेष्वमनुष्य त्वाव्रतपते व्रतेनादध इति यथार्षि। तं जातमग्निं दारुभिर्यज्ञियवृक्षकाष्ठैर्ज्वलंतं दीप्यमानं संभारेषु संभा
र्यां हिरण्यादीनामुपरिस्थापयति। भूर्भुव इति मंत्रेण। अमुष्य त्वा व्रतपत इति मंत्रेण च। यथार्षीति यस्य यत्र ऋषिर्भवति
तस्यामुष्येति स्थाने तदर्षिविशेषपदं षष्ठ्यंतं प्रयोज्यं॥ तद्यथा॥ अंगिरसां त्वा देवाना मित्यं [illegible] गिरसां॥ भृगूणां त्वा देवाना मि
ति भार्गवाणां॥ भार्गवांगिरसव्यतिरिक्तानां सर्वेषामादित्यानां त्वा देवाना मित्येव॥ एवं हि शाखांतरे पठ्यते। तथा च
पस्तंबः॥ भृगूणां त्वा देवानां व्रतपते व्रतेना [illegible] दध इति यो भार्गवः स्यादंगिरसां त्वा देवानां व्रत
पतेनादधामीति॥ यो ब्राह्मणो ऽङ्गिरसः स्यादादित्यानां त्वा देवानां व्रतपते व्रतेनादधामीत्यन्यासां प्रजानां [illegible]

॥७३॥
॥देवया॰
श्रि

त्वाराज्ञो व्रतपते व्रतेन । दधामीति राज्ञः इंद्रस्य त्वेंद्रियेण व्रतपते व्रतेनादधामीति राजन्यस्य मनो ग्रामण्यो व्रतप[illegible]
नादधामीति वैश्यानामादित्यानां त्वेति रथकारस्येति पद्धति विधानमिति ॥ ॥ वरुणस्य त्वेति क्षत्रियस्य । क्षत्रियज[illegible]
यजमानस्य अमुष्य त्वेत्यस्य स्थाने वरुणस्य त्वा राज्ञो व्रतपत इति मंत्रेणादधाति ॥ ॥ इंद्रस्य त्वेति रा जन्[illegible]
राजन्यस्यौचित्त्वात् राजन्यस्य यजमानस्यामुष्येति स्थाने इंद्र त्वेंद्रियेण व्रतपत इति मंत्रेणादधाति ॥ ॥ मनो ग्राम
ण्य इति वैश्यस्य ॥ ॥ वैश्यस्य यजमानस्यामुष्येति स्थाने मनो ग्राम ण्यो व्रतपत इ[illegible] यग्नि
मादधाति ॥ ॥ ऋभूणां त्वेति रथकृतः ॥ माहिष्येण करण्यां जातो रथकृत् इति केचित् ॥ ऋभुसौधन्वनसात्वतापर[illegible]
यस्त्रैवर्णिकेभ्यो हीनो नियतः कश्चिज्जातिविशेष इति पार्थसारथिमिश्राः ॥ तस्य रथकृतो यजमानस्यामुष्ये
तिस्थाने ऋभूणां त्वा देवानामिति मंत्रेणाग्निमादधाति । रथंतरं गायेति प्रेष्यति ॥ ततो रथंतरं गायेति प्रेष्यति । प्रेष्य प्रेष
यो कर्तृभेदान्नता यतः प्रेष्ये का वा प्रेषार्थ इत्यत आह ॥ गानध्वर्योः ॥ ॥ अत्र विधाने सामगानमध्वर्योः स्या
त् कुतः समाख्यानात् ॥ तत्राध्वर्यवे वेदे सामगानं विहितं । सामवेदस्तु उत्पत्तिमात्रं । प्रैषार्थस्य प्रधानभूतत्वाच्चैवं
प्राप्ते आह ॥ ब्रह्मा वा वेदयोगात् ॥ वा शब्दः पूर्वोक्तपक्षनिरासार्थः ॥ ब्रह्मा वा सामानि गायति ॥ नाध्वर्युः । कुतः वेद
योगात् ॥ वेदेन योगो वेदयोगः । ब्रह्मणो हि सामवेदेन योगोऽस्ति ग्रहणधारणरूपेण । यतस्त्रि[illegible]
[illegible]

॥७३॥
॥१४७॥

[illegible] वेदस्यैव ब्रह्मत्वे अधिकारः । अतः स एव सामगाने अधि
क्रियते ॥ युक्तत्वाच्चाध्वर्योः अध्वर्योः पदार्थांतरेषु युक्तत्वाच्च ब्रह्मैव गायति ॥ अत एव सामगाने अधिक्रिय
ते ॥ अत एव सूत्रांतरं ॥ प्रस्तोता परिसामानि गायति ॥ ॥ अग्न्याधेये सौत्रामण्यां च ब्रह्मणेति ॥ इध्मेनोद्धरणमुपय
म्य ॥ ॥ अष्टादश इध्मः परिधिवक्ष्यमाणमित्युक्तत्वादपरिमितं प्रणयनीयं तत्र पूर्वमित्युक्तत्वाच्च पालाशवे[illegible]
दि परिधिवक्ष्य संबंधि सप्तविंशतिका[illegible] प्रभृत्यपरिमितकाष्ठकेन त्रिवृन्नबद्धेनेध्मेन गार्हपत्ये प्रदीप्तेनाहवनीयस्यो
द्धरणं कर्तव्यं ॥ किं कृत्वा उपयम्य उपयमनीभिः मृत्तिकाभिर्विचित्वा तत्रांतरस्थाभिः प्रदीप्तस्येध्मस्याधस्तादुपगृहीत्वा
तं प्रदीप्तमिध्मं मृत्तिकासहितं कर्परे निधाय इत्यर्थः ॥ अग्नेरिध्मपूर्वाधिस्य ग्रहणविधानादत्र मूलस्यादीपनं का[illegible]
पयेनं ध्रुमउपेयात् ॥ तथा इध्मेनोद्धरणं कर्तव्यं यथा धूमः एनं यजमानमुपेयात् ॥ उपगच्छेत् ॥ अनेन प्रकारेण य[illegible]
मानो धूममनुगच्छेदिति विधीयते ॥ अथवा अयमर्थः ॥ व्यजनादिना तथा यत्नः कर्तव्यो यथा धूमो यजमानं प्रति
गच्छतीति । तथैव तथैव हरेयुर्यथैनमेष प्रत्यङ् पाचरेदेष वैयज्ञो यदग्निः प्रत्यङ् हैवैनं यज्ञः प्रविशतीति । एनं
यजमानं एषोऽग्निः प्रतीप उपगच्छेत् ॥ यां दिशं धूमो याति तस्यां दिशि स्थितो यजमानोऽग्निना सहाहवनीय[illegible]
दि सर्पः ॥ ॥ वामदेव्यमिति प्रेष्यति ॥ ॥ प्रदीप्तमिध्ममुपयम्य वामदेव्यं गायेति ब्रह्माणमध्वर्युः प्रेष्यति । [illegible]
अश्वः पुरस्तात् प्रवात् भावे पुवाश्वाभावेन [illegible] । उद्धरणे क्रियमाणे अश्वः अग्नेः पुरस्तादग्रतो याति । तय[illegible]

॥४४॥
॥देवया०४

प्रांचं हरंतिति पुरस्तादश्वं नयंतीति श्रुतत्वात्॥ कीदृशोऽश्वः॥ युवा तरुणः सर्वे पूर्ववाट्स्यादिति श्रुतेः॥ तस्य पुन
श्वस्य। नवेऽश्व युवा अतरुणोपि॥ यदि पूर्ववाहं न विंदेदपि य एव कश्चाश्वः स्यादिति श्रुतेः मंथनकाले य आहृतोऽश्व
स एवात्रापि प्रकृतत्वात्। तेन मंथनकाले एवैतल्लक्षणत्रयं॥ तदाचानड्वान्पक्षे अश्वमानयेति प्रैषाभावः। अन[illegible]
नात्॥ नचोहः प्रकृतित्वादिति॥ ॥संभारान धिष्ठाप्य दक्षिणपूर्व[illegible]पादेन प्रांचं नीत्वावर्त्य स्थापयति॥ एवं प्रा
ङ्मुखस्याश्वे अग्रतो नीयमाने आहवनीयखरसमीपं प्राप्य प्राङ्मुखस्यैवाश्वस्य दक्षिणपूर्वपादेनाग्निमदक्षिण
चरणेनाहवनीयखरस्थान् हिरण्यादिसंभारानधिष्ठाप्याश्वपादेनाक्रम्याश्वं प्रांचं नीत्वा ततआवर्त्य प्रदक्षिण
वर्त्तितेन प्रत्यङ्मुखं कृत्वा समुखस्थापयति। अथाश्वमाक्रमयतीति तमाक्रमय्य प्रांचमुन्नयतीति पुनरावर्त्तयती
ति श्रुतेः॥ अत्रहि उत्तरतोऽश्वस्य नीयमानत्वाद्दक्षिणेन पादेनाक्रमणमुक्तं। अत एवोखासंभरणे अश्वस्य दक्षि
णेन नीयमानत्वादग्निमिः सव्यपादः संनिहित इति सव्येनैव पिंडस्याक्रमणं कर्त्तव्यं॥ ॥बृहदिति प्रेष्यति॥
अश्वं प्रत्यङ्मुखमवस्थाप्याध्वर्युर्बृहद्गायेति ब्रह्माणं प्रेष्यति॥ ॥अग्निनापदं द्विरुपस्पृशयत्तृतीयेनादधा
ति द्वितीयेन प्रथमेन वा भूर्भुवस्वरिति पूर्ववत्॥ ॥इध्मस्थेनाग्निनाखरमध्ये संभारस्योपरिकृतमश्वस्य
पदं पदमुद्राद्विरुपस्पृशयद्द्विर्वारं स्पृष्ट्वा ततीयेनोपस्पर्शनेन सह तमग्निं तत्राश्वपदे आदधाति स्थापयति
भूर्भुवः स्वरिति मंत्रेण पूर्ववत्॥ तमश्वस्य पद आधत्त इति प्राक्रम्य सर्वे तूष्णीमेवाग्न उपस्पृशत्यथो यद्य

॥४५॥
॥भाष्य॥

द्य

यथोपस्पृशयति भूर्भुवः स्वरित्येव तृतीयेनादधातीति श्रुतेः॥ अथ वाग्निनापदं सकृदुपस्पृश्य द्वितीयेनोप[illegible]स्पर्शनेन सहा
ग्निमादधाति॥ अथेदं द्वितीयं तूष्णीमेवोपउपस्पर्शयत्यथो यच्छति भूर्भुवः स्वरित्येव द्वितीयेनादधातीति श्रुतेः॥ अथवा प्रथम
नैवोपस्पर्शनेन सहाग्निमादधाति॥ प्रथमेनैवोपहत्य दध्यादिति श्रुतेः। पूर्ववदित्यमुष्य त्वा व्रतपत इति पर्यवीतिवल
न्मंते॥ ॥पुरस्तात्परिक्रम्येध्मपूर्वार्धं गृहीत्वा द्यौरिव भूम्नेत्याह॥ ॥ततः स्थापनानंतरं यजमानोऽग्नेः पुरस्तात्प
रिक्रम्येध्मस्य पूर्वार्धं गृहीत्वा इध्मस्याग्रभागं हस्तेनालभ्यादाय द्यौरिव भूम्नेत्यमुं मंत्रमाह। जपति। अथ पुरस्तात्प्रती
त्यपूर्वाम्मुखं [illegible]मुकानामभिपद्य जपति द्यौरिवेत्यादि श्रुतेः॥ इध्मपूर्वार्धन्वारंभमणरत्सत्वारंभस्योक्तत्वादन्वारंभस्
वयजमानत्वादत्रापि यजमानस्य कर्तृत्वं। मंत्रलिंगाच्च। अग्निम[illegible]न्नादमन्नाद्यायादध इति॥ ॥अयंगौरिति चोप
तिष्ठते सार्पराज्ञीभिः॥ ॥च शब्दाद्यजमान एवायं गौः पृश्निरक्रमीदित्याद्याभि[illegible]स्तिसृभिः सार्पसंज्ञीभिः सार्प
राज्ञ्यदृष्टाभिरृग्भिराहवनीयमुपतिष्ठते। सार्पराज्ञी सा सामस्त्वासं संज्ञा संव्यवहारार्था। सार्पराज्ञीर्न वा कुर्यादिति सू
मुपरासु सार्पराज्ञीष्वित्यादौ॥ ॥दक्षिणाग्निमादधाति॥ गार्हपत्यादग्नेरेकदेशमादाय दारुभिर्ज्वलितं दक्षिणाग्निखर
स्थापयति। अत्र शाखांतराद्भुवः अमुष्य त्वेति च भवति। तथा चापस्तंबः। लौकिकमग्निमाहृत्य मथित्वा वा द्वितीयमा
व्याहृत्य दक्षिणाग्निमादधातीति। यदि च गार्हपत्यागारे पूर्वदिने स्थापितोऽग्निर्दक्षिणा संहृतो भवति॥ अन्वाहार्यप
चनो यक्षरिष्यत इति बुध्या तदानीमेवानीय भुव इत्यादिना दक्षिणाग्निखरे स्थापयति॥ तदुक्तं॥ दक्षिणा वासहृत्वा

हार्यपचनश्चेदिति॥ अस्मिन्पक्षे यावज्जीवं स एव नित्यो दक्षिणाग्निः सर्वदा धार्यते॥ अनुगतश्चा[illegible]
स्वयोनेराह्रियते॥ वैतानसूत्रे पठ्यते। दक्षिणाग्निं निर्मथ्य आहार्यो वा सभ्यावसथ्ययोराहवनीयादिहार
सभ्यावसथ्यस्येति॥ सभ्यं च निर्मथ्य॥ ततो गार्हपत्यवदेव सभ्यसंज्ञमग्निं निर्मथ्य चकारादाद[illegible]
सभायां स्थापयति। सभायां भवः सभ्य इत्यर्थानुगमात्॥ अथ य एषः सभायामग्निरिति वचनात्॥ ब्राह्मण
पियत्रो पविश्य पत्रिः ष्यान्पाठ यति सा तस्य सभेत्युच्यते॥ सभ्यस्थापनं गार्हपत्यवद्भूर्भुवः इत्यमुष्य त्वेति मं
त्रेण च भवति॥ सभ्यावसथ्ययोर्गार्हपत्यवदाधानमिति परिशिष्टोक्तेः॥ ॥गां दीव्यध्वमित्याह॥ ॥सभ्य
स्थापनानंतरं यजमान ऋत्विजः प्रति गां दीव्यध्वमिति प्रैषमाह। दिवु क्रीडायां। हे ऋत्विजः यूयं गां पणीकृत्य
दीव्यध्वं द्यूतं कुरुध्वमिति प्रैषार्थः॥ दीव्यध्वमिति बहुवचनं तेषामेव प्रस्तुतत्वात्। ऋत्विजो द्यूतस्य कर्त्तारो
न भवंतीति प्रतीयते न यजमानः॥ अत एव तस्य प्रेषणे कर्तृत्वं॥ इदं द्यूतं सभ्यांगं॥ सभ्यस्य प्रस्तावात्॥ धारणो
पस्थानमत इत्यग्रेपि सभ्यांगस्यैवोपदेशाच्च॥ अतः पुनराधेयेन भवति॥ तत्र सभ्यस्य विद्यमानत्वादिति कर्कः॥
तत्रापि सभ्यस्योत्सर्गेकृते भवत्येव॥ धारणोपस्थानमतः॥ ॥अत एवारभ्य सभ्यस्य धारणं उपस्थानं च याव
ज्जीवं कर्त्तव्यं॥ अत इत्युक्तत्वात्तन्न हविषां संवत्सरषाण्मासादिकालांतरेनुष्ठानेपि सभ्यस्य धारणमनशि[illegible]

प्रातर्मुहूर्त्तेष्ठं सभ्य भ्यैत्येतदुपस्थानं चात एवारभ्य यावज्जीवं कर्त्तव्यमिति निश्ची यते॥ ९॥ नैतवारवंतीय
ज्ञायज्ञिया निति च प्रेष्यति॥ चकारात्सभ्याधानानंतरं नैतवारवंतीययज्ञायज्ञिया निगायेति ब्रह्माणमध्व
र्युः प्रेष्यति॥ एवमेकवारमेव त्रयाणां प्रैष इति केचित्॥ अपरे तु सू यैतं गाय वारवंतीयं गाय यज्ञायज्ञियं गा
गायेति क्रमेण तत्तन्नाम्ना प्रैषत्रयमाहुः। तथा सति प्रैषार्थयोरानंतर्यमनुगृहीतं भवति। दक्षिणेनाग्नीन्प्र
रास्योदगुत्सृजति॥ अध्वर्युः प्रदक्षिणं सर्वानग्नीन्परीत्य परिगत्याश्वमुदगुदीच्यां दिशुत्सृजति॥ तमुदञ्च
प्रमुंचतीति वचनात्॥ दक्षिणेनेति ग्रहणान्नेत स्थावृत्तिः॥ ॥ऋतुनक्षत्रसंभारसामवपन चातुष्प्राश्ययज्ञा
गरपोध्मपूर्वाधिन्वारंभणा सार्पराज्ञीर्न वा कुर्यात्॥ एतानि ऋतुनक्षत्रादीनि अग्न्याधेये कुर्यात् न कुर्याद्वि
विकल्पः॥ सर्वेषां विहितप्रतिषिद्धत्वात्॥ तथाहि ऋतौतावदुच्यते॥ तस्माद्ब्राह्मणो वसंत आदधीतेत्येव
दिना वसंतादिष्वाधानं विधीयते वाएत ऋतव उभय एवापहतपाप्मान इत्युक्तत्वात् ऋत्वनादरं करोति॥ तस्मा[illegible]
यदैवैनं कदाचयज्ञ उपनमेदथाग्नी आदधीत न तश्वः श्वमुपासीत को हि मनुष्यस्य श्वो वेदेति॥ तस्माद्यस्मिन्[illegible]
स्मिंश्चेदतो सोमयाग एनं यजमानं उपरमेदभिगच्छेत्तस्यानंतरमेवाग्न्याधानं कुर्यात्॥ श्वः श्वः करवाणी[illegible]
लांतरप्रतीक्षा न कार्या॥ तत्र हेतुः को हीति॥ मनुष्यस्य श्वः कालसंबंधि जीवनं को वेद को नाम जानीयाद्[illegible]
त्वादिति श्रुत्यर्थः॥ तथा शाखांतरे॥ यदहरेवैनं श्रद्धोपनमेत्तदहरेवादधीतेति सोमेच्छा विना पि केवल[illegible]
ऋणवश्रुतिः॥

॥४६॥
॥देवया०४

स्यत्र्कत्वनादरः॥ तथा॥ नक्षत्रेष्वपि कृत्तिकास्वग्नीनादधीतेत्यादिभिर्नक्षत्रेष्वाधानं विधाय तस्मान्न कृत्तिकास्वादधी
त। वैतानसूत्रे। यदेव कदाचिदादध्याच्छ्रद्धास्यैवैतेनं नातीयादिति॥ तस्मान्न मृगशीर्ष आधीत तस्मान्न नक्षत्र आ
दधीत तस्माद्युस्त्वर्यनक्षत्र एव स्यादेषत्थ्येषोवीर्यक्षत्रमाददीत यद्युनक्षत्रकामः स्यादेतद्वा अनपराद्धं नक्षत्रं यत्सूर्यः स
एतेनैव पुण्याहेन यदेतेषां नक्षत्राणां कामयेतत दुपतस्येत्तस्मादुस्त्वर्यनक्षत्र एव स्यादिति। नेत्रानादरेण पुण्याहे स
र्यनक्षत्र एवाधानस्योक्तत्वात्॥ न च नक्षत्रानादरेणामावास्यायामेव भविष्यतीति शोकनीयं। स एतेनैव पुण्या
हेनेन पुण्याहमात्रे विधानात्॥ संभारेष्वपि॥ पंच संभारान्संभरतीति विधाय प्रतिषेधति नैवैकं चन संभारं संभरे
ति। अतो विधायप्रतिषेधाद्विकल्पः॥ सोमस्य पि। वाले ग्नितेजो भवति सामानि तस्यान्नगेयानीति विहितप्रतिषिद्धत्वा
द्विकल्पः। वपनेचन्नारखांतराद्विकल्पः। चातुर्मास्येष्वपि॥ अथ चातुष्प्राश्यमोदनं पचतीति तस्माद्युतन्नाश्नीयेतेति विहि
तप्रतिषेधाद्विकल्पः॥ जागरणेप्यथजागर्तीति जाग्रतीति जागरणं विधाय तद्यपि कामभेवस्वप्यादिति वैकल्पिकस्वा
पविधानाज्जागरणस्य विकल्पः॥ इध्मपूर्वार्धिन्वारंभणेपि। पूर्वार्धमुल्मुकानामभिपद्यजयतीति विधाय स यदिका
मयेत्तजयेदेतद्यद्युकामयेतापिनाद्रियेतेति विहितप्रतिषेधाद्विकल्पः॥ सापरावस्युपस्थानेपि। अथ सपराङ्यग्नि
रुपतिष्ठत इति विधाय तस्मान्न सपरासीत अग्निरिति विहितप्रतिषेधाद्विकल्पः। ऋत्वादीनां वैकल्पिकत्वनिरूपणाप्रस
तत्वाद् ग्निहोत्रस्यापि वैकल्पिकत्वमाशंक्य निराकरोति॥ ॥अग्निहोत्रं च तूष्णीं पूर्वं श्रुतेः पूर्णाहुत्यंते॥ अत्राग्निहोत्र

॥४६॥
॥भा०६॥
२३

शब्दः सायंप्रातर्विहितनित्याग्निहोत्रधर्मातिदेशार्थः चकारेण वा कुर्यादित्यस्यानुकर्षणार्थः। तेनाग्निहोत्रं च न वा कुर्यात्
जुहुयान्न वा जुहुयादित्यर्थः॥ कुतः होतव्यमग्निहोत्रान्न होतव्या नितिमीमांसकाइति विधिप्रतिषेधयोः श्रवणा
दिति। तदनुपपन्नं। कुतः। तूष्णीं श्रुतेः तूष्णीमेवात्राग्निहोत्रहोमस्य श्रुतत्वात्॥ यदि जुहोत्ययथा कुर्याद्यथ न जुहोत्य
ग्निः परापतेत्तस्मात्तूष्णीं जुहुयादिति। अतो न विकल्पः। ननु प्रागुक्तं होतव्यमग्निहोत्रं न होतव्यमिति विहितप्रतिषिद्ध
त्वाद्विकल्प इति। तत्रोच्यते॥ नह्येतौ विधिनिषेधौ किंतर्हि तूष्णीं होमविधिस्तुतिरियं॥ कथं। समंत्रकहोमपक्षेऽय
थाकरणे दोषः। अहोमपक्षे अग्नेः परापातः। तूष्णीं होम एव प्रशस्तो यदस्मिन्क्रियमाणे पूर्वोक्तदोषाभावः॥ तदिदम
ग्निहोत्रं नित्यात्कर्मांतरमाधानांगं नाम्ना तद्धर्मकं ततश्च तद्द्देवसायमादिप्रातरंतमेकं कर्म त्र्यक्षत्तरसादिव चना त्सा
याह्नं प्रातरपवर्गं इहमेकं कर्म तत्तस्मात्रैकस्मिन्नेवकाले सायंप्रातर्विहितस्य प्रयोगद्वयस्य विधानात्काल भेदाभा
दंगानि परिस्तरणपर्युक्षणादीनि सकृदेव कर्तव्यानि॥ प्रधानाहुतयश्च भेदेन। तत्रैवं कर्तव्यं। प्रातर्होमिकालसंनिकर्षा
तत्र प्रातर्होमिधर्माः होमश्चात्राध्वर्युकर्तृकः॥ तत्रायं क्रमः॥ यजमानस्य संचरेणप्रवेशनं॥ तूष्णीमेवाचमनं॥ अध्व
र्योः कूर्चनिधानं। त्रयाणामग्नीनां परिस्तरणं। प्राक्संस्थं पर्युक्षणं। धरा चा संज्ञयैवाग्निहोत्र्यादोहनं॥ अंगाराणामु
त्तरतो निरूहणं॥ पूर्वेणाहवनीयं दुग्धानयनं॥ अधिश्रयणं॥ अवज्योतनं। अपां आसेकः। पुनरवज्योतनं॥ उन्नय
वानुन्नं। चतुर्गृहीतस्योन्नयनं। जमदग्नीनां पंचावत्तस्योन्नयनं। समिध उपरिधारणं। स्रुचमादायगार्हपत्ये...

॥४७॥
॥देवया०४

त्रीत्वामध्ये निगृह्योद्धृत्योप विश्य तूष्णींसमिदाधानं। अग्निंध्यात्वापूर्वाहुतिहोमः॥ शेषस्य पात्रांतरे नैव स्था-
पनं। गार्हपत्ये प्रत्यागत्य ततः पूर्ववदेव चतुः पंच कृत्वोन्नीय तथैवागत्य पुनः समिधं कृत्वास्त्यं ध्यात्वा मध्ये होमः।
उभयस्त्रोशेषसमं सिच्यंते त्रेणोत्तराहुतिः तूष्णीं कूर्चेनिमार्जनं॥ दक्षिणत उत्तानहस्ते निधानं च। अपांस्पर्शः गार्ह-
पत्यहोमे समिधमधाय एकैकस्रुवं पात्रांतरे उन्नीय तृतीयं स्रुवं गृहीत्वा प्रथमोन्नीतेन सह तूष्णीं प्रथमाहुतिं जुहो-
ति॥ ततश्चतुर्थं गृहीत्वा द्वितीयोन्नीतेन सह द्वितीयां जुहोति॥ एवं दक्षिणाग्नावपि। शेषभक्षादिकं च पर्युक्षणांतं
वैसहदेव तूष्णीमध्वर्युः करोति। नाग्न्युपस्थानं होममात्रोपदेशात्॥ आचमनं। अतीत्य निष्क्रमणमिति॥ तदेवं
धर्मापि होत्रे पूर्णाहुतिसंतं पूर्णाहुतिहोमानंतरं भवति। नेदानीं॥ तामेव पूर्णाहुतिमाह॥ ॥पूर्णाहुतिं जुहोति निरूप्याज्यं
गार्हपत्येधिश्रित्य स्रुक्स्रुवं च संमृज्योद्वास्यात्पूर्णामवेक्ष्य गृहीत्वान्वारब्धे पव ध्सर्वत्रस्वाहेति॥ पूर्णाहुतिं च क्ष्यमाणे इति
णायात्राहुतेः संज्ञा। अन्वर्थसंज्ञा चैषा। पूर्णायाश्रुचा आहुतिः पूर्णाहुतिः॥ तस्य होमोनादेशाइति वचनात्॥ घृतेन
स्रुचं पूरयित्वा होतव्या। तां वै पूर्णां जुहोतीति वचनात्॥ तत्रेतिकर्तव्यतामाह॥ प्रथममाज्यं निरूप्य पात्रांतरादाज्यस्थाल्यां
प्रक्षिप्य। ततो गार्हपत्येधिश्रित्य गार्हपत्यसंज्ञकस्याग्नेरुपरि तामाज्यस्थालीं निधाय। ततः स्रुक्स्रुवं संमृज्य। द्र-
व्यांतरस्यानुपदेशात् क्वचित्पाणिनेति विशेषविधानाच्चात्र दर्भैरेव संमार्गः। तत्रापि प्रथमं स्रुवस्य। ततः स्रुचः
न सह। स्रुवं च स्रुचं च समार्ष्टीति क्रमेणैव संमार्गस्य विधानात्॥ सूत्रे च अल्पांतरत्वात्स्रुचः पूर्वनिर्देशः॥

त१

॥४७॥
॥भाष्यं॥

२४

प्रतिप्रधानमंत्रांगाव त्तेन्याय्यत्वाच्च॥ स्रुक्गत्रपाला इति जुहूः॥ जुह्वां वचन इत्युक्तेः॥ स्रुवश्च खादिरः॥ संमार्ग-
स्य यथा दर्शपूर्णमासयोर्वेदाग्रेरंतरतः प्राक्मूले बर्हिः प्रत्यगिति तथात्रापि कार्यः। अविशेषोपदेशात्॥ तत उद्वास्य
गार्हपत्यस्योपरिष्टादाज्यस्थालीं गृहीत्वोत्तरतः रेखाद्बहिर्भूमौ निधाय। उत्पूय। साग्राभ्यां दर्भपवित्राभ्यामाज्यस्था-
लीस्थमेवाज्यमुत्पूतं कृत्वा। अवेक्ष्य। उत्पवनानंतरं तस्याज्यस्यावेक्षणं कृत्वा। गृहीत्वा आज्यस्थाल्याः स्रुवेण गृ-
हीत्वा स्रुचः पूरणं कर्तव्यं। स्रुचः पूरणं यावत्स्रुवेणैव ग्रहणं। स्रुवस्यात्र संमार्गविधानात्॥ गृहीत्वेति ग्रहणवि-
धानात्स्रुवेणाज्यग्रहणमित्युक्तत्वाच्च। अभिपूरणस्याविधानाच्च॥ ततोन्वारब्धे यजमाने स्वाहेत्येतेन मंत्रेण आह-
वनीये पूर्णाहुतिं जुहोति। आहवनीये होमा इति परिभाषितत्वात्॥ उद्धृत्याहवनीयं पूर्णाहुतिं जुहोतीति वचनात्॥
ग्रहणं तु गार्हपत्यसमीप एव कर्तव्यं। ततः एकां समिधमुपसंगृह्याहवनीयसमीपमागत्य परिस्तरणसमिदाधा-
नं कृत्वा होमः कार्यः॥ पूर्णाहुतेः प्रकृतिः भूतायां अनुद्धृताग्न्यस्तमपाहुतौ तथा दर्शनात्॥ गार्हपत्ये आज्यमधिश्रि-
त्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतमाज्यं गृहीत्वा समिधमुपसंगृह्य प्राङुदाद्रवेत्य आहवनीये समिधमभ्याधाय
दक्षिणं जान्वाच्य जुहोतीति॥ सूत्रे दक्षिणं जान्वाच्येति तु प्रागभिहितत्वाच्चोक्तं॥ एवं सर्वत्रापरिष्टहोमेष्वपि॥ अ-
ग्नेचाग्निर्देवता॥ अन्नादं वा एतमात्मनो जनयते यदग्निं तस्मा एतदन्नाद्यमपिदधाति यथा कुमाराय वा जाताय वत्सा-
य वा स्तनमपिदध्यादेवमस्मा एतदन्नाद्यमपिदधातीति॥ सर्वेष्वेवं नमेतद्बृमयतीत्यादिश्रवणात्॥ तेनाग्निं ध्यात्वा स्वा-
हाकारेण होमः। स्वाहाकारेण जुहोत्यनिरुक्तो वै स्वाहाकार इति वचनात्॥ नन्वत्र गार्हपत्यग्रहणं किमर्थं। अत्र

॥५८॥
॥देवया०५

वाहवनीयइतिवैकल्पिकाहवनीयनिरासार्थमितिकेचित्॥ तदयुक्तमित्यपरे॥ अत्राधिश्रयणस्याश्रपणार्थ
त्वात्। तत्कृतः॥ श्रपणंचपाकः॥ तस्यचाज्येपूर्वमेवसिद्धत्वेन तदर्थत्वानुपपत्तेः॥ तेनाधिश्रयणसंस्कारः
त्रमेव॥ तच्चगार्हपत्यएवप्राप्नोतिगार्हपत्येसंस्कारइत्युक्तत्वात्। ततोनवक्तव्यंगार्हइत्युच्यते॥ गार्हपत्य पत्य
शब्दस्यसंस्कारनिमित्तत्वात्॥ तथाचयमापत्वादस्यसत्रस्यग्रांटीवपतिवद्धोविन्यावत्सागार्हपत्याध्यारोप
णार्थंगार्हपत्यग्रहणं॥ एवमाहवनीयेहोमाइत्यत्रापिभाविनांचत्तिमाश्रित्यपूर्णाहुतिअग्निहोत्रपवमानेष्टि
चाहवनीयेहोमःसिध्यति॥ एवमेवदक्षिणाग्निहोमेपि॥ अयथाकरणादौनैमित्तिकहोमेपिअनेनैवन्यायेन
विन्यावत्साआगार्हपत्याहवनीयदक्षिणाग्निकार्याणीतिकेचित्॥ तत्रनित्यप्रयाजागच्छागन्चनैमित्तिकस्याग
स्यापिकर्तुमुक्तत्वात्॥ न्यायस्यसमानत्वात्॥ अपरेतुएवंनेच्छंति। तत्त्वेवंआहुः॥ अत्रविहितेष्वेवकार्येषु
अन्य यानुपपत्त्याभाविनीवृत्तिर्युज्यते। नत्वत्राविहितेषुनैमित्तिकहोमेषु। तेष्वाहवनीयादिषुनिष्पन्नेषुवि
धीयंते॥ पूर्णाहुत्यादयस्तुनिष्पाद्यमानेष्विति। अत्रआहवनीयाद्यभावादत्राग्निसाध्यस्यनैमित्यकस्यसं
वएव। तेनाग्निसाध्यनैमित्तिकसंबंधिनिमित्तेजातेसगुणत्वसंपादनायकर्मणआवृत्तिरेवकर्त्तव्या॥ तथा
चसतिसंदेहः॥ किंसामान्येनाग्न्यागारकरणादिआदित्येष्टतस्यसकलस्यकर्मणएकैकपदार्थस्यान्यथा
भावेआवृत्तिः उतकश्चिद्विशेषोस्ति॥ अत्रोच्यते॥ अग्न्यागारादिरिष्टतैःसंस्कारैराहवनीयादयउत्पाद्यंते॥

॥५८॥
॥[illegible]॥

२५

तेचसर्वेपिसंस्काराःस्वस्वांगोपेताविहिताःसंति। तद्यथा॥ पूर्णाहुत्यां निरूप्याज्यमित्याद्यंगानि॥ अग्निहोत्रेच
परिस्तरणादीनि॥ इष्टिषुचाग्न्यन्वाधानादीनि। ब्रह्मौदने रोहितेचर्मण्यानडुहे इत्यादीनि। रथसंस्कारेषुतुस्था
नमुल्लिखेत्यादीनि। तेनयस्यैवांगिनोंगान्यथाभावस्तस्यैवावृत्तिर्घटतेनसकलस्याधानस्येति। तेनपूर्णाहुत्या
मंगान्यथाकरणेतस्याएवावृत्तिः। कूर्चनिधानपरिस्तरणाद्यन्यथाभावेअग्निहोत्रस्यैवावृत्तिः॥ इष्ट्यापिपदा
र्थस्यान्यथाभावेयस्यामिष्टावन्यथाभावस्तस्याएवावृत्तिः॥ एवमेवसर्वसंस्कारेषुवाच्यं॥ तत्रापियस्मात्पदा
र्थादन्यथाभावस्ततएवारभ्यक्रमाद्यनुग्रहार्थमावृत्तिर्युज्यते॥ नसकलस्यपूर्णाहुत्यग्निहोत्रादेःसंस्कारस्य।
एवंपूर्णाहुत्यादिसांगसंस्कारविस्मरणेपिक्रमानुग्रहायततएवावृत्तिर्नसकलस्याधानस्य। अप्सुचित्वाद्यन
धिकारिणासकलेष्टतेसकलस्य। एकदेशेएकदेशस्येति॥ तदुक्तं॥ अग्न्याधेयस्यमध्येतुविनिष्टेकिंचिदाप्यते
प्रायश्चित्तंनविद्येत आधानावृत्तिरिष्यते॥ तत्राग्निमंथनादूर्ध्वंविनष्टेमथनादितः॥ आवर्त्ततेइदंकर्मपूर्वंचेन्ना
दिकंविना॥ अत्राप्यनग्निसाध्यस्यकंनाभिमर्शनिवेशनवमंत्रजपादिकंनैमित्तिकसंबंधिनिमित्तेजातेअभिमर्शनि
येवकर्त्तव्यंनावृत्तिः॥ अनग्निसाध्यत्वात्॥ अथवाएकदेशविनाशेनसकलस्यापिपूर्णाहुत्यादेविनष्टत्वात्। वर्ण
ण्यसमाधानार्थप्रायश्चित्तहोमासंभवाच्च। तस्यसकलस्यैवावृत्तिः नतुविनष्टादारभ्यैकदेशस्येति। एवंचसां
गस्यपूर्णाहुत्यग्निहोत्रा दे:संस्कारस्यविस्मरणेसकलस्यैवाधानस्याग्न्यगारकरणादारभ्यावृत्तिःस्ताच

कालांतर एव कर्त्तव्या॥ तदानीमसंभवात्। नहिद्वादशकालीनसाधानं उपास्तमयादिनियतकालीनपदार्थं किंचतदानी
मेवयथोक्तं कर्तुंशक्यते॥ यथोक्ताकरणे चवैगुण्यस्यतदवस्थत्वादेव। पुनःप्रयासानुपपत्तेः। आधानारंभानंतर
प्राक्समाप्तेरजोदोषउत्पन्ने कालांतरे पुनरावृत्तिरेव। सूतकादिसमुद्भवेचनावृत्तिः॥ एवमतद्भयप्रदर्शितिपिने
मित्यहोमेपि भाविनीवृत्तिराश्रीयतइतियुज्यते। कथं। अन्यथानुपपत्तेः समानत्वात्॥ तथाहि। अंगानिद्विविधा
नि॥ नित्यानिनैमित्तिकानिच॥ तत्रयद्यपिपवमानादियागाअत्र विहितास्तथापिप्रयाजादीन्यत्रविहितान्य
पितदंगत्वाद्यथात्र क्रियंते॥ तथानैमित्तिकान्यपीति। अथनक्तं तत्रोपदेशादितिन्यायेनसवा अग्नयेपवमाना
यनिर्वपेतीत्यादिवाक्यैः सांगंकर्मात्रविधीयते। तेनप्रयाजादीनामथत्रैचविधानंनान्यत्रेतिप्रयाजादिषुभावि
नीवृत्तिर्युज्यतेननैमित्तिकेष्विति। यदुच्यते ततइत्रापिसमानं। नित्यानामिवनैमित्तिकानामप्यत्रैवविधानादिति॥
अस्मिन्नपिमते प्रागग्न्युत्पत्तेर्निमित्तापातेआवृत्तिरेव॥ अग्न्यभावेननैमित्तिकहोमस्यासंभवादित्यलंविस्तरेण॥
रजोदोषेतुविशेषः अर्वाक्पूर्णाहुतिदानाच्चेदाधानेस्त्रीरजस्वला। तदृतुशुद्धौपुनराधानमातृपूजनपूर्वकं। स्यातातात्र
रणीतत्रयोनिःसैवोत्तरस्तथा। प्रसूतायामप्येवं॥ समानन्यायात्। सूतकापातेत्विष्टं तंभवत्येव। शुद्धोहोमप्रारं
नः। अथ प्रकृतमुच्यते॥ एवं सर्वत्र॥ ॥ यत्र यत्र व्यक्तं जुहोतीतिविधानं॥ यथायूपाहुतिंजुहोतिषड्ढोतारंजु
होतिसावित्राणिजुहोतीतितत्रसर्वत्र एवं निरूप्याज्यंगार्हपत्येधिश्रित्यस्रुक्स्रुवंच संमृज्येत्यादिसर्वंभवति॥ ॥

वरंददामीतिवाग्विसर्जनं॥ ॥ पूर्णाहुतिहोमानंतरं वरंददामीतिमंत्रेणयजमानोवाग्विसर्जनंकरोति॥ वाचंयच्छ
पूर्णाहुते रित्यत्रयद्वाग्यमनंकृतंतस्यात्रविसर्गउच्यते। ततोयजमानोध्वर्यवेवरंददाति॥ ॥ तस्मैवरंददातीतिवच
नात्॥ वरशब्दोयस्मैदीयतेतदभिलषितंस्वाधीनंवस्तुहिरण्यादिस्यद्दातुंशक्यतेतदभिधीयते॥ तदत्रब्राह्मणोध्वर्यवेव
ददातीति॥ तयोरत्रोपयुक्तत्वात्। ननुयजमानाभिलषितमपिवस्तुवरशब्देनवक्तुंशक्यते॥ नेवं॥ सहोवाचवरंन
वेगौतमायदद्मइतिसहोवाचगंधववितेआतर्वरंददातारइत्यादौसर्वत्रपराभिलषितएववरशब्दप्रयोगात्॥ तेनय
स्मैदीयतेनयोऽर्थीयतेसएववरः॥ सामर्थ्यात्तु स्वाधीनोयश्चदातुंशक्यतएव॥ नसर्वस्वादि॥ उत्तरकर्मविघातप्र
संगात्॥ तस्मात्स्वाधीनद्रव्यजातस्यगोवासोहिरण्यादेः किंचिदेकंवस्तुवरंददातीतिविधानेसर्वत्रदातव्यमिति।
आचार्येणपूर्णाहुतितोन्योस्वाहुतिधर्मप्राप्तिरभिहिता। शुल्बेतुअनुधृताभ्यस्तमयाहुतावेतेधर्माःपठिताःसंनि
गार्हपत्येआज्यमधिश्रित्यत्येवमादयः॥ आचार्येणच तदा यएवधर्माः पूर्णाहुतौ उपसंहृत्यान्यत्रातिदिष्टाः
तेषुचान्वारंभणंवरदानंचनपठितं॥ अतस्तयोरन्यास्वाहुतिष्वभावः॥ अतएवोपसदाहुतौअयःशयान्वारंभ
इत्यन्वारंभःपुनर्विहितः। राजसूयेपूर्णाहुतौवरदानंचतदंतेपूर्णाहुतिंगृहीत्वाच्छंतोवरदक्षिणेति॥ अतोनयोःपुनर्विधा
नादप्येवनिश्चीयतेयदनयोरनतिदेशइति। वाग्यमस्याप्यत्रप्रासंगिकत्वादन्यत्रानतिदेशः॥ द्वादशाहोते तनू
हवींषिनिर्वपतिमासेद्वितीयेतृतीयेषण्मासेस्येसंवत्सरेसद्यो वानवा॥ द्वादशाहोतेआधानदिवसात्द्वादशेहनि

॥५०॥
॥देवया०४

मासे

तनूहवींषि अग्नये पवमानायेत्यादीभि निर्वपति। प्रथममासे॥ द्वितीयमासे॥ तृतीयौ। षण्मासेवा॥ संवत्सरे वा॥ स
द्यावापृथण्डिस्सनंतरं तस्मिन्नेवाह्नि। एते सर्व्वे समविकल्पाः। शांखायतरेद्व्यहत्र्यहेचतुरहेर्धमासेइत्यपिविहितमस्ति
द्वादशाहांतइत्यत्रांतग्रहणात्सर्वत्रद्व्यहांतमासांतद्वितीयांतसंवत्सरांतइतिज्ञेयं॥ न्यायस्यसमत्वादिति। अथवा
तनूहवींषिन निर्वपति। पूर्णाहुत्यंतमेवकरोति॥ तदाहुरेत्तामेवाहुतिं हुत्वाथोत्तराणिहवींषि विना इत्येतेतिश्रुतेः॥ तनूह
वींषी ति वक्ष्यमाणानां हविषां संज्ञा संव्यवहारार्थात्तनूहवींषीसेवमादौ। तान्याह॥ ॥अग्नयेपवमानायप्रथमा॥ तत्रा
ग्नयेपवमानायाष्टाकपालः प्रथमं हविर्भवति अग्न्यन्वाधानादिकर्म्मापिवर्गंतं। तत्रब्रह्मवरणाभावः॥ पूर्वमेव
ब्रह्मणः प्रकृतत्वात्॥ चत्वार ऋत्विजः प्राश्नंति अग्न्याधेये ब्रह्मा सामानि गायतीतिश्रुतेः। अन्यत्सर्वं भवति॥ अग्नये
पावकायाग्नये शुचये द्वितीया॥ ॥द्वितीयाइष्टिर्द्विहविष्का भवति॥ अग्नये पावकायाष्टाकपालः प्रथमं हविः॥ अग्नये
शुचयेष्टाकपालो द्वितीयं॥ अष्टाकपालाः सर्वे पुरोडाशाः भवंतीति वचनात्॥ त्रयोप्यष्टाकपालाः केवलं बर्हिः प्रथमं
हविर्भवति समानबर्हिषी उत्तरे इति वचनात् प्रथमायामेकं हविः उत्तरा द्विहविष्का॥ एते त्रयोपि पुरोडाशा आग्नेयधर्मकाः॥
तेनाष्टाकपालत्वाद्विसर्वमाग्नेयवद्भवति॥ ॥आदित्यै चरुस्तृतीया। तृतीयाइष्टिरदित्यै चरुर्भवति॥ अथादित्यै चरुं निर्वप
ति श्रुतत्वात्॥ अत्र शांखायनसूत्रादाय्ययोरिष्ट्यो रष्टादशोध्याये कांडानि। तृतीयायां विंशतिरिति॥ तथाच शांखायनः पांच
दश्यं च सामिधेनीनां समदशादित्याया मिति॥ एकस्तनूहविषामयं पक्षः॥ पक्षांतरमाह॥ आग्नेय एव वा पुरस्तादा दि

॥५०॥
॥भाष्ये॥

त्यस्य॥ अथवा आदित्यस्य चरोः पुरस्तादाग्नेय एव केवलो भवति॥ नत्रागुक्ते द्वे इष्टी॥ अथेदं द्वितीयमाग्नेयमेवाष्टाकपालं
पुनेडाशं निर्वपतीत्युक्त्वा अथादित्यै चरुं निर्वपतीति द्वयोरेव हविषोः श्रवणात्॥ तस्मिन्पक्षे द्वे इष्टी॥ नत्विष्टित्रयं। शांखाय
ने। आदित्येप्युपांशुत्वं पठ्यते॥ कात्यायनेन तनूहविषामेवोपांशुत्वसुक्तमस्ति। तनौ विद्युत्पवमानादीनां त्रयाणामेव॥ ना
दित्यस्य॥ सप्तैतास्तिस्रस्तनूरित्यादिश्रवणात्॥ अधुनाउभयपक्षेपि तनूहविषां दक्षिणामाह॥ ॥षड्दक्षिणाप्रतिविष्टि
अरद्दातिद्वादशचतुर्विंशतिं वा। षड्गावः अत्र दक्षिणा ददाति। द्वादशवागाः चतुर्विंशतिवागाः। तां वे षड् यो द्वादश दद्यात् च
तुर्विंशतिदद्यादितिश्रुतत्वात्॥ ताश्च प्रतीष्टि विभज्य दद्यात्॥ नतु प्रतीष्टि समुदिताः। तेन षट्पक्षे प्रथमायां तिस्रः॥ द्वितीया
यां च तिस्रः। एवं द्वादशपक्षे द्वयोः षट् षट्॥ चतुर्विंशतिपक्षे द्वादश द्वादशेति॥ केवलाग्नेयपक्षे विभागासंभवात्सर्वासां त
त्रैव दानं॥ ॥भूयसीश्चयथाश्रद्धं॥ भूयसीबहुतराश्च ददाति षट् द्वादश चतुर्विंशतिसंख्या एव॥ कियतीः अधिका इत्यत्र
कायां प्रथमं वा नियम्यते त्यैकाधिका एव अत्रानुवर्तितं निवृत्त्यर्थमाह यथाश्रद्धमिति॥ यावतीषु श्रद्धा भवतीत्यस्मि
र्थः॥ यावदवधारणइत्यनेनाव्ययीभावो यथाश्रद्धमिति॥ ततश्चतुर्विंशतेरूर्ध्वं आपरार्द्ध्यादियावतीर्दातुमिच्छेत्तावतीर्दद्यादि
र्थः॥ कथं पुनः षडादिदानेपि कर्मसिद्धौ जातायामधिकादानं तु श्रद्धस्यात्॥ द्रव्यव्ययस्य दुःकरत्वादितिचेत्॥ उच्यते। गुणवि
शेषफलविशेषइति न्यायात् दक्षिणासंख्याभूयगुणस्याधिक्यात्फलभूयस्त्वं कामयमानस्य भवत्येवाधिकदाने प्रवृत्तिः॥
तथा सति अधिकदानगुणातिशयादग्नये यामहावीर्याः स्युस्तेषु वाक्रियमाणा निसर्वाणि कर्माणि महाफलानि स्युरिति॥
तेन षडादिसंख्याभिः पंचविंशत्यादीनां भूयसीनां च विकल्पः विशेषश्चेति मंतव्य॥ तथाच श्रुतिः एवामात्रा दक्षिणा ना

॥८५१॥
॥देवया०४

द्यात्त्वेवयथाश्रद्धंभूयसीरिति॥एषामात्रा॥मीयतेऽनया मेयमितिमात्रापरिमाणं॥एषातावद्धि दृष्ट्यतउक्तामात्रा नडा दिक्षा
किमेतावत्येव॥नकिंतर्हिदद्यादेवयथाश्रद्धंभूयसीरितिश्रुत्यर्थः॥एतदुक्तसंख्यात्रयाधिकापिवैकल्पिकीदक्षिणा॥तत्
एवेत्यर्थः॥तथाचशाखांतरे॥एकादेयाषड्देयाद्वादशदेयाश्चतुर्विंशतिदेयाशतंदेयंसहस्रंदेयमपरिमितंदेयमिति
नादानस्यपक्षांतरत्वेनैवश्रवणं॥नतुषडादिभिःसमुच्चयेन॥यत्तुषड्भ्योप्यूर्द्धंभूयस्यइतिकथयंतितेषांद्वादशाचचतुर्विंशतिविधी
अनुवादावेवस्यातांभूयस्त्वेनैवतदर्थसिद्धेः॥येपिमन्यते॥षड्भ्यो द्याअन्यात्अपियथाश्रद्धंभूयसीर्दद्यादिति॥तस्यापाय
दोषः॥षड्त्वमपितस्यव्याहन्येत॥संख्यांतरोपजननात्तस्माद्भूयसीदानंचतुर्थःपक्षः॥आपस्तंबः॥यद्येनाद्यो
ग्नीनादधीतकाममेवैकांगांदद्यात्सोगवांप्रत्याम्नायोभवतीतिविज्ञायतइति॥ ॥धेनुरादित्य॥आदित्यस्यचराधे
नुर्दक्षिणा॥तस्यैधेनुर्दक्षिणेतिश्रुतेः॥ताएताःषडादिदक्षिणाइत्यष्टांगं नत्वाधानांगं॥कुतः॥उलूखलमुसलोभयांपूह वि
यज्ञं [illegible]तीतिप्रकृत्यसएषयज्ञोहतोनदद्[illegible]तंदेवादक्षिणाभिरदक्षयन्नितिउलूखलमुसलादि हतस्य संमृध्यर्थ
मेवदक्षिणायाःश्रुतत्वात्॥अस्याश्चैतायाःप्रयोजनंनवेतिसूत्रात् अथोत्तराणिहवींषिनाद्रियतेतिश्रुतेश्चइष्ट्य
करणपक्षेदक्षिणायाअप्यभावः॥अनृतातिथ्यपनोदपूतिदारुवीधानंवीसिपक्वंनाप्युदकानिवर्जयेत्॥यजमानःअन्
तमिथ्याभाषणं॥अतिथ्यपनोदनंसायंकालेसमागतस्यातिथेर्निराकरणं॥पूतिदारुविधानंदुर्गंधिदारूणामग्नौप्रक्षेपणं॥ ॥१॥
तस्मात्तेपूतयोवांतीतिसएवायंच्छुकःपूतिरभवदिसादेःपूतिशब्दस्यदुर्गंधिवाचित्वदर्शनात्॥अथपूतिक्लिन्न ॥८५२॥

वी०

नत्किंनेदावदिध्यादितिवाशाखांतरात्॥उष्मापक्वमितिकेचित्॥अचीसंपिष्टपचनंकंसोत्रीपानभाजनमित्य
मरः॥अबीसपक्वंअबीसशब्दःपृथिवीवाची॥योयमबीसेपृथिव्यामितियास्कोक्तेः॥अतश्चपार्थिव्यांयत्प
कंतिंदुकादितदबीसपक्वं॥नाप्युदकंनेतिशब्देननोर्हवाएषास्वर्ग्यायदग्निहोत्रमितिश्रुतेरग्निहोत्रमुच्यतेतेन
अग्निहोत्रार्थमुद्धरणात्कृतेतत्समाप्तियावदुदकपानंनकुर्यात्॥अथवानाविनौकायायदुदकंतस्यपानंनकु
र्य्यादिति॥तथाचमानवे॥याअतनव्यायःस्युर्नतासामाचामेन्न[illegible] नंदावदिध्यादिति॥आपस्तंबः॥क्लिन्नंदा
रुणादध्यादत्तनव्यपानाश्रीयादिति॥यजमानआधानानंतरंएतान्यनृतादीनियावज्जीवंवर्जयेत्॥नवाऽ
हिताग्निनानृतंवदितव्यमितिश्रुतेः॥श्रौतोयमनृतप्रतिषेधः॥अतस्तदपराधेश्रौतंप्रायश्चित्तं॥इतरच्छा
खांतरात्॥अधिकारित्वाविशेषात्पत्न्याप्येतेनियमाभवंत्येव॥आ[illegible]चार्योग्निनित्यधारीक्षीरहोम्यग्निमुपश
यीद्वादशरात्रंषड्रात्रंत्रिरात्रमंततः॥यजमानआधानंतरद्वादशरात्रमथवाषड्रात्रमथवाऽंततःअतिम
क्षेत्रिरात्रंब्रह्मचारीभवेत्॥तथाग्निनित्यधारीअग्नीन्गार्हपत्याहवनीयदक्षिणाग्निसभ्यान्नित्यंधारयेत्॥
तथाक्षीरहोमीदुग्धेनैवाग्निहोत्रंजुहुयात्॥तथाअग्निमुपशायीअग्निसमीपएवभूमौशयीत॥अतएव
ब्रह्मचारीत्यादिपुरुषविशेषणत्वेनश्रवणादेतेनियमाः॥पुरुषार्थाः॥तेनसोमाधानेसमारोत्याग्नीइतिसम
रोपस्यकृत्वार्थत्वात्तेनपुरुषधर्माग्निनित्यधारित्वंबाध्यते॥ततश्चतयोरेवनित्यधृतयोर्गार्हपत्याहवनीय

॥५२॥
॥देवया०४

वोस्तत्रारण्योः समारोपः क्रियते॥ अनपवृत्तत्वात्। अत एव पुनराधानेहृतेत्रिरात्रादिमध्येऽमावास्यायां तेषव
र्वाकृत्वर्थस्य क्षीरहोमीत्वस्य पुरुषार्थस्य बाधः॥ वरुणप्रघासादिपातसमारोपणाग्निनित्यधारित्वस्य —
अत एव नित्यधारित्वविधानात्सायंप्रातर्होमदर्शपूर्णमासतदन्वारंभणीयादिसर्वप्रसंगात् तस्मिन्नेव नि
धते विहारे कर्त्तव्यं॥ प्रतिकर्मेद्धिरणमप्रसंग इत्युक्तत्वात्॥ अग्न्याधेयमुक्तं॥ इदानीं श्रुतिक्रमानुसारेण पु
नराधेयमुच्यते॥ पुनराधेयमाधानाप्रतिज्ञातस्य॥ पुनराधेयमिति वक्ष्यमाणस्य कर्मणः संज्ञा॥ उभयानु —
ने पुनराधेयं चेत्येवमादौ सव्यवहारात्॥ तत्पुनराधेयमाधानाप्रतिज्ञातस्य यजमानस्य भवति॥ आधानेन लक्ष
णयस्याप्रतिज्ञातमप्रकारमुपज्ञाय तेसआधानाप्रतिज्ञातः इति भर्तृयज्ञाचार्यव्याचक्षते। यस्याधानानं
तरमेवाप्रतिज्ञातमपगतं स आधानाप्रतिज्ञात इति कर्कः॥ अत एव श्रूयते॥ अस्याधानमपार्थकं स्यात्स पुनरादधीति॥
ततो योऽग्नीन्नाधाय सर्वज्यानिं जीयते स पुनरादधीतेति। सूत्रार्थस्तु॥ प्रतीतः प्रसिद्धो ज्ञातः प्रतिज्ञातः प्रादयो गता
द्यर्थे प्रथमयेति समासः॥ योधनवृत्ताध्ययनादिमत्तया तिप्रसिद्धः पुरुषः स प्रतिज्ञात इत्युच्यते॥ न प्रतिज्ञातः अप्र
तिज्ञातः यः प्रागाधानाल्लब्धप्रतिष्ठोपि अग्न्याधानसमनंतरं संवत्सरादर्वागेव वित्तमानादिहानेलभिभाव
इः प्रतिज्ञातोप्रसिद्ध इव स्यात्॥ अप्रतिष्ठ इव भवेत्स एवमुच्यते तस्यैद दुष्टाग्न्युत्सर्गे पूर्वकमदुष्टाग्न्युत्पादकं पु
नराधेयसंज्ञकं कर्म्म भवति॥ तथाथर्वणेपठ्यते॥ आधानऋद्धिहानिश्चेदर्वाक्संवत्सराद्गृहिण्यामग्निहोत्रमुत्सृ
ज्य पुनर्वसौ पुनरादधीतेति॥ शांखायनश्च॥ काम्यं पुनराधेयमजानानस्येति॥ अस्यार्थः॥ आधानसंस्कृते अग्निषु

आधानेन लक्षणेन निमित्तेनाप्रतिज्ञातः आधानाप्रतिज्ञातः ४

॥५२॥
॥का०५॥

पुत्रादिकामप्राप्त्यर्थानि कर्माणि कुर्वन्नपि अग्निदोषाद्यः कामान्न प्राप्नोति सोऽजानान इत्युच्यते॥ तस्य दुष्टाग्निपरित्यागेन
अदुष्टाग्न्युत्पादकतया काम्यं कामेभ्यो हितं पुनराधेयं भवतीत्यर्थः। आपस्तंबः अग्नीनाधाय तस्मिन्संवत्सरे यो
न धुर्यात्स पुनरादधीत प्रजाकामः पशुकामः पुष्टिकामोऽन्यान्यपुत्रमत्स्ययि मिति॥ मानवे च॥ आहितेषु व
र्द्धमानः पूर्वां पौर्णमासीमुपोष्याग्नये वैश्वानराय द्वादशकपालं निर्वपेत्पौर्णमास्यां ज्वलतो विसृजेदग्न्याधेयेन
व्याख्यास्यामो यथाम्नातं वर्षासु शरदि पुनर्वस्वोरनुराधासु चेति। काठके च॥ व्यृद्धे पुनराधेयमिति॥ तेन भर्तृय
ज्ञकृतव्याख्यातं युक्तमिव भाति॥ अथवा अयमर्थः॥ प्रतिज्ञाशब्दः प्रियवचनः॥ कुतः॥ एतद्धास्य प्रतिज्ञा
ततमं धाम यथा प्रियो वा पुत्रो हृदयं वेत्यादौ तथा दर्शनात्॥ हरिस्वामिभिर्मधिवाचा ... येष्वेतथैव व्याख्या
तत्वाच्च॥ अतः प्रतिज्ञातं प्रियं। न प्रतिज्ञातमप्रतिज्ञातं अप्रियमित्यर्थः॥ आधानसमनंतरमेव सर्वस्वहानिपु
त्रमरणप्रतिष्ठाहान्याद्यनिष्टदर्शनाद्धानं अप्रतिज्ञातं अप्रियं अनिष्टफलत्वादवस्तु यस्य आधानप्रतिज्ञा॥
तस्याधानाप्रतिज्ञातस्य पुनराधेयं भवतीति॥ अयमेवोज्ज्वलसूत्रार्थः। फलांतरमाह॥ राज्ययशस्कामस्य वा॥
राज्यकामस्य यशस्कामस्य वा पुनराधेयं भवति वरुणो ह नद्वाज्यकाम आदधे सोमो यशस्काम इति। तथा —
ह भवति राज्यं गच्छति॥ य एवं विद्वानाधत्त इति श्रवणात्॥ त्रिरात्रावरमग्नीनुत्सृज्य। त्रिरात्रावरं नित्यहर्माणि
मपक्षभूतं यस्य स त्रिरात्रावरः कालः॥ तेनांतिमपक्षे त्रिरात्रमग्नीनुत्सृज्य गार्हपत्याहवनीयदक्षिणाग्नीन् —
चोत्सृज्य पुनराधेयं भवति। अत एव त्रिरात्रावरमित्युपदेशा चतुरात्रे पंचरात्रे षड्रात्रादि संवत्सरपर्यंतं पुन।

ने

भ

म

॥८५३॥
॥देवया०४

धे यस्य पुरस्तादग्नीनामुत्सर्गः कर्त्तव्यः॥ तथा चापस्तंबः॥ संवत्सरं परार्द्ध्यमुत्सृष्टाग्निर्भवति तिरोहिण्या पुन
र्वसू आदधीतेति॥ नक्षत्राणि वर्षासु शरदि वादधीत कृताकृताः संभारा इति॥ अग्नीनिति बहुवचनस्यात्र [illegible]
पुरुत्सृष्टेषु च रितार्थत्वात् त्रयाणाम् वोत्सर्गः। न सर्वस्येति कर्त्तृः। सर्वेषामुत्सर्ग इत्युक्तं॥ अविद्योपात्त
शास्त्यार्थयोस्तु पञ्चोत्सर्गः कार्य्यः बहुवचनोपदेशात्॥ ॥सद्योवा॥ ॥अथवा सद्य एव समाने हन्य
यस्मिन्न पुनराधेयं क्रियते तस्मिन्नेवाहनि प्रातरग्नीनुत्सृज्य पुनरादधीत॥ अस्मिन्पक्षे विशेषं वक्ष्यति॥ स
द्यश्चेदिति॥ पुनर्वस्वो॥ पुनर्वसुनक्षत्रे पुनराधेयं भवति॥ पुनर्वस्वोः पुनराधेयमादधीतेति वचनात्॥ ॥वर्षासु
मध्यंदिने वा॥ वर्षासु तो पुनराधेयं भवति॥ अथवा मध्यंदिने भवति॥ दिनस्य मध्ये दिने मध्याह्नकाले इत्यर्थः॥
सवेवर्षास्त्वादधीतेति तस्मादुमध्यंदिन एवादधीतेति श्रवणात्॥ मध्यंदिनस्य वर्षाभिः सह विकल्पो न समु
च्चयः यदा मध्यंदिनाथ वर्षा इति मध्यंदिनस्य वर्षाकालेत्व संभवात्॥ कुशैराधनं॥ यदग्न्याधेयमुक्तं दार
भिर्ज्वलंतमादधातीति॥ तद्य इध्मेनोद्धरणमिति च तदुभयमत्र कुशैः कार्यं॥ तं वेदभैरुद्धरतीति श्रवणात्॥
सद्योग्न्युत्सर्गपक्षे विशेषमाह॥ व्रीह्यपूपमर्कपलाशयोः पक्वं गार्हपत्यस्थाने निदधात्येवमाहवनीयस्य
यावपूं सद्यश्चेत्॥ यदि सद्योग्नय उत्सृष्टास्तदायं विशेषः॥ व्रीह्यपूपं व्रीहिमयमपूपं अर्कपत्रयोः कपा
लस्थानीययोः लौकिकाग्निना वा आवसथ्याग्निना वा पक्वं गार्हपत्यस्थाने निदधाति एवं यवमपूपं ॥८५३॥
॥भा०॥

३०

वमपूपं एवमिति अर्कपत्रयोः कपालस्थानीययोः पक्वं आहवनीयस्थाने निदधाति॥ अपूपस्थापनं च स्मार्त्त
न्यं च संस्कारानुत्कृत्वा शीतमुल [illegible] रवनं च कृत्वा कार्यं ततोन्वारब्धे भ्युक्षणादि। यतः संभारेष्वग्निनिधान
मुक्तं भूर्भुवः इति संभारेष्विति॥ अपूपनिधानं विधाय पूर्वाभ्यामेवेनायतदग्नि भ्यामंत इध्म इति वदं ततस्तथान
कुर्याद्रात्रिभिर्द्वैवांत्तर्हितो भवत इति। रात्र्यंतद्धनि पक्षे पूपनिधान निषेधान्सद्यश्चेदित्युक्तं॥ आग्नेयः पंचक
पाल उपांशु प्रागुत्तमादनुयाजात्॥ अत्र पूर्णाहुत्यनंतरं तन्वूहवीषा स्थाने इदमुच्यते॥ आग्नेयः पंचकपा
लः पुरोडाशः कर्त्तव्यः। स च प्रागुत्तमादनुयाजात्॥ उत्तम याजा तु पूर्वं उपांशुः कर्त्तव्यः॥ आग्नेयमेव पंचकपालं
पुरोडाशं निर्वपतीति प्रकृत्य तेनोपांशु चरस्य वैरुत्तममनुयाजं यजतीति श्रुतेः प्रागित्युक्तं॥ आग्नेयमेवेत्येव
कारकरणादन्येषां तन्वूहविषां निरासः। तेन पुनराधेये आग्नेय एव केवलो भवति॥ न पवमानाद्या इष्टयः॥ तद्
ज्जवा॥ अथवोत्तमनुयाजं वर्ज्जयित्वान्यत्सर्वं कर्मोपांशु भवति। तेनोपांशु चरतीति चरणशब्दश्रवणात्॥ च
रणशब्दे सर्वमित्युक्तत्वात्॥ उच्चैरुत्तममनुयाजं यजती सुत्तमानुयाजमात्रस्यैवोच्चैर्विधानाच्च। तस्मादय
मेवपक्षः॥ अग्नीनिति वा प्रथमे प्रयाजेनुयाजे च। प्रथमे प्रयाजे प्रथमेनुयाजे वाग्नीनूयजेतिवा त्रयो न्ये
वा समिधो यजेति देवान्यजेति वा। सत्राश्राव्याह समिधो यजेति इति प्रकृत्याह अग्नीयजेतित्येव ब्रूयादिति
उभयथा श्रवणाद्विकल्प उक्तः॥ परं तु अग्नीनूयजेतित्येव ब्रूयादित्येवकारादवधारणे एवायं वाशब्दः॥ तथा
चानुयाजेपि अथ यद्देवान्यजेत्यग्नीन्यजेत्येवैतदाहेति नियमेपवनिश्रवणे॥ ॥आज्यभागौ हितौ [illegible]

॥५८॥
॥देवया०८

येपवमानायेंदुमतेवा॥ अत्रप्रथमआज्यभागआग्नेयएवद्वितीयस्त्वग्नयेपवमानाय अग्नयेइंदुमतेवाकर्त्त
व्यः॥ नसोमायेति। वचनात्‌आ य द्वितीयेआज्यभागेदेवताविकल्पः॥ ॥हिरण्यंदक्षिणानड्वान्वाग्न्याधे
यिकीश्चेच्छ्रुतेः॥ अस्मिन्नाग्नेयेहिरण्यंदक्षिणाभवति॥ अनड्वान्बलीवर्द्दोवा॥ तस्यहिरण्यंदक्षिणा
ति। अनड्वान्वोसहिवहत्याग्नेयइतिचश्रुतत्वात्॥ इछंनगन्याधेयिकीः॥ आग्नेयसंबंधिनीःतांवैषट्चाद्या
दिकाश्चदेयाति। कुतःश्रुतेः॥ ता उभयीर्ददात्यग्न्याधेयिकीःपौनराधेयिकीश्चेतिअग्न्याधेयीकीदत्वापौनराधेयि
कीर्ददातीतिच शारंवातरेउभयीनांदानश्रवणात्॥ तत्पुनर्नोपपद्यते। यतोस्मिन्वाक्येअग्न्याधेयिकीर्दद्या
त्यनुवादएवायमितिपूर्वमीमांसकैः सिद्धांतितमस्ति॥ अग्न्याधेयिक्योयतःपूर्वंदत्ताःअतःपौनराधेयिक्य
इति। तेनात्रश्रुतिग्रहणंविध्याशंकानिरासार्थं॥ अन्यथाअग्न्याधेयिकीश्चेत्येतावदुक्ते शारवांतरीयवचनमूल
विधित्वमाश्रयणीयस्यात्॥ ॥अग्न्याधेयवदन्यत्सर्व्वः॥ अत्रपुनराधेयेउक्तादन्यत्सर्व्वंअग्न्याधेयवद्भवतिके
सःपरिधानादिपूर्णाहुत्यंतं॥ ब्रह्मचर्यादिसर्व्वंनियमाश्च॥ विशेषमाहसद्यइतिइदंचसद्यएवसमानेएकस्मिन्न
वाहनिभवतिनाग्न्याधेयवद्द्व्यहं॥ अत्राग्न्यागारकरणनभवति॥ तयोर्विद्यमानत्वात्॥ अत्तएवारणिप्रदानंच॥ उद्धु
सोपिनभवतीत्यग्निसंस्कारत्वादितिकेचित्। सर्व्वमपिपुनर्भवतीत्यपरे॥ अदृष्टार्थत्वात्॥ वचनंविनापरित्यक्तुमश
क्यत्वाच्च॥ तथाचकाठके॥ पूर्वेद्युर्वैश्वानरीयेष्ट्योत्साद्यग्नीन्संवत्सरंपुनरादधीतयद्यग्न्याधेयंतत्पुनराधे
यमिति॥ तथासोमयाजीचेत्पुनरादधीतनसन्नयेदसोमेज्याःसन्नयेदितिबादरायणइति। पुनराधा नप्यनेनैव

॥५८॥
॥भाष्यं॥

२ देःपुरुषार्थत्वाद्वरुणप्रघाससोमादौ तथैनैसमारोपेणतस्यबाधः॥ अमावास्यायांप

न्यायेनैवमादिसर्व्वंपुनःकर्त्तव्यं। तत्रद्वादशरात्राद्यग्निधारणेकृतेतन्मध्येतेष्वेवनित्यधृतेष्वग्निषुपशुचा
तुर्मास्येष्टिकृतवेकृतेष्ट्यादिसर्व्वंकर्त्तव्यं॥ अग्निनित्यधारीत्यांवाग्वाहोमेनक्षीरहोमित्वस्यच॥ अधुना
पुनराधेयस्यपक्षांतरमाह॥ ॥अपराह्णेमैत्रावरुणीवशाऽनस्तमितेपुरोडाशेडांतंकृत्वारात्रिंश्रृतयाप्रात
श्चरतिततआधानं। पुनराधेयदिवसात्पूर्वदिनेपराह्णेमैत्रावरुणी मित्रावरुणदेवत्यावशावंध्यागौरा
लभ्यते। तस्याश्चानस्तमितेसूर्यस्तितात्प्राकूपशुपुरोडाशेडांतंकर्म्मकृत्वारात्रिंश्रृतयावशयारात्रौवि
वासनादिश्रपणांतंकृत्वाद्वासनादिप्रातःप्रचरंति॥ ततोवशासमाप्त्यनंतरंसद्योग्नीनुत्सृज्याधानंपु
नराधेयसंज्ञंकर्त्तव्यं॥ प्रागुक्तेष्वेवकालेषु॥ तस्मिन्पक्षेपूर्वदिनेमैत्रावरुण्यावशायाःकरणविधान
त्रिरात्रावरमग्न्युत्सर्गेनभवति। तत्स्थानेमपूर्पातद्दानमपिनभवतीतिकेचित्॥ सद्यश्चेदित्युक्तत्वाद्
वत्यवेत्यन्ये पुनराधेयमुक्तं॥ इदानींश्रुतिक्रमानुसारेणाग्निहोत्रंवक्तव्यं॥ तदनादत्यशारवांतरदृष्ट
क्रमेणातदंगभूतमुपस्थानमाह॥११॥ सायमाहुत्यांहुतायांयजमानोग्नीउपतिष्ठेतवात्सप्रेण॥ सायमा
हुत्यांहुतायांसत्यांशारवांतरात्समिदसीतिसमिदाधानानंतरंयजमानोग्नीगार्हपत्याहवनीयौवात्सप्रेण
वक्ष्यमाणेनवात्सप्रसंज्ञकेनउपस्थानेनोपतिष्ठेत। तस्मैकमग्नीउपतिष्ठेतसायमुपतिष्ठेतीतिश्रुतेः कण्वानां
समिदसीतिसमीदाधानमंत्रंसमनंतरमुपप्रयंतइत्याद्युपस्थानमंत्राणांपाठादयंक्रमोवसीयते॥ पर्युक्षणात्प्राक्। तस्या

॥५५॥
॥देवया०४

ग्नि विसर्गार्थत्वाद् विसृष्टस्य चोपस्थानार्हत्वादत्त एव वाग्विसर्गात्पूर्वमुक्तं ॥ वाग्यमस्य कर्तृधर्मस्य सकलप्रयोगार्थत्वाद् दिति
न वा ॥ अथवा वात्सप्रेणोपतिष्ठते ॥ अथ यस्मादु पैव तिष्ठेतेन यस्मान्नोपतिष्ठेतेति विहितत्वात् सिद्धत्वाद्विकल्पः ॥ अ
त्रोपप्रयंतो अध्वरमित्यत आरभ्य परि ते दूडभ इत्यंतं वात्सप्रोपस्थानसमाम्नायक्रमेणैव कर्तव्यं ॥ तत्र विशेषमाह ॥ ति
सृस्त्रिरुपप्रयंतो ॥ अस्य प्रत्नामपरि ते चित्रावसविति च ॥ अस्मिन्वात्सप्रोपस्थाने उपप्रयंतो अध्वरं अस्य प्रत्नामनु द्युतं ॥
परि ते दूडभ इत्येतास्तिस्र ऋचो यथास्थानस्थिता एव त्रिर्जपति ॥ चित्रावसो स्वस्ति त इत्यपि स्वस्थानपठितमेव त्रि
र्जप्तव्यं ॥ स वै त्रिः प्रथमां जपति त्रिरुत्तमामिति ॥ अथाग्ने पीतदग्नय इति प्रक्षेपे सकृत्त्रिरेतज्जपति ॥ चित्रावसो स्वस्ति ते पा
रमशीयेति त्रिरेतज्जपतीति च श्रवणात् ॥ नामग्रहणादेव त्रित्वे सिद्धे ॥ तिस्र इति यदृग्ग्रहणं स्वस्थानपठितानामेव त्रि
र्जपप्राप्त्यर्थं ॥ संत्वमित्युपविश्य ॥ उपप्रयंत इत्यारभ्य स्वस्ति ते पारमशीयेत्येतत्पर्यंतमाहवनीयसमीपे तिष्ठन् ज
ची पित्वा अथैतं आहवनीयसमीप एवोपविश्य सं त्वमग्ने सूर्यस्येति जपति ॥ एतावन्नु तिष्ठन् जपत्यथासीनः संत्वमग्न
इति श्रवणात् ॥ गां गच्छत्वंधस्थेति ॥ ततोंऽधस्थांधो व इति मंत्रेण माप्रगा ते यंतेन गां प्रति यजमानो गच्छति ॥ अंगमन्ये थ:
संधस्थेत्यपि ति श्रुतेः ॥ गोष्वाग्निहोत्र्येव संनिधानादिके चित् ॥ अन्यामपीत्यन्ये ॥ अग्निहोत्रीपक्षे तु पयोहोमपक्षस्य
वैतदुपस्थानं नान्यद्रव्ययवागूवादिहोमपक्षे इति ॥ अन्यपक्षे सर्वदापीति विशेषः ॥ अंधस्थांधो वो भक्षीयेति गो
ष्ठमुपदिष्टं तदित्यापस्तंबः ॥ तत्साधुतरं ॥ अंधस्थांधो व इति मंत्रे बहुवचनस्य दर्शनात् ॥ गामित्येकवचनस्य जात ॥५५॥
पेक्षयाप्युपपत्तेः ॥ तथा च श्रूयते ॥ समह इति व्याहरत्संराधो वै मह इति पशून्प्रकृत्य सतस्माद्येनमायतन ॥ ॥पा०४॥

द्याधेरन्वाभ्रवापयेयुरग्निहोत्रं पूर्तं त्वा मह इत्युपतिष्ठेते उत्तमं वृक्षस्थ महो ब इयस्यैवोपस्थानस्य बहुत्वविशिष्टपशु
मात्रविषयत्वेनानुवादात् ॥ संहितेसालभंते ॥ गोष्ठं गत्वा संहितासि विश्वरूपीस नेनमंत्रेण गामालभंते हस्तेन स्प
शति ॥ अथ गामभिमृशति संहितासीति श्रुतेः ॥ गार्हपत्यं गत्वोपतिष्ठत उपत्वेति ॥ ततो गार्हपत्यं प्रतिगत्वा उप त्वाग्ने
दिव इत्यत आरभ्य द्यापत : समस्मादित्यंतेन मंत्रगणेन गार्हपत्यमुपतिष्ठते ॥ अथ गार्हपत्यमभ्यैति स गार्हपत्यमुप
तिष्ठत इति श्रुतेः ॥ अत्र गार्हपत्यमुपतिष्ठत इति विशेषोपादानात्पूर्वोक्तमुपस्थानमाहवनीयस्येति ज्ञायते ॥ अग्नि
इत्युभयोरग्न्योरुपस्थानस्य विधानात् ॥ ॥ गां गच्छतीड एहीति ॥ तत इड एहीति मंत्रेण पुनस्तामेव गां प्रतिगच्छति ॥
अथ गामभ्यैतीड एहीति श्रुतेः ॥ काम्या एते त्यालभंते ॥ काम्या एत इत्यनेन मंत्रेण तां गामालभंते ॥ तमभिमृशति का
म्या एत इति श्रुतेः ॥ अतः शांखायनः ॥ अग्न्युपस्थानस्यानर्थलुप्तं प्रवसज्जपेदिति ॥ यजमानं जपेत्सर्वं नित्यं धस्थ
नसंहिता ॥ नेळेन काम्यानोर्ह्वं वः प्रोषितो यच्चनातुर इति तैत्यं ॥ ॥ सोमानं मित्यनुदकं व्रतोपायनवत् ॥ व्रतोपाय
नवदित्यनेनापरेणाहवनीयं प्राङ्तिष्ठन्नग्निमीक्षमाण इत्येतावति दिश्यते ॥ तत्र चाप उपस्पृश्येत तदपि प्राप्नोति तन्
निषेधः सनुदकमिति ॥ तच्चाविधानादेव निरस्तमप्यतिदेशात्प्राप्तिमाशंक्य निराक्रियते तेनात्रापि गार्हपत्याहवनी
न ण ययोर्मध्ये प्राङ्मुख उत्तिष्ठन्नाहवनीयमीक्षमाणः सोमानं स्वरणमित्यत आरभ्य येन रक्षसि दाशुष इत्यंतं जपति ॥ तथा
तरेणाहवनीयं च गार्हपत्यं च प्राङ्तिष्ठन्नग्निमीक्षमाणो जपति सोमानं स्वरणमिति त्रिरेतज्जपतीत्युत्तरस्य श्रवणात् ॥
अंतरेण पराग्नीगत्वेसस्याप्यत्रानेतिदेशः ॥ अत्राश्रुतत्वात् ॥ पूर्वमेवानेन यथाप्रविष्टत्वाच्च ॥ पौर्णमासवत्तु त्र

॥५६॥
॥देवया०४

ततोसितंनुरसीतिमंत्रेणपुत्रस्यनामगृह्णाति॥तथात्रापिनामग्रहणंकरोति॥तेन
नामग्रहणं॥पौर्णमासेयथा ततोसीतिपठित्वा॥इदंमेकर्मेदंवीर्यंअमुकशर्माणुसंतनोत्विति॥आत्मनोविद्यमानइति
नवेत्वेतिचसर्वंभवति॥अथपुत्रस्यनामगृह्णातीदंमेयंवीर्यमित्यादेःश्रुतत्वात्॥पुत्रस्यनामगृह्णातिपुत्रयोःपुत्रा
वा प्रियतमस्येतिलौगाक्षिरिति॥जेष्ठपुत्रस्यनामाभिव्याहरत्यभावेतोवाभवतीतिशांखायनः॥ अस्यैवोपस्थानस्य
स्थाने वैकल्पिकंक्षुल्लकोपस्थानमाह॥भूर्भुवस्वरिति वो नो॥अथवोभौगार्हपत्याहवनीयावग्नीभूर्भुवस्वरित्यने
नैवमंत्रेणसमिदाधानानंतरमेवोपतिष्ठते पूर्वमाहवनीयमुपस्थायानेनैवगार्हपत्यमुपतिष्ठते॥अथकृतेग्निहोत्रउ
तिष्ठते भूर्भुवस्वरिति॥ यद्वात्रादोर्घमिग्न्युपस्थानमासीरिवसाशीरियंतदेतावनेवतत्सर्वमाप्नोतितस्मादेतेनैवोप
ष्ठतेतिश्रवणात्॥अथोपस्थानप्रसंगात्कालिमंत्रकर्मानुसाराच्चप्रवत्स्यदुपस्थानमाह॥ ॥प्रवत्स्यन्त्सवनियैतिप्रति
मंत्र॥प्रवत्स्यत्स्वाग्निसमन्वितग्रामात्सीमामतिक्रम्यान्यत्ररात्रौवासंकरिष्यन्यजमानःप्रवत्स्यदुपस्थानार्थ
मग्नीनुधृत्यनर्यजांमइतिप्रतिमंत्रंसर्वानग्नीन्गार्हपत्याहवनीयदक्षिणाग्नीनूज्वलतउत्पत्तिक्रमेणोपतिष्ठते।प्रव
त्स्यनूज्वलतउपतिष्ठतेतिमानवः।अथप्रवत्स्यन्गार्हपत्यमेवाग्रउपतिष्ठतेनर्यप्रजामितिश्रुतेः।परिशेषादेतदक्षिण
ग्निमिति।तथानर्येतिगार्हपत्यं।सगार्हपत्यमुपतिष्ठतेनर्यप्रजामितिश्रुतेः॥शंस्येत्याहवनीयं।अथाहवनीयमुपति
ष्ठतेशंस्यपशूनितिश्रुतेः।परिशेषादथर्येतिदक्षिणाग्निं प्रवासस्वरूपमाहउक्तः॥ग्रामांतरेनगर्यांवापल्यांवान्य
त्रवाक्वचित्॥सीमामतीत्यचेद्रात्रौवासःप्रवसनंस्मृतमिति॥ ॥गच्छति॥ततःसम्यावसथ्यौतूष्णीं आग्नेयनम
इतिवानमस्कृत्ययथार्थंगच्छतिग्रहाच्चलति॥अथप्रवापव्रजतिप्रवाधावयतीतिश्रवणात्॥ वाहनरहितश्चेत्॥

॥५६॥
॥भाष्यं॥

स्वयंप्रव्रजतिपद्भ्यांप्रगच्छति॥वाहनसहितश्चेदश्वरथादीन्प्रधावयतिप्रगमयतीतिश्रुत्यर्थः॥आश्वलायनः अन्वाहिता
ग्नेःप्रयाणोपपत्तौपृथगग्नीन्नयेयुस्तुल्यंताअगिरस्तमेतिवाज्याहुतिंहुत्वासमारोपयेदयंतेयोनि र्ऋत्वियइतिअर
णीगार्हपत्येप्रतापयेत्पाणीवेति॥ ॥मत्यावाग्विसर्जनं॥गमनानंतरंकिंयतमध्वानंगत्वायत्रदेशेवाग्विसर्गस्ये
च्छाजायतेतत्रवाग्विसर्जनंकरोति॥स [illegible] पचवेत्लांमन्यते तत्स्यत्वावाचंविसृजतइतिश्रुतेः।सयत्रप्र
देशेगच्छन्वेला स्थानंवाग्विसर्गस्येमन्यतेइहप्रदेशेमुक्तोवाग्विसर्गइतितत्स्थानंगत्वावाचंविसृजतइतिश्रुत्य
र्थः॥ ॥अथवायत्रवेलांस्वनिवासग्राममर्यादांमन्यतेतत्स्थानप्राप्तिपर्यंतंवाचंयमोगत्वातदनंतरंवाचंविसृजेत्
नतुततःप्रागित्यर्थः॥इहविसर्जनस्यविधानादर्थादुपस्थानसमनंतरमेववाग्यमनंकर्त्तव्यं॥तदुक्तंकारिकायां॥अ
ग्न्युपतिकंसमारभ्यतावन्मौनंप्रतिष्ठते॥यावद्दीपिदृश्यतेहव्यवाहनसद्मनः॥अनलादर्शनीयावत्।वदोरवायम
श्रुतेः।स्वबुद्धिकल्पितादेशाइतिवाजसनेयनइति॥एवंप्रवत्स्यदुपस्थानमुक्त्वाप्रोषितस्ययजेयमानस्यकर्त्तव्यमाह॥
प्रवसन्याजमानंकुर्याद्यथाकालमात्मसंस्काराद्धर्ममात्रत्वाच्छ्रुतेश्च॥यजमानस्येदंकर्मयाजमानं।प्रवसन्यजमा
नोयथाकालंयाजमानंकर्मकुर्यात्॥योयोयस्यकालोयथाकालं।तेनाग्निहोत्रकालेअग्निहोत्रसंबंधिउदकभक्ष
णादियाजमानंकार्यं॥पौर्णमासकालेतदीयंवपन फलमूलादिभक्षणाशनव्रतग्रहणादिकंकरोति॥एवंसर्वेष्वपि
नित्यकर्मसुज्ञेयं॥कस्मात्आत्मसंस्कारात्॥अयंहेतुरुपदेशःनयाजमानमपिनसर्वं।किंतुयद्यदात्मसंस्कारकंपु
उनव्रत्याशनाधःशयनव्रत [illegible] ग्रहणादिकंतदेवनान्यत्॥इत्युपदेशः॥कुतःआत्मसंस्कारा

॥५७॥
॥देवया०४
त

त्॥ यतो वपनादिभिर्यजमानस्यात्मसंस्कारः क्रियते॥ फलप्राप्तियोग्यः क्रियते॥ तेन प्रवसतापि यदात्मसंस्कारकं सं
वपनादि तत्कर्त्तव्यमेवेति हेतुः यतः प्रोषितोपि यजमानो यजमान एव॥ तथा धर्ममात्रत्वात्॥ अयमपि हेतुरुपदेश
श्च॥ यद्यपि धर्ममात्रं यजमानं आरादुपकारकं विष्णुक्रमणामयीदमिति जपादिकं तत्कर्त्तव्यं न संनिपत्योपकारकं
वेदबंधनादिरित्युपदेशः॥ कुतः॥ धर्ममात्रत्वादेव॥ यत एवमादिकं धर्ममात्रमारादुपकारकमेव। न वेदबंधाद्य
तरइति जपवत्कर्मसंस्पर्शो इति हेतुः किंच॥ श्रुतेश्चाश्रुतेरप्ययमर्थो विसीयते॥ यत्प्रोषितेनापि यजमानं कर्त्तव्य
मिति। तथा च श्रुतिः॥ तदप्येते श्लोकाः किं स्विद्विद्वान्प्रवसत्यग्निहोत्री गृहेभ्यः कथं स्विदस्य काव्यं कथं संत
तो अग्निभिरिति कथं स्विदस्यानप्रोषितं भवतीत्येवैतदाहेति अस्यार्थः किंस्विदिति अग्निहोत्री यावज्जीवं
संकल्पिताग्निहोत्रवान्यजमानः किंस्विद्विद्वान् किंरूपमग्निहोत्रं जुहुयादित्येतद्वाक्यस्य सार्थकं भवति॥ तथाग्निभि
र्गार्हपत्यादिभिः कथं ततः संबाधो भवति॥ अस्य मंत्रस्य तात्पर्यमाह॥ कथं स्विदिति॥ अस्य प्रवसतो यजमानस्यत्र
नपप्रोषितं प्रवासदोषाभावः कथं सिद्ध्यतीति तत्प्रथमश्लोकरूपं वाक्यं प्रतिपादयतीत्यर्थः॥ एवं प्रश्ने कृते द्वितीयश्लो
केनोत्तरमाह। य विद्वा भुवनेषु स विद्वान्प्रवसन्विदे॥ तथा तदस्य काव्यं तथा संततो अग्निभिरिति मन एवैतदाह म
नसेवास्यानपप्रोषितं भवतीति॥ अस्यार्थः॥ यो मनजमनो भुवनेषु लोकेषु प्रविष्टः अनुष्ठेषु पदार्थेषु अतिशयेन
जववान्। मनसा हृत्संदूर व र्त्यपि प्र योगजातमनुसंधासुराः तइत्यर्थः॥ अविद्वान्विदेला भायप्रवसन्प्रवास

॥५७॥
॥आग॥

५८

२५

प्रवास

कारी भवति॥ तथा तेन वेदनेनास्य यजमानस्य तत्काव्यं यावज्जीववाक्यमपि सार्थकं भवति॥ तथा तेनैव वेदनेन
दूरे वर्त्तमानोप्यग्निभिः संततः अव्यवहितसंबंधु एव भवति। इमं मंत्रं तात्पर्यकथनेन व्याचष्टे मन एवैत
दिति॥ एतन्मंत्रवाक्यं प्रवासजातदोषनिर्वृत्तिं मन एव साधनमित्याह॥ तामयतोब्रूत इत्यर्थः॥ तदेव विवृणोति
मनसेवास्येति॥ अनपप्रोषितं दोषविरहः मनसैवानुचिंतनेन प्रत्यक्षमेव भवतीत्यभिप्रायः॥ तथा चापस्तं
बः। प्रवसन्काले विहारमभिमुखो यजमानो जपति प्राचो विष्णुक्रमाक्रामतीति। विष्णुक्रमा अपि विहाराभि
मुखं प्राप्तास्तदपवादति प्राचरति॥ तथा च काठके॥ प्रवसत्त उपस्थानं यजमानं चेति॥ तदुक्तं कात्यायनेन॥ नि
क्षिप्याग्निं स्वदारेषु परिकल्प्य त्विजं तथा॥ प्रवसेत्कार्यवान्विप्रो मृषैव न चिरं क्वचित्। मनसा नैत्यकं कर्म प्र
वसन्नप्यतंद्रितः॥ उपविश्य शुचिः सर्वं यथाकालमनुद्रवेदिति॥ अतः प्रवसता नित्यं कर्म यथाकालं सर्वं मन
सा चिंतनियं। यजमानस्वारादुपकारकमात्मसंस्कारकं चेदेव तो देशेन द्रव्यत्यागरूपं च विहाराभिमुखेन कर्त
व्यमिति॥ प्रवासे नानेविशेषः स्मृतावुक्तः। इक्षुक्षीरविकारांश्च आषु भ्रष्टान्यवांस्तथा॥ फलमूलानि चाश्नीया
सर्वाणि प्रोषितोग्निमान्॥ तथा परांग्निपक्कं नाश्नीयाद्गुडगोरसमंतरा। तथा। नोपवासः प्रवासे स्यात्सती
यतोव्रतं॥ असामर्थ्ये शरीरस्य भक्षद्व्याद्यभावतः स्वहस्तेनापचेदन्नमश्नीयात्प्रोषितोपि सन्निति॥ योगवि
षः स्मृतावुक्तः॥ सन्निधौ यजमानस्यादुद्देशत्यागकारकः॥ असंनिधौ तु पत्नी स्यादुद्देशत्यागकारिका॥ असंनिधौ

॥५८॥
॥देवया०४

५२

तुपत्न्यास्यादध्वर्युस्तदनुसय॥ उन्मादे प्रसवे चत्तोकि चैतितुसेयां विना॥ सर्वदा यजमानो वात्यजेत्त दिग्ध्रुरवः श्रुचिरि
ति॥ काठके॥ प्रवसंन्यदाकूतमन्येताथ भूंजीतपर्वण्णुपोष्ययदासंस्थितमेत्यैतथ भूंजीतपर्वणिपोष्ययदासंस्थितंन्येता म
पि तथा भूंजीतेति॥ अगतोपस्थानमाह॥ एत्यावमत्वावाग्यमनं॥ यजमान एत्य प्रवासाद्ग्रामसमीपमागत्य इच्छाकल्पि
द्देशो वाग्यमनं करोति॥ अथ प्रोष्य परेत्य यत्रैवैनं मन्येत तद्वाचं यच्छतीति॥ प्रोष्य प्रहृत्य ध्वनिगत्वा परेत्य प्रत्येत्य यत्र
लोस्थानं मन्येत अत्र युक्तो वाग्यम इति तत्र वाचं यच्छतीति श्रुत्यर्थः॥ वेलाराद्वा स्वनिवासग्रामम पदाभिधीयते इति
केचित्॥ समित्पाणिरनुपेत्य केचिदुपतिष्ठत आहवनीयगार्हपत्यदक्षिणाग्नीनागन्मेति प्रतिमंत्रं॥ समिधः पाणौ हस्तेऽस्य
स्यासौ समित्पाणिः प्रवासात्स्वगृहं प्रत्यागच्छन्यजमानः समित्पाणिः कृतवाग्यमः कंचिदपि गुरुपितृराजादिकमपि
अनुपेत्य तत्समीपमगत्वैव स्नात्वा आगतोपस्थानार्थमग्नीनुधृत्याहवनीयगार्हपत्यदक्षिणाग्नीनुपूर्वक्रमेणैवा
गन्म विश्ववेदसमित्यादिभिः प्रतिमंत्रमुपतिष्ठते॥ स आहवनीयमेवाग्र उपतिष्ठ तेथ गार्हपत्यमुपतिष्ठत इति श्रुतेरयमेव
क्रमः॥ तथा चापस्तंबः॥ समिधो हस्तेकृत्वा प्रवसतियथाहव [illegible] तपितरं भाषितवासं पुत्रा धीना तीव्हवा एतमग्नयः प्रया ६
मा. धावंति चिराकलंदापि वाहारंनेति॥ यथैव तत्पुत्रस्य आह रंनेति ता[illegible]दिति विज्ञायते आदग्नि न्यो वाचं यच्छतिसय
नं द्यौराजापिता वार्यो वा तरेणाग्नींत्स्याच्छेदिदर्शनेनैवमाइ येतेति॥ तथा सयद्यपि राजा तरेणस्यान्नैव[illegible]यादिति
श्रुतेरनुपेत्य केचिदित्युक्तं। तेन वाग्यमनानंतरं पूज्यजनसंनिधानेपि तद्वनादरेणाग्निगतमनस्क एव तत्समीपं
गच्छेदित्यर्थः॥ तथोपस्थानम कृत्वा प्रवासे कृते तत्रैवोक्तं॥ इहैव संतं तत्र संतं त्वाग्नये प्राणेन वाचा मनसा बिभर्मीति

॥५८॥
॥भाष्य॥

श्रौ॥ ६१

रोमासंतमायुर्मत्रिहासीज्योतिर्षैश्वानरेणोपतिष्ठते यद्यनुपस्थाय प्रवसेदेतयैव वोपतिष्ठेतेति॥ एतदागतोपस्थानं प्रसंगाद
ग्निहोत्रायैवैर्थे अग्नयो विहृताश्चेत्तत्रैव कर्तव्यमन्यथा तत्पृत्यैव॥ समिध परिसमूहनानि चोपविश्य॥ आगतेत्युपस्थाना
नंतरमेवोपविश्यतूष्णीं समिदाधानं परिसमूहनं च कांडानुसमयेन सर्वेषु कर्तव्यं॥ परिसमूहनं तृणानामपलुपनं॥ अथो
पविश्य तृणान्यपलुंपतीति वचनात्॥ अपलुपत्यपनयतीति हरिस्वामिनः॥ अग्नेस्तृणान्यपचिनोतीति शारवीतराद्य॥
परितः पतितानि तृणोपलक्षितानि समिदादीनि प्रच्छिद्याग्निमध्ये प्रक्षिपतीति माधवः॥ लुपच्छेदने। तिष्ठंत्समिधः सर्वत्रे
ति प्राप्ते वचनादुपविश्येत्युच्यते॥ अधुना प्रवत्स्यदुपस्थाने आगतोपस्थाने च पक्षांतरमाह॥ तूष्णीं वोपस्थाने पूर्ववत्॥ अ
थ वा प्रवत्स्यस्तूष्णीमेव गार्हपत्याहवनीयदक्षिणाग्नीस्तेनैव क्रमेणोपतिष्ठते॥ स वै खलु तूष्णीमेवोपतिष्ठेतेति वच
नात्॥ एत्य च॥ प्रवासादागत्यापि आहवनीयगार्हपत्यदक्षिणाग्नीस्तेनैव क्रमेण तूष्णीमेवोपतिष्ठते न मंत्रेण॥ शांखाय
ने विशेषः॥ अनुपस्थाय प्रसर्गे प्रतिदिश मुपस्थानमुपस्थाय प्रसर्गे यथा प्रोष्यति। मौनं केचित्। उपस्थाय चेत्प्रवसेत्पुनर
स्योपतिष्ठत यद्यनुपस्थिताग्निं प्रवासमापद्येत इहैव संतस्तत्र संतं त्वाग्ने हृदा वाचा मनसा विभर्मीति रोमयज्ञं आसुमत्रि
हासीद्वैश्वानरस्य त्वा चक्षुषोपतिष्ठ इति॥ काठके च॥ उपस्थितेष्व प्रवसन्नेवमेवोपतिष्ठतानुपस्थाय प्रवसन्प्रवत्स्यदुप
स्थानेन प्रतिदिशमुपतिष्ठेतेति॥ तथान्यदपि तत्रैवोक्तं॥ यदाकूते ग्निहोत्रे संस्थिते वा तत्र आगच्छेदागत्योपस्थानमेवा
स्य तदहः स्यान्न निरसमनुपस्थानं न याजमानमित्येके। विसंस्थिते वा तत्र आगच्छेदागतोपस्थानेनोपस्थाय यदत्ते
याजमानं तज्जपेन्नातीतं जपेदिति लौगाक्षिरिति॥ कारिकायामपि॥ बेलाद्राजादिपुरुषाय जमानं नयतिश्चेत्॥ नत्रय

छंतु पस्थानावसरं क्रूरश्चेष्टितः॥ तदा कुर्यादुपस्थानं तद्दृश्यगत एव सन्॥ तत्र विकल्पः॥ प्रवत्स्यदुपस्थानेन वा॥ इहैव
तिमंत्रेणा वेति॥ तथा त्रैव विशेषः॥ आगमिष्यामि बाधैवेत्यनुपस्थाय निर्गतः॥ दैवात्तत्र स्थितः कुर्यादिहैव तिके च न
विस्मृत्या बुद्धिपूर्वं वा यातस्येषविधिर्भवेत्॥ वाग्यमनलोपोत्र भाष्यकारेण दर्शितः॥ अरण्यारोपितवद्दोत्र वेरोदाप्रने
तुवा॥ उभयत्रा प्युपस्थानं नास्तिकौशीतकि स्मृतेरिति॥ गृहामा बिभीतेति गृहानुपैति॥ ततो यजमानः सम्याव ध्यो स
नमस्कृत्य गृहामा बिभीतेति मंत्रेण गृहेषु न इत्यंते न गृहा स्वं निवासं गृहं उपैति उपगच्छति उपतिष्ठत इत्यर्थः॥ प्रोष्यैत्य
गृहानुपतिष्ठते पूर्ववदिति गृह्यकारेणोपस्थानस्योक्तत्वात्॥ क्षेमाय व इति प्रविशति॥ ततः क्षेमाय व इति मंत्रेण तान्नि
वासार्थं निरहान्मध्ये प्रविशति॥ अतः परं गृह्योक्तं पुत्रदर्शनजपादिकर्तव्यं॥ तत्र पुत्रदर्शनें अंगादंगादिति जपः॥ तच्छिरोव
घ्राणं प्रजापते रिति॥ अत्र मंत्रे॥ सावित्र्यस्य स्थाने संबुध्यंत पुत्रनाम ग्रहणं॥ गवां तेत्वि च सहस्रत्पुत्र शिरोवघ्राणं॥
हिंकृत्य॥ पुत्रस्य दक्षिणकर्णे अस्मे प्रयंधीति जपः॥ सव्ये कर्णे इंद्र श्रेष्ठानीति॥ एवं प्रतिपुत्रमावर्त्तनीयं पुत्र्यास्तु
शिरोवघ्राणमात्रं इति॥ क्षेमाय व इति प्रविशति॥ ततः क्षेमाय वः शांत्या इति मंत्रेण तान्निवासार्थं गृहान्प्रविशति॥
गृहान न्यंतीत्यापस्तंबः॥ न हिंस्यात्कामं रुष्टः॥ तस्मिन् गृहागमनदिवसे गृह्यानु गृहे भवान्भार्या पुत्र भृत्या
दीन् अपराधे सत्यपि न हिंस्यात्॥ अनिष्टं वि रूप भाषणताडनादिना नोच्चाटयेत्॥ अथातो गृहीणामेवोपचारः
प्रकृत्या स्यार्थस्य श्रवणात्॥ कामं इच्छया रुष्टो वृत्ती ये हन्य पराध निमित्त वाग्दंडादिभिर्हिंस्या दुच्चाटनं कुर्या
त्॥ सय दिहापि कुद्धं रवस्यात्तएव ततस्तत्कुर्यीय च द्धिष्यल्लोकरिष्य त्वास्यादिति श्रुतेः॥ तस्येश्वरः कु

ल विश्लो चौरित स्यायमर्थः॥ अस्तु ग्रहणां प्रत्रास ः को दोष इत्यत आह॥ तस्येश्वर इति॥ तस्य यजमानस्य कु
लं वंशं विक्षोभ्योः विक्षुब्ध्वं विनष्टं कर्तुमीश्वरः॥ व्यत्ययेनैक वचनं ईश्वरा इति गृहाः समर्था भवंतीति॥१३॥ उद्धरेति यज
मानो ब्रूयात्सायं प्रातरग्निहोत्रे॥ अथाग्निहोत्र मुच्यते अग्निहोत्र संज्ञके कर्मणि सायंकाले प्रातः काले च यजमा
न उद्धरेतीमं प्रैषमध्वर्युं प्रति ब्रूयात्॥ एतच्चान्य कर्तृक होमपक्षे॥ स्वयं होमपक्षे तु प्रैषाभावः॥ अग्निहोत्र शब्दो वक्ष्य
माणस्य कर्मणो नामधेयं॥ अग्निहोत्रं जुहोतीत्यादौ संव्यवहारार्थं॥ अग्निहोत्र इत्युक्ते तादर्थ्ये उद्धरणेनायं प्रैषः॥ सत्य
प्यक कर्मत्व कालभेदात्सायं प्रातश्चांगावृत्तिर्भवतीति सायं प्रातर्ग्रहणं॥ गार्हपत्यादाहवनीयस्योद्धरणमनस्तमिते
नुदिते योः॥ अनस्तमिते अनुदिते च सूर्ये गार्हपत्यादग्निहोत्र होमार्थं ज्वलत आहवनीयस्योद्धरणं कृत्वा प्राचं नीत्वाह
वनीयखरे स्थापनं कर्तव्यं॥ ततः पूर्वं स्मात्तन्परिसमूहनादीन्पंच भूसंस्कारानाहवनीय खरे कुर्यात्॥ सयः पुरादि
तयोरित्युक्तं॥ गार्हपत्यादाहवनीयं ज्वलंतमुद्धरतीत्यापस्तंबः॥ गार्हपत्यं वा वसगच्छति गार्हपत्याद्धि स आहुतो भवतीति
तस्मादेतं गार्हपत्यात्प्रांचमुद्धरतीति श्रुतेः गार्हपत्यादित्युक्तं॥ उदितहोमपक्षेप्युद्धरणमनुदित एव कर्तव्यं॥ अन्यथा चु
धतेष्वग्निहोत्रकाले आगते तथैवाग्निहोत्रहोमः॥ पशु चरु पात्र च्यासादाद्युत्तर वेदाहवनीयं प्रणीते होमकाले त्र
अतिप्रणीते वाग्निहोत्रं होतव्यं॥ तथा चापस्तंबः॥ प्रणीते चेदग्निहोत्रकाल एतस्मिन्नेवाग्निहोत्रं जुहुयादेवमन्यत्रे ति

॥६०॥
॥देवया०५

पक्षप्रकरणेसूत्रं॥संप्रदायपद्धतौत्वन्यथोक्तं॥अतिप्रणीतेनाग्निहोत्रहोमः अनंगत्वादग्निहोत्रमस्येति॥
तत्तुयुक्तिमात्रं। इदंतुवचनं। नास्तिवचनस्या किं विदुरं। तस्मादतिप्रणीतएवहोतव्यं॥ ॥प्रत्यङ्मुखोवास
यंनिदध्यात्तस्मिन्सायंप्रातर्होममित्येके। अथवासायंकालेप्रत्यङ्मुखोग्निंस्थापयेत्॥वाप्राङ्मुखएव॥तथा
तस्मिन्प्राङ्मुखवस्थापिते आहवनीयएके आचार्याः सायंप्रातर्होममिच्छंति। तदाचप्रातर्होमार्थंतस्यधारणंकर्त
व्यं। अन्येप्रातर्होमार्थंपुनरुद्धरंति॥ ॥नित्योदक्षिणाग्निः॥दक्षिणावासंहरेदन्वाहार्यपचनइत्यस्मिन्पक्षे
दक्षिणाग्निर्नित्योनवतिसर्वदासएवभवति। नप्रातिकर्मश्रीक्रियते॥नित्यपक्षानुवृत्तिलाभेनाह॥सर्वेगतश्रियः॥
गताप्राप्ताश्रीर्येनासौगतश्रीः प्राप्तश्रीः। गताश्रीर्यंइतिवाद्वितीयार्थेबहुव्रीहिसमासः॥तस्यगतश्रियः प्राप्तस
मृद्धेर्यजमानस्यसर्वेग्नयोनित्याभवंति॥आहवनीयदक्षिणाग्नीअपिगार्हपत्यवत्सदाधार्याविसर्थः॥त्रयोहि
वैगतश्रियः शुश्रुवान्ब्राह्मणः क्षत्रियोविजयोराजावैश्योग्रामणीरिति। नित्यधृतानामपिप्रादुःकरणमनस्त
मितएवकर्तव्यं॥तदुक्तं॥सूर्येस्तंगतेलमप्राप्तेषड्भिरांगुलैः सदांगुलैः॥प्रादुःकरणमग्नीनांप्रातर्भासांचदर्शनादि
ति॥पुराच्छायान्यासंसर्गात्॥उद्धरणंप्रादुःकरणंनित्यत्वइतिशांखायनः॥ ॥सदावाहरणं॥ ॥दक्षिणाग्नेःसदा
वाहरणंआहवनीयवदेवकर्तव्यं। दक्षिणाग्निप्रहृत्यतद्यतद्धतमहरहर्दक्षिणतआहरंतीतिश्रुतेः॥एकेषा
मुपवसथे॥एकेषामाचार्याणांमतेउपवसथेपौर्णमास्याममावास्यायांवादक्षिणाग्नेराहरणं। नसर्वदा। उपव

मा

॥६०॥
॥ऋषि०॥
३७

सथएवैनमाहरेयुरितिवचनात्॥अस्मिन्पक्षेर्धादुपवसथांतरालेतस्यधारणंकार्यं॥ ॥नवावसितेवा॥ ॥नवा
वसितेनवगृहेवाएनंदक्षिणाग्निमाहरेयुः। नवावसितेवैनमाहरेयुरितिश्रुतेः॥नसर्वदा। नाप्युपवसथइति। अस्मि
न्नपिपक्षेतस्यधारणंकार्यंतद्गृहवासंयावत्॥तस्मिन्पचेयुरमांसं॥तस्मिन्नवावसिताहृतेदक्षिणाग्नौअमं
समांसव्यतिरिक्तंसर्वमन्नंपाकयोग्यंपचेयुः॥तस्मिन्पचेयुस्तद्ब्राह्मणानाश्नीयुरित्युक्तत्वात्पाकानंतरंतत्पक्वमन्नं
ब्राह्मणाःप्राश्नीयुः॥ ॥पाक्याभावेगोःपयोधिश्रयितवेब्रूयात्। पाकास्यपचनार्हस्यतंडुलपिष्टादेरभावेसंपत्तौयज
मानोध्वर्युंप्रतिगोःपयोधिश्रितवाइतिइमंप्रैषंब्रूयात्॥ततोध्वर्युःतत्पयोदक्षिणाग्नावधिश्रयेत्॥ येद्युतत्रविंदेयत्य
चेदपिगौरेवदुग्धमधिश्रयितवेब्रूयादितिश्रुतेः॥ ॥तद्ब्राह्मणंपाययितवेब्रूयात्॥ततोध्वर्युर्यजमानंप्रत्याह॥तद्ब्रा
ह्मणंपाययितवाइति॥तस्मिन्ब्राह्मणान्पाययितवेब्रूयादितिश्रुतेः॥ततोयजमानएवमध्वर्युणाप्रेषितस्तत्पयोब्राह्म
णान्पाययेत्॥अधुनाप्रकृतमुच्यते॥ ॥अंतरेणापराग्नीगत्वादक्षिणेनचाप्रदक्षिणमाहवनीयंपरीत्योपविशतियज
मानः॥यजमानःसंध्यावंदनानंतरंअपराग्नीगार्हपत्यदक्षिणाग्नीअंतरेणागत्वागार्हपत्यदक्षिणाग्न्योर्मध्येनांतरालेन
गत्वा। अथवातौदक्षिणेनगत्वाअप्रदक्षिणमाहवनीयंपरीत्यस्वस्थानेउपविशति। पूर्वेणाहवनीयंपरीत्यांतरेणगार्ह
पत्यंचेतीतिश्रुतेः अप्रदक्षिणमाहवनीयंपरित्यगार्हपत्याहवनीययोरंतरालेनदक्षिणतःस्वासनंप्रतिगच्छतीत्यर्थः॥अयं
चअत्योक्तःसंचरः॥वक्ष्यमाणस्तुद्वारवांतरीयः। दक्षिणेनप्रवेशनमग्निहोत्रेपिद्विविधमितिवचनात्पूर्वगार्हपत्यागा
रस्यदक्षिणेनद्वारेणप्रविश्यतत्कर्तव्यं। संध्यावंदनानंतरंपूर्वमग्निहोत्रहोमः॥ततःस्मार्तेग्नौ। तदुक्तं॥होमंत्रेतानि

अ

२

॥६१॥
॥देवयां०८

केनकृत्वा स्मार्त्तं कुर्याद्विचक्षणः ॥ स्मृतीनां वेदमूलत्वात् स्मार्त्तं केचित्पुरा विदुरिति ॥ ॥पत्नी च पूर्ववत् ॥ ॥पत्न्यपि पूर्ववदुप
विशति ॥ पूर्ववदितिप्रत्यग्दक्षिणतो गार्हपत्यस्येति चशब्दाद्यजमानोपि पूर्ववदिति ॥ तेन दक्षिणतो ब्रह्मयजमानयोरास
नं इति दर्शपूर्णमासविषयं परिभाषितं चेति नातिदिश्यते ॥ अपरे त्वन्यथा व्याचक्षते ॥ यजमानपरिभाषिकमुपवेश
नं सिद्धमेव । परिभाषायाः सर्वसाधारणत्वादिति ॥ न च शब्दस्य तत्र व्यापारः तेन पत्न्यपि चशब्दादन्तरेणापराग्नी गत्वा
अपराग्नी दक्षिणेन गत्वा अत्र दक्षिणामाहवनीयं परीत्योपविशतीत्येतदाकृष्यत इति युक्तरूपमिव चैतत् ॥ ॥अपरेणा
हवनीयं कूर्चं निदधाति कुशान्वा ॥ आहवनीयमपरेण आहवनीयस्य पश्चात्प्रागग्रमुदगग्रं वा कूर्चं निदधाति स्था
पयति ॥ अथवा कुशानेव निदधाति न कूर्चं ॥ कूर्चशब्देनासनपद उच्यते ॥ कूर्चादुपावसर्प्य जुवा चेति तथा हिरण्मयं वा कू
र्चमित्यादौ उपवेशनार्थे आसने प्रयोगदर्शनात् ॥ अत्र च स्तुचः तदासनं । कूर्चं निधायेति वक्ष्यमाणत्वात् ॥ तेन बाडुम
माणावारण आसनपट्टसदृशः कूर्चो भवति । कुशनिधानपक्षे कूर्चनिधानादि कूर्चकार्यं कुशेष्वेव कर्त्तव्यं ॥ तत्स्थाने
विकल्पेन विधानात् ॥ परिस्तरणं वा सर्वेषां प्रागुदग्भिरुदगग्रा दक्षिणाग्रान्करोतीति श्रुतेः ॥ मृताग्निहोत्रे अध्या
न्यमून्युदीचीनाग्राणि तृणानि भवंति दक्षिणाग्राणि तानि करोतीति श्रवणात् ॥ यान्यमून्युदीचीनाग्राणि तृणानीदु
दगग्रता जुवादस्तेदेवोपपद्यते यदग्निहोत्रे प्रागुदगग्रेस्तरणं भवतीति ॥ मृताग्निहोत्रे आहवनीयस्यैव परिस्तरणं
दर्शनादिकमपि तस्यैव भवतीत्याशंक्य वा सर्वेषामित्युच्यते ॥ सर्वेषामेव तत्परिस्तरणं होमस्य सर्वेषु विहितत्वा
त्परिस्तरणस्य होमार्थत्वाच्च ॥ ॥आहवनीयं पर्युक्ष्योदधारां निनयत्यागार्हपत्यात् ॥ प्रथममाहवनीयं परिस्ति

॥६१॥
॥कोष्ठं॥

त्परिस्तरणा २

उदकस्य धारां २

र्य्यतितो गार्हपत्यं ततो दक्षिणाग्निं च परिस्तृणाति ॥ ततस्तेनैव क्रमेण प्रथममाहवनीयं पर्य्युक्ष्य हस्तगृहीतेनोद
केन परिसमन्तात्सिक्त्वा तत्र आहवनीयादारभ्योदधारां आगार्हपत्यात् गार्हपत्यं यावत् अव्यवच्छिन्नां निनयति ॥ ॥
तं च ॥ ततस्तं गार्हपत्यं चशब्दात् पर्युक्षति ॥ ॥ततो दक्षिणाग्निं ॥ ॥ततो गार्हपत्यपर्य्युक्षणानंतरमेव दक्षिणा
ग्नेः पर्य्युक्षणं यथा स्यादिति ततो दक्षिणाग्निमित्युक्तं ॥ ॥ऊतेषु धारावर्ज्जं ॥ ॥ऊतेषु चाग्निहोत्रे यजमानस्योप
स्थानं चिमनानंतरं प्राग्वाग्विसर्गादेवमेवाग्नीन्पर्युक्षति ॥ धारां वर्ज्जयित्वा ॥ वाग्यमस्य कर्त्तृधर्मत्वेन पदार्थांगि
त्वात् पर्य्युक्षणमपि पदार्थ इति ॥१३॥ ॥अग्निहोत्रीं दोहयति पुंवत्साम् शूद्रेणस्थाल्याम् प्यदित्यामूर्ध्वकपालायां
दक्षिणतः प्राचीमुदीचीं वा ॥ अग्निहोत्रशब्देन कर्मवाचिना तत्साधनं पयो लक्ष्यते ॥ तदग्निहोत्रमस्यां गवास्तीति गौर
ग्निहोत्रिणी ॥ तत इनिप्रत्ययप्रत्ययलोपे कृते अग्निहोत्रीति सिध्यति ॥ अतावपि गवि अग्निहोत्रीशब्दप्रयोगो दृश्यते ॥ य
स्याग्निहोत्री दोह्यमाना वाश्येत दोह्यमानोपविशेदित्यादौ यस्यापि अग्निहोत्रशब्दप्रयोगो दृश्यते ॥ यस्याग्नि
होत्रं दोह्यमानं स्कंददित्यादौ ॥ ततो अग्निहोत्रीशब्देन गौरुच्यते ॥ अध्वर्युरशूद्रेणाशूद्रादन्येन दोग्ध्रा स्थाल्याम
ग्निहोत्रीं गां दोहयति । दोहयतीति हेतुमणिजन्तत्वाद् अग्निहोत्रीं धुक्ष्वेति तं दोग्धारं दोहने प्रेषयति ॥ ततः स दोग्धा प्रेषितः स
न्स्थाल्यां गां पयो दोग्धि ॥ कीदृशीमग्निहोत्रीं गां ॥ पुंवत्सां पुमान् वत्सो यस्याः सा पुंवत्सा तामिति ॥ तस्मादस्य पुं
वत्साग्निहोत्री स्यादिति वचनात् ॥ क्व स्थितां दोहयति ॥ दक्षिणतो विहाराद्दक्षिणस्यां प्राचीं प्राङ्मुखीं स्थितां उदीचीं
वा स्थितां गां दोहयति ॥ कीदृश्यां स्थाल्यां आयतत्यां ॥ आयस्यं त्रैवर्णिकस्य कृतिः आयतकृतिः तस्मात्त्रैवर्णिकेन घटितायां

स्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६२॥
॥देवया०४

निर्ष्वीं दितायांस्थाल्यां॥ पुनः कीदृशयांस्थाल्यां॥ ऊर्द्ध्वकपालायां न तिर्य्यक् कपालायां॥ यदि वाभिद्यतेति लिंगान्मन्त्र कामप्यं॥ अत्रगोदिंड्डि यमविधानात्सान्नाय्येगवां दिंड्डि यमोन भवति॥ पूर्वेणाहवनीयमादृत्य गार्हपत्येधिश्रयत्यु त्तरतो निरूह्यांगारान्॥ तद्दोग्धादुग्धस्थालीस्थपयोहस्तेगृहीत्वा आहवनीयं पूर्वेणाहृत्याहरणात्पूर्वमेव गार्हप त्यस्यांगारानुत्तरत उद्धृत्य श्रपणार्थं पृथक्कृत्वा ततःपयआहृत्य तेषु पृथक्कृतेष्वंगारेष्वधिश्रयति॥ गार्हपत्यग्रहणं चाहव नीयव्युदासार्थं॥ श्रपणं चाहवनीय इति विकल्पेन तत्रापि प्राप्तेः ननु सूत्रक्रमेणैवाहरणानंतरमंगारोद्वहनं कथं न भवति॥ उच्यते॥ श्रुत्याहरणात्पूर्वमुद्वहनस्य दर्शनात्॥ तथा हि यस्याग्निहोत्रं दोहितममेध्यमापद्यतेति प्रकृत्य एवे तद्ग रानिरूढा येष्वधिश्रयिष्यन् भवतीति॥ अस्यां हि श्रुतौ दोहितावस्थायामंगारनिरूहणं सिद्धं दृश्यते॥ अतः पूर्वं निरू हणं॥ ततआहरणमिति॥ ॥एवमन्यत्रापि होमार्थस्याहरणं॥ इतोन्यत्रापि पंचवातीयहोमादौ होमार्थस्याज्यादि गव्यस्यैवमेव पूर्वेणाहवनीयमाहरणं कर्त्तव्यं॥ ॥दक्षिणेन वा षेधं॥ ॐ पधं ब्रीहियवादिकं तदाहवनीयं दक्षिणेन वा नीयते॥ आहवनीयं पूर्वेण वा॥ आहवनीयमुत्तरेणेति केचित्॥ तत्र दक्षिणेनायने प्रदक्षिणेनानयनात्स्मृत्यनुग्रहः॥ उत्तरेणानयने तूत्तरत उपचारो यज्ञ इति श्रुत्यनुग्रहः॥ तत्र श्रुतेर्बलीयस्त्वादुत्तरेणैवावधार्यते॥ तृणेनावज्योत्य॥ सिच्या पः पुनरवज्योत्य निधायं त्रिरुद्वासयत्युदक्॥ तदधिश्रितं पयएकेन तृणेनावज्योतयेत्॥ ज्वालायुक्तेन दर्भाग्रेणा वाङ्मुखं प्रकाशयेदित्यर्थः॥ तच्च तृणं परिस्तततृणेभ्योन्यदेव ग्राह्यं॥ अन्यथा युक्तत्वादिति निषेधात्॥ ततः स्रु वेणापोगृहीत्वा पयोमध्ये आसिंचेत्॥ अथापः प्रत्यानयति शान्त्यैत्वेवेति श्रुतेः॥ उदकं पयसः शान्त्यै आनये

॥६२॥
॥भाष्य॥

त्यर्थः॥ स्रुवेणेति कुतः स्रुवेणापः प्रत्यानयतीति शाखांतरात्॥ ततः पुनरवज्योत्य निधायं॥ निधायंनिधायमुत्क्वा सुत्का त्रिरुदगुद्वासयत्युदीच्योदिश्युद्वासयति॥ प्रथममवज्योतनं दृष्टार्थं॥ तदवज्योतयति शृतं वेदानीति श्रुतेः॥ अतोत्राधि श्रयणं श्रपणार्थमेव॥ तदुग्धाधिश्रयति शृतमेतदिति श्रुतेः॥ ननु शृतं कथं ज्ञायत इत्यत आह॥ तदा कुर्यदुदंतं हि श्रितं तर्हि जुहुयादिति॥ यस्मिन्काले तत्पयउदंतं पावकवशादुन्नतं बुद्बुदवद्भवति तर्हि तस्मिन्काले तत्शृतं भ वति तदवस्थापन्नेन पयसा जुहुयादित्यर्थः इमं पक्षं निषेधति॥ तद्वेनादंतं कुर्यादिति॥ कथं तर्हि जुहुयादिति॥ अधि श्रितेव जुहुयादिति॥ अधिश्रयणमात्रेणैव तच्छृतं॥ तादृशेनैव होमः कार्य्य इत्यर्थः॥ अतश्च विकल्पः॥ उदंते कुर्य्या न्नवेति॥ अवज्योतनस्य च शृतसंवेदनार्थत्वात्तंडुलदध्यादावभावः॥ उदकासेचनमपि दृष्टार्थं तापेन उदकस्यैव क्षयो यथास्यान्नपयस इति॥ अथापः प्रत्यानयति शान्त्यैत्वेव रसस्यो चैव सर्वत्वायेति श्रुतेः॥ अतः तंडुलादावासेचनाभावः॥ पुनरवज्योतनमप्यासिक्तस्योदकस्य शृतियज्ञानार्थं॥ अतस्तस्यापि तंडुलादावभावः॥ यवागूवानंप्रथमावज्योतनं भवति॥ नापामासेकः॥ नच पुनरवज्योतनं घृतेप्युदकासेको न भवति॥ विरोधात्॥ अवज्योतनं तु भवति॥ निधायं नि धायमुत्क्रम्य॥ ततश्च निधायनिधायेत्यर्थः॥ धीन त्रिः प्रतिष्ठाप्यं हरतीति प्रतिष्ठाप्यप्रतिष्ठाप्यहरतीत्यर्थः॥ तत्र निषेधात्त्र विधिरुन्नीयते॥ उद्वासनानंतरं पृथक्कृतानामधिश्रयणाधानीमंगाराणां गार्हपत्यमध्ये प्रेरणं॥ शाखांतरात्॥ अस्तमि ते जुहोति॥ अस्तमिते सूर्ये सायमग्निहोत्रं जुहोति॥ सयत्सायमस्तमिते जुहोतीति श्रुतेः॥ आश्वलायनः॥ प्रदोषांतो हो मकालः संगवांतः प्रातस्तमितिनीयश्चतुर्गृहीतमाज्यं जुहुयाद्यदि सायं दोषावस्तर्नमः स्वाहेति॥ यदि प्रातः प्रात

॥६३॥
॥देवया०८

दोषाव स्तर्नमः स्वाहेति॥ अत्रास्तमितेइत्युक्तत्वात्प्राचीनमनस्तमितइतिनशंकनीयं॥ अंगानांप्रधानकालत्वे धन्या
प्यत्वादुद्धरणादूर्ध्वमस्तमितएवकर्त्तव्यं॥ उद्धरणामात्रस्यैवानस्तमितेश्रवणात्॥ सयःपुरादित्यस्यास्तमयादाह
वनीयमुद्धरतीति॥ अस्तमितलक्षणमाहकात्यायनः॥ यावत्सम्यङ्नाव्यंतेनभस्यृक्षाणिसर्वतः॥ नचलोहितिमा
पैतितावत्सायंचहूयतइति॥ वैकंकतंस्रुकस्रुवंप्रतप्यपाणिनासंमार्ष्टि॥ वैकंकतवृक्षनिर्मितंस्रुकस्रुवंपा
णिनाहस्तेनसंमार्ष्टिशोधयति॥ हस्तस्पर्शनेनतत्संलग्नरजोपनीयनिर्मलीकरोतीत्यर्थः॥ पूर्वंस्रुवस्यसंमार्गःप्रत
पने॥ पश्चात्स्रुचः॥ होमसंबंधाद्वैकंकतीस्रुक्प्राप्नोत्येव॥ स्रुचार्थवचनं॥ आपस्तंबसूत्रे विशेषः॥ वैकंकत्याग्नि
होत्रहवनीवाङ्मात्र्यरत्निमात्रीवाप्रसृतोद्धृतिरिति॥ पुनःप्रतप्योन्नेष्यामीत्याह॥ पुनःस्रुक्स्रुवंप्रतप्यउन्नेष्यामि
तियजमानंपृच्छेत्॥ ॐ३ मुन्नयेतियजमानस्तिष्ठन्॥ यजमानस्तिष्ठन्नूर्ध्वस्थितःसन्॥ ॐ३ मुन्नयेतिमंत्रेणाध्व
र्युंप्रत्याह॥ प्रतिवचनंदद्यात्॥ चतुरःस्रुवानुन्नयति॥ स्थाल्याःसकाशाच्चतुरःस्रुवाःस्रुच्युन्नयति॥ इदंचतुर्गृहीत
माहुतिद्वयार्थं॥ अतश्चपूर्वाहुत्यनंतरंद्व्यनाद्यादौ उत्तराहुत्यर्थंपुनश्चतुर्गृहीतंग्राह्यं॥ नक्षत्रार्थस्यनाद्यादौ अ
क्षादेलेपिएवनतदर्थंपुनर्ग्रहणं॥ पंचावत्तीनांपंचस्रुवानुन्नयति॥ पंचजमदग्नीमित्यापस्तंबवचनात्॥ स्था
ल्यांपरिशिनष्टितद्ब्राह्मणःपिबेत्॥ स्थाल्यांयत्पयःपरिशिनष्टितत्पयोब्राह्मणएवपिबेत्॥ नायब्राह्मणस्य
पानेनियमः किंतर्ह्यब्राह्मणस्यप्रतिषेधोयं॥ अब्राह्मणस्तन्नपिबेदिति॥ तद्धेनाब्राह्मणःपिबेदितिवचनात्॥ ॥६३॥
उपरिसमिधंधारयन्वाक्षीमध्यधिगार्हपत्यादाहवनीयंप्रहरतिमुखमात्रेधारयन्॥ स्रुग्दंडस्योपरिचतुर्गृहीतपय॥ ॥ब्राह्मं॥

४०

क्षी

सउपरिवार्क्षींपालाशादिवृक्षोद्भवांप्रादेशमात्रींसमिधंअंगुल्याद्यंतरितांधारयन्तांअध्यधिगार्हपत्यात्॥ अ
धिशब्दःसामीप्येउपरिभावेच॥ तेनस्रुचंहस्तेगृहीत्वाप्रथमंगार्हपत्यस्योपरिसमीपएवधारयति॥ ततोमुख
मात्रेस्रुचंधारय न्नाहवनीयंप्रतिहोमार्थंहरति॥ अथसमिधमायोदाङ्क्वतीतिवचनात्॥ नोपरिष्टात्समिध
मभ्यस्यहरतियद्योपरिष्टात्समिधमभ्यस्यहरेदेवन्नाकुर्य्यादितिमृताग्निहोत्रेदर्शनात्॥ उपरिहिदेवेभ्योधार
यतीतिस्रुग्दंडेसमिधमुपसंगृह्येतिशाखांतरोक्तसमिधउपरिधारणं॥ उपरिष्टात्स्रुग्दंडेसमिधमुपसंयम्ये
तिमनुः॥ समिद्वृक्षाश्चस्मृता उक्ताःपालाश्यःसमिधःकार्य्याखादिर्य्यस्तिदलाभतः॥ शमीरोहितकाश्वत्थास्तदभा
वेर्केवैतसे॥ तथा॥ पलाशखदिराश्वत्थशम्युदुंबरजा अपि॥ अपामार्गार्किदूर्वाचिकुशश्चेत्यपरेविदुरिति॥ ॥मध्ये
ऽग्निह्योह्रुत्योपविश्यसमिधमादधात्यग्निर्ज्योतिषंत्वेति॥ ॥गार्हपत्यादाहवनीययोर्मध्येअंतरालेस्रुवंमुखमा
त्रधृतान्नाभिप्रदेशायावन्निगृह्यनोचैस्त्वापुनरूह्रुत्यसुखमात्रएवपुनरूर्ध्वंत्वाआहवनीयसमीपंप्राप्योपविश्याग्नि
ज्योतिषंत्वेत्यनेनमंत्रेणाहवनीयमध्येसमिधमादधाति॥ समिदाधानेकूर्चेस्रुचमनुपसाद्येवसव्यहस्तेस्रुचंधृत्वा
कार्यं॥ सोनुपसाद्यपूर्वमाहुतिंजुहोतीतिवचनात्॥ इंधनार्थमितत्समिदाधानंइंधनार्थत्वात्॥ अतोब्राह्मणहस्तादि
ष्वर्थलोपादस्याभावः॥ ॥प्रदीप्तामभिजुहोत्यग्निर्ज्योतिरितिसजूरितिवा॥ प्रदीप्तांप्रकर्षेणादीप्तांसमिधमभिसमि
धउपरिशाखांतरात्समिधोमूलाद्द्व्यंगुलपरित्यज्यमध्यभागेअग्निर्ज्योतिरितिमंत्रेणप्रथमाहुतिअत्यंतपनद्रव्येण
जुहोति॥ अथवासजूर्देवेनेतिमंत्रेणरात्रिप्रयुक्तेनजुहोति॥ इतिमंत्रविकल्पः॥ सजुहोत्यग्निर्ज्योतिर्ज्योतिरग्निः

गृही
त

॥ ६५ ॥
॥ देव्या० ५

स्वाहेतिवचनात् अनेनैवजुहुयात् इदंदेवेनसवित्रेतिवचनाच्च ॥ काठकेच । प्रादेशमात्रींसमिधमाधायप्रज्वलितायां
अंगारभूतायाऊर्ध्वंगुलमात्रंपश्चात्समिधोवशिष्यकर्षन्तामध्यदेशात्जुहोतीति ॥ एवमन्येष्वपिसूत्रेष्वस्ति ॥ ॥ अ
ग्निर्वर्च इति ब्रह्मवर्चसकामस्य ॥ ब्रह्मवर्चसकामस्ययजमानस्यअग्निर्वर्चइतिमंत्रेणपूर्वमाहुतिंजुहोति ॥
तदुहैतदेवारुणयेब्रह्मवर्चसकामायतक्षानुवाचाग्निर्वर्चोज्योतिरितिश्रुतेः ॥ अयंमंत्रगतस्तृतीयोविकल्पःकाम्यः ॥
सत्कर्मानुष्ठानवेदाध्ययनादिजनितंब्राह्मंतेजोब्रह्मवर्चसं ॥ ॥ कूर्चेनिधायगार्हपत्यमवेक्षतेहोष्यन्नस्मिन् ॥ अ
स्मिन्गार्हपत्ये होष्यन्होमंकरिष्यन्पूर्वाहुतिहोमानंतरंस्रुचंकूर्चेनिधायमुक्त्वागार्हपत्यमग्निमवेक्षते । सोनु
पसाद्यपूर्वमाहुतिंजुहोत्युपसाद्योत्तरामितिवचनेनदर्शनाच्चगार्हपत्यावेक्षणं ॥ होष्यन्नस्मिन्नित्यनेनापराग्निहोमस्य
पक्षिकत्वंदर्शयति ॥ तथाचोक्तंशाखांतरे ॥ आहवनीयएवजुहुयादिति ॥ सर्वेषुचैवजुहुयादितिच । होष्यन्नित्युक्तत्वा
न्मृताग्निहोत्रे अग्निहोत्रावृताहुत्वेत्यत्रवचनात्गार्हपत्यावेक्षणं । तत्रहोमाभावात् ॥ तूष्णीमुत्तरांभूयसीं ॥ उत्तरा
मितिद्वंद्वातःकालतश्चव्याख्येयं ॥ उत्तरांद्वितीयामाहुति ॥ उत्तरापूर्वाहुतिहोमस्थानादुत्तरस्मिन्नग्निप्रदेशेपूर्वाहुति
तोभूयसींबहुतरद्रव्यकांजुहोति । तूष्णींमंत्रंविनापिजुहोति ॥ मंत्रश्चविधानादेवाप्राप्तःस्तूष्णीमितिस्वाहाकारनिवृत्त्यर्थं ॥
तथाहरिस्वामिनः ॥ उत्तराहुतौच स्वाहाकारप्राप्तेतूष्णींजुहोतीतिवचनान्निवृत्तिःशाखांतरात्पूर्वाहुत्या असं
सृष्टामितिच ॥ तथाशांखायनः । उपसाद्योत्तरामसंसृजंतूष्णींभूयसींपूर्वस्याइति ॥ सवैकतीयइवपूर्वमाहुतिंजुहोति
भूयएवोत्तरामितिवचनाद्भूयसीमित्युक्तं ॥ ॥ अत्रद्वितीयामितिवक्तव्येउत्तरामितियदुक्तंतस्याग्नेरुत्तरप्रदेशेहोम

॥ ६५ ॥
॥ सोष्य ॥

नाभिधानं ॥ किमवेक्षि ष्ठाइतिप्रश्नानघदपेक्षि शींमंचौवलोकौतेनसमिधामितिप्रतिवच ७

कुंच

र्थ

विधानार्थमपि ॥ अथवोत्तराम्स्विष्टकृद्भाजनमेवसातस्मात्तामुत्तरार्द्धेजुहोत्येषाहिदिक्स्विष्टकृतइति ॥ स्विष्ट
भाजनत्वोक्तेरेवासंसृष्टत्वमपिशाखांतरीयंसूचितं । अत्रप्रजापतिर्देवता ॥ यस्मयेच्चप्रजापतयेस्वसायंजुहोति यत्
यपिचप्रजापतयेचप्रातरितिशाखांतरात् ॥ तथाचाश्वलायनः ॥ प्रजापतिंमनसाध्यायंस्तूष्णींहोमेषुसर्वत्रेति । साया
पूर्वाहुतिःसामानमभिनिष्क्रूयतेतामंत्रेणजुहोतीति । अथयोसाप्रजामभिनिष्क्रूयतेतांतूष्णींजुहोतीवअवर्णत्तूष्णीमि
त्युक्तं ॥ ॥ भूयिष्ठंस्रुचि ॥ पूर्वाहुत्यामल्पंहोतव्यंद्वितीयाहुत्यांतदपेक्षयाबहुतरं । ततोभूयिष्ठंअतिशयेनबहुस्रु
चिभक्षार्थंपरिशिनष्टि ॥ भूयएवस्रुचिपरिशिनष्टीतिवचनात् ॥ द्विःप्रकंप्यनिदधाति ॥ स्रुचंद्विःप्रकंप्यद्विरुत्क्षिप्यकू
र्चेनिदधातिस्थापयति ॥ प्रकंपनमात्रेद्विगनं ॥ मृताग्निहोत्रेनोद्दिशयंतीतिप्रतिषेधात् ॥ तथाचेसूत्रांतरे ॥ द्विरूर्ध्वं
स्रुचमुद्यच्छतीति ॥ तथाचशांखायनः द्विरुदाचीस्रुचमुद्यम्योपसादयतीति ॥ ॥ उपमृज्यस्रुचंकूर्चेनिमार्ष्टिनमो
देवेभ्यः ॥ स्रुकप्रणालिकांहस्तेनोपमृज्यनमोदेवेभ्यइतिमंत्रेणतद्द्रव्यलिप्तंहस्तंकूर्चेनिमार्ष्टि निर्मार्जनेनतद्धस्तलि
प्तरव्यंकूर्चेनयोजयतीत्यर्थः ॥ सवैद्विरग्नौजुहोतिद्विरुपमार्ष्टीति ॥ तथाकिंपूंस्रुचंपरिमृज्यकूर्चेन्यमार्जीरिति ॥ तथा
यत्क्रत्वपरिमृज्यकूर्चेन्यमार्जिषमितिचश्रुतेः स्वधापितृभ्यइतिदक्षिणातदुत्तानं ॥ पाणिंनिदधातीतिशेषः ॥ उत्तानेनैव
हस्तेनपुनःस्रुगग्रमुपमृज्यहस्तस्याधोभागमेवद्रव्यलिप्तंकृत्वास्वधापितृभ्यइतिमंत्रेणकूर्चस्यदक्षिणतोभूभावेवोत्ता
नंपाणिंनिदधातिकिंद्वितीयंपरिमृज्यदक्षिणतोहस्तमुपास्तीषदंपितृस्तेनाप्रेषमितिचश्रुतेः ॥ तथाचशांखायनः ॥ पूर्व
मुपमार्ज्जनंकुशेषुनिर्लिंपत्योषधीःप्रीणामीति । उत्तरंदक्षिणतःपाणिमुत्तानंनिदधातिपितॄन्प्रीणामीतिमनसा । येद्वि

तीयं तद्दक्षिणेन कूर्चमुत्तानं पाणिं निदधाति पितृस्वेन त्रीणाततीति तेषां ब्राह्मणं। एवमेव सर्वेषु शाखांतरसूत्रेषु ... तथाव
मानवोदुदग्रंदण्डं स्रुचं च निदधात्योषधीत्योषधीर्जिन्वेति दिं भेषु लेपं निमार्ष्टि पितृभ्यः स्वधेति दक्षिणत उत्तानं पाणिं निद
धातीति॥ काठके॥ स्रुचोऽग्रं परिमृज्य पस्यादि समानं॥ तथा चापस्तंबः॥ प्राचीनावीती स्वधा पितृभ्यः पितृन् जिन्वेति दक्षि
णेन वेदिं भूम्यां लेपं निमृज्येति॥ तथा चाश्वलायनः॥ अवमृज्य कुशमूलेषु निमार्ष्टि पितृभ्यः स्वधेति तेषां दक्षिणत उत्तानां
अंजलीः करोति प्राचीनावीती तूष्णीं स्वधा पितृभ्य इति चेति॥ उपमार्ज्जनमपि सायं मुखवत्प्रत्यक्। प्रातः प्राकसंस्थं।
तथा चापस्तंबः॥ मुखादर्वाचीनं सायं लेपमेवमार्ष्टि पूर्वं प्रातरिति॥ अप उपस्पृश्येत्तस्यार्थमुष्टिकामः॥ दक्षिणत उत्तानपा
णि निधानानंतरमपामुपस्पर्शनं कार्य्यं॥ तच्च पित्र्यमंत्रमुक्तेति प्राप्तमपि पुनरुच्यते॥ अपसव्यं दक्षिणमुखता दिधर्मनिसर्थं॥ ग
ततर तरयोर्गार्हपत्यदक्षिणाग्न्योः पुष्टिकामो जुहोति॥ चकारात् पुष्टिकामोऽपि॥ तत्र गार्हपत्ये होममाह॥ ॥स्थाल्याः स्रुवेणेह पुष्टिं
पुष्टिमिति गार्हपत्ये॥ स्थाल्याः सकाशात् स्रुवेण पयो गृहीत्वेह पुष्टिमिति मंत्रेण गार्हपत्येऽग्नौ स्रुवेणैव जुहोतीति॥ ष समिधः
सर्वत्र मध्यं इति पूर्वं तिष्ठत। अग्नेर्मध्यप्रदेशे समिदाधानं कर्त्तव्यं॥ ततस्तस्याः पार्श्वे आहुति होमः॥ अंतेषा आहुतीरुपविश्येति
वचनात्॥ अंतराः समिधो भवंतिवात्याआहुतयरिति श्रुतेश्च॥ वैतानसूत्रे गार्हपत्ये समिधमाधाय स्थाल्याः स्रुवेण जुहोति
इह पुष्टिमिति आश्वलायनः॥ तूष्णीं समिधमाधायाग्नये गृहपतये स्वाहेति गार्हपत्ये निशोत्तरां तूष्णीं समिधमाधायाग्नये सर्वे
नृपतये स्वाहेति॥ तूष्णीं द्वितीयो॥ द्वितीयामाहुतीं तूष्णीं॥ स्थाल्याः सकाशात् स्रुवेणैव जुहोतीति॥ तूष्णीमित्युक्तत्वात् अत्रा
पि स्वाहाकाराभावः॥ ॥अन्नपत्यन्नादायान्नपतये स्वाहेति दक्षिणाग्नेौ तूष्णीं द्वितीयां गार्हपत्ये होमानंतरं दक्षिणाग्नौ समिधमाधा

माधायाग्नयेऽन्नादायेति मंत्रेण स्थाल्याः स्रुवेण पयो गृहीत्वा प्रथमामाहुतिं जुहोति॥ ततस्तूष्णीं द्वितीयां॥ अनामिकया द्विः
प्राश्नाति॥ अनामिकायास्तु कथं कुतश्शेषं द्विः द्विवारं प्राश्नाति॥ एकवारं गृहीत्वा प्राश्याचम्य पुनरन्ये वंक्तेती त्यर्थः॥ उत्सृ
प्य निर्लेदयाचम्योत्सिंचेद्देवान् जिन्व पितॄन् जिन्वेति तृतीयामुदुक्षति सप्तऋषीन् जिन्वेति॥ द्विः प्राश नानंतरं तत्स्रुक्स्थं
हुतशेषमुत्सृप्य पात्रांतरे नीत्वा हस्तेनाहृत्वा आचम्य नक्षायित्वा ततस्तत्पात्रे हस्तेन निर्लेदि॥ जिह्वया सहृदास्वा
दयति॥ स वेदिं द्विरग्नौ जुहोति॥ द्विरुपमार्ष्टि द्विः प्राश्नातीति वचनात्॥ तथा अथे तदग्ने हुत्वा त्सृप्याचामति निर्लेठित
दस्य पाकयत्स्येवेति श्रुतेः॥ उत्सृप्य बहिर्निर्गम्येति माधवः॥ तदापान्नमथ द्विस्तेहृत्वा। द्रवत्वात् पात्रांतरे कृत्वा।
किं पूर्वं प्राशीः किं द्वितीयं किमुत्सृप्या परति॥ उत्सृप्य वेदिसमीपादुत्सर्पणं हृत्वा किं आपः पानं हृतवानसीत्यर्थः॥
तथा यत्पूर्वं प्राशिषं मातेनात्रेषय द्वितीयं प्रजातेनाथ यदुत्सृप्याप पशूंस्तेनात्रेषमिति श्रुतेश्च। ततः प्राशनानं
तरमग्निहोत्रहवणीं स्रुचमुदकेन पूरयित्वोत्सिंचति स्रुचैवोर्ध्वं सिंचति देवान् जिन्वेति मंत्रेण। उत्तरत उपचारो य
स्य इस्युक्तत्वादुत्तरतः॥ ततो द्वितीयवारं तामग्निहोत्रहवणीं पूरयित्वा पित्र्यत्वात् दक्षिणत उत्सिंचति॥ प्राचीना
वीती दक्षिणाभिमुखः पितॄन् जिन्वेति मंत्रेण ततो यसोपवीत्यपः स्पृष्ट्वा तृतीयवारमग्निहोत्रहवण्या मुद
कं हृत्वोतो तृतीयां स्रुचमेव त्वान्या मुदुक्षति॥ उद्दहामुदभ्योदकमूर्ध्वमुद्धाल्लयति॥ किं स्रुच्यपत्र्यानीय निरो
क्षितं किं द्वितीयं किं तृतीयमेता दिशामुदोक्षीरिति॥ एतां दिशं रोशगानी॥ कुतः॥ यस्तु स्रुच्यपत्र्यानीय निरो
सर्वदेवयजनास्तेनात्रेषय द्वितीगंधर्वाप्सरसस्तेनाथ यत्तृतीयमेतां दिशमुदो क्षिषं स्वर्गस्य लोकस्य

यं

॥६६॥
॥देवयो०४

तेनद्वारं व्यवारिषमितिवचनात्॥ स्वर्गलोकद्वारं चएशान्यामेव॥ यत उदङ्ग्प्राङ्तिष्ठन्निति विधायाहयद्देवोदङ्प्राङ्
तिष्ठन्नितस्याएं हदिशि॥ स्वर्गलोकस्यद्वारानिति॥ एतस्यांप्रागुदीच्यांएशान्यामित्यर्थः॥ निरोक्षिषमुदोक्षिषमित्युप
सर्गविशेषात्प्रथमेद्वितीयंचनिरक्षणं। तृतीयमूर्ध्वमुक्षणमिति विशेषः॥ तृतीयमितिवचनो द्वेदनप्रथमाद्वितीय
योरुक्षणं॥ ॥चतुर्थीं कूर्चस्थाने निषिंचत्यग्नयेपृथिवीक्षितेस्वाहापृथिव्या अमृतंजुहोमिस्वाहा। अमृतेअमृ
तंजुहोमिस्वाहेति॥ चतुर्थींस्त्रुचंपूरयित्वाकूर्चस्थापनस्थाने आहवनीयस्यपश्चात्प्राकसंस्थमुदकसंस्थंवात्रिरिति
त्रिवारमपोनिषिंचति॥ नीचैर्नियेति॥ अग्नयइतिप्रथमंनिषिंचति॥ पृथिव्याइतिद्वितीयं॥ अमृतइतितृतीयं॥ शाखांतरे
अप्रक्षालितयैवस्त्रुचोउक्षणपात्रयंकृत्वा ततःस्त्रुचंदर्भैःप्रक्षाल्याग्नयइत्यादिनिनयनंविहितमस्ति॥ किंजघनेनाहव
नीयमपोन्यनैषीरितियज्जघनेनाहवनीयमपोन्यनैषमितिश्रुतेः कूर्चस्थानइत्युक्तं॥ अतश्चास्योपलक्षणार्थत्वा
त्कूर्चमपसार्यवाहवनीयस्यपश्चात्प्राकसंस्थमुदकसंस्थंवानिनयनंकार्यं॥ ॥स्त्रुकस्त्रुवमाहवनीयेप्रतप्यनिदधा
ति॥ ततःस्त्रुकस्त्रुवमाहवनीयेसहैवप्रतप्यकूर्चेनिदधाति॥ अथवानिदधातिसुगुप्तेदेशेस्थापयति॥ कृतकार्यत्वात्॥
तथाचाश्वलायनः॥ प्रतप्यांतर्वेदिनिदध्यात्परिकर्मिणेवाप्रयच्छेदिति॥ आहवनीयइतिगार्हपत्यांतरात्॥ आहवनीयग्रहणं
गार्हपत्यव्युदासार्थं॥ ॥समिधआदधातिसर्वेषुयथापर्युक्षितंसमिदसिसमिद्धोमेअग्नेदीदिहिसमेद्धातेअग्नेदीद्या
समिति॥ ततोयथापर्युक्षितंपर्युक्षितक्रमेणायनेनक्रमेणहोमारंभेपर्युक्षणंकृतंतेनैवक्रमेणसर्वेष्वग्निष्वाहवनीय
गार्हपत्यदक्षिणाग्निषुसमिदसीतिसमिद्धोमेअग्नेदीदिहीतिसमेद्धातेअग्नेदीद्यासमित्येतैस्त्रिभिर्मंत्रैस्तिस्रःस ॥६६॥
॥ओध्यं॥

५२

४३

मिधआदधाति॥ समिधमादधातीत्येकवचनादपिसर्वेष्वग्निष्वेकैकसमिदाधानंसिध्यत्येव॥ अतः समिधइतियत्सूत्रे
बहुवचनंतत्प्रत्यग्नितिस्रःतिस्रःसमिद[illegible]धानार्थं॥ मंत्राअपित्रयएवेतिप्रतीयंते। कुतः॥ वाक्यपरिसमाप्तेर्द
र्शयमानत्वात्॥ समिदसीत्यत्रदर्शयतिवाक्यपरिसमाप्तिः॥ समिद्धोमेअग्नेदीदीहीत्यत्रापितथा॥ समेद्धातेअग्नेदीद्या
समित्यत्रापितथैव॥ ततश्चैकैकेनमंत्रेणैकैकसमिदाधानंकर्तव्यमितिप्रतीयते॥ तथाचशांखायनः॥ सर्वेषुतुजुहुया
न्महाव्याहृतिभिस्तिस्रस्तिस्रःसमिधोभ्यादध्यात्याहवनीयेचैकहाविति॥ अग्नेणहवनीयंपरीत्यसमिधआदध्यात्तिस्रस्ति
स्रउदङ्मुखस्तिष्ठन्प्रथमांसमात्रामाहवनीयदीदिहीत्याश्वलायनः॥ एवमन्येष्वपिसूत्रेष्वस्ति॥ यदाचपर्युक्षणंगार्हपत्ये॥
ततोदक्षिणाग्नौ॥ ततःआहवनीयइतिक्रमेणपूर्वंकृतं॥ तदासमिदाधानमप्यनेनैवक्रमेणक्रियते॥ अतऊर्ध्वंयजमानस्य
वात्सप्रोपस्थानंभूर्भुवःस्वःकोपस्थानंवा॥ ततस्तूष्णीमाहवनीयस्योपस्थानंततस्मीपआसनंच॥ ततोगार्हपत्यसमीपेशय
नमासनंवा॥ ततःसर्वेषामग्नीनांपर्युक्षणंप्राग्वत्॥ ततोवाग्विसर्गआचमनंच। ततोतीत्यनिःक्रमणंकुर्वतोदक्षिणा
ग्नेर्मनसाध्यानं॥ अथाध्वर्य्योर्होमेवाग्यमनकालंसावधिमाह॥ ॥वाग्यतोदोहप्रभृत्याहोमात्क्षीरहोताचेत्॥ क्षीरहो
होताचेद्यदिवाग्यतोजुहोतितदागोदोहप्रभृत्याहोमाद्वाग्यतोभवति॥ क्षीरहोतेतियोगमनपेक्ष्यैवरूढ्याध्वर्युरुच्यते॥
तेनाध्वर्युकर्तृकहोमपक्षेतस्यगोदोहप्रभृतिहोमसमाप्तिंयावद्वाग्यमस्यविकल्पः॥ अथवाचेद्यदिक्षीरहोताजुहोति
तदादोहप्रभृत्याहोमाद्वाग्यतोभवतीत्येवंयोजना॥ यजमानस्यतुप्रथमाचमनानंतरंवाग्यमोवाचंविसृज्यद्वितीयमा
चमनमिति॥ अस्मिन्पक्षेक्षीरहोतुर्वाग्यमनं॥ १४॥ प्रातर्जुहोत्यनुदिते॥ प्रातःकालेअनुदितेसूर्येग्निहोत्रंजुहोति॥ अथ
यप्रातरनुदितेजुहोतीतिश्रुतेः॥ अनुदितस्तुद्विविधः॥ अनुदितश्चसमयाध्युषितश्च। तथाचमनुः॥ उदितेनुदितेचैव

॥६७॥
॥देवया०४
त

समयाध्युषितेतथेति॥ कात्यायनः॥ रात्रेश्चषोडशो भागेग्रहनक्षत्रभूषिते। कालत्वनुदितंज्ञात्वाहोमंकुर्याद्वि
चक्षणः॥ तथात्र भातसमयेनष्टनक्षत्रमंडले विर्यावन्नदृश्येतसमयाध्युषितंत्वतत्॥ अस्यांकंडिकायांयत्र
यत्रप्रातरित्युच्यते॥ तत्रहोमिएवभवति॥ अन्यत्सर्वंसाधारणंसायंप्रातर्होमियोः॥ ननुसायंहोमसंबंधे
सर्वमपितत्रैववक्तव्यं। इहतुप्रातर्होमसंबंध्येव॥ तन्न किमित्येवमुभयत्र ... साधा
रण्येनोक्तं॥ कर्मैकत्वज्ञापनायेत्यदोषः॥ सायारंभप्रातरपवर्गमिदमेकंकर्मेति॥ तथाचोक्तं॥ सायमादिप्रा
दिए६
तरंतमेकंकर्मप्रचक्षते। दर्शातिपौर्णमासादिएकमेवमनीषिणः इति॥ अंतरेणपराग्नीगत्वादक्षिणेनवात्र
दक्षिणंगार्हपत्यंपरीत्योपविशतियजमानः। यजमानःपूर्वेणाहवनीयंप्रदक्षिणामागत्य दक्षिणाग्नेरुत्तरेण
पराग्नीअंतरेणगार्हपत्यदक्षिणाग्न्योरंतरालेनप्रत्यङ्गत्वा॥ अथवागार्हपत्यदक्षिणाग्नीदक्षिणेनवाग
र्वागार्हपत्यंप्रदक्षिणपरित्यस्वस्वस्थानेउपविशति॥ अयंसंचरःसायंप्रातर्होमियोःसाधारणः। प्रातरित्यविशे
षितत्वात्॥ ततश्चप्रागुक्तसंचरेणसहास्यविकल्पः॥ ॥पत्नीचयथादेशंपत्न्यपिचशब्दादेवमेवप्रविश्ययथा
देशमादेशस्यानतिक्रमेणोपविशति॥ तत्रगार्हपत्यान्नैऋत्यादिशीशानाभिमुखीत्यर्थः॥ ॥अपआचामतिच
त
पिरसीति ... यजमानोनान्यरेणसंचरेणसंचरेणविहारंप्रविश्यस्वस्थानेउपविश्यपवि
रसीतिमंत्रेणापआचामति॥ उदकंभक्षयतीत्यर्थः॥ एतदाचमनंसायंप्रातर्होमिवभवति॥ प्रातरित्यविशेषितत्वा॥ ॥६७॥

भाष्यं॥

तू॥ अग्नेविसर्गोपदेशा ... आचमनानंतरंयजमानस्यवाग्यमनं। पत्न्यपितूष्णीमाचामति॥ वाचंविसृज्यपुनराचाम
ति विद्युदसीति॥ इतिचधारावर्जमित्येतत्पर्युक्षणानंतरंयजमानोवाचंविसृज्यविद्युदसीतिमंत्रेणपुनरपआचामति।
वाग्यमस्यपदार्थधर्मत्वात्तदंतेविसर्गः। अतएवविसर्गोपदेशात्पूर्वंचिमनानंतरंवाग्यमनंभवति॥ विसर्गस्यग्रह
णपूर्वकत्वात्॥ सत्येनत्वर्तमुपेतीतित्रितंशब्देनवाङ्नियमउच्यते॥ अतोमंत्रलिंगादेवंज्ञायतेयदाचमनानंतरं
वाग्यमनमिति॥ उन्नयामीत्याहप्रातः। प्रातरग्निहोत्रेउन्नेष्यामीत्यस्यस्थानेयजमानंप्रत्युन्नमीत्याहपृच्छतिक्षीर
होता॥ प्राक्संस्थंसमित्पर्युक्षणंधाराच। प्रातरित्यनुवर्त्तते॥ प्रातर्होमेसमिदसीत्येतत्समिदाधानं। होमात्पूर्व
नाविपश्चाज्ञाविपर्युक्षणं धाराचप्राक्संस्थभवति॥ प्रथमंगार्हपत्यस्यपर्युक्षणं। ततोदक्षिणाग्नेः। ततःप्राक्संस्था
धारा। ततआहवनीयस्यपर्युक्षणमिति॥ एवंप्राच्यांसंस्थाभवति॥ तथोदकधाराप्राक्संस्थेवगार्हपत्यादारभ्याहव
नीयंयावन्निनेया॥ उभयत्रवा॥ ॥अथवोभयत्रसायंहोमेप्रातर्होमेचसमित्पर्युक्षणंधाराचेत्येतत्प्राक्संस्थमेवभवति॥
वाशब्दोविकल्पार्थः॥ ॥अग्निशब्देसूर्यः॥ सायंहोममंत्रेषुयत्रयत्राग्निशब्दः प्रातर्होमिमंत्रेषुतत्स्थानेतत्रसूर्य
शब्दःप्रयोज्यः। अनेनसूत्रेणमंत्रसमाम्नायःप्रकटीक्रियते॥ अग्निहोत्रमंत्रप्रकरणेयेसूर्यलिंगकामंत्रास्तेषांप्रात
र्होमेप्रयोक्तव्याइति॥ तेनगार्हपत्यदक्षिणाग्निपदस्थानेसूर्यपदप्रयोगोनभवति॥ समाम्नायाभावात्॥ ... अग्नि
र्ज्योतिषमित्यत्रसूर्योज्योतिषंत्वेति॥ अग्निर्ज्योतिरित्यस्यस्थानेसूर्योज्योतिरिति॥ अग्निर्वर्चइति॥ सजूरुषसाक्ति
१ स्थानेसूर्योवर्चइति॥

स्थं
या
व

॥६८॥
॥देवयः०८

वासजूरात्रेंद्र वत्येत्यत्र रात्र्येत्यस्यस्थानेसजूरुषसेंद्रवत्येतिवाप्रातर्होमेप्रयोज्यं। अथप्रातः सजूर्देवेनेतिप्रकृत्य सजूरुषसेंद्रवत्येत्यद्भूतिर्वेतिश्रुतत्वात्॥ ॥ज्योतिः सूर्यइतिवाप्रातः॥ ॥अथवाप्रातर्होमेज्योतिः सूर्यइत्यनेनमंत्रेणवाआहवनीयेपूर्वमाहुतिंजुहोति॥ अथप्रातर्ज्योतिःसूर्यःसूर्योज्योतिःस्वाहेत्येतिश्रवणात्॥ एतच्चसायंयथाअग्निर्ज्योतिरित्य नेनपूर्वा हुतिर्हुतातदाप्रातर्होमे आहवनीयेपूर्वाहुतिहोमेमंत्रविकल्पः॥ सूर्योज्योतिरितिवा॥ ज्योतिःसूर्यइतिवेतिश्रुतौवेवमेवाभिहितत्वात्॥ अथकाम्यान्होमकालानाह॥ प्रथमास्तमितेपर्युदयंचस्वर्गकामस्य। स्वर्गकामस्ययजमानस्यप्रथमास्तमितेअस्तमितमात्रएवसायंजुहोति॥ पर्युदयसूर्योदयसमिपएवप्रातर्जुहोति। कालादेवैतत्फलंनत्वग्निहोत्रात्॥ ॥तमोऽप्ययेसायंजुहुयाद्व्युपेतिप्रातरायुष्कामस्य॥ आयुःकामस्ययजमानस्यतमोऽप्ययेतमसोंधकारस्यागमेसायंजुहुयात्॥ वियतिविगच्छतितमसिप्रातर्जुहुयात्॥ ॥अंतःपशोपशुकामस्यसायंप्रातः॥ पशुकामस्ययजमानस्यअंतःपशौकालेसायंप्रातर्जुहुयात्॥ अंतर्ग्राममध्येपशवो यस्मिन्कालेअसावंतःपशुकालः॥ तस्मिन्नंतःपशौ। एतेनसायंकालेपशुषुग्राममध्येसमागतेषु॥ प्रातश्चग्रामाद्बहिर्निस्सृतेषु॥ ॥शयानेश्रीकामस्यप्रातः॥ श्रीकामस्ययजमानस्यशयानेसुप्तएवसमस्तेलोकेअप्रबुद्धे॥ प्रथमसमिद्धे धूप्यमानेप्रजासुनिहत्येवसहसान्नमत्स्यतः। योयजमानःप्रजासुस्वेदतःनिवासिषूलोकेषुनिहत्यइचनितरांप्रजाः हत्वाइ वअसर्थताउयित्वाद्रवतोऽन्यःसकाशात्सहसाबलात्स्वंत्रमेनुमिच्छतिधन धान्यादिग्रहीतुमिच्छतितस्यैवंविधस्ययजमानस्यप्रथमसमिद्धेप्रथमेव ॥६८॥

आ
न

ज्वालाप्राडुर्भवितिधूप्यमानेसमिध्यमानेजुहोति। तद्येत्रेतप्रथमएवसमिद्धो भवतिधूप्यतरवतहिहिंश भवतीतिब्राह्मणेतत्सर्वंश्रूयते॥ तच्चैतत्क्षत्रियविषयं। ब्राह्मणेवत्रयस्योर्जनपदासंभवात्॥ भूयिष्ठार्चिषिग्रहित्वेनसहस्रा॥ ॥योयजमानःप्रजागृहीत्वाइवड्रस्यइवल्लाहकटकादिना बध्वारवनेतुनिहत्यसहसाबलेनतोऽन्यप्रजाभ्योन्नमत्तुंधनधान्यादिस्वीकर्तुमिच्छति॥ तस्ययजमानस्यभूयिष्ठार्चिषिबहुलज्वालायुक्तेवह्नौजुहोति॥ अथयत्रैतत्प्रदीप्ततरोभवतीत्यादिश्रुतेः॥ एतदपिक्षत्रियविषयमेव॥ बलात्कारेणप्रजाभ्योवित्तोऽस्नेनतस्यैवाधिकारात्॥ प्रदीप्तेमिश्रीयशस्कामस्य॥ श्रीकामस्ययशस्कामस्यचयजमानस्यप्रदीप्ततमेअतिशयेनप्रदीप्तेग्नौजुहोति॥ अथयत्रैतत्प्रदीप्ततोभवतीत्यादिश्रुते॥ एतच्चब्राह्मणानात्रयाणांवर्णानांसाधारणं॥ अर्चिःप्रत्ययाग्नेमैत्रेणान्नमत्स्यतः॥ मित्रस्यभावोमैत्रं। योयजमानोमित्रभावेनप्रजाभ्योन्नमत्तुमिच्छतितस्यार्चिःप्रत्यवाये ज्वालोपसरणेजायमानेजुहोति॥ अथयत्रैतत्प्रतितरामिवेत्तिश्रुतेः॥ एतदपित्रैवर्णिकस्यसाधारणं॥ अंगारेषुवाकरुष्यमानेषुब्रह्मवर्चसकामस्य॥ ॥अथयत्रैतदंगाराश्चाकरुष्यतरवेत्यादिश्रवणात्। एतच्चब्राह्मणस्यैव। ब्रह्मवर्चसस्यतस्यैवोचितत्वात्॥ एवंकाम्याअग्न्यवस्थाउक्ताअधुनाकाम्यानिहोमद्रव्याण्याह। पयसास्वर्गकामःपशुकामोवा॥ स्वर्गकामःपशुकामोवायजमानःपयसादुग्धे नाग्निहोत्रंजुहुयात्॥ यवाग्वाग्रामकामः॥ ग्रामकामोयवाग्वाजुहुयात्॥ तंडुलैः॥ शिथिलपक्वायवागूरित्युच्यते। श्रेयायवागूरितिधूर्त स्वामी॥ तंडुलेबलकामःबलकामोयजमानोत्रीहियवश्यामादिहविषयान्नंतंडुलैर्जुहोति ~~ब्रह्मवर्चसंतत्कामस्ययजमानस्यचाकरुष्यमानेषुदेदीप्यमानेष्वंगारेषुजुहोति~~ ॥तंडु

ब्रह्मतेजो ब्रह्मवर्चसं॥ तत्कामस्ययजमानस्यचाकरुष्यमानेषुदेदीप्यमानेष्वंगारेषुजुहोति ५

न
दि
५

॥ ६२॥
॥ देवया॰ ४

त्तेस्मृतौ। व्रीहिश्यामाकनीवारायवगोधूमव्रालयः॥ एतेषां तंडुलाहोम्यायावनाला व्रियंगवइति॥ दध्नेंद्रियकामः॥ इंद्रि
यं चक्षुः श्रोत्रादि॥ तत्कामोयजमानोदध्नाग्निहोत्रंजुहुयात्। ॥ अनधिश्रयणंच श्रुतिसामर्थ्याभ्यां॥ दध्नोधि
श्रयणेन भवतिनदध्यधिश्रयतीति श्रुतेः सामर्थ्याच्च। यदिदध्नोधिश्रयणं क्रियेतत हितोपसंयोगात्दधित्वमेवापगच्छति॥
आमिक्षात्वंसंपद्येत। अत्युपादानक्षतेपियत्सामर्थ्यमुपदीयतेतदन्नस्यापि तंडुलादेरनधिश्रयणं यथास्यादितिदध्यधि
श्रयणप्रतिषेधश्च लिंगंतस्यानुवादत्वात्॥ तथाचाहापस्तंबः॥ नदध्याधिश्रयतितन्नप्रति षिंचति॥ एवंतंडुलान्नोदन
सोमश्चाज्येनतंडुलैरोदनेन सोमेनवाजुहुयादिति॥ घृतेनतेजस्कामः तेजस्कामोयजमानोघृतेनाग्निहोत्रंजुहुया
दितिस्मृत्यंतरे दंशाद्द्रव्याण्यपिनित्यान्युक्तानि॥ तैलंदधिपयः सोमोयवागूरोदनंघृतं॥ तंडुलामांसमापश्चदशद्रव्या
ण्यकामतइति॥ संवत्सरंजुहुयादतेषामेकैकेनकामसंयोगे। एतेषांत्रयमास्तामितिपर्युदस्तंचस्वर्गकामस्येत्यादिसत्रो
क्तानांकाला ग्न्यवस्थाद्रव्याणांमध्येकामसंयोगेनिमित्तसन्नमाये। कामसंबंधनिमित्तंस्वर्गादिकामसिध्यर्थं
एकैकेनसंवत्सरपर्यंतंजुहुयात् संवत्सरेणैकैकस्यकामसिद्धिर्भवतीत्यर्थः॥ सायंप्रातर्वा॥ अथवाकामसंयोगेसति
एकैकेनकामादिना सायंप्रातर्होमैः कर्त्तव्यो नसंवत्सरं। सायारंभेप्रातरपवर्गेइदमेकमग्निहोत्रं। तत्रचायंगुणफल
संबंधः। तस्मात्सायंप्रातरवेति॥ तत्रैष्यग्न्यवस्थासु एकैकेनकामेनसंवत्सरमेवहोतव्यं॥ ॥ एतेषामेकैकेनकामसं
योगे। एतेषामेकं संवत्सरमुपत्सेदितितान्प्रकृत्याविशेषश्रुतेः॥ अथकाम्यहोमद्रव्यपक्षेपिसोयंहोमेयेनद्रव्येणाड्डु
तंतेनैवप्रातर्होमः कार्यः॥ तथाचयज्ञपार्श्वे। सायंहोमेषुयद्द्रव्यंप्रातर्होमेषुतद्भवेत्॥ भिन्नद्रव्यंकृतंयत्तुअहुते

य

॥ ६१॥
॥ भाष्यं॥

तस्यतद्भवेत्॥ इति। तेनसायंहोमद्रव्यादन्येनद्रव्येणप्रातर्होमेकृतेअनादिष्टंकृत्वासायंहोमद्रव्येणपुनः प्रातर्होमः कार्यः॥
अथदैवात्सायंहोमगृहीतद्रव्यंप्रातर्होमेयदानलभ्येततदातत्प्रतिनिधिभूतंसदृशंद्रव्यांतरंग्राह्यंनतुवैकल्पिकंद्रव्यां
तरं। तस्मिन्प्रकृतद्रव्यावयवाभावात्। सदृशोप्रतिनिधौप्रकृतद्रव्यावयवसंभवाच्च। दक्षिणेनप्रवेशनमग्निहोत्रेष्टिषु
अग्निहोत्रेसायंप्रातर्होमेइष्टिषुचसर्वासुदक्षिणेनद्वारेणागारंहविःसागारंकर्मार्थंप्रवेशनंकर्त्तव्यं। सायंप्रातराहव
नीयस्यासन्नोपस्थाने॥ सायंहोमेप्रातर्होमेचआहवनीयस्योपस्थानंतूष्णींकर्त्तव्यं। तत्समीपएवोपवेशनंच।
तेषामुपस्थानेयदेवसायंप्रातराहवनीयमुपतिष्ठतउपचास्ते देवतस्योपस्थानमितिवचनात्। अतएवपूर्वमु
पस्थानंहेतुत्वात्तत्रआसनंकार्यं॥ सूत्रेतुल्यत्वेपितरत्वादासनपदस्यपूर्वनिपातः॥ शय्यासनंवागार्हपत्ये। एवमाह
वनीयमुपस्थायगार्हपत्यंप्रत्यागत्यतत्समीपेशय्यासनंकर्त्तव्यं। आसनमुपवेशनंवाकर्त्तव्यं। अथयदेवप्रतिपरे
त्यगार्हपत्यमास्तेवाशेतेवातदेवतस्योपस्थानमितिवचनात्॥ एतदाहवनीयस्योपस्थानंगार्हपत्योपस्थानंच
पर्युक्षणात्पूर्वंभवति॥ हुतेहिपर्युक्षणमुक्तंहुतेधारावर्जमितिवात्सप्रोपस्थानंचसायंअस्मादपिपूर्वंतरंभवती च
तिप्रागुक्तं॥ ॥ संव्रजन्मनसोपस्मृत्यदक्षिणाग्निं॥ अत्रायंक्रमः॥ आहवनीयगार्हपत्योपस्थानानंतरंपर्युक्षणं। ततो न
वाग्विसर्गः॥। विद्युदसीत्याचमनंच। ततः प्रागुक्तसंचरद्देशमध्येयेनसंचरेण प्रविष्टोभवति॥ अतोयनि
क्रमणमितिवचनात्तेनैवसंचरेणसंव्रजन्निष्क्रामन्दक्षिणाग्निंमनसोपस्मृत्यमनसैवध्यात्वोपतिष्ठतेति॥
अथयत्रैवसंव्रजन्नन्वाहार्यपचनमुपस्मरेत्तदेवत्वंमनसोपतिष्ठेततदेवतस्योपस्थानमितिवचनात्॥ अ

॥७०॥
॥देवया०४

नत्रि।त्वाप्रातर्मुहूर्त्तं सभासनं सभ्यस्य॥ प्रातःकालेयजमानः अनशित्वा अन्नानंभोजनम कृत्वा ततःप्रागेव
मुहूर्त्तं सभ्यस्य सभायामासनं उपवेशनं करोति। अथप्रातरनशित्वामुहूर्त्तं सभायामासित्वोपिकामंपल्पयु
ततदेवतस्योपस्थानमितिश्रुतेः। भस्मोधृतमुपेयात्॥ ततःसभ्यस्य समीपे उपवेशनानंतरं उधृतं भस्म उपेयात्॥
उपगच्छेत्।गार्हपत्यादिभ्यो भस्मोधृत्य यत्रराशिःकृतो भवतितत्समीपंगच्छेदित्यर्थः। अथयत्रैव भस्मोधृतमुप
निगच्छेत्तदेवतस्योपस्थानमितिवचनात्॥ अत्रोपस्थानं चोपस्थेयस्य मनसावाचा कर्मणा वाराधनं। ततश्च
त्रोपस्थानेस्योपक्रमे ब्रा० अत्र आहवनीयादीनां यदिंद्रादिरूपत्वमुक्तं तद्वा एषएवेंद्र इत्यादिना॥ तदत्रोपस्थानकाले
एतेषामिंद्रादिरूपत्वेन चिंतनार्थं। दक्षिणाग्नेर्मनसोपस्मरणविधानादितरेषां वाचापिइंद्रायाहवनीयायनमइत्ये
वमादिराधनं कार्यमितिप्रतीयते। ततश्चेंद्रायाहवनीयायनमइत्युक्त्वा हवनीयं नमस्कुर्यात्॥ यमायपशवेगार्हपत्याय
नमइतिगार्हपत्यं। नडायनेषधायान्वाहार्यपचनायनमइतिदक्षिणाग्निंमनसैवनतुवाचा। अनश्चितेसागमना
सभ्यायनमइतिसभ्यं। असतेपांसवाय भस्मोद्वापायनमइति भस्मराशिंनमस्कुर्यादिति॥ एतच्चैतत्तदुपस्थानं
कालएव॥ स्वयंवा जुहुयात्॥ सर्वदास्वयमेवचाग्निहोत्रंजुहुयात्॥ अन्योवाजुहुयादिति विकल्पः॥ नत्नुक्तंस्मृतौ॥
संध्याकर्मविसानेतुस्वयंहोमोविधीयते॥ स्वयंहोमेफलंयत्स्यान्नतदन्येनजायते॥ किंतर्त्विन्येन होमेकृतेफलमि
त्यपेक्षितेसएवाह। होमे यत्फलमुद्दिष्टं जुहोतुःस्वयमेवतु॥ हूयमानेतदन्येनफलमेधंप्रपद्यतइति। तथाचविंद्रे ॥७०॥
॥भाष्य॥

७

श्रात्मणे। अन्यैःशतकृताद्धोमानेकः। शिष्यकृतोवरं॥ शिष्यैःशतकृतान्होमानेकः पुत्रकृतोवरं। पुत्रैःशतकृतांहोमानै
कोस्वात्मकृतोवरमिति॥ तथाऋत्विक्पुत्रोगुरुर्भ्राता भागिनेयोथविट्पतिः॥ एतैरेवकृतंयत्स्यात्कृतंस्वयमेवतुइति। विट्

इति

पतिर्जामाता। अन्यत्रप्रसिद्धं॥ भागिनेयःसुतापतिर्वापाठः॥ तथानैवकन्यानयुवतीनाल्पविद्योनबालिशः॥ होताग्नि
हो्ग्निहोत्रस्यनार्त्तोनासंस्कृतस्तथा॥ नरकेहिपतंत्येतेजुह्वतःसचयस्यतत्। तस्माद्वैतानकुशलोहोतास्याद्वेदपारग
इति॥ तथा। सुकृतान्यग्निहोत्राणिनयंतिपरमांगतिं॥ अत्रस्वर्गश्चमोक्षश्चयोयथागंतुमिच्छति॥ प्रोषितेप्यथवात्राक्ते
स्वामिन्यनधिकारिणि। पुत्रोभ्राताथवापत्नीशिष्योवाजुहुयादिति। स्मृत्यर्थसारे। यजमानःप्रधानंस्यात्पत्नीपुत्रश्चक
न्यका॥ ऋत्विक्शिष्योगुरुर्भ्राताभागिनेयःसुतापतिः॥ एतैरेवकृतं [illegible] यत्तुतत्कृतंस्वयमेवतु। पत्नीकन्या
जुहुयाद्विनापर्युक्षणात्क्रियामिति। उपवसथेनियममुपवसथेनियमः॥ उपवसथइत्युच्यते पौर्णमास्यमावास्याउच्यते।
सउपवसथइतिश्रुतेः। तत्रस्वयंजुहुयादित्ययंनियमः॥ स्वयंह्येवैतेरात्रीअग्निहोत्रंजुहुयादिति॥ तथाएतेहवैरात्री
इत्युपक्रम्यसयोहेवंविद्वान्स्वयमुप वसथेजुहोतिसर्वहास्यस्वयंहुतंभवतीतिश्रुतेः॥ अतश्चसूतकेमृतके
पितत्कालमेवस्नात्वास्वयमेवहोमःकार्यः॥ नियमसामर्थ्यात्। श्रौतेकर्मणितत्कालंस्नातःशुद्धिमवाप्नुयादितिवचना
च्च। सूत्रस्यद्विरभ्यासोध्यायपरिसमाप्तिसूचनार्थः॥ ॥इतिश्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्र
पतिसुतेनयाज्ञिकदेवदत्तकृतेकात्यायनसूत्रव्याख्यानेचतुर्थोध्यायःसमाप्तः॥ ॥७८॥

७८

॥७१॥
॥देवया०५

॥७१॥
॥भाष्य॥

॥निरूढपशुर्देवयाज्ञिभाष्ये हविर्यज्ञविधिः कात्यायनसूत्रे षष्ठोऽध्यायस्यारंभः॥६॥

॥१॥
॥देवया॥६

संवत्सरे

६ तदलाभे सौरः॥ कुतः॥ श्रौतस्मार्त्तक्रियाः सर्वाः कुर्याच्चांद्रेषु चर्तुषु।

श्रीगणेशाय नमः॥ ॥इति मंत्रक्रमानुसारिणाचार्येण चातुर्मास्यान्युक्तानि तदनंतरं ज्यो-
तिष्टोमस्यावसरस्तत्प्रोक्तस्तायहि विर्यज्ञत्व सामान्यान्मित्रविंदो क्ता। अथ हविर्यज्ञत्वसामान्याद्देवपाशुके-
षु चातुर्मास्येषु हविर्यज्ञविधपशुनामुक्तत्वाच्च निरूढोपि हविर्यज्ञविधः॥ पशुबंधावगतो तस्तमुपदिदि-
क्षुः प्रथमं तस्य कालमाह॥ ॥पश्विज्या संवत्सरे संवत्सरे प्रावृषि वा। इज्या यागः। पशुना इज्या पश्विज्या॥ प-
शुयागः संवत्सरे प्रति वर्षं यावज्जीवं प्रावृषि वर्षास्वित्तौ पश्विज्या भवति। तत्राप्यमावास्यायां पौर्णमास्यां
वा॥ यइष्ट्यादिवाक्यात्॥ श्रावणभाद्रपदश्चौ भौमासो वर्षर्तुः। स च चांद्रः। तदलाभे तु सौरे षितिस्मृति-
दामत मिति स्मरणात्। एवं सोमादौ सर्वत्र ... सौरचांद्रायणमास्रयुणे व्यवस्थाद्रष्टव्या। पशुबंधेन यज-
त इति प्रक्रम्य तेन सुयवसे यजेते तिन्नं वै संवत्सरो नानीजानमतीयादिति च श्रुतत्वात्॥ शोभना नियवसा-
नि तृणानि यस्मिन्नसौ सुयवसो वर्षर्तुरिति। तेन सुयवसे इति वर्षर्तौ इत्यर्थः। नित्यत्वं चास्य परिभाषाया-
मुक्तमेव। केचिदस्य। आरंभे प्रथमप्रयोगे न्वारंभणीयामिच्छंति। नेति कर्काचार्याः संप्रदायपद्धतिकाराश्च। का-
लांतरमथाह॥ ॥आवृत्तिमुखयोर्वा॥ ॥आवर्त्तनमावृत्तिः सूर्यस्य दक्षिणायन-
मुदगयनं च। तयोर्मुखं प्रथममहः संक्रमणकालसंनिहितं तत्रेयं पश्विज्या भवति दक्षिणायनदिने

॥१॥
॥निभाष्य॥

उत्तरायणदिने चेत्यर्थः। अस्मिन्पक्षे प्रतिवर्षं पशुद्वयं भवति। अत्रापि संवत्सरे संवत्सर इत्यनुवर्त्तत एव। नात्र पौर्ण-
मास्यमावास्ययोरपेक्षा। संक्रांतिदिन एव विधानात्॥ संक्रांतेः पूर्वदिने उत्तरदिने वा यस्मिन्नहनि स्मृतिशास्त्रतः पू-
र्वात्के पूर्णकालत्वं॥ तत्र पशुयागः कर्त्तव्यः शारवांतरेस्य कालांतरमयुक्तं॥ प्रावृषि शरदि वसंते वेति॥ ॥गृहे-
षु॥ आग्नीषोमीयविकारत्वादस्य देवयजने यागप्राप्तावाह। अयं पशुयागो गृहेषु कर्त्तव्यः। पशुबंधेन यजते प्रकृत्य
तेन गृहेषु यजेतेति श्रुतत्वात्॥ ॥यूपाहुतिं जुहोति चतुर्गृहीतं स्रुवेण वोरु विष्णो विति। अत्र पूर्वं मृत्विजो वृत्वा
साग्न्याज्याधिकारणत्वादनुदितएवोपक्रम्य निरूढ पश्वर्थमाहवनीयदक्षिणाग्निविधृत्या ग्न्यन्वाधानं चतुरासनं ब्र-
ह्मवरणं च कृत्वा यूपाहुत्यर्थं पूर्णाहुतिवदाज्यं संस्कृत्य उरु विष्णो विति मंत्रेण स्रुचा स्रुवेण वा यूपाहुतिं जुहोति।
स्रुवा वेच्चतुर्गृहीतमाज्यमाहवनीये जुहोति। स्रुवेण चेत्तेनैव गृहीत्वा। अत्र पूर्वं तरं प्रतिस्तरणं निष्ठता समिदा-
धानं चाहवनीये कर्त्तव्यं। आहवनीये होमा इति परिभाषितत्वादाहवनीये होमः। तस्य होमो नादेश इति वचनाद्गृ-
ह्यं च चतुर्गृहीतं। जुह्वा वचन इति वचनाज्जुह्वा। तत्र चतुर्गृहीतमित्यनेन संगृहीतार्थवाचित्वादिति वचनात्प्राप्तस्य संगृ-
हीतस्य निवृत्तिः। इदं विष्णव इति त्यागः। यूपं व्रश्च्य वैष्णव्या जुहोतीति प्रकृत्य सयदि स्रुचा जुहोति। चतुर्गृहीतमा-
ज्यं गृहीत्वा जुहोति विद्यात्स्रुवेण स्रुवेणैवोपहत्य जुहोत्युरु विष्णो इत्यादि श्रुतत्वात्। आहुत्यंगत्वादग्निपरिस्त-
रणं ति स्तमिधः सर्वत्रमध्य इत्युक्तत्वाद्त्र समिदाधानं च। यत्र पतिरेव श्रोनेक यजमानके इष्यते। प्रप्रयस्तप

४

य॰ त्य४

॥२॥ ॥देवया॰६

तीतिरेतिद्विजमानके। अत्र यज्ञनीस्तिरेति बऊ यजमानके इति। स्वयं खले वालीत्यत्र न भवति। यत्र यूपच्छेदनं तत्रैवेत
स्यादुक्तत्वात्॥ ॥आज्यशेषमादाय सतक्षा गच्छति। आज्यस्थाली यूपाऊत्यर्थं संस्कृत्याज्यमध्वर्युरादाय स
क्षात क्षास्तत्र धारेण सहितो यूपच्छेदनायारण्यं प्रतिगच्छति। यदाज्यं परिशिष्टं भवति तत्पा दत्ते तत्र आयत्ती तिश्रुतत्वा
त्॥ ॥यूपमभिशत्यन्या निति। अत्यन्या निल्यमुं मंत्रं यूप मभिमृशय जपती त्यर्थः। सयं यूपं जोषयं ते तमेव
मभिमृशय जपतीति श्रुतत्वात्। ते ब्रह्म यजमानाध्वर्यु तक्षाणोरण्यं समागताः संतो यं वृक्षं यूपं यूपप्रकृति जोषयंते
परस्परमेव लक्षणेपायो वृक्ष इति तं वृक्षमभिमृशय जपतीति श्रुत्यर्थः॥ ॥प्राड्विः ष्ठन्नभिमंत्रयते वा॥ अथ वा यूपस्य प
श्चात् प्राङ्मुखस्तिष्ठन्नत्यन्या नित्यनेन मंत्रेण यूपमभिमंत्रयते। यूपविलोयन्न मुं मंत्रं पठतीत्यर्थः। पश्चादेव प्राङ्तिष्ठ
न्नभिमंत्रयत इति श्रुतत्वात्। किंजातीयं यूपमित्याकांक्षायामाह॥ ॥पालाशं बऊलपर्ण्णमशुष्काग्रमूर्द्ध्वसकल
शाखं मध्याग्रोपनतमव्रणं। कीदृशं यूपं। पालाशं। पालाशस्य वृक्षस्य विकारोवा अवयवो वा पालाशः। तं पालाशं।
तस्मात्पालाशमेव यूपं कुर्वीतेति श्रुतेः। पुनः कीदृशं यूपं। बऊलपर्ण्णं। बऊलानि पर्ण्णानि यस्यासौ बऊलपर्ण्णं
स्तं। तथा अशुष्काग्रं। अशुष्कमाईमग्रं यस्यासावशुष्काग्रस्तं। तथा ऊर्द्ध्वसकलशाखं। ऊर्द्ध्वाः सकलाः वेष्टनत्वयः
ऊर्द्ध्वश्विशाखाः प्ररोहाश्च यस्यासावूर्द्ध्वसकलशाखस्तं। तथा मध्याग्रोपनतं। मध्येऽग्रे वोपनतं स्थानद्वये पि व
क्रं। तथा अव्रणं। नास्तिव्रणं यस्यासावव्रणस्तमव्रणं। व्रणमामं छिद्रः रोमजो ग्रंथिरित्यर्थः॥ अथ य

॥२॥ ॥काण्व्या॰६

एवमानतमुपरिष्टादुपनतो मध्ये सोन्नाधस्य रूपमिति श्रुतत्वात्॥ मध्याग्रोपनतमित्युक्तं। अन्यत्सर्वं शाखां
तरात्॥ ॥अभावे खदिरबिल्वरोहितकान्॥ निरूढपालाशस्य यूपस्याभावे अलाभे खदिरबिल्वरोहितका
न्यूपान्कुर्यात्॥ शाखांतरात्॥ ॥खदिराभावे सोमे इतरान्॥ सोमे मुख्यः खादिरो यूपो भवति। तस्मात्खादि
रो यूपो भवतीति श्रुतत्वात्। खदिरस्याभावेऽलाभे इतरान्। बैल्वान्रौहितकान्वा यूपान्कुर्यात्। केचिद्बऊवचना
त्पालाशमपि खादिराभावे सोमे इच्छंति। नेत्यपरे सोमशब्देन तदंगभूतोऽग्नीषोमीयो लक्ष्यते। सोमयागस्य यूपे
न प्रयोजनाभावात्॥ स्रुवेणोपस्पृशति विष्णवे त्वेति। स्रुवेण घृताक्तेन च्छेदनप्रदेशं तं यूपवृक्षमुपस्पृशे
ति विष्णवे त्वेत्यनेन मंत्रेण। अथ स्रुवेणोपस्पृशति विष्णवे त्वेति श्रुतत्वात्। तत्राहापस्तंबः। देवस्त्वा सविताम
ध्वानक्त्विति स्रुवेण सर्वतो मूलं पर्यणक्तीति। मानवेऽच। विष्णवे त्वेत्याज्येन पर्यनक्तीति। काठके देवस्त्वेत्यक्ते
ति। अतः स्रुवेण स्थाल्याज्यमादाय यूपवृक्षस्य मूले छेदनस्थाने परितोऽजनं कर्त्तव्यमित्यर्थः॥ ॥ओषि
ध इति कुशतरुणं तिरस्कृत्य स्वधित इति परशुना प्रहरेति। ओषध इत्यनेन मंत्रेण कुशतरुणं दर्भतृणं तिरस्कृत्य
त्यां तर्द्धाय स्वधिते मैनमिति मंत्रेण परशुना कुठारेणाहतिस्य तृणस्योपरि प्रहरति छेदनाय प्रहारं सु च ति।
अथ दर्भतरुणकमंतर्द्धायौषधे त्रायस्वेति। तथा अथ परशु ना प्रहरति स्वधित इति च श्रुतत्वात्॥
प्रथमशकलं निदधाति। यूपेच्छिद्यमाने यः प्रथमशकलः पतति तं प्रथमं शकलं निदधाति यूपावटमध्ये प्रसे

॥३॥
॥देव०६
कदे४

पार्थक्किंचित्सुगुप्तेदेशेऽनाशार्थंस्थापयतीत्यर्थः। यथानगच्छति। स्वयंप्रथमंशकलमपच्छिनत्तितमादत्तेइति
श्रुतत्वात्। अत्रहरिस्वामिनः। यः प्रथमशकलोपच्छिन्नस्तमादत्तेयूपावटेवधातुं। अन्यानपिचादत्तएव
सुक्रामंथिप्रचोरायचेति॥ ॥अनक्षसंगंवृश्चति। तंप्रहृतंयूपवृक्षसंगंभं वृश्चति। ओव्रश्छेदने। छिन्नेऽपियः
सामर्थ्यात्तिदेशः स्थाणुरनसोक्षंसंगमानातीत्ययंसंगमः। नअतक्षसंगमोनक्षसंगंभः। यथागच्छतःशकटस्य
वसिष्ठस्थाणुनसंगमाति तथानीचैश्छिंद्यादित्यर्थः। तंवाअनक्षसंगंभंवृश्चेदितिश्रुतेः॥ ॥एकजं॥ यएकएवा
सहायएवभूमेर्जातः तंएकजंयूपंवृश्चति॥ ॥द्यांमालेखीरितिपतंतमभिमंत्रयते। द्यांमालेखीरितिमंत्रेण
छिन्नंयूपवृक्षंपतंतमभिमंत्रयते। तंप्रच्यवमानमनुमंत्रयतेइतिश्रुतेः। प्रच्यवमानंपतंतं॥ ॥नदक्षिणापतेत्।
तथायत्नःकर्त्तव्यायथासयूपोदक्षिणादक्षिणस्यांदिशिनपतेत्। तस्यांदिशिपतंतंबाधेतेत्यर्थः। अतएवदक्षि
णापातनप्रतिषेधात्। प्राचेवाप्रत्यंचेवापातयेदितिगम्यते। तथाचश्रूयते। तंप्राञ्चंपातयेत्प्राची। हिदेवानोदिगथ
उदंचंउदीचीहिमनुष्याणांदिगथोप्रत्यंचंदक्षिणायेत्वे। वेनंदिशःपरिबाधिषेनेपावेदिक्षिपितृणामिति॥
अयपूंहित्वेतिशोधनम्॥ अयंहित्वेतिमंत्रेणछिन्नस्ययूपवृक्षस्यशोधनंकुठारेणशाखापर्णादिपातनंक
रोति। यूपस्यावरूपमर्थप्राप्तंशोधनमिति। अयंचमंत्रस्तदेवाभिधा तु वोक्तं। अतोलिंगात्सूत्रकृतातत्र
विनियुक्तः। कथंपुनरेषमंत्रःशोधनमभिदधाति। परस्मुनोशोध्यमानस्यसौभाग्यदर्शनीयत्वंभवतीसौ

॥३॥
॥११०५१८

श्व
क्ष

वचाभिधीयते। अयपूंहित्वास्वधितिस्तेतिजानःप्र णिनायमहतेसौभगायेति। तस्मादनेनमंत्रेणशोधनंकर्त्तव्य
मितिप्राप्तआह॥ ॥अभिमंत्रणशेषोवाविशेषोपदेशात्॥ वाशब्दः पूर्वोक्तपक्षनिरासार्थः। अभिमंत्रणशेषएवा
यमयंहित्वेतिमंत्रः। नानेनशोधनंकर्त्तव्यमिति। कुतः। अविशेषोपदेशात्। यतोनायंमंत्रोविशेषेणशोधनेके
चिदुपदिश्यते। अतोभिमंत्रणमंत्रस्यद्यांमालेखीरित्यस्यैवायंशेषोनेमंत्रांतरमिति। यदुक्तंलिंगाच्छोधनेविनि
योगइति। तन्न। मंत्राणामविधायकत्वादिति। वस्तुतस्तादृशलिंगमपिनास्तियद्बलाच्छोधनेविनियुज्यते। त
स्मादमभिमंत्रणशेषएव। शोधनंतुतूष्णीकर्त्तव्यम्॥ ॥अतस्त्वमित्याव्रश्चनेजुहोति। आज्यस्थाल्याःस
काशात्स्रुवेगृहीतंजुह्वांगृहीत्वापरिस्तीर्यातस्त्वंदेववेतिमंत्रेणाव्रश्चनेजुहोति। अथाव्रश्चनमभिजुहोतिसजु
होसस्त्वमितिश्रुतत्वात्। आव्रश्चतेयूपोस्मादित्याव्रश्चनःस्थाणोःछेदनप्रदेशः तमभिजुहोतिहोमेनसंस्करोति

त

॥ ॥यूपेवातत्संस्कारात्। अथवायूपएतामाहुतिंजुहोतिनस्थाणौ। कुतः। तत्संस्कारात्। आउत्पादियूप
संस्कर्त्तव्योनस्थाणुः। आव्रश्चनशब्देनछेदउच्यतेसचयूपेप्यस्तिस्थाणावपि। ततश्चयूपस्थेआव्रश्चनेहो
मःकार्यइतिप्राप्तेआह॥ ॥स्थाणौश्रुतेश्च॥ स्थाणावेवहोतव्यंनयूपोकुतःश्रुतेः। चकारमंत्रवर्णाच्चश्रु
तिस्तावत्। अथाव्रश्चनमभिजुहोतीतिप्रकृत्यसनेदतोनाष्टारक्षांसिनानूत्तिष्ठंत्यथोरेतोवाआज्यंतद्धन

॥४॥
॥देव०।६

स्पतिषेवैतद्रेतो दधाति तस्माद्रेतसश्चा वृश्चनाद्वनस्पतयोनुप्रजायंत इति। वनस्पतिप्ररोहणं व्रश्चनादेवोपप
द्यते न यूपे। यूपविरोहणे प्रायश्चित्तविधानात्। अतस्त्वं देव वनस्पते शतवल्शो विरोहेति मंत्रवर्णात्। हे वनस्प
ते त्वं अतः अस्मात् स्थाणोः सकाशात् शतवल्शः शतशाखो विरोह प्रसरेति मंत्रार्थः। केचिन्समाख्या इति श्रुते
श्चेत्येवं व्याचक्षते। शाखा तरेस्थाएवाऊतिरिति समाख्या श्रुतेः यदुक्तं यूपसंस्कारादित्यत्र स्थाणावा
पि क्रियमाणे होमः आरादुपकारकत्वाङ्गवेत्येव यूपस्य संस्कारो यूपियः स्थाणुरिति कृत्वा। शेषाभिमर्शनमिन व
तू। यथो शेषस्याभिमर्शने कृते गृहीतस्य हविषः संस्कारो भवति तेन तस्य बधितत्वात्। एवं मंत्रापि॥ इयंचाऊतिः
खल्वेवान्या नभवति। परिवास्याच्छेदनं पुनः॥ पूर्वमानेन कृत्वात्र शिष्टमग्रं परिवास्य छित्वा पुनरच्छेदनं
पुनर्द्वितीयवारं छेदनं न कर्त्तव्यमित्यर्थः। तथापत्नः कर्त्तव्यो यथा मानेन कृत्वा परिवासने कृते पुनः समीकर
णाय छेदनं कर्त्तव्यं न भवति। तं परिवासयति स यावंतमेवाग्रे परिवासयेत्तावांत्स्यादिति श्रुतेः। परिपूर्वो वि
सयाति छेदने वर्त्तत इति सामर्थ्याद्विवसीयते॥ किं प्रमाणं परिवासयेदित्याकांक्षायामाह॥ ॥त्र्यरत्निः॥ त्रयो
रत्नयः प्रमाणमस्या सौ त्र्यरत्निः त्र्यरत्निः प्रमाणं परिवासनीयः॥ चतुररत्निर्वा॥ चत्वारो रत्नयः प्रमा
णमस्या सौ चतुररत्निः। चतुररत्निः परिवासनीय इत्यर्थः। सवाएष त्र्यरत्निर्वै वा चतुररत्निर्वा पशुबंधयू

॥४॥
॥व्या०।६

पो भवति। निरूढ प्रकरण एव श्रुतत्वात्॥ ॥एकारत्निप्रभृतीनेके॥ एके आचार्या एकारत्निप्रभृतीनपि एका
रत्न्यादिप्रमाणकानपि यूपान्निरूढे इच्छंति। स यत्पशुना यक्ष्यमाण एकारत्निं यूपं कुरुत इममेव तेन लोकं जय
त्यथ चतुररत्निमिति श्रुतत्वात्। अन्ये पुनरेकारत्निद्व्यरत्निमिति भाव वयुत्यवादो मन्यंते। कुतः सवा एष
त्र्यरत्निर्वैव चतुररत्निर्वेति पक्षद्वयस्यैवोपहारात्। तथा चापस्तंबः। त्र्यरत्निश्चतुररत्निर्वा पालाशो निरू
ढपशुबंधस्यान्योन्यः सोम्यस्याध्वरस्येति वाजसनेयकमिति। तस्मात्त्र्यरत्निश्चतुररत्निर्वा इति द्वावेव प
क्षौ। नैकारत्निद्व्यरत्निर्वा पक्षाविति साधुः॥ ॥अष्टाश्रिकरोत्युपरवर्जं॥ तं परिवासितं यूपं तक्षा तक्षणेना
ष्टाश्रिं अष्टकोणं करोति। उपरवर्जं उपरो वटः तत्संबंधिनं निखनार्हं यूपस्य प्रदेशं मूलतः पंचमांशं वर्ज
यित्वान्यः तक्षणेनाष्टकोणः कार्यः। स वा अष्टाश्रिर्भवतीति श्रुतत्वात्॥ लोकेपि मिथ्यादेर्निखनार्ह प्रदेश
स्योपरत्वनादुपरवर्जमिति सूत्रितं॥ ॥अग्राच्चषालं पृथुमात्रमष्टाश्रिं मध्यसंगृहीतं॥ यूपपरिवासना
नंतरं यद्वविशिष्टं पृथक्कृतमग्रं ततश्चषालं कर्त्तव्यं। किं प्रमाणं। पृथमात्रं प्रसारितांगुलिः पाणिरामणि
बंधनात्पृथ इत्युच्यते। पृथः प्रमाणमस्य तत्पृथमात्रं। चषालमिति संज्ञा सव्यवहारार्था आचषाले
स्मणादित्यादौ। पुनः कीदृशं अष्टाश्री अष्टकोणं। तदपि तक्षणेनाष्टकोणं कुर्यात्। तद्वेचि। तथा मध्ये संगृ

॥५॥
॥दे०२०८
य

हीतं। उलूखलवन्मध्ये संकुचीकृतमित्यर्थः। तद्यन्मध्ये संगृहीतमिव भवतीति श्रुतत्वात्॥ ॥ऊर्ध्वमग्रेप्रतिमुञ्चति॥ तच्चषालं यूपस्याग्रे ऊर्ध्वं प्रतिमुञ्चति च तएवोर्द्ध्वं प्रतिमोक विधानाच्चषालस्य मध्ये वेधः कार्यः। अग्रेप्रतिमुञ्चतीति कुतएतत्। अथ दूर्ध्वं चषालाद्व्यंगुलं वा त्र्यंगुलं वेति वचनात्। प्रतिमुञ्चतीति वचनाच्च चूडाग्रो यूपः। चषालं च सुषिरमिति गम्यते इति हरिस्वामिनः। तथा चापस्तंबः। मूलतो तष्टमुपरमष्टाश्रिरनूर्ध्वेऽग्निर्तोपणीयात् प्रज्ञाताग्निरष्टाश्रिरिति॥ ॥द्व्यंगुलं त्र्यंगुलं वा तत्। अतिक्रांतं यूपस्य। यूपस्य यूपाग्रस्य द्व्यंगुलं त्र्यंगुलं वा चषालं तदतिक्रांतं चषालच्छिद्राग्रवेधादतिक्रांतं भवति। अतिक्रम्योर्ध्वानिःसृतं भवति। तथा चषालस्योर्ध्वं प्रवणं कर्त्तव्यं। तथा चषालो यूपाग्रादध्वो द्व्यंगुले वा तिष्ठतीत्यर्थः॥ अथ यदूर्ध्वं चषालाद्व्यंगुलं वा त्र्यंगुलं वा साध्यादेवा इति श्रुतत्वात्॥ ॥पंचारत्निः पंचदशपर्यंतः सोमे दश सप्त च चतुर्दश वर्जं। सोमे सोमांगभूतेग्नीषोमीये दश सप्त चतुर्दश वर्जं दशारत्निं च वर्जयित्वा पंचारत्निप्रभृति पंचारत्न्यादि पंचदशारत्निपर्यंतो यूपो भवति। पंचारत्निं परिवासयेत्। अष्टारत्निं निवासयेत्। नवारत्निं परिवासयेत्। एकादशारत्निं परिवासयेत्। त्रयोदशारत्निं परिवासयेत्। चतुर्दशारत्निं परिवासयेत्। पंचदशारत्निं परिवासयेदिति श्रुतत्वात्। दश सप्त चतुर्दशारत्नेरश्रुतत्वात्। तद्वर्जमित्युक्तं। इहाग्नीषोमीयविकारं निरूढपशुप्रसक्तं सोग्नी

॥५॥
॥भाष्य।८

षोमीयधर्मा अतिदिश्यंते। नन्वग्नीषोमीय एवाग्नीषोमीयधर्माः कुतो न विहिताः। किमिति हविर्षु ता उपदिश्यंते। अग्नीषोमीयधर्माणां हि सौमिके धर्मैरत्यंतं व्यतिषंगात्तत्रोपदेशे सति न ज्ञायते। अग्नीषोमीयधर्मा इति। अतो निष्कृष्य तद्विकारे निरूढे केवलाः सर्वेग्नीषोमीयधर्मा उपदिश्यंते तेनात्र विशेषिका निरूढधर्मा अपि वक्तव्याः। अग्नीषोमीयधर्माश्च। तेनोच्यते पंचारत्निः पंचपर्यंतः सोम इति॥ ॥अपरिमितो वा॥ अपरिमितं प्रमाणाद्भूयः इत्युक्तत्वादति प्रमाणादितिशायेगधिकप्रमाणोपरितेरत्युच्यते। वाशब्दो विकल्पार्थः। अथवा सोमे तदंगभूतेग्नीषोमीये अपरिमितप्रमाणो वा षोडशारत्निप्रभृति यूपो भवति। अपरिमित एव स्यादिति श्रुतत्वात्॥ ॥सप्तदश वाजपेये॥ वाजपेयांगभूतेग्नीषोमीये सप्तदशारत्निर्यूपः स्यात्। सप्तदशारत्निर्वाजपेययूप इति श्रुतत्वात्। वाजपेयप्रकरणेपि सप्तदशारत्निर्भवतीति श्रुतत्वाच्च॥ ॥ एकविंशतिरश्वमेधे। अश्वमेधे सर्वे यूपा एकविंशत्यरत्नयो भवंति। एकविंशतियूपाः सर्व एकविंशत्यरत्नय इति श्रुतत्वात्॥ ॥यथाकार्यं स्थविमा॥ स्थविमा स्थौल्यं यूपानां यथाकार्यं भवति। कार्यस्य यूपदेशस्यानुरूपं योग्यं यथाकार्यं। लोके प्रसिद्धो वृद्धिदैर्घ्यप्रमाणानुसारेण तद्योग्यं स्थौल्यं कुर्यादित्यर्थः॥ ॥वेदिं करिष्यन् [illegible] द्वौ तारं पंच गृहीतं म [illegible] न सानु दत्य जुहो

२क

क४

॥६॥
॥देव०६

त्येकामाहुतिं पंच वाद्यो ष्ट्रमित्यादि॥ वेदिकरिष्यन्वेदिकरणात्प्राक् आज्यं सं रुह्य पंच गृहीतमाज्यं गृहीत्वा द्यौष्ट्रमिति मंत्र पठ्योतारं मंत्रं मनसानुद्रुत्य मनसैवोच्चार्य तेन पंचगृहीतेनैकामाहुतिं जुहोति अथ वा तेनैव पंचगृहीतेन विभज्य पंचाहुतीर्जुहोति। आहवनीये परिस्तरणसमिदाधानपूर्वकं। द्यौष्ट्रमि मंत्रस्य षट्होतिनामधेयं। इयं चाहुति निरूढपशावेव भवति तत्प्रकरण एव पठितत्वात्। तद्विकारेषु चा तुर्मास्य सौत्रामणीगतेषु हवीर्यज्ञपशुषु च। निरूढप्रकरणाश्रयते। तदाहुः रध्वर्यो यदि क्षितस्य नानवभृ योवकल्पते क्के नमदिनी क्षइत्यावभृथादनुद्धृं हेयुरध्वर्युश्च प्रतिप्रस्थाता च होता च मैत्रावरुणश्च ब्रह्मा वाग्नीध्रश्चैते वाएष षट्होतातमनुद्रुत्य षट्होतारं जुहोत्येकामाहुतिं हुत्वा पंच वाज्याहुतीर्द्यौष्ट्रमित्यादिश्रु तत्वात्। अत्र केचिदाहुः। अध्वर्य्वादिभिः षड्भिरृत्विग्भिरयं पशुरेव षट्होता। तं पशुं मनसानुद्रुत्य सं वि त्याहुतिं जुहुयादिति। एषां च मंत्रः ष तातेषामपि ऋत्विग्भिः पशुः षट्होतद्योगान्मंत्रोपि षट्होतेति॥१॥
वेदिं करोति वरुण प्रघासवत्॥ अत्र निरूढपशुबंधे वरुणप्रघासवद्वेदिं करोति। वरुणप्रघासव दित्याहवनीयस्य पुरस्ताद्रथमात्रीं वा चतुरत्नीं वा पश्चात्सप्त प्राची षड्वा त्रयः पुरस्तादित्येवं प्रमाणां वा अ परिमितां वा वेदिं कुर्यादित्यर्थः। वेदिमित्येकवचनादेकां करोति। केचिद्वेदिं करोतीत्येतं सूत्रं हत्वा दर्शपूर्ण

र
॥६॥
भ०भा०प्र०६

मासिकीमेव वेदिं पशुबंधस्येच्छंति। तदयुक्तं। तथा सति वरुणप्रघासवदित्यतिदेशस्य वैयर्थ्या पत्तेः। स्फ्यपाद्यग्निनिधानादित्ये तावतैव सिद्धत्वात्। न हि वरुणप्रघासादन्यत्रेतः प्राक्काच स्फ्यपादानाद्य ग्निनिधानांतं कर्मोपदिष्टमस्ति येन वरुणप्रघासवदिति विशेष्यते। तस्माद्वेदिं करोति। वरुणप्रघासवदित्येव मंतएव सूत्रच्छेदः कर्त्तव्यः। शाखांतरसूत्रेष्वपि निरूढे वरुणप्रघासवद्वेदिः पठ्यते तथा चापस्तंबः रथ मात्री निरूढपशुबंधस्य वेदिरसंमिता पश्चात्तिर्यगीषया प्राची चिपद्य युगेन पूरस्ताद्यावता बाल्ये च्छि द्रो अरत्निभिर्वा चतुर्भिः पश्चात्षड्भिः प्राची त्रिः पुरस्तात्तां वेदिं हृत्वा दर्शपूर्णमासवत्संनमव र्जं प्रागुत्तरा त्परिगृह्यान्हृत्वापरेण यूपावटं संचरमवशिष्य वेद्यामुत्तरवेदिं दशपदां सोमे करोत्यंहीयसीं पुरस्तादित्ये के यावता युगेन यजमानस्य वा पदैर्विमाय शम्यया यपरिमिमीते। शम्यामात्री निरूढपशुबंधस्योत्तरवे दिरिति॥ तथा च काठके। प्रागग्रे रथमात्रीं वेदिं प्राक्परिगृह्य हृत्वा तस्याः पूर्वार्द्धे त्रिंशदंगुलामुत्तरवेदिं च तुःस्रक्तिं प्रत्यग्यूपदेशात् पदमात्रे भूयसी वा अपरिमिता वेदिर्यदा स्यादशपादोत्तरवेदिः संभवेत्तां वेदिं कुर्यादिति लौगाक्षिरिति॥ मानवे च। वेदिं करोति यथोत्तरां वारुणप्रघासिकीं निःसारणांतां हृत्वा वसति

शम्या द्वात्रिंशदंगुला उच्यते॥

॥२

।।७।।
।।देयज०।।६

श्चो भूते पाणी प्रक्षाल्य वीहारं परिस्तीर्येति। संभवारादुत्तरनाभोन्युप्या पिबेत दंतं पूर्वेद्युः स्यादिति काठके।
आपस्तंभोपि वा प्रोक्षणं तां कृत्वौदुंबर शाखाभिः प्लक्षशाखाभिर्वा प्रच्छाद्य वसति यच्च सद्यस्कालः प
शुर्भवति। अतश्च सर्वसूत्रेषु दर्शनात् द्वैकल्पिकी द्व्यवकालतापि पशोर्भवति। ननु कथमनवसरे वेदिकरण
मुक्तं परिस्तरणादीन्यप्युपरिष्टादुपदेक्ष्यति। उच्यते। ज्योतिष्टोमे ह्युत्तरवेदि विहिता। तत्र चाहवनीयः स्था
पितः स चाग्निसंस्कारः अग्निश्चांगप्रधानार्थ इत्यग्नीषोमीयेप्युत्तरवेदि विहितोग्निः प्राप्नोति। ततश्च तद्वि
कारेषु पश्वंतरेषु नवेदिं विनोत्तरवेदिर्भवति। अतः स्ववसराद्वेदिरपकृष्यते। तेन वेदिं करोतीत्युक्तं ॥ ॥
स्फ्याद्याग्निनिधानात् ॥ अत्र वरुणप्रघास वक्ष्यमाणं त्रयमध्ये न्यतनेन प्रमाणेन वेदिमानमुल्लेखकरणं
तं कृत्वा स्फ्यादि स्फ्यादानादि अग्निनिधानांतं। तेष्वग्निनिदधातीत्येतावत्पर्यंतं कर्म करोति। ततः पूर्वेद्युर
यजमानवाचं यच्छेति प्रेषं दत्वौषध्यासादनादि त्रिकप्रोक्षणांतं कृत्वा वेदिमानादि कुर्यात् ॥ ॥एकमिध्मे
नप्रणयति॥ तत्र पशुबंधे एकमग्निमिध्मेन प्रणयति। अयं वरुणप्रघासिकानिर्देशान्मध्ये विशेषः। तत्रा
द्वयोः प्रणयनमुक्तं। कर्परे पाचा। एकैकमेव प्रणयति। नद्वौ। इध्मेन। नप्रकृतिवत्कर्परेणेति। येषां च तत्र सौ
मिकं प्रणयनं। तेषामिध्मेनेति प्राप्तो नुवाद एव। अत्राह॥ आपस्तंबः। एष पशुबंधस्याहवनीयात् यतः

।।७।।
।।भाष्य।।६

प्रणयति स गार्हपत्यः प्रणीतश्चेदग्निहोत्रस्य कालः एतस्मिन्नेवाग्निहोत्रं जुहुयादेवमन्यत्र विक्रांत इति।
अत्राह संप्रदायपद्धतिकारः। अतो प्रणीतेनाग्निहोत्रहोमः अनंगत्वादग्निहोत्रहोमस्येति। अयं च न्यायः स
चापस्तंबवचनं बाधितुं न समर्थ इति प्रणीत एवाग्निहोत्रं होतव्यमिति युक्तं। अत्र वेदेः उत्तरभागे नेध्म
हरणं कार्यं। तथा च काठके त्रिरनुक्त उत्तरेण वेद्यं तेन गत्वा पूर्वेणोत्तरवेदिं प्रत्यङ् तिष्ठन्नित्यादि॥ ॥व्रतो
पायनप्रणीताज्यभागभागावदान पूर्णपात्र विष्णुक्रमान्कुर्याद्धविर्यज्ञविधेः॥ ॥हविर्यज्ञविधेपशो व्र
तोपायनादीन्विष्णुक्रमांतान्यपदार्थान्कुर्यात्। अर्थान्तसवविधेन कुर्यादिति गम्यते। व्रतोपायनं व्रतग्रहणं।
तच्च ब्रह्मवरणोत्तरकालं वाग्निनिधानानंतरं वा पशौ कर्त्तव्यं। प्रणीताप्रणयनमप्यग्निनिधानानंतरं क
र्त्तव्यं। आज्यभागौ च वपायां कर्त्तव्यौ। भागावदानानि तु त्वोमं ब्रह्मपोइत्यादीन्यग्नीषोमीयमाग
नितत्र च शाखांतरे प्रतिषिद्धानि। अतो विकार पशुषु गच्छंति। एतदुक्तं तेषां विधानमग्नीषोमीये एतानि भवं
ति ह्येवमर्थं ततः पश्वंतरेष्वेतानि नियमेन भवंति। तत्रापि निरूढे येषां विकल्पं वक्ष्यति। स्वोमञ्जाहा ध्यू ध्री
परितनं चेच्छन्निति। अत एषां निरूढे निरूढविकारेषु च विकल्पः। पश्वंतरे नियमः। अग्नीषोमीये त्वेभा
व एवेति। पूर्णपात्रं च पशोर्भवति। ततश्च पशुपात्रासादनकाले आसादनप्रोक्षिणे तस्य भवतः। विष्णुक्रमा। अ

कृ

॥८॥ ॥देव०।६

थस्य पशो र्भवंति। विष्णुक्रमशब्देन दिविविष्णु रित्यत आस्य तूष्णीमाहवनीयोपस्थानांतं कर्माभिधीयते।
तत्कथं। सूत्रकार प्रस्थानात् यत एवमाहवनीयं वोपस्थाय व्रतादीनि वेदिति। अत एवं गम्यते। आहवनीयो
पस्थानांता विष्णुक्रमा इति। अतः अग्नीषोमीयो दक्षिणाग्निहोमांतः। इतरे पशवः समिष्टयजुरंताः। निरू
ढस्त्वाहवनीयोपस्थानांता इति। निरूढविकाराह विर्यज्ञपशावाप्याहवनीयोपस्थानांता इति। हविर्यज्ञवि
धो हवा अन्यः पशुबंधः सविधोन्यः स हैष हविर्यज्ञविधो यस्मिन्व्रतमुपनयति यस्मिन्पूर्णपात्रं निनयति
यस्मिन्विष्णुक्रमान्क्रमयत्यथ हैत्स सवविधो यस्मिन्नेतानि न क्रियंत इति श्रुतत्वात्॥ ॥तथा चापस्तंबः॥
इष्टिविधो वा अन्यः पशुबंधः सोमविधोन्यः स यत्रैतदपः प्रणयति पूर्णपात्रं निनयति विष्णुक्रमाक्रमतिस
इष्टिविधोन्यः सैविधवाजसनेयकमिति। सर्वविधेषु पशावेतेषां प्रतिषिद्धत्वात् पशुपुरोडाशे प्रणीतादीनि
भवंति। तत्राग्नीषोमीये पशुपुरोडाशे प्रणीताप्रणयनमाज्यभागौ चेत्येतावदेव। अन्येषां प्रतिषिद्धत्वात्॥
परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणानि हत्वोत्तरपरिग्रहादिकौ त्याज्यासादनांत॥
दार्शपौर्णमासिको न्यौषधविषयानुग्रहणादिपदार्थनिर्थलुप्तान्परित्यज्या संमार्गहोमपर्यंतो यैकर्तव्याः
पदार्थास्तानुपदिशति। तत्र प्रागहतं वेदेत्रे पूर्वं व्रतग्रहणं। ततः प्रणीताप्रणयनं। ततो मध्यमा

॥८॥ ॥प्रा्या।६

हवनीयवर्जं सर्वेषां परिस्तरणं। ततः शूर्पाद्यनर्थलुप्तवर्जं पात्रासादनं। अत्राह पस्तंबः। यथार्थं पात्राणि
प्रयुनक्ति स्फ्यमग्निहोत्रहवणीं च साहोमहवनीयं द्वितीयां जुहूं पृषदाज्यधानीं द्वितीयामुपभृतं द्वे
आज्यस्थाल्यौ हृदयशूलं मसिंकुंभी प्लक्षशाखावांशाखापवित्रं काष्मर्यमयो वपाश्रपण्यौ द्विशूलं
चौदुंबरं मैत्रावरुणदंडमास्यद ध्नं तुंबुकं ध्नवारशानैवेति। अत्र मानवे। अतोप्येतस्ये ध्माबर्हिः संनह्य
त्याश्व वालः प्रस्तरो विधृता च काष्मर्यमयाः परिधयो विंशति दार्विधी वेदिं करोति यथोत्तरं वारुण
प्रघासिकीं निःसारणं तां हत्वा वसति श्वोभूते पाणी प्रक्षाल्य विहारं परिस्तीर्य पाशुकानि पात्राणि प्रयु
नक्त्यभि प्रथमोत्पत्तिं त [illegible] शाकलं प्लक्षशाखा वपाश्रयण्योर न्यानेशूलं मैत्रावरुणदंडमादानश्रयणिं
स्वरुं स्वरुं [illegible] स्वधितिं वेति। काठके। आहरत्याज्यं पात्राण्यरणी प्रथमं परापतितस्व [illegible] धिमंथनो चशाल्वे
काष्मर्यमय्यौ वपाश्रपण्यौ रशने त्रिगुणा त्रिव्यामा द्विगुणां द्विव्यामां प्लक्षीं मध्यमदानीं स्वधितिं कुंभोद
उपं शूलं यूपं प्रक्षालित [illegible] स्नातं यत्र दमन्वंगं चेन चाथो विहारं परिस्तीर्य पात्राणि प्रयुनक्तीति। अत्र पूर्वा
णामपि पात्राणामासादनविहितमस्ति अत एवाम्नायूपादीनो मथासादनं प्रोक्षणं चैवं कर्तव्यं। शूर्पाग्नि
होत्रहवण्यादानालुप्ता न्मुक्ता आज्यनिर्वापो वेदकरणं कासं वपनादयः पदार्था अर्थलुप्ताः स्तानंतरा मु

॥१८॥
॥देवयाज्ञि॰॥
५८

के। आज्याधिश्रयणं चरुत्वारवननं चरुत्वोत्तरपरिग्रहादि आज्यादिसादनात्। आज्यासादनालंभात्प्रालं
भोदकालंभांतं कुर्यात्। उत्तरपरिग्रहादीन्यत्रोत्तरपरिग्रहस्यावृतास्वधितिजुहू वर्द्धं साहोमहवनीमुपभृतं
पदाज्यधानीमिति। तथा उपस्तृपदाज्यधानीसादयतीति च। अत्र विशेषमाह॥ ॥स एषदाज्यमाज्यग्र
हणं॥ ॥आज्यग्रहणमत्रस एषदाज्यं भवति। चतुर्गृहीते जुह्वां चोपभृति गृह्णाति पंचगृहीतं एषदाज्यं
ज्योतिरसीति श्रुतत्वात्। अत्र काठके विशेषः। दधि च निर्वपति यथाज्यं हे उपभृन्मंत्रे चतुर्गृहीतान्याज्यानि
दधि यस्यामुपभृति तेज इत्युपस्तीर्य ज्योतिरसीति दध्यासिच्योत्तमान्यामभिघार्य शेषघृतमासिंच्यतस्य
पश्चभिघारणं वनस्पतिं च यजतीति। अपरस्त्वेवापि। आज्यं निरूप्य दधि निर्वपत्यधिश्रयणवर्जं दधनि
क्रियते नेतस्य दध्नः संस्कारोच्यता इत्यपरं। आज्यग्रहणकाले चतुर्जुह्वां गृह्णाति चतुरुपभृति दधन्याज्य
मानीयमहीनां पयोसीति। एषदाज्यधान्यां पंचगृहीतं ज्योतिरसीति वेति। बर्हिषि प्लक्षशाखास्तृणाति बर्हि
र्हिषि स्तीर्णं बर्हिः प्लक्षशाखास्तृणाति बर्हिष्येव वेदिदक्षिणभागे। तासामुपरि हृदयादिनामवदानं
दनं करिष्यते यतः प्लक्षशाखा बर्हिर्भवंतिता अध्यवतीति श्रवणात्। ताश्च तूष्णीमेव स्तृणाति न मंत्रेण।
अपूर्वत्वात्॥ ॥देवस्य त्वेत्यग्निमादाय यूपावटं परिलिखतीदमहमित्याहवनीयस्य पुरस्तादंतर्वेद्यर्द्धं॥

॥१॥
॥गोप्य॥ ६
॥१॥

ख।

आज्यासादनानंतरं देवस्य त्वेत्यभ्रिमादायाहवनीयस्य पुरस्ताद्यूपावटं यूपनिखननार्थं श्वभ्रं गर्तं परिलिख
ति इदमहमिसनेनमंत्रेण। पुनरपि यूपावटस्य स्थानं विशेषयति। अंतर्वेदि वेदिमध्ये अर्द्धं बहिर्वेदि। आहवनी
यात्पूर्वस्यां दिशि तत्रावटं खनति यत्र खातः सन्नर्द्धमंतर्वेदि अर्द्धं बहिर्वेदि स्यात्। अभ्रिमादत्ते देवस्य त्वा स
वितुरिति अथावटं परिलिखतीदमहमिति च श्रुतत्वात्॥ उपरसंमितं खनति। उपरो यूपस्य मूलभागोऽतष्टो निख
ननार्हः पंचमो भागः। तेन संमितं तत्प्रमाणं निम्नं अवटं खनति। उपरेण संमायावटं खनतीति श्रुतत्वात्। छेदोग सू
त्रे। यूपावटे चेत्क श्विदुपघातः स्यात्पार्श्वतः खनेच्चतुरंगुलं खान्यथा पांशुभिः पर्युप्य सिक्त्वा यथा सारं खातेना
देशे सर्वत्रेति। प्राचः पांसून्‌ (स्तून्‌?) उद्वपति। प्राचः अवटात्प्राच्यां दिशि पांसून्‌ खननेन वोत्खातं धूलिराशिमुद्वप
ति। अवटाद्बहिर्निष्काशयति। अथ खनति प्राचं मुत्करमुत्किरतीति श्रुतत्वात्॥ ॥तदग्रेण यूपं प्रांचं निदधाति।
तस्यावटस्याग्रेण पुरस्तात् प्रांचं प्रागग्रं यूपं निदधाति। तदग्रेण प्रांचं यूपं निदधातीति श्रुतत्वात्। तमवटमग्रेणाव
टस्य पुरस्ता दितिहरिस्वामी॥ ॥कुशमुष्टिमुपरि तस्मिन्। तस्मिन्यूपे कुशमुष्टिमुपरि निदधाति। एतावन्मात्रा
णि बर्हिषां त्युपरिष्टाद्ध निदधातीति श्रुतत्वात्। प्रथमशकलं च। चकारात्तस्मिन्नेव यूपे प्रथमशकलं निदधाति॥
यूपे छिद्यमाने यत्प्रथमायच्छिन्नं शकलं तत्प्रथमशकलं। तदेवोपरिष्टाद्यूपशकलमधि निदधातीति श्रुतत्वात्।

॥१०

॥१०॥ ॥देवया॰६

अग्रमुत्तरेण चषालं। अग्रमुत्तरेण यूपाग्रस्योत्तरतः समीप एव चषालं निदधाति।

।पुरस्तात्प्रत्यञ्चमग्निरस्वालमुपदधातीति श्रुतत्वात्॥ ॥यवोसी

त्यस्युयवानोप्य प्रोक्षत्यग्रमध्यमूलानि दिवेत्वेति प्रतिमंत्रं॥ यवोसीत्यनेन मंत्रेणाप्सु कृत्वापात्रस्थेषु तेकिं च सु

यवानोप्य यवानूक्षित्वा दिवेत्वेति प्रतिमंत्रं॥ क्रमेण यूपस्याग्रं यूपस्य मध्यं यूपस्य मूलं प्रोक्षति तानि र्यवमती

भिरद्भिरग्रादिषु त्रिषु प्रदेशेषु यूपं प्रोक्षतीत्यर्थः। अथ एव मत्यः प्रोक्षिण्यो भवंति सोसावेव बंधुः स यवानं

वपति यवोसीति। अथ प्रोक्षतीति प्रकृत्य स प्रोक्षति दिवे त्वेत्यादि श्रुतत्वात्॥ ॥प्रोक्षामीति सर्वत्र साकांक्षत्वा

त्। प्रोक्षामीति क्रियापदं सर्वत्र दिवे त्वेत्यादि त्रिष्वपि मंत्रेषु प्रयोज्यं। कुतः। साकांक्षत्वात्। साकांक्षा ह्येते दि

वेत्यादयः क्रियापदाभावात्। तस्मान्निराकांक्षीकरणाय प्रोक्षामीति पदं सर्वेषु प्रयोज्यं॥ ॥अवटे शेषमासिं

चति शुंधंतामिति। प्रोक्षणीशेषमवटे गर्ते आसिंचति शुंधंतामिति मंत्रेण। शुंधंतां पित्र्य इत्युक्तत्वादस्य मंत्रस्य

पितृत्वादुदकालंभो भवति। अथ याः प्रोक्षण्यः परिशिष्यंते ता अवटे वनस्पतिः शुंधंतां लोकाइति श्रवणात्। यू ॥प्राश्य॰६

पैकदासिन्यां प्रत्यवटशेषासेकः। तमेवैतन्मेध्यं करोतीति वाक्यशेषे अवटसंस्कारत्वावगमात्। अपरे त्वेव ॥१७॥

माहुः। प्रोक्षणीनां प्राप्तत्वात्तासां शेषप्रतिपत्तिरेवानत्ववटसंस्कारः। तमेवैतन्मेध्यं करोतीत्येतत्त्वर्थवाद

९२

मात्रं॥ ॥बर्हींषि प्राञ्च्युदं चि वा प्रास्यति पितृषदनमसीति। पितृषदनमसीति मंत्रेण तस्मिन्नवटे प्राञ्चि प्रागग्रा

णि उदंचि उदगग्राणि बर्हींषि असंस्कृतानेव कुशान्प्रास्यति प्रक्षिपति यएषकुशमुष्टिर्यूपस्योपरि निहितस्ता

यं विनियोगः। अस्यापि मंत्रस्य पितृत्वादुदकालंभः। अथ बर्हींषि प्राचीनाग्राणि चोदीचीनाग्राणि वाव ॥चे॰ व

स्तृणाति पितृषदनमसीति श्रुतत्वात्॥ ॥प्रथमशकलं वाग्रेणीरसीति। प्रथमशकलं यूपस्यावटे प्रक्षिपति अ

ग्रेणीरसीत्यनेन मंत्रेण। अथ यूपशकलं प्रास्यतीति श्रुतत्वात्। स प्रास्यत्यग्रेणीरसीति च॥ ॥स्रुवेणावटे जुहो

ति तूष्णीं। ततः आज्यस्थाल्या आज्येनैव स्रुवेण तूष्णीमवटे जुहोति। अथ स्रुवेणोपहत्याज्यमवटमभिजुहोतीति

श्रवणात्। मंत्रांतराभावात्तूष्णीमित्यनेन स्वाहाकारो निवार्यते। इदं प्रजापतये इति त्यागः। अवटे तु परिस्तरणं भवति॥ ॥

पुरस्तात्परिक्रम्याध्वर्युर्यजमानो वा यूपमनक्त्युदङ्मुखः उपविश्य। यूपं पुरस्तात्परिक्रम्याध्वर्युर्यजमानो वा उदङ्मु

खउपविश्य अर्थाद्यूपस्य दक्षिणतः। ततो यूपं लौकिकेनाज्येनानक्ति म्रक्षति। अत्राह पस्तंबः। अथैनमसंस्कृतेना

ज्येन यजमानोग्रतः शकलेनानक्तीति। अत्र परिक्रमणविधानादन्यादानाच्च वटहोमांतमुत्तरत उपविश्येनकृ ॥न२

त्य उदङासीन इत्यनेन सामर्थ्याद्वाध्वर्योः परिक्रमणं प्राप्नोत्येव यजमानस्यैतत्प्राप्नोतीति तदर्थमुच्यते पुरस्तात्परि

क्रम्येति। माभूत्संनिधानादपरिक्रमणमिति। अथ पुरस्तात्परीत्योदङ्मुखासीनो यूपमनक्तीति श्रवणात्॥२॥ ॥

यूपायाज्यमानायानुवाचयेति। अध्वर्युर्यजमानो वा यो यूपमनक्ति स एव यूपायाज्यमानायानुब्रूहीत्येवं होतारमु

॥११॥
॥देवया०६

वाचनं कारयति। स आह यूपायाज्यमानायानुब्रूहीति श्रुतत्वात्॥ ॥देवस्त्वेत्यनक्ति। देवस्त्वा सवितेत्यनेन मंत्रेणानक्ति आज्येन मृक्षयतीत्यर्थः। सोमनक्ति देवस्त्वेति श्रुतत्वात्। एतच्चांजनमुपदेशं वर्जयित्वावशिष्टस्य सर्वस्य यूपस्य सर्वाश्रिषु कार्यं॥ ॥चषालमुभयतः। चषालमुभयत इत्यंतर्बहिश्चानेनैव मंत्रेणानक्ति। अथ चषालमुभयतः प्रत्यज्य प्रतिमुंचति सुपिप्पलाभ्य स्त्वोषधीभ्य इति श्रवणात्। देशाभेदानमत्रावृत्तिर्भवतीति प्रतिपादितमग्निसंमार्गवत्पूर्वमध्येनक्ति ततो बहिः॥ ॥अक्तं प्रतिमुंचति सुपिप्पलाभ्य इति। सुपिप्पलाभ्य इति मंत्रेण तमेवाक्तं चषालं यूपाग्रे प्रतिमुंचति पूर्वोक्तस्थाने। ऊर्द्ध्वमग्रे प्रतिमुंचति द्व्यंगुलं त्र्यंगुलं वातक्षतिर्का तं यूपस्येति। अथ षड्विंश ब्राह्मणे पठ्यते। आकृ वयं त्यकुर्वत्यह तेन वा स समाच्छादयतीति। अविरुद्धत्वात्तदपि कर्त्तव्यं॥ ॥सोपरमग्निष्ठादेशमक्त्वा परिव्ययणादेशं समंतं परिमृश्याध्वर्युर्नविसृजेदापरिव्ययणात्। सोपरं सहोपरेण वर्त्तत इति सोपरं यूपस्याग्निष्ठादेशं अग्निसंमुखाश्रिदेशं पुनस्तेनैव मंत्रेणाक्त्वा ततोध्वर्युः परिव्ययणदेशं यूपस्य रशनाबंधनस्थानं समंतं परिमृश्य सर्वतो हस्तेन गृहीत्वा आपरिव्ययणादध्वर्युर्नावसृजेत्। अग्निष्ठादेशस्य सोपरस्यांजनविधानात् पूर्वं यूपांजनं उपरदेशवर्जितं कार्यमिति गम्यते। अंतमग्निष्ठामनक्तीति। अ। अंतमग्निष्ठामिति च्छेदः। आग्नेः अग्निसमीपे तिष्ठतीत्यग्निष्ठा। यूपस्याग्नेः प्रत्यासन्नाश्रिः। तां अ

॥११॥
॥भाष्या६

अंतात् अंतमुपरेप्यनक्तीत्यर्थः। ननु चोपरि शास्याप्यग्निष्ठास्ति। सत्या उपर्यधः। स्थितया स्वदेशो यस्तया लक्ष्यते तदर्थं वचनं। अन्यथा तु सर्व एवाश्रयो यूपेज्यमानेज्यंतेग्निष्ठा विशेषः। यजमानकर्त्तृकांजनपक्षे सोपरमग्निष्ठांजनं तं यजमान एव करोति। ननु सूत्रे त्वपवादेशादर्शनादध्वर्युः। स तु तत्र पूर्वकाललग्नामात्रे। अंजनं स्ववाचनिकर्तृत्वात्। तथा अथ परिव्ययणं प्रतिसमंतं परिसमृशतीति च श्रूयते। परिव्ययणं स्थानं यामवरणं। तं प्रतितेन लक्षिते यूपदेशे नाभिमात्रे तत्र समंतं सर्वतः परिमंडलेन परिमृशति न च तं देशं विसृजत्यापरिव्ययणात्। इयं वै यूपमुच्छ्रित्याध्वर्युरापरिव्ययणान्नाव्रजतीति श्रुतेः। तथा चापस्तंबः। ॥देवस्त्वा सविता मध्वानक्त्विति स्रुवेण संततमनवच्छिन्दन्नग्निष्ठामश्रिमानक्त्यापरादिति। अधुना अग्निसमीपे वस्थानाभावात् सूत्रे ग्निष्ठादेशमित्युक्तं। तथा चाखालदेशादंतः पात्यदेशो इत्यादि। इहैव यथा परिव्ययणदेशमिति॥ ॥उच्छ्रीयमाणायानुवाचयति। ततोध्वर्युरुच्छ्रीयमाणायाब्रूहीति होत्रा अनुवाचनं कारयति। अथाहोच्छ्रीयमाणायेति श्रुतत्वात्। आपस्तंबः। यूपायोच्छ्रीयमाणायेति संप्रेष्यत्युच्छ्रीयमाणायेति चेति॥ ॥द्यामग्रेणेत्युच्छ्रयति। तनाभिमात्रे सर्वतो गृहीतं यूपं द्यामग्रेणेति मंत्रेणोच्छ्रयति प्राचं नमो निहितं संततमधुनोर्द्ध्वं करोतीत्यर्थः। स उच्छ्रयति द्यामग्रेणेति श्रुतत्वात्॥ ॥या त इति मिनोति। या ते धामानीति मंत्रेण यूपमवटे मिनोति अवटमध्ये यूपस्य मूलं प्रक्षिपति

द्यामग्रेणेत्युच्छ्रयण पाठ॥१२

दिव २

सं

॥१२॥ ॥देवया०६

वेशयतीत्यर्थः। अथमिनोति। याते धामानीति श्रुतत्वात्। डुमिञ् प्रक्षेपणाइत्यस्य मिनोतीति रूपं। अग्निष्ठो
प्रत्याहवनीयं॥ ॥तथा यूपमवटे मिनोति यथा अग्निष्ठाग्निः आहवनीयं संप्रति आहवनीयसंमुखी भवति॥
या अग्निः पूर्वं सोपरा अक्ता। तां चिह्निता तां त्वाधुना तामाहवनीयसमीपे कुर्यादित्यर्थः। संप्रत्यग्निमग्निष्ठां मि
नोतीति श्रवणात्॥ संप्रति अंसात्तं नां अग्निमाहवनीयं अग्निष्ठामश्रि मिनोतितथा च यूपमवटे प्रक्षिपति
यथाग्निष्ठाग्नेरऋजुर्भवति इति स्वामिनः। यूपैकादशिन्यां स हरि
र्वयूपानामग्निष्ठा आहवनीयं संप्रति हर्त्तव्याः॥ ब्रह्मवनिं त्वेति पांसुभिः पर्यूहति ब्रह्मवनिं त्वेति मंत्रेण य
पावटं पांसुभिः पर्यूहति पूरयतीत्यर्थः। अथ पर्यूहतीति श्रुतत्वात्॥ ॥ब्रह्म दृंह इति मैत्रावरुणदंडेन समंत
त्रिः पर्यूषति॥ ब्रह्म दृंहेति मंत्रेणाध्वर्युर्मैत्रावरुणदंडेन तं पांसुभिः पूरितं गर्त्तं समंतं सर्वतः त्रिः पर्यूषति
परितः कुद्दनेन पांसून् वृंदे धःपवेशयति पिंडयतीत्यर्थः। अथ पर्यूषतीति श्रवणात्॥ समं भूमिं कृत्वो द्धि
रूपासिच्य विष्णोः कर्माणीति वाचयति यूपमन्वारब्धां तमवटं परि सिद्धेनेन समं भूमिं कृत्वा परितो वर्त्तमानया
समं कृत्वा द्धि लौकिकैर्यूपं सिच्य यूपमन्वारब्धं कृतान्वारंभं यजमानं विष्णोः कर्माणीत्यमुं मंत्रं वाचयति
अथापउपनिनयति अथैवमभिपद्य वाचयति विष्णोः कर्माणीति श्रुतत्वात्। अत्र यूपमन्वारंभस्त्वेत्यध्येष

॥१२॥ ॥भाष्या०६

णा कार्या। कुतः। अथैवमभिपद्य वाचयतीति समानायामेव श्रुतो सोमालंभे औदुंबर्यालंभे च तथा सूत्रणा
दाचाराच्च। अनेकयजमानके सर्वेषां वाचनं। यूपान्वारंभो गृहपतेरेव। परार्थत्वात्। तद्विष्णोरिति चषालमी
क्षणं। चषालमीक्षमाणं यजमानं तद्विष्णोरित्यमुं मंत्रं वाचयति। अथ चषालमुदीक्षते तद्विष्णोरिति श्रुतत्वात्। ई
क्षमाणं वाचयतीति शाखांतरात्। केचिदत्र चषालमीक्षस्वेति अध्येषणं कुर्वंति तदयुक्तं श्रुतौ सूत्रे चादर्श
नादिति। तथा चापस्तंबः। तद्विष्णोरित्यग्रं प्रेक्षत इति। अनेकयजमानके सर्वेषां वाचनं। चषालेक्षणं तु परार्थत्वाद्गृ
हपतेरिव॥ ॥परिवीयमाणायानुवाचयति। ततोध्वर्युः परिवीयमाणायानुब्रूहीति होतारं संबोधयति। आपस्तं
बः यूपायपरिवीयमाणायानुब्रूहीति संप्रेष्यति परिवीयमाणायानुब्रूहीति वेति। यूपायेत्यन्येष्वपि सूत्रेषु॥ त्रिगु

रशना

णा त्रिव्यामा कौशी तया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति। त्रिगुणा त्रिव्यामा कौशी रशना तारज्जुर्भव
ति तया रशनामध्यभागेन नाभिमात्रे प्रमाणात्वाद्यजमानेनाभिसंमिते यूपस्य देशे यूपस्य नाभिमात्रे मध्य
देशे वा त्रिवृतं त्रिगुणं प्रदक्षिणं परिव्ययति। व्येञ् संवरणे। संवृणोति परिवेष्टयतीत्यर्थः। अथ परिव्ययत्य
नेनता येन्येव परिव्यतितस्मादत्रेव परिव्ययत्यत्रेव हीदं वासो भवतीति श्रुतत्वात् द्वासः परिधानस्थाने
नाभिमात्रे परिव्ययतीत्युक्तं। तथा चापस्तंबः। नाभिदघ्ने रशनया त्रिः प्रदक्षिणं यूपं परिव्ययति मध्ये देशे वेति॥

॥१३॥
॥देवया०६

मानवे च। परिवीरसीति ना भिदध्वे त्रिवृता त्रिः परिव्ययत्युत्तरं प्रदक्षिणमिति। अनेकयजमानके स्य मंत्रस्योहः
परीमौ यजमानो परा मान्यजमानानि ति॥ ॥संपृसृज्यान्यतरस्यामंतं प्रवेशयति। परिव्ययणानंतरं तां रं
ज्वां नां संसृज्यतस्या रशनाया मध्ये विशिष्टाया अवशिष्टा उभौ प्रांतौ परस्परं संसृज्य मिश्रीकृत्यान्यतरस्यां
सिवि प्रांते अंतं प्रवेशयति। अत्राह मनुः। प्रादेशमात्रे समस्याणीयां संस्छवीयसीति। कटस्त्रे प्रादेशमात्रं
संप्रवेश्याणीयस्यां स्छवीयसीमति ष ज्येति। आपस्तंबः। अधाद्रूरं परिव्ययवृष्टिकामस्योपरि दूरमवृष्टिका
मस्यैके। यं कामयेत स्त्र्यस्य जायतेति उपांते तस्य व्यति षज्येन वे इयेद्यं कामयते पुमानस्य जायेतेत्यां तं वे
ष्ट्याणिमति स्छवि मत्स्त्रवीयति अत उभयथा शाखांतरे दर्शनात् सूत्रकृता अन्यतरस्यामिति सूत्रितं यूपस्य त्रै
मध्यदेशोपरि व्ययणपक्षे वाजपेययूपैकादशिन्यादौ निश्रेणीमारुह्य यूपस्यमध्ये परिव्ययणं कर्तव्यं॥ ॥
म यूपशकलमस्यामवगूहत्युत्तरेणाग्निं प्रांतराले प्रवेशयतीत्यर्थः। दिवः सूत्रसीति मंत्रेण। यूपशकलमवगू नु
हति दिवः सूनुरसीति श्रुतत्वात्। उत्तरेणाग्निष्ठामध्यमेरशनागुणेवगूहत्युत्तमेव ससर्वेषु वोद्व्योरधरयो
रिति वाजसनेयमिति। आपस्तंबः। बहुषु यथास्वं। एकादशीन्यश्वमेधादौ बहुषु यूपेषु सत्सु यथा स्वस्वरुं
वगूहतीयोस्य यूपस्य स्वरुस्तत्तस्मिन्नवगूहेत्। तस्माद्यदि यूपैकादशिनी स्यात्स्वरुं समेवावगूहेदपि वि
ह

॥१३॥
पशाध्य॥६

पर्यासमिति श्रवणात्। एकादशानां एकादशिनी। यूपानामेकादशिनी। यूपैकादशिनी। सा च यत्र पश्वेकादशिनी
भवति तत्र विकल्पते। अतस्तां कदाचित् भावी निमित्तीकृत्य यदि यूपैकादशिनी यूपानामेकादशकः स्यात् ततः
स्वस्वमेव यस्मिन्यूपे निष्पद्यमाने यः शकलो गृहीतः स एव तस्मिन्न षचगूहनीयः अविपर्यासं। न विपर्या
सः अविपर्यासस्तमविपर्यासं। अन्यदीयस्यान्यत्र यातिनयनं विपर्यासः तमकुर्वन्। उपावीरसीति तृणमा
दायते न पशुमुपस्पृशत्युपदेवानिति। उपाविरसीत्यनेन मंत्रेण स्तृतबर्हिषस्तृणादन्यद्दर्भतृणमादायतेनतृणे
न पुरस्तात् प्रत्यंचमवस्थितं पशुमुपसृजति। पशुमालभेत। उपदेवानित्यनेन मंत्रेण। अथ तृणमादायोपाक
रोतीति प्रकृत्य स तृणमादत्त उपावीरसीति श्रुतत्वात्। काठके। उपदेवानिति पशुमुपाकरोति प्रसज्जुरवमिति।
आपस्तंबोपि पशून्कल्पयंति। कूट वर्णकाणखंड बंड शोणसमत्राफ च र्जयद्यंगहीनः स्यादंगतो वापिरूज्ये पो
केषां वै स्थवी सारस्वती बार्हस्पत्यानीति बहुत्वात्र योजयेजयेदिति प्रकृत्य पुरस्तात्प्रत्यंचं पशुमुपाकरोतीति
किंजातीयं पशुमित्याकांक्षायामाह॥ ॥छागं मंत्राम्नाना तू। छागमजं पशुमुपाकरोति। कुतए तत्। मंत्राम्ना
नात्। होता यक्षद्दश्विनौ छागस्येत्यादिषु मंत्रेषु छागस्याम्नानात्। तथाग्नीषोमाभ्यां छागस्य वपाये मेदसोनु
ब्रूहीति। यदि च छागो यागसाधनं भवति। तदा अयं मंत्रः संगतार्थो भवति। नान्यथा॥ तस्माच्छागमेवोपाकुर्यात्। गं

॥१७४॥
॥देवया॰६

पुनः कीदृशं पन्नदं। पन्नदो जातदंत इति निगमे प्रोक्तः। पन्नदं जातदंतं पशुमुपाकुर्यात्॥ ॥अव्यंगं॥ विगतमंगं
चक्षुःकर्णादिकं यस्यासौ व्यंगः न व्यंगः अव्यंगस्तं अव्यंगं अन्यूनांगतां गपशुमुपाकरोति। शाखांतरात्।
अतएवापस्तंबः कूटकाणखंडबडश्लोण सप्तशफवर्जमिति॥ यथामंत्रवर्णं प्रोक्षणे। प्रोक्षणमंत्रवर्णे अ
नु त्वा माता मन्यतामित्यस्मिन् यादृशः पशुरभिहितः तादृशं पशुमुपाकुर्यात्। मातृमंतं पितृमंतं भ्रातृमंतं
चेत्यर्थः। तादृशस्य मंत्रे प्रतीयमानत्वात्॥ नाचोदितत्वात्। नैतदेवं यदुक्तं प्रोक्षणमंत्रे यादृशः प्रतीयते ता
दृशं पशुमुपाकरोतीति। कुतः। अचोदितत्वात्। न ह्येवं विधौ चोदनास्ति मातृमंतं पितृमंतं भ्रातृमंतं चोपा
कुर्यादिति॥ तस्मान्नायं नियमः॥ ॥अग्निमंथ्याहोमात्करोति। उपाकरणानंतरमग्निं मंथयति तत्र च शाक
लाधानादि आहोमात्करोति अग्नावग्निरित्याहुति होमांतं करोतीत्यर्थः। वैश्वदेवपर्वोक्तं मंथनधर्म आपणार्थ
मा होमात्करोतीत्युक्तं। अन्यथा अनामधेयत्वान्मंथनमात्रं स्यात्। अथोपाकृत्य पशुमग्निं मथित्वा पुनः की
र्तितः॥ उपाकरणमंथने वा। उपाकरणमंथने वा भवतः। विकल्पेन भवत इत्यर्थः। तृणेन पशोरूपस्पर्शनं यत्प्र
युक्तं तदुपाकरणं तस्य पुनर्वचनं मंथनेन सह सनियोगार्थं। तेन संयुक्तयोरेवानयोर्विकल्पः। यदि भवतस्त
दा उभे भवतः। न त्वयोरेके भवतीति। दीक्षुने पाकुर्यान्नाग्निं मंथेद् ग्राममनामेवादायाजसोपपरेत्यामिध्याय

त २

२१॥ग॰६
॥१७४॥

नियुंज्यादिति तद्युथा न कुर्याद्यथाध्वर्मं तिरस्यथाचिकीर्षेदेवं तत्तस्मादेतदेवानुपरियादिति श्रुतेः। नोपाकुर्या
दिति पक्षांतरा रशनां पशुनियोजनीमादायगृहीत्वा अंजसा ऋजुनैव मार्गेण पशुमुपगम्य। न मंथनार्थं हो
मार्थं वान्यत्र गच्छेदित्यभिप्रायः अभिधाय अभिपूर्वो दधातिर्बंधने वर्त्तते। रशनया बध्वा पशुं यूपे नियुंज्या
दिति। यथा कश्चिद्धर्मं तिरश्चयाति रोगमयितुं हिंसां चिकीर्षेदेवं स्यात्। तिरस्कृतिर्हिंसायां च तत्पर्यंतस्यथा
श्रत्ययस्तु मध्योव्यंयं। अवेस्वदिपने लोपो। तस्मादेतदेव यथोक्तमुपाकरणं मंथनं हवनं चानुपूर्वेण परिसव
तो यथादेशमिग्रात्। गच्छेत्कुर्यादित्यर्थः। इति हरिस्वामी॥ द्विगुणरशनया दिव्यामयाकौशयापाशं कृत्वांतरा
शृंगमभिदक्षिणं बध्नात्य तस्य त्वेति। ऋतस्य त्वेति मंत्रेण द्विगुणरशनया द्विगुणा चासौ रशना च द्विगुणर
शना च द्विगुणरशना पशुबंधनार्थरज्जुः। तया कौशया दर्भमिश्रया पाशं नागपाशं कृत्वा अंतरा शृंगं शृंगयो
रंतराले पशुं बध्नाति कथं अभिदक्षिणं। दक्षिणशृंगसंमुखपाशं प्रतिमुंचेदित्यर्थः। पाशं कृत्वा प्रतिमुंचेदिति चापस्तंब
तिश्रुतत्वात्। पाशं नागपाशमिति हरिस्वामिनः॥ ॥देवस्य त्वेति यूपे। देवस्य त्वेति यूपे पशुं नियुनक्ति बध्ना
तीत्यर्थः॥ दक्षिणे द्वित्रिरसि पाशेनाक्ष्णया प्रतिमुच्य धर्षमानुष इत्येतेनरत्नो यूपस्य नियुनक्तीत्यापस्तंबः॥
ऐंद्राग्नः सौर्यः प्राजापत्यो वा॥ अयं निरूढपशुरैंद्राग्न इंद्राग्नी देवते भवेत्। अथवा सौर्यः सूर्यदेवतो भवेत्।

ये

॥१५॥
॥देवया०८

अथवा प्राजापत्यः प्रजापतिदेवतो भवेदिति त्रयो विकल्पाः। तदाऽऽहः किं देवत्य एषः पशुः स्यादिति श्रुतत्वात्॥ ॥
यमिच्छेत्। एतेषां त्रयाणां ऐंद्राग्नादीनां मध्ये यमिच्छन्तं यद्देवतं पशुं कर्तुमिच्छेद्दैद्राग्नं वा सौर्यं वा प्राजापत्यं वा
तं यावज्जीवं कुर्यादित्यादि विकल्पोयं। प्रथमप्रयोगे यत्रारब्धः स यावज्जीवं कर्त्तव्य इत्यर्थः। न प्रतिप्रयोगमिच्छया।
श्रुतिक्रमादुत्क्रमे च सूत्रेण प्रथमप्रयोगे इच्छाविकल्पार्थे। अतः प्रथमप्रयोगे इच्छाविकल्पः। द्वितीयादिप्रयोगेषा
दिविकल्पोय आरब्धस्तमेव यावज्जीवं कुर्यादिति॥ ॥पितृभूत्याचार्यास्तु प्रयोगमिच्छाविकल्पार्थमेवेदं सूत्रं
व्याख्यातवंतः। व्याख्यातं तरं वक्षतवंतः। तथा हि। सवनीयानुबंधयोर्निरूढस्य चाग्नीषोमीयप्रकृतित्वं वक्ष्य
तीत्यग्नीषोमीयात्पशुष्वित्यत्रापि चैन्द्रे॥ पशावस्तेषां निरूढप्रकृतित्वमुच्यते। यमिच्छेत्। ये मिच्छेत्पशुं कर्तुं निरू
ढधर्मापिं कुर्यात्। चोदनासामान्यात्। लिंगं च सौत्रामण्यां स्विष्टकृत्प्रैषे आज्यभागयोरुपलक्षणं॥ अद्भ्यस्त्वेति
पशुं प्रोक्षणीभिः प्रोक्षति। अद्भ्यस्त्वेत्यनेन मंत्रेण प्रोक्षणीभिः संस्कृताभिः पशुं प्रोक्षति। अत्र च पूर्वं ब्रह्मन्नहविः
प्रोक्षिष्यामीति ब्रह्माणमामंत्रयेत्। ततस्तेन प्रोक्षयेत्यनुज्ञात इत्यनेनानुज्ञातः पशुं प्रोक्षेदिति। स प्रोक्ष्य अद्भ्यस्त्वौषधि
भ्य इति श्रुतत्वात्॥ ॥अपां पेरुरित्यास्य उपगृह्णाति। अपां पेरुरिति मंत्रेण प्रोक्षणीः पशोरास्ये मुखे उपगृह्णा
ति मुखस्याधस्तात्संलग्नाः एव प्रोक्षणीर्धारयतीत्यर्थः॥ अथोपगृह्णात्यपां पेरुरसीति श्रुतत्वात्। उपगृह्णात्या ॥ब्राह्म०६
स्ये पानार्थं। कुत एतत्तदेनमंतरतो मेध्यं करोतीति हरिस्वामिनः। ततश्चोपग्रहणं पायनार्थं तथा चाश्वमेधे श्रूयते। ॥१५॥

अथोपगृह्णात्यग्निः पुरो सीदिति प्रकृत्य तत्पाययित्वाश्वं पुनः संस्कृत्य प्रोक्षणीरितरा न्यश्रून्प्रोक्षणीतीति। ततश्च
रउभावेपि पायनीयः॥ ॥आपो देवीरित्यधस्ताद्रुपोक्षति। आपो देवीरित्यनेन मंत्रेणाधस्तात्पशोरुदरक्रोद
यप्रदेशे उपोक्षति प्रोक्षति। अथाधस्तादुपोक्षत्यापो देवीरिति श्रुतेः॥३॥ ॥इध्मप्रैषादि कर्तोत्यापप्रयाजेभ्यः।
होतारमामंत्र्य होतृषदनं सादयित्वाग्नये समिध्यमानायेतीध्मप्रैषादि इध्मप्रैषादारभ्याप्रयाजेभ्यः प्रयाज
होमपर्यंतं प्राकृतं कर्म करोतीति वैकृतावसरप्राकृतकर्मप्रवृत्त्यर्थमिदमुक्तं। अथाधस्तादुपोक्षतीत्यस्यानंतर
मथाहाग्नये समिध्यमानायानुब्रूहीति स उत्तरमाघारमाघार्येत्यादि॥ तच्चात्रैतत्प्रवृत्तो होता होतृषदनउप
विशति अथाग्नीश्वरन्तीत्या एतत्प्रकादशप्रयाजा भवंतीत्येवमंतस्य श्रवणात्। तत्र विशेषमाह॥ उत्तराघार
८। माघार्य पशुं पूर्वं पूर्वं समनक्ति ललाटं स श्रोणि घृतं संत इति प्रतिमंत्रं। उत्तराघारहोमानंतरं पूर्वं ध्रुवासमंज
नाद् वर्गेव प्रथमं पशुं ललाटं स श्रोणि घृतं ललाटं भाले अंसयोर्दक्षिणोत्तरस्कंधयोः श्रोण्योर्दक्षिणोत्तरं जु
ह्वा स्थेनाज्येन जुह्वैव समनक्ति एतेषु स्थानेषु पशुं म्रक्षयति। संते प्राण इति त्रिभिः प्रतिमंत्रं। स उत्तरमाघार
माघार्यासि पूं स्पर्शयित्वा चोपयेत्य जुह्वा पशुं पूं समनक्तीति प्रकृत्य स ललाटे समनक्ति संते प्राणो वातेन
गच्छतामिति समंगानि यजत्रैरित्यं पूं सयोः संयज्ञपतिराशिषेति श्रोण्योरिति श्रुतत्वात्। तत्रांसयोः श्रोण्योः

उत्तराघारमाघार्य ५

॥१६॥
॥देवया० ६

श्वमंत्रावृत्तिः। ततो धृत्वा समंजनं स्रुक्प्रसादनं च। अनेकपाशुके प्रतिपशु ललाटांसश्रोणिसमंजनं प्राकृतं च विकृता विधियनेन न्यायेन प्राकृतं धृत्वा समंजनं वैकृतात्पशुसमंजनात् पूर्वं माभूदिति न्यत्ययः कृतः सूत्रकृता पशुपूर्वं पूंसमनक्तीति। अत एव यत्र वचनाभावः तत्र प्राकृत वैकृतकर्मसंनिपाते प्राकृतं पूर्वं भवतीति। तद्यथा। पित्र्यायामिडानंतरं पिंडदानात् आज्यार्जनं दक्षिणादानादि यथा च वैश्वदेवादौ पर्वणि हविरासादनं प्राग् अग्निमंथनाद्वा विशालंभनोदकस्पर्शनानि यथा चरणानुप्रहरणानंतरं प्राग्वाजिनयागात् दात्मालंभो यथा सनीयेषु निर्वापानंतरमेव हविषां प्रोक्षणाभिवासनानंतं प्राक् सं चरणीहोमादिति। अनेकयजमानके पशुश्रोण्योः समंजनमंत्रे ऊहः॥ सं यज्ञपतीआसीषेति द्वियजमानके। सं यज्ञपतय आशीषा संगच्छंतामिति बहुषु॥ ॥प्रवृत्य होतारमाश्राव्याहाग्निर्हदैवानां विशां पुरएतायं यजमानो मनुष्याणां सुन्वेति सुत्ये तयोरस्कृरिगार्हपत्यं दीदयच्छतं हिमा द्वाप्यूराधांसीत्सं पृंचानावसंपृंचानौ तन्व इति॥ ॥होतारं प्रवृत्य प्रकृतिवदाश्रावणपूर्वकमग्निर्देवो दैव्यो होतेति मंत्रेण होतृवरणं कृत्वा पुनराश्राव्याग्निर्हदैवीनामित्यमुं मंत्रं संपृंचानौ तन्व इत्येवमंतमध्वर्युराह ब्रवीति। अत्र मंत्रे यजमानो मनुष्याणामित्यत्रैत्यिह निरुद्य ज्यार्थे वरणे सुन्वन् यजमानो मनुष्याणामिति प्रयोगः। सुन्वन्मनुष्याणामित्येतावदेवेति केचित्

॥१६॥
॥भा० दे० ६
त्रि
सोर
॥१॥

ते नोपपन्नं। सर्वेषु शाखांतरसूत्रेषु सुन्वन्यजमानप्रयोगस्य दर्शनात्। अथ प्रवरायाश्रावयति सो सावेव बंधुरथ द्वितीयमाश्रावयति। द्वौ ह्यत्र होतारौ भवतः स मैत्रावरुणायादेवाश्रावयति यजमानं त्वेव प्रवृणीतेग्निर्हदैवीनामिति श्रुतत्वात्। तथा चापस्तंबः दैवं च मानुषं च होतारौ वृत्वा पुनराश्राव्य मैत्रावरुणं प्रवृणीत इति। अनेकयजमानके चास्य मंत्रस्य विपरिणामः। अग्निर्हवै देवानां विशां पुरएतेमौ यजमानौ मनुष्याणां तेषामस्कृरी गार्हपत्यं दीदयच्छतं हिमास्त्रयों यवो राधांसीत्सं पृंचानाअसंपृंचानाअसंपृंचास्तन्व इति द्वियजमानके अग्नीर्हवै देवानां विशां पुरएते मे यजमाना मनुष्याणां तेषामस्कृरिगार्हपत्यं दीदयच्छतं हिमाश्चत्वारोयवः षड्यव इत्यादि यजमानसंख्यातएकाविध मुक्तौ राधांसीत्सं पृंचानास्तन्व इति बहुयजमानके॥ ॥मैत्रावरुणायदंडं प्रयच्छेति मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा प्रयच्छामीति॥ वरुणानंतरमध्वर्यु मैत्रावरुणायदंडं समर्पयति मित्रावरुणयोस्त्विति त्वत्र पठितेन मंत्रेण उपविश्य प्रयच्छति। शाखांतरे यजमानः प्रयच्छतीत्युक्तं। कीदृशं दंडमित्यपेक्षायामाह॥ ॥औदुंबरं यजमानमुखमात्रं। औदुंबरमुदुंबरवृक्षावयवं यथा यजमानमुखमात्रं। यजमानस्य मुखप्रमाणमस्यासौ यजमानमुखमात्रस्तं यजमानमुखमात्रं॥ ॥दीक्षितदंडं सोमे। सोमे सोमयागे दीक्षितदंडमध्वर्युर्मैत्रावरुणाय प्रयच्छति होत्रमैत्रावरुणानंतरमेवाग्नीषोमीये पशौ॥
तेः

अत्रपशौ एकादशप्रयाजाः ५

॥१७॥ ॥देवया०६

बो

या

अत एव दीक्षितग्रहणात् अध्वर्युः प्रयच्छतीति गम्यते। अन्यथा स्वदंडं सोम इत्येवमेवावक्ष्यत्। सोमे दंडप्रदानस्य का
लांतरमाह॥ क्रीते वा। क्रीते वा सोमे सोमविक्रयिणः सकाशात् हिरण्यादानंतरमेवाध्वर्युर्मैत्रावरुणाय दंडं प्रयच्छति अ
नेनैव मंत्रेण नाग्नीषोमीयमध्ये। वाशब्दो विकल्पार्थः। दंडस्य प्रतिपत्तिरुक्ता मानवे। विरम्यातिप्रणीते नूर्ध्वं दंड
मवं दधातीति। आश्वलायनसूत्रेपि॥ ॥सामाप्य अपामग्नो दंडमनुप्रहरेदनवभृथेन्यत्रेति॥ एकादश प्रया
जाः। भवंति। एकादशैव प्रयाजा भवंतीति श्रुतत्वात्॥ अनुयाजाश्च। अत्र पशौ अनुयाजा अपि एकादश भवंति। त
थाहि वैपशौ एकादशान्येकादश प्रयाजा एकादशानुयाजा एकादशोपयज इति श्रुतत्वात्। अत्रेयं प्रयाजानु
याजानां एकादशसंख्या उत्पन्नसंयोगिनी। ततश्चोदकप्राप्तेषु प्रयाजानुयाजेषु श्रूयते। अतोभ्यासेनैव पूर
णीया। तत्र प्रयाजादीनां पंचमस्याभ्यासेन संख्यापूरणं। अनुयाजादीनां मध्ये द्वाः प्रभृतीनां नराशंसानां द्विती
यस्य नराशंसस्याभ्यासः सवनस्य तिप्रभृतीनां मूर्तिमात्र्यास इति। ततश्च द्वाः प्रभृतीनां पंचमादीनां पंचमम
नंतस्येत्येवानुमंत्रणं। पूर्वं पूर्वं वाभिक्राममिति पक्षे पंचमे एव स्थाने होम इति। अनुयाजेषु द्वितीयानां नराशं
सानां द्वितीयस्थाने होमः। वनस्पत्यादीनां तृतीयस्थान इति। अत्रापस्तंबसूत्रे विशेषः। तिष्ठति पशावे
कादशप्रयाजान्यजति समेद्ध्यः प्रेष्येति प्रथमं संप्रेष्यति प्रेष्य प्रेष्येतीतराश्चतुर्थे चमेयाः प्रतिसमानीय दश

॥१७॥ ॥भाष्या६

द्वैकादशाया ज्यमवशिनष्टि त्वान्यजमानः प्राहुतेगादितश्चतुरोनुमंत्र्य चतुर्थस्यानुमंत्रणेन दुरः प्रभृती
स्त्रीनुत्तमेन शेषं प्रत्याक्रम्य जुह्वां स्वरुं स्वधितीन क्तीति। अत्र प्रजानां इध्मस्तनूनपान्नराशंस इडा बर्हिर्द्वा
र उषासानक्ता दैव्याहोतारा तिस्रो देवी स्त्वष्टा वनस्पतिः स्वाहाकृतय इत्येता आप्रीदेवता अनुक्तत्वादिदं
समिद्भ्यः इदं तनू नपाते। इदं नराशंसाय। इदमिड्भ्यः। इदं बर्हिषे। इदं द्वाभ्यः। इदमुषासानक्ताभ्यां। इ
दं दैव्याभ्यां होतृभ्यां। इदं तिसृभ्यो देवीभ्यः। इदं त्वष्ट्रे। इदं वनस्पतये। इदं स्वाहाकृतिभ्य इति। अनुयाज
दीनां तु इदं देवाय बर्हिषे। इदं देवीभ्यो द्वार्भ्यः। इदं देवीभ्यामुषासानक्ताभ्यां। इदं देवीभ्यां जोष्ट्रीभ्यां। इदं देवी
भ्यामूर्जाहुतीभ्यां। इदं देवाभ्यां दैव्याभ्यां होतृभ्यां। इदं देवीभ्यस्तिसृभ्यस्तिसृभ्यो देवीभ्यः। इदं देवाय नराशं
साय। इदं देवाय वनस्पतये। इदं देवाय बर्हिषे। इदं देवायाग्नये स्विष्टकृत इति॥ ॥समैत्रावरुणप्रेष्येत्याह
यजस्थाने वचने। स मैत्रावरुणे मैत्रावरुणसंयुक्ते पशुसोमादिकर्मणि यजस्थाने प्रेष्येत्याह॥ वचने सति यत्र मै
त्रावरुणप्रेषाध्याये प्रेषवचनमस्ति तत्र यथा आज्यभागयोरग्नये प्रेष्य सोमाय प्रेष्येति। समिधो यजेत्यत्र
समिधः प्रेष्येति देवेभ्यः प्रेष्येति देवेभ्यः प्रेष्येति च। स मैत्रावरुणोपि वचनाभावे पत्नीसंयाजादौ यजते य
वन प्रेष्यति। सत्र आश्राव्याह समिधः प्रेष्येति प्रेष्य प्रेष्येति च तुर्थे चतुर्थे प्रयाजे समानयमानो दशाभिः प्र

प्रयाजेष्वरतीत्येवमादिश्रुतत्वात्॥ दशेष्टाप्रयाजा नाहत्या समाहरेति। दशप्रयाजानिष्ट्वा शासमाहरेति॥ सह स्तं विशासितारं प्रत्यध्वर्युराह। विशासितार माहेति हरिस्वामिनः। दशप्रयाजानिष्ट्वा शासमाहरेति वै शास इत्याचक्षत इति श्रुतत्वात्॥ ॥अग्निः शासः॥ कद्दारिकाद्रष्टव्या सामर्थ्यान्निर्दिष्टेति हरिस्वामिनः॥ स्वरुमादायाल्क्तौ जुह्वग्रेताभ्यां पशोर्ललाटमुपस्पृशति घृतेनाक्ताविति। ततो विशासितादत्तं शासं गृहीत्वा स्वयमेव यूपात्स्वरुमादाय ताबुभावसिस्वरू जुह्वग्रे जुह्वाः अग्रे नालिकायां घृतेनाक्ताभ्यामसिस्वरुभ्यां पशोर्ललाटमुपस्पृशति घृतेनाक्ताविसनेन मंत्रेणालभत इत्यर्थः। अथ यूपशकलमादत्ते ताविग्रेजुह्वा पशोर्ललाटमुपस्पृशति घृतेनाक्ताविसादिश्रुतत्वात्॥ स्वरुमेंगुल्यासिं प्रयच्छन्नाह एषा ते प्रज्ञाता श्रिरस्त्विति ततः स्वरुं यथास्थाने वगूह्य शमित्रे असिं प्रयच्छन् एषा ते प्रज्ञाता श्रिरस्त्वित्याह। ब्रवीति। पुनर्यूपशकलमवगूह्यैषा ते प्रज्ञाताश्रिरस्त्वित्याह शासं प्रयच्छन्निति श्रुतत्वात्। असिं शासं विशासि प्रयच्छन् श्रिधारा एषा प्रज्ञाना चिह्निता भवतु तेवा। यथायं पशुस्तः पुनरेनयैव वपाधर्ममभिसंधास्यामीति शमिते शमिते स्वधितिं प्रयच्छन्नाह शमितरेषा ते श्रिस्पृष्टास्त्वित्यापस्तम्बः। अन्तेयाधारया श्रुतं स्याव द्यतिपशुमितरया विशास्तीति आपस्तम्बमानेव च असेः कद्दारिकाया धारा द्वयं। तत्रैका अक्ता परा नक्ता भवति। यथा सत्ययं विवेक इति॥ सादयित्वास्रुचौ चात्वालमुत्तरेण

शामित्रायोल्लिखति। स्रुचौ सादयित्वा जुहूपभृतौ स्वस्थाने आसाद्य चात्वालमुत्तरेण चात्वालादुत्तरस्यां दिशि शामित्रायशामित्राग्नेः स्थापनार्थमुल्लेखनं चाधिकं। स्मार्त्ताः पंचभूसंस्काराः पूर्वं प्रवर्त्तितएव। शामित्रः पशुश्रपणोग्निरुच्यते। तथाह पस्तम्बः अभिपर्यग्निकृते देशे उल्मुकं निदधाति स शामित्र इति॥४॥ ॥पर्यग्नयेनुवाचयति। ततोध्वर्युः पर्यग्नयेनुब्रूहीत्यनुवाचनं कारयति मैत्रावरुणेन। अथाह पर्यग्नयेनुब्रूहीति श्रुतत्वात्। परि सर्वतोग्निर्यस्य स पर्यग्निः पशुः तस्मै तदग्नये। अथ च पापरितोग्निः पर्यग्निः। तस्मै पर्यग्नये इति वा॥ ॥आहवनीयोल्मुकमादायाग्नीत् त्रिः समंतं पर्येति पश्वाज्यशामित्रदेशान् यूपचात्वालाहवनीयात्। अग्नीदाहवनीयस्याग्नेरुल्मुकमादाय त्रिवारं समंतं सर्वतः प्रदक्षिणं पश्वाज्यशामित्रदेशौ यूपचात्वालाहवनीयान्पर्येति। उल्मुकमादायाग्नीत्पर्यग्निं करोतीति तच्चैत्रे नपूरायति तदभियहतीति श्रुतत्वात्॥ आज्यपशुशामित्रान्चा। अथवा आज्यानि जुह्वादिस्थानानि। पशुः शामित्रश्च एतानेव पर्यग्निं करोति। न पूर्वसूत्रोक्तान्यूसर्वान्। वा विकल्पार्थः॥ प्रतिप्रास्योल्मुकं तावेत्तिपर्येति प्रतेः प्रयोगात्। अप्रदक्षिणं त्रिः पश्वादीन्परिगच्छतीत्यर्थः। पुनरपीतरथा वृत्य त्रथमेकवारं प्रदक्षिणं पर्येति। पुनरादायोदङ्ङतिपद्यते। आग्नीध्र एव पुनस्तमेवोल्मुकमादायोदङ्मुखः प्रतिपद्यते अग्रतो गंतु प्रारभते। अथोल्मुकमादायाग्नीत्पुरस्तात्प्रतिपद्यत इति श्रुतत्वात्। पशुश्चान्वक्। पशुस्तमाग्नीध्रमन्वक् अनुपश्चाद्वर्तीत्यन्वक्। एष तमनुगच्छतीत्यर्थः। शामितेन कंठे बध्वा नयतीति श्रुतेः। शामिता पशुरशीनामन्तकादेवताय

।।१८७।।
।।देव०प्र

गलेबध्वाग्नीधमनुयति। अथान्येनानाष्टे पशुनयतीतिश्रुतत्वात्। प्रतिप्रस्थान्वारभ्न्त एनं वपाश्रपणीभ्यां
काष्मर्यमयीभ्यां विशाखाविशाखाभ्यां। प्रतिप्रस्थाता शामित्राद्देशीयमानं पशुं वपाश्रपणीभ्यामन्वारभते वपाश्रप्य
ते आभ्यामिति वपाश्रपण्यौ। ताभ्यां। किंजातीयाभ्यां। काष्मर्यमयीभ्यां। श्रीपर्णी वृक्षावयवभूताभ्यां। पुनः कीद
शीभ्यां। विशाखाविशाखाभ्यां। द्विशृंगैकशृंगाभ्यामिति। काठके। द्विशूलैकशूलाभ्यामिति आपस्तंबः। अतश्च
एका विशाखा द्विशृंगा। द्विशूलामेष्याकारा। स कर्णक इत्यर्थः। द्वितीया अविशाखा अञ्चीलता एकशृंगा एकशूला
अकर्णक इत्यर्थः। ताभ्यामित्यर्थः। तमध्वर्युः। तं पशोः कृतान्वारंभं प्रतिप्रस्थातारमध्वर्युरन्वारभते।। ।।यजमा
नोध्वर्युं। प्रतिप्रस्थातुः कृतान्वारंभमध्वर्युं यजमानोन्वारभते। तं वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभते प्रतिप्र
स्थातारमध्वर्युरध्वर्युं यजमान इति काष्मर्यमय्यौ वपाश्रपण्यौ भवत इति श्रुतत्वात्।। ।।वेदितृणे अध्व
र्युरादायाश्राव्याहोपप्रेष्य होतर्हव्या देवेभ्य इति। ततोध्वर्युस्तृतायाएव वेदेर्द्वितृणे आदायाश्राव्योपप्रेष्यहो
तरित्येवमादिके प्रैषं मित्रावरुणं प्रत्याह। अथ स्तीर्णायै वेदेर्द्वितृणे अध्वर्युरादत्ते स आश्राव्याहोपप्रेष्य होत
र्हव्या देवेभ्य इति श्रुतत्वात्।। ।।रेवति यजमान इति वाचयति। रेवति यजमान इत्यमुं मंत्रं यजमानं वाचय
ति। अथ वाचयति यजमान इति श्रुतत्वात्। अनेकयजमाने एकोन्वारभते वाचनं सर्वेषां। ब्रूतं ब्रूतेति च

।।२ दे।।
।।गणाध्या ६

पृथा यथमध्ये पणा। अत्र काठके सूत्रे विशेषः। प्रमुच्य यूपात्पशुं यं सुल्मुक हस्तो गत आग्नीध्र उत्तरस्मि
न्वेद्यंते पशुवास्थितं द्विशृंगैकशृंगाभ्यां वपाश्रयणीभ्यां मुख्यमभिनिधायाश्राव्याहोपप्रेष्य होतर्हव्या देवेभ्य
इति संचरेण निष्क्रम्य रेवती प्रेत्यमुं मंत्रं वाचयत इति। आपस्तंबसूत्रे च। वपाश्रपणीभ्यां पशुमन्वारभते अध्वर्यु
यजमानश्चाश्राव्य प्रत्याश्राविते संप्रेष्यत्युपप्रेष्य होतर्हव्या देवेभ्य इति प्रास्मा अग्नीरभन्त तस्तृणीत बर्हिरिति
होतुरभिज्ञाया हवनीयादुल्मुकमादायाग्नीध्रः पूर्वः प्रतिपद्यते शामितापशुं नयत्युग्रो अंतरीक्षेत्यंतगाचात्वालो
त्करायुदं चैपशुं नयंतीति। शामित्रनातीयात्। अत्र शामित्रशब्देन तस्य स्थानं लक्ष्यते। अध्वर्युः प्रतिप्रस्थातुः
कृतान्वारंभः पशुमनुगच्छत्स नू शामित्रनातीयायात्। अतिक्रम्य नगच्छेत्। शामित्रसमीप एव तिष्ठेदित्यर्थः।। ।।
शामित्रेग्निं निदधाति। ततोध्वर्युस्त माग्नीध्र हस्तस्थमुल्मुकाग्निं शामित्रे निदधाति स्थापयति।।। निर्मंथ्यमे
के। एके शाखिनो निर्मंथ्यमग्निं शामित्रे निदधाति न प्रहृतमुल्मुकं। तथा ऊः पुनरेत दुल्मुकं प्रहरेत्तथात्रा न्य
मेवाग्निं निर्मंथ्य तस्मिन्नेव श्रपयेयुरिति श्रुतत्वात्। अतो निर्मंथ्यस्यं तस्य श्रपणार्थत्वादस्मिन्पक्षे आहवनीया
दुल्मुकाहरणं न भवति। नत्वग्निमेवैत पुरस्तात्करोतीत्यादिदर्शनादमात्रं इति प्रिद्भूतिः।। ।।पश्चात्तृणं शुमा
स्यति वर्षे वर्षीयसीति। शामित्रस्य पश्चात्प्रागग्रं तृणमुपास्यति। हस्तस्थयोर्वेदितृणयोर्मध्येऽन्यतरतृणं

॥देवया०॥

॥२०॥

नत्र प्रतिक्षिपतीत्यर्थः। तद्यत्रैनं विशासंतीति तत्पुरस्तात्तृणमुपास्यति वर्षो वर्षीयसीति श्रुतत्वात्। अत्रानेकयजमा
नके मंत्रस्योहः कार्यः। यज्ञे यज्ञपतीधा इति द्वयोः॥ ॥यज्ञपतीधा इति बहुषु। अनेकयजमानकेपश्चान्वारंभएककरो
करोति। वाचनं सर्वेषां। ब्रूतं ब्रूतेति प्रैषः॥ ॥नस्मिन्नेनं निघ्नंतिप्रत्यक्शिरसमुदक्पादं। तस्मिन्तृणएनं पशुं निघ्नं
तिनितरां मारयंतिकीदृशं प्रत्यक्शिरसं। प्रतीच्यां दिशि शिरो यस्यासौ प्रत्यक्शिरास्तं। प्रत्यक्शिरसं। तथा उदक्पा
दं। उदीच्यां पादौ यस्य सा उदक्पादं॥ ॥प्राक्शिरसं वा। अथवा प्राक्शिरसं पशुं निघ्नंति। उदक्पादमिति तत्स्थितमे
व तत्र शिरसे दिङ्नियमे पि पुरुषस्योदक्पादता वाचनिकीत्वोकर्त्तव्या॥ ॥मगस्यमुखं तमयंत्यवास्यमानं। पशो
मुखं संगृह्य श्वाससंरोधो यथा स्यात्तथा दृढमुखस्य ग्रहणं कृत्वा ऽवास्यमानं यथा मार्यमाणः शब्दं न करोतितथा
तमयति ति मुक्त आकांक्षायां। पशुर्हि विध्यप्राणः सन् श्वाससमाकाम्यति ताम्यति। ताम्यंतं प्रयुंज्य तेनमयंतितथा
कुर्वंति यथा सनाम्यति प्राणमाकांक्षति। श्वाससंरोधं कृत्वा मारयंतीति तात्पर्यार्थः। तस्य न कटेन प्रघ्नंतीति मानुष
ंहि तन्नो एव पश्चात्कर्ण पितदे वत्यं हि तदपिगृह्य वैवमुखं तमयंतीति श्रुतत्वात्। मुखमपिगृह्य संगृह्येत्यर्थः॥
वेष्केण वा॥ अथवा वेष्केण तमयंति एषामाहवनीयामावृत्यासते। पशुमारणदेशात्खात्वा लोकं वं तरेणाहवनीय
मसमीपे प्रत्यागत्य आहवनीयमभिमुखा आवृत्य। अदक्षिणमावर्त्तनं कृत्वा प्राङ्मुखा आसते अध्वर्युयजमानप्रति

॥२०॥ ॥श्रो०॥

स्थाग्नीध्राः। अथ पुनरेत्याहवनीयमभ्यावृत्यासते नेदस्य संज्ञप्यमानस्याध्यक्षा असामेति श्रुतत्वा
त्। पुनः शब्दो यावंत आग्नीध्रं पुरागतास्ते सर्वे प्रत्यागत्याहवनीयाभिमुखा आवृत्योपविशंति। नेदस्येति
हेतुवचनादवृतो ऽपृत्विग्नत्संज्ञपयेदिति। तच्छ्रशामितानृत्विग्यजमानेभ्यो व्यतिरिक्त इति सिद्धं। तथा चानी
त अध्वर्युर्भवति शमितेत्यर्पतदेवोभवंतीत्यनेना ध्वर्युव्यतिरिक्त एव शमितेति गम्यते॥ ॥संज्ञपयान्वगंनिति
ब्रूयात्। संज्ञपयान्वगंन्नित्येवइममेवप्रैषमनुब्रूयान्नार्थापेक्षणमन्यलोकप्रसिद्धं जहि मारयेत्यादिकमित्ये
वकारार्थः। तंनाहजहि मारयेति मारयेति मानुषं हि तत्संज्ञपयान्वगन्निति तद्दैवसेति श्रुतत्वात्। हिं
मितरस्त्वमेनं पशुं संज्ञपयामारय। अयं पशुः संज्ञप्तः सन्न्वगन् देवाननुगच्छन्निति प्रैषार्थः। अन्वगच्छतामि
ति प्रैषवक्यतेऽहः। अन्वगमन्निति बहुषु पशुषु॥ ॥स्वाहादेवेभ्य इति जुहोति। ततो ध्वर्युः स्रुवे गृहीतमाज्यं
वसाहोमहवन्यां स्वाहादेवेभ्य इति मंत्रेण समित्पूर्वकमाहवनीये जुहोति इदं देवेभ्य इति त्यागः। तद्यत्रैनं नि
विध्यंतीति तत्पुरा संज्ञपनात्। जुहोति स्वाहादेवेभ्य इति श्रुतेः॥ ॥संज्ञप्तः पशुरिति प्रोक्ते यस्य तान्नु दृक्तमि
याहासोमे। संज्ञप्तः पशुरिति शमित्रा प्रोक्ते ध्वर्युरसोमे सोमादन्यत्र निरूढपशौ होतानुमुक्तं तमित्याहब्रूया
ति। यतो निरूढप्रकरण एव श्रूयते। तस्मादुपशयं संज्ञप्त ब्रूयोच्छेतानुमुक्त्वेत्तमिति सयावेतमश्वमेधेनैष्टाला

॥२१॥
॥देवयाज्ञि०६

कं जयति। तावंतमेतेन जयतीति। संज्ञप्तो पशूइति पशुद्वयो संज्ञप्ताः पशवइति बहुषु पशुषुनिरूढविकारे
षुहविर्यज्ञविधपशुषुग्रेताननुमुहूर्त्तमितिभवत्येव। सव विधेष्वग्नीषोमीयस्य सवनीयानुबंध्यादिषु
नभवति। सौत्रामण्यां त्रिपशौहविर्यज्ञविधत्वेप्यैरतां नुमुहूर्त्तमित्यूहः। सपाशुके षु वरुणप्रघासेषु बहु
वचनं। पशुद्वयेग्नायातांनुमुहूर्त्तमिति॥ ॥देवेभ्यः स्वाहेतिजुहोति। तताध्वर्युर्वसाहोमहवन्यां सद्यः क्षुहीतमा
माज्यंगृहीत्वाहवनीयेसमिधंविनाजुहोतिदेवेभ्यःस्वाहेत्यनेनमंत्रेणत्यागस्तु पूर्ववत्। अथयदाप्राहसंज्ञप्तः
पशुरित्यथजुहोतिदेवेभ्यःस्वाहेतिश्रुतत्वात्॥ ॥नवैतेजुहुयात्। एते परिपशव्याहुतीजुहुयान्नजुहुयाद्वा।
वाशब्दो विकल्पार्थः। तेवा एने परिपशव्याइत्याहुती सयदिकामयेतजुहुयादेते यद्यकामयेतापिनाद्रियेतेति
श्रुतत्वात्॥ ॥वपाश्रपणीभ्यांनियोजनीं चात्वालेप्रास्यतिमाहिर्भूरिति। वपाश्रपणीभ्यां करणभूताभ्यां नियोज
नीं पशुबंधनरज्जुं द्विगुणरशनां माहिर्भूर्मापृदाकुरितिमंत्रेण चात्वाले प्रास्यति प्रक्षिपति। रशना बेहुत्वे माहि
र्भूतमापृदाकुरिति। द्वित्वे चैमाहिर्भूतंमापृदाकूरित्यूहः। अहिपृदाकुशब्दौ रूपमात्राधत्वान्न विपरिणम्ये
तेनुपमाथश्चानंगत्वात्। अंगभूतंहिप्रकाशयितव्यंचेनोपमांगभूतेति। भूरित्येतत्तु रत्राना परं श्रातोविपरिण॥२१॥
॥भाष्या०६

मतएव॥ ॥प्रतिप्रस्थातः पत्नीमुदानयेत्याह॥ ॥प्रतिप्रस्थातः पत्नीमानयेत्येवमध्वर्युराह॥ ॥
नेष्टरितिसोमे। सोमेसोमांगभूतेषु अग्नीषोमीयसवनीयेषु नेष्टः पत्नीमुदानयेत्येवमध्वर्युराह। य
दाप्राहसंज्ञप्तः पशुरित्यथाध्वर्युराह। नेष्टः पत्नीमुदानयेतीतिश्रुतत्वात्। सोमइतिसोमांतर्भूतपश्व
षेवा। यतस्तत्रैवनेष्टाविद्यते। अतः सोमबाह्येषु पशुषु प्रतिप्रस्थातरित्येव प्रैषो भवति॥५॥ ॥पान्ने
जनहस्तां वाचयति नयंनमस्तआतानेति। पान्नेजनः पादनेजनार्थउदककलशः पादग्रहणमवएव
प्रदर्शनार्थं। पान्नेजनो मुखवाच्ययक्षेशोधनार्थः जलकलशो हस्ते यस्याः सापान्नेजनहस्तानांपान्ने
जनहस्तां पत्नीनयन् प्रतिप्रस्थातानेष्टावागार्हपत्यसमीपात्पशुशोधनायनयन्सन् नमस्तआता
नेत्यमुंमंत्रं वाचयति। उदानयति। नेष्टापत्नीपान्नेजनं बिभ्रतीं तां वाचयतीनमस्त आतानेतिश्रुतत्वात्॥
अनेकपत्नीके एके वपान्नेजनहस्तां वाचनं चसर्वासांसंकरत्वादिति॥ पशोः प्राणांछुंधतीपत्नी। पशुसमी
पेउपविश्यप्राणो मुखादीनि प्राणायतनानि अद्भिः शुंधति शोधयति। अद्भिः स्पृशतीत्यर्थः। अथपत्नीः
प्राणानद्भिः पत्न्युपस्पृशतीतिश्रुतत्वात्। नान्यवाहे॥ ॥मुखंनासिकेचक्षुषीकर्णौनाभिं मेढ्रं पायुं
पादात्सपूत्हत्य वाचंतेशुंधामीतिप्रतिमंत्रं॥ वाचंतेशुंधामित्येवमादिभिर्मंत्रैः प्रतिमंत्रं एकैकेनम

तस्यपत्रोर्मेतस्य [illegible]

॥२२॥
॥देवं०द०ते

तेषामुखनासिकादीनुपत्नी शुंधतीति। सोपस्पृशतीति वाचं ते शुंधामीति मुखं प्राणं ते शुंधामीति नासिके च
क्षुस्ते शुंधामि इत्यक्ष्यौ श्रोत्रं ते शुंधामीति कर्णौ नाभिं ते शुंधामीति योपमनिरुक्तः प्राणो मेढ्रं ते शुंधामीति पायुं ते
शुंधामीति यो यं पश्चात्प्राणस्तं नप्राणं दधाति तत्समीरयतीति श्रुतत्वात्। मेढ्रं शिश्नं प्रजननं द्विपमुच्य
ते। पायुर्गुदः। अन्यत्प्रसिद्धमेव। नासिकयोश्चक्षुषोः कर्णयोश्च भेदेनोपस्पर्शनं युगपदशक्यत्वात्। भेदे
च मंत्रावृत्तिः कर्तव्या। तदेतद्वक्ष्यत्याचार्योभिदे मंत्रावृत्तिः सांनिपातित्वादिति। पादांसंहृत्य चतुरो येकत्रहलो
द्भिः शुंधति चरित्रांस्त इति। अथसंपूर्त्त्यपदश्चरित्रांस्ते शुंधामीति श्रुतत्वात्॥ शेषेण यजमानश्च शिरः
प्रभृत्यनुषिंचतः। शेषेण पात्नेजनशेषेण यजमानश्चकारादध्वर्युश्च पशोः शिरःप्रभृतीन्यंगान्यनुषिंचतः
अथ या आपः परिशिष्यंते ताः पावत्यो वा नाभिंग्नेयजमानश्च शीर्षतोग्रेनुषिंचत इति श्रुतत्वात्।
काण्वानां चाध्वर्युश्च यजमानश्चेति पठ्यते। तेन का[illegible]रेणा ध्वर्युः समुच्चीयते। अनेकयजमानके
चैक एवानुषेच नैकगोतिपरार्थत्वात्। तत्र शिरसो मंत्रमाह॥ मनस्त इति शिरः। मनस्त इति मंत्रेण पशोः
शिरोनुषिंचितः अद्भिः सिंचतः। विलिंगत्वात्तस्य विनियोग उक्तः। वाक्त आप्यायतामित्यादिमंत्राणां लि

॥२२॥
॥का०ख्य॥६

ङ्गेनैव विनियोगः सिद्धः सूत्रकृता नोपदिष्टः। तत्र वाक्त आप्यायतामिति मुखं प्राणस्त इति नासिके भेदेन मंत्रावृत्त्या।
चक्षुस्त इति तथैव चक्षुषी श्रोत्रं त इति तथैव कर्णौ॥ ॥यत्ते क्रूरमित्यंगानि। यत्ते क्रूरमित्यं तेन मंत्रेण सर्वाण्यंगा
न्यनुषिंचतः। तावनुषिंचतो मनस्त आप्यायतामित्यादि श्रुतत्वात्। विलिंगत्वादस्यापि विनियोग उक्तः॥
शमहोभ्य इति पश्चात्पशोर्निषिंचतः। शमहोभ्य इत्यनेन मंत्रेण पशोः पश्चाद्भागे जघनप्रदेशे पात्नेजनशे
षमुभावपि निषिंचतः निनयनं इत्यर्थः। शमहोभ्य इति जघने न पशुं निनयत इति श्रुतत्वात्। निनयनस्य पशुसं
स्कारत्वाच्छरीर एव पश्चाद्भागे निनयनमिति अनेकपशुषु प्राणशोधनादि पश्चात्पशोर्निषिकांतमेके कस्या सं
स्कारस्यैतावत्त्वात्। उत्तानं पशुं कृत्वाग्रेण नाभिं तृणं निदधात्योषध इति। शेषनिनयनानंतरमध्वर्युः पशुमुत्ता न
नं कृत्वा नाभिमग्रेण नाभेरग्रतोंगुलचतुष्टयं त्यक्त्वा ओषध इति मंत्रेण प्रागग्रं तृणं निदधाति। अथोत्तानं प
शुं पर्यस्यंतीति सत्तृणं मंतर्दधात्योषधे त्रायस्वेति श्रुतेः। नाभिरग्रतो वपायाः स्थानं। ततोग्रेण नाभिमिति स्फक्तं॥
य स्वधित इति प्रज्ञातयाभिनिधाय छित्वाग्रं सव्येन हस्तादाक्षिणेन मूलमुभयतोनक्ति लोहितेन रक्षसां मिति। स्वधि सा र
त इति मंत्रे प्रज्ञातया प्रस्क्तया हस्तचिह्नया असिधारया अभिनिधाय तृणस्योपरि असिधारां निधाय तूष्णींस

॥२३॥
॥देवेया०६

तृणं उदरत्वचं छित्त्वा तिर्यक् पाटयित्वा तृणाग्रं यत्पृथक्भूतं तत्सव्ये हस्ते कृत्वा दक्षिणहस्तेन तृणमूलं द्विगुणी
कृत्यो भयतोग्रे मूले च लोहितेनच्छेदनस्थाने उत्पन्नेन पशोः रुधिरेणानक्ति। म्रक्षयति रक्षसामित्यनेन मंत्रेण। अ
थवा उभयत उत्यत्र बर्हिश्च तृणं लोहितेनानक्ति इत्यर्थः। अत्राहापस्तंबः स्वधितिना पार्श्वतस्तिर्यगाच्छ्यतीति। अ
थासिं नाभि निदधाति स्वधिते मैनं हिंसीरिति। सा या प्रकृतौ असिस्तया भिनिदधाति सा हि यजुष्कृता मेध्या तद
दग्रं तृणस्य तत्सव्ये पाणौ कुरुते नयदुघ्नं तद्दक्षिणेनादत्तेन सपात्रापर्श्वौति यएतल्लोहितमुत्पततितद्दुग्नेयतोनक्तिर
क्षसां भागोसीतिश्रुतत्वात्। असेर्हि धाराद्वयं भवंति तयोर्मध्ये या पूर्वं तयोरुद्धृत्याग्रे अक्ता एषा ते रक्षसां तास्त्रिर
स्वितिच शामितारं प्रयुक्ते अधुना तथैव कृते चिक्रया घृताक्तया असिधारया भिनिधानं कर्तव्यं। ननेकया द्विती
यपार्श्वगयेत्येतदर्थं प्रशासतयेत्युक्तं। तथा चोक्तं मानवे आपस्तंबे च आक्तया श्रुतस्या व्यत्ययनेक्तया विशसतसतीति॥
निरस्तमित्यपास्यति॥ तद्रुधिराक्तं तृणमूलं निरस्तमित्यनेन मंत्रेणापास्यति उत्करे प्रक्षिपति। ततउदकोपस्पर्श
नं करोति मंत्रस्य रक्षोवाचित्वात्॥ ॥इदमहमित्यभितिष्ठति यजमानः। इदमहमित्यनेन मंत्रेण यजमानस्तदुत्करे
अध्वर्युणा प्रक्षिप्तं रुधिराक्तं तृणमूलमभितिष्ठति। तस्योपरि तिष्ठति। पादेनाक्रामतीत्यर्थः। अत्राप्युदकोपस्पर्शनं
यजमानेनैव कार्यं मंत्रस्य रक्षोवाचित्वात्। अनेकयजमानके त्वेक एव तृणमभितिष्ठति कृत्स्नार्थत्वात्॥ तदुपास्या

॥२३॥
॥वपाय०६

भितिष्ठतीदमहमितिश्रुतत्वात्॥ ॥वपामुत्खिद्य वपाश्रपण्यौ प्रोर्णौतीति घृतेनद्यावापृथिवी इति। ततोध्व
र्युः पाटितात् पशोरुदराद्वपामुत्खिद्य उत्पाद्य निष्काश्य तया वपया वपाश्रपण्यौ प्रोर्णौतीति प्रकर्षेण
छादयति। अथ वपामुत्खिदंति तया वपाश्रपण्यौ प्रोर्णौतीति घृतेनद्यावापृथिवी प्रोर्णुवाथामितिश्रुतत्वात्।
पशोः सान्नाय्यविकारत्वात् पशुमांसश्रपण्यार्थानां पात्राणां सान्नाय्योखास्थानापन्नत्वाद्वपाश्रपण्यो
स्तद्धर्मपरिप्राप्तौ उखादानवत्कर्तव्यं। द्यौश्च पृथिवी स्थ इति। यजमानेनान्वारब्धयोर्वपाश्रपण्योः प्रोर्ण
वनं चेति। अत्र द्यौः पृथिवीशब्दावनुपम नार्थत्वान्न विपरिणम्येते। असीत्येतत्तु वपाश्रपणीपरत्वाद्वि
परिणम्यते एव॥ ॥परिवास्य चात्वाले वसिच्य शामित्रे प्रतपति। वपाश्रपण्योः प्रोर्णवानंतरं तावतां वपां
परिवास्योदरसंलग्नाच्छेदनेन पृथक्कृत्य तत्तु चात्वाले वपाश्रपणीस्थामेव वपामवसिच्य अवोक्ष्याभ्यु
क्ष्य उदकेनापरिसिच्य ततः प्रतिप्रस्थाता शामित्रे प्रतिपत्ति। चात्वालेवसेकांतमध्वर्युः करोति। शामित्रे प्र
तपनादि तु प्रतिप्रस्थाता। तां परिवासयति तां पशुश्रपणे प्रतपतीति तथोहास्यात्रापि श्रुतो भवतीतिश्रुतत्वात्।
अतः शामित्रे प्रतपनमपि श्रपणैकदेश एव श्रपणं च प्रतिप्रस्थातृकर्तृकं दक्षिणतः परीत्य प्रतिप्रस्थाता
श्रपयतीति वचनात्। अतः शामित्रे प्रतपति प्रतिप्रस्थातैव करोति॥ ॥शामित्रैकदेशमाहवनीयप्राप्त्यस्य

॥२४॥ ॥देवयो॰ ६

ग्नीत् अग्नीत् आग्नीमित्रैकदेशमाहवनीये प्रास्यति प्रक्षिपति। पुनरुल्मुकमग्नीदादत्ते इति श्रुतत्वात् आ
दानस्य आहवनीयगमनस्य च दृष्टार्थत्वात् उल्मुकमाहवनीये प्रास्यतीति गम्यते। पुनःशब्दोपादानात्
निर्मंथ्य पक्षे आदानं॥ ॥तृणाग्रं चाध्वर्युर्वायो वेरिति। वायो वेरित्यनेन मंत्रेणाध्वर्युस्तृणाग्रं यत्प्राक्
व्येपाणोद्दत्तमासीत् तदधुनाहवनीये प्रास्यति वायो वे स्तोकानामिति श्रुतेः। ते अध्वर्युप्रस्थात्राग्नीध्राः आ
मित्रसमीपाच्चात्वालजघनेन चात्वालोत्करावंतरेणाहवनीयं प्रतियंति गच्छंतीत्यर्थः॥ ॥उत्तरतस्तिष्ठ
न्नतप्य वपामंतरा यूपाग्नी हृत्वा ... दक्षिणतः प्रणो
ति प्रस्थाता श्रपयति परीत्य। अध्वर्युणा तृणप्रक्षेपे कृते सति प्रतिप्रस्थाता उत्तरत आहवनीयादुत्तरे देशे तिष्ठ
अग्र न्नाहवनीये वपां प्रतप्य ततोंतरा यूपाग्नी पयोरंतरालेन वपां हृत्वा स्वयमपि परीत्य न तूत्तरतस्थित हृ
एव दक्षिणत आहवनीयाद्दक्षिणस्यां दिश्यासीन आहवनीय एव वपां श्रपयति। अत्राहापस्तंबः आहवनी
यस्यांतेमंगारे वपां निगृह्यांतरा यूपमाहवनीयं दक्षिणाति हृत्य प्रतिप्रस्थाता तत्र प्रयच्छति तां दक्षिणत आसी
नः प्रतिप्रस्थाता माहवनीये श्रपयतीति। काठके च। चरमेंगारे वपां निगृह्यांतरायूपाग्नी हृत्वाभिघार्य श्र ॥२४॥
यतीति। वपामेवांतराग्नी हृत्वा उत्तरतोवस्थितेनापि दक्षिणप्रदेशे श्रपयितुं शक्यत इति तन्माभूदिति परी ॥श्रोप्य॥

रीत्यपरीत्य १

त्येत्यत्र परीत्य दक्षिणत इति दक्षिणत इत्याहवनीयस्य दक्षिणप्रदेशे वपां श्रपयतीत्यर्थः। अन्यथा परीत्येत्यस्य वैय
र्थ्यापत्तेः। दक्षिणत इत्यनेनैवार्थप्राप्तत्वात्। तामंतरेण यूपं चाग्निं च हरतीति प्रह्वस्य दक्षिणतः परीत्य प्रतिप्रस्थाता श्र
पयतीति श्रुतत्वात्॥ ॥वपां स्रुवेणाभिघारयेत्यग्निराज्यस्येति॥ ॥प्रतिप्रस्थाता वपां श्रपणीभ्यामा
हवनीयस्योपरि धृतां वपां स्रुवेणोपहत्याज्यमध्वर्युर्वपामभिजुहोत्यग्निराज्यस्य वेतु स्वाहेतीति श्रुतत्वात्।
श्रुतो जुहोतीति होमस्य विधानान्मंत्रे स्वाहाकाराम्नानाच्चात्रेदमग्नय इति त्यागोनुष्ठेयः। तथा चापस्तंबः। स्रुवे
ण वपामभिजुहोतीति। स्तोकेभ्योनुवाचयति॥ ॥ततोध्वर्युः प्रादुर्भूतेषु स्तोकेषु स्तोकेभ्योनुब्रूहीत्येवं मैत्रावरु
णं प्रति ब्रूयादित्यर्थः। श्च्युतिक्षरणे। आ ततश्च्योतंतीति स्तोकाः बिंदवः। वपायां श्रप्यमाणायां तापवशाद्वपायाः ये बिं
प्रतंति ते स्तोका इत्युच्यंते। तेभ्यस्तदर्थं त्वं ब्रूहि इत्यर्थः। अथाह स्तोकेभ्योनुब्रूहीति श्रुतेः। अत्रापस्तंबः प्रादुर्भूतेषु
स्तोकेषु स्तोकेभ्योनुब्रूहीति संप्रेष्यति अलोहिनीं सुशृतां कृत्वा सुपीप्यजाउपधीरिति दक्षिणस्यां वेदिश्रोण्यां बर्हि
षि प्लक्षशाखायामासाद्य वपां श्रपणीभ्यां प्रवृत्य निधाय घृतवतीशब्दे जुहूपभृतावादाययेति। काठके च। प्रस्तो
ता सुस्तोकेभ्योनुब्रूहीति सेनां सुशृतां वेद्यां दर्भेषु दर्भेषु निधायेति॥ ॥शृतायां शृतायां प्रचरेत्याह प्रति प्र
स्थाता। शृतायां वपायां प्रतिप्रस्थाता प्रचरेत्याहाध्वर्युं प्रति। यदा शृता भवेत्तदाह प्रतिप्रस्थाता शृता प्रचरेति

अतत्वात्॥ अर्तवो। प्रचरत्वस्वाहाकृतिनिरित्तिप्रैषार्थः। शृतेप्रचरेति वपाद्वये। शृताः प्रचरेति बहुषु। ततोध्वर्युर्वपाया
स्तताभिघारंकरोति॥ ॥स्वाहाकृतिभ्यःप्रेष्येति। ततो वपांप्रतिप्रस्थातेवांतरायूपाग्नीप्रत्याहरत्ताकृतश्रात्वाल
समीपेआनीयवपाश्रपणीरस्थामेवभूमौनिधौदेति। ततोध्वर्युःआणदानं वपाश्रपणीस्थायाएवप्रियेणधाम्नेत्यासा
दनआलंभंकरोति। आपस्तंबेन तु आहवनीयस्यदक्षिणतएवनित्वादक्षिणात्वादक्षिणस्यां वेदिश्रोण्यांबर्हिषि प्र
क्षशाखायांवपायाआसादनमुक्तं। कठसूत्रेवोदगग्रेषुहोता पुनरप्यग्निर्होतेतिस्रुगासादनमंत्रंपठतित तोध्वर्यु
र्जुहूपभृतावादाय। तिक्रम्याश्राव्यस्वाहाकृतिभ्योथेप्रेष्यतिप्रेषणंमेत्रावरुणस्यकरोति। तच्चस्वाहाकृतिभ्यःप्रेष्य
त्येवं। स्रुवौदायाध्वर्यु रतिक्रम्याश्राव्याहस्वाहाकृतिभ्यःप्रेष्यतिवषट्कृतेजुहोतीतिअतत्वात्॥ ॥हुत्वा वपार्यमभि
घारयतिपृषदाज्यं। उत्तमंप्रयाजंस्वाहाकृतिंहुत्वाप्रथमं वपामभिघारयतिप्रयाजशेषाज्येन। ततः पृषदाज्यस्थाली
स्थोपृषदाज्यं। ततःस्रुवस्थवां हुत्वाचवपामेवाग्रेभिघारयत्यथपृषदाज्यमितिअतत्वात्॥ ततश्चायंक्रमःपूर्व
वपां। ततोध्रुवां। ततआज्यस्थालीं। ततःपृषदाज्यस्थालीं। ततःपृषदाज्यस्योपभृतमिति। पशावाज्यभागयागपक्षे
क्रमांतरमाह॥ ॥ध्रुवांप्रथममाज्यभागोचेत्। आज्यभागोचेदृपायांक्रियेत। तदाप्रथमध्रुवामभिघारय
ति। ततआज्यस्थालीं। ततोवपायां। ततःपृषदाज्यस्थालीं। ततःपृषदाज्योपभृतमिति। एवप्रदानक्रमेणाभिघारणं

कर्तव्यं। वेदभाष्ये यद्यर्थे। यदिआज्यभागोअत्रनिरूढेक्रीयेतेइति। अतएवनिरूढेआज्यभागयोर्विकल्पः। इदंवै
हविर्यज्ञमुत्तमेप्रयाजेध्रुवामेवाग्रेभिघारयति। तस्येप्रथमाज्यभागोहोष्यन्भवति वपांवा अत्रप्रथमपूर्होष्य
न्भवतीत्यत्रयागक्रमेणैवाभिघारणश्रवणात्॥ ॥अत्राज्यभागोकुर्वन्। पशावाज्यभागौकुर्वन्नेत्रवपायां
करोति। प्रेष्यप्रैषो। पशुपुरोडाशे चेद्यजप्रैषावेवभवत ः। तोचेसवविधेप्रतिषिद्धे। तोनप शौकरोतिनसोमइति
शाखांतरात्॥ स्वशाखायामपि। तंनसौम्येध्वरेनपशाविति श्रपणाच्चेहविर्यज्ञविधेनुपुनःश्रतिप्रसक्तो। तदाहुय
जेदाज्यभागोरइतियजेदित्याहुरितिअतत्वात्॥ अत्राहापस्तंबः। हुत्वात्याक्रम्यरोपणे वध्रुवा मभिघार्यपृष
दाज्यमभिघारयति। अथवेणमेतद्वाविपरीतंनोपभृतमाज्यभागोयजतितोनपशौकरोति। नसोमइत्यकेइति। क
ठकेच। स्वाहाकृतीरिष्ट्वाप्रत्याक्रम्याभिघारयंतिध्रुवांपृषदाज्यंवपांनोपभृतंतमाज्यभागाविष्टेति॥ ॥वप
याचरिष्यंनुपस्तीर्यहिरण्यमवधायवपामवद्यन्नाहेंद्राग्निभ्यांछागस्यवपायेमेदसोनुब्रूहीति। वपयाचरिष्यन्
जुह्वामुपस्तीर्यध्रुवायाःसकाशादुपस्तारंकृत्वा हिरण्यशकलमवधायवपामवद्यन्नाहइंद्राग्निभ्यांछागस्यव
पायेमेदसोनुब्रूहीतिप्रयोगोप्रदर्शनिमेतत्॥ तेनसौर्यपशुपक्षेसूर्यायछागस्येति। प्राजापत्यपशुपक्षेप्रजापतये
छागस्येतिप्रयोज्यं॥ ॥हिरण्यमवधायद्विरभिघारणंसोमे। वपावदानानंतरंपुनरुपरिष्टाद्धिरण्यमवधा

॥२७॥
॥देवयो० ६

यस्तोमे द्विरभिघारणं कर्त्तव्यं। निरूढे तु सकृदभिघारणमिति। अथाज्यमुपस्तृणीते अथ हिरण्यशकलमवदधा
त्यथ वपावद्य आहाग्नीषोमाभ्यां छागस्य वपायै मेदसोऽनुब्रूहीत्यथ हिरण्यशकलमवदधात्यथोपरिष्टाद्द्वि
राज्यस्याभिघारयतीत्यग्नीषोमीये सोमे द्विरभिघारणस्य श्रुतत्वात्। उपस्तृणीत आज्यं तत् पृथिव्यै रूपं करो
ति हिरण्यशकलमवदधाति। तदग्ने रूपं करोति वपामवदधाति तदन्तरिक्षस्य रूपं करोति हिरण्यशकलमवदधा स्य
ति तदादित्यस्य रूपं करोत्यथ यदुपरिष्टादभिघारयति तद्दिवो रूपं करोति सा वा एषा पंचावत्ता वपा भवतीति
निरूढप्रकरण एव सकृदभिघारणस्य श्रुतत्वात्। अत्राहापस्तंबः। जुह्वामुपस्तीर्य हिरण्यशकलमवदाय
कृत्स्नां वपामवदाय हिरण्यशकलमुपरिष्टात्कृत्वाभिघारयत्येवं पंचावत्ता भवति चतुरवत्तिनोपि पंचावत्तैव
स्यादिति। काठके चासिना वपां सकृदवदाय द्विरभिघारयेति। अतोऽखंडैव वपा सकृदेवावदेया। न द्विरिति।
आश्वलायनब्राह्मणे। यद्यपि चतुरवत्ती यजमानः पंचावत्तैव आज्यस्योपस्तृणाति हिरण्यशकलो वपा हि
रण्यशकले आज्यस्योपरिष्टादभिघारयति तदाहुर्यद्धिरण्यं न विद्येत कथं स्यादिति। तद्द्विराज्यस्योपस्तीर्य व
पामवदाय उपरिष्टाभिघारयत्यमृतं वा आज्यममृतं हिरण्यं तत्र सकाम उपाप्तोय आज्ये तत्र सकाम उपाप्तो। ॥२७॥

॥भोय्या० ६

य आज्ये तत्र सकाम उपाप्तो यो हिरण्ये तत् पंचसंपद्यत इति॥ ॥आश्राव्याहेंद्राग्निभ्यां छागस्य वपां मेदः प्रेष्य
ति। तत उत्थायातिक्रम्याश्राव्याहेंद्राग्निभ्यां छागस्य वपां मेदः प्रेष्यति मैत्रावरुणं प्रत्याह। एतदपि प्रयोगदर्श
नार्थमेवापक्षेसोयं आजापत्ययोरपि भावात्॥ ॥प्रस्थितमिति च प्रसुते। प्रसूस्थाने सुत्यायां सवनीये पशौ वपा शो २
मेदः प्रस्थितं प्रेष्येति। प्रस्तुतशब्देनात्र सवनीय एव गृह्यते। तद्धि कौरष्टु प्रस्थितशब्दः प्राप्तोपि सौमण्यां मु त्रा
ति॥ ॥ पसंहृतत्वादन्यत्र न भवती। हुत्वा वपाश्रपण्या वनुप्रास्यति प्राचीं विशाखां प्रतीचीमितरां … स्वाहा कृते इति।
वपां जुहोत्युत्तरतस्तिष्ठन् स्वाहा कृते ऊर्ध्वनभसमिति मंत्रेण वपाश्रपण्यावाहवनीय एवानुप्रास्यति अनुपश्चा
त्प्रक्षिपति। तौ प्रत्युयादध्वर्युरेवा। तयोः प्रक्षेपप्रकारमाह वि शाखां द्विशृंगां प्राचीं प्रागग्रां प्रास्यति। इतरा
म विशाखाम् एकशृंगां प्रतीचीं प्रत्यगग्रां प्रक्षिपति। हुत्वा वपां … समीचीवपाश्रपण्यौ कृत्वानुप्रास्यति स्वाहा
कृते इति श्रुतत्वात्। समीचौ संगते परस्परं संलग्ने कृत्वानुप्रास्यत्याहवनीये उत्तरतस्तिष्ठन् प्रतिप्रस्थाता हवनी
य वपाश्रपणी प्रहरति स्वाहोर्ध्वनभसमित्यापस्तंबः। वपानेकत्वे स्वाहा कृता ऊर्ध्वनभसं मारुतं गच्छतमिति वि
परिणामः॥ ॥चात्वाले मार्जयंते सपत्नीका इदमापः प्रवहतेति। ततः सपत्नीकाः सयजमानाः सर्वे ऋ
त्विजश्चात्वाले मार्जयंते इदमापः प्रवहतेत्यनेन मंत्रेण। अथ चात्वाले मार्जयंत इति श्रुतत्वात्। चात्वाले इति

॥२८॥
॥देवया० ६

समीपसमसमीस्वात्वात्समीपे मार्जयंते। मृजुषः शोचालंकारयोः चौरादित्वात्स्वार्थे णिच्। अद्भिरात्मान
शोधयंति। अभ्युक्षतीत्यर्थः। मंत्रलिंगादेवाद्भिर्मार्जनं कर्तव्यमिति गम्यते। पत्न्यपि मंत्रेणैव मार्जनं करोति।
क्वचित्समिदाधानादौ पत्नी गार्हपत्ये तूष्णीमिति फलदर्शनात्। पूर्वं ब्रह्मादयः षडृत्विजस्ततो यजमानस्त
तः पत्नीति। अनेकयजमानके सर्वे यजमानाः सर्वाः पत्न्यश्च मार्जनं कुर्वंतीति॥ ॥६॥ ॥विशास्ति पशुमन्यः॥
इदानीमिदं विचार्यते। पुरुषाणामित्युक्तत्वात् पशुसंज्ञपनमस्ति किमृत्विजामेव कश्चित्करोति उतर्त्विग्भ्योन्यः
कश्चिदिति तत्र सूत्रकार एव पक्षं परिगृह्णाति विशास्ति पशुमन्य इति। पशुहिंसायामृत्विग्भ्योन्यः कश्चिच्छ
शामितैव संज्ञः पशुं विशास्ति हिनस्ति मारयतीत्यर्थः। कुत एतत्। संज्ञाभेदात्। शामितैनं कंठे बध्वा नयतीति। सं
ज्ञाभेदाच्च संज्ञातोपि भेदो भवति यथा चैत्रादन्यो मैत्र इति। अतो ब्रह्मादिभ्योन्य एव पशुं विशास्तीति प्राप्ते आह॥ ॥
ऋत्विजां वैको प्रत्यक्षत्वाच्छामित्रे। वा शब्दः पक्षव्यावृत्तौ। ऋत्विजामेव यः कश्चिदेकः पशुं विशास्ति हिनस्ति।
कुतः शामित्रे शामितुः कर्मणि मारणे। चेदृत्विग्व्यतिरिक्तः स्यादन्यस्य शामितुरप्रत्यक्षत्वात्। अनुक्तत्वात्। ननु
संज्ञाभेदादन्यो विशास्तीत्युक्तं सत्यं। यौगिकी संज्ञा भविष्यति। ऋत्विजामेव यः शमनं करिष्यति स एव ॥भाष्य॥
शामिता भविष्यति अतः ऋत्विग्व्यतिरिक्तस्य शामितुरनुक्तत्वात्कश्चिदृत्विगेव पशुं विशास्तीति सिद्धं॥ ॥ ॥२८॥

उपगादर्शनाच्च। होइत्यृत्विज उपगायोरमिति यजमान इत्यत्रर्त्विजामेवोपगानदर्शनाच्चैवमवसीयते।
तदृत्विजामेवैकः पशुं विशास्तीति। यथा ऋत्विग्व्यतिरिक्तानामुपगातॄणामप्रत्यक्षत्वादृत्विज एवोपगा
तारः। एवं शामितापीत्यर्थः। ननु होइत्यृत्विज इत्यादिको विधिरेव दर्शनमिति चेत्। तथाध्वर्युरुपगायतीत्य
ध्वर्योरुपगानप्रतिषेधादितरर्त्विजोरुपगानं भवतीति गम्यते केचिदेवमेव सिद्धांतं मन्यते। अपरे त्वेवमा
हुः। अन्यस्याप्रत्यक्षत्वात् कश्चिदृत्विगेव शमनयोगात् शामिता भविष्यतीति। तन्नायतः अतो ऋत्विग्व्य
तिरिक्तः शामिता प्रकल्पितो दृश्यते। शामितैनं कंठे बध्वा यंचं नयति। तथा श्रुतं पूर्हविः शामिता इरिति चानेन
त्तं यौगिकी संज्ञा। तेन ऋत्विजामेव कश्चित् शमनं कुर्वन् शामिता भविष्यतीति। तन्न। सर्वेषामृत्विक्षु स्वस्वकर्मणि
व्यापृतेषु शामितृशब्दश्रवणात् अन्य इति गम्यते तथा हि। आल्मुकमादायाग्नीत्पुरस्तात्प्रतिपद्यते। शामितेनं थो
कंठे बद्धोदंचं नयति। तं वपाश्रपणीभ्यां प्रतिप्रस्थाता अन्वारभेत प्रतिप्रस्थातारमध्वर्युरध्वर्युं यजमान इति। मैत्रा
वरुणो धिष्ण्येषु होता वाध्नीगो। ब्रह्मा च दक्षिणत आसीनः होताहृत प्रत्यवेक्षणे। एवं सर्वर्त्विक्षु व्यापृतेषु
शामितृशब्दश्रवणावश्यं पतेनर्त्विग्भ्योन्येनैव भवितव्यं। उपगादर्शनं वा प्रत्यक्षविषयं। अत्र त्वं हेतुर्नास्ति
अपि च संज्ञपने ऋत्विक्कर्तृके सति समाख्यया तदध्वर्योः प्राप्नोति। तदा च शामित्रेध्वर्युसंवादे इदं न्यायपद्यते॥

अनेनाध्वर्युर्न भवति शमिता तदन्यो भवतीति। तस्मादन्यः शमितेति॥ ॥अपराव्याख्या। शमितेति सं
ज्ञाभेदात्पशुमारणमसंदिग्धं अन्य एव करोतीति। अतो विवर्त्तनं चिंत्यते। किमृत्विजामेकः कुर्यादुतान्य एवेति।
तत्र पूर्वपक्षमाह॥ ॥विशास्ति पशुमन्यः। ऋत्विग्भ्योन्यः पशुविविवर्त्तनं करोति। अतो मारणे शमितुरप्रव
र्त्तत्वात् द्विवर्त्तनमपि स एव करोतीत्येवं प्राप्तोसि द्धांतमाह॥ ॥ऋत्विजां वेको ऽप्रकृतत्वात् शामित्रे वा श
ब्दः पक्षव्यावृत्तौ। शामित्रे विवर्त्तनं कर्मणि ऋत्विजामेवैकः कश्चन कर्त्ता स्यात्। नान्यः। अन्यस्याप्रक्षप्तत्वात्।
अनुक्तत्वात्। न ह्येवं क्वचायुक्तमस्ति यत् शमिता विवर्त्तनं करोतीति। यत्रान्यस्य कर्तृत्वं नोच्यते तत्र ऋत्विजामेव
कर्तृत्वं भवति। तथैकनिनयते स्पत्रान्येषामप्रकृत्वाद ऋत्विज एवैकः ग्निध नो भवति। उपगादर्शनाच्चेत्ति पूर्वव्या
ख्यायं अस्मिंश्च व्याख्याने इदं विरुध्यते। यत् दैव्याः शमितार उ तच मनुष्या आरभध्वमित्यस्मिन्निगुप्रै
षे विवर्त्तने शामितासंबोध्यते। एकधास्य त्वचमाध्यतां दित्यादिनू॥ ॥विक्रयी त्वन्यः शूद्रसंयोगात्। विक्र
यी सोमं विक्रय्यपि ऋत्विजामेव कश्चिद्भविष्यतीत्याशंक्य तु शब्देन निराक्रियते। विक्रयी ऋत्विग्भ्योन्य एव भवति।
न त्विमध्ये कश्चित्। कुतः। शूद्रसंयोगात्। पक्षे शूद्रस्यापि सोमविक्रयित्वेन संयोगात्। कौत्सः शूद्रा
दो सोमं विक्रीणातीति। शूद्रश्चनिः संदिग्भ्योन्य एव। तस्मात्कौत्सोन्य एव॥ ॥अंगान्यवद्यत्यभंजन्। ततः

दो स्वं गः

पशुशरीरादध्वर्युरंगानि हृदयादीन्यवद्यति। अवद्यंडने। शरीरात्पृथक्करोतीत्यर्थः। किं कुर्वन् अभंजन्। अं
गानां हृदयादीनां भंजनं छेदनमकुर्वन्। सकलान्येवावद्यतीत्यर्थः। गात्रं गात्रमस्यानूनं कृणुतादिति स
माम्नातत्वात्। अविशेषात् सर्वांगानामवदाने प्राप्ते आह॥ ॥हृदयं जिह्वा क्रोडं सव्य सक्थिपूर्वनडकं
पार्श्वे यकृद्वृक्कौ गुदमध्यं दक्षिणा श्रोणिरिति जौहवानि॥ ॥एतानि हृदयादीनि जौहवादीन्यवद्यति। जौह
वादीनि जुह्वामवदानयोग्यानि प्रधानयागसाधनानीत्यर्थः। हृदयमाम्रफलसदृशं जिह्वा रसना। क्रोडं वक्ष
भुजांतरमित्यर्थः। सव्यसक्थिः सव्यबाहोः पूर्वनडकं प्रथमं नडकं अंसादधो वर्त्तमानं अवद्यति। द्वे अपि पा
र्श्वे दक्षिणं सव्यं च। एकैकं त्रयोदशवक्रात्मकं। षड्विंशतिरस्य वक्रयस्ता अनुष्ठ्यो आव्यावयतादित्य[illegible]युक्ती
षे उक्तत्वात्। वक्रे योवक्राणि पार्श्वानि। रक्तकालेयं। वृक्कौ कुक्षिस्थौ गोलकौ महदामलकतुल्यौ। [illegible]काल
दति धूर्त्तस्वामिनः। गुदस्य मध्यं येन शरू न्निर्गच्छति तद्द्विषमं त्रेधा कृतं तस्य यो मध्यो भागो न स्थूलो न च ते[illegible]
जुह्वामवद्येत्। दक्षिणा श्रोणिः। कटी दक्षिणापरसक्थ उपरि वर्त्तमानो मांसलः प्रदेशः। श्रोणिर्दक्षिस्फिकू इति
धूर्त्तस्वामिनः। स्त्रियां स्फिजौ कटिप्रोथावित्यमरः। एतान्यवद्यति। अथोपभृत्यवदेयान्याह॥ ॥दक्षिणस
क्थि पूर्वनडकं गुदतृतीया णिष्ठं सव्या श्रोणिरित्यौपभृतानि। दक्षिणस्य सक्थ्नो दक्षिणस्य बाहोः पूर्वनडकं

त्वा मध्य
ण

॥३०॥ ॥दैवयनिना ६

यमनलकमंसाध नेवावस्थितं। यथा गुदस्तृतीयाणिष्ठं। गुदस्योत्रस्य योनिष्ठो तिदक्षिणापुतिहु सस्तृतीये
भागः। सव्याचश्रोणिरुत्तरापरस्यत्के उपरि भवो मांसलः प्रदेशः कटिशब्दवाच्यः। एतानि त्रीण्योपभृतानिउप
दत्संबंधीनि स्विष्टकृद्दवदानानीत्यर्थः। एतान्यप्यभंज्यन्नेवद्यति पशुदेहोत्स्थक्तेत्यगल्ह्लाति॥ ॥वार्षि
ष्ठमुपयज्वः। अतिशयेनमहद्वर्षिष्ठं॥ यद्वर्षिष्ठं मरुद्दस्तृतीयं अतिस्थूलं तदुपयज्ञ उपयद्वोमा
र्थमवद्यति। स्वच्चिमोपयज्ञ इति श्रुतेः॥ ॥अवदानकालेप्रभागः। गुदस्तृतीयस्य प्रभागः प्रकर्षेणाभा
गोवर्षिष्ठमध्याणिष्ठभागेनविभजं सोवदानकाले भवति। शुक्लाम वदानकालेत्यर्थः। नेदानीं इदानीं तु
समग्रमेवाविभंगुदमवद्यति। अवदानकालएवत्रेधाविभज्यावदानश्रवणात्॥ ॥वनिष्ठु जाघ्न्यं नी
चावद्यति। वनिष्ठुः स्थूलांत्रं। जाघनी जघनप्रदेशो भवा। पुच्छदंड इत्यर्थः। जाघनी पशोः पुच्छं इति हरिस्वामिनः।
जाघ नीबालदंड इति माधवाचार्यः। जाघनीयेन मशकानपनयतीति धूर्त्तस्वामिनः। जाघनी बालधि
रुच्यत इति ज्ञानदीपिकाकारः। क्षुधार्त्तश्वानुमात्यागाद्विश्वामित्रः स्वजाघनीं। चंडालहस्तादादाय धर्माधर्म
विचक्षणः। इत्यत्र स्वजाघनीं स्वपुच्छमिति स्मृतिचंद्रिकाकारो व्याख्यातवान्। जाघनीपशोः पुच्छमित्यधिक
रणमालायां तृतीयेध्याये जाघनीं चैकदेशत्वादित्यधिकरणे। जाघनी कटी इति पितृभूति हरिहरौ। तदस्य

॥३०॥ ॥भाष्य ६

गा २

तो। कटिशब्दस्यश्रोणिपिपर्यायित्वात्। श्रोण्योश्च प्रागुक्तत्वादिति। अतः पुच्छकांडमेव जाघनीशब्देनोच्यत इत्य
र्थः। सा च पत्नीसंयाजार्था। वनिष्ठुर्नावदानं॥ क्लोमप्लीहाध्वरधी पुरीततं न्वेच्छन्। क्लोमो गलनाडिका। प्लीह इ
तियः प्रसिद्धः। अध्यूध्नी शततुटः। ऊधस उपरि भवति। पुरीतदिति हृदयं प्रच्छादितं येन मांसेन तदुच्यते। हृ
दयं तत्पुरीतता प्रच्छादयतीति श्रुतत्वात्। एतानि क्लोमादीनि भागावदानानीच्छन्नवद्यति। अतश्चैतेषां भागा
वदानानां विकल्प इति प्रागुक्तमेव॥ ॥उदरमेदो वशिष्टं गुदे प्रास्यति कृशश्चेत्॥ ॥पशुश्चेद्यदि क्लेशो
दुर्बलः स्यात् तदा अवशिष्टं मेदो ग्रहणे क्रीयमाणो यन्न गृहीतं तद्गुदे प्राश्यति श्रोत्र मध्यप्रवेशयतीत्यर्थः॥
सहत्वेव पशुमालभेत यएनं मेधमुपनयेद्यदि क्लेशः स्यादुदर्यस्य मेदसः परिशिष्येत गुदे तत्ववेदिति
श्रुतत्वात्॥ यएनं पशुमेधमुपनयेत्प्रापयेत् स एव कुशलोध्वर्युः पशुमालभेत नान्यो जड इत्यर्थः। यदि
स एष पशुः कृशः स्यात् तदा यदुदर्यस्य उदरे भवस्य मेदसः किंचित्परिशिष्येत वपायामवदायमानायां तं
गुदे प्रक्षिपेत्। कृषिगतौ निपूर्वो निक्षिपे वर्त्तते। न क्षिपगमने इत्यर्थः॥ ॥श्वभ्रेऊवध्यमवधाय तस्मिन्लोहि
तं रक्षसामिति। श्वभ्रे गर्त्ते शामित्राद परस्यां दिशि उत्तरा उत्तरस्यां वर्त्तमाने ऊवध्यं पुरीषं तुल्लीमवधाय रक्ष
सां भाग इत्यनेन मंत्रेण तस्मिन्नूवध्ये लोहितं पशोरुधिरं प्रास्यति प्रक्षिपति अथो एवा सृक्यशोरक्षसां भागो सि

॥३१॥
॥ दे० १६

तिश्रुतत्वात्। अत्रेदं रक्षो भ्यइति त्यागोनुष्ठेयः। उदकोपस्पर्शनं च॥ ॥शूले हृदयं प्रतद्यशामित्रेश्रपयति। शूले हृदयं प्रतद्य प्रोतइत्वा शामित्रेग्नौ श्रपयति। तस्मादुपरिष्टाद्धैव शूलां कुर्यादिति श्रुतेः॥ तस्मात्तु ऊ इति वाक्यपूरणः। परितृप्येव शूले न भित्वा ततो हृदयशूलां कुर्यात् शूले श्रपयेदित्यर्थः। शूलात्पाकुइति शूलं द्वात्तुडा न्अत्ययः पाकवाचनिकरोतो भवति। साम्नाय्यं विकारादुखायां श्रपणोप्राप्तेश्चेनात् शूले शूलं चवारणमरत्निमात्रं। साम्नाय्यापास्थ्येनापन्नत्वा च्चद्योरसीति मंत्रेण तस्य शूलस्यादानेश्र धिश्रपणं त्वर्थलुप्तं यजमानेनान्वारब्धे यं पार्श्वतः पशुषायाः पार्श्वएव शामित्रेश्रपयेदित्यर्थः॥ ॥पशुं चोखायां। पशुं पश्चवदानानि हृदयव्यतिरिक्तानि सर्वाण्युखायां श्रपयेत्। अत्रापि पशोः साम्नाय्यधर्मप्राप्त्या तच्छ्रपणार्थायाउखायाः साम्नाय्योपाधमप्राप्तिः। अतश्च घौरसीसादानां मातरिश्वन इति मंत्रेण शामित्रेधिश्रयणं। अन्वारब्धे यजमाने मांसानां प्रक्षेपइति। चकारात्पश्रुमपि शामित्रएव श्रपयति। अथ यमेतदुदं चेपश्रुपणायाहरती ति श्रवणात्। पशुश्रपणइति समाख्यानाच्च॥ ॥पशुदेवतायेपुराडाशएकादशकपालः। अत्र पशुदेवतायेएकादशकपालः पुरोडाशो भवति। यद्देवत्यः पशुर्भवति तद्देवत्यपुरोडाशमनु निर्वपतीति श्रुतत्वाद्यद्देवत्यः पशुस्तद्देवत्यएव पशुपुरोडाशो भवति सएकादशकपालोभवति। कुतः॥ अग्नीषोमीयपशुपुरोडाशस्यैकादशकपालत्वेस्ति चस्तत्प्रकृतित्वाच्चैयाग्न्येकादशकपालइति

शूले हृदयप्रतर्दनमिति पार्श्वतएवैनत्काष्ठे प्रत्यग्रपयेदिति श्रु तत्वात्॥ काष्ठे प्रत्यग्यश्च तद्धद ८

॥३१॥
॥ भाष्ये ॥

प्राप्तेआह॥ ॥अग्नीषोमीयो वा विशेषोपदेशात्। वाशब्दः पक्षव्यावृत्तौ। अयं निरूढपशोः पुरोडाशो एकादशकपालो न भवति। न अग्नीषोमीय एवैकादशकपालः। कुतः। विशेषोपदेशात्। येनाग्नीषोमीयएव विशेषेणैकादशकपालं नोपदिश्यते। तस्य चपयाप्रचर्याग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपतीत्यभिधेचनीये नचसर्वपशुषुपुरोडाशोग्नीषोमीयपशुपुरोडाशविकारः। किं तर्हि पौर्णमासाग्नेयाग्नीषोमीयादिपुरोडाशविकारएव। ततश्चैकद्विशाद्वपरिमाणत्वात् उक्तप्रकारेणैव हपुरोडाशकपालसंख्यानैकादशकपाल इति। ततश्चैन्द्राग्नो द्वादशकपालः सौर्यप्राजापत्यो वा एककपाल इति सिद्धं। इदानीमिदं विचार्यते। प्रकृतावाहननहविष्कृदाह्वानयोरेककालत्वमुक्तं। स यत्रैषहविष्कृतमुद्वादयति तदेको दृषदुपले समाहन्तीति हेहविष्कृदाह्वानं चावघातार्थं। अवघातश्चौषधधर्मत्वात्पशुपुरोडाशएव भवति। तेन तदर्थं हविष्कृदाह्वानमप्यत्रैव भवति। नपतत्सहचरितत्वादाहननमपि किमत्र भवतिउत पशुपात्रप्रोक्षणं तएवेति। संदेहस्तत्रकारएवापनयति॥ ॥अत्रैव हविष्कृदाह्वाननिज्यैकत्वात्॥ अत्र पशुपुरोडाशे केवलं हविष्कृदाह्वानमेव भवति। नोहननं। तत्र पाशुकप्रोक्षणानंतरमेव भवति। कुतः। इज्यैकत्वात्। आहननस्य हि पश्विज्यासहैकवाक्यत्वेन पुरोडाशेज्यया हविष्कृदाह्वानस्य च पुरोडाशेज्ययैकवाक्यत्वेन पश्विज्यया। अतोऽत्र केवलं हविष्कृदाह्वान

॥३२॥
॥देव्या०६

मिवकर्त्तव्यं नाहनन मिति॥ ॥अवद्यन्नाहेंद्राग्निभ्यां पुरोडाशस्यानुब्रूहीति॥ ॥अत्र प्रणीता प्रणयन प
रिस्तरणात स्य पत्नीसंनहनात्वादुपर्युक्तं शूर्पादिपात्रासादनहविर्ग्रहणप्रोक्षणादि उनपेषणश्रपणपात्रेगुल्तिप्रक्षा
लनानिनयनपात्रीसंमार्गानिंतरस्रुचांसनप्रोणादानाद्योल्लंभनांतं कृत्वा एते होरमैत्रावरुणावितितावंमैत्र्यस्रुचा
वादाय जुह्वां सुप स्तीर्य पुरोडाशस्यावद्य त्सिनअवदानरवं उनकुर्वन्नमैत्रावरुणं प्रतीमंप्रेषमाह। इंद्राग्निभ्यां पु
रोडा शस्यानुब्रूहीति। अत्र वचनात्स होतुर्वाचनंद्रव्योच्चारणं च। इंद्राग्निभ्यामित्येततुप्रयोगत्रि ष्यार्थं नपरि
संख्यार्थं। तेन सूर्याय पुरोडाशस्या प्रजापतये पुरोडाशस्येत्यपि तत्पक्षे भवति॥ ॥उपभृति चावद्यति स्वि
ष्टकृते॥ अत्र जुह्वां सुप भृति चोपस्तीर्य स्रुक्षां मध्यात्पूर्वार्धाच्चावदायाभिधार्य विदानेप्रत्यभिधार्य तत उपभृति
स्विष्टकृते द्विरवद्यति। उत्तरार्धात्सकृदवद्यति। उत्तरार्धात्सकृदवदान उपरिष्टाद्द्विरभिघारणं। प्रत्यभिघारणाभाव
इतिवेतरर्थः। चकारात्प्रधानावदानानंतरमेव प्राक्प्रधाना त्स्विष्टदर्थमुपभृत्यवदेयं। कालांतरे ऽवदानविधाना
दुपभृत्यवदाना च स्विष्टकृदस्येव सतः स्विष्टकृदित्युक्तं॥ ॥इंद्राग्निभ्यां पुरोडाशमिति प्रेष्यति। एवंद्वयोः स्रु
चोरवदायेत्याश्रावयति क्रम्यादिव्य इंद्राग्निभ्यां पुरोडाशं प्रेष्येत्येवं मैत्रावरुणं प्रेष्यति। इदमपि प्रयोगं शिक्षार्थं मेव
ते न पक्षे सूर्याय पुरोडाशं प्रजापतये पुरोडाशमिति भवति॥ ॥कृत्वा समानीयाग्नये प्रदाय इडामवद्यतीति॥

॥३२॥
॥श्रौष्य०६

मा२

वक्ष्यमाणेन संबंधः। प्रधानावदाने स्रुक्स्थे कृत्वोपभृति यदवत्तं तज्जुह्वां समानीय निर्गुणायाग्न येत प्रद
य इडां प्राशित्रादिकमवद्यति ननु कथमसति श्रुतिवचने निर्गुणायाग्नये प्रदानमुच्यत इत्याशंक्याह॥ ॥
सगुणस्थाने ऽगुणः सर्वविकार एकत्वात्॥ होत्रे सौविष्टकृते प्रदाने आग्नेय्यो याज्यानुवाक्ये निर्गुणे समा
म्नाते। स्विष्टकृतः प्रैषोपि प्रैषाध्याये निर्गुण एवाग्निर्देवत्यः पठ्यते। अतश्च यः सगुण स्विष्टकृतः स्थाने यो
ऽगुणो निर्गुणः स्विष्टकृदुक्तः स युक्त एवाय तो होत्रे वेदे याज्यापुरोनुवाक्याप्रैषेषु यः स्विष्टकृतो विकारः निर्गुणता
रूपः स सर्वविकारः सर्वेषामपि विकार एवाध्वर्युणामपि तथैव भवति। कुत एतत्। एकत्वात्। एक एवायं स्विष्टकृद्या
गः ऋग्वेदे स्वविहितः। एकत्वाच्च समानदेवताकेन भवितव्यं। इतरथा क्वचित्सगुण इत्युक्तमिव स्यात्। तस्मा
त्सगुणस्थाने ऽगुण इति साधुरेवोक्तं॥ ॥यथाम्नातं वा वेदविभेदात्॥ अथ वा यथाम्नातं स्विष्टकृद्याग
स्यात्। न सर्वेषां विकारः। यस्य तथा भवति न होत्रे वेदे न चोदकप्राप्तस्य स्विष्टकृद्गुणस्य लोप इति अतो याज्या
नुवाक्याप्रैषेषु निर्गुणस्यात्। अनुवाचने प्रैषे च सगुण इति। कुतः। वेदविभेदात्। वचने भेदादित्यर्थः। अन्यद्धि प्रै
षानुवाचन वचनं। अन्यच्च याज्यानुवाक्याप्रैषाणां तत्रैव च गुणनिषेधो नानुवचनादौ। तस्माद्याज्यादावेव नि
र्गुणो नानुवचनादिष्विति। कर्कस्यायमेव सिद्धांतः। अपरे त्वाहुः। अत्र शाखांतरे श्रूयते। अग्निराजतीति। तेन या
ग एव निर्गुणोग्निर्विहितः। अतो यो यागे निर्गुणोग्निर्विहितः। स सर्वविकारो भवति। सर्वेषां होतॄणामध्वर्यूणां च

॥३३॥
॥दे०वे०या० ६

विकारो भवति॥ कुतः एकत्वात्। ततोनुवाचनप्रैषयाज्यादिषेक एवायमग्निः न भिन्नः। एकश्चेत् क्वचित्सगुणः क्वचिदगुण इति न विरुद्धरूपता महतीति। तस्मात्सर्वत्र निर्गुण एवेति सिद्धांतः। जैमिनिनापि दर्शमेनिर्गुणएव सिद्धांतितोस्ति। यथाम्नातं वेत्ययं तु पूर्वः पक्षः॥ इडामवद्यति। इडाग्रहणं प्राशित्रभागादीनामप्युपलक्षणार्थं प्रिष्टकृतितः प्राप्तस्य लोपे वचनाभावात्। ततश्च निर्गुणः स्विष्टकृद्यागानंतरं स्रुचो निधाय संचरात्सुक्षण वर्जं प्राशित्रावदानादिभागपरिहारात् यथाश्रुतं कर्तव्यं। पवित्रप्रतिपत्ति वर्जं स्यात्तु पश्चिडामार्जनोत्तरकाले कर्तव्या॥ अथेदं विचार्यते। पशुपुरोडाशस्य चोदनासारूप्याद्दार्शपौर्णमासिका धर्माः प्राप्ताः तत्रोद्धरणादिनमः कृतायेत्यतोः सर्वे धर्माः किं पृथग्भवंति। उत नेति। तत्रास्त्वेकारएव पक्षं स्वीकरोति॥ ॥अक्रियान्यस्यसमानर्थत्वात्। अत्र पशुपुरोडाशोप्राग्युक्तान्त्रधानस्विष्टकृद्यागादन्यस्योगादुकारकस्याग्नेन्वाधानादेरंगजातस्याक्रिया भवति। कुतः समानर्थत्वात्। सदृशार्थसाधकत्वादित्यर्थः। यादृशमेवोपकारं पशोः प्रयाजादीनि कुर्वंति पश्चादनुष्ठितान्येवैतादृशमेव पशुपुरोडाशोपीति। अतः पश्चार्थमेवानुष्ठितानां प्रणीताकुक्कुटाहननस्फ्यादक्रहाराघारप्रयाजान्यभागानुयाजादीनामादुपकारकाणामगृह्यमाणविशेषत्वात् पशुपुरोडाशोप्युपकार प्रसंग इति। सन्निपत्योपकारकाणि तु पात्रासादनग्रहणके डनेषेपणाश्रपणादीनि पृथगेव भवंति। अथास्वरूपासिद्धेः अत एवोक्तं शारवायनेन पश्चयानिविभवार्थं साधयतीति॥ ॥
अथवासामर्थत्वादित्येत्वदेवव्याख्येयं। सत्येवाग्न्यन्वाधानादीन्यंगानि पशुप्रयुक्तानि यएवचपशुपुरोडाशस्याग्न्य ॥३३॥
॥पशव्य० ६

धानार

न्वाधानादि निरर्थं। तेनैवार्थेनैतानि पशूनाप्रयुक्तानि तस्मात्तान्येवप्रसंगादुपयुज्यते। यत्र प्रयुक्ते पशुनात्पुरोडाशस्य स्वसंनिधौ प्रयोजयति। यथा सवविधे प्रणीताप्रणयनाज्यभागादि यथा त्रैवप्रालभणतपणकमपि वर्गादि। यद्येवं स्विष्टकृदिडान्याप्यक्रिया प्राप्नोतित त्राह॥ ॥न चोदनाभेदात्। न स्विष्टकृदिडस्याक्रिया। कुतः चोदनाभेदात्। इष्टकामपशोः संवत्सरसंपत्प्रधानेवाक्येभिन्ने स्वि ष्टकृच्चोदने दर्शयिति। द्वावाघारौ द्वौ स्विष्टकृतावितिति। तथा दक्षिणानयनक्रमेन विधि परे वाक्ये पृथक्पुरोडास्येडादर्शयति। इडामेव कुर्यात्पुरोडाशोडायामेवोपहूतायां दक्षिणानयेदिति। दर्शनमात्रमेवतत्। प्राप्तिस्तूत्तरेणसूत्रेण॥ ॥कालगुणभेदाच्च॥ अस्तिवचनान्यायोयेन स्विष्टकृदिडं भेदेन क्रियते। कुतः। कालभेदाद्गुणभेदाच्च। अन्यकालः पाशुकः स्विष्टकृत्। अन्यकालः पशुपुरोडाशस्य। अन्यकालापाशुकी। अन्यकालाच पुरोडाशस्य तस्मात्युक्तं यद्भेदइति। तथा सगुणेयाज्यानुवाक्ये पशुस्विष्टकृते निर्गुणेच पशुपुरोडाशस्विष्टकृत इति॥ ॥अपराव्याख्या॥ न चोदनाभेदात्। यदुक्तम क्रियान्यस्येति चेन्न। कुतः। चोदनाभेदात्। विधिभेदात्। भिन्नेह्येते चोदने। एकापशुचोदना अग्नीषोमीयमजमालभेतेति। अपरापशुपुरोडाशचोदनातद्देवत्यं पशुपुरोडाशमनुनिर्वपतीति। यत्रपुनरेकेनोपादायबहूनां फलविधानं यथामित्रविंदया आयुः कामोयजेतेति।

॥३४॥
॥देवया॰६
या३

तंत्रे पादे यत्नेन विधानात् तस्मा हि सविवक्षायां युगपदंगोपकारापेक्षा। तेनागृह्यमाणविशेषत्वात् संनिधाना विशे
षाच्च तंत्रेणांगोपकारसंबंधः॥ इह पुनश्चोदनाभेदादेतन्न संभवति। किंच॥ ॥कालगुणभेदाच्च॥ अन्यस्मिन्का
ले पशोः प्रयाजाः कृताः अन्यकालस्य पुरोडाशस्य कथमुपकारं कुर्युः। अथवा कालभेदात्तु। अन्यकालः प
शुः। अन्यकालः पुरोडाश इति। तथा गुणभेदात्। एकादशसंख्यागुणकाः प्रैष्यप्रैषाश्च पशोः प्रयाजाः।
पंचसंख्यागुणकाः प्रयाजप्रैषाश्च पुरोडाशस्य। तथा एकादशसंख्यागुणकाः पृषदाज्य द्रव्यकाः प्रैष्य
प्रैषाश्च पशोरनुयाजाः आज्यद्रव्यकाः यजप्रैषास्त्रयः पशुपुरोडाशस्य। अतश्चोदनाभेदात् कालभेदात् गुण
भेदाच्च। तंत्रेणांगोपकारो न संभवतीति। पूर्वपक्ष एवाचार्येणापश्चादुक्तः। सिद्धांतस्त्वक्रियान्यस्य समाना
र्थत्वादित्ययमेव। यदुक्तं चोदनाभेदात् कालगुणभेदाच्च तंत्रेणोपकारसंबंधो न भवतीति। अत्र ब्रूमः॥ मा भू
त्तंत्रेणोपकारसंबंधः। प्रसंगन्यायेन भविष्यति। तथा हि अंगोपकारस्य द्व्याम्नानासामर्थ्यादितत्पदार्थसमनंतर
प्रधानसह संबंध इष्यते। अन्यथांगप्रधानयोः संगतिरेव न स्यात्। यदांगानि प्रयाजानुयाजादीनि क्रियंते
न तदा प्रधानानि प्रधानकाले चानंगानीति यद्येवं नांगीक्रियते तर्हि प्रधानयोगेषु तदुत्तरकालीनानाम
नुयाजाद्यंगानां केन सह संबंधः स्यात्। तस्मात् प्राच्योदीच्यादि सर्वांगोपकारार्थं सर्वांगत एव संबंधोंगीक

॥३४॥
॥भाष्ये॰६

र्त्तव्यः एवं च सति यद्यप्यत्र चोदनाभेदः तथापि प्रयोगोपाधानादिजनितमपूर्वं अगृह्यमाणविशेषं विद्यमानत्वा
त्पशुपुरोडाशस्याप्युपकारं करोत्येव। यथा व्रताद्यर्थमुज्वालितो दीपो ऽन्यार्थोपि शिष्यादीनां पुस्तकादिविलोक
नार्थोपि भवति। अतश्चोदनाभेदोत्राकारणं। तथा कालभेदाद्गुणभेदाश्च। तस्मात् साधूक्तमक्रियान्यस्य समा
नार्थत्वादिति। अन्ये त्वेवं व्याचक्षते। अक्रियान्यस्य समानार्थत्वात्। सन्निपत्योपकारकांगयुक्तपशुपुरोडाशे
यागादन्यस्यादृष्टार्थस्यांगस्यात्र पशुपुरोडाशे क्रिया। अकरणं। कुतः। समानार्थत्वात्। पशौ क्रियमाणानामा
ज्यभागादीनां साधारणार्थत्वात्। साधारणानि ह्युभयोरेतान्यंगानि उभयार्थानि न पुरोडाशस्य प्रासंगिका
नि। समानतंत्रोयं पशुपुरोडाशो न प्रासंगिक इत्यर्थः। अतः प्रासंगिकत्वाभावात्त्रेडांतमेव कर्त्तव्यं। न सवनीयवच्छेषस
माप्तिः। अत एवाहापस्तंबः। इडांतः संतिष्ठत इति तेनापि पिष्टलेपहोमराक्षसभागब्राह्मणतर्पणप्रैषब्राह्मणतर्पण
कमपि वर्गाः प्रागुक्तांगक्रमेणैव भवंति अंगानां समानसंबंधात्। न सवनीयानामेवेडांतं नैकसमाप्तिरिति॥
जैमिनेस्तु प्रासंगिक एव पशुपुरोडाशः। तन्मते पशुपुरोडाशसंबंधं पिष्टलेपहोमादिकमपि वर्गांतमिडांत एव कर्त्तव्यं॥
पश्वंगैरसंबंधात्। अत्राहापस्तंबः। पशुपुरोडाशस्य पात्रसंसादनादिकं न प्रतिपद्यते। यथार्थं पात्रनियोगो निर्वपण
काले व्रीहिमयं पुरोडाशं निर्वपत्येकादशकपालं वायव्यं देवत्यः पशुस्तद्देवतो भवति हविष्कृतावाचं। विसृज्य प
शुचित्रास्ति हृदयं जिह्वां वक्षो यकृद् वृक्कौ सव्यं दोः उभे पार्श्वे दक्षिणा श्रोणिर्गुदं तृतीयमिति दैवतानि। दक्षिणादोः

॥५

॥३५॥
॥देयेया॰६

सव्याः श्रोणिर्गुदस्तृतीयमिति सो विशस्ता निष्को मानं पुरीततं वनिष्ठुमध्यध्रौ वेदो जाघनी मित्युद्धरति गुदं माति ह्लीबी वनिष्ठुः ह्लो षीरिति संप्रेष्यति मा विपर्यस्त इत्यर्थो भवत्युदक्पात्रे चित्रे कुंभ्यां पशुमवधाय शूलं प्रणीक्ष्य हृदयं श्रामित्रे श्रपयंतिश्रवहननादिकर्म प्रतिपद्यते। वपया प्रचर्य पुरोडाशेन प्रचरंति शृतेवी पशाविंद्राग्निभ्यां पुरोडाशस्यानुब्रूहीन्द्राग्निभ्यां पुरोडाशस्य प्रेष्येति प्रेषायेति स्विष्टकृतः संप्रैषो प्राशित्र वदिडां नय जमानभागं हविरा छत्ती प्रमृती डांतः संतिष्ठत उपहूतां मैत्रावरुणषष्ठा भक्षयित्वा पूर्ववत्प्रस्तरे मार्ज यित्वा स्क्रवेण पृषदाज्यस्योपहत्य वेदेनोपयम्य त्रिः पृच्छति शृतं हविः शामितारिति शृतमिती तरः प्रत्याहाङ्घ्रिद्वितीयं प्राहाथ तृतीयमिति॥ ॥
काठके च॥ ॥स्थाल्यामवदानानि श्रपयति। शूले हृदयमसभिन्नेरवको श्रनिर्वाइ ते गुद वनिष्ठुर्गर्तिर खात्वा तस्मिन्नूवध्यं कुर्यात् पशुपुरोडाशाय पात्रशेषं प्रयुनक्ति। यद्देवत्यः पशुस्तद्देवत्यं त्रीहिमयमेकादशकपालं वा प्रणयनोदितुल्य प्रास्येभ्यो व्युह्य बर्हिरात्स्येभ्यो निनयति। शृते पशौ पशुपुरोडाशेन प्रचरति यदि बहवः पशुपुरोडाशा वा स्युर्जुहूपभृतो रूपस्तीर्य जुहूकामवदायाभिघार्येभ्यः स्य वदायानभिघार्येत्तमस्या भिघारणमनुसौविष्टकृतमभिघारयेदुत्तरक्कुचसहोपभृतं देवमेव कुर्यादिन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीत्या श्राव्याहेन्द्राग्निभ्यां पुरोडाशस्य प्रेष्येति इष्टे स्विष्टकृतो ताम्र वरत्यग्नये पुरोडाशस्येति संप्रेषः पुरोडाशयोः पुरोडाशानामिति चेडासुपहूय पृषदाज्यस्य स्क्रवेण वेदोपयामेनोदायाह शृतं हविः शामिती२ रिति शृतमिति शामिता प्रत्याहैवमध्य एवं गा

॥३५॥
॥भाष्या॰६

त्वेति। अतः पुरोडाशोपात्रासादनादिभागपरिहरणांतं संनिपत्योपकारकं सर्वं पृथक्कर्तव्यं। आरादुपकारं तु प्रयाजादि पाशुकमेवात्र प्रसंगादुपकरोतीति साधारणमेव भवतीति सिद्धं॥ ॥पशुदक्षिणा धेनुर्वरो वा॥७॥ मार्जितोऽसन्निधानात् पशुपुरोडाशोऽमार्जनांतेगवादिजातीयः पुशुर्दक्षिणा। अथवा धेनुर्दक्षिणा। अथवा वर इति। वरशब्देन त्विग्भिर्लक्षितं हिरण्यवस्त्रगवादिकं यत्। यजमानेन दातु शक्यते तदभिधीयते। मार्जित इति ग्रहणाच्चेभागपरिहरो पिपश्चिडामार्जनपवित्रप्रतिपत्यनंतरमेव प्राकृतं कर्मणा कर्तव्य इत्युक्तं। अपरे तु इहैमेव कुर्यात्पुरोडाशेडायामेवोद्धृतायां दक्षिणा नयेदिति क्वचनादिडाभक्षात्पूर्वमेव दक्षिणादानमिच्छंति तेषां मार्जित इत्यत्र सूत्रे संबध्यते। मार्जिते शामितारं शास्ति। एतच्च व्याख्यानं युक्तमिवाभाति। परंतु मार्जित इत्येव उत्तरसूत्रेण संबध्यमानो व्यर्थं एव भवेति। मार्जनानंतरं शामितुः शासनस्याश्रुतिविरुद्धत्वात्। श्रुतो पशुपुरोडाशेन प्रचर्यायं पशुं चिशास्ती त्युक्तं। अतो मार्जनानंतरं पूर्वं पशोर्विशासनाद्य धिश्रयणांतं। ततः शात्रनुशासनमिति। तत्सूत्रं सूत्रेणैवोपपत्तो मार्जित इत्यस्य संबंधः। न मात्राचार्येण पश्वधिश्रयणानंतरं पशुपुरोडाश उपदिष्टः। स तु चेपामार्जनानंतरमेव कर्तव्यः॥ श्रुतपश्चे तथाश्रुतत्वात्। यद्देवत्यः पशुर्भवति तद्देवत्यं पुरोडाशमनुनिर्वपतीति प्रकृत्या श्रपद्वयया प्रचर्यते न पु

ग्रा

णा

१

ना

॥३६॥ ॥देवयाज्ञि॥

रोडाशेनप्रचरतीत्युक्तो अथपशुंविशास्तीत्युक्तं। तथा अभिषेचनीयेपि। सवैदीक्षते स उपवसथ्ये अग्नीषोमी
यंपशुमालभते तस्य वपाया प्रचर्याग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपतीति श्रुतेः। अतो वपामार्जना
तएव पात्रासादनादिमार्जनांतः कर्मापवर्गो तो वा पशुपुरोडाशः कर्त्तव्यः। ततः पशुविशसनादि उखायात्तो हृ
वाप्यवदानप्रक्षेपणांते। ततः शमितारं शास्तीति। अत्र पशुविशास्ती सत्र हरिस्वामिनः। हृदयादित्योवदानश्रुतेः
पशोर्विशसनसमर्थप्राप्तमेव किमर्थमुच्यते। पशुपुरोडाशप्रचारोत्तरकालं कथं नाम विशसनं स्यादिति। व
शास्तीति शासु अनुशिष्टौ इत्येष धातुर्विपूर्वो विशसने वर्तते। कः पुनः पशुं विशास्ति। शमिता। कुत एतत्। वि
सितुः प्रच्यावयतादित्यादिनानुशिष्यमाणत्वात्। तत्र चयत्वोपछाच्छृतं हविः शमितारित्यत्र शमितुरेव दर्श
नात्। काण्वानां त्वथैनं पशुं विशास्ति तमाह त्रिः प्रच्यावयतादिति पठ्यते। तस्यार्थः। यः एनं पशुं विशास्ति तमा
ह त्रिः प्रच्यावयतादिति। मध्यंदिनानामपि विशसमानं त्रिः प्रच्यावयतादिति मंत्रः पठितः सलिंगात्के मंत्रे
तेश्च शमित्रनुशासने एव विनियोज्य इति। तस्माच्छमितुरपि पशुविशसनं श्रुतिमूलं। आचारोपि तथैवास्ती
ति साधीय एवेदमंतं॥७॥ ॥शमितारं शास्ति त्रिः प्रच्यावयतात्त्रिः प्रच्युतस्य हृदयमुत्तमं कुरुतादापच्छो
एछाच्छृतं हविः शमितारेरिति श्रृतमित्येव ब्रूतान्नश्रृतं भगवो नश्रृतं हीति॥ ॥७॥ अवदानान्मुख्या

॥३६॥ ॥आध्या६

यां प्रक्षिप्यानंतरमेव शमितारं शास्ति शिरव्ययति त्रिः प्रच्यावयतादित्यादिना। अयमर्थः। हे शमितं त्वं प
शुं त्रिः प्रच्यावयतात् प्रच्यावय। त्रिः पशुमुत्कोलयेत्यर्थः। त्रिः प्रच्युतस्य ऊर्ध्वमावृत्तस्य हृदयमुपरिस्थापय
तीयेत् यदा त्वां कश्चित् पृच्छात् पृच्छेत् कथं। श्रृतं हविः शमिता३रित्येवं। तदा त्वं श्रृतमित्येव ब्रूतात् ब्रूहि। न हि
पुनरेवं ब्रूतात्। कथं। नश्रृतं भगव इति तथा एवमपि ब्रूयात्। कथं श्रृतं हीति। तदुक्तं भवति। श्रृतमित्येतावदेवात्र ति
वक्तव्यं। भगवच्छब्दो वा हि शब्दो वा न परत उच्चारणीय इति। अनेके पाशुके ति त्रिः प्रच्युतयोः हृदये उत्तमे कुरुता
तु। इति पशुद्वये। त्रिः प्रच्युतानां हृदयान्युत्तमानि कुरुतादिति बहुषु च विपरिणामः॥ केचित्त्रिःप्रच्युतस्येत्यस्य पद
स्य हविः परत्वमन्यमाना अनूहमिच्छंति। तदयुक्तं। अस्य पशुपरत्वाया श्रुत्यैव प्रकटितत्वात्। तत्त्रिःप्रच्युते प
शाविति। तेनास्यापि पशुचने केत्वे यथार्थमूहो भवत्येव। अत्र द्वे अनुशासने। त्रिः प्रच्यावयतादित्येकं। यत्वा
पछादिति द्वितीयं॥ अतस्तृतीयसवने शमित्रनुशासन प्रभजीडा तंहत्वेत्यत्र द्वितीयशमित्रनुशासन प्रभृ
ति ज्ञातव्यं। पूर्वानुशासनस्य कार्यस्य प्रातःसवन एव क्रियमाणत्वात्तत्रैव कर्त्तव्यं॥ ॥त्रिःप्रच्युते हृद
यं प्रवृत्योत्तमं करोति। एवमनुदिष्टः शमिता पशुं त्रिः प्रच्यावयति त्रिरुत्कोलयति ततस्त्रिःप्रच्युते पशौ हृ
दयं प्रवेद्य शूलात्त्रिः कृष्येनिः कारयावदानानामुत्तमं करोति उपरिस्थापयतीत्यर्थः। तत्रिःप्रच्युते पशो हृदयं त्र

॥३७॥
॥दे०९०६॥

वृक्षोत्तमं ग्रस्य वदधातीति श्रुतेः॥ ॥शूलं चानूमौ। हृदयादिः क्षाशनानंतरं शूलं चानूमौ कुर्यात्। अथ हृदय शूलं प्रपच्छति। तन्न पृथिव्यां प्रास्येन्नाप्सु इति श्रुतेस्तात्। शमिता हृदयशूलमध्वर्यवे प्रयच्छति स अध्वर्युस्तद्धृदयशूलं न पृथिव्यां नाप्सु निक्षिपेत्। शुलावभृथकालं यावत् कचिदुपधारयेदित्यर्थः॥ ॥जुह्वां पृषदाज्य स्यादायोपनिष्क्रम्य पृच्छति शृतं हविः शमिता३ रितित्रि रभिक्रामन्॥ ॥जुह्वां पृषदाज्यस्थालीस्थस्य पृषदाज्यस्यैकदेशमादाय चात्वाललोत्करावंतरेणोपनिष्क्रम्य शमितुः समीपे गत्वा अभिक्रामन्नतिक्रम्य शृतं हविः शमिता३ रित्येवं त्रिः शमितारं पृच्छति। एकवारं अभिक्रम्य शमितृसंमुखं क्रमणं कृत्वा शृतं हविरिति शमितारं पृच्छति॥ ॥प्रोक्ते तद्देवानामिति त्याहोपांशु। शृतमिति वै शमित्राप्रोक्ते तद्देवानामित्येवमध्वर्युरुपांश्वाह। ततः पुनरभिक्रम्य द्वितीयवारं पृच्छति। पुनः शृतमिति शमित्राप्रोक्ते तद्देवानामिति त्युक्त्वा पुनरप्यभिक्रम्य तृतीयवारं पृच्छति। पुनरपि शृतमिति शमित्राप्रोक्ते तद्देवानामित्याह। अथ जुह्वां पृषदाज्यस्योपहत्याध्वर्युरिति। तथा त्रिष्कृत्वः पृच्छति त्रिवृद्धि यज्ञ इति च श्रुतेस्त्वात्॥ ॥सं ते मन इति हृदयमभिघार्य सर्वांत्र प्रतिवचनानंतरमध्वर्युः पशुरवा समीपे उपविश्य सं ते मन इति मंत्रेण जुह्वास्थेन पृषदाज्येन हृदयं पूर्वमभिघार्य तूष्णीं सर्वं पशुमभिघारयति। पृषदाज्येनैवेति केचित्। आज्येनेत्यपरे। तथा चापस्तंबः। शूलात्र

॥३७॥
॥बोध्य॥

९५

वृत्य हृदयं कुंभ्यामवधाय सं ते मनसा मन इति पृषदाज्येन हृदयमभिघारयेत्युत्तरतः परिक्रम्याज्येन पशुमिति॥ कात्यके च॥ प्रवृत्य शूलाद्धृदयमभिघारयति पशुं चेति। स हृदयमेवाग्रेभिघारयति सं ते मन इति च श्रुतेस्त्वात्॥ ततउत्तरतउखायाउद्वासने। उद्वासयंति पशुमित्युक्तात्। ततोऽवदानान्युखायाउद्धृत्य कस्मिंश्चिद्विपुले वंशपात्र्यादिके पात्रे उदक्संस्थानि निधाय हृदयादीनामेकादशानां प्रत्येकं प्राणदानं कुर्यात्। न सौविष्टकृतादीनां। तूष्णीं च वसायाः। अत्र हृदयादीन्येव हवींषि। पशुस्तु त्रीहयवत्प्रैति द्रव्यं। अतो हृदयादीनां प्रत्येकं यागसाधनेह विद्धर्मः प्राणदानासादनालंभा भवंति। मध्यात्पूर्वार्द्धाद्वदानं च भवतीति हरिस्वामिनः॥ ॥ पश्चसौ वपावद्धृत्वा दक्षिणतः प्रतिप्रस्थाता वेद्यां लक्षशाखायां स्वधति। पश्चसौ वपा वद्धृत्वा पशुशब्देन हृदयादीन्यवदानान्युच्यंते। असिश्चावदानार्थः। तदुभयं वपावदित्यं तरा यूपाग्नी हृत्वा वेद्या दक्षिणतो वेदेर्दक्षिणभागे दक्षिणश्रोणिदेशे बर्हिष्यासादयत्यध्वर्युः। प्रतिप्रस्थाता तु प्लक्षशाखासु हृदयान्यवद्यति अवपंडयति॥ असिनाच्छिनत्तीत्यर्थः। उत्तरत आसादनप्राप्ते दक्षिणत इति वचनाद्दक्षिणत आसादनं। पशोः सान्नाय्यविकारत्वात्कुंभ्यां स्थस्यैवासादनप्राप्ते वेद्यामिति वचनाद्वेद्यामासादनं। अवदानमात्रे प्रतिप्रस्थातुः श्रवणाद्यालंभनं तमध्वर्येरिव। जौहवाना बर्हिषि प्रत्येकं मंत्रवदासादनमुदक्संस्थं। आलंभनं च। जाघन्याश्च

व
ण

॥३८॥
॥देव०१६

सायास्तूष्णीमासादनमालंभनं च। सोविष्टकृतानां भागावदानां चासादनालंभनेन भवतः। तं जेनन चात्वा
लं मंतरेण यूपं चाग्निं चाहरति दक्षिणतो निधाय प्रतिप्रस्थाता वद्य तिः प्लक्षशाखा उत्तरबर्हिर्भवति ता अ
ध्यवद्यतीति श्रवणात्। ताः प्लक्षशाखा अधिता सामुपर्यवद्यति अवपड्य तीत्यर्थः॥ ॥जुहूपभृतोरुप
स्तृणीते वसाहोमहवन्यां पात्र्यां च॥ सादनालंभनानंतरमध्वर्युर्जुहूपभृतोराज्यमुपस्तृणीति। ततो वसाहो
महवन्यां। ततः प्राशित्रहरणे। ततः इडापात्र्यामिति। अथाज्यमुपस्तृणीते जुह्वां चोपभृति च वसाहोमहव
न्यां पूर्व समंत्र धान्यामथ हिरण्यशकलमवद्यति जुह्वां चोपभृति चेति श्रुतत्वात्॥ हूयत इति होमः। वसा चा
सौ होमश्च वसाहोमः सहूयते यया सा वसाहोमहवनी स्रुक् द्वितीया जुहूः। सैव तंधीयते यया सोमवत् धा
नीडापात्रीत्यर्थः॥ ॥ ॥मनोतायै हविषो वदीयमानस्यानुब्रूहि ... जुहूर्जुचो
रवद्यति यथोक्तं द्विर्द्विः॥ रिति मध्यात् पूर्वार्द्धाच्चि स्रुचो जुहूपभृतोरवद्यति। एकादशावैपशोरवदानानि तानि
द्विर्द्विरवद्यतीति शाखांतरात्। उपभृतानामपि द्विर्द्विरवदानं भवति। गुदं द्वेधा कृत्वा वद्यतीति विशेषात्। गु
परिष्टाद्द्विरभिघारणानुपदेशाच्च। यथोक्तमिति। जौहवानि जुह्वां यौपभृतान्युपभृतीति। अणोपेगुदतृतीयं"
गुदतृतीयं शोपेनिः शेषे अवद्यति द्विर्द्विः। गुदं त्रेधा करोति स्थविमोपयज्ञमध्यं जुह्वां द्वेधा कृत्वा उव

मनोतायै हविषो वदीयमानस्यानुब्रूहीस पर्युणामेत्राः स्तणं प्रत्युके सति प्रतिप्रस्थाता यथोक्तं द्विर्द्विः ४

॥३८॥
॥भाष्या०१६

द्यतीति यथा गुदं त्रेधा कृत्वा वद्यतीति कृत्स्नयोरेव द्विर्द्विरवदानश्रवणात्॥ ॥वपावद्धिरण्यम्॥ ॥
अत्र जुहूपभृतो वपावद्धिरण्यमवदधाति वपावदित्युपस्तारानंतरं आगुपरिष्टादभिघाराच्च॥ तथैव श्रुतत्वात्॥ ॥ व
आपस्तंबः। अंतरा यूपमाहवनीयं च दक्षिणा तिष्ठन् पंच होत्रा षट्हौत्रा वा दक्षिणस्यां वेदिश्रोण्यामासाद्यो
पस्तृणीते जुहूपभृतौ वसाहोमहवन्यां समवत्तधान्यामिति जुहूपभृतो हिरण्यशकलावधाय बर्हिषि प्लक्ष
शाखायामवदानान्यवद्यत्संप्रेष्यति मनोतायाइत्यादि। काठके च। अग्रे हृदयस्यावद्यत्याह मनोतायाइति। आ
पस्तंबसूत्रे सौविष्टकृतानां सकृत्सकृदवदानमुक्तं। यथोद्धृत देवतानां द्विर्द्विरवदाय जुह्वामवदधात्युभृति
सौविष्टकृतानां सकृत्सकृदिति। कठसूत्रे। सौविष्टकृतानामेव सर्वेषां द्विरिति। अथ मनोतायै हविषो नुवाच आ
हेति प्रकृत्य हृदयस्यैवाग्रे वद्यतीति श्रुतं। तस्यार्थः। हृदयस्य मांसपिंडस्यैकदेशमिति विशेषः। अवद्यति अव
खंडयति मध्यं पूर्वार्द्धं च। अग्रे प्रथमं जिह्वाद्यपेक्षयेति हरिस्वामिनः। तथा अथ जिह्वायै साहीयं पूर्वार्द्धमिति
कृत्य अथ वक्ष्यसस्तद्द्विरतोथैकचरस्य दोष्णोथ पार्श्वयोरथ तनिम्नोथ वृक्कयोर्गुदं त्रेधा करोति स्थविमोपयज्ञो म
ध्यं जुह्वां द्वेधा कृत्वावद्यत्यणिमं त्र्यंगे षु थैकचरायै श्रोणेरेतावन्नु जुह्वामवद्यतीति क्रमेणैतेषां जुह्वामवदान
श्रवणात्। जुह्वामवत्तानामुत्तरत्र होमो वक्ष्यते वपकृते जुहोति यानि जुह्वामवदानानि भवंतीति। तद्द्वारेण हृ

॥३९॥
॥दे०२०६

दयादीनां हविषां प्रधानयागसाधनत्वं च सेत्स्यतीत्येवमर्थमित्तावत्तु जुहूामवद्यतीति वचनं। ननु चोदकेनैव जु
